तत् सत्

शब्दार्थचिन्तामणिः

अर्थात्

गीर्वाणभाषासाहित्यशास्त्रानेककोशादिभ्यः सङ्गृहीतानामकाराद्यर्णक्रमेण विन्यस्तानां शब्दानां तत्तल्लिङ्गनानार्थैकार्थपर्यायप्रयोगोल्लेखेन पाणिन्युक्तनिरुक्तिसूचनेन तत्तदर्थस्फुटीकरणेन तत्तच्छब्दप्रस्तावागतवेदाङ्गस्मृतिपुराणागमेतिहासादिप्रयोगैः खदिरिल्यसङ्गीतादिशास्त्रीयविषयाणां वर्णनैः अश्वास्त्रधातुरत्नादिपरीक्षाभिर्ग्राम्यारण्यपशुपक्ष्यादिलक्षणैर्दुर्गार्गलेन सजलनिर्जलभूमिपरिज्ञानेनोद्यानवृक्षायुर्वेदेन द्रव्यगुणरोगनिदानादिभिरलङ्कारच्छन्दःप्रभृतिनामलक्षणोदाहरणैश्च संयुक्तोखिलशास्त्रमताभिद्योतकः

सहृदयहृदयाह्लादैकाग्र्यः ॥

तस्यायमवर्गकवर्गात्मकः प्रथमोभागः

Sa.A.K.
SUK

ब्राह्मावधूतश्रीसुखानन्दनाथेन विनिर्मितः

एकविंशत्यधिकोनविंशतितमे १९२१ वैक्रमे ऽब्दे आगरेति साधारणतया विख्याते क्षुद्रपुरे आदिगौडश्रीघासीरामकनछियालालयोर्व्यये नतयोर्निजे संस्कृतयन्त्रालये श्रीरामप्रसादेष्टयामुद्रापिया ऽभिव्यक्तः

तत् सत्

श्री. नरसिंहपुर-
कोबातीर्थ-
नं. 20

शब्दार्थचिन्तामणेर्मुखबन्धः तद्यथा

श्रीजगदानन्दनाथः

नमो गुरवे ॥ श्रीमद्गौडकुले नितान्तविपुले ऽदीचप्रयोत्थेऽतुले जातः पुष्कररान्न इत्यभिधया ख्यातो धरामण्डले । यत् सौजन्यसुधासरित्यतितरङ्गान्दोलनानन्दिता विद्वौदार्यदयादिशेवधिपराःसर्वे बभूवुर्जनाः ॥ १ ॥ श्री नन्दलालः सुकृते विशाल स्तुलादिरामस्तुमनोऽभिरामः । तदात्मजा वप्रति मप्रभावौ श्रीरामरामानुजनैजभावौ ॥ २ ॥ श्रीनन्दलालपत्नी सुषुवे सुनुत्रयं सुता मेकाम् । प्रथमस्तु शम्भुनाथोऽन्तरजो रामप्रसादाख्यः ॥ ३ ॥ मोती रामोऽवरजः सर्वे सकलार्थतत्त्वज्ञाः । देवी सुलक्षणासीद् याहि सती शील सम्पन्ना ॥ ४ ॥ विदत्तुलारामसुतो भवानीशङ्करोऽभवत् । ज्येष्ठ श्रेष्ठमति र्नीति संसारासक्तमानसः ॥ ५ ॥ द्वितीयः शम्भूतो धनपतिपुरो राज इति यं कुलीना नामैनं जगति कृतवन्तो मुमुदिरे । प्रकृत्या ऽऽजन्माऽसौ विरक्ततरकर्मा तिरस्किो ह्यगा दप्रत्यक्षं निजजनत एकः शिवपुरीम् ॥ ६ ॥ चिच्चन्द्राब्दायुष्मान् परमपरतत्त्वं विविदिषुः पठित्वा शास्त्राणि प्रतिहरिहरानन्दपदतः ॥ प्रतीतं नाथाख्यं निखिलनिगमार्थैकसुधियं गतो ऽयं योगीन्द्रं कुशलमवधूतं कुलगुरुम् ॥ ७ ॥ प्रीत्या नमस्या सन्तुष्टः सद्गुरुः करुणानिधिः । त्वं सुखानन्दनाथो सी त्याचष्ट हि यथो चितम् ॥ ८ ॥ ब्राह्मावधूतपदवीं प्राप्य देशानने कशः ॥ गाहं गाहं बहुविधान् दर्शं दर्शं जनव्रजान् ॥ ९ ॥ ज्वालामुखीं मया देवीं जालन्धरनिवासिनीम् ॥ जग्मिवान् सुचमं पश्यं स्तत्र स्थिति मुपाश्रयत् ॥ १० ॥ यात्राप्रसङ्गतो ऽस्मिन् भर्त्तीदेशाधिप स्तदा मतवान् ॥ राणादिरूढ पालोऽमृतपालसुतो महोदारः ॥ ११ ॥ पर्वतराज शुतुर शुतुर्षु यत्नेषु दीचितो विद्वान् ॥ श्रीरुद्रमणे शिष्यो ऽमुं विचरन्तं यदाद्राक्षीत् ॥ १२ ॥ आहूय शुतवाणीजनितस्नेहो निनीषुरनुकूलः ॥ शुश्रूषया स्वदेशं तं प्रार्थ्यानी

कृद० .... कृदतिङ्॥
क्रतू० .... क्रतूयक्सादिसूत्रान्ताट्ठक्॥
क्रमा० .... क्रमादिभ्योवुन्॥
खं० .... खण्डिकादिभ्यश्च॥
ख० .... खर्जोदिभ्यश्च॥
खर्प० .... खर्परादिभ्यश्छश्चौ॥
खला० .... खलादिभ्यश्चनिर्वक्तव्यः॥
ग० .... गर्गादिभ्योयञ्॥
गम्भी० .... गम्भीरादयश्चेतिईरन्॥
गहा० .... गहादिभ्यश्चेतिछः॥
गु० .... गुपादिभ्यःकिदितिडतच्॥
गुडा० .... गुडादिभ्यष्ठञ्॥
गौ० .... गौरादिः॥
गौ० भा० गौडभाषा॥
गृधृ० .... गृधृवादिभ्यश्चेतिढक्॥
ग्रदि० .... नन्दिग्रहिपचादिभ्योल्युणिन्यचः॥
चतु० .... चतुर्वर्णादीनांस्वार्थेउपसंख्यानम्। ष्यञ्॥
चु० .... चुरादिः॥
छ० .... छन्नादिभ्यः॥
छान्० .... छान्दसः॥
छा० भा० .... छान्दोग्यभाष्यम्॥
छे० .... छेदादिभ्यो नित्यमिति-ष्ठक्॥
ज० .... जनादयश्चेतिसाधुः॥
जु० .... जुहोत्यादिः॥
ज्व० .... ज्वलादिभ्यःणः॥
ज्यो० .... ज्योत्स्नादिभ्योऽण्॥
त० .... तथाच॥
त०छ०प० .... तदुक्तं छन्दोगपरिभिष्टे॥
तडा० .... तडागादयश्चेतिनिपातः॥
त० प० .... तत् पञ्चविधम्॥
तर० .... तरप्तादिभ्यश्चेत्यङ्क्च्॥
ता० .... तारकादिभ्यश्चादितच्॥
ति० .... तिकादिभ्यःफिञ्
तुन्० .... तुन्दादिभ्यश्चखञ्चेतिद्वनिश्च
तु० .... तुदादिः
तुरा० .... तुराद्यश्चेत्यारन्॥
दं० .... दण्डादिभ्यश्च यत्॥
दाम० .... दामन्यादिभ्यश्चगर्त्तेषष्ठाच्छः॥
दि० .... दिगादिभ्योयदिति यत्। दिवादिः॥
दी० .... दीपिका॥
दृ० .... दृढादिः। वर्णदृढादिभ्यः ष्यञ्च। ष्ट्यनिच्च॥
नं० .... नन्द्यादिभ्यश्चल्युः। नन्दिग्रहिपचादिभ्योल्युणिन्यचः॥
नडा० .... नडादिभ्यश्चफक्। नडादीनांकुकेतिछः॥
नद्या० .... नद्यादिभ्योढगितिढक्॥
न्यङ्० .... न्यङ्कादिभ्यश्चकुञ्च॥
न्या० .... न्यायसूत्रम्॥

ना० ..... नारदः ॥
नि० ..... निपातः ॥
नि० ..... दिदानम् ॥
नै० ..... नैषधः ॥
प० ..... पचाद्यच् । पक्वाशाद्यञ् ॥
प० ..... नन्दिग्रहिपचादिभ्यो ल्यु णिन्यचः ॥
प०प० ..... पराशरपद्धतिः ॥
पर्क० ..... पर्कटीकादयश्चेति कन् ॥
प०भा० ..... पर्वतभाषा ॥
पर्प० ..... पर्पादिभ्यश्छन् ॥
पर्श्वा० ..... पर्श्वादिभ्यो ध्येयादिभ्यो ऽण् ञ्यौ ॥
प०सं० ..... पराशरसंहिता ॥
पा० ..... पामादिभ्यो नः ॥
पा०पा० ..... पाद्मे पातालखण्डः ॥
पाप्मा० ..... पापाच्चलस्येति स्त्रीत्वं न ॥
पारस्क० ..... पारस्करादिभ्यः सुट् ॥
पाश० ..... पाशादिभ्यो यः ॥
पि० ..... पिच्छादिभ्यः इलच् ॥
पिञ्छ० ..... खर्जे पिच्छादिभ्यश्च रोल चर्चावित्यूलच् ॥
पिना० ..... पिनाकादयश्चेत्याकः ॥
पु० ..... पुष्करादिभ्यो देशेऽन्यतरस्यां इनिः । पुराणम् ॥
पुरो० ..... मत्स्यन्तपुरोहितादिभ्यो यक् ॥
पृ० ..... पृषोदरादीनि यथोपदिष्टम् ॥
पृथ्व० ..... पृथ्वादिभ्य इमनिज्वा ॥
प्र० ..... प्रसिद्धः । प्रज्ञादिभ्यश्चेति स्वार्थेऽण् प्रत्ययः ॥
प्रति० ..... प्रतिजनादिभ्यः खञ् ॥
प्रा०वि० ..... प्रायश्चित्त विवेकः ॥
फ० ..... फलम् ॥
ब० ..... बलादिभ्योमतुप् ॥ वसिष्ठः । बहुलमन्यत्रापीतिवुच् ॥
बङ्क० ..... बङ्क्यादयश्चेति किन् ॥
बला० ..... बलाकादयश्चेत्याकः ॥
बस० ..... बसन्तादिभ्यश्छक् ॥
बह्वा० ..... बह्वादिभ्यश्चेति ङीष् ॥
ब०छ० ..... बर्णवृत्तप्रभेदः ॥
बा० ..... बाहुलकात् । बाह्वादिभ्यश्छादिक् ॥
बा०पु० ..... वायुपुराणम् ॥
बाहि० ..... बाहितान्यादिषु ॥
बि० ..... बिल्वः । बिल्वादण् ॥
बिडा० ..... बिडादिभ्यः किदित्यञ्च् ॥
बिद्या० ..... अन्तर्ध्यानस्तये विद्यादिभ्यो ऽङ् ॥
बि०ध० ..... विष्णुधर्मोत्तरम् ॥
बिन० ..... विनयादिभ्यष्ठक् इति स्वार्थेठक् ॥
बि०पु० ..... विष्णुपुराणम् ॥
बी० ..... बीरमित्रोदयः ॥
बे०भा० ..... बेदभाष्यम् ॥

नयद् यथायोग्यम् ॥ १३ ॥ सोऽयं प्रसन्नहृदयो महाशयाहैतुकीभक्त्या ॥ अर्पितरणभद्राख्यं तत्सुतं पाठयन् न्यवसत् ॥ १४ ॥ निश्चिन्तो विरले समन्तत उपेतेष्टार्थसिद्धि स्तत श्चिन्तां तव समासदद् द्विजकुले दृष्ट्वा कले रापदा ॥ सौख्यं तस्य तुशान्तये निखिलशास्त्रार्थोज्झहीर्षुं मुदा व्याख्यत् कोशकलाधरं कलिहरं शब्दार्थचिन्तामणिम् ॥ १५ ॥ गङ्गातीरे कदम्बाले शिवेन शिवतां व्रते ॥ चात्वा नैमित्तिकाभावं निमित्ताभावसङ्गतौ ॥ १६ ॥ इन्द्रप्रस्थं पुनःप्रत्यागन्ता मनसि चिन्तयन् ॥ कथ मेतस्य कोशस्य स्यात् प्रवृत्ति निरन्तरा ॥ १७ ॥ प्रस्तुतश्चीनन्दलालदेहिवौ श्रेयआश्रयौ ॥ कोविदौ व्यवहाराणां प्राय.सुप्रनिवासिनौ ॥ १८ ॥ चुन्नीलालाग्रजो घासीरामनामा प्रतापवान् ॥ धनिमान्यो राजमान्यः स्वभुजार्जितसद्यशाः ॥ १९ ॥ बालप्रवासिनं दैवनोदितो दूरदर्शिनम् ॥ स मातुल मनुप्राप्य कृत्वालापमनोगतम् ॥ २० ॥ कोशप्रशंसां प्रस्तावे श्रुत्वा तस्योत्सुकं मनः ॥ तन्मुद्रीकरणायाशु यदाचार्य मवोभवेत् ॥ २१ ॥ परेश्वरकराङ्केकमिते १९२१ विक्रमहायने ॥ तदैव मुद्रितोभागःप्रथमः साङ्ग इत्यभूत् ॥ २२ ॥ उत्तमश्लोकशिष्येण श्रीपादाम्बुजसेविना ॥ धर्म्मीसारस्वतेनैभिरिन्द्रप्रस्थनिवासिना ॥ २३ ॥ जगदानन्दनाथेन पारम्पर्यानुवर्त्तिना ॥ जगदीशेपनावैषा श्लोकैरद्यघटिता कृतिः ॥ २४ ॥ * ॥ * ॥

अथ शब्दार्थचिन्तामणेः संकेताक्षराणां विवरणम् ॥

अ० ..... अर्हादिभ्यश्च ॥ अस्मा दिभ्यःफञ् ॥	अनु० उ० अनुप्रतिकादिभ्यादुभयप दवृद्धिः ॥
अघ्० ... अघ्रादिभ्यश्चेति यक् ॥	अन्य० ..... अन्यचायीतिडः ॥
अङ्गु० ... अङ्गुल्यादि भ्यष्ठक् ॥	अन्ये० ..... अन्येषामपीति दीर्घः ॥ अन्येभ्योपीतिडः ॥ अन्येभ्यो पिदृश्यतेदृतिवः । वलः ॥
अजा० ..... अजादिभ्यष्टाप् ॥	
अध्या० ..... अध्यात्मादिभ्यष्ठञ् ॥	

अन्येभ्योपि दृश्यते क्विप्॥
अन्येभ्योपिदृश्यतेइति यप्
॥ अन्येभ्योपिदृश्यन्ते॥ मनि
न्क्वनिप्वनिप् विच एते॥
अन्येष्व० अन्येष्वपि दृश्यतेइतिडः॥
अब्० अब्दादयश्चेतिसाधुः॥
अर्० अर्शआदिभ्योऽच्॥
अलीं० अलीकादय श्चेति की-
कन्॥
अश्रु० अश्वादयश्चेतिसाधुः॥
अश्व० अश्वपक्ष्यादिभ्यश्चेत्यण्॥
आ० आकर्षादिभ्यः कन्॥
आद्या० आद्यादिभ्य उपसङ्ख्यान
मिति तसिः॥
इ० इति॥
इ०वि०ति० इतिविष्णुपुराणतिलके
इ०रा० इतराभ्योपि दृश्यन्ते तसि
लादयः॥
इष्० इष्टादिभ्यश्चेति इनिः॥
उ० उक्थादिभ्यश्चात् ठक्॥
उत्० उत्सादिभ्यश्चेत्यङ्॥
उद्० प्राग्भृज्जातिवयोवचनो
द्गात्रादिभ्योऽञ्॥
उदा० उदाहरणम्॥
उर्० उरःप्रभृतिभ्यः कप्॥
उल्० उल्लादयश्चेति वचनात्-
साधुः॥
उलू० उलूकादयश्चेत्यूकः॥

कट्० कटवरणादिभ्यः क्विन्निष्ठाव
द्वाच्यः॥
एतद्वि० एतद्विवरणम्॥
कं० कण्ड्वादिभ्यो यक्॥
क० कर्ममीमांसायाम्॥
कश्० कश्चित्॥
कच्० कच्छादिभ्यश्चेत्यण्॥
कत्० कत्र्यादिभ्योढकञ्॥
कपि० कपिलकादित्वाल्लत्वम्॥
कम० कमलादिभ्यः खण्डः॥
कल्या० कल्याण्यादिभ्यश्चाट्ठक्
ढूनङ्ढञश्च॥
का० काश्यपः। काश्यादित्वात्
ञिठः॥
का०पु० कालीपुराणम्॥
कालि० कालिदासः॥
का० कादिभ्यः किदितिडः॥
काशी० काशीखण्डम्॥
का०सु० कापिलसूक्तम्॥
कि० किसरादिभ्यश्छन्॥
किशो० किशोरादयश्चेत्योरन्॥
कु० कुर्वादिभ्योण्यः॥
कु० कुटादिः॥
कुला० कुलालादिभ्योवुञ्॥ कुला
र्णवः॥
कू० कूर्मपुराणम्॥
के० केचित्॥
कृ० कृत्वादिभ्यः संज्ञायांवुन्॥

वेत० ..... वेतनादिभ्यो जीवतीति-
ठन् ॥
वै० ..... वैदिकप्रयोगः ॥
वै०प० ..... वैद्यकपरिभाषा ॥
वै०म० ..... वैद्यकमतम् ॥
वृ० ..... वृद्धे ॥
वृचा० ..... वृचादिभ्यःखण्डः ॥
वृषा० ..... वृषादिभ्यश्चेदितिकल्पः ॥
वृह० ..... वृहद्धर्मपुराणम् ॥
व्यु० ..... व्युत्पत्त्या ॥
भाव० ..... भावप्रकाशः ॥
ब्र० ..... ब्रह्मवैवर्त्तपुराणम् ॥
ब्र०पु० ..... ब्रह्मपुराणम् ॥
ब्र०वै०ब्र० ..... ब्रह्मवैवर्त्ते ब्रह्मखण्डम् ॥
ब्रा० ..... गुणवचनब्राह्मणादिभ्यःकर्मणिचेतिष्यञ् ॥
व्री० ..... व्रीह्यादिभ्यश्चेतिइनिः ॥
व्या०व० ..... व्यासवचनम् ॥
भा० ..... भागवतम् ॥
भा०प० ..... भाषापरिच्छेदः ॥
भा०प्र० ..... भावप्रकाशः ॥
भार० ..... भारतः ॥
भि० ..... पिङ्गिलादिभ्योऽङ् ॥
भिक्षा० ..... भिक्षादिभ्योऽण् ॥
भी० ..... भीमादयोऽपादाने ॥
भू० ..... भूम्नि ॥
भ्वा० ..... भ्वादिः ॥
म० ..... मत्स्यीयः ॥
मनु० ..... मनुराद्यस्येति उरच् ॥
मनो० ..... वल्वमनोज्ञादिभ्यश्चेति ॥
म०भा० ..... महाभारतम् ॥
मयू० ..... मयूरव्यंसकादित्वात् ॥
मार्क० ..... मार्कण्डेयपुराणम् ॥
वुञ् ॥
महा० ..... महाभारते ॥ महाभारतम् ॥
मा०तं० ..... मायातन्त्रम् ॥
मि० ..... मिथिलादयश्चेति द्यच् ॥
मित० ..... मितद्वादित्वात् डुः ॥
मुं०तं० ..... मुण्डमालातन्त्रम् ॥
मू० ..... कप्रकरणे मूलविभुजादि ॥ व्यत्यसंख्यानमितिकः ॥
मूले० ..... मूलेरादयश्चेत्येरक् ॥
मृ० ..... मृगय्वादयश्चेतिकः ॥
मो० ..... मोक्षधर्मः ॥
य० ..... यजादित्वात् । यथा ॥
या० ..... यावत् । यावादिभ्यःकन् ॥
याज्ञ० ..... याज्ञवल्क्यः ॥
यु० ..... हायनान्तयुवादिभ्योऽण् ॥
यौ० ..... पर्श्वादियौधेयादिभ्योऽण ञौ ॥
र० ..... रसादिभ्यश्चेति मतुप् ॥
रा० ..... रामायणम् ॥
राज० ..... राजदन्तादिषु परम् ॥
राजनि० ..... राजनिर्घण्टः ॥
रेव० ..... रेवत्यादिभ्यष्ठक् ॥

ल० ..... लक्षणम् ॥
ली० .... लीलावती ॥
लो० .... लोमादिभ्यश्चेतिनच्चम् ॥
ल्या० .... ल्यादिभ्यश्चेतिनच्चम् ॥
व० ..... वकन्ध्वादिः ॥
वकं० .... वकादिभ्योटन् ॥
वम्० .... वमादिभ्योऽथच् ॥
वर्० .... वर्करादिभ्योण् ॥
वा० .. वाकपार्थिवादिः । वाखादिभ्योयः ॥
वार्० .. वार्क्षरवाद्यो ङीन् ॥
शि० .... शिवादिभ्योऽण् ॥
शु० .... शुभ्रादिभ्यश्चेतिढक् ॥
शुण्० .. शुण्डिकादिभ्योऽण् ॥
श्री० .... श्रीभागवतम् ॥
स० .. समासः ॥
स०कं० .. सरस्वतीकण्ठाभरणम् ॥
सं० .... सम्पदादिभ्यःक्विप् ॥
सङ्घ .... सङ्घादिभ्योण्यः ॥
संज्ञा० .. संज्ञापूर्वकत्वाद्वृद्ध्यभावः ॥
सम्० .. सम्मतारणम् ॥
सर्० .... सर्वधातुभ्योमनिन् ॥
सर्व० .... सर्वधातुभ्यइन् । सर्वधातुभ्यःष्ट्रन् । सर्वधातुभ्योऽसुन्
साद्यः .. साद्यित्यदर्पणः ॥
सि० .. सिध्वादिभ्यश्चेतिलच् ॥
सिन्० .. सिन्ध्वादित्वादण् ॥
सिमु० .... सिद्धान्तमुक्तावली ॥
सिशि० .. सिद्धान्तशिरोमणिः ॥
स्त्रि० .. स्त्रियाङ्क्तिन् ॥
सु० ... सुपामादिरुचेतियच्चम् ॥
सुवा० .. सुवास्त्वादिभ्योऽण् ॥
सूत्रा० .. सूत्रादिभ्यःप्रकारवचने कन् ॥
स्म० .. स्मरणम् । स्मृतिः ॥
स्वा० .. स्वार्थे ॥
ह० .... हरिवंशः ॥
हरि० .... हरितादिभ्योऽञ् ॥
हरी० हरीतक्यादिभ्यश्चेतिफल प्रत्ययस्यलुप् ॥
हे० ... हेमचन्द्रः ॥

इक्० .. इक्कृष्यादिभ्यः ॥
इञ्० ... इञ्वपादिभ्यः ॥
इण्० .... इणजादिभ्यः ॥
ण्वुल्० ... धात्वर्थनिर्देशे ण्वुल्वक्तव्यः । संज्ञायाम् ॥
क०० ... अज्ञाने । कुत्सिते । अल्पे । ह्रस्वे ॥
कन्० .. संज्ञायाम् । अनुकम्पायाम् । अवज्ञेमेकन् । इत्येवं तिकतौ । संज्ञायांच ॥
चुभ्० .... चुभ्रादिषु चेतिणत्वाभावः ॥

तत्सत्

श्रीगणेशाय नमः

अथ शब्दार्थचिन्तामणौमंगलम्

तत्रादौ मङ्गलाचरण मभिधेयादि कञ्च

नमः श्रीसद्गुरवे ॥ ॥ श्रीमद्धरिहरानन्दनाथाभिन्न स्वदेशिकम् । नारायणमहं वन्दे सच्छास्त्रज्ञान भास्करम् ॥ १ ॥ लम्बोदरं महाकाय मेकदन्त गजाननम् । गौरीप्रिय मुदा वन्दे सर्वविघ्नविनाशनम् ॥ २ ॥ नमो देवि महाविद्ये भजामि चरणौतव । देहिज्ञानप्रकाशमेनिखिलार्थ मसिद्धये ॥ ३ ॥ श्री शारदां शारद चन्द्रकान्ति हृदम्बुजे ऽभीतिवरं दधानाम् । पुस्त विपञ्चीं सुकरैः प्रसन्नां ध्याये ऽनिश जाड्यहरां त्रिनेत्राम् ॥ ४ ॥ वेद ब्रह्मादिभि र्ध्येय योगीन्द्रै र्धन्महत्पदम । सत् तत्त्व तत्त्व मस्यादिवाक्यै रिष्ट भवाम्यहम् ॥ ५ ॥ यद ज्ञानादिद जात यज्ज्ञानेविलयप्रजेत । तन्निर्गुण निर्विशेष ब्रह्मात्मान समाश्रये ॥ ६ ॥ कोशाननेकानवलोक्य यत्नाच्छास्त्राणि भूयः प्रविचार्य तेभ्यः । बालावबोधाय लिखामि शब्दान् सार्थान् सुसङ्गृह्यमुदे बुधानाम् ॥ ७ ॥

अल्पायुषो ऽल्पबुद्धींश्च द्विजान् दृष्ट्वा कृपा वथ । सुखानन्दोल्लिखेत्तत् कोषं सुखसुबोधदम् ॥ ८ ॥ सलिङ्गालिङ्गशब्दानां ज्ञानायतु पुरः पुरः । तत्तदा-वार्णलेखोहि समासार्थो विधीयते ॥ ९ ॥ जिज्ञासा यच कुत्रापि शास्त्रीये श-ब्द उद्भवेत् । तदैवैतत् पश्यता ऽनुभूयते कृतकृत्यता ॥ १० ॥ तावद् भ्रमति शब्दार्थचिन्ताव्याकुलमानसः । सुग्रहधानः स्थिरधीर्यावदेनं नपश्यति ॥ ११ ॥ चतुर्दशसुविद्यासु प्रायः शब्दो न तादृशः । मातृका नुक्रमे ना ऽच सपर्यायो निवेशितः ॥ १२ ॥ निदर्शनेषु शब्दानां तत्तच्छास्त्रसमुद्भृता । गद्यपद्यमयी वाणी वर्णितास्मिन् क्वचित् क्वचित् ॥ १३ ॥ केषाञ्चि देशभाषापि सुबोधा-य दर्शिता । अतः परोपकृतये कोन्यो भवितु मर्हति ॥ १४ ॥ शब्दार्थचिन्ता मणि नामभूतं कोशेषु सर्वेषुच रत्नभूतम् । श्रीमत्सुखानन्दबुधेन कृतं द्वि-जोपकारार्थ मिदं प्रभूतम् ॥ १५ ॥ पण्डितै राजधानिनां कृता ग्रन्था ह्यनेकशः । धनादये तुस्या देतत् सर्वान्तर्यामितुष्टये ॥ १६ ॥ १९२० ॥ खनेत्रग्रहभूयुक्ते वैक्रमे वत्सरे शुभे । मार्गस्यासितपञ्चम्या मारब्धो मुद्रितुं ह्यसौ ॥ १७ ॥

अथ शब्दार्थचिन्तामणिः

अः

अ । १ । अभावे ॥ स्वल्पार्थे ॥ प्रति-षेधे ॥ अनुकम्पायाम् ॥ सम्बोधने ॥ अधिक्षेपे ॥ स्वराणामादिमेयर्णे ॥ अः । पुं । वासुदेवे ॥ महेश्वरे नञो-

अंशः

यमकारः ॥ यदा । अततिसर्यंब्याप्नो ति । अततेर्डः । न । परब्रह्मणि ॥ अंशः । पुं । वण्टके । भागे ॥ स्कन्धे ॥ वस्तुन एक देशे ॥ नवांशे ॥ अंसयते।

अंशुमा

अंशविभाजने । अदन्तः । कर्मणि घञ् ॥

अंशकः । पुं । दायादे ॥ अंशंहारीअवश्यमंशंहरतीत्यर्थः । अंशंहारीतिकन् ॥ अल्पांशे ॥ अल्पार्थेकन् ॥ न । वासरे । दिने ॥

अंशी । वि । भागाधिकारिणि । भागिनि ॥ अंशोऽस्यास्ति । इनिः ॥

अंशुः । पुं । प्रभायाम् ॥ सूच्यादि सूच्यांशे ॥ किरणे ॥ सूर्ये ॥ अंशयति । अंशविभाजने । चुरादिः । सगव्वादित्वात्कुः ॥ लेशे ॥ वेशे ॥

अंशुकम् । न । सूच्मवस्त्रे ॥ वस्त्रमात्रे ॥ उत्तरीये ॥ परिधानीये । अधोवस्त्रे ॥ अंशून् कायति । कैशब्दे । आत इतिकः ॥ यद्वा । अंशुभिः काशते । काशृदीप्तौ । अन्येष्वपीतिडः ॥ तेजपत्राख्यापत्रे ॥ वि । अल्पांशौ । अल्पेइतिकन् ॥

अंशुजालम् । न । प्रभापटले ॥ अंशूनां जालमिव ॥

अंशुधरः । पुं । सूर्ये ॥ धरति । धृञ् । अच् । अंशूनांधरः ॥ वि । प्रभाविशिष्टे ॥

अंशुपट्टः । पुं । पट्टशाटके ॥

अंशुमान् । पुं । सूर्ये ॥ विश्वव्यापिप्रकाशे परमात्मनि ॥ सूर्यवंशीयनृपान्तरे ॥ वि । अंशुविशिष्टे ॥ अंशवोविद्यन्तेऽस्य । तदस्या स्तीतिमतुप् ॥

अंशुमती । स्त्री । परदेवतायाम् ॥ अंशवः सन्त्यस्याः । मतुप्ङीपौ ॥ शालपर्ण्याम् ॥ अंशुमत्त्वाः फलं मूलत्वांशुमती । अनुदात्तादेश्चेत्यञः फलपाकमूलेष्वितिलुपि युक्तवद्भावः ॥

अंशुमत्फला । स्त्री । कदल्याम् ॥ अंशुमन्ति सूच्मावयववन्ति फलान्यस्याः । अंशुमानिव वा फलान्यस्याः । अजादित्वाट्टाप् ॥

अंशुमाली । पुं । राजभेदे ॥ भास्करे ॥ अंशूनां माला । साऽस्ति अस्य । व्रीच्यादित्वा दिनिः ॥

अंशुलः । पुं । चाणक्यमुनौ । द्रोमिणे ॥ इति चिकाण्डशेषः ॥

अंशुहस्तः । पुं । सूर्ये ॥

अंशूदकम् । न । इंसोदके ॥ यथा । दिवा रविकरैर्जुष्टं निशि शीतकरांशुभिः । ज्ञेयमंशूदकं नामस्निग्धं दोषत्रयापहम् ॥ अंशूनामुदकम् ॥

अंसः । पुं । न । भुजशिरसि । स्कन्धे ॥ अंस्यतेसमाहन्यते । अंससमाघाते । घञ् ॥ यद्वा । अमति अम्यते वा

अकम्

भारादिना । अमगतौ । अमेः सन् ॥ पुं । विभागे ॥

अंसकूटः । पुं । ककुदि । दृषाङ्गे । चूडो ढाठ इति भाषाप्रसिद्धे ॥ अंसेकूटः ॥

असलः । वि । मांसले । पुष्टे । बलवति ॥ असोस्यास्ति । वत्सांसाभ्यां काम बले इति लच् ॥

अंहतिः । स्त्री । त्यागे । दाने ॥ हन्ति दुरितमनया । हन्तेरंहुचेत्यतिः ॥ रोगे ॥

अंहती । स्त्री । अंहतौ । वह्वादित्वात् पचेडीप् ॥

अंहः । न । दुःखे । स्वधर्मत्यागे । दुरिते ॥ अमति गच्छति प्रायश्चित्तादिना । अमगत्यादिषु । अमेर्हुंकुचे त्यसुन् हुगागमश्च ॥ अमन्ति गच्छन्त्यधोनेनवा ॥ अहेरसुनासिद्धे अघेरसुनि अद्घ इतिमा भूदिति अमेर्हुंकुचेतिसूत्रम् । तथा च । स्यान्मध्योमचतुर्थेच्च मंहसोरं एसस्तयेति विरूपकोशः । एवञ्च । दत्तार्घाः सिद्ध सद्घैर्विदधतुर्घृणयः गोमद्घो विघात मितिपाठोऽनुप्रास रसिकानांग्रामादिक इति वदन्ति ॥

अकन् । न । पापे । दुःखे । नकन् । कं सुखं तद्विरुद्धंवा ॥ नलोपोनञः ॥

अकचः । पुं । केतुग्रहे ॥ वि । केशहीने ॥

अकनिष्ठगः । पुं । बुद्धमुनौ ॥

अकम्पनः । पुं । राक्षसान्तरे ॥

अकम्पितः । पुं । वौद्धगणाधिपविशेषे ॥ वि । कम्पशून्ये ॥

अकरणिः । स्त्री । शपे । आक्रोशने ॥ यथा । अकरणि रिह भूयादप्रशस्तस्यधातु रिति ॥ अकरणम् । आक्रोशेन ल्युनिः ॥

अकरा । स्त्री । आमलक्याम् ॥ वि । करशून्ये ॥ अकरः । अकरम् ॥

अकरुणः । वि । निर्दये । नकरुणः ॥

अकर्कशः । वि । कोमले ॥

अकर्णः । वि । बधिरे ॥

अकर्त्ता । वि । अक्रिये । अव्यापारे । कर्त्तृत्व रहिते ॥ नकर्त्ता । नलोपो नञः ॥

अकर्मण्यः । वि । क्रियासुमन्दे । निकम्मा इति भाषा ॥

अकर्म । न । तूष्णीम्भावे । मोक्षे । न विद्यते कर्म यस्मिन्तत् ॥ वि । कार्य्यशून्ये ॥

अकर्मी । वि । ब्रह्मविदि । अकर्मअस्ति अस्य । व्रीह्यादित्वादिनिः । नकर्मी वा ॥ कर्मा नुष्ठा नरहिते अवधूते ॥

अकर्मी

अकालः

यथा । अनुतिष्ठन्तु कर्माणि परलोकयियासवः । सर्वं लोकात्मकः कस्मा दनुतिष्ठामिकिं कथमिति ॥

अकल्कनः । त्रि । } वीतदम्भे ॥
अकल्मषः । त्रि । }

अकस्मात् । ।। सहसार्थे । अतर्कित निमित्तके ॥ यथा । अकस्माद्युवती वृद्धं केशेष्वाकृष्यचुम्बति । पतिंनिर्दयमा लिङ्ग्य हेतुरत्रभविष्यतीति ॥

अकामः । त्रि । वाह्यविषयकामना शून्ये ॥ नविद्यतेकामोऽस्य ॥ यथा। दृष्टानुश्रविकावाह्याः कामायस्यन सन्त्यहो । अकामस्तात्पुरुषस्तन्तुनिष्कामत्वेनसिध्यतीति ॥

अकामकारः । पुं । यथेष्टानाचरणे ॥ नकामकारः ॥

अकामहतः । त्रि । आब्रह्मलोकानन्दादर्वाचीनेष्वानन्देषु वितृष्णे ॥ कामेनहतः कामहतः । नकामहतः ॥

अकायः । त्रि । अशरीरे ॥ लिङ्गशरीरवर्जिते ॥ नविद्यते कायोयस्यसः ॥

अकारः । पुं । अ अक्षरे । वर्णानां मध्ये भगवद्विभूतौ ॥ अ वर्णनिर्देशे ॥ वर्णोक्तारः ॥

अकालः । पुं । कालाशुद्धौ ॥ यथा ।

अकूपा

अनुराधर्क्षमारभ्यषोडशर्क्षेषु भास्करः । यावच्चरतिवैतावद्कालं मुनयो विदुरिति ॥ असमये ॥ त्रि । तद्विशिष्टे ॥

अकालवृष्टिः । स्त्री । सहस्यादिषुवर्षणे ॥ यथा । पौषादिचतुरो मासान् मोक्ता वृष्टिरकालजा । व्रत याचादिकं तत्रवर्जयेत्सप्तवासरानिति ॥

अकिञ्चनः । त्रि । दीने ॥ नास्ति किञ्चन यस्य । मयूरव्यसका दित्त्वातस मासः ॥ निष्कामे ॥

अकिञ्चनिमा । पुं । आकिञ्चन्ये ॥ अकिञ्चनस्य भावः इमनिच् ॥

अकीर्त्तिकरम् । त्रि । कीर्त्यभावकरे । अपकीर्त्तिकरे ॥ नकीर्त्तिकरम् ॥

अकुप्यम् । न । स्वर्णरजतात्मकधने ॥ कुप्यादन्यत् ॥

अकुलसप्तः । त्रि । तिथि वारर्क्ष विशेषे ॥ यथा । स्वात्यन्तकाश्विवसु पौष्णकरानुराधा दित्यध्रुवाणि विषभात्तिथयो ऽकुला स्युः । सूर्येन्दुमन्दगुरु वश्चेति ॥

अकुशलम् । त्रि । अशोभने ॥ नकुशलम् ॥

अकूपारः । पुं । कूर्म्मराजे ॥ महोदधौ ॥ कुंपृथ्वी पियर्त्ति । पृषोदरादित्वात्पूरणयोः । कर्म्मण्यण् । अन्येषा

अकृत्रि

मपीति दीर्घः । नञ् समासः ॥ उप लादौ ॥ कमठे ॥

अकूर्चः । पुं । वृद्धे ॥ त्रि । कैतवहीने ॥

अकूवारः । पुं । समुद्रे ॥

अकृतम् । त्रि । नित्ये ॥ मोक्षे ॥ अविहिते ॥ कारणे ॥ प्रमाणाविषये ॥ स्वयमजनिते ॥ नकृतम् ॥ अनिष्पादिते ॥ यथा । कालातीतन्तु यत्कुर्यादकृतन्तदिनिर्दिशेदितिस्मृतिः ॥ स्त्री । प्रकृतिविशेषे ॥ यथा ऽपांनिम्नदेशगमनादिलक्षणा प्रकृतिः सानकेन चितकृता ॥

अकृतकः । त्रि । स्वाभाविके । नकृतकः

अकृतज्ञः । त्रि । उपकारामानिनि । कृतघ्ने ॥

अकृतबुद्धिः । त्रि । शास्त्राचार्योपदेशन्यायैरनुपजनितविवेकबुद्धौ ॥ अकृतायुद्धिर्यस्य येनवा ॥

अकृतात्मा । त्रि । यत्नादिभिरशोधितान्तःकरणे ॥ शास्त्रेणासस्कृतान्तःकरणे ॥

अकृताभ्यागमः । पुं । दोषविशेषे । अकृतयोः पुण्यपापयोरकस्मात्फलदाहृत्वे ॥

अकृत्रिमः । त्रि । अकरणजे । अजन्ये । सिद्धे ॥

अकृत्रिमानन्दः । पुं । स्वरूपभूतानन्दाभिव्यञ्जके निदिध्यासने ॥ अकृत्रिमश्वासावानन्दश्च ॥ त्रि । कृत्रिमानन्दविरहिणि ॥ अविद्यमानः कृत्रिमानन्दोऽस्य ॥

अकृतस्नवित् । त्रि । अनात्माभिमानिनि ॥ अकृत्स्नं वेत्ति । विद् ज्ञाने । क्विप ॥

अकृष्णकर्मा । त्रि । शिक्षिदाने । अपापकर्मणि ॥ अकृष्णं निष्पापत्वात् शुद्धंकर्मास्य ॥

अकोटः । पुं । गुवाकवृक्षे । छटाफले ॥

अकौशलम् । न । आकौशले ॥

अक्का । स्त्री । मातरि । जनन्याम् । अम्बायाम् ॥

अक्तः । त्रि । व्याप्ते ॥ युक्ते ॥ परिच्छिन्ने ॥ अक्ष्णेर्गतौक्तः । अक्तपरिमाणस्य वाचका इति भाष्यस्यकैयटेन तथा व्याख्यातत्वात् ॥ अनक्ति अज्यतेर्वा । अंजूव्यक्त्यादौ । अजिदृशिभ्यः क्तः ॥

अक्तुः । त्रि । अकामे । दृष्टादृष्टवा ह्यविषयोपरतवृत्तौ ॥

अक्रान्ता । स्त्री । वृद्धत्वाम् ॥ त्रि । अनाक्रान्ते ॥

अक्रियः । त्रि । श्रौतस्मार्तक्रियात्यागिनि ॥ अव्यापारे । अकर्त्तरि ॥ कुकर्मविशिष्टे ॥

अच'

अक्रूरः । पुं । स्वफल्कतनये । गान्दिनीसुते ॥ त्रि । अकठिने । अनिष्ठुरे ॥ नक्रूरः ॥ क्रौर्यवान् क्रूरः सनेत्यक्रूरः । यद्वाक्रूरे इतिभावप्रधानो निर्देशः । नविद्यते क्रौर्यमस्येत्यक्रूरः ॥

अक्रोधः । पुं । परैराक्रोशे ताडनेवा कृते सति प्राप्तोयक्रोधस्तस्य तत्क्षोपशमने । त्रि । क्रोधरहिते ॥

अक्रोधनः । त्रि । क्रोधरहिते ॥

अक्रमः । त्रि । सततव्यापारेप्यस्यान्ते ॥ अविद्यमानः क्रमोयस्यसः ॥

अक्षः । पुं । रथावयवे । चक्रे ॥ चक्रधारणदारुभेदे । नभ्ये ॥ ज्ञातार्थे ॥ व्यवहारे । आयव्ययचिन्तायाम् ॥ पाशके । येन द्यूतविद्यामेजयति ॥ रुद्राक्षे ॥ इङ्गुदे ॥ विभीतकतरौ ॥ ज्ञाने । आत्मनि ॥ रावणौ ॥ सर्पे ॥ शकटे ॥ षोडशमाषेषु । कर्षे ॥ जात्यन्धे ॥ गरुडे ॥ मलभायाम् ॥ यथा । चद्राश्विनिघ्नायलभार्द्रिताचक्षुरावधिः स्यादिदृक्षिणोच इति ॥ न । सौवर्चले लवणे ॥ तुल्ये ॥ हृषीके ॥ अक्ष्णोति अचति वा अक्ष्यतेवा ऽनेनाचवा अक्षूव्याप्तौ । पचाद्यच् घञ्वा ॥ अश्नुते ऽत्यर्थम् । अशूव्याप्तौ । अशेर्देवने इति सोवा ॥

अक्षक

अक्षकः । पुं । तिनिशे ॥ इतिरत्नमाला ॥

अक्षगणः । पुं । श्रोत्रादीन्द्रियसङ्घाते ॥ अक्षाणांगणः ॥

अक्षचरणः । पुं ॥ अक्षपादे ॥

अक्षतम् । न । पद्मे ॥ पुं । ० भू । लाजेषु ॥ क्षणनम् । क्षणुहिंसायाम् । नपुंसकेभावेक्तः । अनुदात्तोपदेशेत्यादिनाणलोपः ॥ नक्षत येयांते ॥ मुकुटस्वमरव्याख्यावसरे लाजाः पुंभूम्नित ऽक्षतमितिपठित्वा कर्मणिक्त । क्षतखण्डितम् । नक्षतमक्षतमितिविगृह्य नित्यपुल्लिंगानित्यबहुवचनान्तास्य लाजा अक्षतमितिव्याचख्यौ ॥ केचित्तु अखण्डतण्डुला अक्षतमित्याहु. ॥ पुं । यवे । त्रि । अहिंसिते । अव्रणे । अखण्डिते ॥

अक्षता । स्त्री । कर्वटशृङ्ग्याम् ॥ पुरुषससर्गरहितायां स्त्रियाम् ॥ नक्षता ॥

अक्षदर्शक । पुं । प्राड्विवाके । धर्माध्यक्षे ॥ अक्षवोधके ॥ पश्यति । दृशिर्प्रेक्षणे । ण्वुल् । अक्षाणां व्यवहाराणांदर्शक ॥

अक्षद्दक् । पुं । व्यवहारस्यज्ञातरि । अक्षदर्शके ॥

अक्षय

अक्षदेवो । त्रि । द्यूतकृति । धूर्ते ॥ अक्षैर्दीव्यति । दिवुक्रीडादौ । सुपीतिणिनिः ॥

अक्षद्यू । पुं । अक्षदेविनि ॥ अक्षैर्दीव्यति । दिवु० क्विप् । ष्ठ्योरिति ष्यूठ् ॥

अक्षधूर्त्तः । पुं । द्यूतकारे । कितवे ॥ अक्षेषुधूर्त्तः । सप्तमीशौण्डैरितिसमास ॥

अक्षधूर्त्तिल । पुं । वृषे ॥ इति हारावली ॥

अक्षपादः । पुं । गौतमे । नैयायिके ॥

अक्षपीडा । स्त्री । यवतिक्ताख्यलतायाम् ॥

अक्षम । त्रि । क्षमताशून्ये ॥ क्षमा रहिते ॥

अक्षमा । स्त्री । ईर्ष्यायाम् । अक्षान्तौ ॥

अक्षमाला । स्त्री । अक्षस्रुचे । अकारादिक्षकारान्त वर्णमालायाम् ॥ अरुन्धत्याम् ॥ अक्षमाला विशिष्टो नसयुक्तायमयोनिलेतिवचनात् ॥ रुद्राक्षमालायाम् ॥

अक्षय । पुं । अनन्ते । अक्षयकालाभिमानिनि ॥ त्रि । क्षयाभावे । क्षयरहिते ॥ अव्यये ॥ ब्रह्मनिष्ठे ॥ अ वासुदेव तस्मिन क्षयोनिवासो

अक्षर

स्य ॥

अक्षयकाल । पुं । अक्षयकालाभिमानिनि परमेश्वराख्यकाले । अक्षय यस्यासौकालश्च ॥

अक्षयतृतीया । स्त्री । वैशाखशुक्लतृतीयायाम् । यथा । वैशाखे मासि राजेन्द्र शुक्लपक्षे तृतीयिका । अक्षयासातिथिः प्रोक्ता कृत्तिकारोहिणीयुता । तस्यांदानादिक पुण्यमक्षयं समुदाहृतमिति । इयंसक्षयु गाद्या ॥

अक्षया । स्त्री । रथ्यादिषारैः सप्तम्यादितिथिषु ॥ यथा आमावै सोमवारेण रविवारेण सप्तमी । चतुर्थी भौमवारेण अक्षयादपिचाक्षया इतिभविष्यपुराणम् ॥ क्षयरहितायाम् ॥ नास्तिक्षयोयस्या सा ॥

अक्षरम् । न । नक्षरतीतिव्युत्पत्त्या अविनाशिनि निर्विशेषे प्रणवाख्ये ब्रह्मणि कूटस्थेनित्ये आत्मनि ॥ यथा । चराचरशब्दधर्मत्वादक्षर ब्रह्मभण्यते । कार्यकारणरूपन्तु नश्वरचरमुच्यते ॥ यत्किञ्चिदस्मिंलोकेस्मिन् वाचोगोचरतांगतम् । प्रमाणस्य चतत्सर्वमक्षरे प्रतिषिध्यते ॥ यद्प्रबोधालापेषुग्राह्यग्राह्यत्वबोधत । तद्-

अचर

चरं प्रवोद्वहं यथोक्तेश्वरवर्त्मनेति ॥ ईश्वरवर्त्मनेतिशासितृत्वादि तटस्थ लक्षणद्वारेत्यर्थः ॥ अकारादिच कारान्तवर्णे ॥ यथा । माण्डूक्यिके तुसम्प्राप्ते भ्रान्तिः संजायतेयतः । धावाचराणि रूढानिपंचा रूढा न्यतःपुरेति ॥ तत् पञ्चविधं लिपिश ब्दे द्रष्टव्यम् ॥ अपामार्गे ॥ गगने ॥ लोचे । अपवर्गे ॥ धर्मे ॥ तपसि ॥ अव्वरे ॥ अव्याकृताख्ये मूलका रणे ॥ पुं ॥ शङ्करे ॥ अले ॥ विष्णौ ॥ जीवे ॥ नचरति । चरसञ्च लने । पचाद्यच् ॥ यद्वा । अञ्चते । यञ्चूयासौ । अर्त्तेः सरः । पि । अचरणीये । अच्युते ॥

अचरचणः । पुं । लेखकोक्तमे ॥ अचरैर्वित्तः । तेनविक्तश्चुच्चुपचणपाविति चणप् ॥

अचरचुच्चुः । पुं । लेखकोक्तमे ॥ अचरैर्वित्तः । तेनविक्तइतिचुच्चुप् ॥

अचरजननी । स्त्री । लेखन्याम् ॥ प्रकृतौ ॥ अचराणा मचरस्त्रिया-जननी ॥

अचरजीवकः । पुं । लेखके । लेखको ऽचरपूर्वः सुंचणजीवकचुच्चव इति हेमचन्द्रः ॥

अचरजीविकः । पुं । कायस्थजातौ ॥

अचवि

अचरैर्जीविकायस्यसः ॥ लेखकः स्यात्लिपिकरः कायस्थो ऽचरजीवि कइतिहेमायुधः ॥ पि । अचरजीविनि ॥

अचरतूलिका । स्त्री । लेखन्याम् ॥ अचराणां तूलिका ॥ इतिजटाधरः ॥

अचरधीः । स्त्री । अचरेब्रह्मणिधीर्यस्याः इतिव्युत्पत्त्या व्युतिषुः ॥ पि । ब्रह्मनिष्ठे ॥

अचरपङ्क्तिः । स्त्री । छन्दोभेदे ॥ यथा । चेद्वगणान्तेगदययोगः । दृष्टि रिष्टोक्तासाऽचरपङ्क्तिरिति ॥

अचरमुखः । पि । कालाचरिके । शिचिताचरे ॥ इतिविकाण्डशेषः ॥

अचरविन्यासः । पुं । लिपौ ॥ अचराणांविन्यासः ॥

अचरसमुद्भवः । पुं । अपौरुषेयत्वेन निरस्तसमस्तागद्भेवेदे ॥ अचरात्परमात्मनः समुद्भवः आविर्भावोयस्य सः ॥

अचयती । स्त्री । द्यूतक्रीडाविशेषे । चौपड इतिभाषा ॥ अचाः पाशकाः सन्त्यस्याम् । मतुप् । लोकात्ङीष् ॥

अचवाटः । पुं । मञ्चभूमौ । नियुद्धभुवि । अखाडा इतिभाषा ॥

अचवित् । पि । व्यवहारे । यूतज्ञे ।

अचय

अचदेवो । चि । चूतकृति । धूर्ते ॥
अचैर्दीव्यति । दिवुक्रीडादौ । सुपीतिणिनिः ॥
अचयूः । पुं । अचदेविनि ॥ अचै-र्दीव्यति । दिवु० क्विप् । च्छोरि च्यूठ् ॥
अचधूर्त्तः । पुं । चूतकारे । कितवे ॥ अचेधूर्त्तः । सप्तमीशौंडैरिति समासः ॥
अचधूर्त्तिलः । पुं । धूर्ते ॥ इति हारावली ॥
अचपादः । पुं । गौतमे । नैयायिके ॥
अचपीडा । स्त्री । यवतिस्तनोत्खल-तायाम् ॥
अचमः । त्रि । चमताशून्ये । चमा रहिते ॥
अचमा । स्त्री । ईर्ष्यायाम् । अचान्तौ ॥
अचमाला । स्त्री । अचक्षुचे । अका रादिचकारान्त वर्णमालायाम् ॥ अचन्धच्याम् ॥ अचमाला विशिष्टे नसंयुक्ताधमयोनिजेतिवचनात् ॥ रुद्राचमालायाम् ॥
अचयः । पुं । अनन्ते । अचयकाला भिमानिनि ॥ त्रि । चयाभावे । चयरहिते । अक्षये । ब्रह्मनिष्ठे ॥ अः वासुदेवः तस्मिन् चयोनिवासो

अचर

स्य ॥
अचयकालः । पुं । अचयकालाभि मानिनि परमेश्वरोक्षकाले ॥ अच यश्चासौकालश्च ॥
अचयतृतीया । स्त्री । वैशाखशुक्लतृ तीयायाम् ॥ यथा । वैशाखे मासि राजेन्द्र शुक्लपचे तृतीयिका । अ चयासातिथिः प्रोक्ता कृत्तिकारोहिणीयुता ॥ तस्यांदानादिकं पुण्यम चयं समुदाहृतमिति ॥ इयंसप्तम्यु गाद्या ॥
अचया । स्त्री । रव्यादिषारैः सप्तम्या दितिथिषु ॥ यथा आमावै सो मवारेण रविवारेण सप्तमी । चतुर्थी भौमवारेण अचयादपिचाचया इति भविष्यपुराणम् ॥ चयरहिता याम् ॥ नास्तिचयोयस्याः सा ॥
अचरम् । न । नचरतीतिव्युत्प त्त्या अविनाशिनि निर्विशे-षे प्रणवाख्ये ब्रह्मणि कूटस्थनि-त्ये आत्मनि ॥ यथा । चराद्विरुद्ध-धर्मत्वादचरं ब्रह्मभण्यते । कार्य कारणरूपन्तु नश्वरंचरमुच्यते ॥ यत्किञ्चिच्चरस्तोकेस्मिन् वाचोगो-चरतांगतम् । प्रमाणस्य चतत्सर्व-मचरे प्रतिषिध्यते ॥ यदप्रबोधा-त्कार्पण्यंब्रह्मण्यंयत्प्रबोधतः । तद-

अचर

चर प्रेरोद्वव्य यथोक्तेश्वरवर्त्मनेति ॥ ईश्वरवर्त्मनेतिशासितृत्वादि तटस्थ लक्षणद्वारेत्यर्थः ॥ अकारादिचकारान्तवर्णे ॥ यथा । षाण्मासिके तुसम्मासे भ्रान्तिः सञ्जायतेयतः । घाघाचराणि सृष्टानिपचारूढानत मुरेति । तत् पञ्चविध लिपिशब्देद्रष्टव्यम् ॥ अपामार्गे ॥ गगने ॥ मोक्षे । अपवर्गे । धर्मे । तपसि ॥ अक्षरे । अव्याकृताख्ये मूलकारणे । पुं । शङ्करे ॥ अजे । विष्णौ । जीवे ॥ नचरति । चरसञ्चलने । पचाद्यच् ॥ यद्वा । अश्नुते । यशूव्याप्तौ । अशे सरः ॥ वि । अचरणीये । अच्युते ॥

अचरचण । पुं । लेखकोत्तमे ॥ अचरैर्वित्तः । तेनविक्तइतिचुच्चुप्चणपावितिचस्वम ॥

अचरचुच्चु । पुं । लेखकोत्तमे ॥ अचरैर्वित्त । तेनवित्तइतिचुच्चुप् ॥

अचरजननी । स्त्री । लेखन्याम् ॥ प्रकृतौ । अचराणा मचरस्यवा जननी ॥

अचरजीवक । पुं । लेखके ॥ लेखको ऽचरपूर्वो ल्युश्चणजीवकचुच्चव इति हेमचन्द्र ॥

अचरजीविक । पुं । कायस्थजातौ ॥

अचवि

अचरैर्जीविकायस्यस. ॥ लेखक स्यालिपिकर. कायस्थो ऽचरजीविकइतिहेमायुध. । वि । अचरजीविनि ॥

अचरतूलिका । स्त्री । लेखन्याम् ॥ अचराणां तूलिका ॥ इतिजटाधर. ॥

अचरधी. । स्त्री । अचरेब्रह्मणिधीर्यस्या भ्य इतिव्युत्पत्त्या श्रुतिषु ॥ वि । ब्रह्मनिष्ठे ॥

अचरपङ्क्ति । स्त्री । छन्दोभेदे ॥ यथा । चेद्वगणान्तेगद्वययोगः । दक्षिरिहोक्तासाऽचरपङ्क्तिरिति ॥

अचरमुख । वि । कालाचरिके । शिक्षिताचरे ॥ इतिविकाण्डशेष. ॥

अचरविन्यास । पुं । लिपौ ॥ अचराणांविन्यास. ॥

अचरसमुद्भव । पुं । अपौरुषेयत्वेन निरस्तसमस्तशङ्केवेदे ॥ अचरात्परमात्मन समुद्भव आविर्भावोयस्य स ॥

अचयती । स्त्री । द्यूतक्रीडाविशेषे । चौपडइतिभाषा ॥ अचा. पाशका. सन्त्यस्याम् । मतुप् । लोकात्स्त्रीत्वम् ॥

अचवाट । पुं । मल्लभूमौ । नियुद्धभूमि । अखाडा इतिभाषा ॥

अचवित् । वि । व्यवहारज्ञे । द्यूतज्ञे ॥

अचेवि

अचविवर्त्तः । पुं । द्यूतप्रभेदे ।
अचस्तूचम् । न । जपमालायाम् ।
अचाग्रकीलकः । पुं । अर्शो । रचच काग्रस्थितकीलके । अर्शी इति भा षा । अचस्थनाभिचेष्यकीप्रुस्थाने वन्ध्यर्थंकीलकः ।
अचान्ति. । स्त्री । परोत्कर्षासहने । ईर्ष्यायाम् । नचमणम् । चमूस हने । दिवादिः । अस्यापित्त्वात् तिन् । अनुनासिकस्येति दीर्घे नेञ् समासः ।
अचारलवणम् । न । अकृत्रिमे सैन्ध वादौ । यथा । गोक्षीरं गोघृतचैव धान्यमुद्गास्तिलायवा । सामुद्रं सैन्ध वंचैव अचारलवणस्मृतमिति स्मृ तिर्हारलतायाम् ।
अचि । न । चक्षुषि । अक्ष्णुतेऽनेनवा । अक्ष्यास्रौ संघातेच । अक्षेर्नि दितिकिन् । यद्वा । अचति । अक्ष्यास्रौ । इन् ।
अचिकूट । पुं । ईषिकायाम् । गजा चिपुटके ।
अचिगतः । त्रि । देष्ये । इत्यमरः । अचिगतस्त्वखेदकृत् ।
अचिभेषजम । न । लोध्रे ।
अचिविकूणितम् । न । अपाङ्गदृष्टौ । कटाक्षे ।

अचोभ्यः

अचीणः । त्रि । पूर्णे । अदीने । न चीणः । यथा । अलब्ध्वानविधीदेत कालेकाले ऽश्नंक्वचित् । लब्ध्वान हृष्येद्वृतिमानुभयं दैवतन्त्रितम् । इतिभत्वानदीनोयोवधूतोऽचीणउ च्यतइति ।
अचीवम् । न । वशिरे । सामुद्रलवणे । पुं । शिग्रौ । चि । अमत्ते । न चीवति अनेनवा अचीवयति वा । चीवृमदे । पचाद्यच् । अर्शणः ईः । अचींवातिवायति वा । वागतिगन्धनयो आवैशेषिणेवा । आतोनुपेतिकः ।
अचेशः । पुं । मनसि । अचाणामीशः ।
अचोटः । पुं । शैलोत्थपीठौ । कर्परा ले । अखरोटइतिख्याते । अचूणो ति । अचूव्यासौ संघातेच । वा हुलकादेोट । अचस्येवटा पर्णान्यस्येतिवा ।
अचोटक । पुं । कर्परालङ्के । पर्वत पीठौ । यथा । अचोटकोपिवाता दसदृश कफपित्तकृदिति । अचो टात्स्वार्थेकः ।
अचोपकरणम् । न । द्यूतसाधने ।
अचोभ । पुं । आलाने । शङ्खौ । ह स्तिबन्धनस्तम्भे । त्रि । चोभरहिते ।
अचोभ्यः । पुं । शिवे । रागद्वेषादि

अखट्टः

भिः शब्दादिविषयैरसुरैश्च नचो भ्यते क्षोभंचित्तेयं व्यथांनप्राप्यते। क्षुभेर्हेतुमण्ण्यन्ता दचोयदितिय त्प्रत्ययः। चि। अप्रधृष्ये॥

अक्षौहिणी। स्त्री॥ सेनाविशेषे। दशानीकिन्याम्। सायथा॥ हभाः २१८७०। रथाः २१८७०। अश्वाः ६५६१०। पदातयः १०९३५०। उक्तञ्च। अक्षौहिण्या मित्यधिकैः सप्त त्याह्यष्टभिःशतैः। संयुक्तानि सहस्रा णि गजानामेकविंशतिः॥ एवमेवर थानान्तु संख्यानंकीर्त्तितबुधैः। प ञ्चषष्टिसहस्राणि षट्शतानिदशैव तु॥ संख्यातास्तुरगास्तज्ज्ञैर्विना रथतुरंगमैः। तथायतसहस्रंतु स हस्राणि नवैवतु। शतानित्रीणि चान्यानि पंचाशच्चपदातयः इति॥ सर्वसंख्ययातु। खदयस्वरंवस्विं दुनैवै रक्षौहिणीभवेति॥ २१८७०० ऊह. समूहोस्यास्याः इनिः। अक्षाणामूहिनी। पूर्वपदादिति णत्वम्। अक्षादूहिन्यामिति ङीः॥

अक्षण्णम्। वि। अखण्डे॥ अक्षुते अक्षूव्याप्तौसंघातेच। क्तस्यक्षूभ्यां क्तस्यः॥ न। काले॥

अखट्टः। पुं। प्रियालवृक्षे। इतिराज

अगतिः

निर्घण्टः॥

अखेटिः। पुं। असंद्यवहारे॥ इति विकाण्डशेषः॥

अखण्डम्। वि। पूर्णे। खण्डशून्ये। अनन्ते। नखण्डयते। खडिभेदने। घञ्॥ नास्तिखण्डोऽस्यवा॥

अखण्डनः। पुं। काले॥ इति शब्द चन्द्रिका॥

अखण्डपरशुः। पुं। परशुरामे॥ न खण्डः अखण्डः केनाप्यखण्डितः प रशुःकुठारोस्य॥

अखातम्। पुं। न। देवखाते। अकृ त्रिमजलाशये॥ खाताद्भिन्नम्॥

अखिलम्। वि। विश्वस्मिन्। कृत्स्ने॥ नखिलमस्य॥

अखिलाधारम्। वि। ब्रह्मणि॥ अखिलस्याकाशादिप्रपञ्चस्याधारमा श्रयस्तदितिविग्रहः। आश्रयशब्दः सृष्टिप्रलययोरप्युपलक्षणार्थः॥

अगः। पुं। पर्वते॥ वृक्षे। तरौस्त्रियां॥ भानौ॥ नगच्छति। गम्लृगतौ। अन्येभ्योपीति अन्येष्वपीतिवाडः॥ नगोऽप्राणिष्विति माचिकोऽप्रकृति भाव॥

अगजः। वि। गिरिसम्भवे॥ न। गिलाजतुनि॥

अगतिः। पुं। अनवबोधे। अपरिज्ञा-

अगस्त्यः

ने ॥

अगदः । पुं । औषधे ॥ वि । नीरुजि ॥ गदविरुद्धः । नगदो ऽस्यादितिवा ॥

अगदङ्कारः । वि । चिकित्सके । अगदमरोगंजन्तुंकरोति । कर्मण्यण् । कारेसत्यागदस्येतिमुम् ॥

अगदतन्त्रम् । न । वैद्यविद्याङ्गविशेषे ॥ यथा । अगदतन्त्रंनामसर्पकीटलूतावृश्चिकमूषिकादिदष्टविषव्यञ्जनार्थंविविधविषसंयोगविशेषोपहतोपशमनार्थंमितिसुश्रुतः ॥

अगमः । पुं । वृक्षे । नगच्छति । गम्लृगतौ । पचाद्यच् ॥

अगम्यः । वि । अज्ञेये ॥ गमनायोग्ये ॥ नगम्यः ॥

अगस्तिः । पुं । मुनिविशेषे । विन्ध्याख्यम् अगमत्समतीत्यगस्तिः । अस्यतेः क्तिच्कौचेतिक्तिच् । वाहुलकात्सिर्वा । शकन्ध्वादिः ॥ वकद्रौ ॥ अगस्तिः पित्तकफजिच्चतुर्थकज्वरोद्भिमः । रूक्षोवातकरस्तिक्तः प्रतिश्यायनिवारणः ॥

अगस्तिद्रुः । पुं । वकपुष्पवृक्षे । मुनिद्रुमे ॥ इतिचिकाण्डशेषः ॥

अगस्त्यः । पुं । वकद्रौ ॥ मुनिभेदे । पुलस्त्यतनये ॥ अगंविन्ध्यंस्त्यायतिस्तभ्नाति । स्त्यैसङ्घाते । आतोनु-

अगरुः

पसर्गेकः ॥

अगस्त्याश्रमः । पुं । अगस्त्यकुण्डइतिनाम्नाकाश्यांप्रसिद्धेस्थाने ॥ मलयाचलेवर्त्तमाने मुनिवासस्थाने ॥

अगस्तिकुसुमम् । न । मुनिद्रुमपुष्पे ॥ अगस्तिपुष्पशाके ॥ अस्यगुणायथा । अगस्तिकुसुमं शीतंचतुर्थकनिवारणम् । नतान्यनाशनंतिक्तंकषायंकटुपाकिच ॥ पीनसश्लेष्मपित्तघ्नंवातघ्नंमुनिभिर्मतम् ॥ अगस्त्यकुसुमं तथा मृदुफलंकेना हृतंजन्तुनाधन्यंचोद्यदिनं यदर्थमिलितंकस्यास्यमालोकितम् । स्विन्नंतत्कथुतंसर्पिगुलवणं तत्तेष्टतेपाचितंभोक्ता संततभाषितं प्रियतमेनाद्यापिसम्प्राप्तित मिति ॥

अगाधम् । वि । अतलस्पर्शे । अतिगम्भीरे ॥ दुर्बोधाशये ॥ न । श्वभ्रे ॥ नास्तिगाधः स्थितिरप । नञोऽस्यर्थानामिति बहुव्रीहिः ॥

अगाधजलः । पुं । ह्रदे । वि । अतलस्पर्शजलविशिष्टे । अगाधंजलंयत्र ॥

अगारम् । न । गृहे । अगान्गच्छति । गम्लृगतौ । कर्मण्यण् ॥

अगारदाही । वि । गृहदाहके ॥

अगुः । पुं । राहुग्रहे ॥ वि । किरणरहिते ॥

अगुरुः । न । जोङ्गके । सुगन्धिकाष्ठ

अग्निः

भेदे । अगर इति भाषा ॥ अगुरु ष्णंकटुत्वेव्यंतिक्तं तीक्ष्णंचपित्तल म । लघुकर्णाक्षिरोगघ्नं शीत वातकफप्रणुत् ॥ अगुरुर्वापुंसीति वोपाखितः । शिंशपायाम् ॥ का लागुरुणि । त्रि । लघुनि । नगुरुर स्मात् ॥

अगूढगन्धम् । न । हिङ्गुनि । इतिरा जनिर्घण्टः ॥

अगोचरम् । त्रि । इन्द्रियजन्यप्रत्य क्षाविषये ॥

अगौकाः । पुं । शरभे । खगे ॥ सिंहे ॥ त्रि । अद्रिवासिनि । अद्रिगे । अ गः ओकोयस्यसः ॥

अग्नायी । स्त्री । वह्निपत्न्याम् । अग्नेः स्त्रीत्वमस्मिन्नर्थे वृषाक प्यग्निकुसितेत्यादिसूत्रेणाग्निशब्द स्यैकारादेशोङीपच ॥ त्रेतायुगे ॥

अग्निः । पुं । अङ्गयन्ति अभ्यंजन्मप्रा पयन्तीतिव्युत्पत्त्या हविःप्रक्षेपाधि करणेषु गार्हपत्याहवनीयदक्षिणा ग्निसभ्यावसथ्योपासनाख्येषु षड ग्निषु । पावकः । वैश्वानरे । अस्य गुणा यथा । रूपनेत्रेन्द्रियंपाकःस न्तापस्तीक्ष्णताम्रता । वर्णोस्राविप्णुतामर्षः शौर्यमग्नेर्गुणाअमी ति । षट्सुधूमागन्यादिषु । यथा । अर्क

अग्निक

निष्कासनार्थायक्रमात्ज्ञेयाः षडग्न यः । धूमाग्निश्चैवदीपाग्निर्मन्दाग्नि र्मध्यम स्तथा ॥ खराग्निश्च भडाग्नि श्च तेषांवक्ष्यामि लक्षणम् । वि ज्वालोयोधूमशिखो धूमाग्निरुदा हृतः । ससारमतिशुष्कं यन्मुष्टिम ध्येसमेष्यति । तत्काष्ठं काष्ठमित्त्वा हुः खदिरादिसमुद्भवम् ॥ द्वाभ्यां तस्यचतुर्थाभ्यां योग्निर्दीपाग्निरुच्य ते । चतुरंशेन तेनैवमन्दाग्निः परिकीर्त्तितः ॥ अर्द्धीकृताभ्यांदा भ्यांतुमध्यमाग्निरुदाहृतः । अर्द्ध स्तैः पञ्चभिः प्रोक्तःखराग्नि सर्वक र्मसु । मस्तकावधिपार्श्वस्य चतुर्दि क्षुकमेणच । प्रसरंतियदाज्वालाः समडाग्निरुदीरितः । सार्द्धयामश्च यामश्चयाममेकंमुहूर्त्तकम । मुहूर्त्तं मात्रमित्येवमर्थेवन्ह्यःस्मृताः इ ति । चित्रकास्थापधौ । तृतीये । चतुष्कलेऽ । आदिगुरोः संज्ञायाम् । कृत्तिकानक्षत्रे ॥ अङ्गति ऊर्द्धंगच्छ ति । अगिगतौ । अङ्गेर्नलोपश्चे तिनिर्नलोपश्च । रक्तचित्रके । भल्ला तके । निर्मूले । पित्ते । स्वर्णे ।

अग्निकः । पुं । इन्द्रगोपकीटे ॥ इति हेमचन्द्रः ॥

अग्निकरः । पुं । स्कुलिङ्गे । अग्नेः

अग्निचू

कणः ॥ इत्यमरः ॥

अग्निकारिका । स्त्री । अग्निकार्ये ॥ इति हेमचन्द्रः ॥

अग्निकार्यम् । न । होमादौ हविर्दानादिपूर्वकाग्निज्वालने । अग्नीन्धने ॥ अग्नौसायंप्रातःसमिद्धोमानुष्ठाने ॥ अग्नावग्नेर्वाकार्यम् ॥

अग्निकाष्ठम् । न । अगुरुणि ॥ इति राजनिर्घण्टः ॥

अग्निकुक्कुटः । पुं । ज्वलदग्निभृगोल्कायाम् ॥ इतिविकाण्डशेषः ॥ अग्नेःकुक्कुटः ॥

अग्निक्रीडा । स्त्री । खधूपादित्यागे । हवाइ इतिभाषाप्रसिद्धे ॥

अग्निगर्भः । पुं । औषधविशेषे । अग्निनिर्यासे । अग्निजारे ॥ सूर्यकान्तमणौ ॥

अग्निगर्भा । स्त्री । महाज्योतिष्मत्याम् ॥ इति राजनिर्घण्टः ॥

अग्निचित् । पुं । साग्निके । अग्निचेतरि ॥ इत्यमरः । अग्निमचैषीत् । चिञ्चयने । अग्नौचेरिति किप् तुक् ॥

अग्निचित्या । स्त्री । अग्नेश्चयने ॥ चित्त्याग्निचित्त्ययोरितिभावेयप्रत्ययस्तुक्चनिपात्यते ॥

अग्निचूडा । स्त्री । अग्निशिखायाम् ॥

अग्निदे

अग्निजः । पुं । भल्लातके । भिलावा वृक्षे ॥ अग्निजोरवृक्षे ॥ त्रि । अग्नेर्जातमात्रे ॥

अग्निजातः । पुं । अग्निजारः । पुं । अग्निजालः । पुं । औषधविशेषे । वडवाग्निमूले । सिन्धुफले इति राजनिर्घण्टः ॥

अग्निजिह्वा । स्त्री । अग्नेर्ज्वालायाम् ॥ लाङ्गलीवृक्षे ॥ योगविशेषे ॥ यथा । सप्तसप्त्यादितिथयः सोमवारादिभिर्युताः । अग्निजिह्वाः सप्तयोगामङ्गलेष्वतिगर्हिताः इति ॥ काल्यादिसप्तसु ॥ यथा । काली कपालीचमनोजवाचसुलोहितायाचसुधूम्रवर्णा । स्फुलिंगिनीविश्वरुचीच देवीलेलायमाना इतिसप्तजिह्वा इतिप्रथममुण्डकश्रुतिः ॥

अग्निज्वलिततेजनः । पुं । अग्निना दीप्तफलके । आयुधविशेषे ॥

अग्निज्वाला । स्त्री । वह्निशिखायाम् ॥ धातुपुष्पिकायाम् ॥ लाङ्गलिक्यौषधौ ॥ अग्नेरिवज्वालास्याः । अग्नेर्ज्वालेवया । रक्तपुष्पत्वात् ॥

अग्निदमनी । स्त्री । चुपविशेषे । वहुकण्टकायाम् । गुच्छफलायाम्

अग्निदीप्ता । स्त्री । महाज्योतिष्मतीवृक्षे । इति राजनिर्घण्टः ॥

अग्निदेवा । स्त्री । कृत्तिकानक्षत्रे । इ

ति हेमचन्द्रः ॥

अग्निव्रजः । पुं । मरुद्वाहे । धूमे । धूंवां इति भाषा प्रसिद्धे ॥

अग्निनिर्यासः । पुं ॥ अग्निजारवृक्षे ॥

अग्निपत्री । स्त्री । अग्निवती अगिया इतिलोकप्रसिद्धौषधौ ॥

अग्निपुराणम् । न । आग्नेये ॥ तच्च श्लोकसंख्या यथा । षोडशैवसहस्राणि पुराणचाग्निसंज्ञितमिति ॥

अग्निभम् । न । स्वर्णे ॥ कृत्तिकानक्षत्रे ॥

अग्निभूः । पुं । कार्त्तिकेये ॥ पुराकिलतारकोपप्लुतदेवरक्षार्थंशिवेनाग्निरूपंस्वबीजवन्हिमुखेक्षिप्ततेनाग्निनाकृत्तिकासुक्षिप्तंताश्चदैवागतगर्भसत्वपाः शरवणं प्रविश्यप्रसूताः तेनाग्निभूरितिसर्वानन्दः ॥ न । जले ॥ त्रि । अग्निजाते ॥ अग्नेर्भवति । भू । क्विप् ॥

अग्निभूति । पुं । वौद्धभेदे ॥ इतिहेमचन्द्रः ॥

अग्निमणिः । पुं । सूर्यकान्ते ॥ इतिजटाधरः ॥

अग्निमन्थः । पुं । श्योपर्णे । गणिकारिकायाम् । अरणीतिख्याते ॥ अग्निमन्थः श्वयथुहृद्रोगोष्णकफवातहृत् । पाण्डुनुत् कटुकस्तिक्तस्तु

वरोमधुरोग्निदः ॥ अग्निमन्थकुसुमशाकस्तु । अग्निमन्थभववातलस्तु नीता सर्तराचमुदकेसुसाधिता । तक्रतंसघृतंयुक्तपाचिताहिंगुनाजनितवासवासिता ॥ अग्निमन्थोयहृद्यश्चविदोषशमनः सरः । आध्मानच्छर्दिहार्शोयचशूरोगविषापहः ॥ अग्निंमन्थति । मन्थविलोडने । क मर्णण्यण् ॥ जयपर्णे ॥

अग्निमुखः । पुं । देवे ॥ विप्रे ॥ चित्रके ॥ अग्निर्मुखंयस्य ॥ न । वन्हेर्वक्त्रेषुपक्वेषु ॥

अग्निमुखी । स्त्री । भल्लातके । भिलावाइतिख्याते ॥ वाङ्गलिक्याम् ॥ अग्निरिवमुखमस्याः । गौरादि ॥

अग्नियन्त्रम् । न । अग्न्यस्त्रविशेषे । तोप बन्दूक अगन गन इत्यादिभाषा प्रसिद्धे ॥

अग्निरथनम । न । अग्न्याधाने । अग्निपालने ॥ अग्नेः रथनम् ॥

अग्निराजः । पुं । इन्द्रगोपाभिधेकीटे ॥

अग्निरुहा । स्त्री । मांसरोहिण्याम् ॥

अग्निवल्लभः । पुं । राले ॥ सालवृक्षे ॥

अग्निवाह । पुं । छागे । अग्नेर्वाहः । धूमे ॥

अग्निवित् । पुं । अग्निचिति । अग्निहोत्रिणि ॥

अग्निष्टो

अग्निवीजम् । न । } स्वर्ण ॥
अग्निवीर्यम् । न । }
अग्निव्रतम् । न । भूभुजोव्रतविशेषे ॥ यथा । मतापयुक्तस्तेजस्वीनित्यं-स्यात्पापकर्मसु । दुष्टसामन्तहिंस्र श्चतदाग्नेयंव्रतंस्मृतमिति ॥
अग्निशरणम् । न । दक्षिणाग्निगार्हपत्याहवनीयसभ्यावसथ्यशालायाम् ॥ अग्नीनांशरणम् ॥
अग्निशाला । स्त्री । अग्निशरणे ॥ अग्नीनांशाला ॥
अग्निशिखम् । न । कुसुम्भपुष्पे ॥ कुङ्कुमे ॥ अग्नेरिवशिखाकेसरोऽस्य॥ स्वर्ण ॥ पुं । कुसुम्भवृक्षे ॥ दीपे ॥ वाणे ॥ इतिशब्दरत्नावली ॥
अग्निशिखा । स्त्री । लाङ्गलिक्यांख्यौषधौ ॥ अग्नेरिवशिखायस्याः ॥ विशल्यायाम् । शाकभेदे । अग्नेरिवशिखास्तापोयस्याः ॥ ज्वालायाम् ॥
अग्निशेखरम् । न । कुङ्कुमे ॥
अग्निष्टुत् । पुं । अग्निष्टोमस्यविकृतिरूपे क्रतुविशेषे । अग्निस्तूयतेऽस्मिन् क्रतुविशेषे । ष्टुञ्स्तुतौ । सम्पदादित्वादधिकरणे क्विप् । अग्नेःस्तुत्स्तोमसोमा इति षः ॥
अग्निष्टोमः । पुं । यज्ञविशेषे ॥ अग्नीनांस्तोमः । अग्नेः स्तुत्स्तोम

अग्निहो

सोमाइतिषः । अग्निष्टोमार्थंयज्ञे ॥
अग्निघ्नः । पुं । लोहमयेतप्तखण्डलोष्टभर्जनपात्रे ॥
अग्निष्वात्तः । पुं । दिव्यपितृभेदे ॥ यथा । अग्निष्वात्ताश्चदेवानांमारीच्यालोकविश्रुताः इति । अपिच । अग्निष्वात्तोदयोलोके पितरश्चिरंवासिनःइति । चिरलोकपितरइत्यर्थः ॥ अग्निनासुष्टु यथास्यादेवंभक्ताः भक्षिताःश्रोतस्मार्त्ताग्नि दग्धाइत्यर्थः । एवञ्चाचमूर्ध्न्यादेशेनयुक्तः । मन्वादिस्मृतिषु मूर्ध्न्यषकारधाने वपाठः । नित्यबहुवचनान्तोयमितिकेचित् ॥
अग्निहोत्रम् । न । यज्ञभेदे । अग्न्याधाने ॥ सायंप्रातःकालयोर्नियमेनानुष्टेयेकर्मविशेषे । अग्नयेहोत्रमचेतिबहुव्रीहिः ॥ पुं । अग्नौ ॥ हविषि ॥ इतिमेदिनिकरः ॥
अग्निहोत्रहवणी । स्त्री । यज्ञाङ्गभूते निर्वापसाधने काष्ठपात्रविशेषे ॥
अग्निहोत्री । पुं । अग्निहोत्रयुक्ते । अग्निचिति ॥ अग्निहोत्रमस्यास्ति । अतइनिठनावितीनिः । योनग्निं पिनुहोत्यग्नौध्यङ्गारिणिचमानवः । मन्दाग्निरामयावीचदरिद्रश्च सजायते ॥

अग्न्यु

अग्नीत् । पुं । ऋत्विग्भेदे ॥ अग्नि मिन्धे । जिइन्धीदीप्तौ । क्विप् । नलोपः ॥ यज्ञमण्डपभेदे ॥

अग्नीध्रः । पुं । धनद्वारावरणीये ऋत्विग्विशेषे ॥ तस्यकर्माग्निरत्नम् ॥ अग्निविशेषे ॥

अग्नीध्रा । स्त्री । अग्निकार्य्ये । हविर्दानादिपूर्वकाग्निज्वालने ॥

अग्नीध्रीयः । पुं । दक्षिणाग्नौ ॥

अग्नीन्धनम् । न । अग्निकार्ये ॥ अग्नौ इन्धनम् ॥

अग्नीषोमीयम् । न । अग्नीषोम्येहविषि ॥ अग्नीषोमौदेवतेअस्य । द्यावापृथिवीसुनासीरेत्यादिनाछः ॥

अग्नीषोम्यम् । न । हविर्विशेषे ॥ अग्नीषोमौदेवते अस्य । द्यावापृथिवीत्यचश्चकारात्यत् ॥

अग्न्याधानम् । न । श्रौताग्निसंस्कृतौ । अग्निहोत्रे । अग्निरत्ने ॥ अग्नेः आधानम् । अग्निहोत्रमित्यर्थः ॥

अग्न्याधेयम् । न । आहवनीयादग्न्युत्पादकेकर्मणि ॥

अग्न्यागारः । पुं । अग्न्याधारकुण्डे ॥ अग्नेःआगारः ॥

अग्न्युत्पातः । पुं । उल्कापातादिदिव्ये वैकृते आकाशादिद्व्यभिविकारे ।

अग्रज

उपाहिते ॥ अग्नेरुत्पातनमुत्पातो वैकृतम् ॥ अग्निनिष्क्रोत्पाते । मन्त्रादिनाग्नेर्दाहशक्तिनिवारणे इत्यर्थः ॥

अग्रम् । न । पुरस्तात् । उपरि । फलपरिमाणे ॥ आलम्बने । समूहे । वृक्षादिशिरसि । प्रान्ते ॥ भिक्षाविशेषे । ग्रासचतुष्टये । ग्रासप्रमाणाभिक्षास्यादग्रं ग्रासचतुष्टयमिति स्मृतेः । चि । अधिके । प्रथमे । प्रधाने ॥ अग्रयते अगतिषा । अगकुटिखायांगतौ । ऋज्वेन्द्रेतिसाधु ॥

अग्रकाण्डः । पुं । सोमयज्ञाम् । कोशडीरे ॥

अग्रगः । त्रि । सेवके । अग्रेसरे । अग्रेगच्छति । गम्लृगतौ । अन्यत्रापीति डः ॥

अग्रगण्यः । त्रि । अग्रेगणनीये । यथा । गमनभवनयाने यद्वयानग्रगण्य इतिमहानाटकम् ॥

अग्रगामी । त्रि । अग्रगे । अग्रेसरे ॥

अग्रज । पुं । ज्येष्ठेभ्रातरि । ब्राह्मणे ॥ त्रि । पूर्वजाते ॥ अग्रेजात. सप्तम्यां जनेर्डः ॥

अग्रजङ्घा । स्त्री । जङ्घाग्रभागे । प्रतिजङ्घायाम् ॥

अग्रजन्मा । पुं । द्विजे । ज्येष्ठेभ्रातरि ।

अग्रमां

ब्रह्मणि ॥ अग्रेआदौजन्मास्य ॥
अग्रजातः । पुं । विप्रे ॥ त्रि । पूर्वजाते ॥ अग्रेजातः ॥
अग्रजातिः । पुं । ब्राह्मणे ॥ अग्रेजातिर्जन्मास्य ॥
अग्रणीः । त्रि । अग्रिमे । उत्तमे ॥ अग्रं नयति । णीञ्प्रापणे । सत्सूद्विषे । तिक्विप् । अग्रग्रामाभ्यामितिणत्वम् ॥ विष्णौ ॥ सर्वेषामग्रणीर्विष्णुः सेव्यपूज्यश्चनित्यश्च इतिमोक्षधर्मः ॥ अग्रमुत्कृष्टंनिरस्तसकलदुःखानुषङ्गंपरमानन्दस्वरूपं पदंस्थानंनयतिमुमुक्षूनितितथा ॥
अग्रतः । ऋ । प्रथमे । पुरोऽर्थे ॥ यथा । अग्रतश्चतुरोवेदाइति ॥ अग्रेइति । आद्यादित्वात्तसिं ॥ अग्रे ॥
अग्रतःसरः । त्रि । अग्रगामिनि । पुरोगे ॥ अग्रतःसरति । सृगतौ । पुरोग्रतोग्रेषुसर्त्तेरिटिटोवा ॥
अग्रदानी । पुं । आग्रहारिके । प्रेतसंग्रदानकषडङ्गतिलादि द्रव्यग्राहिणि पतितब्राह्मणे ॥ यथा । लोभीविप्रश्चगृह्णात्यग्रदानं गृहीतवान् । ग्रहणेसूतदानानामग्रदानी वभूवस इतिब्रह्मवैवर्त्तपुराणम् ॥
अग्रपर्णी । स्त्री । गौडभाषायामाकुशीतिप्रसिद्धौषधौ । अजलोमाख्यवृक्षे ॥

अग्रिमा

अग्रमांसम् । न । हृदयान्तर्गतमांसभेदे । वृक्कायाम् ॥ अग्रंमुख्यंमांसम् ॥ उदरमध्यवर्त्तिमांसवर्धनरूपरोगविशेषे ॥
अग्रयाणम् । न । मथसे ॥ नासीरे । सेनाविशेषे ॥
अग्रयायी । त्रि । अग्रेसरे ॥
अग्रलोहिता । स्त्री । चिल्लीशाके ॥ इति राजनिर्घण्टः ॥
अग्रसन्धानी । स्त्री । यमपञ्जिकायाम् । जीवानांशुभाशुभकर्मलिखितयमस्यपुस्तके ॥
अग्रसरः । त्रि । अग्रगामिनि ॥ अग्रेसरति । वाहुलकादृः ॥ पुरोगायतोग्रेषुसर्त्तेरितिटोवा ॥
अग्रहः । पुं । वानप्रस्थे ॥
अग्रहायणः । पुं । मार्गमासे । मार्गशीर्षे ॥
अग्रायणीयम् । न । वादस्यभेदे ॥
अग्राह्यः । त्रि । परमेश्वरे ॥ इन्द्रियाविषये ॥ नग्राह्यः ॥ गृहणार्योग्ये ॥ यथा । अग्राह्यं शिवनैवेद्यंपत्रं पुष्पंफलंजलम् । सालग्रामशिलास्पर्शान्नवैयातिपवित्रताम्इति ॥
अग्रिमः । त्रि । ज्येष्ठे ॥ उत्तमे ॥ अग्रे जातः । तत्रभवोवा । अग्रादिपुरुषाद्धिमच् ॥

अग्रेस

अग्रिमा । स्त्री । लवनीफले । लोना इतिगौडप्रसिद्धेफलवृक्षे ॥

अग्रियः । पुं । ज्येष्ठसोदरे ॥ त्रि । प्रधाने ॥ इत्यमरः ॥ अग्रेभव । घं ॥

अग्रीयः । त्रि । अग्रियार्थे ॥ अग्रेभवः । छप्रत्ययः ॥

अग्रे । ।। प्रधाने ॥ विभक्तिप्रतिरूपकोनिपात ॥

अग्रेगूः । पुं । अग्रगे ॥ अग्रेगच्छति । गम्लृगतौ । क्विप् । ऊङ्चगमादीनामित्यूङ् । अनुनासिकलोपश्च । अग्रेगावौ अग्रेगवः इत्यादिबोध्यम् ॥

अग्रेदिधिषूः । पुं । पुनर्भूभर्त्तरि । प्रधानपुनर्भूभार्य्ये ॥ अग्रेप्रधानंदिधिषूर्यस्य । अग्रेइतिविभक्तिप्रतिरूपकोनिपातः । समासान्तविधेरनित्यत्वान्नकप् ॥

ग्रेदिधिषूः । स्त्री । ज्येष्ठायांसोदरभगिन्यामनूढायां याकनिष्ठा विवाहेन दीयतेतस्याम् ॥ उक्तश्लोकाचिणा । ज्येष्ठायांयदनूढायां कन्यायामुच्यतेऽनुजा । साचाग्रेदिधिषूर्ज्ञेयापूर्वा तूदिधिषु स्मृतेति ॥

अग्रेवणम् । न । वनस्याग्रभागे ॥ वनस्याग्रे । राजदन्तादिषु निपातनात्समासाच्चुक् । वनंपुरगेतिणत्वम् ॥

अग्रेसरः । त्रि । अग्रगे । पुरोगमे ॥ अग्रमग्रेणाग्रे वासरति । सृगतौ । पु

अघोरा

। रोगतेऽग्रेपुसर्त्तेरितिटः अग्रेइति एदन्तत्वंनिपातनात् ॥

अग्रेसरिक । त्रि । अग्रगामिनि ॥

अग्र्य । त्रि । अग्रिमे । प्रधाने ॥ पुं । ज्येष्ठभ्रातरि ॥ प्रतिष्ठिते ॥ अग्रेभवः । अग्रादयत ॥ अग्रेसाधुर्वा । तत्रसाधुरितियत् ॥ अग्रइवा । आखादिभ्योयः ॥

अघम् । न । व्यसने ॥ दुःखे ॥ दुरिते । पापे ॥ अपराधे ॥ त्रि । तद्वति ॥ पापाचरणे ॥ अघतेगच्छतिदानादिना । अघिगतौ । पचाद्यच् । आगमशास्त्रस्याऽनित्यत्वान्ननुम् ॥ अङ्घ्यतेऽनेनवा ॥ अघंविद्यतेऽस्यअर्श आद्यच् ॥

अघमर्षणम् । त्रि । पापनाशिमन्त्रविशेषे । सर्वैर्मन्त्रामघ्नंसिनिगद्ये ॥ अघमर्षति । मृषुसहने । सहनमभिभवः । यदा । मृष्यति । ल्युट् । स्त्रियांटित्वान्ङीप् ॥

अघमारः । पुं । यमे ॥ अघेनपापविशेषेणअत्युग्रेण अकालेमारयतिइतिअघमारः अजन्तः ॥

अघायुः । त्रि । पापजीवने ॥

अघोरः । पुं । गिरिणे । त्रि । अभयानवे ॥

अघोरा । स्त्री । भाद्रकृष्णचतुर्दश्याम् ॥

अङ्कपा

यथा । भाद्रमास्यसितेपक्षेअघोरा ख्याचतुर्दशी । तस्यामाराधितः स्था णुर्नयेच्छिवपुरंध्रुवमितिस्मृतिः ॥

अघोः । ।। सम्बोधने ॥

अघ्न्यः । पुं । प्रजापतौ ॥ अघ्न्यादि त्वात्हन्तेर्यक्अडागमउपधालोपश्च ॥ हन्तुमशक्यो ऽघ्न्यःपर्वतवृत्तिवेदभाष्यम् ॥

अघ्न्या । स्त्री । सौरभेय्याम् ॥ नहन्य तेनहन्ति वादातारम् । अघ्न्याद यश्चेतिसाधुः ॥

अङ्कः । पुं । रूपकभेदे ॥ चिन्हे ॥ आजौ ॥ भूषणे ॥ कुक्षभूषायाम् ॥ रूपके ॥ अङ्गे ॥ अन्तिके ॥ उत्सङ्गे ॥ स्थाने ॥ प्रकरणे ॥ अगे ॥ कटिप्रदेशे । नाटकादिपरिच्छेदे ॥ एकादिरेखायाम् ॥ अपराधे ॥ नवसु ॥ नवमाङ्के । अङ्कयतेऽनेन । अकिलचणे । हलश्चेतिघञ् ॥

अङ्कतिः । पुं । अग्निहोत्रिणि ॥ वन्हौ ॥ वेधसि ॥ वायौ ॥ अञ्चति । अञ्चुगतौ । अञ्चेःकोवेत्यतिःकित्त्वान्तादेशः ॥

अङ्कनम् । न । सख्यासस्थाने ॥ चिह्न युक्तीकरणे । आंकनाइतिख्याते ॥

अङ्कपालिका । स्त्री । आश्लेषे । आलिङ्गने ॥

अङ्कपाली । स्त्री । परीरम्भे । धात्री

अङ्कुरः

म् ॥ वेदिकायाम् ॥ इतिमेदिनी ॥ कोटयामितिहेमचन्द्रः ॥

अङ्कोल्यः । पुं । चिच्चोटके । चेच् कोदृतिगौडभाषाप्रसिद्धे ॥

अङ्कः । न । चिन्हे ॥ शरीरे । अञ्चति । अञ्चुगतिपूजनयोः । अञ्चयञ्जियुजिभृजिभ्यःकुश्चेत्यसुन् कवर्गश्चान्तादेशः । अङ्कसी । अङ्कांसि ॥

अङ्कितः । वि । चिन्हिते । खाञ्छिते ॥ इतिव्याडिः ॥

अङ्किनी । स्त्री । अङ्कानांसमूहे ॥ खखादित्त्वादिनिः ॥

अङ्की । स्त्री । सदङ्कभेदे । अङ्कयें ॥

अङ्कुरः । पुं । रुधिरे ॥ लोम्नि ॥ सलिले ॥ अभिनवोद्भिदि ॥ अङ्क्यते । अकिलचणे । मन्दिवाग्रिमथीत्यु रच् ॥

अङ्कुरितः । वि । उदयति ॥

अङ्कुशः । पुं । न । गृण्याम् । वाधायाम् । अङ्क्यतेऽनेन । अकि । सानसिवर्णसिपर्णसितण्डुलाङ्कुशेति निपातनादुशच् ॥

अङ्कुशदुर्दुरः । पुं । गम्भीरवेदिनि ॥

अङ्कुशी । स्त्री । फलाद्याहृतिसाधने ॥ बौद्धमातरि । जिनानांचतुर्विंशति शासनदेव्यन्तर्गतदेवी विशेषे ॥ इति हेमचन्द्रः ॥

अङ्क्यः

अङ्कूर । पुं । अङ्कुरे । अभिनवोद्भिदि ॥ अङ्क्यते । अङ्किलक्षणे । खर्ज्जूरादित्वादूरः ॥

अङ्कोटः । पुं । निकोचके । अङ्कोले । टेराइतिख्यातवृक्षे ॥ अङ्कोटकः कटुस्तीक्ष्णः स्निग्धोष्णस्तुवरोलघुः । रेचनः कृमिशूलामशोथग्रहविषापहः ॥ विसर्पकफपित्तास्रमूपक्लेदविषापहः । तत्फलंशीतलंस्वादुक्षेप्तमंदंचगुरु ॥ वल्यविरेचनवातपित्तदाहक्षयास्रजित ॥ अङ्क्यते । अङ्किलक्षणे । वाहुलकादोटः ॥

अङ्कोठ । पुं । अङ्कोटे । टेराइतिख्यातवृक्षे । आकोडइतिगौडभाषाप्रसिद्धे । अङ्क्यतेवाहुलकादोठ ॥

अङ्कोलः । पुं । अङ्कोटवृक्षे ॥

अङ्कोलिका । स्त्री । आलिङ्गने । इति शब्दमाला ॥

अङ्कोल्लसारः । पुं । । स्थावरविषप्रभेदे द्रुमान्तरे । इतिहेमचन्द्रः ॥

अङ्क्यः । पुं । मृदङ्गभेदे । यथा । सार्द्धताललयायाम श्चतुर्दशाङ्गुलानन: । हरीतक्याकृतिर्यःस्याद्ङ्कोङ्के सहियायतेरतिभरतः ॥ अपिच । हरीतक्याकृतिस्त्वङ्कोयवमध्यस्तयोर्द्वकः । आलिङ्ग्यश्चैव गोपुच्छोमध्यदक्षिणवामगाः ॥

अङ्गजः

अङ्ग । । । सम्बोधने । अङ्गति । अगि गतौ । पचाद्यच् । हर्षे । सङ्गमे । अङ्ग याचायाम् । पुनरर्थे ॥ अङ्गनम् । घञ् । मूर्खोपिनावमन्तव्यःकिमङ्गविद्वान् ॥

अङ्गम् । न । काये । गात्रे । अवयवे । प्रतीके । उपाये ॥ श्रुतेःशिक्षादिषट्सु । यथा । शिक्षाकल्पोथाकरंछन्द निरुक्तंछन्दएवच । ज्योतिषञ्चषडङ्गानिकथितानिमनीषिभिः । मनसि । यथा । हिरण्यगर्भोऽङ्गभुवमुनिर्धरिरितिमाघः ॥ क्लीवैकत्वेतुअप्रधाने । तल्लक्षणंयथा । तदीयप्रधानफलजनकव्यापारजनकत्वेसतितदीयप्रधानफलाजनकत्वमङ्गत्वम् । पुंभूम्निनीष्टति ॥ यथा । वैद्यनाथसमारभ्यभुवनेशान्तगंशिवे । तावद्गङ्गाभिधोदेशो याचार्यानधिदुष्यतीति ॥ अङ्गाःचविषयविशेषाःतेषांनिवासोजनपद अङ्गाः । तस्यनिवासइत्यर्थेजनपदेलुप् । चुपियुक्तयद्ध्यक्तिवचने । त्रि । अङ्गयति । अन्तिके । अङ्ग्यते ज्ञायतेऽनेन । अगिगतौ । घञ् । अङ्गति । अञ्चा ॥ सम्बादके ॥ षट्सु ॥ सत्ये ॥

अङ्गग्रहः । पुं । गात्रवेदनायाम् । इति वैद्यकम ॥

अङ्गज । पुं । अनङ्गे । केशे । पुत्रे । गदे । न । रुधिरे ॥ मले । अङ्गान्

अङ्गभूः

अङ्गेभ्योवा जातः । जनी । ङीष् ॥ कन्यायामङ्गजामता ॥ चि । कायजे ॥

अङ्गणम् । न । अङ्गनं ॥ पृषोदरादित्वा साधुत्वम् ॥ अङ्गत्यच । अगि । ल्युट । अनादेशस्यवाल्लुकाभात्त्वमित्येके ॥

अङ्गतिः । पुं । अग्निहोत्रिणि ॥ वह्नौ ॥ वेधसि ॥ विष्णौ ॥ इतिशब्दरत्नावली ॥

अङ्गदं । पुं । । वालिवानरपुत्रे ॥ न । केयूरे । चि । अङ्गदातरि ॥ अङ्गदयतेदायति यतिवा । देङरक्षणे दैप् शोधनेदो अवखण्डनेवा । आतोनुपेतिकः ॥

अङ्गदा । स्त्री । यम्यदिंदन्तिहस्तिन्याम् ॥

अङ्गनम् । न । माङ्गल्ये ॥ दाने ॥ अङ्गत्यच । अगिगतौ । करणेत्यधिकरणेल्युट् ॥

अङ्गना । स्त्री । कामिन्याम् ॥ प्रशस्तान्यङ्गान्यस्याः । अङ्गात्कल्याणादितिन, ॥ सार्वभौमस्योत्तरदिग्गजस्यचेयोषिति ॥ अङ्गति । अगिगतौ । युच् ॥

अङ्गनाभिः । पुं । अशोकपादपे ॥

अङ्गपः । पुं । स्मरेशे ॥

अङ्गमाखिः । पुं । आखिरङ्गने ॥ इति पिक्काण्डशेषः ॥

अङ्गभूः । पुं । पुत्रे ॥ स्मरे ॥

अङ्गः

अङ्गमर्दः । पुं । अङ्गसंवाहके । नापितादौ ॥

अङ्गमर्दकः । पुं । अङ्गमर्दे । अङ्गसर्दिनि ॥

अङ्गमेजयत्वम् । न । अङ्गकम्पने ॥ आसनस्थैर्यविघाते ॥ सर्वाङ्गगार्वेपथौ । आसनमनसोःस्थैर्यस्यबाधके ॥

अङ्गरक्तः । पुं । गुग्गुलौ । चन्यां । पिकाचेटचे । चि । रञ्जिते ॥

अङ्गरचणी । स्त्री । आयस्याम् । जालिकायाम् । लोहेकासंज्ञावादितिभाषासिद्धायाम् ॥

अङ्गरागः । पुं । चन्दनाद्यैरङ्गलेपे । विलेपने ॥ अङ्गेषुरागः ॥

अङ्गराट् । पुं । अङ्गदेशाधिपे । कर्णे ॥

अङ्गलक्ष्मीः । स्त्री । देहकान्तौ ॥

अङ्गलोड्यः । पुं । चिञ्चोटवृक्षे ॥

अङ्गवः । पुं । शुष्कफले । वाने ॥

अङ्गविकृतिः । पुं । वृषस्यारोगे ॥ अङ्गविकारे ॥

अङ्गविक्षेपः । पुं । अङ्गुल्याद्यङ्गचालनरूपेन्द्रत्वे । अङ्गविक्षेपणे । अङ्गहारे ॥ अङ्गानांविक्षेपोयत्र ॥

अङ्गवैकृतम् । न । अङ्गविकारे । दुरङ्गितेः ॥

अङ्ग । न । पदिधि ॥ अज्यते । अञ्जूव्यक्त्यादौ । अञ्चत्रिनियुजिभृजिभ्यः

अङ्गा

कुरुवेत्यसुन्। कवर्गस्यात्वादेशः। अङ्गसी अङ्गांसि॥

अङ्गसंस्कारः। पुं। परिकर्म्मणि। शरीरशोभाजनककर्म्मणिस्नानादौ। अङ्गं संस्क्रियतेऽनेन। सम्पूर्वात्कृञोते घञ्॥

अङ्गहारः। पुं। अङ्गविक्षेपे। अङ्गुल्यादिविन्यासभिदि। अङ्गानांस्थानात् स्थानान्तरेनयने॥ अङ्गस्यहरणम्। हृञ् हरणे। घञ्॥

अङ्गहारिः। पुं। अङ्गहारे॥ इतिभरतधृतोहङ्कचन्द्रः॥

अङ्गहीनः। त्रि। व्यङ्गे। काणादौ॥ अङ्गेन अङ्गाभ्यां अङ्गैर्वा हीनः॥

अङ्गारः। पुं। महीसुते। हितावल्याम्। पुं। न। अङ्गते। निर्पूमाग्निपिण्डे। अङ्गति। अगिगतौ। अङ्गिमदिमन्दिभ्यआरन्॥ अङ्गमियर्त्तिवा। चुगतौ। कर्म्मण्यण्॥

अङ्गारकः। पुं। कुजे। भौमे॥ अङ्गानिप्रत्यङ्गिपीनत्वात्। ऋगतौ। कर्म्मण्यण्। संज्ञायांकन्। यद्वा। अङ्गारइवरक्तवर्णत्वात्। इवेप्रतिकृतावितिकन्। उलूकांशे॥ कुरण्टके॥ भृङ्गराजे॥

अङ्गारकतैलम्। न। स्वनामख्यातपक्वतैलविशेषे। तस्यपाकप्रकारो यथा।

अङ्गार

मूर्वाशाचाङ्गरिद्रेद्वे मञ्जिष्ठासेन्द्रवारुणी। वृहतीसैन्धवंकुष्ठं रास्नामांसी शतावरी॥ आरनालाढकेनैवतैलप्रस्थंविपाचयेत्। तैलमङ्गारकंनाम सर्वव्रणविषापहम्॥

अङ्गारकमणिः। पुं। प्रवाले॥ इतिराजनिर्घण्टः॥

अङ्गारकर्कटी। स्त्री। अंगाकडी वाटी लिट्टी इत्यादि प्रसिद्धिंगतायाम्॥ यथा। शुष्कगोधूमचूर्णन्तुसाम्बुगाढं विमर्दयेत्। विधायघटकाकारंनिधूमेऽग्नौशनैःपचेत्॥ अङ्गारकर्कटीह्येषापाटहणीमुक्तवालघुः। दीपनीकफकृद्वल्यापीनसश्वासकासजित्॥

अङ्गारकुण्डकः। पुं। हितावल्याम्। कुण्डे॥

अङ्गारधानिका। स्त्री। हसन्त्याम्। स्वार्थेकन्॥

अङ्गारधानी। स्त्री। अङ्गारधारिण्याम्। हसन्त्याम्। अङ्गाराधीयन्तेऽस्याम्। डुधाञ्धारणपोषणयोः। ल्युट्। ङीप्॥

अङ्गारधारिणी। स्त्री। अङ्गारधान्याम्। अङ्गाराणांधारिणी॥

अङ्गारपरिपाचितम्। न। शूलादिनापक्वमांसे॥ अङ्गारेषुपरितःपाचितम्। त्रि। अङ्गारपक्वे॥

अङ्गार्या

अङ्गारपर्णः । पुं । चित्ररथाख्येगंधर्वे ॥ इतिमहाभारतम् ॥

अद्रिकूट । पुं । देव्याःस्थानविशेषे ॥ यथा । अद्रिकूटेमहायोगी रुद्राणो परमेश्वरीति ॥

अद्रिजम् । नं । शैलजे । शिलाजतुनि ॥ त्रि । अद्रिसम्भवे ॥ अद्रौजातम् । जनी । सप्तम्यांजनेर्डः ॥ अद्रेर्वा जातम् । पञ्चम्यामितिडोवा ॥

अद्रिजतु । नं । शिलाजतुनि । शैलनिर्यासे ॥ अद्रेर्जत्विव । षष्ठीतत्पुरुष ॥

अद्रिजा । स्त्री । पार्वत्याम् ॥ अद्रेर्जाता । जनी । पञ्चम्यामजातावितिडः ॥ सैहलीवृक्षे ॥

अद्रिजित । पुं । वासवे ॥ अद्रीनजयति । जि० । सप्तम्यांजेरितिक्विप । तुक् ॥

अद्रितनया । स्त्री । पार्वत्याम् ॥ अद्रेः तनया ॥

अद्रिभिद् । पुं । मघवति । इन्द्रे ॥ अद्रीन् गोधानभिनत्ति । भिदे क्विप् तुक् ॥

अद्रिभूः । पुं । आखुकर्णीलतायाम् ॥

अद्रिराजः । पुं । हिमाद्रौ ॥ अद्रीणांराजा । टच ॥

अद्रिसारः । पुं । लोहे ॥ अद्रेः सार ॥

अद्रीशः । पुं । हिमाद्रौ ॥ शिवे ॥ अद्रीणामीश ॥

अद्रोह । पुं । द्रोहाभावे ॥ नद्रोह ॥ त्रि । तद्वति ॥ अद्रोहोऽस्यास्ति । अर्शआद्यच् ॥

अद्वयम् । त्रि । स्वगतभेदशून्ये । अद्वितीये ॥ पुं । बुद्धे ॥

अद्वयकारणम् । न । जगतोऽभिन्ननिमित्तोपादानेब्रह्मणि ॥

अद्वयवादी । पुं । बुद्धे । वैदान्तिके ॥ अद्वयमद्वैतवदत्यवश्यम् । आवश्यकेणिनि ॥ त्रि । अद्वयवक्तरि ॥

अद्वितीय । त्रि । केवले । एकस्मिन् ॥ न । विजातीयभेदरहिते आत्मतत्त्वे ॥ नविद्यतेद्वितीयोऽस्य ॥

अद्वेष्टा । त्रि । द्वेषाभावविशिष्टे ॥ सर्वाणिभूतान्यात्मत्वेनपश्यन्नात्मनोदुःखहेतावपिप्रतिकूलबुध्यभावायोनद्वेष्टितस्मिन ॥

अद्वैत

अद्वैतः । त्रि । सजातीयविजातीयद्वितीयशून्ये पूर्णेपरमात्मनि ॥ भेदविकल्परहिते । यथा । द्वैतामतीतैनाऽनर्थः किन्त्वानन्दोमहानिति । अत्रलौकिकदृष्टान्तःस्त्रीवाक्येनेरितःश्रुतौ । स्त्रियाविश्लिष्टस्तद्वेदंपश्यन्कामेनपीड्यते । आलिङ्गितस्तयैकत्वंप्राप्यानन्देनतृप्यति । चित्तानुरागसिद्ध्यर्थंप्रियवेतिविशेषणम् । दुष्टायांसत्यपिस्त्रीत्वेचेतोनैवानुरज्यति । चेत्यादिकंवाक्यं गृहकृत्यंतथान्तरम् । आलिङ्गितःसुखाविष्टोनवेत्तिहृयमप्यसौ । अवेदनेनतद्दानिदृष्ट्वोत्तिष्ठांपरित्यजन्अप्राप्यचित्तविक्षेपंमज्जत्यानन्दसागरे । एवंसतीसुषुप्तौवाश्लिष्टःपरमात्मना । नवहिर्जागरंनान्तः स्वमंचद्वैतमीक्षते । आनुकूल्यमातिकूल्येद्वैतादर्शनतोनहि । ततःकामभयाभावादात्मानन्देनिमज्जतीति ॥

अद्वैतवादी । पुं । वृद्धे । त्रि । विवेकिनि । ब्रह्मात्मैक्यवादिनि । अस्यमतंयथा । ब्रह्मैवसत्यत्वम् प्रत्यक्षादिप्रमाणैः सिद्धम् । विश्वन्तुब्रह्मण्यारोपितम् । यथारज्जु रज्जुस्वरूपाज्ज्ञानात्सर्पत् प्रतिभाति तथाऽत्मस्वरूपाज्ज्ञानात् विश्वंवस्तुयत् प्रतिभाति । प्रकृतिर्जीवश्चापिपर्यवसाने ब्रह्मैव ब्रह्मा

अधमा

न्यतत्सदस्तुनास्तीति ॥

अधःक्रिया । स्त्री । अपमाने ॥ अधःकारणम् । कृञःअर्च ॥

अधःचिन्तम् । त्रि । न्यञ्चिते । अधस्थवस्तुनि ॥

अधःपुष्पी । स्त्री । अवाक्पुष्पिकायाम् । हेठाहुली इतिगौडंभाषा । गोजिह्वायाम् ॥ अधःपुष्पाण्यस्याः । गौरादित्वान्ङीष् ।

अधनः । त्रि । भार्यादिहीने ॥ यथाचयएवाऽधनोराजन्भार्यादासस्तयासुतः । यत्तेसमधिगच्छन्तियस्यतेतस्यतद्धनमितिमात्स्ये ३१ अध्यायः ॥

अधमः । त्रि । कुत्सिते । न्यूने ॥ पुं । उपपतिभेदे ॥ अवत्यस्मादात्मानम् । अवरक्षणादौ । अवद्योयमाधमार्वरेफाःकुत्सितेरूर्ध्वमप्रत्ययेनिपातः । तस्यैवधकारस्यमत्वेधकारःयद्वा । नेधम्यते धमतिवा । धमज्ञानेसौत्रः । घञ्प्रत्ययेन ॥ यद्वा । अधोभवः । अवोधसोर्लोपश्चेतिस्वामी ॥

अधमर्ण । त्रि । ऋणिनि । ऋणकारिणि ॥ अधमंदुःखमदृणंयस्य । अधमंऋणेऽतिऋणमाधमर्ण्यइतिनिपातनात्ससम्यन्तोत्तरपदेनवासमासः ॥

अधमर्णिक । त्रि । ऋधमर्णे ॥

अधमा । स्त्री । नायिकाभेदे ॥

अधरे

अधमाङ्गम् । न । चरणे । पादे ॥
अधर । पुं । ओष्ठे । उत्तराधरोष्ठसमा
धे ॥ अधरलक्षणं यथा । पाटलोवर्त्तु
लःस्निग्धोरेखाभूषितमध्यभूः । सी
मन्तिनीनामधरोराज्ञाश्चैवप्रियाभ
वेत् ॥ श्याम स्थूलोधरोष्ठ स्याद्वैधव्य
कलहप्रद । मक्षणेमत्तकाशिन्या
श्चोत्तरोष्ठ सुभोगद ॥ इतिसामुद्र
कम ॥ पुं । न । स्मरागारे । रतिम
न्दिरे ॥ वि । हीने ॥ तले । अनूर्द्धे ॥
नधरति । धृञधारणे । अचाद्यच ॥
यद्वा । धरादुद्धात्कठिनाद्धाऽन्य ॥ न
म्रियते । धृङ्अनवस्थाने । पुंसीति-
धेावा । नञ्समास ॥ धरासम्बन्धर-
हिते ॥ हीनवादिनि ॥
अधरत । ति । अधोभागे ॥ अधरस्मात् ।
तसिल् ॥
अधरमधु । न । अधरास्थिते । वक्त्रासवे ॥
अधरस्तात् । ति । अधोभागे । अधरत ॥
अधरा । स्त्री । अधोदिशि ॥ नीचाया-
म् ॥
अधरात् । ति । अधोभागे ॥ उत्तराधरद
क्षिणादातिरितिस्वार्थेआति । वस
त्यागतोरमणीयवा ॥
अधरीकृत । वि । तिरस्कृते ॥
अधरीण । वि । धिक्कृते । तिरस्कृते ॥
अधरेण । ति । अधो दिशिदेशे कालेच ।

अधश्च

एनबन्यतरस्यामदूरेऽपञ्चम्या इतिस्वा
र्थे एनप् । वसति रमणीयंवा ॥
अधरेद्युः । ति । परस्मिन्नहनि ॥ अधर-
स्मिन्नहनि । सद्य परुदित्यादिनाऽध
रशब्दात् एद्युस्प्रत्ययेनिपात्यते ॥
अधर्मः । पुं । ब्रह्मवधादिनिषिद्धकर्मज
न्ये पापे ॥ वेदेनिषिद्धे । नानावि
धदुःखसाधने । धर्मविरोधिनि ॥ ध
र्मविरुद्धोऽधर्म ॥ न । परब्रह्मणि ॥
धर्मरहितत्वात् ॥ वि । ब्रह्मविदि ॥
अधर्मज्ञः । वि । धर्मविचारनिष्ठारहिते ।
तत्रासारत्वप्रत्ययवति ॥
अधर्ममिश्रः । पुं । कलियुगे ॥ अधर्मो
मिश्रंयस्य ॥ वि । अधर्ममिश्रे । मि-
थ्यावादिनि ॥
अधर्मास्तिकाय । पुं । धर्मास्तिवन्य
कृति ॥
अधश्चर । पुं । चौरे ॥ वि । अधोगा
मिनि ॥
अधश्शय्या । स्त्री । अधइशयने ॥
अधश्शल्य । पुं । अपामार्गे । ऊगाइति
ख्याते ॥
अधश्शाख । पुं । ससारास्थित्यवृक्षे ॥ अ-
धइति अर्वाचीना कार्योपाधयोहि
रण्यगर्भाद्याग्रह्यन्ते ते नानादिक्म
खतत्त्वात् शाखाइवशाखाअस्येतिब्यु
त्पत्त्यामायामय ससारास्थित्यवृक्षोऽय

णाखशब्देनोच्यते ॥

अध । ।। पाताले ॥ नीचैरर्थे । तले । अधोभागे ॥ स्मरालये ॥ अधस्मिन् अधस्याम् अधस्मात् अधस्याः अधः अधरावा । वसत्यागतोरमणीयवा । पूर्वाधरावराणामित्यसिसाधादेशश्च ॥ । ।

अधस्तात् । । । कामगेहे । योनौ ॥ अनुज्ञार्थे । अधोभागे ॥ अधस्मिन अधस्याम अधस्मात अधस्याः अधः अधरावा दिक् । दिक्शब्देभ्यःसप्तमीपञ्चमीत्यादिनाअस्तातिप्रत्ययस्तद्योगेनास्तातिचेत्यधरस्यादेशः ॥

अधस्ताद्गमनम । न । अधर्मेणसुतलादिपुगमने ॥ अधोगमने ॥

अधार्मिक । त्रि । पापिनि । अधर्मेणव्यवहर्त्तरि । शास्त्रप्रतिषिद्धागम्यागमनादनुष्ठातरिमानुषे ॥ नाधार्मिके वसेद्ग्रामेनगूढ्वहुलेभृशमिति मनुः ॥

अधार्ष्ण्यम् । न । असामर्थ्ये ॥

अधि । । । अधिकारे ॥ ईश्वरे ॥ अधिकृत्यार्थे । आधिक्ये ॥ उपरि ॥ अधिकार्थे ॥ यथा अधिमास । अधिको मासइत्यर्थः ॥

अधिकम । न । अर्थालङ्कारभेदे ॥ यथा । महतोयन्महीयांसावाश्रिताश्रयिणौ क्रमात । आश्रिताश्रयिणौ स्यातांतनुत्वेप्यधिकन्तुतत् ॥ आश्रितमाधेयम । आश्रयस्तदाधार । तयोर्महतोरपि विषयेतदपेक्षयातनू आश्रयाश्रयिणौ प्रस्तुतवस्तुप्रकर्षविवक्षया यथाक्रमयदधिकतरतांप्रतीतस्तेदिदद्विविध मधिकनाम । क्रमेणोदाहरणम् । अहोविशालंभूपालभुवनचित्तयोदरम् । मातिमात्रमशक्यापियशोराशिर्यदक्षते ॥ युगान्तकालमतिसहतात्मनोजगन्तियेस्यांसविकांशमासत । तनोमम्मुस्तवनकैटभद्विषस्तपोधनाभ्यागमसम्भवा मुदइति ॥ फले ॥ अध्यारूढम । अधिकमिति अध्यारूढशब्दात्कन उत्तरपदलोपश्च ॥ * ॥ हेतूदाहरणाभ्यिकमधिकम् ॥ न्या ५ । ५६ ॥ हेतूदाहरणेत्युपलक्षणम् दूषणाद्यधिकमपिबोध्यम् । तथाच । कृतकर्तव्यापुनरुक्ताभिधानमितिफलितम । अनुवादस्तु नकृतकर्त्तव्य साभिप्रायत्वात । प्रतिज्ञाधिक्यञ्चपुनरुक्तम् धूमादालोकात् महानसमज्ञत्वरवदित्यादिकन्तुविनासमयबन्धदार्थादिकमादुक्तमधिकम् । यथा । महानसमहानसयदितितुनाधिकाऽकिन्तु पुनरुक्तम् ।

अधिक
वि। उत्कृष्टे। अतिरिक्ते। समधिके।
अधिकरणम्। न। आधारकारके।
यत्नभवेतितस्मिन्। कर्त्तृकर्मद्वाराक्रि
यान्वयइत्यर्थं॥ एकन्यायोक्तपादने॥
मीमांसाग्रन्थे॥ अधिक्रियते वेदवि
चारोऽस्मिन्ननेनवेत्यधिकरणवेदवि
चारग्रन्थात्मिकामीमांसेत्यर्थः॥ य
थाहु। विषयोविशयश्चैवपूर्वपक्षच
स्तथोत्तरम्॥ निर्णयश्चेतिमञ्चाङ्गशा
स्त्रेऽधिकरणस्मृतमिति॥ एवक्रमेणवि
वेचनमेचाधिक्रियतइत्यधिकरणम्॥
अधिपूर्वात्कृञोल्युट्॥
अधिकरणविचाल। पुं। द्रव्यस्यसख्यान्त
रादाने॥ यथा। एकराशिंपञ्चधा
कुरु। अनेकराशिमेकमाकुरु। सए
वाधिकरणविचालोयदेकमनेककिय
ते यदप्यनेकमेककियते सोऽप्यधिक
रणविचालइतिभाष्यम्॥
अधिकरणसिद्धान्त। पुं। सिद्धान्तविशे
षे॥ यथा। यत्सिद्धावन्यप्रकरणसिद्धि
सोधिकरणसिद्धान्तः। १। ३० यस्या
र्थस्यसिद्धौजायमानायामेव अन्यस्य
प्रकरणस्यसिद्धिर्भवति सोधिकरण
सिद्धान्तइत्यर्थः॥
अधिकर्त्तव्यम्। न। अधिकरणेयद्भव
तितस्मिन्॥
अधिकर्द्धि। वि। महासम्पद्युक्ते। सम

अधिका
द्धे॥ इत्यमरः॥ अधिकाकृद्धिरस्य॥
अधिकर्म्मिक। पुं। चेट्टाध्यक्षे। हाटे
का चौधरी इतिभाषाप्रसिद्धे॥
अधिकाङ्गम्। ने। कञ्चुकादिनिबन्धने
। सारसने। कञ्चुकादिदार्ढ्यार्थंशूरै
र्मध्यकायेनिबद्धेपट्टिकादौ॥ वि। ए
कविंशत्यङ्गुलादौ॥ अधिकमङ्गात्॥
अधिकारः। पुं। विधिपुरुषसम्बन्धे।
प्रक्रियायाम्। राज्ञांछत्रधारणादिव्या
पारे॥ अधिआधिक्यस्यकरणम्। कृ
ञोभावेघञ्॥ अधिकृतेदेशादौ॥
यथा। निजाधिकारोयम्। अयञ्चव
रोधिकारः॥ प्रकरणे॥ यथा। नैमि
त्तिकोयंप्रायश्चित्ताधिकारः॥ क्रिया
जन्यफलभागित्वरूपे प्रतिकर्मणिभि
न्ने। स्वामित्वे॥ यथा। सर्वेस्युरधि
कारिणइतिस्मृतिः॥ प्रभुयोजने॥
व्याकरणमतेपूर्वसूत्रस्थितपदस्यपर
सूत्रेपूपस्थितौ। अनुवृत्तौ॥ सचिवि
धोयथा। सिद्धावलोकितोऽयंश्रमणऽङ्
कोमुतिरेवच। गङ्गास्रोतइतिख्यातश्च
धिकारास्त्वयोमता इति॥
अधिकारविधिः। पुं। कर्मजन्यफलस्वाम्य
बोधकेविधौ॥ कर्मजन्यफलस्वाम्य
मकर्मजन्यफलभोक्तृत्वम्। सचयजे
तस्वर्गकाम इत्यादिरूपः। स्वर्गमुद्दि
श्ययागविधिताऽनेनस्वर्गकामस्यया

अधिको

। गजन्येफलभोक्तृत्वंप्रतिपाद्यते । य
ऽग्न्याहिताग्नेरग्निर्गृहान्दहेत् सोऽग्न
येचार्मवतेऽष्टाकपालंनिर्वपेदित्या-
दिनाऽग्निदाहादौनिमित्ते कर्मविद्
धंतन्निमित्तवतःकर्मजन्यपापक्षयफ
लस्वाम्यंप्रतिपाद्यते । एवमहरहः
सन्ध्यामुपासीतेत्यादिनाशुचिविहि
तकालजीवित्वं सन्ध्योपासनजन्यप्रत्य
वायपरिहारफलस्वाम्यंबोध्यते ।
तत्फलस्वाम्यंतस्यैवयोऽधिकारिविशि
ष्टः । अधिकारश्चसएव यद्विधिवाक्ये
षुपुरुषविशेषणत्वेनश्रूयते । यथाका
म्येकर्म्मणिफलकामना । नैमित्तिके
निमित्तनिश्चयः । निश्चेसन्ध्योपास
नादौ शुचिविहितकालजीवित्वम् ।
अतएवराजाराजसूयेनस्वाराज्यका-
मो यजेतेत्यनेनविधिवाक्येनस्वारा
ज्यमुद्दिश्यराजसूयंविदधतापि नस्वा
राज्यकाममात्रस्य तत्फलभोक्तृत्वं प्र
तिपाद्यते । किन्तुराज्ञःसतःस्वाराज्य
कामस्यैव राज्यत्वस्याप्यधिकारिविशे
षणत्वेनश्रवणात् । विशेषःशास्त्रे ।
अधिकारी । पुं । प्रमातरि । यथा । वि
धिपदपीतवेदवेदाङ्गत्वेनापाततोधि
गताखिलवेदार्थोऽस्मिन्जन्मनिजन्मा
न्तरेवा काम्यनिषिद्धवर्जनपुरस्सरंनि
त्यनैमित्तिकप्रायश्चित्तोपासनानु

अधिगं

ष्ठानेनानर्गताखिलकल्मषतयानिता
न्तनिर्मलस्वान्तः । साधनचतुष्टयसम्प
न्नः प्रमाता वेदान्ताधिकारीतिलक्ष
णलक्षिते पुरुषे । त्रि । अधिकारवि
शिष्टे । प्रमौ । अधिकारोऽस्त्यस्य ।
अर्शआदिभ्योऽच् । अधिकारार्थवचनम् ।
अधिकार्थवचनम् । न । स्तुतिनिन्दाफ
लकेऽर्थारोपितार्थवचने ।
अधिकृतः । त्रि । अध्यक्षे । आयव्ययादौ
नियुक्ते । व्यापारिते । कृताधिकारद्र
व्ये । अधिअधिकउपरिवाक्रियतेस्म
क्त ।
अधिक्रमः । पुं । आक्रमणे । अधिक्रम
णम् । क्रमुपादविक्षेपे । घञ् । अधि
क्रम्यते या कर्मणिघञ् । नोदात्तेति
वृद्ध्यभावः ।
अधिक्षिप्तः । त्रि । स्थापिते । प्रणिहिते
। कुत्सिते । भर्त्सिते । प्रतिक्षिप्ते ।
कृताक्षेपे । अधिक्षिप्यतेस्म । क्षिप
प्रेरणे क्त ।
अधिक्षेपः । पुं । तिरस्कारे ।
अधिगतः । त्रि । प्राप्ते । ज्ञाते । अधि
गतपरमार्थाः पण्डिताइति । अधि
गम्यतेस्म । गमक्त ० । क्त ।
अधिगमः । पुं । साक्षात्कारे । प्राप्तौ ।
स्वीकरणे । अधिगमनम् । गमक्त ।
घञ् ।

अधिमां

अधित्यका । स्त्री । शैलस्योर्ध्वभूमौ ।
अद्रेरध्यारूढाभूमिः ॥ उपाधिभ्यांत्य
कन्वासन्नारूढयोरितित्यकन् ॥ त्य
कनस्यनिषेधइतिनेच्चेम् ॥
अधिदैवतम् । ना । पुरुषे । पुरुषोऽधि
रणगर्भः दैवतान्यादित्यादीन्यधिकृ
त्यचक्षुरादिकरणान्यनुगृह्णातीति
तथोच्यते ॥ देवताविषयदर्शने ॥ दे
वतायां अधियत्तदधिदैवतम् ॥
अधिनायः । पुं । राजन्ये । । ।
अधिपः । पुं । प्रभौ । राज्ञि । अधि
पातिरपरिचये । आतश्चोपसर्ग
तिकः ॥
अधिपतिः । पुं । प्रभौ । राज्ञि । अधि
ष्ठायपालयितरि ॥ अधि पाति । पार
क्षिये । पातेर्डतिः ॥
अधिभूः । पुं । प्रभौ ॥ अधिभवति । भू
सत्तायाम् । भुवः संज्ञान्तरयोरिति
क्विप् ॥
अधिभूतम् । नो चरेभावे ॥ चरतीति
चरोविनाशी भावोयत्किञ्चिज्जनि
मेदस्तुभूतं प्राणिजातमधिकृत्यभव
तीतितथोच्यतइतिस्वामी ॥
अधिमांसकः । पुं । दन्तरोगविशेषे ॥
यथा । दन्तव्यपश्चिमेदन्ते महान्शो
थोमहारुजः । लालास्रावीकफकृतो
विज्ञेय सोधिमांसकः ॥११॥

अधिर

अधिमासः । पुं । असङ्क्रान्तिमासे ॥
रविसङ्क्रान्तिरहितेचान्द्रमासे । म
लमासे ॥ यथा । असंक्रान्तमासोऽधि
मासः स्फुटः स्यादिति ॥ अपिच । द्वा
त्रिंशद्भिर्गतैर्मासैर्दिनैः षोडशभिस्त
था । घटिकानांचतुष्केणपतत्यधि
मासक इति ॥ एतच्चसंज्ञार्थंनतु
नियमार्थम् ॥ अधिअधिकोमासः ॥
अधियज्ञः । पुं । विष्णौ ॥ अधियज्ञो ह
मेवाद्देहेइतिवचनात् सर्वयज्ञा
धिष्ठाता सर्वयज्ञफलदायकः सर्वय
ज्ञाभिमानिनीविष्ण्वाख्यादेवता ।
यज्ञोहिविष्णुरित्यधियज्ञः । अहं
वासुदेवएव नमद्वितीयः कश्चित ।
अतएव परब्रह्मणःसकाशात्अत्यन्ता
भेदेनैवात्मामतिपत्तव्यइति । सचाव
तुल्यदेहे यज्ञरूपेण वर्त्तते । बुधा
दिव्यतिरिक्तो विष्णुरूपत्वात् मनुष्य
देहे च यज्ञावस्थानम् यज्ञस्यमनु
ष्यदेहनिर्वर्त्यत्वादित्यर्थः ॥
अधियोगः । पुं । याचायोगान्तरे ॥ य
था । बुधगीप्यतिभार्गवानांमध्ये दौ
ग्रहौचेत्केन्द्रे अथवापञ्चमनवमेस्था
ने स्थानभेदेन स्थानैक्येन वा स्थि
तौ स्यातां तदाऽधियोगोभवति तदा
यातुर्जयोभवेत् ॥
अधिरथ । पुं । कर्णस्यपितरि ॥

अधिश्र

अधिराट् । पुं । सम्राजि ॥ अधिअधि
क्रं राजते । राज् । क्विप् ॥
अधिराज्यभाक् । पुं । अधिराजि ॥
अधिरूढम् । न । अङ्कुरे । तालबीजाङ्कु
रास्थिमज्जादौ । त्रि । आक्रान्ते ॥
अधिरूढिः । स्त्री । आरोहणे ॥
अधिरोहिणी । स्त्री । वंशकाष्ठादिरचि
तेसोपाने । निःश्रेण्याम् ॥ अधिरु
ह्यतेऽनया । रुह्माद्भावे । करणे
ल्युट् ॥
अधिवचनम् । न । नामनि । संज्ञायाम्
॥ इतित्रिकाण्डशेषः ॥
अधिवास । पुं । गन्धमाल्याद्यैः संस्कारे
। निवासे ॥ अधिवसनम् । वस । घ
ञ् ॥
अधिवासनम् । न । पूजार्थे गन्धमाल्या
दिभिः संस्कारे । गन्धमाल्यादिभिर
संस्कारे ॥ अधिकंवास्यते । वासउ
पसेवायाम् । चुरादिः । ल्युट् ॥
अधिवासितः । त्रि । सञ्जातगन्धे । कृ
ताधिवासे ॥
अधिविन्ना । स्त्री । अनेकभार्यास्वमागू
ढायांस्त्रियाम् । कृतसापत्निकायाम् ।
अध्यूढायाम् । अधिउपरिविन्नलाभो
स्याः । यद्वा । अधिकाविन्नालक्षाय
स्याः ॥
अधिश्रयणम् । न । चुल्ल्यादुपरिस्था

अधिती

पने ॥
अधिश्रयणी । स्त्री । चुल्ल्याम् । अश्नन्ते
॥ इत्यमरः ॥ अधिश्रीयतेऽत्र । श्री
अपाके । अधिकरणेल्युट् । ङीप् ॥
अधिष्ठाता । त्रि । अध्यक्षे । प्रवृत्तिनि
वृत्तिकारणे । योयस्यप्रवर्त्तकोनिवर्त्त
कश्चसतस्याधिष्ठातेतिव्यवहारः ॥
अधिष्ठानम् । न । पुरे । चक्रे ॥ प्रभावे
॥ अध्यासने ॥ स्थाने । कल्पनाधार
भूते । इच्छाद्वेषसुखदुःखचेतनाद्य
भिव्यक्तेराश्रये । कूटस्थचैतन्ये । अ
ध्यासेब्रह्मणि ॥ अधितिष्ठन्तिभूतान्यु
पादानकारणत्वेनेतिव्याख्यानात् ॥
शरीरे । जीवरूपेणप्रविश्यसदैवा
धितिष्ठत्यस्मिन्निति व्याख्यानात् । अ
ध्यस्तस्वरूपे । अधिष्ठीयतेऽनेना
स्मिन्वा । ष्ठा । भावकरणादौल्युट् ॥
अधिष्ठानावशेषोहिनाशःकल्पितव
स्तुनइतिन्यायः ॥
अधिष्ठितः । त्रि । आहिते ॥ आश्रिते ॥
अधीतः । त्रि । पठिते । कृताध्ययने ॥
अधिगते । प्राप्ते ॥ अधिपूर्वादिणो
गधर्थाकर्मकेतिक्तः ॥
अधीतिः । स्त्री । अध्ययने । पठने ॥
अधीती । त्रि । अध्ययनविशिष्टे । अ
धीतवति ॥ अधीतमनेन । इष्टादि
भ्यश्चेतिकर्त्तरीनि ॥

अधीन

अधीनः । त्रि । आयत्ते । इनसधिगतः अच्यादयइतिसमासः । अधिउपरि इनोऽस्येतिवा ॥

अधीयानः । त्रि । पठमाने । वेदाध्यय नवति । यथा । अधीयान प्रण्डित मन्यमानोयेविद्यया हन्तियश परे षाम । तस्यान्तवन्तस्तुभवन्तिलोका नचास्यतद्वह्मफलंददातीति मत्ता-भारतम् ।

अधीरः । त्रि । कातरे । चञ्चले ॥ अधीराधैर्य्ययस्य ॥

अधीरा । स्त्री । विद्युति ॥ मानिनीभे दे ॥ यथा । ज्ञातेऽन्यासङ्गिनिपती खण्डितेर्ष्याकषायिता । अधीराश्रु विमुञ्चन्तीविज्ञेयाचाचनाधिकेतिद-श्रूपके ॥

अधीश्वरः । त्रि । प्रभौ । ईश्वरे । यथा । अधीशेनाषितंविश्वंनाशयन्तिनिन-श्चव । तत्पातनंपातिविश्वेशस्तस्मा स्त्रोकश्चितोभवेदिति ॥ निनश्चवो नाशयितुमिच्छवः । नश्यतिरचान्त भौवितण्यर्थः ॥ कामे ॥

अधीश्वरः । पुं । बुद्धे ॥ पुं । स्त्री । प्रणता खिलसामन्तावनिपाले । सर्वसन्निहि तन्नपवशकारिणि ॥ अधिकईश्वरः । राजातुग्रण्यताशेषसामन्तःस्यादधीश्व रः ॥ स्त्रियामधीश्वरी ॥

अधोच

अधीष्टः । पुं । सत्कारपूर्वकेव्यापारे ॥ त्रि । सत्कृत्यव्यापारिते ॥

अधुना । । सम्प्रतीत्यर्थे । अस्मिन्का ले । अधुनेतिनिपातितः इदमोऽश भावोधुनाचप्रत्ययः ॥

अधुनातनम् । त्रि । इदानींतने । वर्त्त मानकालवृत्तौ । अधुनाभवः । सायं चिरमितिष्युप्रत्ययः । स्त्रियांङीपि । अधुनातनी

अधृष्टः । त्रि । लज्जावति । शालीने । नधृष्टः ॥

अधृष्यः । त्रि । प्रगल्भे । अधर्षणीये । अनभिभवनीये । नधृष्यः ॥

अधृष्या । स्त्री । नदीप्रभेदे ॥ नधृष्या ॥

अधोशुकम् । न । परिधेयवस्त्रे । अन्त रीये ॥ अधः अधोभागस्यअशुकम् ॥

अधोक्षः । त्रि । जितेन्द्रिये ॥

अधोक्षजः । पुं । विष्णौ ॥ अधः अक्षजं ज्ञानं यस्मादितिव्युत्पत्तेः ॥ अधः कृ तमक्षजमैन्द्रियकंज्ञानयेन ॥ अधो क्षाणांजितेन्द्रियाणांजायते प्रत्यक्षो भवतिवा ॥ अक्षमिन्द्रिये अधइन्द्रिय पादौ ताभ्यांजातः । अन्यभ्योपिदृश्य तइतिडः ॥ अधोनक्षीयते जातुयस्मा त्तस्मादधोक्षजइत्युयोगपदवाक्तिः । यद्वा ॥ अधःशब्देनपृथिवीवाचिना-अण्डस्याधरकपालमुच्यते युवाचके

अधोमु

नाचशब्देनचोपरितनकपालमुच्यते । ताभ्यांशब्दाभ्यांतन्मध्यंलक्ष्यते । तथाचाधोचयोरुडस्याधरकपालोत्तरकपालयोर्मध्येवैराजरूपेणजायतेऽत्यधोचजः । सप्तम्यांजनेर्डतिडमत्ययस्त्यभिप्रेत्यनिर्वचनान्तरमाहभाष्यकारः । द्यौरुत्तरोचपृथिवीचाधरस्तयोर्यस्मादुत्पन्नमध्येवैराजरूपेणेतिवा अधोजन्म ॥

अधोगतिः । स्त्री । नरके ।

अधोघण्टा । स्त्री । अपामार्गे । इति रत्नमाला ।

अधोजिह्विका । स्त्री । तालुमूलस्थक्षुद्रजिह्वायाम् ।

अधोदृष्टि । वि । निजविनयख्यापनाय सततमधएवनिरीक्षणकर्त्तरि । विनीते । अधोदृष्टिर्यस्यसः ।

अधोभुवनम् । न । पातालेऽस्त्रियाम् । इत्यमरः । आपस्तम्बस्तुभुवनञ्च ।

अधोमर्म । न । गुदे । गुह्यद्वारे । इतिहेमचन्द्रः ।

अधोमुख । वि । अधोऽधोमुखे । न । चत्रविशेषेषु । यथा । मूलाग्रेचाकृतिकाचविषाणाभरणौ तथा । मणिपूर्णाग्रयंचैव अधोमुखमुखंस्मृतमिति ।

अधोमुखा । स्त्री । योनिजिह्वायाम् ।

अधण्डा

अधोलोकः । पुं । पाताले । अधश्चासौलोकश्च ।

अधोवायुः । पुं । अपानवायौ । पर्दे ।

अध्यक्षः । पुं । चौरिकावृत्ते । वि । अधिकृते । राज्ञोऽस्त्यस्वस्वपदाख्यार्थादिस्थानेषुकर्म्मवेक्षितरिपुरुषे । आर्य्यस्यादिनिरीक्षके । अधिगतोऽक्षंव्यवहारम् । आदयइतिसमासः । इन्द्रियजन्यज्ञाने । मत्वर्थे । नित्यन्तरि । अधिगतोऽक्षम् । अधिगतोऽक्षेण वा । अक्षेषु व्यवहारेषु आयव्ययप्रेक्षासु योगक्षेमप्रमाणरूपव्यवहारेषुवा अधिकृतोऽध्यक्षः । अधिकृतान्यक्षाण्यस्यवा । अध्यक्षोतिवा । अक्षूयास्तौ । पचाद्यच् । अध्यक्षतिवा । अध्यक्षयति मत्यक्षयतीति अध्यक्षशब्दात् तत्करोतितदाचष्टइतिणिजन्तात् पचाद्यजन्वा ।

अध्यग्नि । न । अध्यग्निधने । अग्निमधे ।

अध्यग्निधनम् । न । विवाहकालेऽग्निसन्निधौपित्रादिभिर्दत्तेधने । यथा । विवाहकालेयत् स्त्रीभ्योदीयतेऽग्निसन्निधौ । तदध्यग्निकृतंसद्भिः स्त्रीधनपरिकीर्त्तितमिति ।

अध्यण्डा । स्त्री । यूकगिंडायाम् । भूम्यामलक्ष्याम् । अधिकमण्डलीक्रम-

अध्यव

स्याः । ठिठोप । ठि । अधीनः । चि । अत्यन्तपरतन्त्रे । ग
भेदासे । अध्ययनम् । न । पठने । विधिवद्गुरुमु
खादध्यात्मादिविद्यानामुच्चरस्वरूप-
ग्रहणे । गुरूच्चारणानुच्चारणे । अधी
येते । इङ् अध्ययने । नित्यमधिपूर्वः
। बहुलवचनात्कर्मणिल्युट् । प्राङ्
मुखत्वादिनियमसहितस्यपुरुषस्य
ऋगादेरभ्यासे । अध्ययनलक्षणप्र
यमासिद्धिरुच्चारमुच्यते । यस्यशिष्या
चार्यसम्बन्धेनसांख्यशास्त्रंगृह्यतेऽर्थ-
तस्याधीत्यज्ञानमुत्पद्यतेतस्य सा अ
ध्ययनहेतुकासिद्धिः अध्ययनम् । किंत
्वाध्ययनेनाप्रदृढबन्धकरणेन । पठित
श्रुतदेवागुरोश्चयेऽवबन्धनात् । इ
त्युपदेशोमुमुक्षुषु ।

अध्यर्द्धम् । चि । सार्द्धे । अधिकमर्द्धंय-
स्य । अध्यारूढमर्द्धंयस्मिन्वा । प्रादि
भ्योधातुजस्येतिसाधु ।

अध्यवसाय । पुं । निश्चये । इदमित्थ
मेवेतिविषयपरिच्छेदे । उत्साहे ।
अध्यवसानम् । घोल्लक्षणे । घञ् ।
आतोयुक् । अध्यवसायस्बुद्धिव्यापा
रोज्ञानम् । उपात्तविषयाणामिन्द्रि
याणांदृष्टौसत्यांबुद्धेः रजस्तमोभि
भवेसतियः सत्त्वसमुद्रेकः सोध्यवसा

अध्यात्म

य इतिवृत्तिरितिव्याख्यायते । बुद्धौ ।
क्रियाक्रियावतोरभेदविवक्षया सर्वा
व्यवहर्त्ता आलोच्य मत्वा अहमत्रा
धिकृतइत्यभिमत्य कर्त्तव्यमेतन्मये
त्यध्यवस्यति ततश्च । प्रवर्त्तते इति
लोकसिद्धम् । तच्चकर्त्तव्यमितियोयं
निश्चयश्चितिसन्निधावापन्नचैतन्याया
बुद्धेः सोध्यवसायोबुद्धेरसाधारणव्या
पारः ।

अध्ययनम् । न । अजीर्णेपरिभोजने
। यथा । अजीर्णेभुज्यतेयत्तुतदध्य
यनमुच्यतेइति । अधिकमध्ययनमध्य
यनम् ।

अध्यस्त । त्रि । कृताध्यासे ।

अध्यात्मम् । । आत्मतत्त्वे । स्वभावो
ध्यात्ममुच्यते । अस्यार्थः । स्वोभावः
स्वरूपंप्रत्यक्चैतन्यम् । आत्मानं-
कार्यकारणसंघातंदेहमधिकृत्यभो
क्तृतयावर्त्तमानमध्यात्ममुच्यतेइतिम
धुसूदनः । परस्यब्रह्मणःप्रतिदेहंप्रत्य
गात्मभावः स्वभावइति स्वोभावःस्व
भावोध्यात्ममुच्यतेआत्मानंदेहमधि
कृत्यप्रत्यगात्मतयाप्रवृत्तं परमार्थब्र-
ह्मावसानंवस्तुस्वभावोध्यात्ममुच्यतेअ
ध्यात्मशब्देनाभिधीयतेइतिभाष्यका
राः । स्वस्यैवब्रह्मणएषांशतयाजीवरू
पेणभवनंस्वभावःसएवात्मानंदेहमधि

अध्याप

कृत्यभोक्तृत्वेनवर्त्तमानोऽध्यात्मशब्दे
नोच्यतदुत्त्यर्थइतिश्रीधरस्वामिनः ॥
आत्मविषयदर्शने ॥ करणग्रामे ॥ आ
त्मनिदृतिविभक्त्यर्थेऽव्ययीभाव ॥ अन
श्चेतिटच् ॥ नस्तद्धितइतिटेर्लोप ॥
आत्मनोऽधि आत्मविषयमध्यात्मम् ॥
अध्यात्मज्ञानम् । न । आत्मानमधिकृत्य
प्रवृत्ते आत्मानात्मविवेकज्ञाने ॥
अध्यात्मनित्यः । त्रि । परमात्मस्वरूपालो
चनतत्परे ॥ अध्यात्मे आत्मज्ञानेनि-
त्यः परिनिष्ठितः ॥
अध्यात्मयोगः । पुं । विषयेभ्य प्रतिसंह
त्यचेतस आत्मनि समाधाने ॥
अध्यात्मविद्या । स्त्री । आत्मतत्त्वविद्या
याम् ॥
अध्यापकः । त्रि । अध्यापयितरि । उपा
ध्याये ॥ अध्यापयति । इडध्ययने
वुन् ॥
अध्यापनम् । न । विप्रस्यासाधारणकर्म
विशेषे । ब्रह्मयज्ञे । पाठने । विद्याप्र
दाने ॥ अध्यापनञ्चब्राह्मणस्यवृत्तिने
चाशब्दान्तमुपशिष्यन्तिशिष्याइतिकै
यटः । अतोब्राह्मणेनावश्यंशब्दाद्ये
याः । नचान्तरेणाध्यापनमुञ्छादेरुपाये
न शब्दाद्ययाविधातुमितिभाष्यम् ॥
अध्यापयिता । त्रि । पाठगुरौ । अध्याप
नकर्त्तरि । उपाध्याये ॥

अध्यावा

अध्यापित । त्रि । पाठिते ॥
अध्यायः । पुं । अध्ययने ॥ प्रकरणे । पु
राणपरिच्छेदे ॥ यथा । सर्गोवर्गः प
रिच्छेदोद्घाताध्यायाङ्कसङ्ग्रहाः ।
उच्छ्वास परिवर्त्तश्चपटलः काण्डमे
वच ॥ स्थानंप्रकरणञ्चैवपर्वोल्लासा
न्हिकानिच ॥ पुराणादौपरिच्छेदा
अनेकेपरिकीर्त्तिताइति ॥ त्रि । ध्या
नशून्ये ॥ अधीयतेऽसौ । इदन् । नि
त्यमधिपूर्वः । इडश्चेतिघञ् ॥ यद्वा
अधीयतेऽस्मिन् । अध्यायन्यायेति
घञन्तोनिपात्यते ॥
अध्यारूढम् । त्रि । समारूढे । कृता
रोहणे ॥ अभ्यधिकें ॥ अध्याङ्पूर्वा
द्रुहेर्गत्यर्थाकर्मकेक्त्यादिनाकर्त्तरि-
कर्मणिवाक्तः । ढत्वधत्वष्टुत्वढलोप
दीर्घाः ॥
अध्यारोपः । पुं । असर्पभूतायांरज्जौ
सर्पारोपवत् वस्तुन्यवस्त्वारोपे । स
च्चिदानन्दानन्ताद्वयब्रह्मण्यज्ञानादि-
सकलजडसमूहस्यारोपणे ॥
अध्यावाहनिकम् । न । पितृगृहात्भ
र्तृगृहनीयमानयास्त्रियालब्धेधने ॥
यथा । यत्पुनर्भर्त्रतेनारीनीयमाना
पितृकात् । अध्यावाहनिकंनामत
त्स्त्रीधनमुदाहृतमितिकात्यायन ॥
पैतृकादित्येकेषात्पितृमातृकुला

अधूढः

त्यक्तभर्तृधनमितितदर्थः ॥ अध्याशनम् । न । भुक्तस्योपरिभूयोभोजने ॥ यथा । राजन्नध्याशनं त्याज्यंत्याज्यंतुविषमाशनम् । त्यजेद्विषद्रुमाहारं तत्सर्वदोषकारकमिति ॥ अध्यासः । पुं । स्मृतिरूपेपरत्वपूर्वदृष्टावभासे । यत्रयद्ध्यासस्तद्विरेकाग्रहणनिबन्धनेभ्रमे । यत्रयद्ध्यासस्तस्यैवविपरीतधर्मत्वकल्पनायाम् । अन्यत्रान्यधर्मावभासे । वस्तुन्यन्यवुद्धौ । अविद्यायाम् । आसनम् । आस्उपवेशने । घञ् । अधिउपरिआसः ॥ अध्यासितः । वि । निषेवितेअधिशिते ॥ अध्याहरणम् । न । ऊहने । तर्कणे ॥ अधिआङ् पूर्वाद्धरतेर्ल्युट् ॥ अध्याहारः । पुं । तर्के । ऊहे । आकांक्षासमीपकपदानुसन्धाने । अध्याहरणे । अधिआङ् पूर्वाद्धरतेर्भावेघञ् । अपूर्वात्प्रेरणे ॥ अध्युषितः । वि । उषितेवसतीति भाषा ॥ अध्युष्टः । वि । सार्द्धत्रिसंख्यायाम् ॥ अध्युष्ट्रः । पुं । उष्ट्रयुक्तरथे ॥ उष्ट्रवाह्यप्रेङ्खायाम् । इतिहारावली ॥ अध्यूढः । पुं । ईश्वरे । वि । अधिकवृद्धयुक्ते । समूढे । उपरिभावेनस्थिते ॥ यथा । ऋ अध्यूढंसामेति ॥

अध्वा

अध्यूढा । स्त्री । कृतसापत्निकायाम् । कृतान्येकविवाहस्यप्रागूढयोषिति ॥ अधिउपरिऊढमुद्वहनमस्याः ॥ अध्येषणम् । न । गुर्वादेराराधनस्यप्रवर्त्तनायाम् । प्रार्थनायाम् । समानस्याधिकस्ययाज्यर्त्विगाचार्यादेः प्रवर्त्तनायाम् ॥ अध्येषणा । स्त्री । याचने ॥ निकृष्टस्योत्कृष्टंप्रतिप्रवर्त्तनायाम् । गुर्वादेर्मानयनयाक्वचिदर्थेनियोजनेइतिस्वामी ॥ सेना । गुर्वाद्याराधने । अध्येषणम् । इषेरनिच्छार्थस्येतियुच् ॥ अध्येष्यमाणः । वि । अध्ययनकरिष्यमाणे ॥ अध्रुवः । वि । अनित्ये ॥ अस्थिरे । फलजनकतानियमशून्ये ॥ नध्रुवः ॥ अध्वगः । पुं । पथिके ॥ सूर्य्ये ॥ उष्ट्रे ॥ खेसरे । खच्चरइतिभाषा प्रसिद्धे ॥ अध्वानंगच्छतीतिविग्रहे अन्तात्यन्ताध्वदूरेत्यादिनागमेडः प्रत्ययः ॥ अध्वगभोग्यः । पुं । आम्रातकवृक्षे ॥ अध्वगा । स्त्री । गङ्गायाम् ॥ टाप् ॥ इति त्रिकाण्डशेषः ॥ अध्वजा । स्त्री । स्वर्णजीवृक्षे । हेमपुष्पयाम् ॥ अध्वा । पुं । मार्गे । गन्तव्यत्वेनलोकप्रसिद्धेक्रोशयोजनादौनियतपरिमा

अध्वान्त

गे ॥ सस्थाने ॥ अवस्कन्दे । काले ॥ अस्तिवलम् । अदभक्षणे । अदेर्दुंचेति क्तनिप् धश्चान्तादेशः ॥

अध्वनीनः । त्रि । पथिके ॥ अध्वानमलगच्छति । अध्वनोयत्खाविति खः । आत्माध्वानौखे इतिटिलोपोन ॥

अध्वन्यः । त्रि । पथिके ॥ अध्वानमलगच्छति । अध्वनोयत्खाविति यत् । येचाभावकर्मणोरितिटिलोपोन ॥

अध्वरः । पुं । क्रतौ ॥ सावधाने ॥ वस्तुभेदे ॥ नध्वरति । ध्वृकौटिल्ये । अच् ॥ अध्वानंरातिवा । आतोनुपेतिकः ॥

अध्वरघः । पुं । परिघातिके । अध्वगमनोपयुक्तरथे ॥ इतिहेमचन्द्रः ॥ दूते ॥ अध्वनेरघः । अध्वारथोऽस्यवा ॥

अध्वर्युः । पुं । यजुर्वेदर्त्विजि ॥ अध्वरमिच्छति । सुपद्रुतिक्यच् । कण्ड्वादिनाक्यस्य लोपः । क्याच्छन्दसीत्युः । नध्वरति । ध्वृकौटिल्ये । विच् । अध्वरयाति । यौतिवा । अयतद्वादित्वाद्डुर्वा ॥

अध्वर्युः । स्त्री । अध्वर्युशास्त्राध्येत्र्याम् ॥ अध्वर्युशास्त्राध्येतृयज्ञोद्वाहायाम् । योपधत्वाद्ङीप् ॥

अध्वलग्यः । पुं । अपामार्गे ॥

अध्वान्तगायपः । पुं । स्योनाकवृक्षे ॥

अनघः

अनः । पुं । प्राणे ॥ अनितिं । अनप्राणने । अच् ॥

अनंगुलत्फला । स्त्री । कदल्याम् ॥ इतिजटाधरः ॥

अनक्षम् । त्रि । अक्षशून्ये ॥ अन्धे । अक्षविविहीने ॥

अनक्षरम् । न । दुर्वचने । गुणाक्षेपकदोषोद्भावके । अवाच्ये । निन्दावचने । दुर्वचसि । गाली इतिभाषायाम् ॥ नमग्रस्थान्यक्षराणियस्मिन् । अक्षराणामग्रस्थश्चार्थद्वारकम् ॥

अनक्षि । न । मन्दाक्षि ॥ त्रि । तद्धति ॥

अनगारः । पुं । ऋषौ । मुनौ ॥ त्रि । अगारशून्ये ॥

अनग्निः । पुं । श्रौतस्मार्तकर्महीने ॥ यथा । अनग्निरब्राह्मणः कश्चिदिति । अग्निसंस्काररहितेपरिव्राजके ॥ अथौनकः सर्वसङ्गनिवृत्तस्यध्यानयोगरतस्यचानलस्यदहनकार्यंनैवपिण्डोदकक्रिया ॥ निर्ध्यातप्रणवेनैवविप्रेभिक्षोः कलेवरम् । प्रोच्यमाणखननश्चैवसर्वंतेनैवकारयेदिति ॥

अनग्निका । स्त्री । दुष्टरजस्कायांकन्यायाम् ॥

अनघः । त्रि । निर्मले ॥ अपापे । मनोज्ञे । हृद्ये । अदुःखे । अव्यसने ॥ अघनिर्यतेयस्य ॥

अनङ्गा

अनङ्गम् । न । आकाशे ॥ मनसि ॥ पुं । मदने ॥ नास्ति अङ्गमस्य । नञ्तत्पु । नमस्कादिति वा ॥ दशास्यावस्था भवन्ति । तायथा । दृङ्मनस्सङ्गसंकल्पाजागरःकृशतारतिः । ह्रीत्यागोन्मादमूर्च्छा स्यदृत्यनङ्गदशादशेति ॥ त्रि । अङ्गरहिते ॥

अनङ्गकम् । न । मनसि ॥

अनङ्गशेखरः । पुं । दण्डकवृत्तभेदे ॥ यथा । प्रतापतापतापितप्रतीपभूपतेः शरन्निशानिशाकरप्रभालसद्यशोधन स्वदानवारिधारयादरिद्रतानवज्वलद्दिजालितापहारकस्वभावशोभनं । भुजङ्गमङ्गलोदितःप्रसङ्गसङ्गतेःसभान्तरेनिवेदितोविधायकःकविश्रियः क्रमाल्लघोगुरौयचेच्छयानिवेशिते भवेदनङ्गशेखरः सुधांसुशेखरप्रियरतिः ॥

अनङ्गासुहृत् । पुं । शिवे ॥ इतिहेमचन्द्रः ॥

अनच्छः । त्रि । कलुषे ॥ भिन्नोऽच्छात् । नञ्तत्पुरुषः । नञोयोनञः । तस्मात्कुत्सिते ॥

अनञ्चनम् । न । व्योम्नि ॥ तत्त्वे ॥ पुं । नारायणे ॥ त्रि । अञ्जनशून्ये ॥ नास्तिअञ्जनमस्मिन् ॥

अनड्वज्जिह्वा । स्त्री । गोजिह्वाशाके ॥

अनड्वान् । पुं । षण्डे । वृषभे ॥ अनः शकटंवहति । वहप्रापणे । अनसिवहेःक्विप् अनसोऽश्वेतिक्विप् अनसोडान्तादेशश्च । यजादित्वात् सम्प्रसारणम् ॥

अनड्वही । स्त्री । गौरभेद्याम् ॥ गौरादित्वान्ङीष् ॥

अनड्वाही । स्त्री । गौरभेद्याम् ॥ आमनड्वहःस्त्रियांवावक्तव्यइतिअनड्वहआमिगौरादित्वान्ङीष् ॥

अनतिरेकः । पुं । अभेदे ॥

अनद्यः । पुं । गौरसर्षपे ॥ इतिराजनिर्घण्टः ॥

अनध्यक्षः । त्रि । अध्यक्षभिन्ने ॥ अमत्यच्चे ॥

अनध्यायः । पुं । अनध्ययने ॥ सचद्विविधोनित्योनैमित्तिकश्चेति । तथाहि । चातुर्मास्यदितीयासुमन्वादिषुयुगादिषु । अष्टकासुचसंक्रान्तौशयनेबोधनेहरेः ॥ अनध्यायंप्रकुर्वीततथासोपप्लवासुच ॥ नैमित्तिकास्तु । निर्घातभूकम्पोल्कादिपतनादिसर्वाङ्गतेषु । अग्न्युत्पाते । अकालविद्युति । सन्ध्यागर्जने । चैत्रैकपटुतेग्रामे । सङ्ग्रामे । सोमसूर्यग्रहे । दिग्दाहे । विद्युत्स्तनिपाते । इत्यादिषुनैमित्तिकानध्यायः । छिद्राण्येतानिविद्यार्थानांयेऽनध्यायाःप्रकीर्त्तिताः । छिद्रेभ्यःस्रवतिब्रह्म

अनन्त

ब्राह्मणेन यदर्जितम् । तत्कालेतस्य रिक्थांसिश्रियं ब्रह्मयशोबलम् । सर्वमादायगच्छन्ति वर्जयन्तीसितंफलमिति ॥

अननुगतम् । न । आत्मतत्त्वे । चि । अनुगतभिन्ने ।

अननुभाषणम् । न । विज्ञातस्यपरिषदा त्रिरभिहितस्याप्यप्रत्युच्चारणमननुभाषणम् । पञ्च ५ पु ॥

अनन्तः । पुं । केशवे । यथा । गन्धर्वोऽरसः सिद्धाः किन्नरोरगचारणाः । नान्तंगुणानांगच्छन्तितेनाऽनन्तोयमव्ययइतिविष्णुपुराणम् । अन्तःसीमा इयत्तानविद्यतेयस्य । शेषे । नागजातिराजे । बलदेवे । सिन्दुवारवृक्षे ।

अनन्तजित् । चि । अनवधौ । अपरिच्छिन्ने । अविनाशिनि । व्यापित्वान्नित्यत्वात्सर्वात्मत्वात्देशकालवस्तुपरिच्छेदशून्ये परमेश्वरे । अविद्यमानोऽन्तः कार्यंयस्य । अखण्डे । न । मुरवर्त्मनि । अन्तके । नास्त्यन्तोयस्य ॥

अनन्तकरः । चि । असमाप्तिकरे । अनन्तंकरोति । दिवादिभ्योटिटः ।

अनन्तजित् । पुं । बुद्धगणभेदे । जिनानांचतुर्विंशत्यन्तर्गतचतुर्दशजिने । अनन्ते । अनन्तंजयतिलेप्यति

अनन्त

वा । जिजये । किप् । तुक् ॥ विष्णौ ॥ अनन्तान्यसंख्यातानिभूतानियुद्धकौडादिषुसर्वंवाचिन्त्यशक्तितयाजयंतीति ॥

अनन्ततीर्थकृत् । पुं । अनन्तजिति । बुद्धगणभेदे । इतिहेमचन्द्रः ॥

अनन्तमात्रः । चि । एतावत्त्वमस्येतिपरिच्छेत्तुमशक्ये । मात्रापरिच्छित्तिःसाऽनन्तायस्य ॥

अनन्तमूर्त्तिः । पुं । सर्वात्मनि । परमात्मनि । अखण्डैकरसे ॥ अनन्तादेशतः कालतोवस्तुतःस्वरूपतस्तावत् परिच्छेदरहितामूर्त्तिः स्वभावोयस्य ॥

अनन्तमूलः । पुं । करालाख्यौषधौ । सुगन्धायाम् । स्थूलग्रन्थौ । वचाप्रभेदे ॥

अनन्तरम् । न । पराचीनकाले । पश्चादर्थे । अ । चिदेकरसेपरमात्मनि । नयस्यान्तरंभिन्नजातीयंकिञ्चिद्विद्यतेसः । छिद्रशून्ये । संश्लिष्टे । अव्यवहिते । संसक्ते ॥ अन्तरंछिद्रंतच्छून्यम् ।

अनन्तरितम् । चि । अव्यवहिते ॥

अनन्तरूपः । पुं । भगवति । विश्वरूपे ॥ चि । अनन्तरूपविशिष्टे ॥ अनन्तानिरूपाण्यियस्य ॥

अनन्तलोकः । पुं । स्वर्गलोके । अनन्तश्चासौलोकश्च ॥

अनन्य:

अनन्तविजय:। पुं। युधिष्ठिरस्यराज्ञःशङ्खे ॥ अनन्तोविजयोयस्मिन् ॥

अनन्तवीर्य:। पुं। अर्हद्गणभेदे। भाविकालेजिनानांचतुर्विंशत्यन्तर्गतेचतुर्विंशेतीर्थंकरेजिने॥ त्रि। बहुवीर्ये। अनन्तप्रभावे॥ अनन्तानिवीर्याण्यस्मिन्। अनन्तवीर्ययस्त्रा॥

अनन्तव्रतम्। न। भाद्रशुक्लचतुर्दश्यांकर्त्तव्येऽनन्तदेवस्यव्रते॥

अनन्तशीर्षा। स्त्री। वासुकेः पत्न्याम्॥

अनन्ता। स्त्री। विष्णुक्रान्तायाम्। शाकप्रभेदे॥ शारिवायाम्। दुरालभायाम्॥ दूर्वयोः॥ कणायाम्॥ पथ्यायाम्। पार्वत्याम्। आमलक्याम्॥ विश्वम्भरायाम्। गुडूच्याम्॥ अग्निमन्थवृक्षे॥ यवासे॥ बुद्धशक्त्यन्तरे। नारायाम्॥ नास्त्यन्तोऽस्याः॥ अनन्तःशेषोऽस्तिधारकोऽस्य॥ अर्शआद्यच्॥

अनन्तात्मा। पुं। नारायणे॥ देशतः कालतोवस्तुतश्चापरिच्छिन्नस्वरूपत्वात्अनन्तः आत्माअस्य॥

अनन्तिका। स्त्री। माघोर्जमाधवेपाणां पूर्णमासीषु॥

अनन्तेशः। पुं। हरे॥

अनन्दः। त्रि। अनानन्दे। असुखे॥ औपनिषदोयम्॥

अनन्यः। त्रि। सर्वभोगनिस्पृहे॥ सर्वदा

अनन्य

तद्दर्शिनि। अहमेवभगवान् वासुदेवः सर्वात्मा नमद्व्यतिरिक्तंकिञ्चिदस्तीतिज्ञानवतिब्रह्मात्मैक्यनिष्ठे। अपृथग्दर्शिनि॥ नविद्यतेऽन्योविषयोयस्यस्यायस्मिन्वा। अन्योभेददृष्टिविषयोनविद्यतेयस्यवा। नविद्यतेस्वेष्टविनाऽन्यद्यस्यनेयस्येतिवा॥ अद्वितीये। एकाकिनि॥

अनन्यगतिकः। त्रि। एकाश्रये। गत्वन्तररहिते॥ यथा॥ अनन्यगतिकेजनेविगतपातकेचातकेयथारुचितथाकुरुमियतथापिनान्यभजेइत्युद्भटः॥

अनन्यचेताः। त्रि। तदेकचित्ते॥ नञ्अन्यचेताः॥

अनन्यजः। पुं। कामे॥ नास्त्यन्यद्यस्मात्अनन्योविष्णुः। ततोजातः। मनसोऽन्यस्मान्नजायतेइतिवा। त्रि। अनन्यभवे॥

अनन्यभवः। त्रि। अन्यस्यासाध्ये। अन्यस्यनभवतीतितथा। पचाद्यजन्तोत्तरपदेननञ्समासः॥

अनन्यभावः। त्रि। एकान्तभक्ते। नास्तिअन्यस्मिन् भावोयस्य॥

अनन्यवृत्तिः। त्रि। एकाग्रे। एकतानेइत्यमरः। नञ्अन्यावृत्तिरस्य॥

अनन्वक्। त्रि। अननुगते। अनुअञ्चतीत्यन्वक्। नञ्अन्वक् अनन्वक्॥

अनन्त

ब्राह्मणेन यद्जितम् । तत्कालेतस्य रत्नांसिश्रियं ब्रह्मयशोबलम् । सर्वमादायगच्छन्ति वर्जयन्तीसितंफलमिति ॥

अननुगतम् । न । आत्मतत्त्वे । चि । अनुगतभिन्ने ।

अननुभाषणम् । न । विश्वासस्यपरिपंथिचिरभिहितस्याप्यमृषोच्चारणमननुभाषणम् । पंच० ५ । ५ ॥

अनन्तः । पुं । वैष्णवे । यथा । गन्धर्वाप्सरसः सिद्धाः किन्नरोरगचारणाः । नान्तंगुणानांगच्छन्तितेनाऽनन्तोयमव्ययइतिविष्णुपुराणम् । अन्तःसीमाऽवसानंविद्यतेयस्य । शेषे । नागजातिराजे । बलदेवे । सिन्धुवारवृक्षे । अनन्तजिति । चि । अनवधौ । अपरिच्छिन्ने । अविनाशिनि । व्यापित्वान्नित्यत्वात्सर्वात्मत्वात्देशकालवस्तुपरिच्छेदशून्ये परमेश्वरे । अविद्यमानोऽन्तः कार्योयस्य । अखण्डे । न । सुरवर्त्मनि । अभ्रके । नास्त्यन्तोयस्य ॥

अनन्तकरः । चि । असमाप्तिकरे । अनन्तंकरोति । दिवादिभ्योटिटः ।

अनन्तजित् । पुं । युद्धगणभेदे । विनानौघनुर्विगत्यन्तर्गतचतुर्दशजिने । अनन्ते । अनन्तंजयतिजेष्यति

अनन्त

वा । जिजये । किप् । तुक् ॥ विष्णौ ॥ अनन्तान्यसंख्यातानिभूतानि युद्धकीडादिषुसर्वदाचिन्त्यशक्तितयाजयतीति ॥

अनन्ततीर्थकृत् । पुं । अनन्तंजितिं । बुद्धगणभेदे । इतिहेमचन्द्रः ।

अनन्तमात्रः । चि । एतावत्त्वमस्येतिपरिच्छेत्तुमशक्ये । मात्रापरिच्छित्तिःसा अनन्तायस्य ॥

अनन्तमूर्त्तिः । पुं । सर्वात्मनि । परमात्मनि । अखण्डैकरसे ॥ अनन्तादेशतः कालतोवस्तुतःस्वरूपतस्तावत् परिच्छेदरहितामूर्त्तिः स्वभावोयस्य ।

अनन्तमूलः । पुं । कराणाख्यौषधौ । सुगन्धायाम् । स्थूलग्रन्थौ । वचाप्रभेदे ।

अनन्तरम् । न । पराचीनकाले । पश्चादर्थे । चि । चिदेकरसेपरमात्मनि । नयस्यअन्तरंभिन्नजातीयंकिञ्चिदिद्यतेसः । छिद्रशून्ये । सन्निहिते । अव्यवहिते । संसक्ते । अन्तरंछिद्रंतच्छून्यम् ॥

अनन्तरितम् । चि । अव्यवहिते ॥

अनन्तरूपः । पुं । भगवति । विश्वरूपे ॥ चि । अनन्तरूपविशिष्टे ॥ अनन्तानिरूपाणियस्य ॥

अनन्तलोकः । पुं । स्वर्गलोके । अनन्तश्चासौलोकश्च ।

अनन्य:

अनन्तविजय:। पुं। युधिष्ठिरस्यराज्ञःश
ङ्खे। अनन्तोविजयोयस्मिन्॥
अनन्तवीर्य:। पुं। अर्हद्गणभेदे। भावि
कल्पेजिनानांचतुर्विंशत्यन्तर्गतेचतुर्थे
विंशेतीर्थंकरेजिने। चि। वृद्धवीर्ये।
अनन्तप्रभावे॥ अनन्तानिवीर्याण्यस्य
स्मिन्। अनन्तंवीर्यंयस्यवा॥
अनन्तव्रतम्। न। भाद्रशुक्लचतुर्दशीक
र्त्तव्येऽनन्तदेवस्यव्रते॥
अनन्तशीर्षा। स्त्री। वासुकेः पत्न्याम्॥
अनन्ता। स्त्री। विशल्यायाम्। शाकम
भेदे। शारिवायाम्। दुरालभायाम्
॥ दूर्वायाम्। कणायाम्॥ पथ्यायाम्।
पार्वत्याम्। आमलक्याम्॥ विश्वंभ
रायाम्। गुडूच्याम्॥ अग्निमन्थवृक्षे
॥ यवासे। वृद्धयत्यन्तरे। तारायाम्
॥ नास्त्यन्तोऽस्याः। अनन्तःशेषोस्ति
धारकोऽस्याः अर्शआद्यच्॥
अनन्तात्मा। पुं। नारायणे॥ देशतः का
लतोवस्तुतश्चापरिच्छिन्नस्वरूपत्वा
त्अनन्तः आत्माअस्य॥
अनन्तिका। स्त्री। माघोर्जमाधवेयाणां
पूर्णमासीषु॥
अनन्तेशः। पुं। हरे॥
अनन्दः। वि। अनानन्दे। असुखे। औ
पनिषदोयम्॥
अनन्यः। वि। सर्वभोगनिस्पृहे। सर्वदै

अनन्य

तदर्शिनि। अहमेवभगवान् वासु
देवः सर्वात्मा नमद्व्यतिरिक्तंकिञ्चि
दस्तीतिज्ञानवतिब्रह्मात्मैक्यनिष्ठे।
अपृथग्दर्शिनि॥ नविद्यतेऽन्योविष
योयस्यायस्मिन्वा। अन्योभेददृष्टि
विषयोनविद्यतेयस्यवा। नविद्यते
स्वेष्टंविनाऽन्यदालम्बनंयस्येतिवा॥
अद्वितीये। एकाकिनि॥
अनन्यगतिकः। वि। एकाश्रये। गत्य
न्तररहिते। यथा। अनन्यगतिकेज
नेविगतपातकेचातकेयथारुचितथा
कुरुप्रियंतथापिनान्यंभजेइत्युद्भटः॥
अनन्यचेताः। वि। तदेकचित्ते। नअ
न्यचेताः॥
अनन्यजः। पुं। कामे। नास्त्यन्यद्य
स्मात्अनन्योविष्णुः। ततोजातः। म
नसोऽन्यस्मान्नजायते इतिवा। वि।
अनन्यभवे॥
अनन्यभवः। वि। अन्यस्यासाध्ये। अ
न्यस्यनभवतीति तथा। पचाद्यजन्तो
त्तरपदेननञ्समासः॥
अनन्यभावः। वि। एकान्तभक्ते। नवि
द्यतेअन्यस्मिन् भावो यस्य॥
अनन्यवृत्तिः। वि। एकाग्रे। एकताने।
इत्यमरः। नञ्अन्यावृत्तिरस्य॥
अनन्वक्। वि। अननुगते। अनुअञ्च
तीत्यन्वक्। नञ्अन्वक् अनन्वक्।

अनप

अनन्वयः। पुं। अर्थालङ्कारविशेषे। य-
थोपमानोपमेयत्वे एकस्यैवैक
वाक्यगैः। अनन्वयः। उपमानान्तर
सम्बन्धाभावोऽनन्वयः। यथा। नके-
वलंभातिनितान्तकान्तिर्नितम्बिनी
सैवनितम्बिनीव। यावद्विलासायुध
लास्यैवोल्लास्ते तद्विलासाइवतद्विला-
साः। अत्रएवक्रीरोभिरक्रमः। सानि
तम्बिन्येवकेवलंनितम्बिनीवनितान्त
कान्तिर्भातीति न यावत्अपिच्चत्य
र्थः। ते अनुभवैकगोचरास्तस्यविला
सास्तद्विलासाइवभान्तीति,वंचनवि-
परिणामेनान्वयः। कीदृशाः। विला
सायुधस्यकामस्यलासेोन्मत्तंतस्यवा-
सानिवासभूताः। नितम्बिनीसैवनित
म्बिनीवतन्मात्रनितम्बिनीसदृशीति
वार्थः। तेनस्फुटतयाव्यक्तैकशोभाः।
एवञ्चतत्रैवतदुपमानान्वेतीत्यनन्व
योऽलङ्कारः। तत्फलञ्च निरुपमत्व
बोधः। इतिकाव्यप्रकाशोदाहरण
स्यार्थः॥

अनपदेशः। पुं। असाधके।

अनपरम्। वि। पश्चाद्भाविकार्यसम्ब-
न्धविधुरे पश्चगभिन्नेवर्त्तमाने। अप-
रंकार्यंनविद्यतेयस्यतत्तेअकार्यमिति
यावत्। इतरन्यूने।

अनपवर्गवीर्यः। वि। अक्षीणप्रभावे।

अनय

अनपायी। वि। अपायविधुरे। अन
स्थिरे। निश्चले।

अनपेक्षः। वि। निरपेक्षे। सर्वेषुभो-
गोपकरणेषुयदृच्छोपनीतेष्वायनिः
स्पृहे। अपेक्षावर्जिते। हेये।

अनभिज्ञः। वि। अविदुषि। मूर्खे। न
अभिज्ञः। यथा। धिक्त्वांचूततरोप
रोपरूपरिज्ञानाऽनभिज्ञोभवानिति।

अनभियुक्तः। वि। अनादृते। अस-
म्मते।

अनभिलाषः। पुं। अरुचौ। अनिच्छा
याम्।

अनभिव्यक्तिः। स्त्री। अनुद्भूतरूपवत्त्वे।
अव्याकृते।

अनभिष्वङ्गः। वि। पुत्रदारादीतिहीने
। अन्यस्मिन्सुखिनिदुःखिनिवाऽह-
मेवसुखीदुःखीचेतिअनन्यभावनया
प्रीत्यतिशयेऽभिष्वङ्गस्तद्रहिते।

अनभ्युदितम्। वि। अनभिप्रकाशिते।

अनमः। पुं। दिने। आह्नाके। इति-
विकाण्डशेषः।

अनमितम्यचः। वि। कुपथे। नमित-
म्यचोऽमितम्यचः। तद्विन्नोऽनमि
तम्यचः॥

अनम्बरः। पुं। वातुविशेषे॥ इतिसिद्धा-
न्तशिरोमणौगोलाध्यायः।

अनयः। पुं। अशुभदैवे। विपदि॥ व्य

अनलः

सर्ने । अनीतौ । द्यूतविदांप्रसव्यग
तौ । तेषामप्रदक्षिणगमने । ननय
नम् अनेनवा । लीक्प्रापणे । एरच्
। विरोधेनञ् । अयात्शुभावहवि-
धेरन्यः ।
अनर्गलम् । वि । प्रतिबन्धकरहिते । नि
रावाधे ॥ नविद्यतेअर्गलंयस्मिन् ॥
अनर्घ्यः । वि । अमूल्ये ।
अनर्थः । पुं । हरौ ॥ नविद्यतेअर्थः प्रयो
जनमस्य आप्तकामत्वात् । वि । अ
र्थिनःप्रतिकूले । यथा । अर्थमनर्थं
भावयनित्यंनास्तितःसुखलेशः स
त्यम् । पुत्रादपिधनभाजांभीतिः
सर्ववैषाविदितानीतिरितिमोहमु-
ज्झर: । नञर्थः । अर्थरहिते ।
अनर्थकम् । न । प्रलापे । समुदायार्थ
रहितसार्थवाक्ये । अवद्धवाक्ये ॥ वि ।
व्यर्थे ॥ नञर्थोयस्य । अर्थोत्रप्रकृत्युप-
क्रमादिपुपाठाच्चित्यंकप्समासान्तः ।
अनर्थमूलम् । नि । आत्माज्ञाने ॥ यथा ।
आत्माज्ञानमनर्थानांमूलंलोकेषिनेत-
रत् । स्वपराक्रममज्ञात्वायुध्यन्भि
यतएवद्वीपति ।
अनर्थान्तरम् । न । अभेदे । एकार्थे ।
अनर्थी । वि । निस्पृहे ।
अनलः । पुं । वह्नौ ॥ नविद्यते अलं प-
र्याप्तिर्यस्येत्यनलः ॥ वसुभेदे ॥ नला

अनव

भावे ॥ कृत्तिकानक्षत्रे ॥ विषु ॥ चि
त्रके ॥ रक्तचित्रके ॥ भल्लातके ॥ पित्ते
॥ अनित्यत्वेन अनप्राणने । इषा-
दित्वात्कलच् । पृ० बर्बरे ॥ यथा ।
दुर्भिक्षंजायतेघोरंधान्यौषधिप्रपीड
नम् । अनलेचसमाख्यातंनात्रकार्या
विचारणेति । भगवतिवासुदेवे । अल
नम् अल । अलेर्भूषणाद्यर्थाद्भावेघ
ञ् । संज्ञापूर्वकत्वान्नवृद्धिः । घञर्थेको
वा । अलं पर्याप्तिः शक्तिसम्पदांपरि
च्छित्तिरियत्तासानविद्यतेस्येत्य-
नलः ।
अनलदः । पुं । जले । अनलं सन्तापंद-
तिखण्डयति इतिविग्रहः ।
अनलनामा । पुं । चित्रके ।
अनलप्रभा । स्त्री । ज्योतिष्मतीलता-
याम् ।
अनलप्रिया । स्त्री । अजायाम् । अन-
लसप्रिया ।
अनलिः । पुं । मुनिद्रुमे । वकदृचे ।
इति त्रिकाण्डशेषः ।
अनल्प । वि । बहुषु ।
अनवः । वि । प्राचीने । ननवः ।
अनवधानम् । न । अमनोयोगे । प्रमा
दे । वि । तद्विशिष्टे । नञवधान
मस्य ।
अनवधानता । स्त्री । प्रमादे । अविमृष्ट

अनव

कृत्ये । नञवधानमस्य । तस्यभावः । त
ल् । यथा । कर्त्तव्याकरणं यत्समर्थस्य
क्वचिद्भवेत् । उच्यतेऽतियंतत्रप्रमादो
ऽनवधानतेतिशब्दरत्नावली ॥

अनविनः । त्रि । अरक्षके । हन्तरि । अ
विते: कर्त्तरिल्युट् । नञवनंरक्षणंय
स्मात् ॥

अनवमः । त्रि । समाने । सदृशे । नञ
वमः । तत्समादन्यस्मिन् । नानवमः ॥

अनवरः । त्रि । प्रधाने । श्रेष्ठे । अकनि
ष्ठे । नञवरः ॥

अनवरतम् । न । अविरते । निरन्तरे ।
उत्कृष्टे । नास्ति अवरतंयत्र । क्रिया
विशेषणत्वेऽसत्त्वीवत्त्वम् । द्रव्यविशे
षणत्वेतुविशिष्टत्वम् ॥

अनवरार्द्धः । त्रि । मुख्ये । अवरस्मिन्नर्द्धे
भवः । अर्द्धादत् । परावराधमोत्तम
पूर्वाद्य । नञवरार्द्धः । नञितिस
मासः ॥

अनवलोभनम् । न । सीमन्तोन्नयनान
न्तरं चतुर्थमासिकर्त्तव्येसंस्कारविशे
षे । चतुर्थेऽनवलोभनमित्यश्वला
यनः ॥

अनवसरः । त्रि । निरवकाशे । पुं । अ
वसरस्याभावे ॥

अनवस्करम् । त्रि । निर्गोप्ये । निर्णि
क्ते । अपनीतमले । नास्यस्करोऽत्र ॥

अन:

अनवस्थः । त्रि । अवस्थितिरहिते । न
अवस्थांप्रतिप्रायेणस्थः ॥

अनवस्था । स्त्री । तर्कविशेषे । तस्यल
क्षणं यथा । उपपाद्योपपादकयो
रविश्रान्ति रितिमीमांसकाः । अव्य
वस्थितपरम्परारोपाधीनानिष्टप्रसङ्गे
॥ यथा । यदिघटत्वंघटजन्यत्वव्याप्यं
स्यात् कपालसमवेतत्वव्याप्यंनस्यात्
॥ स्त्रियांभावे ॥

अनवस्थानम् । न । अव्यवस्थाने । पुं ।
वायौ । पवने । त्रि । चञ्चले । नञ
वस्थानंयस्य ॥

अनवस्थितः । त्रि । अव्यवस्थिते ।

अनवस्थितत्त्वम् । न । खद्योतायांपिसमा
धिभूमौमयङ्ग्रथिल्योश्चित्तस्यतथाप्र
तिष्ठितत्वे ॥

अनवस्थितिः । स्त्री । चापले । मात्सर्य
द्वेषरागादेश्चापलत्वेनवस्थितिः ॥
नञवस्थितिः ॥

अनशनम् । न । उपवासे । कामानश
ने । त्रि । तद्वति । नञशनंभक्षणं
यस्मिन् यस्यवातत् ॥

अनश्वन् । त्रि । अभुञ्जाने ॥

अनश्वरः । त्रि । नाश्यते । ननश्वरः ॥

अनः । न । शकटे ॥ मातरि । ओदने ॥
प्राणिजन्यनि । अनितिचीत्करोति ॥
अनप्राणने । असुन् ॥

अनाग

अनसूया। स्त्री। अत्रेःपत्न्याम्। कर्दमप्रजापतिकन्यायाम्। त्रि। असूयारहिते। अस्याश्चरणंयथा। नगुणान्गुणिनोऽन्तिस्तौतिमन्दगुणानपि। नान्यदोषेषुरमतेसानसूयामकीर्त्तितेति वृहस्पतिः॥

अनसूयुः। त्रि। अनिन्दके। सन्तःप्रणयिवाक्यानिगृह्णन्तिह्यनसूयवइतिभट्टपादाः॥

अनहंवादी। त्रि। गर्वोक्तिरहिते॥ यः। कर्त्ताहमितिवदनशीलो न भवतिसः॥

अनहङ्कारः। त्रि। अहङ्कारविधुरे॥

अनहङ्कृतिः। स्त्री। गर्वाभावे। अगर्वे॥ इतिचिकाण्डशेषः॥

अनाकारः। त्रि। निराकृतौ। निराकारे॥

अनाकुलम्। त्रि। अव्यग्रमनसि। एकाग्रमनसि॥ स्थिरे। एकाग्रे। असङ्कीर्णे॥ नआकुलम्॥

अनाक्रान्तः। त्रि। अपराजिते॥ नआक्रान्तः॥

अनाक्रान्ता। स्त्री। कण्टकार्याम्॥ नआक्रान्ता॥

अनागतः। त्रि। वर्त्तमानप्रागभावमतियोगिनिकाले। भविष्यति॥ अनायाते। अनुपस्थिते। अज्ञाते। यथा

अनादिः

। अनागतादिलिङ्गेनानुमितिस्तदेतिकौस्तुभावली॥ नआगतः॥

अनागतार्त्तवा। स्त्री। अरजस्कस्त्रियाम्। नग्निकायाम्॥ अनागतमार्त्तवंरजोऽस्याः॥

अनाचारः। पुं। कदाचारे। श्रुतिस्मृतिविरुद्धेकर्मकरणे। सर्वदेशेष्वनाचारःपथितास्वेच्चरणम्। त्रि। तद्विशिष्टे॥

अनातपः। पुं। छायायाम्। रौद्राभावे॥

अनात्मा। पुं। शरीरादौ॥ यथा। अप्राप्तः प्राप्यतेयोयमप्यत्नत्यज्यतेतथा। जानीयात्तमनात्मानंबुद्धान्तंवपुरादिकमिति॥

अनार्य्यः। त्रि। रागादिदोषरहिते। आत्मनिर्मनसिभवम् रागादि। तद्रहितः॥

अनाथः। त्रि। स्वतन्त्रे। प्रभुहीने। नविद्यतेनाथोयस्य॥

अनादरः। पुं। परिभवे। तिरस्कृतौ। नआदरः॥

अनादिः। पुं। परमेश्वरे॥ चतुर्थब्रह्मणि। त्रि। आदिरहिते। नविद्यतेआदिःकारणंयस्यसः। यथा। जीवईशोविशुद्धाचित्तेषांभेदःपरस्परम्। अविद्यातश्चितोर्योगः षडस्याकमना

अनामा

दृश्यः ॥ इतिवेदान्तरहस्यम् ॥
अनादित्वम् । न० । उत्पत्तिमत्त्वेसति सहेतुत्वेसतिकेनाप्यविदितमूलकारणत्वे ॥ भावेत्वः ॥
अनादिनिधनः । वि । आद्यन्तशून्ये षड्भावविकारवर्जिते परमेश्वरे ॥ आदिर्जन्मनिधनंविनाशः आदित्वनिधनत्व आदिनिधने जन्मविनाशौत द्वयंनविद्यतेयस्यसः ॥
अनाद्दृतम् । वि । अवज्ञाते । कृततिरस्कारे ॥ नञ्आद्दृतम् ॥
अनापन्नः । वि । अप्राप्ते । नञ्आपन्नः ॥
अनामकम् । न । अर्शोरोगे ॥ पुं । मस्तमासे ॥ अप्रशस्तंनामाऽस्य ॥
अनामयम् । न । आरोग्ये ॥ अविद्योतत्कार्यात्मकरोगरहिते मोक्षाख्ये पुरुषार्थे ॥ आत्मरूपे ॥ अस्तिजायते वर्द्धतेऽपक्षीयतेविपरिणमतेनश्यतीत्यादिषड्भावविकारशून्यमात्मरूपमतेषांविकाराणां देहोपाधिनिमित्तत्वात् आत्मनश्चदेहाभावात्तद्विकाररहितमनामयमात्मैवेत्यर्थः ॥ आमयस्याऽभावः । अर्थाभावेऽव्ययीभावः ॥ वि । तद्विशिष्टे ॥ अनामयमस्त्यस्य । अच् ॥
अनामयावी । वि । व्याधियुक्ते ॥ दोषाभावो । न आमयावी ।
अनामा । स्त्री । उपकनिष्ठाङ्गुलौ । न

अनार

नामग्रहणयोग्यमस्याः । ब्रह्मणोऽनयाशिरश्छेदनात् । अतएवास्यांप्रवीक्रियते । डाप् ॥
अनासिका । स्त्री । अनामायाम् ॥ अनासैव । स्वार्थेकः । प्रत्ययस्यादितीत्वम् ॥
अनायत्तः । वि । अनधीने । अवशीभूते ॥ यथा । एतावज्जन्मसाफल्यं यदनायत्तवृत्तितेति ॥
अनायस्तः । वि । आयासहीने ॥
अनायासः । पुं । अक्लेशे । यत्नाभावे ॥ अस्यलक्षणन्तु । शरीरंपीड्यते येन सुशुभेनापि कर्मणा । अत्यन्तंतन्न कुर्वीतअनायासः सउच्यतइत्येकादशीतत्त्वम् ॥ यथा । अनायासेनमरणंविनादैन्येनजीवनम् । अनाराधितपोविन्दचरणस्यकथंभवेदिति ॥
अनायासकृतम् । वि । विनायत्नकृते ॥ न । फाल्गे । अनायासेनकृतम् ॥
अनारतम् । न । सन्ततेः ॥ वि । तद्युक्ते ॥ आङ्पूर्वोरमिर्विरामे । अविरामोनमारतंयस्मिन् ॥ क्रियाविशेषणत्वे क्लीबत्वम् । द्रव्यविशेषणेतु त्रिलिङ्गत्वम् ॥
अनारब्धम् । वि । निरारम्भे ॥
अनारम्भः । पुं । अननुष्ठाने । नञ्आरम्भः ॥

अनोतृ

अनार्जवः । पुं । रोगे । ऋजुत्वाभावे ।
त्रि । तद्वति ॥
अनार्त्तवम् । न । पौषादिमासचतुष्टये वर्षाभवेजले ॥ यथा । अनार्त्तवं प्रमुंचन्तिवारिवारिधरास्तुयत् । तत्क्षिदोषायसर्वेषां देहिनांपरिकीर्त्तितमिति ॥ नेतौमंवम् आर्त्तवम् । न-आर्त्तवम् ॥
अनार्य्यः । वि । दुर्ज्जने । दुःशीले ॥ न-आर्य्यः ॥
अनार्य्यकम् । न । अगुरुकाष्ठे ॥ इतिरा-जनिर्घण्टः ॥
अनार्य्यजम् । न । लोहके । इतिहेमच-न्द्रः । वि । नीचजाते ॥
अनार्य्यजुष्टम् । वि । मुमुक्षुभिरसेविते ॥ अनार्यजुष्टम् ॥
अनार्य्यतिक्तः । पुं । भूनिम्बे । चिरातिक्ते ॥ अनार्यप्रियश्चासौतिक्तश्च शाकपार्थिवादिः ॥
अनाविद्धः । वि । अनभिभूते । नञ्-आविद्धः ॥
अनाविलः । वि । निर्म्मले ॥ नञ्-आविलः ॥
अनाहतः । वि । प्रथमे ॥ आवरणवर्जिते ॥
अनावृष्टिः । स्त्री । वर्षणाभावे । ईतिविशेषे ॥

अनाह

अनाशकम् । न । कालानशने । नतु-भोजननिवृत्तिरनाशकम् भोजननिवृत्तौम्रियतएवेति तपसानाशकेने-त्यवर्त्त्यभाष्यम् ॥
अनाशकायनम् । न । उपवासपरायण-त्वे ॥
अनाशी । पुं । अपरिच्छेदे । आत्मनि ॥
अनाश्रितः । वि । अनपेक्ष्यमाणे । फलाभिसन्धिरहिते । नञ्-आश्रितः ॥ आश्रयप्राप्तिरहिते ॥
अनाश्वान् । वि । अश्नन्नकुर्वाणे । उपेयिवाननाश्वाननूचानश्चेतिनञ्पूर्वाद्भ्रातेःक्वसुरिटौभावश्चनिपात्यते । घृतजपघृतेरनाशुपदृतिभारविः ॥
अनासिकः । वि । नासिकारहिते । विरूपे ॥
अनास्था । स्त्री । अनादरे ॥ आस्था-भावे ॥
अनाहतम । न । षट्चक्रान्तर्गतहृदयस्थेदादशदले चतुर्थचक्रे ॥ यथा । शब्दब्रह्ममयंशब्दानाहतंतत्तदुच्यते । अनाहतारयंततपद्मंमुनिभिःपरिकीर्त्तितम् । सानन्दसदनंतत्पुरुषाधिष्ठितपरमितिदेवीभागवतम् । अनाहतो-नामताडनंविनाजायमानःशब्दः ।

अनिभृ

सेनार्हतःशब्दोयस्मिंस्तच्छब्दानार्ह तम्। वा हिताग्न्यादित्वात्साधु॥ पु रुषाधिष्ठितम् रुद्रोधिष्ठितमे। अनार्ह तश्शब्दोमध्यमावाणीरूपोज्ञेयः॥ चि। छेदाभोगःस्खलनव्हननम् तद्रहि तेषस्ते। नूतनवस्ते। आघातरहिते॥ अगुणितांङ्के॥ आहन्यतेस्मकैः॥ न आहतंवा॥

अनिकेतः। चि। नियतनिवासरहिते॥ नास्तिनिकेतोऽस्य॥

अनिच्चुः। पुं। इच्चुतुल्यायाम्। खाक्डेति आनाखुरितिच गौडख्याते॥ न इच्चुः। साट्यध्येवनञ्।

अनिगीर्णः। चि। अनुक्ते॥ विषस्यानि गीर्णस्येतिसाहित्यदर्पणम्॥

अनिङ्गनम्। चि। अचले। निर्वातप्रदीपकल्पे॥

अनित्यः। चि। अध्रुवे। विनाशिनि। बाधयोग्ये। व्यक्ते। कालाद्यवच्छिन्ने। नस्थास्यतीतिलोकागमयोर्व्यवहारयोग्ये॥ ननित्यः॥ यद्वा। धर्म्मोनित्यःसुखदुःखेच्छानित्येजीवोनित्योहेतुरस्याप्यनित्यः। इतिभारतेभारतसावित्री॥

अनिद्रः। पुं। स्वयावस्थया स्वर्गभूते परमात्मनि॥ चि। निद्राशून्ये।

अनिभृतः। चि। चपले। अविनीते।

अनिरु

ननिभृतः॥

अनिमिषः। पुं। स्त्री। सुरे॥ मत्स्ये। पुं। विष्णौ। अनुन्मेषदृष्टित्वात्। काले॥ ननिमिषति। मिषश्चेष्टने। इगुपधेतिकः। नञ्समासः॥

अनिमिषचेतस्। न। नैमिषारण्ये।

अनिमिषाचार्यः। पुं। गुरौ। बृहस्पतौ। अनिमिषाणांदेवानामाचार्यः॥

अनिमेषः। पुं। देवे। अविद्यमानोनिमेषोऽस्य। मत्स्ये॥

अनियतः। चि। अनैकान्तिके। अनित्ये। अस्थायिनि। ननियतः॥

अनियन्त्रितः। चि। उच्छृङ्खले। उद्दामे॥

अनिरुक्तः। चि। वाचामगोचरे॥

अनिरुद्धः। पुं। कामपुत्रे। मनसोऽधिष्ठातरि। उषापतौ। न निरुद्धे। अप्रतिरुद्धे। चरे। ननिरुद्धोऽनिरुद्धः। युद्धेकेनापिननिरुद्धः।

अनिरुद्धपथम्। न। व्योम्नि॥ चि। अवारितपथे॥ अनिरुद्धः रोधशून्यः पन्थायस्मिन् यस्यवा।

अनिरुद्धभामिनी। स्त्री। स्वैरिण्याम्। वाणकन्यायाम्। उषायाम्। अनिरुद्धाचासौभामिनी। अनिरुद्धस्यभामिनीषा॥

अनिरुद्धः

अनिरोधः । पुं । अप्रतिबन्धे ।
अनिर्देश्यः । त्रि । निर्देष्टुमशक्ये ॥ यच्च नागोचरेपरमेश्वरे ॥ स्वसंवेद्यत्वात् परस्मैइदंतदितिनिर्देष्टुमशक्यत्वात् ॥ ननिर्देश्यः । निर्विशेषेसच्चिदानंदलक्षणेवस्तुनिधर्मीणामभावादिदंतदित्यादिसाधारणशब्दैर्द्रव्यं शुक्लः पाचकइत्यादिविशेषशब्दैश्चनिर्देष्टुं शक्यतइत्यनिर्देश्यःपरमेश्वरः । अस्त्यापिजातिगुणक्रियासंज्ञाभिर्निर्देष्टुमशक्यइत्यर्थः ।
अनिर्मोक्षा । स्त्री । संसृतिपिकायाम् ॥ त्रि । निर्मोक्षशून्ये ।
अनिर्वचनीयः । त्रि । निर्वचनायोग्ये । वाक्यागम्ये ॥
अनिर्विण्णः । त्रि । विषादरहिते । ननिर्विण्णः । नविद्यते निर्वेदोऽस्येवा । अविरक्ते ॥
अनिर्विण्णचेताः । त्रि । अविरक्तचित्ते । दृष्टजन्मनिजन्मान्तरेवा अस्मिन्वर्षेवर्षान्तरेवा अवश्योवासेत्यतिकिंत्वरचेतिधैर्ययुक्ते । अनिर्विण्णं चेतोयस्य ।
अनिलः । पुं । वाते । अनन्त्यनेन । अनप्राणने । सन्धिकल्यनिमहिमडिभण्डिशण्डिविण्डिनडिकुकिभ्योरलच् ॥ गणदेवताभेदे । वाताःपंचाशदूनकोटिः । इलति प्रेरणांकरोति इ

अनीकः

तिइलच् । तद्रहितः । वसुभेदे । स्वातिनक्षत्रे । त्रि । इलाशून्ये ।
अनिलघ्नकः । पुं । विभीतकवृक्षे ॥ इति राजनिर्घण्टः ॥
अनिलबन्धुः । पुं । कृत्तिकायाम् ॥ वन्हौ ।
अनिलयनः । त्रि । अनाधारे ॥
अनिलसखः । पुं । वन्हौ । अनिलस्य सखा । राजाहः सखिभ्यष्टच् ।
अनिलान्तकः । पुं । रुद्रुदीवृक्षे ।
अनिलामयः । पुं । वातरोगे ।
अनिशम् । न । सदा । सना । अविरते । निशा व्यापाररोहित्यमुपचारात् । नास्तिनिशाऽस्मिन् । क्रियाविशेषणत्वेऽस्यक्लीवत्वम् द्रव्यविशेषणेतुविलिङ्गत्वम् ॥ रात्रिवर्जिते ।
अनिशम् । न । सातत्ये ।
अनिष्टम् । न । प्रतिकूलवेदनीये नारकतिर्यग्गादिदुःखके पापफले ॥ अपकारे । नष्टुमितिविग्रहः । त्रि । अनभिलषिते ॥ यथा । इष्टानाप्तादनिष्टाप्तेः करुणार्द्रोरसोभवेदितिसाहित्यदर्पणः ।
अनिष्टा । स्त्री । नागवल्लायाम् ॥
अनिष्टृतः । त्रि । अनियुक्ते ।
अनीकः । पुं । न । रणे । सैन्ये । सेनामात्रे । अनित्यनेन । अनप्राणने ।

अनीशः

अनिहंपिभ्यांकित्तेतिईकन् । अनन म् । अनंगतौ प्राणनेवा । अनीकाद यश्चेतिसाधुः॥ अनूयनंवा । णीञ् प्रापणे । वाहुलकात्कर्तरि नञ्स मासः॥

अनीकस्थः । पुं । रणगते । हस्तिशि क्षाविचक्षणे । रक्षिवर्गे । राजरक्षि णि । चिक्षे । वीरभटेखवाद्ये । जय ढक्केतिप्रसिद्धवाद्ये॥ त्रि । सैन्यस्थे । अनीकेतिष्ठति । ष्ठा । सुपीतिकः॥

अनीकाधिकृतः । त्रि । सेनापतौ ॥

अनीकिनी । स्त्री । सेनायाम् । तिस्रःपुच मूषु । इभाः २१८७ । रथाः २१८७ । अश्वाः ६५६१ । पदातयः १९३५ । एतत्परिमाणविशिष्टसेनाभेदे । स मस्तसंख्यया २१८७० सप्तत्यधिकाष्ट शतधिकसप्तसाधिकायुतद्वये । अ क्षौहिणीदशमांशेयं संख्या । अनी कोरणोस्तिप्रयोजनत्वेनयस्याः । इ निः । ङीप् । त्रि । अनीकिनि ।

अनीचिदर्शी । पुं । वुद्धभेदे ॥

अनीशः । पुं । विष्णौ । नविद्यते ईशो नियन्ता स्वामीयास्य । ईश्वरभिन्ने । मरुत्तिनिष्टयोरस्यतन्त्रे । यथा । अ क्षीणन्तुरनीशोयमात्मनः सुखःदुःख योः । ईश्वरप्रेरितोगच्छेत्स्वर्गंवाश्व भ्रमेववेतिस्मृतिः ।

अनुक

अनीशा । स्त्री । दीनभावे ॥

अनीश्वरः । त्रि । नास्तिशुभाशुभयोः कर्मणोःफलदातेश्वरइतिवादिनि ।

अनीहः । त्रि । फलाशारहिते । निश्चे ष्टे । नास्तिईहायस्यसः ॥

अनु । अ । हीने । सहार्थे । पश्चादर्थे । सादृश्ये ॥ लक्षणे । इत्थंभूताख्या ने । भागे । वीप्सायाम् ॥ अनुक्रमे । आयामे । समीपे । अनिति । अन प्राणने । वाहुलकादुः॥

अनुकः । त्रि । कामिनि । कामयितरि- ॥ अनुकामयते । अनुकामिकेति- साधुः ॥

अनुकम् । अ । वितर्के ।

अनुकम्पा । स्त्री । दयायाम् ॥ आर्द्रभा स्ये । अनुकम्पनम् । कपिकिञ्चिल ने । गुरोश्चेष्यः ।

अनुकम्प्यः । त्रि । कृपायोग्ये । अनुक म्पितुंयोग्यः । यत् ।

अनुकरणम् । न । अनुकृतौ । सदृशी करणे ॥ तद्विविधम् । शब्दानुकरण म् अर्थानुकरणञ्च । यथार्थरहितस्य केवलशब्दस्यसदृशकरणम् तच्छब्दा नुकरणम् । यद्वार्थविशिष्टस्यसदृशक रणम् तदर्थानुकरणम् । इतिवैया- करणाः ।

अनुकर्षः । पुं । रथाधःस्थदारुणि । र

अनुकू

यस्याधस्तनभागे यद्वाक्षधारणकोपुं-
तिप्रुतिर्यतोधश्चक्रमुपरिषट्कर्म यत्र
चक्रंतदनुकर्षणशब्दवाच्यमित्यर्थः इ-
तिभरतः। अवकर्षणे। अनुकृष्यते।
कृषविलेखने घञ्। अनुकर्षणम्। न। आकर्षणे। अवकर्ष
णे। अनुकल्पः। पुं। मुख्यकल्पादूधमे गौण-
कल्पे। प्रतिनिधौ। गौणविधौ। अ
नुहीनःकल्पः। प्रादिसमासः। यथा
व्रीहिभिर्यजेतेतिमुख्योविधिः। व्रीह्य
भावेनीवारैर्यजेतेतिगौणोविधिः।
संशक्तेनानुष्ठातव्यः। यथा। प्रथमः प्र
थमकल्पस्ययेनानुकल्पेनवर्त्तते। नेसा
म्प्रतायिकंतस्यदुर्म्मतेर्विद्यतेफलम्।
इतिमनुः।
अनुकामीनः। त्रि। कामङ्गामिनि। यथे
ष्टगमनशीले। कामस्यसदृशम्। य
थार्थेव्ययीभावः। अनुकामंगामीत्य
र्थे। अवारपारात्यन्तानुकामंगामी-
तिखः।
अनुकारः। पुं। सुसदृशक्रियायाम्।
अनुहारे। अनुकरणम्। सदृशरूप
वेशभाषादिकरणम्। अनुकृ।
घञ्। उपमायाम्। अनुकूलकरणे।
अनुकूलः। पुं। पतिप्रभेदे। अस्यल
क्षणं यथा। सर्वदापराङ्गनापराङ्मु

अनुकू

खत्वेसतिसर्वदास्वजायानुकूलत्वमि
ति। त्रि। तत्तदिच्छाचरणशीले।
अनुरक्ते। सहायें। सहकारिणि।
अनुकूलादितिविग्रहः।
अनुकूलता। स्त्री। दाक्षिण्ये। भावे
तल्।
अनुकूला। स्त्री। स्यादनुकूलाभतनग
गाश्चेदितिलक्षणलक्षितायांदत्ती।
यथा। वल्लवेशमुररिपुंमूर्त्तिं गोप
सृगाचीकृतरतिपूर्त्तिः। वाक्कृति
सिद्धौ प्रणतिपरस्य स्यादनुकूलाजग
तिनकस्येति। दन्तीदृत्तं।
अनुकृतिः। स्त्री। अनुकरणे। अनुक
रणम्। कृञ्। क्तिन्।
अनुक्रमः। पुं। यथाक्रमे। परिपाट्या
म्। अनुक्रमणम्। क्रमुपादविक्षेपे।
घञ्। नोदात्तोपदेशेतिनृद्धिः।
अनुक्रमणिकायाम्।
अनुक्रमणिका। स्त्री। भूमिकायाम्।
ग्रन्थादेर्मुखबन्धे। पुराणादेरुक्तविव
रणस्यसंक्षेपेणपुनःकथने।
अनुक्रमणी। स्त्री। ग्रन्थादेर्मुखबन्धे।
भूमिकायाम्।
अनुक्रान्तः। त्रि। अनुक्रमेणोक्ते।
अनुक्रियमाणः। त्रि। विडम्बमाने।
अनुक्रोशः। पुं। दयायाम्। यथा। गु
णाधिकान्मुद्दलिषेदनुक्रोशंगुणाध-

अनुगि

मात् । सैवींसमानादन्विच्छेन्नता
मैः परिभूयते इति । अनुक्रोशन्यने-
न क्रुशआह्वानेरोदनेच । इलश्चे
तिघञ् ॥
अनुगः । त्रि । अनुगते । अन्वञ्चे । अ-
नुगच्छति । गम्लृगतौ । अन्येभ्योपी
तिडः ।
अनुगतः । त्रि । सेवके । अनुगे । पश्चा
द्यासे । निर्यते । अनुगम्यतेस्म । ग
म्लृ० । क्तः ॥
अनुगमः । पुं । उपसर्पणे । यथा । कृ
तेतुदोयतेगत्वांचेतायामाहुतायवै
। द्वापरेयाश्वमानायकलौत्वनुगमा
न्विते । इतिस्मृतिः । पश्चाद्गमने ॥
न्यायमते येनरूपेण तावत्पदार्थबु-
द्धः तदेवरूपंतावत्पदार्थानुगमक-
स्तस्यक्रियायाम् ।
अनुगमनम् । न । पश्चाद्गमने ॥ सह
गमने ।
अनुगवीनः । पुं । गोपाले । गोःपश्चा
त् इतिअनुगु । पश्चादर्थेऽव्ययीभावः
। गोः पश्चात् पर्यासंगच्छतीत्यर्थे
अनुगवंगामीतिखः ।
अनुगामी । त्रि । कामङ्गामिनि । पश्चा
द्गामिनि । स्त्री । अनुगामिनी ।
अनुगिरम् । अ । गिरेःसमीपम् । सामी
प्येऽव्ययीभावः । गिरेश्चसेनकस्येति

अनुजि

समासान्तष्टच् ।
अनुग्रहः । पुं । प्रसन्नतायाम् । फलदा
ने । इष्टसम्पादनेच्छायाम् । अभ्युप
पत्तौ । अनिष्टनिवारणपूर्वकेष्टसाध
ने । यथा । विरूपोन्मत्तनिःस्वाना
मकृत्वापूर्वकंहियत् । पूर्वंदानमा
नाभ्यामनुग्रहउदाहृतइति । तारका
सु ॥ अनुग्रहणम् । ग्रहउपादाने । अ
ङ्ग्रहवृद्रित्यप् ॥
अनुग्राहकः । त्रि । समर्थके । अनुग्र
ह्णातीतिग्रहेर्ण्वुल् ।
अनुचरः । त्रि । सहायें । दासे । सेव
के । अनुचरति । चरगतौ । चरेष्टः ॥
अनुचिन्तनम् । न । अनुध्याने ।
अनुच्छिष्टम् । त्रि । मृष्टे । नेउच्छिष्ट
म् ।
अनुजः । पुं । कनीयसि । कनिष्ठेभ्रा
रे । अनुपश्चाज्जातः । उपसर्गेचसं
ज्ञायामितिडः । त्रि । पश्चाज्जाते ।
न । प्रपौण्डरीकनामनिसुगन्धि
द्रव्ये ।
अनुजन्मा । पुं । कनीयसि । अनुपश्चा
ज्जन्मयस्यसः ।
अनुजा । स्त्री । जायमानायाम् । कनि
ष्ठायांभगिन्याम् ।
अनुजाता । स्त्री । कनिष्ठायांभगिन्याम् ।
अनुजिघृक्षा । स्त्री । अनुग्रहीतुमिच्छा

अनुक्त

याम्। ग्रहेःसञ्ज्ञादपप्रत्ययेटोप्॥
अनुजीवी। त्रि। सेवके। अनुजीवितुंशीलः सुपीतिणिनिः॥
अनुज्ञा। स्त्री। अनुमतौ॥ यथा। नान्योन्यंब्राह्मणयोर्नगुरुशिष्ययोरन्तराध्यपेयात्, अनुज्ञयातुव्यपेयात् इतितिथ्यादितत्त्वम्॥ समस्य समंप्रत्युत्कर्षनिकर्षौदासीन्येन प्रवर्त्तनायाम्। अनुज्ञायते इति अनुपूर्वाज्ञातेरातश्चोपसर्गे इत्यङ्॥
अनुज्ञातः। त्रि। अनुमते॥
अनुज्येष्ठम्। ज्येष्ठानुक्रमेणेत्यर्थे॥ ज्येष्ठस्य आनुपूर्व्येण। अव्ययंविभक्तीत्यव्ययीभावः॥
अनुतर्षः। पुं॥ सुरापानयाचे॥ तृष्णायाम्॥ अभिलाषे॥ शीधुपाने। सरके॥ अनुतर्षणम्। जितृषापिपासायाम्। घञ्॥ मद्ये॥ अनुतृष्यत्यनेनेति॥
अनुतर्षणम्। न। अनुतर्षे॥ अनुतर्षणम् अनेनवा। जितृषा°। भावेकरणेवाल्युट्॥
अनुतापः। पुं॥ पश्चात्तापे॥ अनुतपनम्। तपसन्तापे। घञ्॥
अनुत्तमः। त्रि। वरे। मुख्ये॥ ईश्वरे॥ नउत्तमोऽस्मात्॥ अधमे॥ नउत्तमः॥

अनुद्भु

अनुत्तमाम्भः। न। सांख्यानांतुष्टिविशेषे॥ शब्दादिभोगाभ्यासात् प्रवर्द्धन्ते कामाः तेषविषयाप्राप्तौ कामिनं दुर्नयन्तीति भोगदोषंभावयतोविषयेपरमेयातुष्टिः साचतुर्थीअनुत्तमाम्भउच्यते॥
अनुत्तरः। त्रि। श्रेष्ठे। निरुत्तरे। प्रतिजल्पविवर्जिते॥ वृक्षे॥ दक्षिणस्यांदिशि॥ अधमे। स्थिरे। अनतिशये॥ उत्तरस्याभावः उत्तरविरुद्धोवा॥ नउत्तरोयस्मात्॥
अनुदर्शनम्। न। पुनः पुनरालोचने॥ अनुवारं वारं दर्शनम्॥
अनुदात्तः। पुं। स्वरभेदे॥ नीचैरनुदात्तइतितत्स्वरूपम्॥ नउदात्तः॥
अनुदितः। पुं। उद्यात्पूर्वमरुणकिरणवतिप्रविरलतारके कालविशेषे॥ त्रि। अनुक्ते॥ अनुत्थिते॥ नउदितः॥
अनुद्घातः। त्रि। प्रतिबन्धनिवृत्तौ॥ प्रतिघातरहिते॥
अनुद्दिष्टः। त्रि। उद्देशशून्ये॥
अनुद्भुतः। त्रि। अनुगामिनि। अनुगते। न। तालविशेषे॥ सतुद्भुतार्द्धोमात्राचतुर्थभागोवा। यथा। अर्द्धमात्रंद्भुतंज्ञेयंद्भुतार्द्धंचाप्यनुद्भुतमिति शब्दरत्नावली॥

अनुप

अनुद्विग्नमनाः । वि । स्वस्थचित्ते ॥ नउद्विग्नमनोयस्यसः ॥

अनुद्वेगकरः । वि । कस्यचिदप्यदुःख करे ॥ यथा । अनुद्वेगकरोराजेति ॥

अनुधावनम् । न । पश्चाद्धावने ॥ अनुसन्धाने ॥ यथा । तस्मिन् क्रुरक्रूरा वाचिमुहुश्चित्तंनिवारय । नतन्मनस्तवाधीनं दृष्यातत्वानुधावनम् ॥ इत्युद्भटः ॥

अनुध्या । स्त्री । अनुध्याने ॥

अनुध्यानम् । न । अनुचिन्तने ॥ अनुग्रहे ॥ आसक्तौ ॥

अनुध्येयः । वि । अनुग्राह्ये ॥

अनुनयः । पुं । विनये । प्रणिपाते ॥ सान्त्वने ॥ प्रार्थने ॥ अनुनयनम् । स्त्रीक्° । अप्च् ॥

अनुनासिकः । पुं । मुखसहितनासिकयोच्चार्य्यमाणे वर्णविशेषे ॥ वि । नासिकामनुगते ॥

अनुनेयः । वि । अनुनयार्हे ॥

अनुन्नः । वि । अविद्धे ॥ ननुन्नः ॥

अनुपकारी । स्त्री । प्रत्युपकाराजनके ॥ नउपकारी ॥

अनुपथः । वि । अनुवर्त्तिनि । भृत्ये ॥ अनुपथवात्यन्यायस्य । ऋक्पूरब्धूःपथामानक्षेदित्तः ॥

अनुपदम् । । न । अनुगे । पश्चाद्गमने ॥ पदस्यपश्चात् । पश्चादर्थेऽव्ययीभावः ॥

अनुपदी । वि । अन्वेष्टरि ॥ अनुपदमन्वेष्टा । अनुपदान्वेष्टेतिसाधुः ॥ अनुपदीगवाम् । गोपदात् पश्चादन्वेषणश्चगवामेव । तेनहिरण्यादावन्वेष्येनभवतीति हरदत्तः ॥ हलायुधस्तुसामान्ये नान्वेषणकर्त्तरीत्याह । खोजी इतिभाषायाम् ॥

अनुपदीना । स्त्री । पद्मध्याम् । पादायामपत्त्यांपादुकायाम् ॥ पदस्यानु । यस्यचायामदित्यव्ययीभावः । अनुपदंपादायामप्रमाणा वट्टा । अनुपदं सर्वेतिखः ॥

अनुपपत्तिः । स्त्री । अभावे ॥ नउपपत्तिः ॥ असङ्गतौ ॥

अनुपमः । वि । उत्तमे ॥ नास्तिउपमा यस्य ॥

अनुपमा । स्त्री । कुमुदाख्यदिग्गजकरिण्यामित्यमरः । सुमतीकाख्यदिग्गजकरिण्यामितिमेदिनिः ॥ श्रेष्ठत्वान्नास्त्युपमाऽस्याः ॥

अनुपरतः । वि । अविरते । सक्ते ॥ नउपरतः ॥

अनुपलब्धिः । स्त्री । प्राप्त्यभावे ॥ ज्ञानाभावे ॥ तत्कारणयया । अतिदूरात् सामीप्यादिन्द्रियघातान्मनो ऽन

अनुप

वस्थानात्। सौक्ष्म्याद्व्यवधानादभिभवात्समानाभिहाराच्च। ७। उदाहरणानि, यथा। उत्पतन् विपतितपत्री अतिदूरतया सन्नपिनप्रत्यक्षेणोपलभ्यते। लोचनस्थमञ्जनमतिसामीप्यान्नदृश्यते। बाह्येन्द्रियघातोऽन्धत्वबधिरत्वादिस्तस्मात् रूपादयोनोपलभ्यन्ते। अङ्गिकामाधुपेहितमनाः स्त्रीतालोकमध्यवर्त्तिनमिन्द्रियसन्निकृष्टमप्यर्थंमनोनवस्थानान्नपश्यति। इन्द्रियसन्निकृष्टं परमाण्वादिप्रणिहितमनाअपिसौक्ष्म्यान्नपश्यति। कुड्यादिव्यवहितं राजदारादिर्व्यवधानान्नपश्यति। अहनिशैरीभिर्भीभिरभिभूतंग्रहनक्षत्रमण्डलंनपश्यति। तोयदमुक्तजलबिंदूनजलाशये समानाभिहारान्नपश्यति। चकारोऽनुक्तसमुच्चयार्थः। तेनानुद्भवोपिसङ्गृहीतः। तद्यथा। क्षीराद्यवस्थायां दध्याद्यनुद्भवान्नदृश्यते।

अनुपश्यः। त्रि। असाक्ष्ये।

अनुपसंहारी। पुं। हेत्वाभासविशेषे॥ सच अन्वयव्यतिरेकदृष्टान्तरहितोनुपसंहारी। यथा। सर्वमनित्यं प्रमेयत्वादिति। अत्रसर्वस्यापिपक्षत्वान् दृष्टान्तोनास्ति। नउपसंहारी।

अनुप

अनुपस्कृतम्। त्रि। अविकृते। अविगर्हिते।

अनुपहितः। त्रि। समष्ट्यज्ञानतदुपहितेश्वरयोराश्रये स्वमहिमप्रतिष्ठिते अक्षरशब्दवाच्ये चिन्नाथे॥

अनुपाकृतः। पुं। मन्त्रैः पशोः स्पर्शनमुपाकरणं तद्रहितेपशौ।

अनुपातः। पुं। त्रैराशिकगणिते। क्रियास्वात्मतनेौ। पूर्वाङ्गपातानुसारेणापराङ्गपाते।

अनुपातकर्म। न। पञ्चविंशतिप्रकारभिन्नेमहापातकसदृशपापविशेषे।

अनुपात्ययः। पुं। क्रमेणप्राप्तस्यानंतिपाते। पर्यायें।

अनुपानम्। न। भेषजाङ्गे पेयविशेषे। भेषजेनसह तत्पश्चाद्वा यत्पीयते तस्मिन्। यथा। अनुपानविशेषेणकेरोतिविविधान्गुणानिति वैद्यकम्। समीपस्थोदके। अनुगतंपानम्।

अनुपुष्पः। पुं। शरे। इतिशब्दचन्द्रिका।

अनुपूर्वशः। अ। क्रमेणेत्यर्थे।

अनुपेतः। त्रि। सामुपनयम्वेत्युपनयनार्थमनुपसन्ने। अननुगते। एकाकिनि।

अनुप्रविष्टः। त्रि। विषयविकारविज्ञानैः प्रच्छन्ने।

अनुप्रभूतः। त्रि। अनुव्याप्ते।

अनुप्रास

अनुप्रासः । पुं । शब्दालङ्कारभेदे ॥ स यथा । वर्णसाम्यमनुप्रासः। स्वरवैसादृश्येपिव्यञ्जनसदृशत्वं वर्णसाम्यम् । रसाद्यनुगतः प्रकृष्टोन्यासोऽनुप्रासः ॥ उदाहरणं यथा । आदायवल्कुलगन्धानन्धीकुर्वन पदेंपदे भ्रमरान् । अयमेतिमन्दमन्दं कावेरीवारिपावनःपवनदुति । छेकवृत्तिगतोद्विधा । छेकाःविदग्धाः।वृत्तिर्नियतवर्णगतो रसविषयोव्यापारः । गतंदुतिछेकानुप्रासोवृत्त्यनुप्रासश्चेतितद्भेदौ ॥

अनुप्लवः । त्रि । सहाये । अनुगे । अनुपश्चात्प्लवते । प्लुङ्गतौ । पचाद्यच ॥

अनुबन्धः । पुं । बन्धे । दोषोत्पादेइच्छातोऽपराधकरणे ॥ यथा । अनुबन्धमवस्थांचदृष्ट्वादण्ड निपातयेदिति ॥ बातादिदोषाणाम प्राधान्ये । उच्चरितप्रध्वंसिनि । विनश्वरे ॥ प्रकृतिप्रत्ययागमादेशानांयः कार्यार्थमासज्यते नचप्रयोगसमवायी सोप्यनुबन्धउच्यते।मुख्यानुयायिनिगुणे। मुख्येपिवादिक्षमनुयातियः गुणस्तस्मिन् ॥ प्रकृतस्यानुवर्त्तने । प्रकृतस्यारब्धस्यकर्मणोनुवर्त्तने । सम्बन्धे । पश्चाद्भाव्यशुभपरिणामे ॥ अधिकारिविषयसम्बन्धप्रयोजनेषु । लेशे ।

अनुभ

फलसाधने । अनुबध्यते । बन्धबन्धने । घञ् ॥

अनुबन्धी । त्रि । सहचारिणि ॥ अविच्छेदेनव्यापके ॥ अनुबध्नातीति ॥

अनुबन्धी । स्त्री । छिक्कायाम ॥ तृष्णायाम् ॥

अनुबोधः । पुं । प्रबोधने । गतगन्धस्य पुनःप्रयत्नेनोद्बोधने ॥ यथा । कस्तूरिकादिनामग्राहेः ॥ पश्चाद्बोधे ॥ अनुबोधनम । बुधअवगमने । भावे घञ् ॥

अनुब्राह्मणी । त्रि । अनुब्राह्मणाध्ययनकर्त्तरि ॥ ब्राह्मणसदृशोग्रन्थोऽनुब्राह्मणम् । तदधीते । अनुब्राह्मणादिनिः ॥

अनुभवः । पुं । स्मृतिभिन्नज्ञाने ॥ सद्विविधः यथार्थोऽयथार्थश्चेति । तद्वति तत्प्रकारकानुभवो यथार्थानुभवः । सैवप्रमेत्युच्यते । तद्भाववति तत्प्रकारकश्चायथार्थानुभवः । उपलम्भे। उपलब्धौ । साक्षात्कारे । साक्षात्स्वरूपबोधे ॥ अस्यमाहात्म्यन्तु । यस्यानुभवपर्यन्ता दृष्टिस्तत्त्वे प्रवर्त्तते । तद्दृष्टिगोचरा.सर्वेमुच्यन्तेसर्वकिल्बषैरिति ॥ प्रत्यक्षादौ । अनुभवनम । भू० । घञ्दोरप् ॥

अनुभविता । त्रि । चेतने ॥

अनुभ

अनुभावः । पुं । कोपदण्डजतेजसि । प्रभावे । निश्चये ॥ सतांमतिनिश्चये । सतामभिप्रायस्यनिश्चये ॥ भावबोधके रोमांचादौ । कटाक्ष भुजाक्षेप प्रभृतिषु ॥ यथा । भावंमनोगतसा क्षात्स्वहेतुंव्यञ्जयन्तिये । तेऽनुभावा इतिख्याताभ्भूविक्षेपस्मितादय इतिर सार्णवसुधाकरः । भवनंभावः । स्त्रियांभुवइतिघञ् । अनुगतोभावोऽनुभावः । प्रादयोगताद्यर्थइतिसमासः । सामर्थ्ये । अनुभावयति । भुवःप्रेचाद्यच् ॥

अनुभाव्यः । त्रि । अनुभवविषये ॥

अनुभूतः । त्रि । परिचिते ॥ यथा । जयतिश्रीगुरुर्देवोयत्प्रसादादिदंजगत् । अनुभूतंमयासम्यगृष्टदृष्टंनसारभ खपीति ॥

अनुभूतिः । स्त्री । ज्ञानभेदे । अनुभवे ॥ यथा । अनुभूतिंविनामूढोवृथाब्रह्मणि मोदते । प्रतिबिम्बितशाखाग्रफलास्वादनमोदवदिति ॥ प्रत्यक्षानुमित्युपमितिशब्दभेदात्साचतुर्विधाभवति ॥

अनुमतः । त्रि । कृतोन्नाहे । अनुज्ञाते ॥

अनुमतकर्म्मकारी । त्रि । आज्ञयाकार्य कर्त्तरि । लिखितपाठ्यनुसारेणकर्मकर्त्तरि ॥

अनुम

अनुमतिः । स्त्री । कलोनेन्दुपूर्णिमायाम् । अद्वायास्तनयायाम् । उदयकालेमतिपद्योगाल्लक्षाहीनेचन्द्रेसत्यनुमतिशब्दवाच्यापूर्णिमाभवति । अनुज्ञायाम् । राजादेःसम्मतौ । तांविनायागादिक्रियायाअनिष्पत्तेः ॥ स्मृतिपूर्वकाज्ञायाम् ॥ अनुमन्यतेऽनयेति क्तिच् ।

अनुमन्ता । त्रि । यदनुमतिंविनाकर्त्तुं नशक्यतेतस्मिन् । अनुमतिदातरि । कार्यकारणप्रवृत्तिषुस्वयमप्रवृत्तोपि परमात्मा प्रवृत्तइवसन्निधिसत्तामात्रेणतदनुकूलस्वात्स्वव्यापारेषुप्रवृत्तान्देहेन्द्रियादीन्निधारयतिकदाचिदपि ।ततसाक्षिभूतःपुरुषः साक्षीअनुमन्ता ॥

अनुमरणम् । न । अनुसंस्थायाम् । पत्यौ । भर्त्तरिमृतेतत्पादुकादिकमुरसिनिधायज्वलच्चितारोहणपूर्वकं ब्राह्मणीभिन्नस्त्रियाः मरणे ॥ यथा । देशान्तरमृतेपत्यौसाध्वीतत्पादुकाद्वयम् । निधायोरसिसंगृह्याप्रविशेज्ज्वलदग्निमितिब्रह्मपुराणम् । पृथक्चितिंसमारुह्यनविप्रागन्तुमर्हतीतिस्मृतिः । तवस्वरूपमहिमज्ञोजगत्यास्मिन्नविग्रहा । मोहाद्भर्त्तुश्चितारोहाद्भवेन्नरकगामिनी-

तिसहमरणानुमरणयोःसामान्यतो निषेधकमागमवचनम् ॥ सहमरणे॥

अनुमा । स्त्री । अनुमितौ । अनुमाने॥

अनुमानम् । न । कल्पने ॥ सांख्यस्मृति परिकल्पिते प्रधाने ॥ स्मृतौ ॥ अनुमीयतेऽश्रुतिर्ययेतिव्युत्पत्त्या स्मृतेरपिप्रामाण्यम्प्रतिसापेक्षत्वात् ॥ अनुमितिकरणे ॥ लिङ्गलिङ्गिपूर्वके । पूर्ववत् शेषवत्-सामान्यतो दृष्टंचेति त्रिविधे अनुमितिसाधने ॥ अत्रोक्तं-भाष्यकारैः।सत्सुचवेदान्तवाक्येषुजगतो जन्मादिकारणवादिषु तदर्थ ब्रह्मदार्ढ्यायानुमानमपिवेदान्तवाक्या-विरोधिभवन्न निवार्यतइति ॥

अनुमानोक्तिः । स्त्री । तर्के । अनुमानस्यउक्तिः ॥

अनुमितिः । स्त्री । अनुभवविशेषे । परामर्शजन्यज्ञाने । व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यज्ञाने ॥ यथा । धूमदर्शनाद्वह्निमान्पर्वतइत्याकार-ज्ञानमनुमितिः । अस्याव्यापारकारणंपरामर्शः । अस्याःकरणंव्याप्तिज्ञा-नम् । अनुमानम् । डुमिञ्प्रक्षेपणे । ल्युट् ॥

अनुमेयः । त्रि । अनुमातुंयोग्ये ॥

अनुमोदः । पुं । एवमस्तुइत्याकारेअनुमोदने ॥

अनुमोदनम् । न ॥ अनुमोदे ॥

अनुमोदितः । त्रि । अनुज्ञाते । कृतानुमोदने । अनुमते ॥ यथा ॥ भवता यद्यवसितंतन्मेसाध्वनुमोदितमिति ॥ श्रीभागवतम् ॥

अनुयाजः पुं । यज्ञाङ्गे ॥ पश्चादनुयाजाः । यजेर्घञि प्रयाजानुयाजौयज्ञाङ्गइति कुत्वाभावोनिपातसिद्धः ॥

अनुयायी त्रि । सङ्गे ॥ पश्चाद्गामिनि ॥

अनुयुक्तः । पुं । भृतकाध्येतरि ॥ इति-महाभारतम् ॥

अनुयोक्ता । पुं । भृतकाध्यापके ॥ इति महाभारतम् ॥

अनुयोगः । पुं । प्रश्ने ॥ अनुयोजनम् । युजेर्घञ् ॥

अनुयोगकृत् । पुं । आचार्ये ॥ इतिहेमचन्द्रः ॥

अनुयोजनम् । न । प्रश्ने ॥ इतिहेमचन्द्रः ॥

अनुरक्तः । त्रि । अनुरागवति ॥ यथा । अनुरक्तोगुणान्भूतेविरक्तोदूषणानिचेति ॥ अनुकूले ॥

अनुरञ्जनम् । न । अनुरागे । हर्षजनने ॥

अनुरतः । त्रि । अनुरागविशिष्टे । प्रीते । अनुरक्ते ॥ अनुपूर्वात् रमेः क-

अनुला

र्त्तरिक्तः ॥

अनुरतिः । स्त्री । अनुरागे ॥

अनुरहसम् । न । एकान्ते । रहोऽनु ।

अनुगतंरहः । अनुगतं रहोऽस्मिन्वा

ना । अन्वर्थतस्माद्रहसद्भावश्च ॥

अनुरागः । पुं । अन्योन्यप्रीतौ । स्नेहे

॥ अनुगतोरागः ॥

अनुरागी । त्रि । अनुरक्ते । अनुरागो

ऽस्यास्तिअस्मिन्वा । मतुवर्थेइनिः ॥

अनुराधा । स्त्री । सप्तदशेनक्षत्रे । अ

नुजातस्यफल्गुयथा । सत्कीर्त्तिकान्ति

रसदोत्सवःस्याज्जेतारिपूणाञ्चकला

प्रवीणः । स्यात्सम्भवेयस्यकिलानुरा

धासम्पत्प्रमोदाविविधौ भवेताम्

तिकोष्ठीप्रदीपः । राधामनुगता ॥

अनुरुद्धः । त्रि । निवद्धे ॥

अनुरूपम् । त्रि । सदृशे । योग्ये ॥

अनुरूपम् । त्रि । सदृशे । प्रतिरूपे । रू

पस्ययोग्यम् । यथार्थेयोग्यतायामव्य

यं विभक्तीत्यव्ययीभावः । अव्ययीभा

वश्चेत्यव्ययत्वम् ॥

अनुरोधः । पुं । अनुवृत्तौ । अनुवर्त्तने

। आराध्यादेरिष्टसम्पादने । अनुरो

धनम् । रुधिर्आवरणे । घञ् ॥

अनुलब्धः । त्रि । अनुविग्ने ॥

अनुलापः । पुं । मुहुर्भाषणे । वारंवार

भाषणे । अनुलपनम् लप्यतायांवा

अनुवा

चि । भावे घञ् ॥

अनुलिप्तः । त्रि । रञ्जिते ॥ कृतानुलेप

ने ॥

अनुलेपः । पुं । चन्दनादौ ॥ अनुलेपन

म् । लिपेर्घञ् ॥

अनुलेपनम् । न । चन्दनादौ ॥ गात्रेग

न्यद्रव्यादिलेपने ॥ अनुलिप्यते । लि

पउपदेहे । कर्मणिल्युट् ॥

अनुलोमः । पुं । यथाक्रमे । अक्रमत्यन्व

वेत्यच् ॥

अनुलोमजः । त्रि । अनुलोमजाते । अ

प्रतिलोमजे ॥ यथा । ब्राह्मणात च

त्रियागर्भजातः । क्षत्रियात् वैश्यायां

जातइत्यादिज्ञेयम् ॥

अनुवत्सरः । पुं । सम्वत्सरे ॥

अनुवर्त्तनम् । न । अनुरोधे । आराध्या

दीष्टसम्पादने ॥ अनुगम्यवर्त्तनमा

राधनम् ॥ अनुवृत्तौ ॥

अनुवर्त्तितः । त्रि । सेविते ॥

अनुवर्त्ती । त्रि । अनुकूले ॥

अनुवाकः । पुं । शस्त्रे । अमगीतऋग्

जाते । ऋग्यजुःसमूहे । अनुउच्यते

। वचपरिभाषणे । घञ् । चजोरि

ति कुत्वम् ॥

अनुवाक्या । स्त्री । प्रशास्तृपाठ्यायांदे

वतोद्देश्यामृचि ॥ अनुउच्यते । य

चेर्ऋहलोर्ण्यत् । चजोरितिकुत्वम्

अनुवि

। शब्दसंज्ञत्वात् वचोशब्दसंज्ञायामितिनप्रतिषेधः ॥ ।

अनुवातः । पुं । वायुविशेषे । यःशिष्यदेशंशुरुदेशमागच्छतिवायुः सेानुवातइत्युच्यते ॥

अनुवादः । पुं । प्राप्तस्यपुनः कथने । ज्ञातार्थस्यप्रतिपादने । सिद्धस्योपन्यासे । प्रमाणान्तरेावगतस्यार्थस्यशब्देनोक्तिरनुवादः । ज्ञातस्यकथनें ॥ यथा । अग्निर्हिमस्यभेषजमित्यादिः । हिमविरोधित्वस्याग्नौप्रत्यक्षावगतत्वात् । अनुवदनम् । वद्अभिवादनस्तुत्योः । घञ् । कुत्सितेर्थे ॥ विधिविहितस्यानुवचनमनुवादः । न्या० २ । ६५ ॥

अनुवासः । पुं । सौरभ्ये ॥

अनुवासनम् । न । स्नेहने । धूपने ॥ वैद्यकोक्तस्नेहवस्तौ । यथा । द्विधावस्तिः परिज्ञेयानिरूहस्त्वनुवासनम् । कषायाद्यैर्निरूहः स्यात्स्नेहाद्यैरनुवासनमिति ॥ वासच्छेदेचु० । अनुपूर्वात् भावेल्युट् ॥

अनुवित्तः । त्रि । अनुलब्धे ॥

अनुविद्धः । त्रि । खचिते ॥

अनुविधानम् । त्रि । अनुगते ॥

अनुविधिः । त्रि । अनुवर्त्तनि ॥ कर्त्तरिक्तः ॥

अनुश

अनुवृत्तः । त्रि । प्रविष्टे । व्याप्ते ॥ पालिते ॥ अनुवृत्तिविशिष्टे ॥

अनुवृत्तिः । स्त्री । प्रवाहरूपेणानुगतौ ॥ अनुरोधे ॥ आनुकूल्ये । सेवायाम् ॥ अन्वये ॥ अनुवर्त्ततेव्याप्नोति । वृतु वर्त्तने । क्तिच् ॥ अनुवर्त्तनंवाक्तिन् ॥

अनुवेश्यः । त्रि । तदन्तर्गृहवासिनि ॥

अनुव्रजनम् । न । अनुव्रज्यायाम् । गृहागतानांशिष्टानांगमनसमयेकियद्दूरपर्यन्तंपश्चाद्गमनरूपे शिष्टाचारे ॥ यथा । आयान्तमग्रतोगच्छेत् गच्छन्तंतमनुव्रजेदितिनिगमकल्पद्रुमतः ॥

अनुव्रज्या । स्त्री । गच्छतोनुगमने । अनुव्रजने ॥ अनुव्रजनम् । अनुव्रज्या । क्यप् ॥

अनुशयः । पुं । द्वेषे ॥ पश्चात्तापे ॥ अनुबन्धे ॥ दीर्घद्वेषे ॥ शास्त्रोक्तेकर्मणि ॥ अनुशयनम् अनेनवा । शीङ्स्वप्ने । एरच् पुंसीतिघोवा ॥

अनुशयी । त्रि । चन्द्रस्यलक्ष्मलिप्तेऽवरोहतिशीघ्रादिदेहसंश्लिष्टे वेदविहितकर्मानुष्ठातरि कर्मणि ॥ जीवे ॥ अनुदण्डवत्प्रणामैश्चरणमूलेशेतेइति तथा ॥

अनुशयी । स्त्री । क्षुद्ररोगान्तर्गतपादरोगविशेषे । तल्लक्षणादियथा ।

अनुशी

गम्भीरामल्पशोथांचसवर्णामुपरि-
स्थिताम्। पादस्थानुशयीतान्तुविद्या
दन्तः प्रपाकिनीम्। हरेदनुशयीवै
द्यःक्रिययाश्लेष्मविद्रधेरितिभावप्रका
शः।

अनुशरः। पुं। राक्षसे। अनुशृणाति।
शॄहिंसायाम्। अनुपूर्वः। क्वदोरप्।
अनुशायी। पुं। जीवे। पृ।
अनुशासनम्। ने। अनुशिष्टौ। आज्ञा
याम्। उपदेशे। नियोगवचने। अनु
शिष्यते व्याख्यायते लक्षणादिर्येन।
शासुअनुशिष्टौ। अनुपूर्वः। ल्युट्। व्यु
त्पादने। यथा। शब्दानामनुशासन
म्। अनुशिष्यन्तेऽसाधुशब्देभ्यः प्रवि
भज्यबोध्यन्तेयेनेतिकरणेल्युट्।
अनुशोसितः। वि। अनुशिष्टे। अनुशि
क्षिते।
अनुशोसितृ। वि। नियन्तरि। मशासि
तरि।
अनुशिष्टः। वि। ज्ञापिते। शिक्षिते।
आश्वासे।
अनुशिष्टिः। स्त्री। कर्त्तव्याकर्त्तव्ययो
र्विविच्यज्ञापने। अनुशासने। अनुशा
सनम्। शासु०। स्त्रियांक्तिन्नावादि
भ्यः। शास इदङ्हलोः।
अनुशीलनम्। न। आलोचने। मुहुः
सेवने। पुनःपुनरभ्यासे।

अनुष्टु

अनुशोचनम्। न। शोके। शुचशोके
अनुपूर्वः। ल्युट्।
अनुश्रवः। पुं। वेदे। गुरुमुखादनुश्रूय
तएव न केनचित्क्रियते अनुपूर्वाच्छ्रु
णोतेः क्वदोरित्यप्।
अनुषक्। अनुमाने।
अनुषक्तः। वि। अनुविषण्णे। अनुगते।
अनुसज्यतेस्म। षञ्ज०। क्तः।
अनुषङ्गः। पुं। करुणायाम्। इतिहेमा
द्रिः। एकान्वितार्थानामपरंप्रत्य
ये। आसक्तौ। न्याये। उपनयस्थाऽय
मुम्भदस्यनिगमने। यथा। वह्निथाप्यधू
मवांश्चायमतस्माद्वह्निमानिति। अ
नुषज्यतेऽत्र। षञ्जसङ्गे। हलश्चेतिघञ्।
। अन्योद्देशेप्रवृत्तावन्यस्यापिसिद्धौ।
अनुषङ्गि। वि। व्यापके।
अनुष्टुप्। स्त्री। सरस्वत्याम्। अष्टाक्ष
रायांवृत्तौ। यथा। पञ्चमेलोगुरुः
षष्ठःसप्तमस्तुसमेलघुः पादेविषम
मेगश्चेत्श्लोकोऽनुष्टुप्चकीर्त्तितः।
क्वचित्पादेतुविषमेपञ्चमाद्यास्त्रयो
पिलाः। तेऽपिसर्वेगाःश्लोकेक्वचि
त्कोषलपञ्चमइति। अनुस्तुभाति।
स्तुनभु०। क्विप्।
अनुष्ठानम्। न। क्रियारम्भे। करणे।
अनुष्ठीयतेयत्। ष्ठा०। ल्युट्।
अनुष्ठितः। वि। कृते।

अनुस्वा

अनुष्णः । त्रि । अक्लेदे । मन्दे । शीतले ।
उष्णादन्यः । न । उत्पले ।
अनुष्णवल्लिका । स्त्री । नीचदूर्वायाम् ।
अनुसंख्या । स्त्री । अनुस्मरणे ।
अनुसञ्चरन् । त्रि । गमनागमनेकुर्वति ।
अनुसन्ततम् । त्रि । अनुस्यूते । अनुगते ।
अनुसन्धानम् । न । अन्वेषणे । अनुसन्धीयते । दुधाञ् ० । ल्युट् ।
अनुसमुद्रम् । । समुद्रस्यसमीपे । समुद्रंसमया । अनुर्यत्समयेत्यव्ययीभावः ।
अनुसरणम् । न । अनुवृत्तौ । अनुपूर्वात् सर्त्तेर्ल्युट् ।
अनुसर्गः । पुं । प्रतिसर्गे । ब्रह्मादीनाम् । नन्तरोत्पत्तिरूपे ।
अनुसवम् । न । त्रिकाले ।
अनुसवनम् । । सर्वदार्थे ।
अनुसारः । पुं । पूर्वानुरूपे । अनुसरणे । अनुक्रमे । अनुसर्त्तेर्घञ् ।
अनुसारी । त्रि । अनुसरत्यवर्त्तमाने ।
अनुसृतः । त्रि । उपासिते ।
अनुस्मृतिः । स्त्री । ध्याने । अनुस्मरणम् । स्मृ ० । क्तिन् ।
अनुस्यूतम् । त्रि । अनुसक्ते । अनुसीव्यतेस्म । षिवु ० । क्त । क्तोरिच्यूठ् ।
अनुस्वारः । पुं । अं इति अचः परेयि नौ । स्यति । स्यृशब्दोयतापयोः ।

अनूढः

अनूढ । तत्प्रत्ययादेर्ण । स्वरूपे भावे घञ्वा । अनुगतःस्वारः । स्वरमनुभवतिवा ।
अनुहारः । पुं । अनुकारे । सदृशकरणे । सदृशरूपवेशभाषाद्याविष्करणे ।
अनुहरणम् । हृञ्हरणे । घञ् । उपमायाम् ।
अनूकः । पुं । गतजन्मनि । न । कूले । शीले । अनूचति । उचसमवाये । ऋगुपधेतिकः । न्यङ्कादिः । विपुरु । षोनूकमित्यत्र नीनुरुषानुकायति । कैशब्दे । आतश्चेतिकः । अन्येषामपीतिदीर्घः ।
अनूचानः । पुं । साङ्गवेदविच्चचणे । अनुवचनसमर्थे । यस्यां । अनूचानः पण्डितर्म्मन्यमानोयोविद्यया इन्तियः परेषाम् । तस्यान्तवन्तस्तुभवन्ति लोकानाश्यतद्ब्रह्मफलंददातीतिभारतम् । वि । सविनये । विनीते । अन्वोवाचत् । वेदस्यानुवचनं कृतवान्वा । उपेयिवानितिसाधुः ।
अनूचानमानी । वि । । अनूचानंमन्ये । अनुचानमात्मानं मन्यते इत्येवंशीलः । आत्ममानेखश्चेतिपक्षेणिनिः ।
अनूनः । वि । यामने । नीचे ।
अनूढः । वि । अपरिणीते । नञ्तत्पुरुषः । नञ्समासः । नलोपोनञः । तस्मा

अनूपः

अनूपजम् । नञ्आर्द्रके ॥ इतिराजनिघण्टः । वि । अनूपोत्पन्नमात्रे ॥ अनूबन्ध्यापुं । अनुबन्धे ॥ अनुबध्यते । बन्धबन्धने । ण्यत् । उपसर्गस्यघञ्मी-तिदीर्घः ॥ अनूरुः । पुंगोऽक्षणे । सूर्यसारथौ । अविद्यमानावूरूयस्य । पुं । सूर्ये । अनूरुः सारथिर्यस्य ॥ अनूचः । पुं । माणवके । अविद्यमानोऽनूचोऽस्य । ऋक्पूरित्यप्रत्ययः ॥ अनूचुः । वि । अठेविकाम्ये । नञ्ऊठिजुः ॥ अनूची । वि । पुं । स्त्री । अन्तर्गी । वि । ऋत्वर्थमुक्ते । यथा । एकमप्यक्षरंयस्तुगुरुनिम्नेनिवेदयेत् । पृथिव्यांनास्तितद्द्रव्यंयद्दत्त्वासोऽनृणीभवेदिति तिथ्यादितत्त्वम् ॥ अनृतम् । नञ्कृषौ । असत्ये । अयथार्थेष्टकथने । अयथार्थभाषणे ॥ तत्कथने दोषः । समूलोवाएषपरिशुष्यति योऽनृतंमभिवदतीतिश्रुतेः ॥ अवध्यहिंसानुवन्ध्यर्थार्थभाषणे ॥ नञ्ऋतम् । अनृतम् । विवाहादिमध्येकेष्वनृतभाषणेपापाभावो यथा । विवाहकालेरतिसंप्रयोगेप्राणात्ययेसर्वधनापहारे । विप्रस्यचार्थेह्यनृतंवदेत नृप्वाह्यनृतान्याहुरपातकानी-

अनेका

तिकर्णपर्वणि जिष्णुंप्रति श्रीकृष्णो
क्तिः ।
अनेकः । त्रि । एकाभिन्ने । बहुषु । ल ।
व्यक्ते । प्रतिपुरुषं बुध्यादीनां भेदा-
त् । पृथिव्यादिकमपि शरीरघटादि
भेदेनाऽनेकमेव । नञ्एकः ।
अनेकजः । पुं । पक्षिणि । विष्णौ । ध-
र्मगुप्तयेऽसकृज्जायमानत्वात् । त्रि ।
बहुजाते ।
अनेकता । स्त्री । परस्परंभिन्नतायाम्
। नञ्एकता ।
अनेकधा । अ । अनेकप्रकारे ।
अनेकपः । पुं । स्त्री । हस्तिनि । अने-
केन करेण मुखेनच पिबति । पा याने
। सुपीतिकः ।
अनेकरूपम् । त्रि । विचित्रे । अनेकानि
रूपाणियस्मिन् ।
अनेकसंयुक्तम् । न । लिङ्गशरीरे । अने
कैर्देवमनुष्यादिनानास्थूलशरीरैःसं
युक्तम् । अनेकाभिः स्त्रीवादिषुध्यन्त-
संप्रदायकलाभिः संयुक्तंवा । त्रि । व
हुभिः सम्बद्धे ।
अनेकान्तः । त्रि । अनियते । अनतिश
ये ।
अनेकान्तवादी । त्रि । आर्हते । सप्त-
दार्थवादिनि नोलिंकप्रभेदे । यथा
। स्यात्सप्तपदार्थास्युर्जीवाजीवास्रवा

अनोक

स्रवः । संवरोनिर्जरश्चैववन्धमोक्षा
वुभावपि । स्याद्वादलाञ्छिताश्चैतेस-
र्वेनैकान्तिकत्वतइति ।
अनेकाश्रितगुणः । पुं । बहुनिष्ठगुणे ।
सयथा । संयोगः विभागः द्विपृथक्-
त्वादिः एकत्वान्यसङ्ख्येतिसिद्धान्तमु
क्तावली ।
अनेजत् । त्रि । चलनरहिते । सदैक
रूपे । एजतीत्येजत् । एजृकम्पने ।
चलनं स्थिरत्वप्रच्युतिः । नञ्समा
सः ।
अनेडमूकः । त्रि । मूढे । मूकवधिरे ।
वाक्श्रुतिवर्जिते । नास्त्येडमूको
ऽस्मात् । एडमूकसदृशेऽनेडमूकइ-
तिवा सादृश्यस्यैनञर्थत्वात् । अन्धे ।
अनेना । त्रि । निर्दोषे ।
अनेहा । पुं । काले । समये । नहन्यते ।
नञिहनएङ्चेत्यसिरेहादेशश्च ।
अनैकान्तिकः । पुं । हेत्वाभावविशेषेस
व्यभिचारे । साधारणासाधारणानुप
संहारिभेदादनैकान्तिकस्त्रिविधः । ऐ
कान्तिकोऽव्यभिचारी । नञ्ऐकान्ति
कः । त्रि । ऐकान्तिकादितरस्मिन् ।
अनैक्यम् । त्रि । एकतागून्ये । अनेकता
याम् । एकस्यभावऐक्यम् । नञ्ऐक्य
म् ।

अन्तम्

अनैपुण्यम् । न । अनिपुणतायाम् । अनैश्वर्यम् । न । अनीश्वरतायाम् । असामर्थ्ये ॥

अनोकहः । पुं । कुठे । वृक्षे । अनसः शकटस्याकंगतिहन्ति । अन्येष्वपीतिवृन्तेर्डः ।

अनौचिती । स्त्री । लोकमर्यादातिक्रमे ॥ न औचिती ॥

अनौपम्यम् । वि । आत्मरूपे । यदितत्सदृशोद्वितीयः पदार्थोजगत्त्र्यांस्यात् तदा तदुपमानेनस आत्मोपमेयः स्यात् नतुतदस्ति तस्मादनौपम्यमात्मरूपम् ॥

अन्तम् । न । स्वरूपे ॥ यथा । वनान्तभूः । पुं । नाशे ॥ पुं । न । अवसाने । चरमे । वि । अन्तिके ॥ प्रदेशे । यथा । रम्यंहर्म्यतलं न किंवसतयेम्रांव्यं नगीतादिकं किंवामागसमासमागमसुखंनैवाधिकप्रीतये । किन्तुप्रान्तपतत्पतङ्गपवनव्यालोलदीपाङ्कुरच्छायाचञ्चलमाकलय्यसकलं सन्तोषनांगताइति । परिग्रहमेचयासमासौ ॥ अतिमनोहरे । रुचिरे । अवयवे ॥ निर्णये । इयत्तायाम् । सीमायाम् ॥ यथा । स्रवणजलान्तानद्यः स्त्रीभेदान्तञ्च मैथुनम् । पैशुन्यंजनवार्त्तान्तं वित्तंदुःखयान्तकम् । राज्यश्रीर्व्र

अन्तःक

ह्मणोन्तान्हल्लान्त ब्रह्मवर्चसम् । आचारोघोपवासान्तः कुक्षयान्तंस्त्रियस्त्रीः ॥ सर्वेक्षयान्तानिचयाः पतनान्ताःसमुच्छ्रयाः । संयोगाविप्रयोगान्तामरणान्तञ्च जीवितमितिगार्गेयः ११५ अध्यायः । अमति । अमगत्यादौ । हसिसृधितितन् । अन्ततिवा । अतिबन्धने । मचाद्यंच ॥ अन्तनम् । घञ्वा ॥

अन्तः करणम् । न । मनोबुध्यहङ्कारचेतस्सु । यथा । मनोबुद्धिरहङ्कारश्चित्तंकरणमान्तरम् । संशयो निश्चयोगर्वःस्मरणं विषयाअमी इति । अस्योत्पत्तिर्यथा । मिलितैस्तुतैः । अन्तःकरणमेकंस्यादिति । तैःपञ्चभूतस्यसत्त्वांशैर्मिलितैरन्तःकरण भवतीत्यर्थः । आभ्यन्तरवृत्तित्त्वादन्तःकरणम् । अन्तःअभ्यन्तरे करणम् ॥

अन्तःकरणदेवता । स्त्री । चन्द्राच्युतचतुर्मुखशङ्करेषु । यथासंख्यंचतुर्णांचतुर्षु ॥

अन्तःकरणविषयः । पुं । सङ्कल्पविकल्पनिश्चयाहङ्कार्यं चैत्याख्येषु । यथासंख्यंचतुर्णां चत्वारो विषयाज्ञेयाः । अन्तःकरणवृत्तित्त्वेनायेषांव्यवहारः ॥

अन्तःकरणवृत्तिः । स्त्री । मनोवृत्तौ ॥ सात्रिविधा । यथाहुः । शान्तादो

अन्तःप्र

रास्तथामूढामनसोवृत्तयस्त्रिधा । वैराग्यचान्तिरौदार्यमित्याद्याः शा न्तवृत्तयः ॥ तृष्णास्नेहोरागलोभा-मित्याद्याघोरवृत्तयः । सम्मोहोभय मित्याद्याःकथितामूढवृत्तयइति ॥ ट त्तिभेदादन्तःकरणं चतुर्विधंभवति ॥ वृत्तिभेदोयथा । यदातुसङ्कल्प विकल्पकृत्त्यंतदाभवेत्तन्मनइत्यभि धम् । स्याद्वुद्विसंज्ञश्चयदाभवेत्तिमु निश्चितंसंशयहीनरूपम् । अनुसन्धा नरूपंतच्चित्तञ्च परिकीर्त्तितम् । अ हङ्कृत्यात्मसंज्ञात्तुतद्दहङ्कारतांगत-मिति । सङ्कल्पविकल्पंकृत्यंयदान्तः करणंकरोतितदातदन्तःकरणंमनः संज्ञंभवति । एवमग्रेप्यूह्यम ॥

अन्तःकुटिलः । पुं । ग्रहे । त्रि । यत्रान्तः करणे ॥

अन्तःपदवी । स्त्री । सुषुम्णायाम् ॥

अन्तःपुरम् । न । भूभुजांस्त्र्यगारे । गु ह्यान्ते ॥ अन्तरभ्यन्तरेपुरंगृहम् । ता त्स्थ्याद्राजदारेषु ॥

अन्तःपुराध्यक्षः । पुं । गुह्यान्ताधिकृते ॥ तल्लक्षणमाह्युक्तिकल्पतरुः । यथा । वृद्धः कुलोद्गतः शस्तः पिङ्गलैतामहः शुचिः । राज्ञामन्तः पुराध्यक्षोविनी तश्चक्षुषेप्यत इति ॥

अन्तःप्रज्ञः । पुं । तैजसे । इन्द्रियापेक्ष

अन्तग

यामनसोन्तःस्थत्वात् तद्वासनारूपा । प्रज्ञायस्यसः ॥

अन्तःसत्त्वा । स्त्री । गर्भिण्याम् ॥ अन्तः अभ्यन्तरे सत्त्वंयस्याःसा । भक्षातक्या म् ॥

अन्तःसुखः । त्रि । बाह्यविषयजनितसु खशून्ये । स्वरूपसुखे ॥ अन्तः अभ्यन्त रे सुखंयस्यसः ॥

अन्तःस्वेदः । पुं । स्त्री । गजे ॥ अन्तः अ भ्यन्तरे स्वेदोयस्य सः ॥

अन्तंकः । पुं । नाशकारिणि । यमे ॥ अन्तंकरोति अन्तयति । तत्करोती तिण्यन्तात् ण्वुल् ॥ भरण्याम् ॥

अन्तंकरः । त्रि । नाशकरे । अन्तंकरो ति । दिवाविभेतिटः ॥

अन्तकर्म । न । नाशने । राघवस्य शरै र्घोरैर्घोरंरावणमाहवे । अवराघवे तिसभुज्यकम् ॥ स्येतिपेऽन्तकर्म णीत्यस्यलोपेमध्यमैकवचनम् ॥

अन्तकालः । पुं । मरणसमये । समस्त करणग्रामवैयर्थ्यवति ॥ अन्तश्चासौ-कालश्च ॥

अन्तगः । त्रि । अन्तगामिनि । पारगे ॥ अन्तंगच्छतीतिविग्रहे अन्ताच्यन्ते-ष्यादिनागमे ड प्रत्ययः ॥

अन्तगतः । त्रि । अवसानंप्राप्ते ॥ अन्ते-गतः ॥

अन्तर

अन्तः । ।। । संभावनायाम् ॥ अवयवे ॥ षष्ठ्यर्थे ॥ आसने ॥ इति हेमचन्द्रः ॥ अन्त इत्यर्थे आद्यादित्वात्तसिः ॥

अन्तपालः । पुं । बाह्यरक्षके ॥

अन्तः । ।। । मध्ये । प्रान्ते ॥ अभ्युपगमे ॥ । चित्ते । अमति । अमगत्यादिषु । अमेस्तुट्चेत्यरन् । तस्यतुडागमः । रेफादकारउच्चारणार्थः ॥

अन्तरम् । न । अवकाशे ॥ यथा अन्तरं देहि ॥ अवधौ ॥ यथा मासान्तरेदेयम् ॥ परिधानीशुके ॥ यथा अन्तरे शाटकाःपरिधानीया इत्यर्थः ॥ अन्तर्द्वौ ॥ यथा पर्वतान्तरंगताः स्त्रियः ॥ भेदे । परस्परवैलक्षण्ये । विशेषे ॥ यथा । अन्तरज्ञो भव सदा धनस्य च जनस्य च । विशेषज्ञ इत्यर्थः । तादर्थ्ये । ओदनान्तरस्तण्डुलः । ओदनार्थइत्यर्थः ॥ छिद्रे ॥ यथा । अन्तरं लब्ध्वाऽरेःप्रहरेत् ॥ आत्मीये ॥ अथसोभ्यन्तरोमम ॥ विनार्थे ॥ यथा । अन्तरेण पुरुषकारंनकिञ्चित्सिध्यति ॥ बहिरर्थे ॥ यथा । अन्तरेचाण्डालगृहं । बाह्यइत्यर्थः ॥ अवसरे ॥ यथा । अन्तरज्ञोहि सेवकः ॥ मध्ये ॥ यथा । आवयोरन्तरे जाताःपर्वताःसरितोद्रुमाः ॥ आत्मनि ॥ यथा । प्रज्ञान्तरंवेद । अन्तरात्मानं जानातीत्यर्थः ॥ सदृशे ॥ यथा । हकार

अन्तर

स्यवकारोन्तरतमः ॥ अन्तरादि । रादाने । आतोनुपेतिकः ॥

अन्तरङ्गः । त्रि । आत्मीये ॥ अन्तःअङ्गानियस्य ॥

अन्तरङ्गः । त्रि । नीचानीचादिविशेषाभिज्ञे ॥

अन्तरप्रभवः । त्रि । सङ्कीर्णजातौ । अनुलोमप्रतिलोमजाते ॥

अन्तरा । ।। । निकटार्थे । मध्यार्थे । विनार्थे ॥ अन्तरेति । इणगतौ । डाप्रत्ययः ॥

अन्तरात्मा । पुं । अन्तःकरणे ॥ अन्तःअभ्यन्तरे आत्मा । सर्वान्तरे परमात्मनि ब्रह्मलोकशब्दवाच्ये ॥ यथा । न कर्मणाकनीयस्ता दृढिर्वानान्तरात्मनः । इतिवाक्यमिवोद्धृत्य वेदान्तैर्वाषणाकृतेति ॥

अन्तरापत्या । स्त्री । गर्भिण्याम् ॥ अन्तरे अपत्यंयस्याः ॥

अन्तरायः । पुं । विघ्ने ॥ अन्तरायश्चदर्शितोयोगसूत्रेणयोगे । व्याधिस्त्यानसंशयप्रमादालस्याविरतिभ्रान्तिदर्शनालब्धभूमिकत्वाऽनवस्थितत्वानीति- । चित्तविक्षेपे ॥ अन्तर्मध्ये अन्तरस्य व्यवधानस्यवा अयनम् अयगतौ । इगतौवा । घञ्अर्थे । यागे ॥

अन्तरारामः । त्रि । त्यक्तसर्वपरिग्रहत्वे

अन्तरी

नवाङ्गसुखसाधनशून्ये । अन्तःआरामोऽयस्य ।

अन्तरालम् । न । मध्ये । अभ्यन्तरे ॥ अन्तरंव्याप्ति । आतोऽनुपेतिकः । अन्येषामपीतिदीर्घः । । आड्मर्य्यादयोर्वा । मूलविभुजादित्वात्कः ।

अन्तराळकम् । न । अभ्यन्तरे ।

अन्तरिक्षम् । न । अम्बरे ॥ पतत्त्रिमेघसंचारप्रदेशे ॥ भूलोकसूर्य्यमध्यवर्त्तिनि । द्यावापृथिव्योरन्तरीक्षते । ईक्षदर्शने । कर्मणिघञ् । वेदेछांदसंह्रस्वत्वम् ॥ अनक्षेत्यणिनचेत्यस्यपृषोदरादित्वादित्त्वंवा ॥

अन्तरिक्षचित् । पुं । वायौ । अन्तरिक्षे चयतिवसति । चि° । क्विप् । तुक् ॥

अन्तरितम् । त्रि । तिरस्कृते । व्यवहिते । व्यवकलिताङ्के । यस्यवाकोऽइतिभाषा ॥

अन्तरिन्द्रियम् । न । अन्तःकरणे ॥ अन्तः अभ्यन्तरे इन्द्रियम् ।

अन्तरीक्षम् । न । नभसि । पतत्त्रिमेघसंचारप्रदेशे । द्यावापृथिव्योरन्तरीक्ष्यते । ईक्षदर्शनांकनयोः । कर्मणि घञ् । अन्तरीक्षतेजगदस्मिन्निति-अधिकरणव्युत्पत्तिस्तुनेचिता । ल्युटा घञावाधप्रसङ्गात् । अभ्रकथासौ ।

अन्तरीक्षजलम् । न । आकाशजले । दिव्योदके ।

अन्तर्

अन्तरीपः । पुं । न । द्वीपे ॥ अन्तर्गतआपोऽत्र । ऋक्पूरित्यः समासान्तः । द्यन्तरुपसर्गेभ्य इत्यपईदादेशः ॥

अन्तरीयम् । न । अधोंशुके । परिधानवस्त्रे ॥ अन्तरेभवम् । गहादित्वाच्छ । नीवीधृतश्वयद्वस्त्रमाच्छादयतिजानुनी । अन्तरीयंप्रशस्तंतद्विच्छिन्नमुभयोस्तयोः ॥

अन्तरे । । मध्ये । अन्तरेति । इणगतौ । विच् ॥

अन्तरेण । । विनार्थे । मध्यार्थे । अन्तरेति । इणोणः ॥

अन्तर्गडुः । त्रि । निरर्थके । रसौलीइति भाषायाम् ॥

अन्तर्गतम् । त्रि । मध्यप्राप्ते ॥ विस्मृते ॥ अन्तर्गम्यतेस्म अन्तर्गच्छतिस्म वा । गमःक्तगतौक्तः ॥

अन्तर्गृहम् । न । गृहमध्ये ॥

अन्तर्घनः । पुं । वाहीकग्रामविशेषे । ह न० । अन्तर्घनोदेशइतिहन्तेर्घनादेशोऽप् प्रत्ययश्चनिपातनात ॥

अन्तर्जठरम् । न । कोष्ठे । कुक्षिमध्ये ।

अन्तर्जलम् । न । अन्तर्जलसाध्येऽघमर्षणपादौ ॥

अन्तर्ज्योतिः । न । अन्तरात्मनि ।

अन्तर्दधनम् । न । मध्यलोपे । किरेव । इतिशब्दचन्द्रिका ॥

अन्तर्दाहः । पुं । कोष्ठसन्तापे । शरीरा
भ्यन्तरज्वालायाम् ॥
अन्तर्दी । स्त्री । अन्तर्दाने । व्यवधायाम् ।
अन्तर्दानम् । डुधाञ् । अन्तःशब्द
स्याङ्किविधिणत्वेषूपसर्गत्वाद्दान-
स्योपसर्गदत्त्वड् ॥
अन्तर्दानम् । न । अन्तर्दी । तिरोधाने
॥ शरीरत्यागे ॥
अन्तर्हिः । पुं । पिधाने । व्यवधाने ॥
अन्तर्धानम् । अन्तःशब्दस्याङ्किवि
धिणत्वेषूपसर्गत्वादुपसर्गघोः किरि
तिकिप्रत्ययः ॥
अन्तर्द्वारम् । न । गृहाभ्यन्तगूढद्वारे । प्र
च्छन्ने ॥ अन्तःस्थितंद्वारम् । शाकपा
र्थिवादिः । खिडकीतिख्याते ॥ यथा ।
प्रच्छन्नमन्तर्द्वारत्वंपक्षद्वारंतदुच्यत
इतिशर्वरस्वामी ॥
अन्तर्भूतः । त्रि । मध्यस्थिते । अन्त
र्गते ॥
अन्तर्मनाः । त्रि । व्याकुलचेतसि । दुः
खितमनसि । दुर्मनसि । विमनसि ॥
अन्तर्मनोऽस्य ॥
अन्तर्यामी । पुं । वायौ । यथा । अन्तःप्र
विश्यभूतानियोयमयत्यात्मकेतुभिः ।
अन्तर्यामीश्वरः साक्षात्पातुनोयद
शेरुटमिति । केतुभिः प्राणादिवृ
त्तिभिः । ईश्वरे । मत्यलक्षे । अन्त

अन्तर्वे
रनुप्रविश्यसर्वेषांभूतानांनियन्तरि ।
सूत्रात्प्यान्तरंतत्त्वमन्तर्यामाख्यमु
च्यते । त्रि । अन्तर्गे । मनोगतत्वे ।
अन्तर्वंशिकः । पुं । अन्तःपुराधिकृते ।
कुब्जवामनादिजने ॥ अन्तरभ्यन्तरो
वंशोगृहम् । अन्तर्वंशेनियुक्तः । तत्र
नियुक्तइतिठक् । संज्ञापूर्वकत्वान्नवृ
द्धिः ॥ यद्वा अन्तर्वंशोऽस्यास्ति अतइ
तिठनाविनिठन् ।
अन्तर्वती । स्त्री । गर्भिण्याम् । अन्तरस्य
स्यागमइतिविग्रहे अन्तःशब्दस्याधि
करणप्रधानत्वेन प्रथमासमर्थत्वाभा
वादस्तिनास्तामानाधिकरण्याऽसम्भ
वादमाङ्गोमतुप् अन्तर्वत्पतिवतोनु
नित्यमेननिपात्यते नुगागमश्चवि
धीयते ततश्चस्त्रेभ्य इतिङीप् ।
अन्तर्वसिः । पुं । अजीर्णे । अपाके । इ
तिविकाण्डशेषः ॥
अन्तर्वाणिः । त्रि । शाखचे । अन्तर्वाण्य
स्य । समासान्तविधेरनित्यत्वान्नवृत
श्चेतिनकप् । णेश्चियोरितिश्नम्भः ।
यद्वा । अन्तर्वाणयति । प्रणशब्दे । स्वा
र्थेणिजन्तादिचप्रः ।
अन्तर्विगाहः । पुं । प्रवेशे ।
अन्तर्विगाहनम् । न । प्रवेशने ।
अन्तर्वेदी । स्त्री । नीपूदन्त रे । प्रयाग्य
व्याम् । हरिद्वारादारभ्य प्रयागपर्य

अन्ति

न्तेदेशे इतिविकाण्डशेषः ॥ अन्तर्हासः पुं । उद्बन्धने । गूढहास्ये ॥ अन्तर्हित । तद्धिति । त्रि । संवीते । तिरोभूते ॥ अन्तर्धीयतेस्म । डुधाञ्° । क्तः । दधातेर्हिः ॥ अन्तवत् । त्रि । विनाशिनि । अन्तोऽस्त्यस्यार्थे मतुप् ॥ अन्तश्चरः । पुं । कालानले ॥ अन्तवासी । पुं । शिष्ये ॥ अन्ते समीपे वस्तुंशीलमस्य । सुपीतिणिनिः ॥ अन्तश्या । स्त्री । मृतौ । भूमिशय्यायाम् ॥ पिष्टकानने ॥ अन्ते शय्या । अन्तंसद् । पुं । अन्तेवासिनि । अन्ते अन्तिके सीदति । पदरुजविशस्पृशेतिक्विप् ॥ अन्तस्था । स्त्री । पुं । यरलवेषु ॥ अन्तःस्पर्शोष्मणोर्मध्येतिप्रति° । सुपिस्थ इतिवः । टाप् । खपरेऽरिवेतिविसर्गलोपः ॥ अन्तस्थीयः । त्रि । अन्तस्थेषुभवे । गहादित्वाच्छः ॥ अन्तावसायी । पुं । श्वपचे । मुनिभेदे ॥ नापिते ॥ नेखानां अन्तमवसातुं शीलमस्य । यौन्तकर्मणि वैद्यत्वेवा । सुपीतिणिनिः । आतोयुक् ॥ अन्ति । त्रि । समीपे । यया । मुख्यमभीतव

अन्त्य

दुपेयतुरन्तिमावोरितिभागवतम् ॥ अन्तिः । स्त्री । नाड्योक्त्याज्येष्वभिन्याम् ॥ अन्तिकम् ॥ त्रि । निकटे । अन्तोऽस्यास्ति । अतइनिठनावितिठन् ॥ अन्त्यतेऽच । अतिबन्धने । ण्वुल्वा । नौ । सामीप्येइतिधरणिः ॥ अन्तिकतमः । त्रि । अत्यासन्ने । नेदिष्ठे ॥ अतिशयेनान्तिकम् । अतिशयेनेतमबिष्ठनाविततमप् ॥ अन्तिका । स्त्री । ज्ञातलौषधौ । चुञ्चायाम् । नाड्योक्त्याज्येष्वभिन्याम् । अन्तोऽस्याअस्तिठन् । अन्त्यतेचवा । अतिबन्धने । ण्वुल् । प्रत्ययस्थादितीत्वम् । समीपवर्त्तिन्याम् ॥ अन्तिकाश्रयः । पुं । समीपस्थावलम्बने । उपज्ञे । अन्तिकेआश्रीयते आश्रयणं वा । अर्चः ॥ अन्तिमः । त्रि । चरमे । अन्तभवे । परस्मिन् । अन्तभवः । अन्ताड्डेतिडिमच् ॥ अन्तेवासी । पुं । शिष्ये । अन्तेसमीपे वस्तुंशीलमस्य । सुपीतिणिनिः । अयवासेत्यलुक् ॥ चण्डाले । ग्रामादेरन्तेवसति । प्रान्तगे ॥ अन्त्यः । पुं । चण्डाले । मुस्तायाम् ॥ त्रि । अधमे । अन्तभवे । चरमस्थे ।

अन्त्याव

न । रेवतीनक्षत्रे । मीनराशौ । द्व
यजलधिसंख्यायाम् । सहस्रलक्षको
टी १००००००००००००। अन्ते
भवः । दिगादित्वाद्यत् ॥ द्वादश
लक्षेपि ।

अन्त्यजः । पुं । स्त्री । शूद्रे । नीचजातौ ।
यथा । रजकश्चर्मकारश्च नटो वरुड
एवच । कैवर्त्तमेदभिल्लाश्च सप्तैते
अन्त्यजाःस्मृता इतियमः ।

अन्त्यजन्मा । पुं । स्त्री । शूद्रे ।

अन्त्यजातिः । पुं । चण्डालादिसंसु ।
यथाहापस्तम्बः । अन्त्यजातिरविद्या
तो निवसेद्यस्यवेश्मनि । सवैश्यत्वो
तुकालेनकुर्यात्ततव विशोधनम् । चा
न्द्रायणंपराकोवा द्विजातीनांविशो
धनम् । प्राजापत्यश्चशूद्राणां तथासं
सर्गदूषणे ॥ यैस्तुभुक्तंपक्वान्नंकृच्छ्रते
षांविनिर्दिशेत् । तेषामपिचयैर्भुक्तं
तेषामर्द्धंविधीयते । तेषामपिचयै
र्भुक्तंकृच्छ्रपादोविधीयत इतिप्रायश्चि
त्ततत्त्वम् ।

अन्त्यभम् । न । मीनराशौ । रेवतीन
क्षत्रे ।

अन्त्यवर्णः । पुं । स्त्री । शूद्रे । अन्त्यश्चा
सौवर्णश्च । पुं । अन्तिमाचरे ॥

अन्त्यावसायी । पुं । स्त्री । चण्डालेन
निषाद्यांजनिते । यथा । निषादस्त्री

अन्दुवः

तु चण्डालात्पुंसमन्त्यावसायिनम् ।
श्मशानगोचरं सूतेवाह्यानामपिग
र्हितम् । इतिमनुः ॥ चण्डालादि
संसर्गजातिपु । यथा । चण्डालः श्व
पचः चक्कासूतोवैदेहकस्तथा । मागं
धायोगवैचैवसप्तैतेऽन्त्यावसायिनः
इत्यङ्गिराः ॥

अन्त्येष्टिः । स्त्री । शवदाहादिक्रियारू
पे चरमसंस्कारे । अन्त्या चासावि
ष्टिश्च ।

अन्त्रम् । न । पुरीतति । अमति अने
नवा । अमगतौ । सर्वधातुभ्यः ष्ट्रन्
॥ यद्वा । अमिचिमिदिशसिभ्यः क्रः ।
संज्ञापूर्वकत्वान्नदीर्घानुनासिकलो
पौ ॥ कन्तितिवा । अतिबन्धने । ष्ट्रन्
॥ उक्ताः सार्द्धास्त्रयोव्यामाः पुंसामं
त्राणिसूरिभिः । अर्द्धव्यामेनहीनानि
योषितोऽन्त्राणिनिर्दिशेदितिवैद्याः ॥

अन्त्रवृद्धिः । स्त्री । पुं । रोगविशेषे ।

अन्त्रमांसम् । न । आन्त्रिके ॥ यथा । आ
न्त्रिकंछिद्रमार्गेणधौतं निर्मलवारि
णा । तस्यखण्डान् संविधायघृतेसंवार
युतान् पचेत् । निःसारंविरसोद्गार
मान्त्रमांसमुदाहृतमिति ।

अन्दुकः । पुं । हस्तिनिगडे । पादकटके
। अनद्यतेऽनेन । अदिबन्धने । अ
न्दूदृन्भूजम्बितिकुः । स्वार्थेकः । स्वा

र्थिका: प्रकृतितोलिङ्गवचनान्यति-
वर्त्तन्तेपीति पुंस्त्वम् । यद्वाविनयादि
त्वाट्टक् । इसुसुक्तान्तात्कः । केणेति
ह्रस्वः । इकोह्रस्वोऽयोगालक्षणेतिषा
॥ यद्वा । अन्दूशब्दात् संज्ञायांकन् ।
केणदतिह्रस्वः ।
अन्दूः । स्त्री । निगडे । स्त्रीपादभूषणे ।
अन्द्यतेऽनेन । अदिबन्धने । अन्दूट
न्भितिकूः ॥
अन्धः । पुं । न । तिमिरे । अदर्शनात्म
काज्ञाने । वि । अदृशि । चक्षुर्हीने ।
पुं । भिक्षौ । यथा । तिष्ठतो व्रजतो
वापियस्यचक्षुर्नदूरगम् । चतुर्युगांभु
धेंसुक्षापरिवादसोऽन्धइत्युच्यतेऽति ॥
राशिविशेषे । यथा । मेषोवृषोमृगे
न्द्रश्चदिवान्धाःपरिकीर्त्तिता: । तथु
ककर्कटकन्याश्चराशावन्धाःप्रकीर्त्तिता:
इति ॥ अन्धयति । अन्धदृष्ट्युपघा-
ते। पचाद्यच् ॥
अन्धक: । पुं । दैत्यविशेषे । देशभेदे ॥
नृपान्तरे ॥ मुनिविशेषे । यादवप्र
भेदेषु । हिरण्याक्षसुते ।
अन्धकरिपुः । पुं । शिवे ॥ अन्धक
स्यदैत्यस्यरिपुः ॥ श्वेषकाद्यादान्धव
कारनाशकत्वात् । सूर्य्ये । चन्द्रमसि ।
अमौच ॥
अन्धकवर्त्तः । पुं । पर्वतान्तरे ॥

अन्धकान्तकः । पुं । शिवे ॥ अन्धकस्य
अन्तकः ॥
अन्धकारः । पुं । न । तेजसामान्यभा
वे । ध्वान्ते ॥ महाप्रभाच्छादकच्छन्ना
भावो ऽन्धकारइतिसामान्यलक्षणा
योजगदीशः । भयदृष्टितेजोवरोध
कारित्वं तिक्तत्वं सर्वव्याधिकरत्वञ्चे
त्यस्यगुणाइतिराजवल्लभः । मिथ्या
प्रत्ययलक्षणे स्वविषयावरणे तदुपा
दानाज्ञाने ॥ अन्धदृष्ट्युपघाते । चु
रादिः । अन्धनम् । घञ् । अन्धंकरो
ति कर्मण्यण् ॥
अन्धकारिः । पुं । हरे । शिवे । अन्धक
स्यअरिः ॥
अन्धकासुहृत् । पुं । ईश्वरे । शिवे । अ
न्धकासून् हरति । क्विप् ॥
अन्धकूपः । पुं । कर्करान्धुके । सान्धका
रकूपे ॥ मोहे । नरकविशेषे ॥ अंध
स्यासौ कूपश्च ॥
अन्धतमसम् । न । गाढान्धकारे । अ
न्धयति । अन्धदृष्ट्युपघाते चुरादिः
। अच् । अंधश्चतत्तमश्च । अवसमन्धेभ्य
स्तमसदृत्यच् ॥
अन्धतामिस्रः । पुं । अभिनिवेशे ॥ स
चाष्टादशविधः । तथाहि । देवाः
खल्वणिमादिकमष्टविधमैश्वर्यमासा
द्यदशशब्दादीन् भुञ्जानाःशब्दादयो

अन्धुः

भोग्यास्तदुपायांश्चाणिमादयोऽस्मा
कमसुरादिभ्योपघातिभ्यस्त्रायतेतिविभर्यति
तदिदंभयमभिनिवेशोन्धतामिस्रो-
ष्टादशविषयत्वादष्टादशधेतिसां-
ख्याः॥ न। निबिडान्धकारमये नरक
विशेषे॥ पञ्चमकाराज्ज्ञानान्तर्गता
ज्ञानविशेषे। सचविशेषोयथा। देह
नाशे अहमेवमृतोस्मीतिबुद्धिः॥

अन्धमूषिका। स्त्री। देवताडे॥

अन्धवर्त्मी। पुं। वायोःसप्तमेस्कन्धे।
यथा। मरुदिन्द्रःसरभसःसामञ्जोमा
नुषोतिपाः। देवीविशेोन्धवर्त्माचक्ष
न्धः सप्तमआश्रुवादिति ७॥

अन्धः। न। ओदने। अद्यते। अदभ
क्षणे। अदेर्नुम् धौचेत्यसुन्। अन्ध
यतिवा अन्धदृष्युपघाते। असुन।

अन्धातमसम्। न। अत्यन्धे। अन्धा
भकारे॥ अन्धश्च तत्तमश्च। अव
समन्धे भस्तमस इत्यच्। अन्धेयाम
पीतिद्वीषः॥

अन्धाहिः। पुं। कुंचियाहतिगौडप्रसि
द्धे सर्पभेदे। इतिशिकाण्डशेषः॥

अन्धिका। स्त्री। द्यूतभेदे। रजन्या
म्। सर्षप्याम्। सिंहास्यौषधौ॥
स्त्रीविशेषे। क्षुद्रपोरोगविशेषे॥

अन्धुः। पुं। कूपे। अन्यते। अनग
च्यादौ। अन्धिदृशिकम्यमीति कु

अन्धेका

धुंक्च॥ यद्वा। अन्धयति। अन्धदृ-
ष्ट्युपघाते॥ मृगय्वादित्वात्कुः॥

अन्धुलः। पुं। शिरीषवृक्षे॥

अन्ध्रः। पुं। वैदेहेन कारावरस्यस्त्रिया
मुत्पादिते अन्त्यजविशेषे। देशविशे
षे॥ यथा। जगन्नाथादूर्द्धभागमर्वाक्
श्रीभ्रमरातिकात्। तावदन्ध्राभि
धोदेशः प्रोक्तःश्रीशक्तिसङ्गमे॥

अन्नम्। न। भक्ते। ओदने। स्विन्नतण्डु
ले॥ यथा। सस्यंचेवगतंमाहुःसतुषं
धान्यमुच्यते। आमंवितुषमित्युक्तं
स्विन्नमन्नमुदाहृतमिति वसिष्ठः॥
अन्नोहियवादौ॥ भक्ष्यभोज्यलेह्यचो
ष्यभेदाच्चतुर्विधमन्नंभवति॥ पृथि-
व्याम्। उपकरणे। औपचारिकम
र्थंगृहीत्वा दृष्टश्चोपकरणेऽन्नशब्दः
। यथा स्त्रियोन्नम् पशवोन्नम् विशो
न्नं राज्ञामित्यादौ॥ पि। भुक्ते।
अनिति। अन्यतेनेनया। अनप्राणने।
कृवृजसिदृपन्यनिस्वपिभ्योनिदितिन
न्॥ यद्वा। अद्यतेस्म। अदभक्ष
णे। क्तः। अन्नाना इतिनियातनात्यद्धु
संतणीतिया न जणिः। यद्वा। अत
ति। अतन्। धापृवस्यज्वतिभ्योनद्
तिन्॥

अन्नकोष्ठकः। पुं। तण्डुलादिरक्षण
स्थाने॥ गोम्मटतिकाण्यांयस्यप्रसि

अन्नम

हिः ॥ इतिहेमचन्द्रः ॥
अन्नगन्धिः । पुं । अतिसारे । उदरामयरोगे ॥ इतिविकाण्डशेषः ॥ अन्नस्येगन्ध इव गन्धोऽस्य । उपमानात्वे तीत्वम् ॥
अन्नदः । त्रि । अन्नदातरि ॥
अन्नदा । स्त्री । अन्नपूर्णायांदेव्याम् ॥
अन्नदाता । पुं । प्रभौ ॥ अन्नस्यदातरि ॥
अन्नपूर्णा । स्त्री । स्वनाम्नाऽतिप्रसिद्धायांदेव्याम् ॥
अन्नपूर्णास्थानम् । न । काश्याम्प्रसिद्धे सिद्धिस्थाने ॥
अन्नप्राशनम् । न । अन्नाशने । यथाविधिबालकस्य प्रथमान्नभोजने । षष्ठे अष्टमे वा मासि बालकस्य पञ्चमे सप्तमे वामासि वा स्त्रिकायाः प्रथमान्न भक्षणरूपसंस्कारइतिस्मार्त्ताः ॥ अन्नस्यप्राशनम् यस्मिन्नतत् ।
अन्नमय । पुं । स्थूलशरीरे । प्रथमकोशे ॥ यथा । पिण्डभुक्तान्नजातीर्याज्जातो ऽन्नेनैववर्द्धते । देहःसोऽन्नमयोनात्मा प्राकोऽङ्गंतदभावतइति ॥ अन्नस्यविकारःमयट् ॥ यद्वा । प्रकृतमन्नम् । अन्नं प्रकृतमुच्यतेऽस्मिन् वा । तत्प्रकृतवचनेमयट् ॥ स्थूलसमपञ्चाम् । पञ्चीकृतपञ्चमहाभूततत्कार्यात्मके विराडमूर्त्तौ ॥

अन्यत

अन्नविकारः । पुं । रेतसि । शुक्रे । इतिराजनिर्घण्टः ॥
अन्नादः । त्रि । अन्नस्यभोक्तरि ॥ अन्नमत्तीतिविग्रहेकर्मण्यण् ॥ दीक्षायां ॥ आमयाविक्लेदरहिते ॥ पुं । विष्णौ ॥
अन्नाशनम् । न । अन्नप्राशने ॥
अन्यः । त्रि । असदृशे । इतरस्मिन् । भिन्ने । अत्यन्तविलक्षणे । सदृशे । अनिति । अनप्राणने । अदभ्रादित्वाद्यः ॥
अन्यत् । । अन्यार्थे ॥
अन्यतमः । त्रि । भिन्नतमे । बहूनां मध्येनिर्द्धारिते कस्मिन् ॥ न्यायमते अनेकभेदावच्छिन्नप्रतियोगिताकभेदे । अव्युत्पन्नोयम् ॥
अन्यतरः । त्रि । निर्द्धार्ये । द्वयोर्बहूनांमध्ये निर्द्धारितैकस्मिन् ॥ निर्धारणेऽतरच् ॥ न्यायमते द्वयावच्छिन्नप्रतियोगिताकभेदे । सिद्धान्तमते त्वल्पाच्तरादिषूपपन्नार्थकेषु ॥ अन्यएव । अन्यतरत्वंचतत्तस्मिन्नतिवत्स्वार्थेतरप् । असदृत्वच् ॥
अन्यतरेद्युः । । अन्यतरदिवसे । अन्यतरस्मिन्नहनि । सद्यः परुदित्या

अन्यथा

दिनान्यतरशब्दादेषुसप्तम्यर्थेनि-
पातितः ॥ ... ॥ ... ॥
अन्यतः ॥ ... ॥ अन्यत्रार्थे ॥ अन्यस्मात् ॥
तसिल् ॥ ... ॥ ... ॥
अन्यतरस्यजायौ ॥ त्रि ॥ सपत्नजयशीले ॥
अन्यत्व ॥ ... ॥ व्यतिरेके ॥ अन्यस्मिन् ॥
त्वल् ॥ विनार्थे ॥ यथा ॥ अन्यत्वनिघ
नात्पत्युः पत्नी केशान्नवापयेत् इति
॥ स्थानान्तरे ॥ ... ॥ ... ॥ ... ॥
अन्यथा ॥ ... ॥ वितथे ॥ अपरार्थे ॥ दुष्टे ॥
अन्येनप्रकारेण ॥ प्रकारवचनेथाल् ॥
अन्यथासिद्धिः ॥ स्त्री ॥ कार्य्योव्यवहित
पूर्ववर्त्तित्वेसतिकार्य्यानुत्पादकत्वे ॥
सापञ्चविधा ॥ यथा यत्कार्य्यम्प्रति
कारणस्यपूर्ववर्त्तिता येनरूपेण गृ-
ह्यते तत्कार्य्यम्प्रति तद्रूप अन्यथा
सिद्धम् ॥ यथा घटं प्रति दण्डत्वम् ॥
१ ॥ यस्येस्वातन्त्र्येण अन्वयव्यतिरे
कौ नस्तः किंतु कारणमादायान्वय
व्यतिरेकौ तदन्यथासिद्धम् ॥ यथा
घटं प्रतिदण्डरूपम् ॥ २ ॥ अन्यम्प्र
तिपूर्ववर्त्तितां गृहीत्वैवयस्य यत्का
र्य्यंप्रति पूर्ववर्त्तित्वं गृह्यते तस्य त
त्कार्य्यंप्रति अन्यथासिद्धत्वम् ॥ यथा-
घटादिकं प्रतिआकाशस्य ॥ ३ ॥ यत्
कार्य्यजनकं प्रति पूर्ववर्त्तित्वंगृहीत्वै
व यस्य यत् कार्य्यं प्रति पूर्ववर्त्तित्वं

अन्यव

गृह्यते तस्य तत्कार्य्यंप्रति अन्यथा
सिद्धत्वम् ॥ यथा कुलालपितुर्घटम्प्र
ति ॥ ४ ॥ अवश्यकृत्सनियतपूर्ववर्त्ति
नएव कारणत्वसम्भवे तद्भिन्नमन्यथा
सिद्धम् ॥ यथा घटम्प्रति रासभादि
रितिसिद्धान्तमुक्तावली ॥ ५ ॥ यस्य
कारणत्वकल्पनाविनाप्यन्यप्रकारेण-
कार्यसिद्धिर्भवेत् सोऽन्यथा सिद्धः तद्भा
वोऽन्यथासिद्धिः ॥ ... ॥ ... ॥
अन्यदा ॥ ... ॥ कालान्तरे ॥ अन्यस्मिन्का
ले ॥ सर्वकान्यकिंयत्तदः कालेदा ॥
अन्यपूर्वा ॥ स्त्री ॥ पौनर्भवायां कन्याया
म् ॥ एकस्मैवागादिनादत्तायांपुनर
न्येनविवाहितायां कुमार्याम् ॥ सा-
सप्तधा ॥ यथा ॥ सप्तपौनर्भवाःकन्या
वर्ज्जनीयाः कुलाधमाः ॥ वाचादत्ता
मनोदत्ता कृतकौतुकमङ्गला ॥ उ
दकस्पर्शिता याच यायेचपाणिगृहीता
का ॥ अग्निंपरिगतायानुपुनर्भूमस
वाचया ॥ इत्येताः कथ्यपेनोक्ता दह
न्तिकुलमग्निवत् ॥ इत्युद्वाहतत्त्वम् ॥
अन्यभृत् ॥ पुं ॥ काके ॥ इति हेमचन्द्रः ॥
त्रि ॥ परेषांपोषके ॥ अन्यंबिभर्त्ति
डुभृञ् ॥ क्विप् ॥
अन्यभृतः ॥ पुं ॥ कोकिले ॥ अन्येनभृतः
॥ इतिहलायुधः ॥
अन्यवर्द्धितः ॥ त्रि ॥ अन्येन प्रतिपालिते

अन्याभुः

। अन्यपुष्टे । पुं । कोकिले ॥ अन्येन दर्शितः ॥

अन्यवादी । त्रि । अन्यथावादिनि । अस्थिरवादिनि । व्यवहारेपञ्चविधहीनजनान्तर्गतहीनविशेषोयम् । यथा । अन्यवादीक्रियावादेषीनोपस्थायीनिरुत्तरः । आहूतप्रपलायीचहीनः पञ्चविधः स्मृतइतिनारदः ॥

अन्यशाखकः । पुं । शाखारण्डे । स्वशास्त्रमुत्सृज्यान्यशास्त्रोक्तकर्मकारिणि ॥ अन्याशाखा यस्यसः । कप् ॥

अन्यादृक् । त्रि । अन्योपमे । अन्यप्रकारे । अन्यइवदृश्यते । दृशिर्प्रेक्षणे । त्यदादिषु दृशइतिक्विन् । आसर्वनाम्नः ॥

अन्यादृशः । त्रि । अन्योपमे । अन्यप्रकारे । अन्यइवपश्यति दृश्यतेवा । दृशिर्० । त्यदादिष्विति कञ् । आत्वम् ॥

अन्यायः । पुं । अविचारे । परस्वहरणादौ ॥ न्यायभिन्ने । अनौचित्ये । यथा । अन्यायेनापियद्वृत्तं पितापूर्वैतरैरपि । नतच्छक्यमपाकर्तुं क्रमात्त्रिपुरुषागतमितिनारदः ॥ नन्यायः ॥

अन्याय्यम् । त्रि । अयोग्ये ॥ यथा । दृष्टार्थसत्त्वेऽदृष्टकल्पनायाअन्याय्यत्वमिति ॥ नन्याय्यम् ॥

अन्याय्य

अन्येद्युः । ।। दिवसान्तरे ॥ अन्यस्मिन्हनि । सद्यःपरुदित्यन्यशब्दादे द्युस् मत्ययेनिपातितः ॥

अन्येद्युष्कः । पुं । विषमज्वरविशेषे ॥ यथा । अन्येद्युष्कस्त्रिरात्रादेकका लं प्रवर्त्ततइति । एककालंदोषामे त्यथा एककालमपि द्वितीयं प्रथम कालेऽवेषदोषस्थितेः ॥

अन्योदर्यः । पुं । स्त्री । वैमात्रेये ॥

अन्योन्यम् । त्रि । परस्परार्थे । अर्थालङ्कारविशेषे ॥ यथा । क्रियायातुपरस्परं वस्तुनोर्जननेऽन्योन्यम् । अर्थयोरेकक्रियामुखेनपरस्परं कारणत्वेसत्त्यन्योन्यं नामालङ्कारः । उदाहरणम् । हंसाणं सरेहिं सिरीसारिज्जइ अअहसराणं हंसेहिम् । अम्हेत्थवि अ एए अप्पाणं णवरंगइअन्ति ॥ अस्य संस्कृतंयथा । हंसानांसरोभिःश्रीःसारीक्रियते अथसरसांहंसैः । अन्योन्यमेवएतेआत्मानंकेवलंगुरूकुर्वन्तीति ॥ श्रीः शोभा सारीकरणं श्रेष्ठता सम्पादनम् । अत्रसरोहंसयोः परस्परंशोभाधुरीकरणरूपोपकारजनकत्वंक्रियया नामालङ्कारः ॥ अत्रोभयेषामपि परस्परजनकता श्रियः श्रीसारतासम्पादनद्वारेण ॥ कर्म्मव्यतिहारे सर्वनाम्नोद्वेभवतइतिद्विचम् ॥

अन्योन्या

असमासवद्भावेपूर्वपदस्यसुप्सुर्वक्तव्यः ।

अन्योन्यदृश्यः । त्रि । इतरेतरग्राह्ये ।

अन्योन्याध्यासः । पुं । अन्योन्यस्मिन्नन्यो न्यात्मकतामन्योन्यधर्मांश्चेत्यार्थे निरूपितेतादात्म्याध्यासे । यथा । ज लबुद्बुदाघटाकाशेयथासर्वस्मिंस्तादात्म्येऽधि तः । तथाजीवेनकूटस्थः सेन्योन्या ध्यासउच्यत इति ।

अन्योन्याभावः । पुं । तादात्म्यावच्छिन्न प्रतियोगितांके । यथाघटःपटोन भवतीति ।

अन्योन्याश्रयः । पुं । अन्योन्यापेक्षे । स्व ग्रहसापेक्षग्रहसापेक्षग्राहके इतिता र्किकाः । तर्कविशेषे । सचात्माश्र यसक्षेपा । तस्यलक्षणम् । स्वापेक्षापे क्षित्वनिबन्धनोऽनिष्टप्रसंगोऽन्योन्या श्रयः । अपेक्षाच ज्ञप्तौ । उत्पत्तौ स्थि तौचग्राह्या । तत्राद्या यथा । घटोयं यद्येतद्घटज्ञानजन्यज्ञानविषयःस्या त् तदैतद्घटभिन्नः स्यात् । द्वितीया यथा । घटोयं यद्येतद् घटजन्यजन्यः स्यात् तदैतद् घटजन्यभिन्नःस्यात । तृतीया यथा । घटोयं यद्येतद्घट वृत्तिवृत्तिःस्यात् तयाचैनोपलभ्येत इतिजगदीशः । परस्परज्ञानसापेक्ष ज्ञानाश्रयोऽन्योन्याश्रयइतिमाथुरीः

अन्वय

। अन्योन्यस्याश्रयः ।

अन्वक्षम् । वि । अनुगामिनि । अनु यदे । अनुगतमक्षमिन्द्रियम् । पृषो दरे ।

अन्वक्षम् । । । अक्ष्णोः समीपे । अनु यत्समयेव्ययंयीभावः । प्रतिपरसम नुभ्योऽक्ष्णइति समासान्तिष्टच् ।

अन्वक् । वि । अनुगे । अन्वञ्चे । अन्व ञ्चति । अञ्चुगतौ । क्विन् ।

अन्वयः । पुं । सन्ततौ । कुले । यदा नांपरस्परेण सम्बन्धे । यथा । विशे षणंपुरस्कृत्य विशेष्यं तदनन्तरम् । क्रियांक्रमेक्रियायुक्तमेतदन्वयलक्षण मिति । अनुगमे । अनुवृत्तौ । का र्यैकारणानुवृत्तौ । तत्रात्तांनियत सत्ताकत्वे । द्रव्यस्यात्मना सम्बन्धे । अन्विष्यते । इगतौ । इण्गतौवा । एरच् ।

अन्वयव्यतिरेकि । वि । अन्वयेन व्यति रेकेणचव्याप्तिमतिहेतौ । यथा य न्हौ साध्येधूमयत्त्वम् यत्रधूमस्तत्रा ग्निरित्यन्वयव्याप्तिः । यत्रयत्रनाग्नि स्तत्रधूमोनास्तीतिव्यतिरेकव्या प्तिः । यथा महानसह्रदादौ । अ न्वयव्यतिरेकौस्तोऽस्मिन् । इनिः ।

अन्वयव्याप्तिः । स्त्री । यत्रधूमस्तत्राग्नि रित्येवंरूपायांव्याप्तौ । यथा महान

अन्वादे

से । अन्वयेनव्याप्तिः ॥

अन्वयसर्गः । पुं । कामचारानुज्ञायाम् ।
अन्वयसर्जनम् । सृजेर्घञ् ।

अन्वयायः । पुं । वंशे ॥ कुले । अन्वयाय्यते । अयगतौ । घञ् ॥

अन्वष्टका । स्त्री । साग्नीनामावश्यकेऽन्वा
हार्यकेऽष्टकाविशेषे । अष्टकापशब्दात्तिस्रो
। सातृगोगाचान्द्रपौषमाघफाल्गुना
श्विनमासानां कृष्णनवमीतिथयो
साग्नीनामाद्धकेऽन्वाहार्यश्राद्धमिति श्राद्धवि
षेकः ॥

अन्वष्टम् । अन्वष्टमित्यर्थे ।

अन्वाजे । दुर्बलस्य सामर्थ्याधाने ।
सप्तम्यन्तप्रतिरूपकोऽयंनिपातः ।

अन्वाजेकृत्य । । दुर्बलस्यबलमाधा
अन्वाजेकृत्वा । येत्यर्थे । उपाजे
अन्वाजे इतिगतिसंज्ञा । कुगतीतिस
मासः ।

अन्वाधयः । पुं । चार्थविशेषे मुख्यसि
द्धावप्रधानानिष्पत्तौ । यथा भिक्षोमा
ट्गाश्चानयेति । एकस्यमाधान्यादनु
रोधेनेतरदन्वाचीयते । चीञ् ।
कर्मण्येरच् ॥

अन्वादेशः । पुं । किञ्चित्कार्यंविधायानु
मुपात्तस्य कार्यान्तरंविधातुंपुनरुपा
दानमन्वादेशइतिसञ्चिते कथिता
नुकथनमात्रे । यथा । अनेनव्याकर

अन्वास

णमधीतम् । एनंछन्दोऽध्यापयेति ।
अनयोः पवित्रंकुलम् अनयोः प्रभूतं
स्वमिति ॥

अन्वाधिः । पुं । एकस्मिन् यदर्पितंवस्तु
तेन पुरुषान्तरे अमुष्मिन् स्वामिनि
त्वं दास्यसीति यन्निक्षिप्तं तस्मिन्
। इतिविवादार्णवसेतुः । कार्येषु या
चनेन अमुष्मिन् पुरुषेत्वंदद्या इतिप
रिभाष्य यत्समर्पितं तस्मिन् ॥ यद्वा ।
अर्थमार्गणकार्येषु अन्यस्मिन् वचना
न्मम । दद्यास्त्वमितियोदत्तःसइहा
न्वाधिरुच्यते । इतिकात्यायनः । पु
नर्बन्धके । पश्चान्मानसीव्यथायाम् ।

अन्वाधेयम् । न । स्त्रीधनविशेषे । यथा
। विवाहात्परतोयत्तु लब्धंभर्त्रुकुचा
न्तस्त्रिया । अन्वाधेयंतदुक्तंतु लब्धंबन्धु
कुलोक्तयेति कात्यायनः । अन्यच्च ।
ऊर्ध्वंलब्धंतुयत्किञ्चित्संस्कारात्प्री
तितः स्त्रिया । भर्तुःपितुःसकाशाद्वा
अन्वाधेयंतुतद्गुरुरिति । बन्धुपदेन
मातापित्रोरुपादानम् ।

अन्वायत्तः । त्रि । अनुगते ।

अन्वारूढः । त्रि । अधिष्ठिते । अन्वाङ्
पूर्वात् रुहेर्गत्यर्थेतिकः । दत्त्वधत्त्व
ष्टुत्वढलोपदीर्घाः ।

अन्वासनम् । न । शुश्रूषणे । उपास्तौ ।
सेवायाम् । अनुशोचने । गिल्यादि

अन्वेष

गृहे । अनु असु॰ । ल्युट् ॥

अन्वाहार्य्यम् । न । मासिके । दर्शश्रा
द्धे । पितृयज्ञपिण्डानामनुपश्चात् आ
हियते ॥ हृञ् हरणे । कृञ्हलोर्ण्यत् ॥
यथा । पितृयज्ञन्तुनिर्वर्त्त्यविप्रश्चेन्दु
र्लभेऽभिमानें । पिण्डान्वाहार्यकंश्रा
द्धंकुर्यान्मासानुमासिकम् । पितॄणां
मासिकंश्राद्धमन्वाहार्यं विदुर्बुधाः । त
च्चामिषेणकर्त्तव्यंप्रशस्तेनप्रयत्नतः ॥
इतिमनुः । इष्टेर्दक्षिणायाम् ॥ अ-
न्वाहरणीयें ॥

अन्वाहार्य्यपचनः । पुं । दक्षिणाग्नौ ॥

अन्वाहितम् । वि । यदेकस्यहस्तेनिहि
तंद्रव्यं तेनाविपश्चाद्व्यस्यहस्तेस्वामि
नेदेहीति निहितम तस्मिन् द्रव्ये ।

अन्विच्छा । स्त्री । अन्वेषणे ॥

अन्वितम् । वि । मिलिते । युक्ते । अनु
गते । कृतान्वयेपदादौ ॥

अन्विष्टम् । वि । अन्वेषिते ॥ अन्विष्यते
स्म । इषइच्छायाम् । क्तः ।

अन्विष्यन् । वि । विचिन्वति ।

अन्वीक्षितम् । वि । विचारिते ।

अन्वीतम् । वि । अन्विते ॥ अनुगते ॥
अनुपूर्वादिण्गतावितिधातोःकर्मणि
क्तः ॥ पृषोदरादिः । ईड् गतावित्य
स्मादाक्तः ॥

अन्वेषणम् । न । अनुसन्धाने । गवेषि

अन्वेषक

ते । इषेरनिच्छार्थस्येतियुच् ॥

अन्वेषणा । स्त्री । अनुमार्गणे । गवेष
णायाम् । तर्कादिनायथावोधितथ
र्माद्यन्वेषणे । टाप् ॥

अन्वेषितम् । वि । गवेषिते ॥ अन्वेष्य
तेस्म । इषगतौ । इषिगत्यन्तोवा । क्तः ॥

अन्वेष्टव्यः । वि । ज्ञातव्ये । एषितव्ये ॥

अन्वेष्टा । वि । अनुपदिनि । अन्वेषण
कर्त्तरि । पैरन्नगावनेहारा इति
भाषा ।

आपः । स्त्री । भू॰ । नंते ॥ अंव्दस्पर्श-
रूपतन्मात्रसहितद्रसंतन्मात्रादुत्प-
न्नाः शीतस्पर्शवत्योद्रवाप्यः । आप्नुव
न्ति । आप्नुव्याप्तौ । आप्नोतेर्ड्व
प्रत्येतिक्विप् ह्रस्वश्चंच ।

अप । अ । अपकृष्टार्थे ॥ वर्जनार्थे । वि-
योगे ॥ विपर्यये । विकृतौ । चौर्ये
॥ निर्देशे । दर्शने । अपोवियोगेविकृ-
तौ विपरीते निदर्शने । आनन्दे वर्ज
ने चौर्ये वारणेसम्यगीरितः ॥ वियो
गे । अपयाति । विकृतौ । अपाकृत
वान् । विपरीते । अपगन्धः । निद
र्शने । अपदिशति । आनन्दे । अप
हसति । वर्जने । अपचितेर्शादृष्टो
देवः । चौर्ये । अपहरति ।

अपकर्म । न । दुष्क्रियायाम् । अपोव
र्जनेन कर्मशब्दस्य कर्मधारयः ।

अपक्रि

अपकर्षः । पुं । विद्यमानधर्मोपचये ॥ अपकृष्यते । कृषविलेखने । घञ् ॥ अपकारः । पुं । द्वेषे । अनिष्टे । अपकरणम् । कृञ् । घञ् ॥ अपकारकः । त्रि । अनिष्टकारिणि ॥ अपकरोति । कृ° । ण्वुल् ॥ अपकारगीः । स्त्री । भर्त्सने । अपकारार्थागीर्वाक् ॥ अपकारी । त्रि । धूर्ते । शठे । अपकारके । यथा । अपकारिणिचेत् क्रोधः क्रोधेकथंनते धर्मार्थकाममोक्षाणां चतुर्णां परिमन्थिनीति ॥ अपकुशः । पुं । दन्तरोगविशेषे । यथा । वेष्टेषुदाहःपाकस्तताभ्यां दन्तास्वेदन्तिच । अभ्याहताः प्रस्रवन्तिशोणितं दन्तवेदना ॥ आध्मायन्तेस्रुतेरक्तेमुखंपूतिचजायते । यस्मिन्सोपकुशोनामपित्तरक्तकृतोगदइति ॥ ७ ॥ अपकृतः । त्रि । अपकारिणि । न । अपकारे । मित्रस्यचैवापकृतेर्द्विविधो विग्रहःस्मृतइत्यत्र मित्रस्यापकारे इत्यर्थदर्शनात् ॥ अपकृष्टः । त्रि । अधमे । हीने । अपकृष्यतेस्म । कृषविलेखने । क्तः ॥ अपक्रमः । पुं । पलायने ॥ अपक्रमण म् । क्रमुपादविक्षेपे । घञ् । अक्रमे । अपक्रिया । स्त्री । द्वेषे ॥ अपकरणम् ।

अपचा

कृञः शब्देतिशः ॥ अपक्रोशः । पुं । निन्दने । जुगुप्सने । अपक्रोशनम् । क्रुशं° । घञ् । अपक्वम् । त्रि । अपरिणते । आमे । न पक्वम् । अपक्षेपणम् । न । अधोदेशसंयोगहेतौ कर्मविशेषे ॥ अपपूर्वात् क्षिपेर्ल्युट् ॥ अपगतः । त्रि । मृते । पलायिते । दूरीभूते । गते । अपगच्छतिस्म । ग, स्कृ° । गत्यर्थेतिक्तः ॥ अपगमः । पुं । अपगमने । गमेरप् । अपगा । स्त्री । नद्याम् । त्रि । अपगामिनि । अपगच्छति । गम्लृगतौ । अन्येभ्योपीतिडः । टाप् । अपघनः । त्रि । घनशून्ये ॥ पुं । हस्तपादाद्यङ्गेषु । अवयवे ॥ अपहन्यते । अपघनोङ्गमिति करणे ऽपघनादेशश्च ॥ अपघातः । पुं । अपहनने ॥ अपहननम् । हन्तेर्घञ् । हस्यघः । नस्यतः । अपचयः । पुं । क्षये । हानौ । अपहारे । अपचयनम् । चिञ्चयने । अरुर्द्विषदजन्तस्येति मुम् । अपचायितम् । त्रि । अर्चिते । अपचीयतेस्म ॥ चायृपूजानिशामनयोः । क्तः ॥ अपचारः । पुं । अहिताचरणे ॥ यथा । योनिप्रदोषाच्चभवन्तिभिन्ने मन्थोप

अपटी

दिदंशादिविधोपचारैरिति। व्रणाधर्मेण
तिकरे। दोषे। अविनये। [illegible]
अपचारिणी। स्त्री। अभिचारिण्याम्।
। अपचारोऽस्त्यस्या। इनि। [illegible]
अपचारी। त्रि। अपचारयति।
अपचितम्। त्रि। अर्चिते। हीने। व्य
यिते। अपचाय्यतेऽसौ। चायृपूजानि
। आमनयोः कर्त्तरि। चायतेश्चिरितिचि
भावः।
अपचितिः। स्त्री। पूजायाम्। व्यये।
निष्कृतौ। दानौ। अपचीयते अप
चाय्यतेऽसौ। अपचायनंवा। चायृ-
पूजादौ। क्तिन्। चायतेः क्तिनिचिभा
वेचेत्यच्। [illegible]
अपची। स्त्री। गण्डमालाया अवस्था
विशेषे। यथा। तेगंथयः केचिदथा
। पाकाः क्षयन्तिनश्यन्तिभवन्तिचा
न्ये। कालानुबन्धं चिरमाद्धातिसै
वापचीतिप्रवदन्तिकेचिदिति। ते
। न्येयः गण्डमालायाएवगण्डाः।
अपजयः। पुं। भङ्गे। पराजये।
यनम्। जिजये। अरघ्।
अपटान्तरम्। त्रि। आसन्ने। अव्यवहिते।
संसक्ते। पटेनतिरस्करिण्या अन्तरम्
। नपटान्तरमत्र।
अपटी। स्त्री। कार्पासपटे। वस्त्रमावरणे।
। कनात इतिभाषा। इतिहेमचन्द्रः।

अपत

तिवि। पटशून्ये।
अपटुः। त्रि। अचतुरे। कार्य्यादमे। प
टोरन्यः। रोगिणि। आमयाविनि।
अपतर्पणम्। न। रोगादौभोजनेनाभा
वे। सङ्घने। इतिहेमचन्द्रः। अप
पूर्वात् तृपेर्ल्युट्।
अपतानकम्। न। वायुरोगविशेषे। म
। तानेः। यथा। दृष्टिसंस्तम्भसंकोचव
। च्याकक्षेनकूजति। हृद्विमुह्येन्नरस्वा
स्थ्यंयाति मोहंवृतेपुनः। वायुनादा
। कृष्णं प्राहुरेके तदपतानकमिति।
अपत्यम्। न। सन्तानेदुहितरि। पुने
। नपतन्तिपितरोऽनेन। पत्लृग
। तौ। वाहुलकात्यत्। अघ्यादिषा।
। थेत्रिभिःसंयुक्तापतनंतत्तस्यांपत्थभि
तिपिण्डितोर्थः। तबाचपौत्रादिरपि
। पितासिद्धादीनामपतनेहेतुरिति ते
। यामपत्थंभवति।
अपत्यदा। स्त्री। सुभविशेषे। गर्भदा
। त्याम्।
अपत्यपथः। पुं। भगे। योनेः।
अपत्यशत्रुः। पुं। क्षुद्वीरे। कर्कटे।
अपत्रः। पुं। करीरे। निर्विन्ते। पत्रा
। णिनस्य। त्रि। पत्रहीने।
अपत्रपः। त्रि। निर्लज्जे। अपगता प
। त्रपायस्यसः।
अपत्रपा। स्त्री। परतोद्रियाम्। पिशु

अपदा

दः पुरतोजातसञ्ज्ञायाम् ॥ ह्री माधे ॥ इतिरत्नकोशः ॥ अपवर्पिष्णुः । त्रि । लज्जाशीले । स्वभावतः सत्रपे ॥ अपत्रपते । असंकुचितोष्णुच् ॥ अपथम् । न । । अमार्गे । पथोऽभावः । नञितितत्पुरुषः । पथोविभाषेतिपांचिकोऽप्रत्ययः ॥ अपथगामिगाहते मूढः । अपथंनपुंसकम् । तत्पुरुषइत्येव । अपदोदेशः । अप्रधान दी ॥ अपदे पदमर्पयन्तिहि श्रुतव न्तोपिरजोनिमीलिताः । योनौ ॥ अपन्थाः । पुं । अपथे । मार्गाभावे ॥ पथोऽभावः नञितितत्पुरुषः । अप थंनपुंसकमिति कृतसमासान्तस्यनि र्देशान्नञ्क्लीवत्वम् ॥ अपथ्यम् । त्रि । रोग्यभोज्ये । अहिते ॥ नपथ्यम् ॥ अपदस्थः । त्रि । स्वकर्मच्युते ॥ अपदानम् । न । वृत्तेकर्मणि । अव दाने ॥ दत्तिः प्रशस्तं साप्रशस्ता विद्यतेयत्र तत्र । यत्र कर्मणि दत्तिः सैः प्रशस्यते तस्मिन्नित्यर्थः ॥ दैप् शोधने । भावे ल्युट् ॥ निन्दादाने ॥ अपकृष्टंदानम् ॥ अपदान्तरम् । त्रि । अनन्तरे । अव्यव हिते ॥ नपदान्तरमत्र ॥

अपने

अपदिग्गम् । न । । दिक्कोणे । दिशो र्मध्ये ॥ विदिशि । दिशोर्मध्यम् । अ व्ययमिति योगविभागात्समासः । दिग्शब्देभ्यश्चरदादिषु पाठाट्टच् । अव्ययीभावश्चेतिसूत्राभ्यांक्लीवत्वा व्ययत्वयोर्विधानम् । तेननाव्ययीभा वादतोम्त्व पंचम्या इत्यादिप्रवृत्तिः ॥ अपेतिमध्यवाची आवन्तेन समा सेतु टज्नापेक्षितः ॥ अपदिष्टः । त्रि । प्रयुक्ते । यथाकथा च्चयापदिष्टः ॥ अपदिश्यते । दि शअतिसर्जने । क्तः ॥ अपदेशः । पुं । शरव्ये । लक्ष्ये । निमि त्ते ॥ व्याजे ॥ स्थाने ॥ अपदेशनम् । अपदिशते वा । दिश अतिसर्जने । घञ् ॥ अपध्वंसजः । पुं । वर्णसङ्करे । यथा । शूद्राणांतु सधर्माणः सर्वेऽपध्वंसजाः स्मृता इतिमनुः ॥ अपध्वस्तः । त्रि । परित्यक्ते । निन्दिते । अवधूर्णिते । अपध्वंसतेस्म । ध्वंसुअ धःस्रंसने गतौच । क्तः ॥ अपनयनम् । न । अधःप्रापणे । दूरीक रणे । खण्डने ॥ अपनीतः । त्रि । विनीते । छृते । अपनुतिः । स्त्री । अपनोदे । खण्डने ॥ अपनेयः । त्रि । अपनोद्ये । निरस्ये ॥

अपस्नेह

अपनोदः पुं। अपनोदने। अपनोदनम्। न। दूरीकरणे॥ अपपवित्रितः। त्रि। उत्कटदोषैर्जातिभिर्भिन्नोदकीकृते। यथा। अपपवित्रितस्यरिक्थपिण्डोदकानि निवर्त्तन्त इतिगङ्गाप्रस्तावे। अपभ्रंशः। पुं। अपशब्दे। अशास्त्रशब्दे। असंस्कृतशब्दे। ग्राम्यभाषायाम्। यथा हदण्डी। आभीरादिगिरःकाव्येष्वपभ्रंशइतिस्मृताः। शास्त्रेषुसंस्कृताद्यन्यदपभ्रंशतयोदितमिति। संस्कृताद्पभ्रश्यति। भ्रंशुअधःपतने। घञ्। भ्रंशः। पतने। यथा। अन्याकृतिर्भवति मद्यतामयप्य भ्रंशनिष्ठ्यभिधानमकृतज्ञता।

अपमः। पुं। क्रान्तौ। स्वर्यंगमनमार्गयोरित्यमरेखायाम्।

अपमानम्। न। अनादरे। अस्यपर्यायाः यथा। स्यादवज्ञापरीहारः परिहारः पराभवः। अपमानंपरिभवस्तिरस्कारस्तिरस्क्रिया। अवहेलावहेलास्यादवहेलनहेलने। चेयोनिकारधिक्कारौपर्यायाःस्युरनादरइतिशब्दरत्नावली। यथा। वेदस्यनाध्यायाना ध्यअपमानादधोगतिरिति।

अपमित्यकम्। न। ऋणे॥

अपमृत्युः। पुं। विनारोगेणमरणे।

अपर

पश्चिमत्वसङ्गदृष्टिपृक्त्रिनखिपतनानवज्ञाग्निविषबन्धनक्षयेष्वाप च तादृजन्यमरणे इतिकेचित्। अपकृष्टोमृत्युः।

अपसर्पितम्। न। अविस्पष्टवाक्ये।

अपयानम्। न। पलायने। यायापवे अपपूर्वः। ल्युट्।

अपरम्। नं। गतपश्चार्द्धे। त्रि। इतरस्मिन्। अर्वाचीने। निकृष्टे। द्रव्यादिसामान्ये। कार्ये। सन्निकृष्टे। परं नेभवतीत्यपरम्। पुं। पादःपश्चिमे। अपरःपश्चिमःपादः इतिगजप्रकरणे वैजयन्ती।

अपरक्तः। त्रि। अनमुकूले। विरक्ते।

अपरगोदः। पुं। गिरिविशेषे॥

अपरतिः। स्त्री। निवृत्तौ॥ अपरस्मैभावे क्विप्।

अपरत्र। ा। पश्चादर्थे॥

अपरत्वम्। न। अपरव्यवहारकारणे॥ तद्विविधम्। दिक्कृतं कालकृतंचेति। समीपस्थे दिक्कृतम्। अनिष्ठे कालकृतमिति। अपरस्यभावः।

अपरपक्षः। पुं। कृष्णपक्षे।

अपरराक्षः। पुं। रात्रिभेदे। उषसि। अपरराक्षेः। पूर्वापराधरेति समासे अहः सर्वैकदेशेत्यच्।

अपरवक्त्रम्। न। वैतालीयसंज्ञकेवृत्ते।

अपरा

अपरवैराग्यम्। न॰। वैराग्यविशेषे। यतमानसंज्ञाव्यतिरेकसंज्ञैकेन्द्रिय-संज्ञावशीकारसंज्ञाभेदाच्चतुर्विधे स्मृतातस्थान्तरङ्गे। अस्मदादीनां बहिरङ्गे॰

अपरस्पर॰ वि॰ क्रियायाः क्रियावतांच सातत्ये। अपरस्परश्चेतिद्वन्द्वः। अपरस्पराः क्रियासातत्येऽतिसुखिनोपाख्यते क्रियासातत्ये। अपरस्परं गच्छन्ति। सततमविच्छेदेनगच्छन्तीत्य॰। क॰। निर्दिष्टंकर्मसातत्ये सुधीभिरपरस्परम्। क्रियावतां सातत्येतुत्रिकत्रयम्। अपरस्परा साध्वीस्त्रियश्च॰। गच्छन्ति अपरस्पराणि कुलानि॰

अपरा॰ स्त्री॰ अपरा वै। पश्चिमदिशि।

अपरांग॰ पुं॰ अमीसौ। देवे।

अपराङ्गम्। न। गुणीभूतव्यङ्ग्यभेदे। इतिकाव्यप्रकाशः॰

अपराजित॰ पुं॰ ईशे। विष्णौ। रुद्रे। ऋषिभेदे॰ न॰ अपराजित॰। गोदधूपे। वि॰ अजिते॰

अपराजिता। स्त्री॰ उमायाम्। जयायाम्। जातीतिप्रसिद्धायाम्। जयन्त्याम्। अर्जुनपत्न्याम्। शेफाल्याम्। अमीभेदे। शंखिन्याम्। कर्पूषाम्भेदे। स्वल्पफलायाम्। गिरिकर्ण्यां॰ विष्णुक्रान्तायाम्। श्वेतनीलपु॰

अपराजित

ष्पभेदाद्विविधे अपराजिते। अपराजिते कटूमेध्ये। शीतेकंठ्ये सुदृष्टिदे। कुष्ठगूथकृमिदोषाम्। शोथव्रणविषापहे। कषायेकटुपाकेचतिक्तेचस्मृतिबुद्धिदे। ऐशान्यांदिशि। अपराजिता। ब्रह्मलोकेहिरण्यगर्भमुख्याम्। ब्रह्मचर्यसाधनवद्भ्योऽन्यैर्नजीयते इति। जी॰

अपराह्ण॰ वि॰ अपराभिनि। अपराध्नुति॰ राध॰। क्नु॰

अपराह्णपृषत्क॰ वि॰ लक्ष्यात्प्राप्तशरे। अपराह्णः पृषत्कोयस्यासौ। अपराह्णपृषत्कोवा लक्ष्यादूर्ध्वंपतत्सायकः॰

अपराधि॰ पुं॰ आगसि। दण्डयोग्यकर्मणि। अपराधनम्। राधसंसिद्धौ। घञ्॰ वि॰ रार्धाभावश्चति॰

अपराधी। वि॰ कृतापराधे। भेदेदर्शि॰ नि। अत्रोक्तंविचारण्यगुरुभिः विप्रत्व॰ यत्त्वेतल्लोकदेवभूतादिकं जगत्। त्वत्साङ्गेदेनाप्यन्तंक्षेयेदपराधिनम्। यदस्तितत्त्वजानातियत्रेहास्ति॰ तदीक्षते। इत्येवमपरोस्त्यविद्यते भेददर्शिनइति। योन्यथासन्तमात्मानमन्यथा प्रतिपद्यते। किंतेनकृतं पापंचोरेणात्मापहारिणेति॰

अपरान्त। वि॰ पाश्चात्ये॥ अपरान्ता स्त्रीपाश्चात्यो इतिवाद्वः। समुद्रमथ

अपरा

देशवर्त्तिनि । यथा । अवक्रान्तेकि
लोदन्वान् रामायाभ्यर्थितोदधौ ।
अपरान्तमहीपालव्याजेनरत्नैकर
मिति । ततः । किं । [illegible]
अपराप्रकृतिः । स्त्री । भूमिरापोनलो
वायुः खंमनोबुद्धिरेवच । अहंकार इ
तीयंमेभिन्नाप्रकृतिरष्टधा । अपरेय
मितिभगवद्गीता । केवलचेयायाम्
अपरायांशक्तौ । अपरोचासौप्रकृ
तिश्च । [illegible]
अपरामुक्तिः । स्त्री । पीतांबरादिकला
न्तावर्त्तिविविधैश्वर्यसम्पन्नतत्तद्भ
वनवासित्वमाने । [illegible]
अपरामुक्तिः । स्त्री । संज्ञमंत्रेश्वरत्वे ।
अपरोचासौमुक्तिश्च । [illegible]
अपराविद्या । स्त्री । ऋग्वेदादिविद्या
याम् । ऋग्यजुःसामाथर्वाणोवेदा
अंगानिशिक्षादिज्योतिषांगतिः । छन्दोभि
धानंसोमांसायसंशास्त्रंपुराणकम् ।
न्यायोवैद्यकगान्धर्वधनुर्वेदोर्थशास्त्र
कम् । अपरेयंपराविद्यायया ब्रह्मा
वगम्यते । अपरोचासौविद्याच ।
अपराशक्तिः । स्त्री । अपराप्रकृतौ ।
अपरोचासौशक्तिश्च ।
अपराह्णः । पुं । दिनान्तांशे । तस्यमे
दाः । त्रिधाविभक्तस्यदिनस्याग्रेपभागः

अपरि

त्रिधाविभक्तस्यदिनस्यतृतीयभागः
सतुविंशद्दण्डदिनमानेविंशतिदण्डा
त्परंदशदण्डंयावत् । पञ्चधाविभ
क्तस्यदिनस्यचतुर्थभागः सप्तदश
दण्डात्परंषट्दण्डंयावदितिश्रुति
स्मृतिप्रसिद्धः । अङ्गअपरमपराह्णः ।
पूर्वापरेत्यादिनासमासाटच् । अ
ह्नोऽह्नएतेभ्योऽत्यङ्गादेशः । अह्नोद
न्तादितिसर्वम् । [illegible]
अपराह्णतनः । त्रि । अपराह्णे भवेवस्तु
नि । आपराह्णिके । अपराह्णः सेवोढो
ऽस्य । विभाषापूर्वाह्णापराह्णाभ्यामि
तिष्युत्तौतुट्च । [illegible]
अपराह्णेतनी । त्रि । अपराह्णोऽङ्गवेव
स्तुनि । आपराह्णिके । अपराह्णेभ
वः । ष्युत्तौतुट्च । धर्मादनपेत्यादि
तिसप्तम्याअनुक् । [illegible]
अपरिकलितः । त्रि । अज्ञाते । अदृष्टे
। नपरिकलितः । [illegible]
अपरिग्रहः । पुं । असङ्ग्रहे । अस्वीकारे
। नपरिग्रहः । परिव्राजि । नवि
द्यतेकन्थाकौपीनाङ्गवस्त्रादिव्यतिरि
क्तपरिग्रहोयस्य । त्रि । परिग्रहहीने ।
अपरिच्छदः । त्रि । दरिद्रे । नविद्यते
परिच्छदोयस्यसः ।
अपरिच्छिन्नम् । त्रि । परिच्छेदरहिते
असीमनि । [illegible]

अपरिज्ञानम् । न तत्त्वविवेके मू
ढतायाम् । नञ्तत्पु ।
अपरिज्ञानिः । पुं । तत्त्वज्ञानवृद्धेषु वि ।
ज्ञानरहिते ।
अपरिसंख्यानम् । न । आनन्त्ये । नञ
त्पु । परिसंख्यानम् ।
अपरिहार्य्य । त्रि । परिहर्तुमशक्ये
अनिवार्य्ये ।
अपरेद्युः । अ । अपरस्मिन्दिने । अपरे अह
र्नि । सप्तम्यर्थे परशब्दादेद्युस् ।
अपरोक्ष । त्रि । स्पष्टे । असंभव
नादिनिरासेतुविचारविपाकाख्येन
प्रमाणेन अनिर्ज्ञातं ज्ञातुं प्रतिबन्धाभा
वार्थं फलजनकयत्परोक्षमित्युच्यते ।
अक्षाण्यिंद्रियाणां परोऽतीतोऽनुभव
स्तीक्ष्णपरोक्षमनुपरोक्षंधा ।
अपर्णा । स्त्री । पार्वत्याम् । नञ्पर्णान्य
स्याः । तपसिपर्णानामप्यनशनात् ।
त्रि । पर्णशून्ये ।
अपर्परीकः । त्रि । निस्तेजसि ।
अपर्याप्तम् । त्रि । असमर्थे । परिपर्याप्ति
शून्ये ।
अपर्वदण्डः । पुं । रामशरतृणे । इति
राजनिर्घण्टः ।
अपलम् । न । कीलके । त्रि । मांस
हीने ।
अपलापः । पुं । प्रेमणि । अपह्नवे । स

अपवर्ग

त्योपसर्गेनकथने । धार्य्यमाणेन न
। धार्य्यमीरित्यादयुक्तौ । अपवर्जनम् ।
घञ् ।
अपवर्जिका । स्त्री । तृष्णायाम् ।
तिलेमचन्द्रः ।
अपवरकः । पुं । वर्षाकालिकसिक्तगर्भगृहे
। अपवियते वृक्षोतिवा ड्रिन्
कृवृषादिभ्यः संज्ञायांवुन् । फलूसखा
ण्डेनप्रतिप्रसिद्धेन आवरके । य
था । दीपोऽपवरकस्यान्तर्वर्तते त
त्प्रभावस्थितिरितिध्यानदीपे विचार
अपवर्गः । पुं । त्यागे । मोक्षे । कार्या
वसानसांफल्ये । फलप्राप्तिपूर्विकायां
क्रियापरिसमाप्तौ । कर्मफले । तद
न्तेविमोक्षोपवर्गः । न्या० । २२
तिस्यदुःखस्य अत्यन्तविमोक्षः स्वस
मानाधिकरणदुःखासमानकालीनो
ध्वंसः । तस्यच जन्मोपायादेवसम्य
ग्दुःखेनदुःखेन जन्मनोच्यन्त
विमुक्तिरपवर्गइति भाष्यम् । दुःखे
नदुःखानुषक्तेष्वर्थेषु । अपवर्जनम
पवर्गः । वृजीवर्जने । भावेघञ् । दुः
खाभावे । नाशे । मूर्खतायामिति मे
दिनिः ।
अपवर्गगुरुः । पुं । सदाशिवे । हरौ ।
मोक्षमार्गप्रदर्शके ।

अपवि

अपवर्जनम् । न । दाने । निर्दोषे । मोक्षे । परित्यागे । मृजीवर्जने अ
पियपूर्वः । भावे ल्युट् । इति । अपवर्जितः । त्रि । परित्यक्ते । त्यक्ते ।
अपवर्त्तनम् । न । परिवर्त्ते । विक्रीभावे ।
अपवर्त्तितः । त्रि । संव्यवहिते ।
अपवादः । पुं । निन्दायाम् । आज्ञायाम् । विरोधे । प्रमादे । बाधके । अ
पवादो नामरज्ज्वादिविवर्त्तस्य सर्पस्य
रज्ज्वादेरवस्तुत्वम् वस्तुविवर्त्तत्वावस्तु
नोः ज्ञानादेः प्रपञ्चस्यावस्तुत्वमि
ति । कार्य्यस्यकारणमात्रसत्ताविशे
षाभावम् कारणस्वरूपव्यतिरेकेण का
र्य्यस्याऽसत्त्वापधारणं वाऽपवादः इत्य
र्थः । अपवदनम् । वद्+अभिवादन
स्तुत्योः । भावे घञ् । अपोद्यते ।
यद्वस्त्वाधावाधि । घञर्थे वा । इति
अपवारणम् । न । अन्तर्द्धौ । इज्+अच्छा
याम् । चुरादिण्यन्तादस्माद्भावे ल्युट् ।
अपवारितम् । त्रि । अन्तर्हिते । आवृ
ते ॥
अपविद्धः । त्रि । अशुद्धे । अपवित्रः ।
अपविद्धम् । त्रि । प्रतिक्षिप्ते । प्रत्याख्या
ते । त्यक्ते । त्यक्ते । पुं । पुत्रविशेषे
यथा । मातापितृभ्यामुत्सृष्टं तयोरन्य
तरेणवा । यंपुत्रंपरित्यजतीवादप
वित्रःसउच्यतेइतिमनुः ।

अपवि

अपविद्धा । स्त्री । निर्विषीकृते । इति
राजनिर्घण्टः ।
अपवृतिः । स्त्री । अपवारणे ।
अपवृत्तः । त्रि । पराङ्मुखीभूते ।
अपशब्दः । पुं । असंस्कृतशब्दे । अपभ्रं
शे । अपभ्रष्टः शब्दोऽपशब्दः । मीमां
सकैर्यत्रापशब्दो नावकल्प्यः । यथागौर
वान्माध्यकारः । तेऽसुरा हेलयो हे
लय इतिकुर्वन्तःपराबभूवुस्तस्मात् ।
म्लेच्छोनाम्लेच्छितवैनापभाषितवै
म्लेच्छोहयदपशब्दः म्लेच्छामाभू
दित्यध्येयं व्याकरणमिति । म्लेच्छित
वाइतिम्लेच्छस्यपर्य्यायोनापभाषितवाइति
कृत्याधेइतितवै प्रत्ययइतिकैयटः ।
यत्रैवहिशब्दज्ञानेधर्मः एवंसमशब्द
ज्ञानेऽपधर्मः । इतिमहाभाष्यम् ।
एवञ्च अपशब्दज्ञानमधर्मसाधनम्
धर्महेतुशब्दज्ञानविरोधित्वात् य
द्विरोधि तत्तद्विरोधिफलकम् य
थाश्रौषिकद्रव्यसेयाश्रेषवतःप्रत्यनु
मानम् । श्रौषिकद्रव्यसेवयाश्रौषिक
व्याधिसमवस्तद्विपरीतसेवयाश्चारो
ग्यमित्यर्थः ।
अपशुक । पुं । आलस्ये । अपगताशुक
यस्मात् ।
अपशोकः । पुं । अशोकपादपे ।
अपष्टन् । न । अङ्गुष्ठाग्रे । इतिशब्दरत्नः ।

अपसद

अपशु । न । निरर्थके । शोभनार्थे । विपरीते ।
अपशुः । पुं । काले । वि । वासे । प्रतिकूले । विरुद्धार्थे । अपशिशुति । शुगतिनिवृत्तौ । अपदुःसुधुभ्रस्खदिति क्विः सुधामादिः ।
अपशुलम् । त्रि । निन्दिते । विपरीते ।
अपष्ठ । न । यज्ञकार्ये । अपनयशब्दार्थे ।
आप्नोति । आप्नृ । आपेः कर्मण्याङ्यासोनुदात्तत्वेत्यसुन् पाचिकोनुदात्तभावः ।
अपसद । पुं । अधमे । नीचे । अपकृष्टमपकृष्टेवासीदति । षद्लृविशरणादौ । पचाद्यच् ।
अपसर । पुं । अपसरणे । सर्त्तेरप् ।
अपसरणम् । न । स्थानांतरस्थानांतरगमने ।
अपसर्जनम् । न । परिवर्जने । दाने ।
आम्नाते । अपसृज्यते । सृज् । ल्युट् ।
मोक्षे । मारणे ।
अपसर्प । त्रि । चरे । अपसर्पतीति । सृप्गतौ । पचाद्यच् । पुं । अग्निभेदे ।
अपक्रमे ।
अपसर्पणम् । न । पश्वादेस्तोगमने ।
अपसलवि । । । पिप्रतीर्थे । प्रदेशिन्यङ्गुष्ठयोर्मध्ये । यथा । प्रदेशिन्यङ्गुष्ठयोरन्तरा अपसर्पसि अपसव्यं तेनापि

अपसो

। ट्टभ्योनिदधाति इतिश्राद्धतत्त्वे भट्टभाष्यधृतगद्यम् ।
अपसव्यम् । त्रि । शरीरदक्षिणे । शरीरस्यदक्षिणेभागे । प्रतिकूले । विरुद्धार्थे । न । पिप्रतीर्थे । अपसंख्यि ।
अपगतम् । अपक्रान्तंवा सख्यात् ।
अपसारणम् । न । अपनयने ।
अपसारितः । त्रि । उत्सारिते ।
अपसिद्धान्तः । पुं । स्वीकृतसिद्धान्तात् प्रच्यवे । तल्लक्षणमाह । सिद्धान्तमभ्युपेत्यानियमात्कथाप्रसङ्गोऽपसिद्धान्तः । ५ । ६६ । सिद्धान्तं स्वशास्त्रकाराभ्युपगतमर्थं स्वीकृत्यानियमात् तन्नियमप्रच्यवात् कथाप्रसङ्ग इति । तथाच कथायां स्वीकृतसिद्धान्तप्रच्यवोऽपसिद्धान्तः तथाच सांख्यमतेनाहं वदिष्यामीत्यभ्युपेत्यारब्धायांकथायाम् आविर्भावस्याविर्भावाभ्युपगमेऽनवस्थेति दूषणोद्धारायाविर्भावस्यासतउत्पत्तिंयदभ्युपैतितदाऽपसिद्धान्तः यस्त्वेकदेशिमतेनकथामारभते तस्यशास्त्रकाराभ्युपगमविरोधेनापसिद्धान्तइतिविबोधयितुमभ्युपेत्येत्युक्तम् । सौगतास्त्वपसिद्धान्तंदूषणं ज्ञानमन्यत्ते इत्यन्यदेतत् । अपकृष्टः सिद्धान्तः ।
अपसोपानः । पुं । दक्षिणखे ।

अपस्करः । पुं । रथाङ्गे । चक्राभिन्नेरथा रसंज्ञके ॥ अपकीर्यतेऽस्मा स्वस्वस्थाने क्षिप्यते । कृविक्षेपे । क्षेदेरप् अप स्करोरथाङ्गमितिसाधुः ॥

अपस्नातः । वि । मृतस्नाते । मृतमु द्दिश्यस्नातेजने ॥ अपकृष्टस्नातः । प्रादियोगताच्चार्थेतिसमासः । संस्का रार्थंस्नापितेमृते ॥ इतिस्वामी ॥

अपस्नानम् । न । मरणनिमित्तस्नाने । मृतस्नाने । अपकृष्टस्नानम् ॥

अपस्मारः । पुं । रोगभेदे । भूतविक्रिया याम् । मिरगीतिख्याते । तस्यसामा न्यरूपम् । तमःप्रवेशःसंरम्भोदोषो द्रेकश्चतस्मृतिः । अपस्मार इतिज्ञेयो गदोघोरतरोद्विजः ॥ अस्योपधंयथा यःखादेत्क्षीरभक्तोशीमाक्षिकेण वचारजः । अपस्मारंमहाघोरं चिरो त्थंसनयेद्ध्रुवमिति ॥ वचाघृतंवच । अपिच । द्वौकीटमेषौविधिवदानी यैरविवासरे । कण्ठेभुजेवासन्धार्य जयेदुग्रमपस्मृतिमिति ॥ अथकीटो नदीतीरेसिकतामध्येतिष्ठति । इति भावमकाशः ॥

अपस्मारी । वि । अपस्मारंरोगिणि ॥ तल्लक्षणम् । क्षुद्रैर्धातुभिराकृते ऽथ मनसिमाणीमनःसन्दूषनदन्तानखा दतिफेनमुद्गिरतिदोः पादौक्षिपन्भू

अपह

ढधीः । पश्यन्रूपमसत् क्षितौनि पतितश्चर्यो करोतिक्रियां विभ्यत् सत्त्वयमेवशाम्यतिगतेवेगेत्वपस्मार कः ॥ इति ॥

अपहृतः । वि । अपनीते ॥ नष्टे ॥ अ पहन्यतेस्म । हन० क्तः ॥

अपहृतपाप्मा । पुं । वेदान्तवेद्यआत्म नि । अपहृतःपाप्माधर्माऽधर्मोखोय स्यसः ॥

अपहृतिः । स्त्री । विनाशे । उच्छेदे ॥

अपहन्तृ । वि । विनाशयितरि ॥

अपहर्त्तृ । वि । अपहारिणि । यथा । आपदामपहर्त्तारं दातारं सर्वसम्प दाम् । लोकाभिरामं श्रीरामंभूयो भूयोनमाम्यहमिति ॥

अपहस्तितः । वि । निरस्ते ॥

अपहारः । पुं । अपचये । हानौ । अ पहरणे । चौर्ये ॥ संक्षेपणे । धनस्वा म्यनुपयोगिन्यये । इतिदायभागः ॥

अपहरणम् । हृञ् हरणे । घञ् ॥

अपहारकः । वि । अपहारिणि । अप हरणकर्त्तरि ॥ अपहरति । हृञो ण्वुल् ॥

अपहारी । वि । अपहरणशीले । अप हर्त्तरि ॥

अपहासः । पुं । अकारणहास्ये ॥

अपहृतः । वि । अपनीते ॥

अपङ्क

अपङ्कः। पुं। स्नेहे। अपङ्कायें। इति मेदिनी हेमचन्द्रौ। अपङ्कनम्। कुङ् अपनयने। ल्युट्। अपङ्कृतिः। स्त्री। अपलापे। अर्थालंकारे। प्रकृतिमन्विधिधान्यत्र साधर्म्येणान्यत्वमपङ्कृतिः। उपमेयमस्त्वंकुरुषे उपमानंसत्यतयायत्स्याप्यतेसापह्नवपङ्कृतिः। उदाहरणम्। अयमः प्रागल्भ्यं परिणतरुचः शैलतनये कलङ्कोनेवायंविलसति-अयाङ्कस्यवपुषि। अमुष्येयमन्येविगलदमृतस्यन्दिशिशिरे रतिश्रान्ता येते रजनिरमणीगाढमुरसि॥ इत्यंवा। यतसखिकियदेतत पश्यसैरं-भस्य मिथविरुद्धकृत्येऽस्मिन् रागिलोकेनयाद्दि। उपवनसहकारोल्लासिभृङ्गच्छलेनप्रतिविशिखमनेनोद्गिरितंकालकूटम्। अनुहि न सभृङ्गाणिसहकारारागिणिपिक सकलकूटाः परभृता इति प्रतीतिः॥ एवंवा। अमुष्मिन्नावणयासत्त सरसिननंसगटद्य ममरः गर्वप्रुष्टःपृथुजघनभरेनिपतितः। यदङ्गाङ्गारागां मयमपिशुना नाभिकुहरे-शिखापुञ्जस्येयंपरिणमतिरोमावलिवपुः। अवनरोमावलिधूमशिखेयमिति मतिपत्तिः॥ एवमियंभङ्ग्यन्तरैरप्यूह्या। अपङ्कवनम्। कुङ्

अपाङ्क

लिन्। अपांनाथः। पुं। समुद्रे। अंबूपारे। इति राजनिर्घण्टः॥ अपाकः। पुं। अजीर्णतायाम्। नि। पाकाभावविशिष्टे। अपाकरणम्। न। निराकरणे। अपा-ङ्पूर्वात्-कृ ल्युट्। अपाकप्राकम्। न। आर्द्रके। इतिराजनिर्घण्टः॥ अपाकृतम्। त्रि। अपोहिते। त्यक्ते। अपाकारि। कृ कृञ्। कः। अपाकृतिः। स्त्री। विकारे। अपाकरणे। अपाचम्। त्रि। प्रत्यक्षे। इतित्रिकाण्डशेषः॥ अपाङ्क्त्यः। त्रि। पङ्क्तिभोजनानर्हे। सङ्घैःसहैकपंक्त्यांभोजनायोग्ये॥ तेच। येस्तेनपतितक्लीबायेचनास्तिकवृत्तयः इत्याद्युक्तवचनैर्मनुनोक्तावोध्याः। अपाङ्गः। पुं। नेत्रान्ते। तिलके। त्रि। अङ्गहीने। अपगतोऽङ्गात्। निरादयदतिसमासः॥ अपकृष्टाङ्गाद्वा। अपकृष्टान्यङ्गान्यस्माद्वा। अपाङ्गति। अगिगतौ। घञ्वाद्यच्वा।

अपाङ्गका। पुं। अपामार्गे। नेत्रान्ते। त्रि। अंगहीने।

अपाङ्गदर्शनम्। न। कटाक्षे। अपांगेन नेत्रान्तेन दर्शनम्। इतिहेमचन्द्रः।

अपाची

अपाग् । वि । दक्षिणदिग्भवेवस्तुनि ।
अपाचीने । त्रि० । ।
अपाची । स्त्री । दक्षिणदिशि ॥ अञ्चो मध्ये अंचतिरहयंम् ॥ समेत्यवयंम ध्यार्थे अपदिशमितिवत् ॥ अंचुगतिपूजनयोः । क्विगादिनाकिन । उगितश्चेतिङीप् ।
अपाचीनम् । त्रि । विपर्यस्ते । अपागर्थे । दक्षिणदिग्भववस्तुनि । अपागेव । विभाषाञ्चेरदिक्स्त्रियामिति खः । तस्य ईनादेशः ॥
अपाच्यम् । त्रि । दक्षिणदिग्भवे । पाकानर्हे । युप्राग्पागित्यादिनाञ्यैषिक्रोयत । न पाच्यम् ।
अपाटवम् । न । रोगे । अपटुत्वे । न विद्यते पाटवं यस्मिन ।
अपात्रम् । न । योग्यतारहीने । निन्दिते । विद्यातमोहीने । नटविटादौ । कुपात्रे । नपात्रम् । अपात्रे पातयेद्दानं सुवर्णं तरकार्णवे । इतिमलमासतत्त्वम् ॥
अपात्रीकरणम् । न । नवविधपापमध्ये पापविशेषे । तच्चतुर्विधंभवति यथा । निन्दितधनादानम् १ । वाणिज्यम् २ । शूद्रसेवनम् ३ । असत्यभाषणञ्च ४ । इति । यथाह मनुः । निन्दितेभ्योधनादानंवाणिज्यंशूद्रसेवनम् ।

अपान

अपात्रीकरणं क्लेयमसत्त्वेस्त्येवभाषणमिति ।
अपादानम् । न । विश्लेषेऽवधिभूते । पंचमीकारके । यस्मादवस्तुनोवस्त्वन्तरस्यचलनंभवतितस्मिन् । विश्लेषहेतुक्रियामात्रयत्वेसतिविश्लेषाश्रय इत्यर्थः । तत्रैकादशार्थेपंचमीस्यात् । यथा । यतोऽपायः ॥ यथावृक्षात्पर्णं पतति १ । यतो भी । यथाद्याघ्रादिभेति २ । यतोजुगुप्सा । यथा पापात् जुगुप्सते धीरः ३ । यतःपराजय । यथा सिंहात् पराजयते हस्ती ४ ॥ यतःप्रमाद । यथा धर्मात्प्रमाद्यतिनीचः ५ । यतआदानम । यथा भूपात् धनमादत्तेविप्रः ६ । यतो भू । यथा पितुः पुत्रोजायते ७ । यतस्त्राणम् । यथा व्याघ्रात् गां रक्षतिगोपः ८ । यतो विराम । यथा पापादिरमतिविप्रः ९ । यतोऽन्तर्द्धिः । यथा गुरोरन्तर्हितेशिष्यः १० । यतो वारणम । यथायवेभ्यो गां वारयति ११ । इतिसुग्धबोधटीकायाम् ।
अपान । पुं । गुदस्थवायौ । नाभेरधः स्थानमनवतिः मलापनयनेव्यापारे । यथाह्यादिस्थानधर्त्तानिश्वासौ ॥ यथा । अधोनयत्यपानस्तु आहारञ्च रसात्मकम् । मूत्रशुक्रपुरीषायुरमान

अपामा

स्तेनकीर्त्तितः । कुक्कुटिकापिप्पुपार्श्व
पायूपस्थवृत्ति वायुः ॥ न । गुदे ।
अपसरणेनानित्यनेन ॥ इलच्चेति
वच् । [illegible]
अपान्तरतमाः । पुं । वेदाचार्यपुरा
णर्षिविशेषे । यःकलिद्वापरयोः स
न्ध्यौ विष्णुनियोगात् कृष्णद्वैपायनः
सम्बभूवेतिस्मृतौ प्रसिद्धिम् ॥
अपान्नपात् । पुं । यज्ञनामधेयेदेवे ।
अपापः । त्रि । पापशून्ये । निष्पापे ॥
अपापविद्धः । त्रि । धर्माधर्मवर्जिते ॥ न
पापविद्धः ॥
अपामार्गः । पुं । प्रत्यक्पर्ण्याम् । अप
मार्जन्त्यनेन अपमृज्यते ऽनेनव्या
ध्यादिरितिवा । मृजूष० । इलच्चे
तिघञ् । निष्ठायामनिट्त्वात्कुत्व
म् । उपसर्गस्य घञ्योतिदीर्घः । अप
कृष्टआसमन्तान्मार्गोऽस्येतिवा । अ
पामार्गः सरस्तीक्ष्णोदीपनस्तिक्तकः
कटुः । पाचनोनावनच्छर्दिकफमे
दोनिलापहः । निहन्तिदद्रुसिध्मार्श:
कंडूगूलोदरापचीः । अपामार्गोऽरु
षोवातविष्टंभीकफकृद्गुरुः । रूक्षः
पूर्वगुणैर्न्यूनः कथितोगुणवेदिभिः ।
अपामार्गफलंस्वादुरसे पाकेचदुर्जरम् । विष्टंभिवातलंरूक्षंरक्तपित्त
प्रसादनमितिभावप्रकाशः ।

अपार्थ

अपोम्पतिः । पुं । समुद्रे । वरुणे ॥ अ
पांपतिः । तत्पुरुषे कृतिबहुलमि
त्यलुक् । [illegible]
अपाम्पित्तम् । न । अम्लौ । अपांपित्त
मिवदाहकत्त्वात् । अलुक् ।
अपायः । पुं । विश्लेषे । अप्ययेऽना
शे । अपगमे ॥
अपारः । त्रि । उत्तरावधिवर्जिते ॥ अ
पारः संसाराकूपारः ॥ अनन्तमहि
मनि । नविद्यते पार उत्तरावधिर्य
स्य । न । अवारे । नद्यादेरर्वाचि
पारे ।
अपार्थः । त्रि । अर्थशून्ये ॥
अपार्थकम् । न । इमंलक्षयतिगोतमः ।
पौर्वापर्यायोगादप्रतिसम्बद्धार्थमपा
र्थकम् ॥ ५ । ५३ । पौर्वापर्यंकार्यैका
रणभावस्तस्यायोगादसम्भवात्शब्द
बोधजनकाकांक्षाज्ञानाद्यभावादि-
ति फलितार्थः । अप्रतिसंबद्धोऽसम्ब
द्धोर्थः प्रयोजनंशब्दबोधरूपं यत्र ।
यद्यपि दशदाडिमानि षडपूपाः
कुण्डमजाजिनमित्यादावर्थान्तरवो
क्यादर्थबोधसत्त्वादव्याप्तिरतिव्याप्ति
श्चेतिनिरर्थके । तथाप्यभिमतवाक्या
र्थबोधानुकूलाकांक्षादिशून्यबोधजन
कपदत्त्वं तत् । अविवक्षितार्थं तुतस्य
बोधोभवत्येवेतिनातिव्याप्तिः । उदा

अपिन

करणान्तु । अयोग्यानासत्यानाकांक्ष वाक्यम् । ५३ । अनर्थके । व्यर्थे ॥ अपावृतः । त्रि । पिहिते । अप्रतिबद्धे । स्वतन्त्रे । उद्घाटिते । अपगतमावृतभावरणमस्य ॥ अपावृत्तम् । त्रि । लुठिते । परावृत्ते ॥ अपाश्रयः । पुं । चन्द्रातपे । प्रांगनावरणे । त्रि । आश्रयशून्ये । अधीने ॥ अपासनम् । न । मारणे । असुचेप्रे । भावेल्युट् ॥ अपास्तः । त्रि । निरस्ते । अवधीरिते ॥ अपि । १ । सम्भावनायाम् । प्रश्ने । शङ्कायाम् । गर्हायाम् । समुच्चये ॥ युक्तपदार्थे । क्रियाकार क्रियायाम् । कामकारक्रियासु । अनुज्ञायाम् । अवधारणे । पुनरर्थे ॥ नपिपति । पिगतौ । क्विप् । आगमशास्त्रस्यानित्यत्वात्वनुक ॥

अपिगीर्णम् । त्रि । स्तुते । स्तुते । वर्णिते । गीर्णे ॥ अपिगीर्यतेस्म । गनिगरणे । क्तः । निष्ठातस्यनः ॥

अपितु । १ । किन्त्वर्थे । यद्यर्थे । यद्यपि ॥

अपिधानम् । न । आच्छादने । अपिपूर्वकाद्डुधाञोल्युट् ॥ त्रि । पिधानरहिते ॥

अपिनद्ध । त्रि । परिहिते वस्त्रादौ । पिनद्धे । अपिनद्धतेस्म । णद्धबन्धने । क्तः ॥

अपिहितः । त्रि । छादिते । अपिधीयतेस्म । डुधाञ् । क्तः । दधातेर्हिः ॥

अपीच्यम् । त्रि । अतिसुन्दरे ॥

अपीतिः । स्त्री । प्रलये । अप्ययेऽव्ययीभावे ॥

अपीनसम् । न । पीनसरोगे । दृतिरभसः ॥ त्रि । तद्रहिते ॥

अपुच्छा । स्त्री । शिंशपावृक्षे । त्रि । पुच्छहीने ॥

अपुनरावृत्तिः । स्त्री । मुक्तौ । कैवल्ये ॥

अपुनर्भवः । पुं । मुक्तौ । त्रि । मुक्ते । पुनर्जन्माभावे । यथाह चरकः । हेतौ सिद्धे प्रशमनेरोगाणामपुनर्भवे । ज्ञानंचतुर्विधंप्रोक्तंसराजार्हैभिषक्तमइति । अपुनर्भवोयस्यसः ॥

अपुण्यफलदः । पुं । पनसोदुम्बरादिवृक्षे ॥

अपूपः । पुं । पिष्टके । गोधूमे । अपूयते । पूयीविशरणे । बाहुलकात्पः । वलिलोपः ॥ यद्वा । पवनं पूः । पूङ् पवने । संपदादिक्विप् । अपूर्वंपातिपिबतिवा । पाः । आतोनुपेतिक ॥

अपूपीयम् । त्रि । अपूपार्थकपिष्टादौ । अपूपेभ्योहितम् । विभाषाङ्गिरपूपादिभ्यइतिछः ॥

अपूप्यम् । त्रि । अपूपीये । गोधूमचूर्णे ।

अपूर्व

अपूपेभ्योहितम् । यत् ॥

अपूरणी । स्त्री । आलङ्गितरौ ॥

अपूर्वः । त्रि । अदृष्टपूर्वे । अविदिते ॥ आश्चर्ये ॥ यथा । अपूर्वयंहरेर्माया त्रिगुणारज्जुरूपिणी । ययामुक्तोनच लतिवद्धोधावतिधावति ॥ पुं । पूर्वभा विकारणसंस्पर्शशून्ये अकार्ये परमा त्मनि । नविद्यते पूर्वंकारणं यस्यसः ॥ न । यागावान्तरव्यापारे ॥ धात्वर्थो तिरिक्तेकालान्तरभाविकस्यफलस्यसा धने । अवपच्चद्वयंमीमांसकानाम् । तदानीमेवसूक्ष्मत्वेनोत्पन्नंफलमेवा ऽपूर्वम् । कालान्तरफलोत्पादिकाक र्मशक्तिर्वेति ॥ तदुक्तम् । यागादेव फलंनद्रिगतिद्वारेण सिध्यति ॥ सू क्ष्मंशक्त्यात्मकंवापिफलमेवोपजायते ॥ इति ॥

अपूर्वता । स्त्री । अपूर्वत्वे । भावेतल् ॥

अपूर्वत्वम् । न । अपूर्वतायाम् । षड्वि धलिंगेपुरुषीयेलिङ्गे । प्रकरणप्रति पाद्यस्य प्रमाणान्तरेणाविषयत्वम-पूर्वत्वम् । यथाछान्दोग्येपञ्चेप्रपाठ केऽद्वितीयवस्तुनोमानान्तरेणावि-षयीकरणम् ॥ भावेत्वः ॥

अपूर्वप्रयोगः । पुं । प्रथमप्रयोगे । नवंगृहं निर्मायतत्रप्रथमप्रयोगे ॥

अपूर्वविधिः । पुं । प्रमाणान्तरेणाऽप्राप्त

अप्रोढः

स्य प्रापके विधौ ॥ यथा यजेतस्वर्ग कामइत्यादिः । स्वर्गार्थकयागस्य प्र माणान्तरेणाप्राप्तस्यानेन विधानात् ॥ अपूर्वश्चासौविधिश्च ॥

अपेक्षणीयः । त्रि । अपेक्षायोग्ये । अ पेक्षितव्ये ॥

अपेक्षा । स्त्री । आकांक्षायाम् । कार्य निमित्तयोरन्योन्याभिसम्बन्धे ॥ अ पेक्षणम् । ईक्ष । गुरोश्चहलइत्यः । टाप् ॥

अपेक्षाबुद्धिः । स्त्री । अनेकैकत्वविषयक बुद्धौ । नानैकत्वावगाहिबुद्धौ ॥ अय मेकः अयमेक इत्याकारबुद्धौ । इति कारिकावली ॥

अपेक्षितः । त्रि । ईप्सिते ॥

अपेतः । त्रि । रहिते । अपहृते । अप इतः ॥

अपेतकृत्यः । त्रि । कृत्यशून्ये । कृतकृत्ये ॥

अपेतराक्षसी । स्त्री । तुलस्याम् । वृ न्दायाम् । इतिराजनिर्घण्टः ॥

अपेताखिलचापलः । त्रि । निश्चलेन्द्रिये ॥

अपोगण्डः । त्रि । बलिभे ॥ अतिभीरौ ॥ विकलाङ्गे ॥ स्त्री ॥ पञ्चते पुना तिया । पूडः पूजोवा घञ् । पोगण्ड एकदेशोस्य । नपोगण्डः ॥

अपोढः । त्रि । निरस्ते ॥ बाधिते ॥ य था । ज्ञातुर्ज्ञेयः परोयात्मासोविद्या

अप्पति

कल्पितः स्मृतः । अपोढविधयात स्मिन् रज्वांसर्पत्ववादयः । इत्युपदेश साहस्र्यां १४ प्रकरणे १७ पद्यम् ॥

अपोढकर्म्मा । त्रि । त्यक्तव्यापारे ॥

अपोदका । स्त्री । उपोदिकायाम् । शाकान्तरे । अपगतमुदकमस्याः ॥

अपोनपात् । पुं । एतन्नामधेयेदेवता विशेषे ॥

अपोहः । पुं । तर्कनिराकरणे । वितर्कभावे । गुग्गूपाद्यष्टधाधीगुणान्तर्गत षष्ठगुणे । त्यागे । अतद्व्यावृत्तौ । अपगतऊहः । अपोहनम् । ऊह० । घञ् ॥

अपोहनम् । न । कामक्रोधशोकादिव्याकुलचेतसां स्मृतिज्ञानयोरपाये । अपोहे ॥

अपोहितम् । त्रि । अपाकृते ॥

अप्तः । न । यज्ञकार्य्ये ॥

अप्तुः । पुं । शरीरे । अभिलषितार्थे । अंशे । आप्नोति । आप्लृव्याप्तौ । आपोतेर्ह्रस्वश्चेतिसुः ॥

अप्सः । न । अम्बुनि । आप्नोति । आप्लृ० । आपः कर्म्मोपायांह्रस्वोनुट् चवेत्यसुन् । वैदिकोयमितिकश्चित् ॥

अप्पतिः । पुं । वरुणे । अम्बुधौ । अपां पतिः ॥

अप्पित्तम् । न । अम्लौ । पित्तकोपधौ

अप्पति

॥ अपांपित्तमिवदाहकत्वात् ॥

अप्पयः । पुं । परब्रह्मणि । अप्येति लीयन्तेजगत्यस्मिन् । अप्पूर्वादिणो ऽधिकरणे ऽच्प्रत्ययः ॥ अपाये । अपीतौ । लये । अप्येत्यस्मिन् । इण् इगुपधात्कः । एरच् ॥

अप्रकाण्डः । पुं । भिण्टिकादौ । स्तम्बे । गुल्मे । नप्रकाण्डोऽस्य ॥

अप्रकाशः । पुं । सत्त्वप्युपदेशादौबोधकारणेसर्वथाबोधायोग्ये । प्रकाशाभावे । जनान्तिके । गोपने । ३ प्रकाशाभाववति । नप्रकाशः ॥

अप्रखरः । त्रि । अतीक्ष्णे । प्राखर्यरहिते ॥

अप्रगुणम् । त्रि । व्याकुले । अप्रकृष्टगुणे । भिन्नःप्रगुणात् ॥

अप्रणयः । पुं । अप्रीतौ । प्रणयनम् प्रणयः । नप्रणयः ॥

अप्रतर्क्यः । त्रि । मनोऽगोचरे । अनुमानाविषयेश्रुत्यैकसमधिगम्ये परमेश्वरे ॥

अप्रतिकरः । त्रि । विश्वस्ते । विश्वासार्हे । इतिजटाधरः ॥

अप्रतिघः । त्रि । अप्रतिषेधे । नप्रतिघः ॥

अप्रतिपक्षः । त्रि । अप्रतियोगिनि । विपक्षशून्ये । नास्तिप्रतिपक्षोयस्यसः ॥

अप्रतिपत्तिः । स्त्री । अकृताज्ञाने ॥

अप्रतिवद्वः । त्रि । उद्दामे । नप्रतिवद्वः ॥
अप्रतिभः । त्रि । अधृष्टे । लज्जिते । अप्रत्युत्पन्नमतौ । अप्रगल्भे । नास्ति प्रतिभा नवनवोन्मेषशालिनीप्रज्ञा यस्यसः ॥
अप्रतिभा । स्त्री । निग्रहस्थानविशेषे ॥ यथा । उत्तरस्याप्रतिपत्तिरप्रतिभेतिगोतमः । ५ । ६२ । उत्तरार्हं परोक्तं बुद्ध्यापियोत्तरंसमये उच्चरंन प्रतिपद्यते तचाऽप्रतिभानिग्रहस्थानम् ॥
अप्रतिमः । त्रि । असदृशे । नविद्यते प्रतिमाऽपमायस्येसः ॥
अप्रतिरथम् । न । यात्रायाम् । मल्लेऽ । सामवेदे ॥ इतिविक्रमाण्डशेषो भूरिप्रयोगश्चेति शब्दकल्पद्रुमेराधाक्रान्तः ॥ पुं । भटे । खरे । नविद्यते प्रतिरथः प्रतिपक्षोऽस्य ॥ तुल्ययोद्धरहिते इतिमुरारिगम् ॥
अप्रतिरूपकया । स्त्री । अप्रतिवचनायांवाचि । सद्वणिकायाम् ॥ इतिविक्रमाण्डशेषः ॥
अप्रतिष्ठः । त्रि । अप्रतिष्ठिते । प्रतिष्ठारहिते ॥ नास्तिप्रतिष्ठायस्यसः ॥
अप्रतिष्ठानम् । न । अस्थैर्ये ॥
अप्रतिष्ठितः । त्रि । अप्रतिष्ठे । प्रतिष्ठारहिते । नप्रतिष्ठितः ॥

अप्रतिसम्बद्धः । त्रि । असम्बद्धे ॥
अप्रतिहतः । त्रि । विघ्नैरनभिभूते ॥
अप्रत्यक्षम् । न । प्रत्यक्षभिन्ने । प्रत्यक्षाभावे ॥ त्रि । प्रत्यक्षशून्ये । अतीन्द्रिये ॥ भिन्नंप्रत्यक्षात् ॥
अप्रत्ययः । पुं । अविधीयमाने । अविश्वासे । प्रतीयते विधीयते इतिप्रत्ययः । न प्रत्ययः ॥ नास्तिप्रत्ययोयस्यवा ॥
अप्रधानम् । न । अप्राप्ये । अंगभूते । गौणे ॥ प्रधानादन्यत् ॥ वाच्यभिन्नेऽर्थेऽयम् ॥
अप्रधृष्यः । त्रि । अधार्ष्ये । नप्रधृष्यः ॥
अप्रमत्तः । त्रि । प्रमादवर्जिते । सार्वज्ञाने । नप्रमत्तः । नप्रमादीतिवा । मदी० । क्तः ॥
अप्रमेयः । त्रि । अचिन्त्यप्रभावे । इदमित्थमितिपरिच्छेत्तुमशक्ये । स्वप्रकाशचैतन्यरूपे । फलाध्याये । अनवगम्यमानप्रमेये । तथाहि । परमेश्वरो हि शब्दादिरहितत्वान्नप्रत्यक्षः । नाप्यनुमानविषयो व्याप्तिलिंगाद्यभावात् । नाप्युपमानसिद्धो निर्विभागत्वेनसादृश्याभावात् । नाप्यर्थापत्तिग्राह्यः तद्विनानुपपद्यमानस्या सम्भवात् । नाप्यभावगोचरो भावरूपत्वाद्भावसाधकत्वाच्च । नापिशास्त्रप्र

अप्रस्तु

माणवेद्यः प्रमाणजन्यातिशयाभा-
वात्। अत्रैवंप्रायेषु निश्चयकथनमुच्य
ते। प्रमाणादिसाक्षित्वेन प्रकाशस्व
रूपस्य प्रमाणाविषयत्वेऽध्यस्तात्
द्रूपनिवर्त्तकत्वेन साक्षिप्रमाणकत्वम्
इत्यमप्रमेयोभवतीश्वरः। प्रमातुंयो
ग्यः प्रमेयः। न प्रमेयः अप्रमेयः।
अप्रसङ्गभङ्गे। न। अविच्छेदे। श्रौते।
वि। तदुक्तं। वा। वृद्धिकारणीभू
अप्रशस्तम्। वि। अनवस्थिते। अविच्छिते।
यया। अप्रशस्तंनिशिस्वानं राक्षोर
न्यच्छदर्थनादितिपराशरः। ज
अप्रसङ्गः। पुं। अव्यतिकरे।
अप्रसत्त्वम्। वि। अनक्षे। अतुष्टौ।
अप्रसुतः। वि। अनुपस्थिते। प्रकरणा
प्राप्ते। नप्रसुतः। वि। ज
अप्रस्तुतप्रशंसा। स्त्री। अर्थालंकारवि
शेषः। अप्राकरणिकस्यार्थस्याभिधा
नेन प्राकरणिकस्याक्षेपे। यथा। अ
प्रस्तुतप्रशंसा सा यात्रैव प्रस्तुताव्र-
ज्यासा च। कार्येनिमित्ते सामान्ये
विशेषे प्रस्तुतेसति। तदन्यस्यवचस्तु
ल्ये तुल्यस्येतिचैवधा। तदन्यस्यका
रणादेः। क्रमेणोदाहरणम्। याताः
किंचमिलन्ति सुंदरिपुनश्चिन्तात्व
याम्लकृते नोकार्यानितरां कृशा
सि कथयत्येवं सवाष्पेमयि। लज्जाम

अप्रस्तु

न्यरतारकेण निपतत्पीतांशुको च
चुषाहृष्टामांदृसितेनभाविमरणो-
त्साहस्तयाऽसूचितः। अत्रप्रस्थानात्
किमिति निवृत्तोसीतिकार्येपृष्टेकार
णमभिहितम्। १। राजन् राज
सुता नमाठयतिमां देव्योपितूष्णीं
स्थिता। कुजेभोजयमां कुमारस
चिवैर्नाद्यापिकिंभुज्यते। इत्यनाथ
शुकस्तवारिभवनेमुक्तोध्वगैःपञ्जरा
च्छिन्नस्थानबलोक्य शून्यवलभावे कै
कं माभाषते। अत्रप्रस्थानेऽचतंभ
वंतं ज्ञात्वा सहसैवत्वदरयः पलाय्य
गतादृतिकारणे प्रस्तुतेकार्थं मुक्तम्।
२। एतत्तस्य मुखात् कियत्कमलि
नीपत्रैकर्णं वारियो यन्मुक्तामणि रि
त्यमस्तसृजडःशृण्वन् यदस्मादपि
अङ्गुल्यग्रलघुक्रिया भविषयि न्यादी-
यमानेगनैः कुचोद्दीयगतो ममे-
त्यनुदिनं निद्रातिनार्त्तःशुचा। अ
स्थाने जडानांमभर्त्व संभावना-
भवतीति सामान्ये प्रस्तुतेविशेषःक
थितः। ३। सुहृद्धधूवाप्यंलक्ष्मसमा-
जनं करोतिवैरप्रतियातनेनयः। स
एवपूज्यःसपुमान् सनीतिमान् सु
जीवनं तस्य स भाजनं श्रियः। अ
कृष्णनिहत्य नरकासुरंवयूनां यदि
दुःखंप्रशमयसि तत्त्वमेवशाध्यइति-

अप्रस्तु

विशेषे प्रकृते सामान्यमुदितम् । ४
। तुल्ये प्रस्तुते तुल्याभिधानेवयः प्र
कारा । श्लेषः समासोक्तिः साहश्य
मार्चवा । तुल्यात्तुल्यस्याक्षेपेहे
तुः । क्रमेणोदाहरणम् । मुखस्वाद-
पिप्रविचलेद्यदि यद्यवोपि व्यायाद्य
दिप्राणयनेन महानपि स्यात् । अभ्यु
द्धरेत्तदपिविश्रमितीदृशीयं केनापि
दिक्पकटिता पुरुषोत्तमेन । येना
स्वभ्युदितेन चन्द्रगमितःक्लान्तिंरवो
तंतनतेयुज्येत प्रतिकर्तुमेवनपुनस्तस्ये
व पादग्रहः । क्षीणे नैतदनुष्ठितंयदि
ततः किंसज्जसेनेमिनागस्त्वेवंजडधा
मतातु भवतोयद्योन्निविक्ष्यूर्ज्जसे ।
आदायवारि परितःसरितांमुखेभ्यः
। प्रकिन्तावदर्जितमनेन दुरर्णवेन ।
उच्चारीकृतंच यडवीदहने हुतश्चपा-
तालकुचितुहुरेविनिवेशितंच ॥ इ
वश्च काचिदाद्ये प्रतीयमानार्थान-
ध्यारोपेणैव भवति यथा । अन्ये
रन्तः स्थगितभुवनाभोगपातालकु-
क्षेः पोतोपाया इहहिवहवोलंघने
पिक्षमन्ते । आहोरित्तःकथमपि भ
वेदेष दैवात्तदानीं कोनामस्यादय
टकुडरालोकने व्यक्तकल्पः । काचि
दधारोपेणैव यथा । कस्तंभोःकथ
यामि दैवहतकंमांविहि शाखोटकं-

अप्राप्त

वैराग्यादिवचि साधुविदितंकस्मा
दिदं कथ्यते । वामेनांवटस्तमध्वग
जनःसर्वात्मनासेवते नच्छायापि प
रोपकारकरणी मार्गस्थितस्यापिमे
। क्वचित्त्वशेषाध्यारोपेण । यथा । सो
पूर्वोरसनाविपर्ययविधिस्तत्कर्ण यो-
स्वामर्षं दृष्टिःसा मद्विस्मृतस्वपर
दिक्किंभूयसोक्तेनवा । सर्वंविस्मृतवा
नसि स्मरहेयदारणोद्याप्यसा वस्तः
शून्यकरो निषेव्यत इतिभ्रातः कए
मयहः । अवरसनाविपर्यासः शून्यक
रत्वं स्मरस्यासेवने नहेतुःकर्ण-
चापलन्तुहेतुः । मदःप्रस्तुतसेवनेनि
मित्तम् । इतिकाव्यप्रकाशः ।
अमहत्तम् । वि । अनाहते । हस्वादउ
कृष्टभूमौ । खिले । नमहत्यतेस्म ।
। हनहिंसागत्योः । कर्मणिक्तः ।
अप्राकृतः । वि । अलौकिके । सामान्ये ॥
अप्राप्यम् । वि । अप्रधाने । प्राग्वाङ्नि
क्षम् ॥
अप्राचीनम् । वि । नव्ये ॥ प्राचीनरदि
क्सम्बंधे ॥ नप्राचीनम् ।
अप्राप्तः । वि । अलब्धे । नप्राप्तः ।
अप्राप्तकालम् । न । समाचोभिष्यामो
। हादिनाव्यक्तस्याभिधाने । यथा-
। हगोतमः । अवयवविपर्यासवचनम
। प्राप्तकालमिति । ५ । ५४ । अवय

अप्रामा

यस्य कथैकदेशस्य विपर्यासोवैपरीत्यम् । तथाच समयबन्धविपर्ययीभूतकथाक्रमविपरीतक्रमेणाभिधानं प्रत्यवस्थानम् । तत्रायंक्रमः । वादिना साधनमुक्ते सामान्यतो हेत्वाभासोद्धरणीयाइत्येकः पादः । प्रतिवादिनश्च तत्रोत्तरमो द्वितीयः पादः । प्रतिवादिनः स्वपक्षसाधने तत्र हेत्वाभासोद्धरणञ्चेतिष्ठतीयः पादः । जयपराजयव्यवस्थाचतुर्थः पादः । एवंप्रतिज्ञाहेत्वादीनाक्रमः । तत्रस्तम्भाक्षोभ्याभोहादिनाथस्य स्तम्भिधानमप्राप्तकालमिति । त्रि । अप्रस्तुतसमये । अप्राप्तः कालोयस्य । अप्राप्तव्यवहारः । त्रि । व्यवहारानभिज्ञे । अप्राप्तवयस्के । यथा । अप्राप्तव्यवहाराणां धनं व्ययविवर्जितम् । न्यसेयुर्बन्धुनिक्षेपु प्रोषितानांतथैवच ॥ इतिदायतत्त्वे कात्यायनः । किञ्च । गर्भेस्त्रीसङ्गसोत्पन्नमष्टमात् वत्सरादूर्द्ध्वंगुः । बालभावोऽप्राप्तयौवनः पौगण्डोपिनिगद्यते ॥ प्रेतो व्यवहारज्ञः स्वतन्त्रःपितरावृते । इति व्यवहारतत्त्वेनारदः ।

अप्रासिः । स्त्री । अस्त्रक्षेपे । दादृशभधने ।

अप्रामाणिकः । त्रि । प्रमाणानभिज्ञे ।

अप्सर

प्रमाणासिद्धे ।

अप्रामाण्यम् । न । प्रमाण्याभावे ॥

अप्रियम् । त्रि । अहिते । अनिष्टवस्तुनि । नपुंसकम् ।

अप्रिया । स्त्री । मधुरसमेमत्स्ये । भृङ्गी मत्स्ये ।

अप्रीतिः । स्त्री । दुःखे ॥

अप्रीत्यात्मकः । पुं । रजोगुणे ।

अप्सराः । स्त्री । उर्वश्यादिस्वर्वेश्यायाम् । अप्सु सरति । सरतेरप्पूर्वो न् असराडत्यसिः । स्त्रियांबहुष्वप्सरसःस्यादेकत्वेऽसराअपीति अमरः । एकाप्सरःप्रार्थितयेवंवादइतिरघुः ।

अप्सरसः । स्त्री । भूमि । उर्वश्यादिस्वर्वेश्यायाम् । यथा । उर्वशीमेनकारंभाप्रुचीपुञ्जिकस्थली । सुकेशीमञ्जुघोषाचसहजन्यावतीतिताइति ॥ अप्सुसरन्ति । सृगतौ । सरतेरप्पूर्वादसरो ङीत्यसिः । मूलीति प्रायोवादः । अनश्चेतिसूत्रे अप्सरा इतिभाष्यप्रयोगात् ॥ षष्ठिप्रकरणगणभेदनामाध्यायेदादशाप्सरसः प्रोक्ताःयथा । उर्वशीमेनकारम्भामिश्रकेशीघृताचमुपा । विश्वाचीचपलाचीचयश्चपूर्वातिलोत्तमा । भानुमत्यवलावर्षादादशाप्सरसः शुभा-

अवन्ध्य

इति ।

अफलः । पुं । भावुके । इतिशब्दचन्द्रिका । त्रि । अफलेऽपि । तिष्फले ॥

नफलान्यस्य ॥

अफुल्लप्रसुः । त्रि । फुल्लाभिलाषरहिते ।

अफला । स्त्री । धृतकुमार्याम् । भूम्या मलक्याम् । इतिशब्दचन्द्रिका ॥

अफेनम् । न । अहिफेने । तच्चतुर्विधं यथा एकं श्वेतवर्णम् अन्नजीर्णसाकारकच्चाभम् जीरणम् । द्वितीयं कृष्णवर्णम् मत्स्याकारकच्चाभमारणम् । तृतीयम् पीतवर्णम् वयःस्तम्भनकारकच्चाभमधारणम् । चतुर्थं कर्बुरवर्णम् मलसारकच्चाभं सारणम् ॥ इतिराजनिर्घण्टः ॥

अवदुम् । त्रि । समुदायार्थशून्यवाक्ये । यथा । जरद्गवः कम्बलपादुकाभ्यां दीर्घीरिस्तोगायतिमंगलानि । तं ब्राह्मणीपृच्छतिपुत्रकामारोजन् रु मेयांसमुनस्यकोर्घः इत्याद्यस्यविषयः । अवन्धने । नवध्यतेस्म । वन्ध बन्धने ।

अवदूमुख । त्रि । अप्रियवादिनि । मुखरे । नवद्भिर्नियंत्रितं मुखमस्य ॥

अवद्यम् । त्रि । अवधार्हे । अनर्थकवचसि । इतिमेदिनी हेमचन्द्रौ ।

अवन्ध्यः । त्रि । फलेग्रहे । सफले । व

अज

न्ध्येसाधुः । तत्रसाधुरितियत् । न बन्ध्यः ॥

अवलः । पुं । वरुणद्रौ । त्रि । बलशून्ये । दुर्बले । नास्तिबलं यस्य ॥

अवला । स्त्री । वनितायाम् । यथा । हृदयेवहसि गिरीन्द्रौविभुवनजयिनी कटाक्षेण अवलात्वंयदि मन्येकेवलमबलोवयंनजानीमइति ॥ अल्पंबल । मस्याः । अल्पार्थेनञ् । पराधीनौ । नविद्यतेबलंयस्याःसकाशादन्यत्र ॥

अवलिमा । पुं । अबलभावे । देहस्यरोगादिनिमित्ते जरादिनिमित्तेवाकृशीभावे ॥

अवाधः । त्रि । निरर्गले । अनिवारिते ॥ नविद्यतेबाधा अस्य ॥

अवाध्यः । त्रि । सत्ये । ज्ञानान्तरेणवा । धायोग्ये ॥

अविन्धनः । पुं । गोडवाम्रौ । विद्युति ॥ आपइन्धनंदाह्यमस्य ॥

अवोधः । पुं । अज्ञाने । त्रि । बोधहीने ॥

अवोधविक्लवः । त्रि । अज्ञानोपहते । अवोधेनविक्लवः ॥

अब्जः । पुं । न । शङ्खे । पुं । निचुले । धन्वंतरौ । हिमकिरणे । न । पद्मे । संख्यान्तरे । दशार्बुदे । शतकोटिसंख्यायाम् । १०००००००० । नरकान्तरे । अब्जोजातः । पद्मेभ्यामजा

अब्दः

तावितिडः । अप्सुजायते । जनीमा दुर्भावे । सप्तम्यामितिडोवा ॥ अजकर्णिका । स्त्री । संवत्सिकायाम् ॥ अजजः । पुं । ब्रह्मणि ॥ योगान्तरे ॥ यथा । स्वराशौस्वांशगे सौम्ये लग्न स्थेवाभृगोःसुते । जीवेवाऽजजयो गोयं यातुःशुभविनाशकृदिति ॥ अजभोगः । पुं । वराटके । पद्मकन्दे ॥ अजयोनिः । पुं । धातरि । ब्रह्मणि ॥ अजंयोनिरुत्पत्तिस्थानमस्य । विष्णो नाभिकेमलजत्वात् ॥ अजवाहनः । पुं । अग्नौ । इतित्रिका ण्डशेषः । स्त्री । लक्ष्म्याम् ॥ अजष्ठ । न । रूपे । आमोतिं । आप्नो । रूपेजुट्चेत्यसुन् हस्वत्वंचधातोः प्र त्ययस्यजुट्च । अजसी अजांसि । अजहस्तः । पुं । दिवाकरे । अजिनी । स्त्री । नलिन्याम् । पद्मसमू हे ॥ पद्मलतायाम् । अजानिसन्त्य स्याम् । पुष्करादिभ्योदेशइतीनिः । अजिनीपतिः । पुं । सूर्ये ॥ अब्दः । पुं संवत्सरे ॥ सचसावनःसौरश्चा न्द्रोनाक्षत्रोवार्हस्पत्यश्चेतिपञ्चविधः । वारिवाहे । मुस्तके ॥ शैलभेदे । आप्यते । आप्नुव्याप्तौ । अब्दादयश्चे तिदन् हस्वत्वञ्च । अवतिवा । अव पूर्ववत्साधुः ॥ अभोददाति । डुदा

अभ्यग्निः

ञ् । आतोनुपेतिकोवा ॥ अब्दपर्ययः । पुं । सर्वोत्से वर्षे द्वितीय वर्षस्यप्रवृत्तौ ॥ अब्दसारः । पुं । कर्पूरप्रभेदे ॥ अब्दुर्गम् । न । जलदुर्गे । अगाधोद केनसर्वतः परिवृतेराज्ञोवासपुरे ॥ अब्धिः । पुं । समुद्रे । आपोधीयन्ते ऽ स्मिन्कर्मण्यधिकरणे चेतिधाञः किः । चतुर्थाङ्के । सरसि । अब्धिकर्फः । पुं । सिन्धुफेने । हिण्डी रे । इत्यमरः । अब्धेःकफइव । अब्धिजः । पुं । विधौ । अब्धेर्जातः । ज नोः डः ॥ अब्धिदीपा । स्त्री । पृथिव्याम् । इतित्रि काण्डशेषः । अब्धिनगरी । स्त्री । कृष्णपुरि । द्वारा वत्याम् । अब्धौ नगरी । अब्धिनवनीतम् । न । शशिनि । अब्धे र्नवनीतमिव ॥ अब्धिफेनः । पुं । समुद्रफेने । अब्धिमण्डूकी । स्त्री । शुक्तौ । मुक्ता खोटे । सीपी इतिभाषा ॥ इतिहे मचन्द्रः । अब्धिशयनः । पुं । नारायणे । अब्धिः शयन मस्य ॥ अभ्यग्निः । पुं । वाडवानने । इतिहेम चन्द्रः ।

अभक्ष्यः

अभ्युत्थम् । त्रि । समुद्रभवे ।
अभक्षः । पुं । सर्पे ॥ इतिचिकाण्डशेषः
॥ त्रि । जलाहारिणि ।
अभ्रमातङ्गः । पुं । ऐरावते । अभ्रमा
तङ्गे ।
अभ्रिः । स्त्री । तीक्ष्णाग्रेलोहदण्डे ।
अभ्रिर्कार्ष्णायसीदद्यात् सर्वेष्वेच्छा
द्विजोत्तम इतिमनुः । अभ्रति । अ
भ्रगत्यासेः इन् ।
अब्रह्मचर्य्यकर्म्म । न । मैथुने ॥ इति-
त्रिकाण्डशेषः ॥
अब्रह्मण्यम् । न । नाब्रह्मण्य अवध्योक्तौ
। वधनार्हतीतिवचसि । ब्रह्मणिसाधुः
तिब्रह्मण्यइतियत् ततोनञ्समा-
सः । ब्रह्मण्याभावे । त्रि । तदति ।
अब्राह्मणः । पुं । अब्राह्मणपदवाच्येषुषट
सु ॥ तेचोक्ताः शातातपेन यथा । अ
ब्राह्मणास्तुषट्प्रोक्ता ऋषिणातत्त्व-
वेदिना । आद्योराजभृतस्तेषांद्वितीय
यः क्रयविक्रयी । तृतीयो बहुयाज्यः
स्याच्चतुर्थोग्रामयाजकः । पञ्चमस्तु
भृतस्तेषांग्रामस्यनगरस्यच । अना
दित्यांतुयः पूर्वां सादित्यांचैवपश्चि
माम् । नोपासीतद्विजःसंध्यांसषष्ठो
ऽब्राह्मण स्मृतः इति ।
अभक्ष्यः । त्रि । भक्षणायोग्येग्राम्यकुक्कु
टादौ । यथा । अभक्ष्योग्राम्यकुक्कु

अभव्यः

टः अभक्ष्योग्राम्य शूकरइतिमहाभा
ष्यम् । एवञ्चग्राम्यकुक्कुटादौ विशेष
निषेधस्येतराभ्यनुज्ञाफलकतया आ
रण्यादिभक्षणे दोषाभावइति विव
रणम् ।
अभद्रः । त्रि । दुःखरूपे ।
अभयम् । न । वीरणांघ्रौ । उशीरे ॥
गर्भवासादि दुःखाभावे ॥ मोक्षे ॥
अशेषभयनिवृत्तिसाधने आत्मदर्श
नेच । त्रि । भयशून्ये । सर्वपरिग्रहशू
न्ये एकाकिनि । आप्तोपदिष्टेऽर्थेस
न्देहंविनाऽनुष्ठानेनिष्ठे । पुं । यावायो
गान्तरे । यथा । उच्चमूलविकोशेषु
वर्त्तेतेगुरुभार्गवौ । अभयाभिधयो
गोयंभयंकरविनाशनइति । अन्यच्च ।
यश्चैकादशीचन्द्रो भानुर्वाप्रबलःशु
भः । अभयोनामयोगोयमरिभूतवि
नाशकृदिति । नभयमस्मात् । आ
त्मनि । आत्मातिरिक्तस्यकस्यचिद-
भावात् ।
अभयडिण्डिमः । पुं । युद्धवाद्यविशेषे
। रणतूर्य्ये । सङ्ग्रामपटहे ।
अभया । स्त्री । हरीतक्यांम् । पञ्चरेखा
। भर्ग्गाग्रेक्तिलेचणलक्षितायाम् ॥
। नेत्ररोगेप्रशस्तेयम् । नभयमस्या ॥
अभवः । पुं । मोक्षे ।
अभव्यः । त्रि । अविनीते । निर्भाग्ये ।

अभिख्या

नभव्यः ।

अभावः । पुं । संरोधे । असत्त्वे । द्वयादिषट्कभिन्ने । स चतुर्विधोयथा । प्रागभावः प्रध्वंसाभावः अत्यन्ताभावः अन्योन्याभावश्चेतितर्कसंग्रहः । संसर्गाभावोऽन्योन्याभावश्चेतिद्विविधोऽभाव इतिभाषापरिच्छेदः ॥ नाशे ॥ त्रि । प्रेमशून्ये । भावहीने । भावस्योयिभावादिरित्याद्यलङ्कारिकाः ।

अभावसम्पत्तिः । स्त्री । चाटुत्वेयथोर्मिप्रियात्ववृद्धौ ॥

अभाषणम् । न । मौने ॥ नभाषणम् । भाषव्यक्तायांवाचि । भावेल्युट् ॥

अभिकथा । इत्थंभूतकथने । आभिमुख्येअभिलाषे । वीप्सायाम् । लक्षणे ॥

अभिकः । त्रि । कामुके ॥ अभिकामयते । अनुकाभिकेति साधुः ॥

अभिक्रमः । पुं । अभीतयोधादेर्युद्धेशत्रुसम्मुखगमने । आरोहणे । इतिहेमचन्द्रः । अभिक्रमणम् । क्रमु° । घञ् । नोदात्तेतिवृद्ध्यभावः । अभिक्रम्यतेकर्मणाप्रारभ्यतेइतिव्युत्पत्त्याकर्मारब्धफले । प्रारंभे ।

अभिकृष्टः । त्रि । अभिसमर्थिते । अभिप्रकाशिते ।

अभिख्या । स्त्री । अभिधाने । शोभायाम् । यशसि । अभिख्यानम् । ख्याप्

अभिघा

कथने चक्षिङादेशोवा । आतश्चोपसर्ग इत्यङ् ॥

अभिगतः । त्रि । सेविते ।

अभिगन्तव्यः । त्रि । अभितःसमासाद्ये । यथाहरामंप्रतिवसिष्ठः । सन्तःसदाभिगन्तव्यायद्यप्युपदिशन्तिन । याहिस्वैरकथास्तेषामुपदेशाभवन्तिसाइति ।

अभिगीतम् । न । शोभनगीते ।

अभिग्रहीतपाणिः । त्रि । संयोजितहस्ते ।

अभिग्रहः । पुं । अभिग्रहणे । अभियोगे । आभिमुख्येनोद्यमे । गौरवे ।

अभिग्रहणम् । ग्रहउपादाने । ग्रहवृदृदित्यप् ।

अभिग्रहणम् । न । चौर्ये । अभिहारे । आभिमुख्येनग्रहणे । अभिग्रहेर्ल्युट् ।

अभिघातः । पुं । प्रहारे । अभिहननम् । हन° । घञ् । हनस्तोचिण्णलोः । हो हन्तेरितिकुत्त्वम् । क्रियाविशिष्टद्रव्यस्य द्रव्यान्तरेण संयोगविशेषोभिघातः । यथोद्यमितनिपतितमुसलस्योलूखलेन संयोग इतिव्याख्यातारः ॥ सम्बन्धे ।

अभिघातिः । पुं । शत्रौ । अभिघातेः क्तिच् बाहुलकात्सिद्धौ ।

अभिघाती । पुं । रिपौ ॥ अभिहन्तुंशी

अभिजा

लः । सुपीतिणिनिः ।

अभिघारः । पुं । अभितः सेचने । घृते ॥ इतिराजनिर्घण्टः ।

अभिचरः । पुं । दोषे । इतिहेमचन्द्रः ।

अभिचारः । पुं । हिंसाकर्मणि । अथर्ववेदोक्तमन्त्रयन्त्रादिनिष्पादितेमारणोच्चाटनादिहिंसात्मकेकर्मणि इतिभरतः । मारणादिफलकेतान्त्रिककर्मयोगविशेषे । सषड्विधः । मारणमोहनस्तंभनविद्वेषणोच्चाटनवशीकरणभेदादितितन्त्रशास्त्रम् । उपपातकविशेषोऽयम् । नाशोऽभिचारतोमास्ति धर्म्मिष्ठानांनसंशयः । अतस्त्रा ह्मणंधार्मिकंभूपंवनितामास्तिकंनरम् । वदान्यंसदयंनित्यमभिचारे न योजयेत् । अभिचरणम् । चरेर्घञ् ।

अभिजनः । पुं । कुले । ख्यातौ । जन्मभूम्याम् । कुलश्लोके । अभिजायतेऽस्मिन् । जनीप्रादुर्भावे । हलश्चेति घञ् । जनिवध्योश्चेति वृद्धिर्न । णिलोपस्थानिवत्त्वाद्वा । अभिजन्यते । कर्मणिघञ् वा । अभितोऽभिमुखोवाजनोजन्मनि ॥ अभिजनोनास यच पूर्वैरुषितमिति भाष्यम् ॥

अभिजनवान् । त्रि । कुलीने । अभिजनोऽस्यास्ति । मतुप् । वत्त्वम् ॥

अभिजातः । त्रि । कुलीने । न्याय्ये ॥

अभिजि

पण्डिते । यथा । नत्वेक्षितव्ययज्ञादैवं स्त्रीपुनामकृतंवदेत् । सङ्कीर्णनाभिजातेपुनाप्रवृद्धेपुसंस्कृतमिति ॥ अभिजायतेस्म । जनीप्रादुर्भावे । गस्यर्थेतिक्तः ॥

अभिजातिकोविदः । पुं । जातिकर्मकोविदे । जातिकर्मणि ।

अभिजित् । न । नक्षत्रविशेषे । उत्तराषाढायाश्चतुर्थांशेश्रवणादिचतुर्दण्डस्यचसंज्ञा । अभिजिदिति । अत्र जातस्यफलं यथा । अतिसुलक्षितकान्तिः संमतःसज्जनानांननु भवतिविनीतश्चारुकीर्त्तिःसुवेशः । द्विजवरसुरभक्तो व्यक्तवाङ्मानवःस्यादभिजितियदिसूतिर्भूपतिःस्वस्ववंशे ॥ इतिकोष्ठीप्रदीपः । यात्रामुहूर्त्तेतरे । यथा । मध्यंव्योमप्रयातेसुरदनलनिभेकेशरे चार्कबिम्बेछायासाध्वीचकान्ता प्रचलतिपुरुषे यत्नतस्तादृशस्या । तावत्तीरेनदृष्टिःकुजकृतमशुभं नैवदृष्टंनयोगः सन्मानारोग्यसम्पत् चिन्तिमर्थंयुवतीतचगन्तालभेत । अभिमुखोभूयजयतिप्रतिपच्चाननेन । जि० । क्विप् । कुतपकालइतिमसिद्धेदिवसस्याष्टमेमुहूर्त्ते । यथा । अपराह्णेतु सम्प्राप्तेअभिजिद्रोहिणोदये । यदवदीयतेजन्तो

अभिधा

स्तद्वयमुदाहृतमिति मत्स्यपुराणे-
अभिज्ञः । त्रि । निपुणे । अभिजानाति ।
क्विप् । अतिथ्योपसर्गदृतिकः ।
अभिज्ञा । स्त्री । आद्ये ज्ञाने । स्मृतौ ।
अभिज्ञायते । ज्ञा० । आतश्चोपसर्गे
इत्यङ् । टाप् ।
अभिज्ञानम् । न । चिह्ने । ज्ञानभेदे ।
अभिज्ञायतेऽनेनेति तथा । ज्ञा० ।
ल्युट् ।
अभिज्ञापकः । त्रि । बोधके ।
अभिडीनम् । न । पक्षिणः आभिमुख्ये
नपुनःपुनःपतने । पक्षि० ।
अभितप्तः । त्रि । पीडिते । अभितस्त
प्तः । तप् । क्विप् ।
अभितष्ठानः । त्रि । साकल्ये । सम्मु
खे । उभयतः । अन्तिके । सर्वतः ।
पर्यभिभ्यां च इत्यभिशब्दात्तसिल् ।
अभिद्रवणम् । न । वेगेनगमने ।
अभिद्रोहः । पुं । आक्रोशे ।
अभिधर्षणम् । न । स्वयंपिशाचभूतादे
रभिसङ्गे । सर्वतोभावेनधर्षणे ।
अभिधा । स्त्री । भट्टमतभावनायाम् ।
आद्ये । वाचके । न्यायसतेनशब्द
शक्तौ । मीमांसकमतेन विधिसमवे
तविधिव्यापारीभूतपदार्थे । अभिधी
नम् । दुधाञ् । आतश्चेत्यङ् ।

अभिन

अभिधानम् । नि । संज्ञायाम् । कथने ।
अभिधीयते अनेनवा । दुधाञ् धारण
पोषणयोः । कर्मणि करणे वा ल्युट् ।
शब्दकोषे । यथा । कृत्तद्धितसमा
सानामभिधानेनियामकम् । इति
विपदेवः ।
अभिधायकः । त्रि । वाचके ।
अभिधेयम् । न । संज्ञायाम् । त्रि । वा
च्ये । शब्दप्रतिपाद्ये । अभिधातुंशक्य
म् । दुधाञ् । अचोयत् । ईद्यति ।
गुणः ।
अभिधा । स्त्री । ग्रहणेच्छायाम् । पर
स्वविषये स्पृहायाम् । परस्वविषये
चौर्यादिनालिप्सायामिति मुकुटी ।
परस्वविषयेवियर्थीबोधामिच्छा-
यामितिरामाश्रमः । विषयप्रार्थना
भिधेतिस्वामी । जिघृक्षाभावेन
भिधेतिकश्चित् । स्वस्यदुःखसेक
त्ये । अभिधानम् । धेआप्यानेआ
तश्चोपसर्गेत्यङ् । टाप् ।
अभिनद्धः । त्रि । बद्धे । बंधा इति भाषा ।
अभिनन्दः । पुं । मुखरोगे । अक्षस्यदि
मुखहेतुर्व्यङ्गपादिःसगुणोपि ।
यथा तद्दुःखकथनादिप्रवृत्तिकार्यदृ-
त्तिर्भोजिछपाअभिनंदःसचेतामसः ।
अभिनन्दः । आनंदः ।

अभिनि

अभिनन्दनः । पुं । बुद्धभेदे । चतुर्थस्तीर्थंकरजिनोयम् । न । स्तवने ॥ त्रि । सर्वतो भावेनानन्दजनके । अभितो नन्दनः ॥

अभिनयः । पुं । विवक्षितार्थप्रतिपत्त्यर्थं समुदायेन शरीरव्यापारे । अभिव्यक्तौ । अन्तर्गतभावस्याभिव्यञ्जके ऽङ्गनेष्टाविशेषे ॥ अभिनयश्चतुर्द्धा । वाचिकाङ्गिकाऽऽहार्यसात्त्विकभेदात् । विशेषो दशरूपकादिष्वनुसंधेयः । अभिनयत्यर्थम् । पचाद्यच् ॥

अभिनवः । पुं । शोभने । त्रि । नूतने । अभिनूयते । णु स्तुतौ । वृदारप् ॥ अभिनवतामरसम् । न । तामरसाख्ये जगतीछन्दोभेदे ॥ अभिनवतामरसं नजजलाय इति लक्षणलक्षिते ॥

अभिनवोद्भिद् । पुं । अङ्कुरे । उद्भिनत्तिभुवम् । भिदिर् विदारणे । सत्सूद्विषेतिक्विप् । अभिनवश्चासावुद्भिच्च ।

अभिनह्यनम् । न । बन्धने । मुसक इति भाषा ।

अभिनिर्मुक्तः । पुं । सूर्यास्तकाले निद्राङ्गते ब्राह्मणादौ ॥ अभिसर्वतःसायंतनेनकर्मणा निश्चयेनमुक्तः । अभिसर्वसायन्तनकर्मनिश्चयेनमुक्तयेनवा ॥

अभिनिर्यायम् । न । विजिगीषोः प्रस्थितौ । गमने । अभिनिर्पूर्वात् या

अभिप

सेर्ख्युट् ॥

अभिनिविष्ट । त्रि । अभिनिवेशविशिष्ट । दुराग्रहग्रस्ते ॥

अभिनिवेशः । पुं । अन्धतामिस्रे । पञ्चमक्लेशे । सचआयुरभावेयैतैः शरीरेन्द्रियादिभिरनित्यैरविवियोगोमाभूदित्याविद्वदङ्गनाबालस्वाभाविकः सर्वप्राणिसाधारणोमरणत्रासरूपोविपर्ययविशेषः । मनोयोगे ॥ आग्रहे । अभितोनिवेशः ॥

अभिनिष्टानः । पुं । अक्षरभाषे । विसर्जनीये । विसर्गे ॥ अभिनिस्तननम् । स्तन० । भावे घञ् ॥ अभिनिस्तनःशब्दसंज्ञायामितिमूर्द्धन्यः ॥

अभिनिष्पत्तिः । स्त्री । सिद्धौ । उत्पत्तौ ॥

अभिनिस्तानः । पुं । अभिनिष्टाने ॥ मूर्द्धन्यामावः ॥

अभिनीतः । त्रि । न्याय्ये ॥ क्रोधने । अमर्षणे ॥ संस्कृते ॥ अभिनीयतेस्म । णीञ् प्रापणे । क्तः ॥

अभिनीतिः । स्त्री । अभिनये ॥

अभिनेता । त्रि । नाटकप्रसिद्धे अभिनयकर्त्तरि । स्वांगी स्वांगवाला इति भाषा प्रसिद्धे ॥

अभिपन्नः । त्रि । अपराद्धे । अभिग्रस्ते ॥ आपन्नते ॥ स्वीकृते । आभिमुख्येन प्राप्ते ॥ अभिद्रुते । अभिपद्यतेस्म ।

अभिम

पदगतौ । । गत्यर्थेतिक: । । कर्मणि वा । । अभिप्रसारी । । पुं । । वेदप्रसिद्धे क्षत्रिय विशेषे । । काचसेनौ । ।

अभिप्राय: । । पुं । । आशये । । मानससम्भौ । । अभिप्रयणम् । । प्रीङ्तर्पणे । । घञ् । ।

अभिमेत: । । त्रि । । सम्मते । । अभिप्रायविषयीभूते । । अभीष्टे । । अभित: प्रेतिसम्प्रतिम् । । इण्० । । क्त: । ।

अभिभव: । । पुं । । अनादरे । । जये । । गर्वे । । नाशे । । भावे घञ् । ।

अभिभूत: । । त्रि । । गर्वाप्ते । । पराभूते । । आक्रान्तगर्वे । । इतिकर्त्तव्यतामूढे । । आकुलीकृते । । अभिभूयतेस्म । । अकर्मकत्वात्कर्त्तरि क्त: । ।

अभिभूति: । । स्त्री । । निकारे । । अवज्ञायाम् । ।

अभिमत: । । त्रि । । सम्मते । । आदृते । । अभीष्टे । ।

अभिमन्त्रणम् । । न । । निमन्त्रणे । । आह्वाने । । आकारणे । । आङ् मन्त्रि० ल्युट् । ।

अभिमन्यु: । । पुं । । अर्जुनात्सुभद्रायामुत्पन्ने । । अभिमन्युसुत: । । पुं । । परीक्षिते । । आत्मरक्षिणि । । अभिमर: । । पुं । । युद्धे । । वधे । । स्वबलसाध्यधने । । इतिमेदिनीकर: । । सङ्केतस्वनिर्गमे । । स्वबलसाध्यधने । । इति हेमचन्द्र: । । प्राणनिरपेक्षोयोद्धव्यहेतोर्योऽस्त्रिनंवा योधयति सोऽभिमरइत्यके । ।

अभिमर्द: । । पुं । । मर्दे । । युद्धे । । मल्लयुद्धयोरिति हेमचन्द्र: । । पीडने । । अभिमर्दनम् । । मृदचोदे । । घञ् । ।

अभिमर्श: । । पुं । । घाते । ।

अभिमर्शित: । । त्रि । । स्पृष्टे । ।

अभिमान: । । पुं । । अहङ्कारदक्षौ । । धनस्वजनादिनिमित्ते मह्दधारणहेतौ गर्वविशेषे । । आत्मन्यत्यन्तपूज्यत्वातिशयाध्यारोपे । । अर्थादिदर्पे । । आदिना कुलपशुगुणादिग्रह: । । ज्ञाने । । प्रणये । । हिंसायाम् । । अभिसर्वतो मान: । । अभिमननम् । । मनज्ञाने । । घञ् । । मीञ्हिंसायांवा । । मीनाती त्यात्वम् । ।

अभिमानितम् । । न । । सुरते । । त्रि । । अभि

अभिमा

न्यान्मिथ्याचारात् । । मैत्रिक: सङ्घ एवेतिमाधव: । ।

अभिमन्यु: । । पुं । । अर्जुनात्सुभद्रायामुत्पन्ने । ।

अभिमन्युसुत: । । पुं । । परीक्षिते । । आत्मरक्षिणि । ।

अभिमर: । । पुं । । युद्धे । । वधे । । स्वबलसाध्यधने । । इतिमेदिनीकर: । । सङ्केतस्वनिर्गमे । । स्वबलसाध्यधने । । इति हेमचन्द्र: । । प्राणनिरपेक्षोयोद्धव्यहेतोर्योऽस्त्रिनंवा योधयति सोऽभिमरइत्यके । ।

अभिमर्द: । । पुं । । मर्दे । । युद्धे । । मल्लयुद्धयोरिति हेमचन्द्र: । । पीडने । । अभिमर्दनम् । । मृदचोदे । । घञ् । ।

अभिमर्श: । । पुं । । घाते । ।

अभिमर्शित: । । त्रि । । स्पृष्टे । ।

अभिमान: । । पुं । । अहङ्कारदक्षौ । । धनस्वजनादिनिमित्ते मह्दधारणहेतौ गर्वविशेषे । । आत्मन्यत्यन्तपूज्यत्वातिशयाध्यारोपे । । अर्थादिदर्पे । । आदिना कुलपशुगुणादिग्रह: । । ज्ञाने । । प्रणये । । हिंसायाम् । । अभिसर्वतो मान: । । अभिमननम् । । मनज्ञाने । । घञ् । । मीञ्हिंसायांवा । । मीनाती त्यात्वम् । ।

अभिमानितम् । । न । । सुरते । । त्रि । । अभि

अभिये

मानयुक्तो। अभिमानःसञ्जातोऽस्य । तारकादित्वादितच् ।
अभिमानी। त्रि। मानिनि। सर्वतो मानास्पदे। अभिमानोऽस्यास्ति ।
इनिः। अभितोमानीषा।
अभिमुखः। त्रि। सम्मुखे। अभिगतो मुखम्। अत्यादयः क्रान्ताद्यर्थेद्वितीययेतिसमासः।
अभिरूढः। त्रि। संरूढे॥
अभियातः। त्रि। स्वयंप्राप्ते॥
अभियुक्तः। त्रि। परैरुद्धे। तत्परे। मानिनि। अभियोगविषयीभूतेऽर्थे। सामीतिख्यातेः। प्रतिवादिनि। यथा। अभियुक्तोऽभियोगस्यमदिक्कुर्या दपह्नवम्। मिथ्यातत्तुविजानीया दुत्तरंव्यवहारत इतिनारदः। अभियोयुक्तः॥
अभियोक्ता। पुं। अर्थिनि। विवादस्य कर्त्तरि। फरियादीतिइतरजनेषुख्याते। यथा। अभियोक्तोऽभियोगस्यमदिक्कुर्या दपह्नवम्। मिथ्यातत्तुविजानीया दुत्तरंव्यवहारत इतिनारदः।
अभियोग। पुं। अन्यकृतसम्बन्धस्य ज्ञानेवेदने। अन्येनविरोधे स्वार्थे सम्बन्धितयाराजसभी वे कथने। नालिश इतिइतरजनेषुख्याते। सचद्वि

अभिला

विधः। यथाह्नेनारदः। अभियोग स्तुविज्ञेयः शङ्कातत्त्वाभियोगतः। अ ङ्गाऽसतांतुसंसर्गात्। तत्त्वंहोढाभि दर्शनादिति। अभिग्रहे। अंगीकारे। अभिगम्याकर्मणे। शपथे। आग्रहे।
अभियोजनम्। युजिर्योगे। घञ्। उद्योगे॥
अभिरक्षा। स्त्री। सर्वतस्त्राणे।
अभिरतः। त्रि। रतौ।
अभिराहुः। त्रि। आराधिते।
अभिरामः। त्रि। सुन्दरे। मनोज्ञे। प्रिये। अभिरमन्तेऽस्मिन्। रमः। अधिकरणे घञ्॥ स्त्री। अभिरामकथा।
अभिरूपः। पुं। हरे। विष्णौ। इन्द्रे। कामे॥ त्रि। बुधे। पण्डिते। मञ्जुले। सुन्दरे। मनोहरे॥ अभिलक्ष्यं रूपमस्य॥ सदृशे॥ ममाहमेवाभिरूपं इतिलक्ष्यम्॥
अभिलषितः। त्रि। अभीप्सिते।
अभिलाषः। पुं। सङ्कल्पाङ्गवाक्ये॥ यथा। काम्याभिलाषसहितःकुरुतेलजलत्यागरूपः सङ्कल्पःशास्त्रार्थइतिप्रक्रमाधिकरणम्॥ अभिलष्यतेऽनेनेतिव्युत्पत्त्याभाक्करणेऽभिपूर्वा लषेर्घञ्॥ शब्दे इतिविकाण्डशेषः॥

अभिवा

अभिलावः । पुं । छेदने ॥ अभिलवनम् । लूञ् छेदने । निरभ्योः पूल्वोरिति घञ् ॥ पुं । लोभे । मनोरथे ॥ अभिलषणम् । लषकान्तौ । घञ् । भोग्यवस्तुनि । अभिलष्यते । किर्मि घञ् ॥ सङ्गमेच्छायाम् ॥ अभिलाषी । वि । इच्छावति । अभिलाषयुक्ते ॥ अभिलाषुकः । वि । लुच्ये । अभिलष्यति । लषकान्तौ । लषपतपदेत्युकञ् ॥ अभिलासः । पुं । अभिलाषार्थे । अभिलसनम् । लसश्लेषक्रीडनयोः । घञ् ॥ अभिवादः । पुं । प्रणामे । अभिवदनम् । वदेर्घञ् ॥ अभिवादकः । वि । प्रणामयुते । वन्दारौ । वन्दनशीले । अभिवादयति । वदिअभिवादनस्तुत्योः । ण्वुल् । अभिवादनम् । न । पादिग्रहणे । नामोच्चारणपूर्वकसंस्कृतप्रयोगेण नमस्कृतौ । वाचानेतौ ॥ अभिमुखीकरणार्थं वादनंवदनम् । वदवाक्यदेशयोः । चुरादिः । ल्युट् । अभिमुखे नंवाचते आभीःकार्यतेऽनेनवा । करणे ल्युट् । अभिवादनविधिमाह मनुः । अभिवादात् परंविप्रो ज्यायांसमभिवादयन् । असौनामाहमस्मीतिस्वंनामपरिकीर्तयेत् । नामधेयेस्त्रियंकेचिदभिवादंनजानते । तान् प्राज्ञोऽहमितिब्रूयात्स्त्रियःसर्वास्तथैवच । भोःशब्दंकीर्तयेदन्ते स्वस्यनाम्नोभिवादने । नाम्नां स्वरूपभावोऽहंभोभावश्चर्षिभिः स्मृतः । तद्यति । तथाच अभिवादये शुभशर्माहमस्मिभोः इत्त्यभिवादनवाक्यम् । तन्निषेधोयथा । समिदार्युदकुम्भपुष्पान्नहस्तोनाभिवादयेदब्राह्मण्येवियुक्तमितिवैधायनः । जपंयज्ञंजलस्रुक्स्रुवसमित्पुष्पकुशानेसोत्तरीयदन्तकाष्ठंभक्ष्यंस्त्रवहस्तोनाभिवादयेदिति स्मृत्यन्तरात् । अन्यत्रापि समित्पुष्पकुशान्यस्रुद्रव्याच्युतपाणिकः जपंहोमंचकुर्वाणोनाभिवाद्यो द्विजोभवेदिति ॥

अभिवादः । वि । अभिवादनार्हे ।

अभिविधिः । पुं । तेनसहेत्यर्थे । व्याप्तौ ।

अभिविनीतः । वि । सर्वतःशिक्षिते ।

अभिविमानम् । न । आभिमुख्येनविश्वं मिमीते जानातीतियोगाद्ऐश्वर्यात्मनि ।

अभिव्यक्तः । वि । सर्वतःप्रत्यक्षे ।

अभिव्यक्तिः । स्त्री । प्रत्यक्षे । उद्भूते ।

अभिशब्द

अभिष

अभिव्याप्तिः । स्त्री । साकल्येन योगे । सम्मूर्छने । सर्वतोव्याप्तौ ॥ अभिव्यानयम् । आप्नुव्यासौ । क्तिन्नादिभ्य इति क्तिन् ॥

अभिशंसनम् । न । अभिकथने ।

अभिशपनम् । न । अभिशापे ।

अभिशप्तः । त्रि । शापग्रस्ते ॥ प्राप्ताभिशापे ॥

अभिशस्तः । पुं । स्त्री । अभितःशस्तः प्रशस्तः । वि । सत्यापवादग्रस्ते । परस्त्रियां परपुरुषेवा मैथुनं प्रतिमिथ्यादूषिते । शापग्रस्ते । आचारिते । अनिर्णीतेपितस्मिन्महापातकादौ ॥ जातेभिशापे । अभिशस्यतेस्म । शंसुहिंसायाम् । क्तः । यस्यविभाषेतिनेट् । घृषिशसीदितिवा ॥

अभिशस्तिः । स्त्री । लोकापवादे । प्रार्थनायाम् । याच्ञायाम् ॥ अभिशंसनम् । शंसुस्तुतौ याचनेच । स्त्रियां क्तिन् ॥

अभिशापः । पुं । मिथ्याभिशंसने । स्वर्गसेर्यत्वयोः कृतमित्यादिमिथ्यादूषणाभिधायकेवाक्ये । ब्रह्मघ्नगुरुतल्पगादुसिद्धानामनिष्टाभिशंसने ॥ अभिशपनम् । शपआक्रोशे । घञ् ॥

अभिषङ्गः । पुं । पराभवे । आक्रोशे । शपथे । सर्वतोभावेनसङ्गे ॥ भूताद्या

अभिषे

वेशे । अभिषञ्जनम् । षञ्जसङ्गे । घञ् । उपसर्गादितिषः ॥

अभिषवः । पुं । अवभृथस्नाने ॥ यज्ञे । स्नपने । पीडने । मद्यसन्धाने । सुराकरणे । सुरोत्पादनप्रकारे । स्नाने । सुत्यायाम् । अभिषूयते अभिषवणंवा ॥ षुञ् अभिषवे । क्तदोरेप् । उपसर्गादितिषः । नः । कीञ्जिके ॥ इतिहस्तायुधः ॥

अभिषवणम् । न । स्नाने । षुञ्० । ल्युट् ॥

अभिषह्य । ल । प्रसह्यार्थे । अभिषोढ्वा । षहमर्षणे । क्त्वा । ल्यप् ॥

अभिषिक्तः । त्रि । अभिषेचिते ॥

अभिषिषेणयिषुः । त्रि । सेनयाऽभियातुमिच्छति । सत्यापपाशेत्यादिना सेनायन्दाशिचि सनि सनाशंसेत्युः । स्यादिष्वितिधात्वभाससकारयोः षत्वम् ॥

अभिषुतम् । न । कार्ञ्जिके । अभिषूयतेस्म । षुञ् अभिषवे । क्तः । उपसर्गादितिषत्वम् ॥

अभिषेकः । पुं । शान्तिस्नाने । स्नाने ॥ ब्रह्माभिषेकादौ । पूर्णाभिषेकशब्दाभिषेकाराज्याभिषेकादिपदवाच्ये अधिकारमात्रार्थंस्नाने ॥ मार्जने । अभिषेचनम् । षिच्० । घञ् । जले ॥ अभिषिच्यतेऽनेन घञ् ।

अभिस

अभिषेचनम् । न । अभिषेके । षिच° । ल्युट् । अभिषेचनम् । न । राज्ञोऽरिसम्मुखग-तौ । युद्धयात्रायाम् । यत्तेनयाभिग-मनमरौ तदभिषेचनम् । सेनयाऽ-भियानम् । सङ्ख्यामेतिसेनाशब्दोऽपि च । ल्युट् । उपसर्गोक्तुनेतीतिप-त्वम् । अभिष्टुतम् । त्रि । स्तुते । वर्णिते । ईडि-ते । अभिष्टूयतेस्म । ष्टुञ् स्तुतौ । क्तः । अभिष्यन्दः । पुं । अतिवृष्टौ । आस्रावे । अक्षिगदविशेषे । अभिष्यंदनम् । स्यंदू° घञ् । अभिष्यन्दिरनघम् । न । आखानगरे । प्रधाननगरसन्निहितनगरे । इतिज-टाधरः । अभिष्वङ्गः । पुं । उत्कटरागे । अन्यस्मि-न्हंवुद्धौ । अभिष्वङ्गनम् । ष्वञ्° । घञ् । अभिसंरब्धः । त्रि । कुपिते । अभिसंवृत्तिः । स्त्री । व्यवहारे । अभिसन्तापः । पुं । युद्धे । अभिशापे । अभितः सन्तापोऽत्र । अभिसन्धः । पुं । सत्यत्वाभिमाने । अभिसन्धानम् । न । यत्ने । प्रतारणे । अभिसन्धिः । पुं । अभिसन्धाने । उद्देशे । अभिसम्पातः । पुं । युद्धे । अभिसम्

अभिहि

-तनम् । पतङ्गगतौ । घञ् । अभिसरः । त्रि । अनुचरे । सहाये । अभितः । सरति । खगतौ । पचाद्य-च् । अभिसर्जनम् । न । दाने । वधे । अभि-पूर्वात् सृजेर्भावे ल्युट् । अभिसारः । पुं । वले । युद्धे । सहाये । साधने । स्त्रीपुंसयोरन्यतरस्याऽन्य-तरार्थं सङ्केतस्थानगमने । अभिस-रणम् । सृ° । घञ् । अभिसारिका । स्त्री । नायिकाविशेषे । सङ्केतस्थलेस्वयङ्गमनकर्त्र्याम् । एवं प्रियगमनकारयित्र्याम् । कान्तार्थि-नीतुयायातिसङ्केतंसाभिसारिकेत्य-मरः । भरतश्च । स्त्रिलाज्ञाभये श्लिष्टामदनेमदनेनच । अभिसारय तेकान्तंसाभवेदभिसारिकेति । अभि-सरति । खगतौ । ण्वुल् । अभिसारिणी । स्त्री । अभिसारिकायाम् । अभिसृष्टः । त्रि । दत्ते । अभिहतः । त्रि । विद्धे । ताडिते । अभिहारः । पुं । अभियोगे । अभिग-म्याक्रमणे । अभिग्रहणे । आभिमु-ख्येन ग्रहणे । चौर्ये । कवचादिधार-णे । सञ्चहने । सञ्चये । अभिहरण-म् । हृञ् हरणे । घञ् । अभिहितम् । त्रि । वर्णिते । प्रोक्ते । अ

अभीरु

भिधीयतेस्म । डुधाञ्धारणपोषण
योः । क्तः । दधातेर्हिः ॥ अभीकः । त्रि । कामुके । कूरे । निर्भ
ये । पुं । कवौ । अभिकामयते । अ
नुकाभिकेतिसाधुः । स्त्रीभिनि
अभीच्णम् । नित्ये । अव्ययम् ॥ भृ
शे । पौनःपुन्ये । अभिच्णोति । च्णु
तेजने । वाहुलकादमुः । अन्येषाम
पीतिदीर्घः ॥ यद्वा अभिच्णवनम् ।
च्णुतेजने । डमः । पृषोदरादित्वाद
भेर्दीर्घः ॥ प्रीतौ । प्रकर्षे ॥
अभीच्णम् । न । भृशे । पौनःपुन्ये ।
नित्ये । सर्वदार्थे । त्रि । भृशयुक्तक्रि
यायाम् । नित्ययुक्तक्रियायाम् ॥
अभीतः । त्रि । अभिव्याप्ते । अभि पूर्वात
दृणातेः । अभितइतोवा ॥ निर्भये ॥
नभीतः ॥
अभीप्सितम् । त्रि । वाञ्छिते । अभीष्ट
मभ्यासुसिष्यतेस्म । आप्नृव्यासी
सनन्तः । आप्नोतेर्धामीत्तः ॥
अभीरः । पुं । आभीरे । गोपे । अभि
ईरयति । ईरगतौकम्पनेच । पचा
द्यच् ॥
अभीरुः । त्रि । निर्भये । स्त्री । गतमू
ल्याम् । नभीरुः । स्थिरपत्वात् ॥
अभीरुपत्री । स्त्री । गतमूल्याम् । अ
भीरुणि पत्राण्यस्याः । पाककर्णेति

अभूता

ङीषि ॥
अभीगुः । पुं । ग्रहे । किरणे । रश्मौ ॥
अभीषङ्गः । पुं । आक्रोशने । व्याप्ते । षि
ञ्जसङ्गे । घञ् । उपसर्गस्यघञीति
दीर्घः ॥
अभीषुः । पुं । किरणे । अश्वास्यरज्जौ ।
ग्रहे । कामे । अनुरागे । त्रि ।
इच्छति । ईषतेर्हिनस्ति ईष्यतेवा ।
ईषगतिहिंसादर्शनेषु । ईषेः किच्चे
च्युः । आदेरिकारादिश्च । अभिग
तईषुः । प्रादियोगतेति समासः ॥
अभीष्टः । त्रि । ईप्सिते । प्रिये । अभि
तइष्यतेस्म । इषुइच्छायाम् । क्तः ॥
अभीष्टा । स्त्री । रेणुकाभिधगन्धवस्तु
नि ।
अभुक्तः । त्रि । उपवासिनि । यथा अभु
क्तस्यदिवानिद्रापापाणुमपिजीर्यतो-
ति । अकृतभोजनेवस्तुनि ।
अभुक्तमूलः । पुं । न । ज्येष्ठान्त्यघटी च
तुष्टयसहितमूलाद्यघटीचतुष्टये ।
ज्येष्ठान्त्यैकघटीसहितमूलाद्यघटि
काद्वये ॥ ज्येष्ठान्त्यघटिकाद्वसहित
मूलादिघटिकार्द्ध ॥ ज्येष्ठान्त्यपञ्चघ
टिकासहितमूलाद्यवसुनाडिकासु ॥
अभूतः । त्रि । अविद्यमाने ॥
अभूताभिनिवेशः । पुं । असतिअस्तित्व
निश्चये ॥

अभ्यङ्गः

अभेदः । पुं । ऐक्ये । अवियोगे ॥ नभेदः ॥ यथा ॥ रत्नयोर्ङलयोस्तद्व-
यवोर्बधयोरपि । शसयोर्मनयोश्चा-
न्ते सविसर्गावसर्गयोः । सबिन्दुका-
बिन्दुकयोःस्याद्भेदेन कल्पनमिति
॥ यथा वा । गुणगुणिनोः क्रियाक्रिया
वतोश्चाभेदः ॥

अभेद्यम् । न । हीरके ॥ त्रि । अभेद
नीये ॥

अभोगः । त्रि । भोगशून्ये । भोगानर्हे
॥ नास्तिभोगोयस्य ॥

अभोजनम् । न । भोजनाभावे । उप
वासे । यथा । अजीर्णे भोजनंवेषां
जीर्णेचेषामभोजनम् । रात्रावभो
जनंयेषांतेषांनश्यन्तियातवः इतिवै
द्यकम् ॥ अपिच । वेदादिहितानां नि
त्यानां कर्मणां समतिक्रमे । स्नातक
व्रतलोपेच प्रायश्चित्तमभोजनमि-
तिमलमासतत्त्वम् ॥

अभ्यक्तः । त्रि । कृततैलाभ्यंगे ॥ अभि
तोऽक्तः ॥

अभ्यग्रम् । त्रि । आसन्ने । समीपे । अ
भिमुखमग्रमस्य ॥

अभ्यङ्गः । पुं । तैलमर्दने । स्नेहने ।
यथा । तैलमल्पंयदङ्गेषु न चस्याद्बहु
तर्पणम् । सामार्टिः पृथगभ्यंगोम
लकादौ प्रकीर्त्तितः । अभ्यङ्गमाच

अभ्यसि

रेन्द्रियत्वं सजराश्रमवातघ्नो । शिरः
श्रवणपादेषु तं विशेषेण शीलये दि
त्यायुर्वेदः । पादगते वेशिरे । चक्षु
षि सच्चक्षुर्हितार्थिना-
मुपदिष्टोऽभ्यङ्गः करणीयः । कफप्रसक्तकृ
तमेदर्वमनालीर्णिभिर्नोभ्यङ्गः कर-
णीयः । अपिच । मूर्द्धिदत्तं यदातैलं
भवेत्सर्वाङ्गसङ्गतम् । स्रोतोभिस्त
र्पयेद्वायू अभ्यङ्गस्तच्चरेत इति ।
तैलादिना शिरस्सहितदेहमर्दने ॥

अभ्यञ्जनम् । न । तैले । अभ्यङ्गे ॥ स
र्वापहस्तानें ॥ अभितःअञ्जनम् ।

अभ्यधिकः । त्रि । सर्वोत्कृष्टे ॥

अभ्यनुज्ञा । स्त्री । अनुमतौ । अभितः
अनुज्ञा ॥

अभ्यनुज्ञातः । त्रि । आभिमुख्येनज्ञाते ॥

अभ्यनूक्तम् । त्रि । प्रकाशिते ॥

अभ्यन्तरम् । न । अन्तराले । मध्यमा
वे । अभिगतमन्तरम् ॥

अभ्यमितः । त्रि । रोगिणि । अभ्य
मेक्ष । अमरोगे । क्तः । घुरादीनां
णिचोवैकल्पिकत्वात् णिजभावे इट
म् । अभ्यमतिक्षया । अमगत्यादौ ।
गत्यर्थेतिक्तः । रुग्यमत्वरेतिवेट ॥

अभ्यमित्रीणः । त्रि । अभ्यमित्र्ये । अ-
भ्यमित्रमसंगामी । अभ्यमित्र्येच्छ
चेतिखः ।

अभ्यव

अभ्यमित्रीयः । त्रि । अभ्यमित्रे । अभ्यमित्र्यो । अभिमित्रमभिगामीति । अभ्यमित्राच्छ चेतिछः । अभिमित्राभिमुखंसुष्ठुगच्छतीत्यर्थः ॥

अभ्यमित्र्यः । त्रि । स्वशक्तितःशत्रोरभिमुखंगच्छद्वीरे । अभ्यमित्रीणे । अभिमित्राभिमुखम् । लक्षणेनाभिप्रती इत्यव्ययीभावः । अभ्यमित्रमभिगामी । अभ्यमित्राच्छचेतियत् ॥

अभ्यर्णम् । त्रि । समीपे ॥ अभ्यर्दतेऽभ्यर्दतिस्योतिर्वा । अर्दगतौ । कर्मणिकर्तरिवाक्तः । अभेरभावविदूर्यइतीडभावः । रदाभ्यामितिनस्तस्यचणत्वम् ॥

अभ्यर्दितः । त्रि । पीडिते । अभिपूर्वाद्दृदेः क्तः । इट् ॥

अभ्यर्हणीयः । त्रि । पूज्ये ॥

अभ्यर्हितः । त्रि । उचिते । श्रेष्ठे ॥

अभ्यवकर्षणम् । न । शस्त्रादेः समुत्पाटने । निर्हारे । शस्त्रादेर्युक्त्यानिःसारणे । अभ्यवकृषेर्ल्युट् ॥

अभ्यवस्कन्दः । पुं । रिपोराक्रमणे । निःशक्तीकरणाय शत्रुभिर्दीयमानेप्रहारे । अभ्यासादने । प्रपाते ॥

अभ्यवस्कन्दनम् । न । रिपोराक्रमणे । अभ्यासादने । प्रहारादिना शत्रोर्निःशक्तीकरणे । बलादाक्रमणे इतिस्वा

अभ्याग

मी । शत्रोःसम्मुखंगमने ॥ स्कन्दिर्गतिशोषणयोः । ल्युट् ॥

अभ्यवहारः । पुं । भक्षणे । संचभक्ष्यभोज्यलेह्यपेयचोष्यभेदेन पञ्चविधः ॥

अभ्यवहृतभुक् । त्रि । भुक्ते ॥ अभ्यवहियतेस्म । क्तः ॥

अभ्यसनम् । न । अभ्यासे । पौनः पुन्येनचिन्तने करणेच ॥

अभ्यसूयकः । त्रि । गुर्वादीनां वैदिकमार्गस्थानां कारुण्यादिगुणेषु प्रतारुण्यादिदोषारोपके । अभितोऽसूयकः ॥

अभ्यसूया । स्त्री । गुणेषुदोषारोपे ॥ अभ्यसूयनम् । असूङ् असूयायाम् । कंगुङ्वादित्वाद्यकिअप्रत्ययादित्यः ॥

अभ्याकाङ्क्षितम् । न । अलीकाभियोगे । मिथ्यादावा इतिख्याते । अभ्याख्याने । चि । ईप्सिते । अभितः आकाङ्क्षितम् ॥

अभ्याख्यानम् । न । मिथ्याभियोगे । शतंमे धारयसीत्यादिमिथ्योद्भावने । मिथ्यावादे । अभ्याङ्पूर्वाच्चक्षिङोभावेल्युट् ॥

अभ्यागतः । पुं । अतिथौ । दृष्टपूर्वेगृहागते । त्रि । सम्मुखागते ॥ अभितआगतः । आभिमुख्येन आगतोवा ॥

अभ्यास

अभ्यागमः । पुं । विरोधे । समरे । अन्तिके । अभिघाते । अभ्युद्गमने । भोगे । स्वीकारे । फलसम्बधे । अभ्यागमनम । गत्यागतौ । ग्रहवृद्धित्वप् ॥

अभ्यागारिकः । त्रि । कुटुम्बव्याप्ते । पुंवदारादिपोषणव्यग्रे । अभ्यागारेनियुक्तः । अगारान्ताट्ठन् । अभिअधिक आगारिकोवा ।

अभ्याघातः । पुं । चैर्यार्थनर्थो पदेशे ।

अभ्यात्तः । त्रि । अभिव्याप्ते । व्याप्यर्थस्यानेतेः कर्त्तरि कर्मणिवा निष्ठा ।

अभ्यादानम । न । आरम्भे । आभिमुख्येनादानम ।

अभ्यान्तः । त्रि । रोगिणि । अभ्यस्यते स्म । अमरोगे । क्तः । चुरादीनांणिचोवैकल्पिकत्वात् णिच्पक्षे ॥ अमतिस्मावा । अमगत्यादौ । गत्यर्थेतिक्तः । रूप्यमत्वरेतिवेट् । इडभावे अनुनासिकस्येतिदीर्घः ।

अभ्यामर्दः । पुं । रणे । समरे । अभ्यामर्दनम । मृदचोदे । घञ् ।

अभ्याशः । पुं । अध्यशने । अन्तिके । अभ्यश्यते । अशूव्याप्तौ । घञ् ।

अभ्यासः । पुं । अभ्यसने । आवृत्तौ । आकर्णनं विचारोजपः शिष्येभ्योदानमावृत्तिश्चेति पञ्चविधोऽभ्यासोभवति ॥ खुरभ्यास । शराभ्यासे । पुनःप्रयोगे । संस्कारबाहुल्ये । दृढतरसंस्कारे । षड्विधलिङ्गेषु द्वितीयेलिङ्गे । यथोक्तः । प्रकरणप्रतिपाद्यस्य तन्मध्ये पौनःपुन्येनप्रतिपादनमभ्यासः । यथाछांदोग्येषष्ठेप्रपाठके अद्वितीयस्यवस्तुनोमध्ये तत्त्वमसीति नवकृत्वः प्रतिपादनमिति । विजातीयप्रत्ययानन्तरिते सजातीयमप्रत्ययव्यवहिते । अतिपरिचये । त्रि । अन्तिके । अभ्यासोदति । अन्येभ्योपीतिडः ॥

अभ्यासयोगः । पुं । एकस्मिन् प्रतिमाद्यालम्बने सर्वतः समाहृत्य चेतसः पुनःपुनः स्थापनमभ्यासस्तत्पूर्वकेसमाधौ ।

अभ्यासादनम । न । रिपोरत्यर्थंनिःशक्तीकरणे । अभ्यवस्कन्दने । अत्रोःसम्मुखगमने । यद्यपिशरणादौ । चुरादिः । ल्युट् ॥

अभ्याहारः । पुं । अभिग्रहणे । चार्थे ॥ आभिमुख्येनाहरणम । हृञ्हरणे । घञ् ।

अभ्याहितः । त्रि । उपचिते । इन्धनैरुपचितेग्नौ पुं ।

अभ्युक्तः । त्रि । प्रकाशिते

अभ्युत्थानम । न । गौरवेत्यमत्युद्गमने । गौरवेदृष्ट्वाऽऽसनादेरुत्थाने ।

अभ्युप

उद्यमे । उद्गमे ॥ आभिमुख्येनउत्था
नम् ॥
अभ्युत्पतनम् । न । आभिमुख्येनोत्प-
तने ॥
अभ्युदयः । पुं । पराक्रमे ॥ वृद्धिश्राद्धे ॥
अभीष्टानांकार्याणामाभिमुख्येनोद्
यः प्रादुर्भावोयेनेतिविग्रहः ॥ सर्वतो
भावेनधनजनादीनांवृद्धौ ॥ यथा ।
राजन्नभ्युदयोस्तु वल्लनकवे हस्तेकि
मास्तेतवस्तोकैः कस्यकवेरमुष्य कृ
तिनस्तत्पद्यतांपद्यते । किन्त्वासा
मेरविन्दसुन्दरद्यां द्राक्चामरान्दो
लनादुद्वेल्लद्भुजवल्लिकङ्कणझणत्कारः
क्वचिद्वार्यताम् ॥ अस्यपूर्वार्द्धंवल्लन
कविकण्ठराजयोर्वाक्यं शेषार्द्धंका
लिदासस्य ॥
अभ्युदितः । त्रि । सूर्योदयकालेनिद्रा
ङ्गते । सुप्तेयस्मिन्सूर्यउदितस्तस्मिन्
॥ अभिसर्पतः उदितश्चयेन इतं गतं
प्राप्तस्तत्कर्मास्मात् । उदिते । प्र
काशिते ॥
अभ्युद्यतम् । त्रि । अयाचितोपनीते ऽ
न्नादौ । आभिमुख्येन स्थापिते ॥
अभ्युपगतः । त्रि । स्वीकृते । अभ्युपग
म्यतेस्म । गम्लृगतौ । क्तः । अभ्युदिते ।
अभ्युपगमः । पुं । स्वीकारे । अङ्गीकारे
। समीपागमने । अन्तिकसमागमे ।

अभ्युषः

अभ्युपेत्युपसर्गद्वयपूर्वाद्गमे र्घञ्वृद्ध-
निश्चिगमश्चेत्यप् ॥
अभ्युपगमसिद्धान्तः । पुं । न्यायाश्रयसि
द्धान्तविशेषे ॥ यथा । अपरीचिता
भ्युपगमात्तद्विशेषपरीक्षणमभ्युप-
गमसिद्धान्तः । १५ । ३१ । अपरीचि
तस्य साक्षादुक्तस्य विशेषपरी
क्षणं विशेषधर्मकथनम् । अभ्युपगमा
दिति । तापकक्षे पञ्चमी अभ्युपगम
स्तापकमित्यर्थः । विशेषपरीक्षान्द्रा
यते, सूत्रकृतोऽभ्युपगतमिदमिति ॥
तथाच साक्षादुक्ताभ्युपगमो ऽ
भ्युपगमसिद्धान्तः । यथा मनसइन्द्रि
यत्वमिति ॥
अभ्युपपत्तिः । स्त्री । अनुग्रहे । हितस
म्पादनाहितनिवारणमहत्तौ ॥ अ
भ्युपपदनम् । पद्गतौ । क्तिन् ॥
अभ्युपायः । पुं । स्वीकरे । इतिहेमच
न्द्रः ॥ उपाये । यथा । तत्स्वीकृतव्य
तिकरे कदङ्काभ्युपायइतिकाव्यप्रका
शः ॥
अभ्युपायनम् । न । उपढौकनद्रव्ये । उ
पायने ॥ यथा । तानानयसमं गोपै
र्नन्दाद्यैः साभ्युपायनैरितिविष्णुभा
गवतम् ॥
अभ्युपेतः । पुं । उपगते । स्वीकृते ॥ ।
अभ्युषः । पुं । ईषत्पक्वे । भर्जिते ।

अभ्रक

हरितयवादौ । पौलौ । अभ्योषति । उषदाहे । इगुपधेतिकः । अभ्यूष्यतेवा । घञ्र्थे । कः । अभ्यूषः । पुं । आपके । अभ्यूषे । अभ्यूषति अभ्यूष्यतेवा । ऊषरुजायाम् । इगुपधेतिकोवाघञ्वा ।

अभ्यूहितः । वि । ज्ञाते । अभितः ऊहितः ॥

अभ्योषः । पुं । अभ्यूषे । पौलौ ॥ अभ्योषति । उषदाहे । पचाद्यच् । गुणः ।

अभ्रम् । न । मेघे ॥ आपोविभ्रत्ति । डुभृञ् । मूलविभुजादित्वात्कः ॥ यद्वा । नभ्रंश्यन्त्यापोऽस्मात् । भ्रंशुअधःपतने । अन्येभ्योपीतिडः । अभ्रकपाली । कार्ष्णे । गगने । नविभेत्ति किञ्चित् । मूलविभुजादित्वात्कः । यद्वा । आपोभ्रंश्यन्त्यस्मात् । अन्येभ्योपीतिडः । यद्वा । अभ्रतिस्वैर्यंगच्छति । अभ्रवभ्रमभ्रचरगत्यर्थाः । अच् । यद्वा नभ्राजते । भ्राजृदीप्तौ । अन्येभ्योपीतिडः ॥

अभ्रंलिहः । पुं । वायौ । वि । मेघस्पर्शिनि । उच्चतरे । अभ्रंलेढि । लिहास्वादने । षष्ठ्यभ्रेलिहः खश्चेत्युपपदात्लिहेः कर्त्तरिखश् प्रत्ययः । अक्षरद्विघटितिमुभागमः ।

अभ्रकम् । न । धातुभेदे । अभ्रे । गिरि

अभ्रक

जामले । अस्योत्पत्त्यादिकं यथा । पुरावधायवृत्रस्य वज्रिणा वज्रमुद्यतम् । विस्फुलिङ्गास्ततस्तस्य गगने परिसर्पिताः । तेनिपेतुर्घनध्वाना च्छिखरेषु महीभृताम् । तेभ्य एव समुत्पन्नंतत्तद्गिरिषुचाभ्रकम् । तद्वज्रं वज्रजातत्वाद्भ्रमभ्ररवोद्भवात् । गगनात् स्खलितंयस्माद्गगनंचततोमतम् । विप्रक्षत्रियविट्शूद्रभेदात्तत्स्याच्चतुर्विधम् । क्रमेणैवसितंरक्तंपीतंकृष्णंचवर्णतः । प्रशस्यतेसितंतारेरक्तं तत्तुरसायने । पीतंहेमनिकृष्णन्तु गदेषुद्भुतयेपिच । पिनाकंदर्दुरंनागं वज्रंचेतिचतुर्विधम् । मुंचत्यौविनिःक्षिप्तं पिनाकं दलसञ्चयम् । अज्ञानाद्भक्षणात्तस्य मशकुष्ठमदायकम् । दर्दुरंत्वग्निनिःक्षिप्तकुरुते दर्दुरध्वनिम् । गोलकोन्यद्भुशंश्वासस्यान्मृत्युप्रदायकः । नागश्च नागवद्भौफूत्कारंपरिमुंचति । तद्भक्षितमवश्यन्तु विद्धातिभगन्दरम् । वज्रन्तुवज्रवत्सिद्धं तत्त्वाग्नौविकृतिं व्रजेत् । सर्वाभ्रेषुवरंवज्रं व्याधिघाटैक्यमत्युत्तम् । अभ्रमुक्तरसेलोत्थं षड्रसत्वंगुणाधिकम् । दीपनंरोचनंस्वल्पसत्त्वमल्पगुणप्रदम् । अयमारिताभ्रस्यगुणाः । अन्यंक

अभ्रक

पायंमधुरं सुशीतमायुष्करंधातुविव र्द्धनंच। हन्याच्चिरोषंव्रणमेहकुष्ठप्री होदरग्रंथिविषकृमींश्च ॥ रोगान् हन्तिहृदयतिवपुर्वीर्यंदृष्टिंविधत्ते ता रुण्याद्यंरमयतिशतंयोपितांनित्य-मेव। दीर्घायुष्कान्जनयति सुतान् विक्रमैः सिंहतुल्यान् सत्त्योर्भीतिंह रतिसततंसेव्यमानंहृताभ्रमिति ॥ अथाशोधिताभ्रस्यदोषाः। पीडांवि धत्ते विविधानरोगां कुष्ठंचयंपाण्डुग दंचशोथम्। हृत्वार्श्वः पीडांचकरो त्यसह्यामशुद्धमभ्रं गुरुवह्निहत्स्यात् ॥ अभ्रशोधनविधिर्यथा। कृष्णाभ्र कंधमेकञ्चौ ततः क्षीरेविनिःक्षिपे त्। भिन्नपंचंतुतंकृत्वातण्डुलीयाम्ल योर्द्रवैः। भावयेदष्टयामंतदेवमभ्रं विशुध्यति। मारणन्तु। कृत्वाधान्या भ्रकंतच्चशोधयित्वाथमर्दयेत्। अर्क क्षीरैर्दिनंखल्वेचमाकारंचकारयेत्। वेष्टयेदर्कपत्रैश्चसम्यग्गजपुटेपचेत्। पुनर्मर्द्यंपुनः पाच्यंसप्तवारान् पुनः पुनः ॥ ततोवटजटाक्वाथैस्तद्वदेयंपुट त्रयम्। म्रियतेनात्रसन्देहः प्रयोज्यंस र्वकर्मसु। तुल्यंघृतंहृताभ्रेणलोहपा त्रेविपाचयेत्। हृतेजीर्णेतदभ्रन्तु स र्वयोगेषुयोजयेदिति भावप्रकाशः। अभ्रति अभ्रयतेवा। अभ्र॰। कुन्।

अभ्रम्

अभ्रस्याकृतिर्यो। इवे प्रतिकृतावितिकन्॥

अभ्रङ्कषः। पुं। समीरणे। अभ्रंकषति हिनस्तीतिविग्रहे सर्वकूलाभ्रेष्वादि। नाकषेः खच्प्रत्ययः। मुसागमः।

अभ्रपिशाचः। पुं। राहौ। इतित्रिका ण्डशेषः।

अभ्रपुष्पम्। न। जले। अभ्रस्यपुष्पमि व। पुं। वेतसे। अभ्रमिव अभ्रसम येवा पुष्पमस्य।

अभ्रमांसी। स्त्री। आकाशमांसीलता माम्॥ इतिराजनिर्घण्टः।

अभ्रमातङ्गः। पुं। ऐरावणे। अभ्रंमेघ स्तदात्मकोमातङ्गः। शाकपार्थिवा दिः॥ अभ्रे आकाशे मेघेवा विद्यमा नोमातङ्ग इतिवा।

अभ्रमुः। स्त्री। ऐरावतपत्न्याम्। अभ्रेखे माति मन्थरगामिनीत्वात्। बाहु लकादुः। अभ्रे आकाशएवमाति। मीमाने। मितद्वादित्वाड्डुर्वा। न भ्राम्यति। भृतृचरीत्युः। मन्थरगामि नीत्यर्थ इतिवा।

अभ्रमुप्रियः। पुं। अभ्रमातङ्गे। अभ्र मोः प्रियः।

अभ्रमुवल्लभः। पुं। ऐरावणे। अभ्रमो र्वल्लभः।

अभ्रारुहम्। न। वैदूर्यमणौ। इति

अमत्र

राजनिर्घण्टः ।

अभ्रलिसी । स्त्री । अल्पैरभ्रैर्लिप्सायांदि वि, । अल्पैरभ्रैर्लिप्सा ता दल्पाख्या यामितिङीष् ।

अभ्रवाटिका । पुं । आम्रातके ॥ इतिरा जनिर्घण्टः ॥

अभ्रावकाशक । पुं । तापसान्तरे । यो वातातपवर्षेषु केवलमाकाशे असंवृ तप्रदेशे तपश्चरतिसोभ्रावकाशकः ।

अभ्रि । स्त्री । काष्ठकुद्दाले । लौमखो त्खारके । पोतादेर्मलापनयनार्थं काष्ठघटितकुद्दाले । अभ्रति । अभ्र गतौ । सर्वधातुभ्यइन्निति इन् ।

अभ्रियम् । वि । मेघभवे । अभ्रेभवम् । समुद्राभ्राद्घः । छांदसत्वं प्रायिक म ॥ स्त्रियामभ्रिया ।

अभ्री । स्त्री । काष्ठकुद्दाले ॥ अभ्रति । अभ्रगतौ । सर्वधातुभ्यइतिइन् । कृ दिकारादितिङीष ।

अभ्रेषः । पुं । न्याये । उचिते । अभ्रेषणम् अभ्रे घः । भ्रेषृ चलने । घञ । भ्रेषादन्य. ॥

अभ्रौत्यम् । न । कुत्सिते । वि । अभ्र भवे ।

अम् । ा । अल्पे । शीघ्रतायाम् । इति व्याडि ।

अमः । पुं । रोगे ॥ वि । अपक्वफलादौ ॥

अमङ्गल । पुं । एरण्डवृक्षे ॥ वि । मङ्ग

अमर

लरहीने । अशुभसूचके ।

अमण्डः । वि । मण्डहीने ।

अमतः । पुं । मृत्यौ । काले । रोगे । वि । असंमते । अविज्ञाते । अतर्कि ते । अमति । अमगत्यादिषु । भूमृ दृशियजीत्यादिनाऽतच ।

अमतिः । पुं । काले । दण्डे । चन्द्रे । वि । दुष्टे । अमति । अमगत्यादिषु । अमेरतिः ।

अमत्रम् । न । भाजने । भाण्डे । अम ति-अन्नमत्र । अमगत्यादिषु । अमि नक्षियजिवधिपतिभ्योऽत्रन् ।

अमदनः । पुं । शिवे ।

अमनाः । वि । स्नेहशून्ये ।

अमनस्कः । वि । अप्रगृहीतमनस्के । पुं । योगग्रन्थविशेषे ।

अमनिः । स्त्री । वर्त्मनि । गतौ ॥ अमति । अमगत्यादिषु । अर्त्तिस्वृ इत्या दिनौणिः ।

अमन्दः । वि । धृष्टे ॥ मन्दभिन्ने ॥

अमम. । पुं । भाविजिनविशेषे ॥ वि । ममताहीने ॥

अमर. । पुं । सुरे ॥ अष्टशाब्दिकान्त र्गतवैयाकरणविशेषे । येननामलिङ्गानुशासनंकृतम् ॥ विक्रमादित्य सभास्थनवरत्नान्तर्गतरत्ने ॥ अयवा इतिकश्चित् । स्नुहीवृक्षे । पारदे ।

अमरा

अस्थिसंहारे । त्रि । मरणवर्जिते ॥ नम्रियते इतिअमरः । मृङ्प्राणत्यागे तुदादि । पचाद्यच् ॥ अमरजः । पुं । खदिरवृक्षभेदे । कोलवृक्षे । पत्तूरौ ॥ अमरदारुः । पुं । देवदारुवृक्षे ॥ अमरद्विजः । पुं । देवले । देवाजीवे । पुजारीति प्रसिद्धे ॥ अमराद्विजः ॥ अमरपुष्पकः । पुं । काशे । इक्षुगन्धायाम् । इतिरत्नमाला ॥ अमरपुष्पी । स्त्री । अवाक्पुष्प्याम् । अधःपुष्प्याम् ॥ अमरप्रभुः । पुं । विष्णौ । अमराणां प्रभुः ॥ अमररत्नम् । पुं । स्फटिके ॥ इतिराजनिर्घण्टः ॥ अमरवल्लरी । स्त्री । आकाशवल्ल्याम् ॥ अमरा । स्त्री । गुडूच्याम् । अमरावल्ल्याम् ॥ दूर्वायाम् । स्थूणायाम् ॥ जरायौ ॥ इन्द्रवारुण्याम् ॥ वटीवृक्षे ॥ महानील्याम् । घृतकुमार्याम् ॥ नाभिनालायाम् । नम्रियते । मृङ्प्राणत्यागे । पचाद्यच् । टाप् ॥ अमराद्रिः । पुं । सुमेरौ । अमराणामद्रिः ॥ अमरालयः । पुं । स्वर्गे । अमराणामालयः ॥

अमरा

अमरावती । स्त्री । इन्द्रपुर्याम् । यथा । नानारत्नप्रभाजालमण्डलालङ्कृतामरैः । सिद्धसाध्यमरुज्जुष्टामलकामभूरमरावतीति । अमराः सन्त्यस्याम् । मतुप् । मतौवह्वचोनजिरादीनामितिदीर्घः ॥ अमरेशः । पुं । अमरकण्टकतीर्थस्थदेवे । अमरेशोऽमरकण्टकइत्यागमोक्तेः । अपिच । अमरेशमहापीठे कुशस्थद्वारसंस्थकः । तत्रदुर्गाह्वयंनाम च शिवंकाचमहेश्वरीति ॥ अमर्त्यः । पुं । विदेशे । नम्रियते । अमर्त्यः । नमर्त्यइतिनञ्समासोवा ॥ अमर्त्यनदी । स्त्री । गङ्गायाम् । अमर्त्यानांनदी ॥ अमर्त्यभुवनम् । न । स्वर्गे । अमर्त्यानांभुवनम् ॥ अमर्षः । पुं । कोपे । कुधि । परोत्कर्षासहनरूपेचित्तवृत्तिविशेषे । कृतापराधे ऽसमर्थस्यदेषे । मर्षणम् । मृषतितिज्ञायाम् । भावेघञ् । नञ्समासः ॥ अमर्षणः । त्रि । क्रोधने । नमर्षशीलः । युच् । असहने ॥ अमलम् । न । अभ्रके । त्रि । निर्मले । रजस्तमोमलरहिते । अमति । अमगतौ । वृषादित्वात्कलच् । नम

अमावः
समस्येतिवा ।
अमला । स्त्री । सत्त्वाम ॥ भूत्वामत्त्व-
क्वाम् ॥ सांतत्वावृत्ते । नाभिनाला
याम् । टाप् ।
अमलात्मा । पुं । निवृत्तरागादिमले ।
अमसः । पुं । काले । निर्बोधे । रोगे ।
अमहात्मा । पुं । क्षुद्रहृदये । नमहा
त्मा ।
अमा । ।. सहार्थे । निकटे ॥ नमाति
मा माने । किप ।
अमा । स्त्री । दर्शे । अमावास्यायाम् ॥
नामैकदेशेनामग्रहणात् । चंद्रलोक
सहसूर्यदीधितौ ॥
अमांसः । त्रि । दुर्बले ॥ अल्पमांसयुक्ते
। मांसरहिते ॥ नमांसमस्य । अल्पा
र्थेनञ् ।
अमांसाशी । त्रि । निरामिषाशिनि ॥
यथा । नभक्षयेत् वृथामांसममांसा
शी भवत्यपीतिशान्तौ मोक्षधर्मे
भीष्मः ॥
अमात्यः । पुं । मन्त्रिणि । यथा । शान्तो
विनीतःकुशलः सत्कुलीनःशुभान्वि
तः । शास्त्रार्थतत्त्वगोऽमात्योभवेद्भू
मिभुजामिहेतियुक्तिकल्पतरुः । त्रि ।
सहभवे । अमासह समीपेवाभवः ।
अव्ययात्त्यप ।
अमात्रः । त्रि । कार्यकारणाभावशून्येतु-

अमितः
रीवेपरमात्मनि । मात्रापरिच्छि-
त्तिः सानविद्यतेयस्यसः । निर्धने ।
अमाननम् । न । अनादरे ॥ नमानन
म् ।
अमानस्यम् । न । पीडायाम् । त्रि । पी
डायुक्ते । मानसाय हितम् मानसे-
साधुवा । उगवादित्वात् यत्साध्वि
ति वायत् । नमानस्यमसानस्यम् ।
अमामसी । स्त्री । दर्शे । कृष्णपक्षान्त
तिथौ ।
अमामासी । स्त्री । अमावास्याम् ।
अमावसी । स्त्री । अमामस्याम् ॥
अमावस्या । स्त्री । अमायाम् । अमास
हवसतोऽस्याम् चन्द्रार्कौवित्यमोपय
दादश रमावस्यदन्यतरस्यामित्यधि
करणे ण्यत् पाचिकोऽस्वस्यनिपात-
सिद्धः ॥ सूर्याचन्द्रमसोर्यः परःसन्नि
कर्षः सामावस्येतिगोभिलः । परःस
न्निकर्षश्चउपर्यधोभावा पन्नसमसूत्र
न्यायेनैकरावव्यवच्छेदेन सहावस्था
नरूपोवोध्यः ॥
अमावासी । स्त्री । दर्शे । इतिशब्दर-
त्नावली ॥
अमावास्या । स्त्री । दर्शे ॥ अमासहव-
सतोऽस्यांचन्द्रार्कौ । अमावस्यदन्यत
रस्यामितिण्यत् । णित्त्वाद्वृद्धिः ।
अमितः । त्रि । अपरिच्छिन्ने ॥ अपरि

अमूढ

च्छेदे ॥ [illegible]

अमितौजाः । त्रि । अतिवीर्यशालिनि ॥ अमितमपरिच्छेद्यमोजः सामर्थ्यं यस्य ॥

अमिनः । पुं । रिपौ ॥ अमति गच्छति । अमगतौ रोगेवा । अमेर्दिनिरिति दिनिः ॥

अमी । त्रि । रोगिणि ॥ अमोरोगस्तद्वान् । इनिः ॥

अमीवम् । न । क्लैब्ये ॥ पापे ॥ दुःखे ॥ अमीवहनितिलक्ष्यम् ॥

अमुक्तम् । न । क्षुरिकाविशेषे ॥ क्षाश्छुरीति यक्ष्यभाषा ॥ त्रि । मुक्तिरहिते ॥ अक्षीणे ॥

अमुतः । ऐ । अमुष्मादित्यर्थे । तसिल् ॥

अमुत्र । ऐ । भवान्तरे । परलोके । अमुष्मिन् । अदसः सप्तम्यास्त्रल् ॥

अमुर्हि । ऐ । अमुष्मिन्काले ॥

अमुष्यपुत्रः । पुं । स्त्री । मख्यातबंशजे । कुलीने ॥

अमूढः । त्रि । वेदान्तप्रमाणसञ्जात सम्यक्ज्ञाननिवारितात्माज्ञाने ॥

अमूढव्रतः । त्रि । सर्व प्रकारे । एतद्रूपे ॥

अमूर्तः । त्रि । निरवयवे । वाय्वन्तरीक्षयोः ॥ यथा । सन्निवेशेनेव दृश्यो यस्तन्मूर्त्तमुच्यते । चित्रद्रव्यमिवयंमूर्त्तममूर्त्तंवितरद्यजिति वे

अमृत

दविदः ॥ न्यायमतेनाकार्यकारणादि गात्मसु ॥ एषांसामान्यगुणाः । सङ्ख्यापरिमितिपृथक्त्वसंयोगविभागाः । तत्राकाशस्यविशेषगुणः शब्दः । काल दिशोर्विशेषगुणोनास्ति । आत्मनोविशेषगुणास्तु बुद्धिसुखदुःखेच्छाद्वेषयत्नभावनाख्यसंस्काराधर्माधर्मौचेति ॥

अमूर्त्तविद् । त्रि । शून्यवादिनि ॥ अमूर्त्तःसर्वाकारशून्यो निस्स्वभावः परमार्थः इति शून्यवादिनां काश्यनैव । यतः परमार्थो निस्स्वभावश्चेति व्याघातः ॥

अमूकः । त्रि । मूकहीने ॥

अमूलकम् । त्रि । मूलरहिते ॥ प्रमाणशून्ये । नास्तिमूलंयस्य । कप् ॥

अमूला । स्त्री । अस्थिशिखा वृक्षे ॥ ओषधिविशेषजातौ । मूलान्नञ्इति टाप् ॥

अमृणालम् । न । नलदे । वीरणमूले ॥ मृणालमिव । साढ्यश्येदनच् ॥

अमृतम् । न । यज्ञशेषे । होमावशिष्टाज्यपुरोडाशादौ ॥ अमृतमिवअमृतत्वसाधनत्वात् ॥ पीयूषे ॥ तल्लिङ्गे । घृते ॥ अयाचितागतवस्तुनि ॥ अमृतंस्यादयाचितमितिमनुः ॥ मोक्षे ॥ अविद्यमानं मृतंमरणमत्र ॥ अब्दे ॥ नास्तियेतेऽनेन । तन्निमङ्भ्यां

अमृत

किञ्चेतितन्त्रे॥ रानिर्घण्टे॥ च्यवत शब्देनविषसामान्यं वस्तुनाभ्यापार दश्योक्तः॥ काव्ये॥ स्वादुनि॥ आनन्दे। रसायने॥ स्वक्षिन्॥ हृद्ये॥ गोरसे॥ देवानां सर्वप्राणिनांच्च जीवने। पदेपदे स्वादुनि॥ सुरायाम्॥ आमृतसम्भवस्थाने। योगविशेषे॥ सयथा॥ बुधमन्दगतानन्दाकुजेभद्राजयागुरौ। शशौरिक्तामृतंमोक्षं पूर्णा चरविचंद्रयोरिति॥ पञ्चमाश्विकस्य द्वितीयपर्याये। पुं। धन्वन्तरौ। देवे॥ मरणादिदेहेन्द्रियमनोधर्मवर्जिते आत्मनि॥ वाराहीकन्दे। वनमुद्गे॥ त्रि॥ अविनाशिनि। अमरणधर्मिणि। देवतात्मभावे॥

अमृतगतिः। स्त्री॥ छन्दोविशेषे। यथा। यदिदमंगुरुविहितं विशिखमितं सुकविहितम्। अमृतगतिः फणिकथिता दशयतिकान्यविदितेति॥

अमृतजटा। स्त्री। जटामांस्याम्॥

अमृततरङ्गिणी। स्त्री। ज्योत्स्नायाम्॥

अमृततिलका। स्त्री। वर्णवृत्ते॥ यथा। नगणयोधरुचिरा कुसुमविरा जितसुकरा। वसुलघुदीर्घयुगसखा भवतिसखेऽमृततिलकेति॥ स्त्रीतगतिश्चनजनगैः॥

अमृतत्वम्। न॥ अमरणभावे। स्वात्म

अमृत

र्व्यवस्थाने॥ ओचे॥

अमृतदीधितिः। पुं। इन्दौ॥

अमृतनालिका। स्त्री॥ कर्पूरनालिकप्रभेदेपक्वान्नविशेषे॥

अमृतफलम्। नं। नासिपातीति यवने पुंप्रसिद्धे रुचिफले॥ यथा॥ अमृतफलंखर्जूर्यंसुस्वादुचीनक्षरेद्देशान् देशेषु मुक्तलानां बहुसंतक्षभ्यतेलोकैरिति॥ पारेवतद्वौ॥ पटोले॥

अमृतफला। स्त्री। द्राक्षायाम्॥ आम्रवृक्षयाम्॥

अमृतयोगः। पुं॥ पञ्चामृते योगविशेषे॥ अपिच॥ हस्तमूलोत्तरापुष्यारोहिणीरेवतीरवौ। सोमेभद्रास्विनीहस्तफलगुनीविधिविष्णुयुक्। कृत्तिकेहिदृश्यपुष्यश्लिसार्पपौष्णसमीरणाः। बुधेशतभिषामैत्रकृत्तिकारोहिणी तथा॥ गुरौपुष्यानुराधाच स्वातीचैवपुनर्वसुः। भृगौमृगाजयुङ्मित्रतुरङ्गश्रवणानिच॥ अर्कोस्वातीरोहिणीचास्तयोगंविदुर्बुधाइति। पुनश्च॥ आदित्यभौमयोर्नन्दाभद्राशुक्रमन्दाक्ष्योः। जयाचेन्द्राहुरौरिक्तापूर्णार्के चामृताभिधाइति॥ अपरञ्च। रवौमूला। सोमेश्वश्वती। भौमेउत्तराभाद्रपदा। बुधेकृत्तिका। गुरौपुनर्वसू। शुक्रेपूर्वाफाल्गुनी।

अमृत

ग्नैस्वातिनक्षत्रेचेत्तदाऽमृतयोगो भवतीति ॥

अमृतरसा । स्त्री । अंदरसाइतिभाषाप्रसिद्धे पक्वान्नभेदे । यथा । तृतीयभागखण्डेनमिश्रितंषष्टिपिष्टकम् । शुभ्रमीषद्घियुतंमर्दयेद्दृढपाणिना ॥ एवंसमुदितंकृत्वास्थापयेद्रजनीमितम् । ततोऽन्यस्मिन्नहनितच्चिचितंनिस्नेहैस्तिलैः ॥ विधायपूपकंतेन तच्चिकायांघृतेपचेत् । ततोऽमृतरसाजातासातहृद्यबलवर्द्धिनी ॥ अरोचकहराद्यासुगीतामित्तकुष्ठिमेति ॥ कपिलद्राक्षायाम् ॥

अमृतवल्ली । स्त्री । गुडूच्याम् ॥

अमृतसंयावः । पुं । पक्वान्नविशेषे ॥ स यथा । समितांमधुदुग्धेनमर्दयित्वा सुशोभनम् । पचेद्घृतोक्तमेतस्मिन्न्यसेत्याकंनवेघटे । ततोमरिचचूर्णेलाखण्डचूर्णावचूर्णितम् । कुर्यात्कर्पूरसंयुक्तंसंयावममृतोपमम् ॥ संयावममृतंस्वादुपित्तघ्नंमधुरंस्मृतम् । वृष्यंबृंहणहृद्यंविपाकेगुरुभाषितमिति ॥

अमृतसम्भवा । स्त्री । गुडूच्याम् ॥

अमृतसारजः । पुं । गुडे ॥ तवराजोद्भवखंडे ॥

अमृतसिद्धियोगः । पुं । योगविशेषे ॥ यथा । रक्ताम्लगणिरावाजीभैत्र

अमृता

ण्ये चरेवती । रोहिण्यर्कादिपुष्ये याऽमृतसिद्धिर्यथाक्रममिति ॥

अमृतस्रुः । पुं । विधौ ॥ स्त्री । अदितौ ॥ अमृतानांदेवानांस्रुः प्रसूतिः ॥

अमृतसोदरः । पुं । घोटके ॥ इतिराजनिर्घण्टः ॥

अमृतस्रवा । स्त्री । कदल्याम् ॥ उपवल्लिकायाम् । घनवल्ल्याम् ॥

अमृता । स्त्री । मागध्याम् ॥ पृथ्वायाम् ॥ कथितामांसलाऽमृतेतिखचयम् । विरेचनेप्रशस्तेयम् ॥ गुडूच्याम् ॥

अमृतमस्याः । आमलक्याम् ॥ नमियंतेऽनया । तनिस्नङ्भ्यांकिच्चेति तन् । मदिरायाम् ॥ इन्द्रवारुण्याम् ॥ ज्योतिष्मत्याम् ॥ गोरक्षदुग्धायाम् ॥ अतिविषायाम् ॥ रक्तविष्टि ॥ दूर्वायाम् । तुलस्याम् ॥

अमृतान्धाः । पुं । देवे ॥ अमृतमन्नोत्रंयस्यसः ॥

अमृताफलः । पुं । पटोले ॥ इतिद्रव्याभिधानम् ॥

अमृतायमानः । त्रि । अमृतरसभरिते ॥ आनन्दसुधारसपुष्टे ॥

अमृताशः । पुं । विष्णौ ॥ आत्मामृतरसमश्नाति इति तथा ॥ अमृतवदमृतस्वरूपानन्दरसमश्नात्यनुभवति । अश० । कर्मण्यण्वा ॥

अमोघ

अमृताशनः पुं । देवे ॥ अमृतमश्नन मस्य ।

अमृतासङ्गम । नि । कर्पूरिकातुल्ये ॥

अमृताहरणः । पुं । गरुडे ॥ अमृत मा हरणं यस्यसः ।

अमृताह्वमि । न । लघुबिल्वफलाकृति खुरासानदेशजेफलविशेषे । अमृत फले । नाशपातीतीतरजनभाषा प्रसिद्धे ।

अमृतोत्पन्नम । नि । खर्परीतुल्ये ॥

अमृतोत्पन्ना । स्त्री । मचिकायाम् ॥ इतिराजनिर्घण्टः ।

अमृतोद्भवम् । न । खर्परीतुल्ये । तुल्ये ।

अमृतोपमः । त्रि । प्रीत्यतिशयास्पदे । अमृत मुपमायस्य ।

अमृष्यमाणः । त्रि । असहमाने ॥

अमेधाः । त्रि । मूढे ॥

अमेध्यम् । न । पुरीषे ॥ अयज्ञार्हे । अशुचिमांसादौ । त्रि । अपवित्रे । नमेध्यमितिविग्रहः ।

अमेयः । त्रि । अपरिच्छेद्ये । इयानितिमातुमशक्ये ॥ नमेयः ॥

अमोघः । पुं । नदविशेषे ॥ त्रि । सफले । अव्यर्थे । परमेश्वरे । सच्चिपूजितःस्तुतःसंस्तुतःसर्वफलंददातिनृणां याकरोतीत्यमोघः । नमोघः ॥

अमोघदृक । त्रि । यथार्थदर्शिनि ॥

अम्बष्ठः

अमोघा । स्त्री । हरीतक्याम् । विडङ्गे । पाटलावृक्षे । अव्वरे । । शीघ्रे । सामान्तिके ।

अम्बस् । ।

अम्बकम् । न । लोचने । ताम्रे । अम्बकःपितेतिअम्बकेरमाश्रमः ।

अम्बरम् । न । पतत्रिमेघसञ्चारप्रदेशादुपरिसिद्धविद्याधरसञ्चारप्रदेशे आकाशे । स्वनामख्यातसुगन्धिद्रव्ये । वस्त्रे । कार्पासे । अम्बधातौ ॥ । लुगागमे । अम्बते शब्दायते । अविशब्दे । भावेघञ् । अम्बः शब्दः तंराति । रातेःकः । अम्बरम् । अम्भ्यते अम्ब्यतेवा । अविशब्दे । बाहुलकादरोवा ।

अम्बरलेखिन् । न । अभ्रङ्लेहे ॥

अम्बरीषः । पुं । मान्धातृसूनवे । सूर्यवंशीयनाभागात्मजेपरमभागवते ॥ नरकभेदे । किशोरे । भास्करे । विष्णौ । खण्डपरशौ । आम्रातके । अनुतापे । न । रणे ॥ भाष्टे । भर्जने ॥ पचन्तिस्मिन्नम्बरीषम् । निपातनात्साधु । अम्ब्यतेऽवा । अविशब्दे । अम्बरीषवर्तिसाधुः । मण्डकपाकभाजने ।

अम्बष्ठः । पुं । देशभेदे । विप्रादिवैश्यासुते । ब्राह्मणादैवेश्यकन्यायां

अम्बालि

योमम्बष्ठोनामजायते। अयंचिकित्सावृत्तिर्वैद्यइतिख्यातः॥ हस्तिपके। कायस्थजातिविशेषे। अम्बेतिष्ठति। प्रागतिनिष्टत्तौ। सुपीतिकः। अम्बाम्बेतिपक्षम्। न। अम्बष्ठकी। स्त्री। पाठायाम्। प्रटांडूइतिहिमगिरिप्रसिद्धलतायाम्। अम्बष्ठा। स्त्री। अम्लवेतसे। चाङ्गेर्य्याम्। अष्ठाम्नायाम्। पाठायाम्। यूथिकायाम्। जूहीतिख्यातपुष्पे। ब्राह्मणादेर्व्यायामुत्पन्नायाम्। अम्बेदमातेवतिष्ठति। सुप्रिस्थइतिकः। अम्बाम्बेतिपक्षम्। ङ्यामोरितिह्रस्वः। अम्बष्ठिका। स्त्री। अम्बष्ठायाम्। पाठायाम्। ब्राह्मण्याम्। षड्भाषानेटीइतिभाषाप्रसिद्धायाम्। अम्बिष्ठी। स्त्री। अम्बष्ठायाम्। अंबा। स्त्री। मातरि। दुर्गायाम्। नाथोक्तयापिमातरि। पाण्डुराज्ञोमातुःस्वसायाम्। अम्बष्ठायाम्। अष्ठाम्नायाम्। अम्ब्यते शब्द्यते। अबिशब्दे। गुरोश्च हलइत्यः। अम्बामखः। पुं। नवरात्रोत्सवे। अम्बालिका। स्त्री। अम्बार्थे। काशि-

अम्बुज

राजस्यसुतायाम्। पाण्डुराज्ञोमातरि।

अम्बासुतः। पुं। गणेशे।

अम्बिका। स्त्री। पार्वत्याम्। अम्बेवाम्बिका। जगन्मातृत्वात्। मातरि। धृतराष्ट्रजनन्याम्। काशिराजतनयायाम्। जैनदेव्यन्तरे। कटुक्याम्। अम्बष्ठायाम्। अम्बु। न। जले। चतुर्थभवने। द्वीपे। अम्बतेऽविशब्दे। बाहुलकादुः।

अम्बुकण्टकः। पुं। क्षुद्रमीने। शृङ्गाटके।

अम्बुकिरातः। पुं। क्षुद्रमीने। इतिविकाण्डशेषः।

अम्बुकीटः। पुं। क्षुद्रजलजन्तुविशेषे। शिशुमारे। इतिहेमचन्द्रः।

अम्बुकूर्मः। पुं। शिशुमारे। इतिहेमचन्द्रः।

अम्बुकेशरः। पुं। क्षीरवृक्षे। इतिरत्नमाला।

अम्बुचामरम्। न। शैवले। इतिजटाधरः।

अम्बुजः। पुं। हिज्जले। निचुले। न। कमले। वज्रे। शंखे। अम्बुनिजातः। जनीप्रादुर्भावे। सप्तम्यां जनेर्डः।

अम्बुमा

अम्बुजन्म । न । पद्मे । इतिराजनिर्घ
ण्टः ॥ चि । जलोद्भवे । अम्बुताघः । पुं । मेघाले ॥ इतित्रिका
ण्डशेषः ॥ अम्बुदः । पुं । मेघे ॥ मुस्तायाम् ॥
अम्बुददाति । डुदा । क: ॥
अम्बुधरः । पुं । मुस्तके । मेघे ॥
अम्बुधिः । पुं । पारावारे ॥ अम्बूनिधी
यन्तेऽत्र । डुधाञ् । कर्मण्यधिकर
णे चेतिकिः ॥
अम्बुधिसुता । स्त्री । गृहकन्यायाम् ॥
अम्बुपः । पुं । चक्रमर्दे ॥ वरुणे ॥ अत
भिधाश्येनचये ॥
अम्बुपतिः । पुं । वरुणे ॥
अम्बुपत्रा । स्त्री । उशटायाम् ॥
अम्बुपर्णी । स्त्री । वृक्ष्यम् ॥
अम्बुप्रसादः । पुं । कतकवृक्षे ॥
अम्बुप्रसादनम् । न । कतके । निर्मली
इतिख्याते फले ॥
अम्बुमायम् । न । अनूपे ॥ अम्बु प्रा
यंयत्र ॥
अम्बुभृत् । पुं । समुद्रे । मेघे ॥ मुस्त
के ॥ अम्बुबिभर्त्ति । डुभृञ् धारण
पोषणयोः । क्विप्तुकौ ॥
अम्बुमाम् । पुं । कच्छे ॥
अम्बुमाषजः । पुं । गम्भूके । अम्बुमाषे
जायते जनो॰ । ड: ॥

अम्बुवा

अम्बुरः । पुं । द्वाराघ्नःकाष्ठे । गोवराट
इतिगौडभाषा प्रसिद्धे ॥ इतिहेम
चन्द्रः ॥
अम्बुरुहम् । न । कमले ॥ अम्बुनि रो
हतीति । रुहेःकः ॥
अम्बुरुहा । स्त्री । स्थलपद्मिन्याम् ॥
अम्बुरुहिणी । स्त्री । नलिन्याम् ॥
अम्बुवाची । स्त्री । रजस्वलायांभूमौ ॥
यथा । महारे यत्काले मिथुनसङ्गम
णं भूतं तद्दाराभ्यन्तरे तावत्कालाव
धिविधिश्चयादि दण्डाधिकदिनत्रयम
म्बुवाची । साचाद्यानष्टाद्यपादाम
च्छेदेनतिष्ठति । तस्यदिनस्यनिषिद्ध
त्वमुक्तं ज्योतिःशास्त्रे । यथा । मृगशि
रसिनिष्टत्तेरौद्रपादेम्बुवाचीकृतुम
तीखलुपृथ्वीवर्ज्ज येत् त्रीण्यहानि ।
अदिवसतिकृतस्नः स्नेहमाद्यो
जं न भवतिफलभागी यस्यचाखडा
खपाकः ॥ नस्वाध्यायोषषट्कारोनदे
वपितृपूजनम् । नापिपाठोवीजयामो
नवाभूखननादिकमित्यादि । विशे
षः परिशिष्टे ॥ तत्रसर्पभयोपशमना
य दुर्गभेयम् । ययोक्तं ज्योतिषे । र
जोयुक्तास्वम्बुवाचीचरौद्रायमाद
गेरवौ । नास्यांपाठोवीजयामोनाभी
भीर्दुग्धपानतरति ॥ रजोयुक्ता
कृतुमतीपृथ्वीत्यर्थः ॥

अम्भ०

अम्बुवासिनी । स्त्री । पाटलायाम् ॥

अम्बुवासी । स्त्री । पाटलावृक्षे ।

अम्बुवाहः । पुं । अम्बुदे ॥ अम्बुवहति । वह० । कर्मण्यण् ॥ मुस्तके ॥

अम्बुवेतसः । पुं । जलवेतसे ॥ अम्बुनिजातो वेतसः । शाकपार्थिवादिः ॥

अम्बुशिरीषिका । स्त्री ॥ शिरीषिकायाम् । जलशिरीषे ॥

अम्बुसंरोधः । पुं । जलधौ ॥ अम्बुसंरुध्यतेऽनेन ॥

अम्बुसर्पिणी । स्त्री । जलौकायाम् ॥

अम्बूकृत्तम् । वि । सनिष्ठीवे । क्षेपकणनिर्गमसहितवचसि । अम्बुशब्दउपचारात्तत्रेति । अनम्बु अम्बुअकारि । च्विः । च्वौचेतिदीर्घः । कृ० ॥

अम्भः । पुं । अम्बरसे ॥ इत्युणादिकोषः । अम्बते । अबि शब्दे । मुञ्जक्यब्भ्यः क्लः ॥

अम्भस् । न । जले । आप्यते । आपृ व्याप्तौ । उदकेनुम् भौचेतिहस्वोभान्तादेशो नुमागमश्च ॥ अम्भतेवा । अभि शब्दे । असुन् ॥ देवे । मनुष्ये । पितरि । असुरे । तानि त्रीणा एतानि चत्वार्यम्भांसि देवा मनुष्याःपितरोऽसुरा इतिश्रुतेः । बाले । क्षीरेरे । लक्षाद्यतुर्थरार्थे । नव विधतुष्टिषु प्रकृत्याख्यातुष्टि रार्था

अम्भ०

तिका । अम्भउच्यते । यथा कस्यचिदुपदेशः विवेकसाक्षात्कारोऽपि प्रकृतिपरिणामभेदः तत्त्वप्रकृतिरेवकरोति इतिकृतं तीर्थानास्थासेन तत्त्वादेवमेवास्तु बस्तेतियेयमुपदिष्टसम्भिष्यस्यप्रकृतेतुष्टिःसाप्रकृत्याख्याअम्भउच्यते ।

अम्भःसारम् । न । मुक्तायाम् । इतिरा

अम्भस्सारम् । न । जनिर्दृष्टः ।

अम्भःसूः । पुं । धूमे । इतिहेमचन्द्रः ॥

अम्भसूः । पुं ।

अम्भोजम् । न॥ अम्बुजे । पुं । चन्द्रमसि । वि । जलोद्भवे । अम्भसिजातः । जनी० । सप्तम्याजनेर्डः ॥

अम्भोजखण्डम् । न । अम्भोजानां समूहे ॥ कमलादिभ्यःखण्डः ॥

अम्भोजन्म । न । कमले ।

अम्भोजयोनिः । पुं । वेधसि । अम्भोजं योनिः प्रादुर्भावस्थानमस्य । नारायणनाभिकमलजत्वात् ॥

अम्भोजिनी । स्त्री । पद्मसमूहे । नलिन्याम् ॥ पद्मवतिदेशे ॥ अम्भोजानिसन्त्यत्र । पुष्करादित्वादिनिः ॥

अम्भोदः । पुं । जलदे । मुस्तके । अम्भोददाति । दा० । कः ॥

अम्भोधरः । पुं । अम्बुधौ । मेघे । मुस्तके । धरति । धृञ् धारणे । अच् । अ

अम्भः

मांसांधरः ॥

अम्भोधिः । पुं । सिन्धौ । समुद्रे ॥ अम्भां सिधीयंतेऽत्र । धाञः कर्मण्यधिकरणेचेति किः ॥ जलाशये ॥

अम्भोधिवल्लभः । पुं । प्रवाले ॥ इतिराजनिर्घण्टः ॥

अम्भोनिधिः । पुं । अब्धौ । समुद्रे । अंभांसि निधीयंतेऽस्मिन् । कर्मण्यधिकरणेचेति धाञः किः ॥ अम्भसां निधिर्वा ॥ हरौ ॥ अम्भांसि देवादेर्यो नियोयन्ते ऽस्मिन्निति । देवमनुष्य पित्रसुरादेवादयः ॥

अम्भोरुहम् । न । अम्बुजे । अम्भसिरोहति । रुहप्रादुर्भावे । इगुपधेतिकः ॥

अम्मयम् । त्रि । अम्बुमये । आप्ये । जलविकारे फेनादौ । अपोविकारः । ऐकाचोनित्यमितिमयट् । स्त्रियाम्मयी ॥

अम्रः । पुं । आम्रवृक्षे । न । आम्रफले ॥ इतिशब्दरत्नावली ॥

अम्रातः । पुं । आम्रातके ॥

अम्रातकः । पुं । आम्रातके । अम्बाडा इतिख्याते । अम्लमतति । अतसातत्यगमने । कृवृदारिभ्योवुन् । रलयोरैक्यम् ॥

अम्लः । पुं । रसान्तरे । यद्वा इतिभाषा । तोयादिगुणवाचकत्वादम्लइतिसंज्ञा ॥ अस्यगुणायथा । अम्लोष्णोन्नेयः पित्तकफास्रदः । विबन्धानाहविष्टम्भी दलाद्यभिष्यन्दिकोचनहृत् ॥ अम्लवेतसे । इतिराजनिर्घण्टः । न । तके ॥ अम्यतेऽम्बयतेभोक्तृभिः । अमगत्यादिषु । मृगय्वादिभ्यः क्लः इतिषाकुलकादमेः क्लः ॥ त्रि । अम्लरसवति । अर्शआद्यच् ॥

अम्लकः । पुं । सकुचवृक्षे । इतिशब्दरत्नावली ॥

अम्लकाण्डम् । न । सरणडृणे ॥

अम्लकेशरः । पुं । मातुलुङ्गे । अम्लाः केशराः अस्य ॥

अम्लचूडः । पुं । अम्लद्रव्यविशेषे । शाकाम्ले । चिञ्चासारे । इतिराजनिर्घण्टः ॥

अम्लजम्बीरः । पुं । अम्लनिम्बूके ।

अम्लद्रवः । पुं । बीजपूरादिरसे ।

अम्लनायकः । पुं । अम्लवेतसे ।

अम्लनिधा । स्त्री । गव्याम् ॥

अम्लपञ्चफलम् । न । अम्लरसयुतपञ्चप्रकारफले ॥ तद्यथा । कोलम् १ दाडिमम् २ दधाम्लम् ३ चुक्रिका ४ अम्लवेतसमिति ५ मतान्तरेतु । जम्बीरम् १ नारङ्गम् २ अम्लवेतसम् ३ निक्षिडीकम् ४ बीजपूरमिति ५ राजनिर्घण्टः

अम्लप

अम्लव

अम्लपत्रः । पुं । अम्लवृक्षवृचे ।
अम्लपत्री । स्त्री । चुद्राम्लिकायाम् । पा
लाशीलतायाम् ।
अम्लपनसः । पुं । लिकुचे । अम्लश्चासौ
पनसश्च ॥
अम्लपूरम् । न । वृक्षाम्ले ।
अम्लफलम् । न । अम्लो द्रुम° वृक्षाम्ले
। पुं । आम्रवृचे ॥
अम्लभेदनः । पुं । अम्लवेतसे ।
अम्लरुहा । स्त्री । मालवदेशजनागव
ल्ली प्रभेदे ॥
अम्ललोनिका । स्त्री । चाङ्गेर्याम् ॥
अम्लवती । स्त्री । चुद्राम्लिकायाम् ।
चाङ्गेर्याम् ॥
अम्लवर्गः । पुं । आम्रादिगणे । यथा ।
आम्र आम्रातकोमाची लकुचंचकपित्थकम् । नारङ्गदिविधाजम्बू करमर्दं पियारकम् । दाडिमंपर्वतीद्रा
क्षादिधावदरतूदकम् । बीजपूरंचुक्र
क्षीरनिम्बकलीकाम्लवेतसम् । वृक्षा
म्लहरिमन्थचाङ्गेरीचाम्लवर्गकः
। निम्बूकंदाडिमधात्रीफलम्लं प्रका
ङ्क्षिते । प्रदद्यादम्लसात्म्यार्थीकाङ्क्षि
कांपुरातनमिति । क्वराधिकार-
स्थोयंश्लोकः ॥
अम्लवल्ली । स्त्री । विषपर्णिकानामकन्द
विशेषे ।

अम्लात

अम्लवाटिका । स्त्री । नागवल्लीभेदे ॥
अम्लवातकः । पुं । आम्रातके ॥
अम्लवास्तूकम् । न । चुक्रे । चूका इति
प्रसिद्धशाके ॥
अम्लवीजम् । न । वृक्षाम्ले ।
अम्लवृक्षम् । न । वृक्षाम्ले । इम्ली इति
प्रसिद्धवृक्षे ।
अम्लवेतसः । पुं । स्वनामख्यातवृक्षे । स
हस्रवेधिनि । चुक्रे । गुणा यथा । अ
म्लवेतसमत्यम्लं भेदनंलघुदीपन-
म् । हृद्रोगशूलगुल्मामपित्तलोहित
दूषणम् । रूक्षंविष्मूत्रदोषघ्नंग्राही हृ
द्दोषवर्त्तनाशनम् । हिक्कानाहकषि
श्वासकासालस्यविभ्रमान् । कफ
वातामयध्वंसिच्छागमांसद्रवत्वकृत् ।
चणकाम्लगुणं चेयंलोहसूचीद्रव-
त्वकृदिति । अम्लश्चासौ वेतसश्चेत्य-
मलात् ॥
अम्लशाकः । पुं । अम्लचूडे । न । चुक्रे
॥ वृक्षाम्ले ।
अम्लसारः । पुं । अम्लवेतसे । निम्बूके
॥ हिन्तालेन । काञ्जिके ॥
अम्लहरिद्रा । स्त्री । अम्बायाम् । इतिरा
जनिर्घण्टः ।
अम्ला । स्त्री । चिञ्चायाम् ।
अम्लाकुयः । पुं । अम्लवेतसे ।
अम्लातकः । पुं । अम्लाद्रुने ।

अम्लिका

अम्लादनः । पुं । कुरण्टके । अम्लाने । पीयावांसा इतिप्रसिद्धे । वाग्भटेन्य इतिगौडेषु विख्याते । गुणा अस्य । अम्लोदनः कषायोष्णः स्निग्धः स्वादुश्चतिक्तकइति ।

अम्लानः । पुं । महासंहार्याम् । कठस्थ्याइतिख्याते ॥ त्रि । निर्मले ॥ न म्लायतिस्म । क्ल° । क्तस्यार्थेकर्मकेतिकः । संयोगा देरातोधातोर्यक्वत इतिनिष्ठानत्वम् ॥

अम्लानिनी । स्त्री । पद्मिन्याम् । पद्मस मूहे ।

अम्लिका । स्त्री । चिञ्चायाम् । अस्या गुणास्तु । अम्लिकामा गुरुर्वातहरी पित्तकफास्रकृत् । पक्वातु दीपनी रूक्षासरोष्णाकफवातनुत् । अम्लिकायाः फलंपक्वं महिलं वारिणाहृद्यम् । शर्करामरिचोन्मिश्रंलवङ्गेन्दुसुवासितम् ॥ अम्लिकाफलसम्भूतंपानकंवातनाशनम् । पित्तश्लेष्मकरंकिंचित्सुरुच्यंवह्निबोधकमितिः अम्लोद्गारे । चाङ्गेर्यिकायाम् ॥ पलाशीलतायाम् ॥ श्वेताम्लिकायाम् । अम्लोरसोऽस्याअस्ति । अतइनिठनाविति ठन् ।

अम्लिकावटकः । पुं । झोरीवराइति लोके । विधियेथा । अम्लिकास्वेद

अयथा

धिच्चातुञ्जलेनसहमर्दयेत् । तन्नीरे कृतसंस्कारे वटकान्मज्जयेज्जनः । अम्लिकावटकास्ते तुरुच्यावह्निप्रदीपनाः । वटकत्वगुणैः पूर्वैरेतेपिचसमन्विताः इतिभावप्रकाशः ।

अम्ली । स्त्री । चाङ्गेर्याम् ।

अम्लीका । स्त्री । तिन्तिड्याम् ॥

अम्लोटकः । पुं । अम्लकुचाद इति गौडदेशभाषाप्रसिद्धे अम्लकवृक्षे । इतिरत्नमाला ।

अयः । पुं । शुभावहविधौ । प्राक्तन शुभकर्मणि । कल्याणमापके दैवे । अस्त्यनेनसुखम् । इण्गतौ । पुंसि संज्ञायामितिघः ॥ प्राप्तस्यगमने । कस्मिंश्चिद्भागे । द्यूतकृतां प्रदक्षिणगमने । अयतेः कर्त्तरिपचाद्यच् ॥

अयःपानम् । न । नरकविशेषे ।

अयःप्रतिमा । स्त्री । लूर्म्यामि ॥ अयसः प्रतिमा ।

अयःशूलम् । न । तीक्ष्णउपाये ।

अयज्ञः । पुं । दैवादियज्ञभिन्ने । त्रि । यज्ञरहिते ॥

अयज्ञियः । त्रि । यज्ञानर्हे । पुं । माषे ।

अयत्नः । त्रि । चेष्टाशून्ये ।

अयथा । ।। उचितस्यान्यथात्वे । मिथ्यार्थे ।

अयथार्थानुभवः । पुं । तद्भाववति

अयनां

त्प्रकारकानुभवे ॥ सचसंशयविपर्य
यतर्कभेदात्त्रिविधः ॥ अयथार्थश्चा
सावनुभवश्च ॥ नयथार्थानुभवोवा ॥
अयथार्थास्मृतिः । स्त्री । अप्रमाजन्या
यांस्मृतौ ॥ अयथार्था चासौस्मृ-
तिश्च ॥

अयनम् । न । पथि ॥ अयन्तेऽईयन्तेवा
ऽनेन । करणेति ल्युट् युजवा ॥ भा
नोक्तदृग्दक्षिणतोगतौ ॥ यथा । स
गकर्कटसङ्क्रान्तौ । चे उदग्दक्षिणाय-
नेइति ॥ अपिच । युसगिसडंकमतो
मृगकर्किणोरयनके भवतइति । अय
तेऽर्कोऽनेन । अयगतौ । ल्युट् ॥ ऋ
तुत्रये । यथा । सौरर्क्षुवितयं प्रदिष्ट
मयनमिति ॥ अयते याच्ञयेनेन ऋ
तुत्रयेणसूर्योदक्षिणाशामुत्तराशां-
वेति । समरसमारंभकाले योधानां
यथा प्रधानं युद्धभूमौपूर्वा परादिदि
ग्विभागेनावस्थिति स्थानानि यानि
नियम्यन्तेतेमुभोरश्वाइतीतरभाषा
प्रसिद्धेषु ॥ व्यूहप्रवेशमार्गे ॥ गतौ ॥
आश्रये ॥ स्थाने ॥ गेहे ॥ शास्त्रे ॥
यथा ॥ ज्योतिषामयनंनेइमिति ॥

अयनांशः । पुं । सूर्यगतिविशेषस्य
भागे ॥ यथाहकालिदासः । शक्रः
शराक्षोधियुगोनितोह्यतोमानंखत
कैरयनांशकाः स्मृताइति ॥

अयन्त्रितः । त्रि । अनर्गले ॥ नयन्त्रितः ॥
अयवान् । त्रि । भाग्यवति ॥ मतुप् ॥
अयश8 । न । अधर्मनिमित्तायाः लो
कनिन्दायाः प्रसिद्धौ । अकीर्त्तौ ॥
नयशः ॥

अय8 । न । लोहे ॥ एति अयतिवा ॥
इण्गतौ ॥ असुन् ॥

अयस्कान्तः । पुं । चुम्बकाश्मनि ॥ अयः
कान्तोऽस्य ॥ कान्तोसार इतिख्याते-
कान्तलोहे ॥ सचतुर्विधः । आमक
चुम्बकरोमकस्वेदकभेदात् ॥ एते
रसायने उत्तरोत्तरंगुणिनः । क्रमे
णदार्ढ्यकान्तिकार्ष्ण्यरोगदायि
नइतिराजनिर्घण्टः ॥

अयस्कारः । पुं । लोहकारे ॥ अयःक
रोति । डुकृञ् करणे । कर्मण्यण् ॥

अयाचितम् । न । अप्रार्थितेदत्तौ ॥ यथा
। ऋतमुञ्छशिलंप्रोक्तममृतस्यादया
चितमितिमनुः ॥ त्रि । । याच्ञांवि
नालब्धेवस्तुनि । अनर्थिते ॥ पुं । मु
निभेदे । उपवर्षे ॥ घृतविशेषे ॥ न
याचितम् ॥

अयाज्यः । त्रि । त्राद्ये ॥ नयाज्यः ॥
अयानम् । न । । स्वभावे ॥ इतिहारा
वली ॥ अगमने ॥

अयानयम् । न । । द्यूतिनांस्यूतविशेषे ॥
तेपांगतिविशेषे ॥ अयसश्छिन्नतं-

अयुग्म

नियः ॥ ... अयानयोनेः पुं॰ शिवे॰ अयोपकर... अयानयंस्यलेविशेषेनेतव्यः अ... नुपदसर्वाद्यायानयमित्यादिनाऽ... अयेयंयुतशास्त्रस्यमर्यादा । ततस्त्रो... वीयेयः प्रत्येकंद्वादशकोष्ठोपेताः ॥ ... शारास्तु विंशतिं । तेच एकैकेनकितवे... नपंचदशस्वधामपार्श्वस्थ प्रथमकोष्ठ... पर्यंतंमदंचिण प्रसव्यगतिभ्यांनेयाः । ... सर्वेष्वायानयोनाः ... सस्थायस्यशा... रस्यपरैर्नाक्रम्यते पदमे... अस्थाय... स्तुशारेण परंकीयेणबाध्यते इत्या... दि तच्छास्त्राद्बोध्यम् ॥ ... अयाः । पुं॰ वञ्चौ॰ ... एति ... इर्ण॰ आ... सिः । ... । इ । ... अयि ... । अमर्षे । अनुनये । सम्बोध... ने । अनुरागे ॥ ईयते अयतेवा ... इन्वा ... अयुक्छदः पुं॰ सप्तपर्णवृक्षे ॥ अयुक्त । त्रि॰ अजितचित्तो । सर्वदावि... क्षयायाहृतचित्तत्वेन कर्त्तव्येष्वनवस्थि... ते । अनुचिते ॥ अभिश्चिते ॥ न... युक्तः ॥ ... अयुक्तम् । ए । अनर्थे । अयुग्मः । पुं॰ विषमे । अयुग्मच्छदः । पुं॰ सप्तपर्णवृक्षे । अयु... ग्मा छदायस्य ॥ ...

अयोघ

अयुतः । त्रि । असंयुक्ते । अयुक्ते । न... दशसहस्रे ॥ ... । नयुतम् । ... अयुतसिद्धौ । पुं॰ । ययोर्द्वयोर्मध्ये एक... मपराश्रितमेवतिष्ठते तावयुतसि... द्धौ । यथा । अवयवावयविनौ गुण... गुणिनौ क्रियाक्रियावन्तौ जातिव्य... क्तीविशेषनित्यद्रव्येचेति । ... अये । निःक्रोधे । विषादे । सम्भ्रमे । स्मरणे । सम्बुद्धौ । ... अयेयः । त्रि । अयातव्योन्यान विनैव साध्ये । यातुंयोग्यः । या ... अयोयः । ईषति । गुणः । नेयेयः । ... अयोगः । पुं॰ विधुरे । कूटे । विश्लेषे । कठिनौषधे । वमनविरेचनादीनां प्रतिलोमसंयोगे । अल्पमद्यपे । त... दुक्तंवैद्यके । योगःसम्यक्प्रवृत्तिः ... सिद्धादतिशयोगोतिवृत्तम् । अयो... गः । प्रतिलोम्येननचाल्पेवामवर्जन ... सिति । नयोगः ... अयोगवः । पुं॰ आयोगवे । गूढाद्वैश्य कन्यायामुत्पन्ने ॥ इतिभटाधरः ॥ अयोगुडः । पुं॰ । लौहगुलिकायाम् । गोली इतिभाषा प्रसिद्धायाम् ... अयोग्रम् । न । मुसले । अयोऽग्रेऽस्य । अयोग्रकम् । न । मुसले । पुं॰ ... अयोघनः । पुं॰ । लौहपुञ्जे । हथौडा इ... त्यादिभाषाप्रसिद्धे लौहमुद्गरे । अ...

अरविंद

सिंहाल्हे। सिंहलीसिंहकन्ययोरि-
त्याचारमार्त्तण्डः। अरन्धुः। त्रि। निर्विडे।
अरपाः। त्रि। अपापे। अनिन्दिते। रपः
पापंयस्य। ।
अरम्। अलमर्थे। अलमित्यव्ययस्य
वालमूलेत्यादिना पञ्चरेफः। अ-
ल्पे।
अररम्। त्रि। छदे। कपाटे। इयर्त्ति।
अर्त्तिकमीत्यरच्। अपिधाने।
अरटिः। पुं। स्त्री। कपाटे। ऋच्छति
नी विच्। अरं ऋच्छति। सुबंधातुभ्यइ
तीनिः।
अरटी। स्त्री। कपाट्यां। इयर्त्ति।
ऋगतौ। अर्त्तिकमीत्यरन्। गौ
रादिङीष्।
अरट्टः। पुं। अश्वक्षारे। अत्ती। ऋच्छ
ति अर्यतेवा। ऋगतिप्रापणयोः।
अर्त्तेरट्टः।
अरट्टे। आशुसंबुद्धौ। त्वरान्वितस
म्बोधने। इतिशब्दरत्नावली।
अरडुः। पुं। ष्यञोनाकृचेति। इयर्त्ति।
ऋगतौ। अर्त्तेरडुः। कृपिवृकादिः।
अरविन्दम्। न। पद्मे। अराकारावि
न्दानितत्साहश्याद्दराः तान्विन्दति
लभतइत्यर्थे गवादिषुविन्देः संज्ञायां
मिति कर्मण्यण्। वाधकंत्रः। शेमु

अराल

षादीनामितिनुम्। अरंशीघ्रंलिखां
विन्दतिवा। सारसपक्षिणि। नीलो
त्पले। रक्तकमले। ताम्रे। इतिराज
निर्घण्टः।
अरविन्दिनी। स्त्री। नलिन्याम्। पद्म
खण्डे। तडागे। अरविन्दानिसन्त्य
स्यां पुष्करादित्वादिनिः ङीप्।
अरसिकः। त्रि। अरसज्ञे। अविदग्धे।
यथा। अरसिकेषु रसस्यनिवेदनं
शिरसि मालिख मालिख मालिखे
त्यभट्टः।
अराजकः। त्रि। राजशून्यदेशादौ।
यथा। चौरिभायं। जनपदं क्षीनसत्त्व
मराजकंमितिश्रीभागवतम्। अरा
जकेक्षिलोकेस्मिन्। सर्वतोविद्रुतेभ
यात्। रक्षार्थमस्यसर्वस्यराजानम
सृजत् प्रभुरितिमनुः।
अरातिः। पुं। अरौ। नरातिसुखम्।
रादाने। तिच्। तिबौ।
अरालः। पुं। सर्ज्जरसे। समुद्दन्तिनि
। त्रि। कुटिले। ऋच्छति। ऋगतौ
। विचि अरः। अरंलाति। मूलवि
भुजादित्वात्कः। अराः आलाति
वा। नरातिदुःखम्। वाहुलका
लात्वा।
अरालिका। स्त्री। वेश्यायाम्।
अरिः। पुं। अत्ती। स्वकृतापकारमन-

अरिष्ठा

पेक्ष्य स्वभावात् क्रौर्येणापकर्त्तरि ॥ अरेर्मुणो यथा । प्राप्तंकुलीनंशूर स्वदत्तदातारमेवच । कृतघ्नंधृतिम न्तंचकष्टमाहुररिंबुधा इति । पृषो० ह्रस्वः । पृषो० ह्रे । षट्सु । रथाङ्गे । चक्रे । खदिर भेदे । खदिरपङ्क्तिकायाम् । इयत्तिविरोधम् । ऋगतौ । अच इः ।

अरित्रम् । न । कर्णे । केनिपातके ॥ ऋच्छत्यनेन । ऋगतौ । अत्रिलूपू इतिइत्रः ।

अरिन्दमः । पुं । पराभिभावके ॥ अरिं दाम्यतीति विग्रहे संज्ञायां भृदृदृजि धारिसहितपिदम इत्यनेनदाम्यतेः खचि पूर्वपदस्यानन्तत्वणोमुमागमः । अरीन्कामादीन् दमयतीति वा ।

अरिमर्दः । पुं । कासमर्दे ॥

अरिमेदः । पुं । द्वरिमेदे । विट्खदिरे ॥ अरिरिवमेदः स्नेहोऽस्य । अयंकषायउष्णस्निग्धोभूतविनाशनः श्रेष्ठातिसारकामविषवैसर्पनाशीचेतिरा जनिर्घण्टे नरसिंहकौलः ॥

अरिष्टा । स्त्री । मात्राच्छन्दोभेदे । यथा । छन्दसिपोडशकलेविषमेविरतिर्भवेत् । प्रतिपदमन्तेयमकविराजिनि । अरिष्टानामपयोधरधारिणि श्रेयेनियतं लघुहृदयधारिणि ॥ यथा । किंकोना

अरिष्टः

गेपाशधरनर्जसिमामुपगम्यशासमरमर्जसि । हरिचरणंशरणं नहिपश्यसियन्नामस्मरणादपिनश्यसीति ।

अरिष्टः । पुं । अपानमांसजेरोगे । यारायप्रवर्षे ॥

अरिष्टषट्कम् । न । विवाहोपयोगिनिगणनाविशेषे ॥ यथा । मकरःकरिकुम्भरिपुणा कन्यासिंहेनसह भपरस्तुलया । कर्किघटौ दर्यंधनुषीवृश्चिकमिथुनेषडरिष्टविधाविति ।

अरिषड्वर्गः । पुं । कामक्रोधलोभमोहमदमात्सर्येषु ॥ षण्णांवर्गः षड्वर्गः । अरीणामन्तःशत्रूणांषड्वर्गः ॥ यथा । दद्याद्विवसरंकिंचित्कामादीनामनागपि । आसुमेरासतेःकार्यंनयेद्दान्तश्चिन्तयेच्चिपदेशः ॥

अरिष्टः । पुं । खगुने । निम्बे । खदिरे । निकटवर्त्तिनि पर्वतविशेषे ॥ काके । नरिष्टमस्तु ॥ कङ्के । कौनिखद्रे । रीठाद्रुतिख्याते । अखगुणास्तु । अरिष्टकस्त्विदोषोग्रहलिङ्गपातने इति । नृपभासुरे । न । अशुभे । तक्रे । सूतिकागारे । उत्पाते । आसवे । यथा । षष्ठीधात्र्युपसिद्धंदन्मयंतत्स्यादरिष्टकम् । अरिष्टं मद्यमितिलोके । यथा । द्राक्षारिष्टम् दशमूलारिष्टम् । यष्टीसारिष्टमिति । अ

अरण्य

वर्णगन्धिचतनाभिनीति राजनिघं-
टटः ॥ [illegible]
अरण्यकुलत्थिका । स्त्री । कुलत्थ्यायाम् ।
वनकुलथी इतिभाषा ॥ [illegible]
अरण्यकुसुम्भः । पुं । वनकुसुम्भे । अस्यिस
म्भवो कौसुम्भे ॥ पाके कटुः श्लेष्मनाशी
जठराग्निविवृद्धिकृदित्यस्यगुणाः ।
अरण्यघोली । स्त्री । पत्रशाकविशेषे ।
वनघोल्याम् । [illegible]
अरण्यचटकः । पुं । घूसरे । वनचटके ।
अरण्यजार्द्रका । स्त्री । वनार्द्रकायाम् ।
ऐन्द्रो वनआर्द्रक इतिभाषा ॥ [illegible]
अरण्यजीरः । पुं । वनजीरे ॥ [illegible]
अरण्यधान्यमाकानीवारे ॥ [illegible]
अरण्यमक्षिका । स्त्री । दंशे । अरण्य
स्थमक्षिका ॥ [illegible]
अरण्यमुद्गः । पुं । मकुष्ठे ॥ [illegible]
अरण्यवायसः । पुं । द्रोणकाके ॥ [illegible]
अरण्यवासिनी । स्त्री । अत्यल्पपर्णीवि
शेषायाम् । [illegible]
अरण्यवास्तूकः । पुं । क्षुद्रशाके ॥ [illegible]
अरण्यशालिः । पुं । नीवारे । वनधान्ये ॥
अरण्यशूरणः । पुं । वनशूरणे ॥ [illegible]
अरण्यसूया । पुं । वल्के ॥ [illegible]
अरण्यषष्टी । स्त्री । ज्येष्ठशुक्लषष्ठ्याम्
॥ यथा । ज्येष्ठेमासिसिते पक्षेषष्ठी
[illegible]
अरण्यसंज्ञिता । व्यजनैककरारुह

अरन्ध्र

स्यामटन्तिविपिनेस्त्रियः । तोविन्ध्यवा
सिनोस्कन्दयन्तीभारायन्तिचक । क
न्दमूलफलाहाराल्लभन्तेसन्ततिंशुभा
म् । क्रन्दशूरणादि । तदितरन्मूलम्
। इतिराजमार्त्तण्डः ॥ [illegible]
अरण्यानी । स्त्री । महावने । महदरण्य
मित्यस्मिन्नर्थे इन्द्रवरुणेतिसूत्रस्थेन
हिमारण्ययोर्महत्त्वप्रतियोगित्वकेना
[illegible] इत्यत्रशब्दस्यानुगागमस्तीव्रोङ्
अरण्यायनम् । न । अरण्यवासे ॥
अरण्यत्वक् । पुं । शुनि । श्वकपुच्छे ॥
अरतिः । पुं । स्त्री । अनवस्थि
त चित्तत्वे । क्रोधाभावे । रतिविर
हेरुद्वेगे । इष्टवियोगान्मनस्त्वाकु
लीभावे । यथा । स्वामीष्टवस्त्वलाभे
न चेतसोयाऽनवस्थितिः । अरतिः
सेति । वि । रतिष्टीने । [illegible]
[illegible] । अस्मिन्नर्त्तिभ्यश्चिदित्यतिः
। अर्त्तेश्वेत्यतिर्वा । [illegible]
अरत्निः । पुं । सम्प्रकीर्णतताङ्गुलिकरे
विस्तृतकनिष्ठवद्मुष्टिहस्तपरिमा
णे । कफोणौ । अरत्निभिन्नः । नृजस
[illegible] । यदा । ऋतन्यञ्जीत्यत्रो
कनिच्या यद्मुष्टिकरोऽरत्निः सोरः
[illegible] । सहस्तइत्यर्थः ।
अरन्धनम् । न [illegible] इतिप्रसिद्धे
[illegible] पाकाभावे । यद [illegible]

अरविंद

सिंहाहे। सिंहार्ज्ञ सिंहकन्ययोरि-
त्याचारिमार्त्तण्ड॥ अरंधी॥ वि॥ निविडे॥
अरपा॥ वि॥ अपापे॥ न विद्यते रपः
पापंयस्य॥
अरम्॥ अलमर्थे॥ अलमित्यव्ययस्य
वाक्यमूलेत्यादिना मत्वेरेफः॥ अ-
र्ये॥ अरमै॥ वि॥ छदे॥ कपाटे॥ इयत्ति।
अर्त्तिकमी त्यरच्॥ अपिधाने॥
अरर्ि॥ पुं॥ न॥ कपाटे॥ ऋच्छति
गीविच्॥ अर ऋच्छति॥ सृधातुभ्यइ
तीनिः॥ अरी॥ स्त्री॥ कपाट्यां॥ इयत्ति।
ऋगतौ॥ अर्त्तिकमीत्यरन्॥ गौ
रादिङीष्॥
अरः॥ पुं॥ अक्षवाटे॥ शत्रौ॥ ऋच्छ
ति अर्यतेवा॥ ऋगतिप्रापणयोः॥
अर्त्तेरः॥
अरे॥ आशुसंबुद्धौ॥ त्वरान्वितस
म्बोधने॥ इतिशब्दरत्नावली॥
अरकुः॥ पुं॥ ग्योनाकवृचेः॥ इयत्ति।
ऋगतौ॥ अर्त्तेरकुः॥ कपिलकादिः॥
अरविन्दम्॥ न॥ पद्मे॥ अराकाराणि
दलानितत्साद्दश्यादराः॥ तान्विन्दति
लभतइत्यर्थे॥ घञादिपुविन्देः संज्ञाया
मिति॥ कर्म॥ वाधकः॥ शेषु

अराल

किंचोदीनामितितुम्॥ अरंगीघंखिषां
विन्दतिवा॥ सारसपक्षिणि॥ नीलो
त्पले॥ रक्तकमले॥ ताम्रे॥ इतिराज
निर्घण्टः॥
अरविन्दिनी॥ स्त्री॥ नलिन्याम्॥ पद्म
खण्डे॥ तडागे॥ अरविन्दानि सन्त्य
स्यां पुष्करादित्वादिनिः॥ ङीप्॥
अरसिकः॥ वि॥ अरसज्ञे॥ अविदग्धे॥
यथा॥ अरसिकेषु रसस्यनिवेदनं
शिरसि मालिख मालिख मालिखे
त्युद्भटः॥
अराजकः॥ वि॥ राजशून्यदेशादौ॥
यथा॥ चौरप्रायं जनपदं क्षीणसत्त्व
मराजकमितिश्रीभागवतम्॥ अरा
जकेविलोकेस्मिन्॥ सर्वतोविद्रुतेभ
यात्॥ रक्षार्थमस्यसर्वस्यराजानम
सृजत् प्रभुरितिमनुः॥
अरातिः॥ पुं॥ अरौ॥ नरातिसुखम्॥
रादाने॥ तिच्चातिर्वा॥
अरालः॥ पुं॥ सर्ज्जरसे॥ समद्दन्तिनि
॥ वि॥ कुटिले॥ ऋच्छति॥ ऋगतौ॥
घिचि अरा॥ अरमोलातिवा॥ मूलवि
भुजादित्वात्कः॥ अराः आखा
तिवा॥ नरातिर्दुःखम्॥ बाहुलका
ल्लत्वा
अरालाः॥ स्त्री॥ वेश्यायाम्॥
अरिः॥ पुं॥ शत्रौ॥ स्वकृतापकारमन-

अरिष्टा

येच्य स्वभावात् क्रौर्येणापकर्त्तरि ॥ अरेर्मुणो यथा । प्राञ्जलीनंगूर ञ्चदर्चदातारमेयच । कृतच्चंधृतिम न्तंचकष्टमाहुररिंबुधाइति ॥ पेशुन्ने । षट्सु । रथाङ्गे । चक्रे । खदिर प्रभेदे । खदिरपत्रिकायाम् । इयत्ति विरोधम् । ऋगतौ । अच इः ।

अरित्रम् । न । कर्णे । कोनिपातके ॥ ऋच्छत्यनेन । ऋगतौ ॥ अर्त्तिसूधू इतिइत्रः ।

अरिन्दमः । पुं । पराभिभावके ॥ अरिं दाम्यतीति विग्रहे संज्ञायां भृतृदृजि धारिसहितपिदम इत्यनेनदाम्यतेः खचि पूर्वपदस्यानन्तलचणोमुमागमः । अरीन्कामादीन् दमयतीति वा ॥

अरिनर्दः । पुं । कासमर्दे ॥

अरिमेदः । पुं । इरिमेदे । विट्खदिरे ॥ अरिरियमेदः स्नेहोऽस्य । अयंक षायउष्णस्तिक्तोभूतविनाशनः शोथा तिसारकासविषवैसर्पनाशीचेतिरा जनिर्घण्टे नरहिंपकौशलः ॥

अरिष्टा । स्त्री । मात्रावृत्तभेदे । यथा । छन्दसिपेठगकलेधिताशिनि प्र तिपदमन्तेयमकविभाजिनि । अरि ष्टानामपयोधरधारिणि ॥ लघुदयधारिणि ॥ यथा । शिंकीना

अरिष्टः

मपाग्रधरगर्जसिमामुपगम्यहासम धुरमर्जसि । हरिचरणंशरणं नहिप श्यसियन्नामस्मरणादपिनश्यसीति । अरिषः । पुं । अपानमांसजेरोगे । रा राजवर्ये ॥

अरिषड्वर्गकम् । न । विषादीनुपयोगि नि गणनाविशेषे ॥ यथा । मकरः क रिकुलरिपुणा कन्यामेषेणसह भ मस्तुलया । ककिंघटौ धनुषी वृश्चिकमिथुनौषड्वर्गविधाविति ।

अरिषड्वर्गः । पुं । कामक्रोधलोभमोह मदमात्सर्येषु ॥ षण्णांवर्गः षड्वर्गः । अरीणामन्तःस्थानांषड्वर्गः ॥ यथा । दद्यान्नावसरंकिंचित्कामादीनामनाग पि । आसुसेरासतेःकार्त्स्न्येदेदान्तचिन्तयेत्युपदेशः ॥

अरिष्टः । पुं । अगुने । निम्बे । छत्रा निकटवर्त्तिनि पर्वतविशेषे ॥ काके । नरिष्टमस्य ॥ कङ्के । फेनिलद्रौ । रीठावृतिख्याते । असगुणासु । अरि ष्टकखिदेपशोग्रहनिर्द्दमपातने इति । नृपभासुरे । न । अशुभे । तके । सूतिकागारे । उत्पाते ॥ आ सवे ॥ यथा । पक्वौषधान्युसिद्धेयेन् म द्यंतत्स्यादरिष्टकम् ॥ अरिष्टं नक्षत्रि तिलोके । यथा । द्राक्षारिष्टम् दन्त मूलारिष्टम् । बब्बूलारिष्टमिति । अ

अरिष्टः

रिष्टं क्षयपाकेन संवर्तस्थगुणाधिक
म् । अरिष्टस्थगुणा ज्ञेयावीजद्रव्यगु
णैःसमाः॥ मद्येपुंस्लिङ्गोपीतिसुश्रुत
टीका। शुभे। नास्तिरिष्टमत्र नरिष्य
तेत्रहिंस्रैरितिवा। रिषहिंसायाम्।
क्तः। अरिष्टमशुभमस्मात्। अनेक
मितिसमासः। मरणलिङ्गे। यथा।
रोगिणोमरणंयस्मा दवश्यंभाविल
क्ष्यते। तल्लक्षणमरिष्टंस्याद्रिष्टमत्य
भिधीयत इति॥ अरिष्टम्। त्रि। अ
विनाशिनि।

अरिष्टकः। पुं। निम्बे। फेनिले। रीठा
इतिख्याते।

अरिष्टतातिः। त्रि। क्षेमङ्करे। शुभ
ङ्करे।

अरिष्टदुष्टधीः। त्रि। विवर्णे। आसन्न
मरणसूचितलक्षणेनदूषितबुद्धौ। अ
रिष्टेन दुष्टाधीरस्य॥

अरिष्टनेमिः। पुं। बुद्धगणान्तरे। सुनि
विशेषे। जिनानां चतुर्विंशत्यन्तर्गत
द्वाविंशतितीर्थङ्करे।

अरिष्टसूदनः। पुं। विष्णौ। अरिष्टसू
दके। अरिष्टसंज्ञक मसुरंसूदितवा
न्सूदयतिवा। सूदः। नन्द्यादित्वा
ल्युः।

अरिष्टा। स्त्री। कटुकायाम्।

अरिष्टिः। स्त्री। मरेपशे। सक्लाधि

अरुणा

व्याध्यभावे॥

अरुंतुद। त्रि। नाशने। अरिरिवेतितुदति
। तुद। कः।

अरुचिः। पुं। अन्नेनिभिलाषरूपेरोग
भेदे। अरोचके। सच्चासत्त्वेभि
लाषेऽप्यव्यवहारासामर्थ्यरूपोबोधः।
रुच्यभावे॥

अरुजः। पुं। आरग्वधे।

अरुणः। पुं। अर्के॥ अर्कसारथौ॥ अव्य
क्तरागे। कृष्णलोहिते। कृष्णमि
श्रितरक्ते॥ सन्ध्यारागे॥ निःशब्दे॥
कपिले। दानवान्तरे। क्षितुमेदे।
पुन्नागपादपे॥ गुडे। न॥ कुङ्कुमे।
सिन्दूरे॥ त्रि। गुणिनि। ऋच्छति।
ऋगतौ। अर्त्तेर्वेत्युनन्। अरुणोव
र्णोऽस्यास्ति। अर्शआद्यच्।

अरुणकमलम्। न। रक्तोत्पले।

अरुणलोचनः। पुं। पारावते।

अरुणसारथिः। पुं। सूर्ये। अरुणःसूर
स्तःसारथिर्यस्य।

अरुणा। स्त्री। अतिविषायाम्। श्यामा
याम्॥ अम्लिकायाम्॥ त्रिवृतायाम्।
प्रचण्डीमल्लनक्षन्तरे। इन्द्रवारुण्याम्
॥ गुञ्जायाम्। मुण्डितिकायाम्। क
दम्बपुष्पायाम्। ऋच्छति। ऋगतौ।
अर्त्तेर्वेत्युनन्। टाप्। अरुणोवर्णो
ऽस्त्यस्याः। अर्शआद्यच्। टाप्।

अरुन्तु

अरुणात्मजः । पुं । जटायुनामविहगे ।
अरुणस्यानूरोरात्मजः । ।
अरुणावरजः । पुं । गरुडे ।
अरुणोदकम् । न । सरोविशेषे । मे
रोः प्राच्यांदिग्यिो विष्कम्भशैलस्य
मूले सरोऽरुणोदकंनाम तच्चहेमाम्ब
मण्डितम् ।
अरुणोदयः । पुं । ब्राह्ममुहूर्त्ते । सूर्यो
दयात् पूर्वंमुहूर्त्तद्वये । यथा । रज
नीशेषयामस्यशेषार्द्धमरुणोदयः इति
। अपिच । चतस्रोघटिकाःप्रातर
रुणोदयउच्यते । यतीनांस्नानकालो
यंगङ्गाम्भः सदृशंःस्मृतः इति ॥ सप्त
पञ्चारुणोदयंरतिदेवी भागवतम् ।
अथसप्तपञ्चाशत् घटिकोत्तरमरुणो
दयइतितदर्थः । अरुणस्योदयोयस्मि
न्नसः ।
अरुणोदयसप्तमी । स्त्री । माकर्य्याम्
। भविष्योक्तविवरणायांतपः शुक्लसप्त
म्याम् ॥
अरुणोदा । स्त्री । मन्दरगिरिशिखरा
न्निपतन्त्यांसरिति ॥ अरुणोयत्राम्रफ
लरसः संपक्वउदकं यस्याः ॥
अरुणोपलः पुं । पद्मरागे । चुन्नीतिलो
के ॥ अरुणोऽरुणवर्णश्चासावुपलः
पाषाणश्च ।
अरुन्तुदः । त्रि । मर्मस्पृशि । मर्मपीड

अरूपः

के ॥ अरुंषिमर्माणितुदति । तुद
व्यथने ॥ विश्वरुषोस्तुदइतिखश् ॥
अरुर्द्विषदितिमुमिकृतेसंयोगान्तस्ये-
त्यरुषःसकारस्यलोपः ॥
अरुन्धती । स्त्री । वशिष्ठपत्न्याम् । अ-
ग्निमाद्यायाम् ॥ कर्दममुनेः कन्या
याम् ॥
अरुन्धतीजानिः । पुं । वशिष्ठे । अरुन्ध
ती जायायस्यसः ॥ जायायानिङ् ॥
अरुन्धतीनाथः । पुं । वशिष्ठे । अरुन्ध
त्यानाथः स्वामी ॥
अरुष्कः । पुं । भल्लातके । इतिशब्दरत्ना
वली ॥
अरुष्करः । पुं । भल्लातकवृक्षे । न । भ
ल्लातकफले । त्रि । व्रणकृति । अरु
र्व्रणं करोति । दिवादिभ्येटिटः । नि
त्यंसमासेतूत्तरपदस्येतिषः ॥
अरुष्ठ । न । मर्मणि । पुं । रक्तखदिरे ।
अर्के । पुं । न । व्रणे । घृते । इय
त्तिं । अगतौ । अर्त्तिपयपियजी
न्युसिः ॥
अरुष्टा । स्त्री । भूम्याम् । भूमि आं
वला इतिख्यातायाम् ॥
अरूपः । त्रि । रूपगुणे । कुत्सित
रूपे ॥
अरूपः । पुं । रवौ । सर्पविशेषे ॥ ऋ
च्छति अर्थंतेवा । ऋगतिप्रापणयोः

अरूपः

अर्कः

ऋहनिभ्यामूषन् ॥ अरे। नीचसम्बोधने। यथा। अरे यमभटाः शठाःकपटविग्रहेपुङ्गटानि वेद्यतवावचस्तवनचाधिकारोमयि। अरुन्तु शिवसुन्दरीचरणचारुपङ्के रुहस्खलन्मधुसुधासवंसमपिवन्नजा नीतरेइति। रुषाह्वाने॥ अपाकृतौ॥ असूयायाम्॥ अरेरे। नीचसम्बोधने॥ रुषाह्वाने। सक्रोधाह्वाने। अरोकः। त्रि। निर्ग्रन्थे। छिद्ररहिते। रोचनम् रोकः। रुचदीप्तौ। घञ्। नरोकोऽस्य॥ अरोगः॥ त्रि। व्याधिरहिते॥ पुं। देवसाम्ये॥ रोगाभावः। नरोगोऽस्यर्द्धा॥ अरोचकः॥ पुं। रोगविशेषे। अरुचिरोगे इतिभाषा। अर्कः। पुं। रक्तार्के। अर्कपर्णे॥ अस्य गुणायथा। अर्कद्वयं सरंवातकुष्ठकृमिविषव्रणान्। निहन्तिश्लीपगुल्मार्शःश्लेष्मोदरयकृत्क्रिमीन्॥ अर्कद्वयं रक्तार्कःश्वेतार्कश्च। शुक्लार्ककुसुमंश्लक्ष्णंसघृतंमरीचपाचितम्। अरोचकप्रसेकार्यंकासश्वासनिवारणम्। रक्तार्कपुष्पंलघुरंसतिक्तं कृमिमिसिध्मकुष्ठानायनघ्न। अर्कोविषंहन्तिचरक्तपित्तं सङ्ग्राहिगुल्मे श्वयथोहितंतत्॥ चीरमर्कस्यतिक्तोष्णंस्निग्धंसलवणंलघु। कृमिगुल्मोदरहरंश्वेतुमेतद्विरेचनमितिभावप्रकाशः। सटिके। रवौ। सचणेयारविवारे। ताम्रे। दिवस्पतौ। विडौजसि। श्रीहरौ। ब्रह्मादिभिः पूज्यतमैरर्चनीयत्वात्। द्वादशके॥ हस्तर्क्षे॥ सर्वदर्शिनि। अर्च्यते। अर्चपूजायाम्। कर्मणिघञ्। चजोरितिकुत्वम्। यद्वा। कृदाधारार्चिकलिभ्यःक इतिकः। अर्कस्तेवा। अर्कस्तवने। घञ्। अरंकटं तिप्रसिद्धे क्षारविशेषे॥ यथा। द्रव्यकल्पःपञ्चधाक्षारकल्कंचूर्णंरसस्तथा। तैलमर्कःक्रमाज्ज्ञेयंयथोत्तरगुणोमये इतिरत्नमालायाम्॥ अर्ककान्ता। स्त्री। आदित्यभक्तायाम्। अर्कचन्दनम्। क्ली। रक्तचन्दने। अर्कजः। पुं। यमे। शनैश्चरे॥ अर्कजौ। पुं। अश्विनीसूनवोः॥ नित्यद्विवचनान्तोयम्॥ अर्कतनयः। पुं। कर्णे। राधेये॥ वैवस्वतमनौ। सावर्णिमनौ। शनौ॥ यमे॥ अर्कतनया। स्त्री। यमुनायाम्॥ तप्त्याम्। अर्कनन्दनः। पुं। अर्कतनये। सुग्रीवे॥

अर्कतरु

अर्कस्यनन्दनो । [illegible] ।
अर्कनामा । पुं । रक्तार्कः । [illegible]
अर्कपुत्रः । पुं । आदित्यपत्नीभेदे । अ
अर्कपत्रा । स्त्री । सुनन्दायाम् । अर्कमू
लायाम् । [illegible] । स्त्री । [illegible]
अर्कपर्णः । पुं । अर्कोह्वो मन्दारः । अ
र्कौभानि, तीक्ष्णानि पर्णान्यस्य ।
अर्कपादपः । पुं । निम्बे । इतित्रिकाण्ड
शेषः । [illegible] । [illegible] ।
अर्कपुष्पिका । स्त्री । सूर्यपत्न्याम् । [illegible]
अर्कपुष्पी । स्त्री । कुटुम्बिनीवृक्षे । अ
र्कपुष्पीकृमिश्लेष्मपित्तविकारि-
णीतिभावप्रकाशः । [illegible]
अर्कप्रिया । स्त्री । जवायाम् । [illegible]
अर्कबन्धुः । पुं । गौतमे । बुद्धे । सच्च
शाक्यकुलोद्भवशाक्यवंशीयोबोद्धव्यः
इत्यर्कबन्धुः । सूर्यबंशजत्वात् । अ
र्कबन्धौ । अर्कोबन्धुर्यस्यसः । [illegible]
अर्कबान्धवः । पुं । अम्लवेते । अर्कोबोध
प्रियोयस्यसः । बुद्धे । बुद्धभिदि । अर्क
बान्धवाभिदा । [illegible]
अर्कभम् । न । सूर्यनक्षत्रनक्षत्रे ।
अर्कभक्ता । स्त्री । आदित्यभक्तायाम् ।
हुस्तुहुस् इति प्रसिद्धे शाके ।
अर्कमूली । स्त्री । अर्कपत्न्याम् । इत्ये
रमूलेतिगौडेषुप्रसिद्धायाम् ।
अर्करत्नम् । पुं । सूर्यात्मजविशेषे ।

अर्गल

रत्नेति हेमचन्द्रः । [illegible]
अर्कवल्लभः । पुं । बन्धूकवृक्षे । [illegible]
अर्कवेधमन्त्रः । सौरीशब्दे । [illegible]
अर्कव्रतम् । न । रोगोक्तव्रतविशेषे । य
था । अष्टौमासान् यथादित्यस्तोयं
हरतिरश्मिभिः । तथाहरेत्करंराज्ञ
स्त्वित्यर्कव्रतंहितदितिमनुः । आ
रोग्यसप्तम्यादिसूर्यव्रते । [illegible]
अर्कसूनुः । पुं । शनौ । यमे । सुग्रीवे
कर्णौ । अर्कस्यसूनुः । दिवचनां
न्तः । अश्विनेययोः । [illegible]
अर्कसोदरः । पुं । ऐरावते । इतिहेम
चन्द्रः । [illegible]
अर्कहिता । स्त्री । अर्कभक्तायाम् ।
अर्कोश्मा । पुं । अरुणोपले । अर्कस्य
अश्मा । सूर्यकान्तमणौ । [illegible]
कः । पृषोदरादिः । यद्वा । आढौक
ते जनायम् । ढौकृगतौ । वाहुल
कात् ण्यः । गहंभरीरं मानुष्यगुणा
ढ्यो ह्याढ्यउच्यते ।
आढ्यचरः । त्रि । पूर्वमाढ्ये । आढ्योभू
तपूर्वः । भूतपूर्वेचरट् । ङीपि आ
ढ्यचरी ।
आणकः । त्रि । अधमे । अणकएव ।
स्वार्थेअण् ।
आणवम् । न । अणिमनि । अणुत्वे ।
अणोर्भावः । इगन्ताच्चेत्यण् ।
आणवीनम् । त्रि । अणवे । अणुधान्यो
द्भवे । चितचेचे ॥ अणूनां भवनं चे
चम् । विभाषातिलमाषोमाभङ्गाणु
भ्यइतिखञ् ।
आणिः । पुं । स्त्री । अक्षाग्रकीले । रथ
चक्राग्रस्थितकीले । अक्ष्याम । को

टौ । सीमनि ।

आण्डम् । क्ली । अण्डसम्भवे ।

आण्डजः । पुं । अण्डजे ॥ स्वार्थेअण् ।

आण्डीरः । पुं । आण्डर्वति । आण्डो मत्यस्य । काण्डाण्डादीरन्नीरचावि तीरच् ।

आतः । ति । इतोपीत्यर्थे ।

आतङ्कः । पुं । रोगे । सन्तापे । शङ्कायाम् । मुरन्ध्वनौ ॥ भये । क्वरे ॥ आतङ्कनम् । तङ्किकृच्छ्रजीवने । घञ् । हलश्चेतिकरणेवा ॥

आतञ्चनम् । न । प्रेतोद्वापे । शक्तितस्य स्वर्णादेर्द्रव्यान्तरेणसह चूर्णने । इति स्वामी । निःक्षेपणमिति सुभूतिः । उप्रद्रव इति रायमुकुट. । द्रवद्रव्यमक्षेपणोचित चूर्णमिति सारसुन्दरी । दुग्धादेर्दध्यादिभावार्थं तक्रादि प्रक्षेपे । जवने । वेगे ॥ प्रापणे । आप्यायने । तञ्चुगतौ । ल्युट् ।

आतत. । ति । विस्तृते । व्याप्ते । आसन्तात्ततम् । आतन्यतेवा । तनु विस्तारे । तनिमृड्भ्यांकित्तेतितन् । आतन्यतेसमवा । तः । अनुदात्तोपदेशेतिनलोपः ॥

आततायी । ति । वधोद्यते । सयथा । अग्निदोगरदश्चैव शस्त्रपाणिर्धनापहः । क्षेत्रदारापहारीचषडेतेह्याततायिनः । आततायिनमायान्तंहन्यादेवाविचारयन् । नाततायिवधे दोषोहन्तुर्भवतिकश्चनेति । द्रोहकारिणि । आतंतयथा तथा अयितुंशीलमस्य ।

आतपः । पुं । प्रकाशे । द्योते । सूर्यालोके । अस्यगुणा यथा । आतपःकटुकोरूक्षस्वेदमूर्च्छातृषापहः । दाहवैवर्ण्यजननो नेत्ररोगप्रकोपणइति । आतपति । तपसन्तापे । अच् ॥

आतपत्रम् । न । छत्रे ॥ आतपात् त्रायते । त्रैङ्पालने । आतोनुपेतिकः । सुपीतियोगविभागादाकः ।

आतपवारणम् । न । छत्रे । आतपस्य वारणम् ।

आतपाभाव । पुं । छायायाम् ।

आतपोदकम् । न । मृगतृष्णाजले । आतपेनोष्णोदके । आतपस्योदकम् ।

आतरः । पुं । तरपणे । नद्यास्तरणाय देयेकपर्दकादौ । यथा ॥ आतरन्ति घवहेतोर्मुरारिपुतरणीं तवावलम्बेहम् । अपर्णपर्णमिहकुरुषे नाथिकपुरुषे न विश्वासइति ॥ आतरत्यनेन । पुंसिसंज्ञायामितिघः ।

आतर्पणम् । न । प्रीणने । तृप्तौ । मङ्गलालेपने । आङ्पूर्वात्तृपेर्भावेल्युट् ।

आतापी । पुं । असुरविशेषे ।
आतायी । पुं । चिल्ले । चौल इति प्र° ख्याते । आतायते तच्छीलः । तायृस्तानपाखनयोः । । सुप्यजातावितिणिनिः । यद्यप्यवृत्तिकारादिभिरनुपसर्गे दृश्युक्तम् तथापि भाष्येऽपसर्गेणिनिः स्वीकृतः ।
आतारः । पुं । तरपण्ये । आतरे ।
आतिः । स्त्री । अरारिविहगे । आअतति । अत° । अञ्जतिभ्यांचेतीण ।
यद्वा । अतनम् । इणजादिभ्यतीण ।
आतिथेयम् । न । अतिथ्यर्थे । अतिथिभोजनादौ । वि । अतिथौ साधौ ।
अतिथिसेवके । तत्साधुरित्यधिकारे । पथ्यतिथिवसतिस्वपतेर्ढञ् । स्त्री । ङीप् ॥
आतिथ्यः । पुं । अतिथौ । वि । अतिथ्यर्थेवस्तुनिभक्ष्यभोज्यादौ । अतिथिसेवायाम् ॥ अतिथयेदृढम् । अतिथेर्ष्यः ।
आतिवाहिकः । पुं । अर्चिरादिमार्गे ॥ न । शरीरान्तरे । देवतायेनशरीरेण विगिटंलोकं परलोकं नयतितदातिवाहिकं शरीरान्तरमितिव्याख्यानात् ॥
आतुः । पुं । उदुम्बरे । भेकके । दौंगा डौंगी इतिभाषा ।

आतुरः । वि । आमयाविनि । रोगिणि ॥ कातरे ॥ आतुरोक्तौ । तुरस्वरणे ॥ छान्दसाअपिक्षचिद्भाषायां प्रयुज्यन्ते । इगुपधेतिकः ॥
आतृप्यम् । न । आता इतिगौडभाषाप्रसिद्धे फलविशेषे । सरीफा इतिभाषाप्रसिद्धे ॥ अस्यगुणास्तु । वृंहिजनकत्वरक्तवर्द्धकत्वस्यादुत्वशीतत्वत्रिदोषनाशित्वहृद्यत्वदाहरक्तपित्तवायुनाशित्वानीतिद्रव्यगुणः ॥
आतोद्यम् । न । वीणावेण्वादिवाद्ये ॥ तच्चतुर्विधं भवति यथा । ततंवीणादिकंवाद्यमानद्धं मुरजादिकम् । वंश्यादिकंतुषुषिरं कांस्यतालादिकंघनमिति । आसमन्तात् तुद्यतेताड्यते तुद्व्यधने । घञन्तः ।
आप्तः । वि । गृहीते । ग्रस्ते ।
आप्तगन्धः । वि । दूरीभूताहङ्कारे । अभिभूते । आप्तः अरिणागृहीतः गन्धोगर्वोयस्यसः । गृहीतगन्धे ।
आप्तगर्वः । वि । भग्नाहङ्कारे । आप्तगन्धे । आप्तः वैरिणा गृहीतोगर्वो यस्य ।
आप्तगुणः । पुं । तार्किकसमयप्रसिद्धेषु धुत्रादिषतुर्दशगुणेषु ॥ तेचोक्ताः । बुद्ध्यादिषट्कं सङ्ख्यादि पञ्चकं भावना तथा । धर्माधर्मौ गुणाश्चते

आत्मज

आत्मनःस्वशरीरेणोत्पन्नासाधारणगुणाः । पञ्चसाधारणगुणाः । इति अन्ये आहुः । काणादजैमिनीयैर्बुद्धिच्छाद्यात्मनोगुणाः । उलाव्रह्मात्मनोनैतेकिन्तु लिङ्गात्मनोहिते इति ।

आत्मगुप्ता । स्त्री । कौंचपक्षिणि प्रसिद्धा विशेषे । मर्कट्याम् । शुकशिक्ष्याम् ।

आत्मगुप्ति । स्त्री । आत्मनागुप्तेरुत्पत्त्वात् । कर्तृकरणे क्तिसमासः । वि । स्वरक्षिते ।

आत्मग्राही । वि । कुक्षिम्भरौ । स्वोदरपूरके । स्वार्थिनि ।

आत्मघाती । वि । आत्महन्तरि । अत्रैवधातुर्द्विपूर्वकात्मघननेऽपि । यथा । व्यापादयेत् स्वयमात्मानंस्वयंवेयोऽन्युदेकादिभिः । विच्छित्तंतस्यनाशौचंनाग्निर्नाप्युदकादिकंस्मृतिमुक्तंपुराणम् ।

आत्मघोषः । पुं । काके । कुक्कुटे । काकारतिशब्दात् आत्मानं घोषयति । घुषिर्विशब्दे । अण् ।

आत्मचैतन्यम् । न । निश्चयज्ञानस्वरूपे ।

आत्मजः । पुं । तनये । पुत्रे । आत्मनोदेहाज्जातः । पञ्चम्यामजातावितिजनेर्डः ।

आत्मजन्मा । पुं । पुत्रे । सुते । आत्मनोजन्मास्य ।

आत्मजा । स्त्री । कन्यायाम् । दुहितरि । पुत्र्यां । आत्मनोजाता । डः । टाप् ।

आत्मतत्त्वम् । न । तत्त्वज्ञासकेनिरुपाधुपहितमुक्तसत्यब्रह्मविभक्तकचैतन्ये ॥

आत्मदः । पुं । अविद्यानिरासेनजीवस्वरूपाभिव्यञ्जकेश्रीगुरौ । हरौ ॥ आत्मानंददातिना दुर्गेर्गुहाने । आतोऽनुपसर्गेकः ॥

आत्मदर्शः । पुं । दर्पणे । आत्मारूपंदृश्यतेऽनेन करणे । पुंसीत्यपि ॥

आत्मध्यानम् । न । आत्मनश्चिन्तने । ब्रह्मैवास्मीतिसदृत्त्यानिरालम्बतयास्थितिः । ध्यानशब्देनविख्यातापरमानन्ददायिनो ध्यानस्यैवोक्तेः ॥

आत्मा । पुं । स्वभावे । यथा । पुण्यात्मा । प्रयत्ने । यथा । महात्मा । शरीरे । यथा । कृष्णात्मा ॥ परब्रह्मणि । यथा । सैषेणात्मनागृहीतम् । मनसि । धृतौ । मनीषायाम् । अर्के । हुताशने ॥ यदा ॥ जीवे । चेतने । तत्पदार्थे । निरुपाधिकस्वभावे । प्रत्यगात्मनि । यदा । पञ्चकृतस्थूलभूतेषु विराट्त्वेनोपाधिषु तत्तत्कार्यानुरूपान्तर्यामिस्वभावात्मकः । प्रयतेयःसआत्मेति साधुरानमिटोधुवादति । अयमात्मापरिणामीत्यादिश्रुतेर्यावत्तत्तत्कार्यानुरूपेण सत्यज्ञानादिस्व-

रूपे ॥ निरुपचरितस्वरूपे ॥ ज्ञान स्मृत्योराश्रये । सर्वजन्तूनां प्रत्यक्चेतनेस्वसंवेद्ये प्रसिद्धे । मुख्यगौणमिश्रेतित्रिविधेषु साक्षिपुत्रादिदेहादिलक्षणेषु ॥ भूतात्मा चेन्द्रियात्मा च प्रधानात्मातथा भवान् । आत्मा च परमात्मा चत्वमेकः पञ्चधास्थितः ॥ त्यज्यमानेपिनत्यक्तः प्राप्यमाणेपि नाप्यते । आगमापायसाक्षीयःसआत्मानुभवात्मकः ॥ विगुद्धचिद्रूपेत्व । स्पदलक्ष्ये तुरीये । अहंप्रत्ययवेद्ये ॥ इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनोलिङ्गम् । न्यायसूत्रम् । १।१० ॥ यद्व्याप्नोतियदादत्ते यच्चात्तिविषयानिह । यच्चास्यसन्ततोभावस्तस्मादात्मेतिकीर्त्तितः ॥ अतसातत्यगमने । सातिभ्यां मनिन्मनिणाविति मनिण् । भावे । ब्रह्मणि ॥ यथा । आत्मैवेदंसर्वम् । हार्दाकाशे ॥

आत्मनीनः । पुं । सुते । श्याले । प्राणधारे । विदूषके । त्रि । आत्मनेहिते । यथा । अद्यापि नैवात्मनीनं कृतंकर्म्मयातंजनुः क्षपितब्रह्मनैव ग्रर्म । किंदारदेहात्मजस्वर्णहन्देनचेतोरतिंविन्दसेचेन् मुकुन्देनेति ॥ प

रे ॥ आत्मनेहितम् । आत्मन्विश्वजनभोगोत्तरपदात्खः ॥ आत्मपरिज्ञानम् । न । ब्रह्मात्मैक्यसाक्षात्कारे । आत्मनः परिज्ञानम् । आत्मप्रकाशः । पुं । आत्मनः प्रकाशे ॥ आत्मनस्तत्प्रकाशत्वंयत् पदार्थावभासनम् । नाग्न्यादिदीप्तिवदीप्तिर्भवत्यान्यं यतोनिमि ॥

आत्मबन्धुः । पुं । पितृष्वसुः पुत्रे । मातुलपुत्रे । मातृष्वसुः पुत्रे । आत्मनोबन्धुः ॥

आत्मवीरः । पुं । प्राणवति । श्याले । विदूषके ॥

आत्मभवः । पुं । सुरज्येष्ठे । हिरण्यगर्भे । विष्णौ ॥

आत्मभावः । पुं । मनोवृत्तौ ॥

आत्मभूः । पुं । ब्रह्मणि । पितामहे । चतुरानने । कामदेवे ॥ विष्णौ ॥ शिवे । आत्मनोविष्णोः सकाशात् आत्मनास्वयमेववाभवति । भू० । भुवःसंज्ञान्तरयोरितिक्विप् ॥

आत्ममूली । पुं । दुरालभायाम् ॥

आत्मम्भरिः । त्रि । स्वोदरपूरके । आत्मोदरमात्रस्य भरणकर्त्तरि ॥ आत्मानंबिभर्त्तीतिविग्रहे फलेग्रहिरात्मम्भरिश्चेतिआत्मनोमुभागमोभृञ्भृन्प्रत्ययश्चनिपात्यते ॥

आत्मया

आत्मयाजी । त्रि० । सर्वत्रपरमात्ममा
धनापुरस्सरं नित्यं विहितकर्मणोनु
ष्ठातरि । आत्मशुद्ध्यर्थं मेवस्वर्गाद्या
सङ्गंहित्वायोदेवान्यजतेसदृत्यर्थः ।
आत्मयापनम् । न० । कालक्षेपे । शरी
ररक्षणे । आत्मनःस्वस्ययापनम् ।
आत्मयोनिः । पुं० । कामदेवे । परमे
ष्ठिनि । शिवे । विष्णौ । आत्मैव
योनिःउपादानकारणमस्य ।
आत्मरक्षा । स्त्री । महेन्द्रवारुणीवृक्षे
। आत्मनोरक्षणे ।
आत्मलाभः । पुं० । ज्ञाने । आत्मनो
ज्ञानलाभोज्ञानमेव तस्मात् ज्ञानमे
वात्मनोलाभः । नन्वात्मनोनित्यत्वा
त्तस्यलाभवद्प्राप्तिरूपलक्षणआत्मलाभः स
द्भूतध्यत्वयोर्भेदाभावात् । आत्म
लाभात् परोलाभोनास्तीति मुनयो
विदुः ।
आत्मलोकः । पुं० । स्वस्वरूपे । आत्मै
वलोकः ।
आत्मलोम । न० । भ्रूभ्रुवि । स्वलोम
मात्रे ।
आत्मवान् । त्रि० । अप्रमत्ते । अप्रमादि
नि । सर्वदासावधाने । ज्ञानिनि ।
स्वेमहिम्निसदास्थितिष्ठते ॥ धृतिमति
। मनस्विनि । अस्त्यर्थेमतुप् । आ
त्मवान्सत्त्ववानुक्तरूपयुत्पत्तिमाला ।

आत्मवा

आत्मवश्य । त्रि० । मनोधीने । स्वाधी
ने ॥ आत्मनोवश्यः । आत्मावश्योय
स्यवा ।
आत्मविद् । त्रि० । मुक्ते । आत्मानंस्वंश
ब्दादिविषयबुद्धिप्रत्ययसाक्षिणं यो
वेदसतथा । कर्मणि । आत्मानंश
रीरेन्द्रियाद्यतिरिक्तंनित्याद्यकरणे
परलोकेदुःखभागिनंवेत्ति विजाना
तीतितथा ॥
आत्मशय्या । स्त्री । शवावस्थाम् ॥
आत्मशुद्धिः । स्त्री । चित्तशुद्धौ । आ
त्मनःशुद्धिः ।
आत्मसम्भावितः । त्रि । सर्वगुणविशि
ष्टोऽस्मित्यात्मनैव पूज्यतांप्रापितो
नकैश्चित्, साधुभिश्च । आत्मनास
म्भावितः ।
आत्मसाची । त्रि । वृद्धिद्रष्टरि ।
आत्मस्थः । त्रि । हृदिस्थे ।
आत्महत्या । स्त्री । आत्मघाते । स्व
वधे ।
आत्महा । पुं० । देवाजीवे । देवले । त्रि ।
आत्मघातिनि । उदरभेदिनि । अ
नात्मन्यात्माभिमानिनि । अविदुषि
॥ आत्मघातस्य प्रायश्चित्तविधानाद
शौनात् संसरणमेवफलं निश्चितम् ॥
आत्मानंहन्तिक्लिप् । आत्माज्ञानंसर्व
पापस्यमूलम् । अविद्यादोषेणविद्य

आत्मात्म

मानस्यात्मनस्तिरस्करणात् विद्यमा
नस्यात्मनो यत्कार्यं फलमजरामर-
त्वादिसंवेदनादिलक्षणं तदुतस्ये-
वतिरोभूतं भवतीति प्राकृतोऽवि
द्वानात्महेत्युच्यते। येयथासेन्तमा
त्मानमकर्त्तारं स्वयंप्रभुम् कर्त्तो
भोक्तेतिमन्यन्तेतेषवात्महनोजनाः ।
यथाहुराचार्याः। तत्त्वार्थकथञ्चि-
न्नरजन्मदुर्लभं तत्रापिपुंस्त्वंश्रुतिपा
रदर्शनम्। यस्त्वात्ममृत्यौनयतेतमू
ढधीः सह्यात्महास्यं विनिहन्त्यसद्
ग्रहादिति । तदेहमाद्यंसुलभं सु
दुर्लभं प्लवंसुकल्पंगुरुकर्णधारम्। म
यानुकूलेन नभस्वतेरितं पुमान् भ
वाब्धिं नतरेत् सआत्महेति श्री-
भागवतम् ।

आत्माधीनः। पुं। सुते। पुत्रे। प्राण
धारे ॥ ज्याले। विदूषके। इतिहे
मचन्द्रः। त्रि। स्वायत्ते। आत्मनो
ऽधीनः ।

आत्मार्गी। पुं। मत्स्ये। इतित्रिकाण्ड
शेषः॥

आत्माश्रयः। पुं। दोषविशेषे। स्वापे
क्षत्व आत्माश्रयः। स्वस्यस्वापेक्षत्वे
ऽनिष्टप्रसङ्गआत्माश्रयः। सचोत्पत्ति
स्थितिज्ञप्तिद्वारापेक्षा। यथा। यद्य
यंघट एतद्घटजन्यःस्यात् तदाएतद्

आत्रेयी

घटानधिकरणचणोत्तिरवर्त्ती नस्या
त्। यद्ययंघटएतद्घटवृत्तिःस्यात् ए
तद्घटध्वंसोऽप्यनुस्यात्। यद्ययंघटएत
द्घटज्ञानाभिन्नःस्यात् ज्ञानसामग्री
जन्यःस्यात्। एतद्घटभिन्नःस्यादि
तिवासर्वत्रायादयम्॥

आत्मीयः। त्रि॥ अन्तरङ्गे स्वकीये।
आत्मोद्भवः। पुं। आत्मजे। पुत्रे।
आत्मोद्भवा। स्त्री। दुहितरि। पुत्र्या
म्। माषपर्ण्याम्।

आत्मोपजीवी। पुं। भारिकादौ। दे
हिकक्लेशेनजीविनि। आत्मनादेहे
नउपजीवितुं शीलमस्य। सुप्यजाता
वितिणिनिः।

आत्यन्तिकम्। त्रि। अतिशयेनजाते॥

आत्ययिकः। त्रि। अत्ययः प्रयोजनम
स्येत्यर्थे। अत्ययार्थे। विनयादि-
त्वात् स्वार्थे ठक्॥

आत्रेयः। पुं। अत्रिमुनेः पुत्रेपुनर्वसौच
यः। दत्तोदुर्वासाश्चन्द्रश्चेति। अत्रे
रपत्यम्। कृतश्चानिञ्इतिढक्॥ श
रीरस्थरसधातौ। इतिहेमचन्द्रः।

आत्रेयिका। स्त्री। ऋतुमत्यास्त्रीभ
क्षायुगः।

आत्रेयी। स्त्री। ऋतुमत्यास्त्रीपुष्प
त्यास्त्रीनदीविशेषे। आत्रेयीवाऽ
गम्यत्वात्। अपत्ये ढक्। ङीप्।

आदानी

आथर्वणः। पुं। अथर्ववेदज्ञब्राह्मणे। पुरोहिते। आथर्वणिकैर्न्यायं धर्मं आ मीयोवा। आथर्वणिकस्येकलोपश्चेत्यण इकोलोपश्च। नं। अथर्वणांस मूहे। अभिचोदिभ्योण। भान्तिग हि। आथर्वणिकः। पुं। अथर्वाध्ययनपरे। अथर्वाणे मधीते। वसन्तादिभ्यष्ठक्। दाक्षिनायनेतिनिपातनाट्ठिलोपो न भवति।

आददानः। त्रि। उपादानंकुर्वति।

आदमः। पुं। मुनिविशेषे। अयज्वरमलप्रवर्त्तकोद्वापरान्तेबभूव।

आदरः। पुं। आरम्भे। सन्माने। समादरे। दृविदारणे। आङ्पूर्वः। कृदोरप्।

आदर्शः। पुं। टीकायाम्। दर्पणे। मतिपुस्तके। आदृश्यते रूपमनेनेति। अधिरीश्वरे। दृशस्त्वनिति घर्ष्।

आदष्टः। उपक्रमे। वृक्षच्छेदने। हिंसायाम्।

आदाता। त्रि। ग्रहीतरि।

आदानम्। न। ग्रहणे। स्वीकारे। याज्ञिनामस्त्रद्वारे। रोगलक्षणे। आङ्पूर्वाद्दाञो ल्युट्।

आदानी। स्त्री। ननुर्या इति प्रसिद्धे फलभाके। वृक्षिभेदायाम्।

आदित्ता

आदीप्यमानः। त्रि। गृह्यमाणे।

आदिः। पुं। प्रथमे। प्रागसत्त्वावस्थायाम्। नियतपूर्ववर्त्तिकारणे। उत्पत्तौहेतौ। आदिशब्दः पदान्तेतुगणस्यसूचकोमतः। यथा गर्गादिः। सामीप्येयव्यवस्थायां प्रकारेऽवयवेच। यथा। आदिशब्दन्तुमेधावीचतुर्ष्वर्थेषु पुलत्स्यः। आप्रथमंदीयतेगृह्यतेइदादाङ्। उपसर्गेघोः किः। यद्वा। अदनम्। अद्+इण्जादिभ्यइतीण्। पूर्वकालवृत्तित्वमादित्वम्।

आदिकरः। पुं। प्रथमकर्त्तरि। आदेःकर्त्तरि। आदिंकरोति। दिवादिभ्योटः।

आदिकविः। पुं। ब्रह्मणि। वाल्मीकिमुनौ। प्राचेतसे। आदौकविः। कर्मधारयोवा।

आदिकारणम्। न। पूर्वनिमित्ते। मूलहेतौ। निदाने। आदौ कारणम्। आदिःमुख्यंकारणम्।

आदिगदाधरः। पुं। गयास्थदेवतायिभेदे।

आदिङ्गिनः। पुं। ऋषभदेवे।

आदितष्ठ। त्रि। आदावित्यर्थे। आद्यादिभ्यष्ठसंख्यानात् तसिः।

आदितालः। पुं। तालविशेषे। यथा। एकएवलघुर्यत्रआदितालः सकथ्यते

आदित्य

गुरुस्तत्पुरतोवाच्यःप्रायेणैतन्निद
र्शनमितिसङ्गीतदामोदरः ॥
आदितेयः । पुं । देवे । अदित्याः अप
त्यम् । कृदिकारादक्तिन इतिङीष
न्तात् स्त्रीभ्योढक् । तस्य एयादेशः ।
आदित्यः । पुं । सवितरि । सूर्ये ॥ दे
वे ॥ आदित्याद्दादशप्रोक्ताइतिवच
नात् गणेवह्वचनान्तः । यथा । त
वचद्दादशादित्याश्चैवादिपुत्रपन्ति
ये । विष्णुयमविवस्वन्तोंशुमान् पर्ज
न्य इत्यपि वरुणेन्द्रधातृमित्राःपूषा
त्वष्टाभगःपरइति । विष्णौ । आदि-
त्यमण्डलान्तस्थे हिरण्मयेपुरुषे ॥
अर्कदृत्ते । अदितेरादित्यस्यवाअ
पत्यमित्यर्थे दित्यदित्यादित्यइति
अदितेरखण्डितायामक्षाः अर्थपति
रित्यर्थेया प्रत्ययः । पुनर्वसुनक्षत्रे
द्विवचनान्तः । न । उपपुराणविशे-
षे ॥
आदित्यपत्नः । पुं । द्युपविशेषे । अर्क
वधे ॥
आदित्यपुष्पिका । स्त्री । लोहितार्के ।
आदित्यभक्ता । स्त्री । सुवर्णछायायाम् ।
फुल्फुल् इति प्रसिद्धे शाके ॥
आदित्यभवनम् । न । उदयाद्रौ । आ
दित्योऽस्मिन्भवति प्रादुर्भवति ।
आदित्यवर्णं । वि । सर्वजगतोऽवभा

आदिष्टी

सके स्वभानेऽन्यप्रकाशानपेक्षे । आ
दित्यःवर्णोऽस्य ॥
आदित्यसूनुः । पुं । सुग्रीववानरे ।
यमे । कर्णे । शनौ । सावर्णिमनौ
॥ वैवस्वतमनौ । आदित्यस्यसूनुः ॥
आदिदेवः । पुं । देवदेवे । महादेवे ।
नारायणे ॥ विष्णौ । जगदुपादाना
दिगुणवति वासुदेवे ॥ विधातरि ॥
आदिःकारणम् सचदेवश्चः ॥
आदिपुरुषः । पुं । ब्रह्मणि । चतुर्वक्त्रे ।
आदिवराहः । पुं । विष्णौ । हरौ ॥
आदिमम् । वि । आद्ये । प्रथमभववस्तु
नि । आदौ भवम् । मध्यान्मः इत्य
त्रादेश्चेतिवचनात् मः । यदाः । अ
आदिपद्माड्डिमच् ॥
आदिमत । वि । कार्ये । सकारणे ॥
आदिर्विद्यतेऽस्य । मतुप् ॥
आदिराजः । पुं । पृथुसंज्ञकेक्षत्रे ।
आदेराजा । टच् ॥
आदिशक्तिः । स्त्री । परमात्मशक्तौ ।
आदिष्टम् । वि । आदेशिते । उपदिष्टे
। न । आज्ञप्ते ॥ उच्चिष्टे । आदि-
श्यते । दिशः क्तः । आदिष्टमादेशि
तेषिषु । आज्ञप्तोच्चिष्टयोः क्लीब-
मिति मेदिनी ।
आदिष्टी । वि । आदेशकर्त्तरि । आ-
दिष्टमनेन । दृष्टादिभ्यश्चेति इनि ।

आदेष्टा
॥ पुं॥ ब्रह्मचारिणि। व्रतादेशनम
॥ आदिष्टंतदस्यास्तिदिनिः॥
आदीनवः॥ पुं॥ दोषे॥ परिक्लिष्टे॥ दु
॥ खे॥ आदानम्॥ दीङ् क्षये॥ भावे
॥ क्तः॥ स्वाद्यर्थेऽदितः॥ आदितेश्चे
॥ तिनत्वम्॥ आदीनंस्वानम्॥ घञ्
॥ र्थेकइति वाहुलकादातेः कः॥
आदीपनम्॥ न॥ आलिम्पने॥ सन्दी
॥ पने॥
आदृतः॥ त्रि॥ कृतादरे॥ सादरे॥
॥ अर्चिते॥ पूजिते॥ आद्रियतेस्म॥
॥ क्तः॥ आदरोक्तः॥
आदेशः॥ पुं॥ आज्ञायाम्॥ शासने॥
॥ उपदेशे॥ शास्त्राचार्योपदेशगम्ये॥
वार्त्तासञ्चारे॥ ज्योतिषोक्तफले॥
॥ वर्णस्थाने॥ वर्णान्तरोत्पत्तौ॥ प्रकृ
॥ तिप्रत्ययोपघातिकार्ये॥ आदेशनम्
॥ आदिश्यतेऽनेनवा॥ दिशः॥ घञ्॥
आदेशी॥ पुं॥ दैवज्ञे॥ गणके॥ त्रि॥
॥ आदिशतिमं॰ इनिः॥ उपदेशके
॥ आदिशतितच्छीलः॥
आदेष्टा॥ पुं॥ आदेशकर्त्तरि॥ यति
॥ नि॥ यजमाने॥ यागविषये ममेष्ट
॥ सम्पादनाय यज्ञार्थं कर्मकुर्वितिकृ
॥ त्विजांप्रेरके॥ आदिशतिकृत्विजा
॥ दीन्॥ यागादिमदिष्टसम्पादनाय प्रेर
॥ यति॥ दिशअतिसर्जने॥ तृच्॥

आद्यः
आद्या॥ त्रि॥ प्रथमे॥ आदिभवे॥ अ
॥ दिनीये॥ नी॥ धान्ये॥ आदौभवः॥
॥ दिगादिभ्योयत्॥
आद्यकविः॥ पुं॥ धातरि॥ वाल्मीकौ॥
आद्यमाषकः॥ पुं॥ माषकपरिमाणे॥
॥ षेष्वगुञ्जासु॥ हेकृष्णलेसमधृते वि
॥ श्वेदेवौ॥ रौप्यमाषकइत्यपिदर्शना-
॥ त्॥ केचित्॥ अद्यअस्मिन्कालेइत्या
॥ हुः॥ पूर्वेतु माषकंसप्तकृष्णलाइति
॥ समध्यते॥ अपहिंसायाम्॥ हलश्चे
॥ तिधञ्॥ किः॥ आद्योमुख्यश्चासौ
॥ माषकश्च॥
आद्यबीजम्॥ न॥ आदिकारणे॥ नि
॥ मित्ते॥ आद्यंमुख्यंबीजम्॥
आद्या॥ स्त्री॥ उमायाम्॥ दुर्गायाम्॥
॥ कालीनाम्॥ नारायाम्॥ त्रिपुरसुन्दर्यां
॥ म्॥ भुवनेश्वर्याम्॥ प्रकृतौ॥ यथा॥
॥ सत्येतुसुन्दरी आद्या क्षेमायांभुवने
॥ श्वरी॥ द्वापरेतारिणी आद्याकलौ
॥ काली प्रकीर्त्तितेतिमुण्डमालात-
॥ न्त्रम्॥ आदौभवा॥ दिगादित्वाच्च
॥ न्॥ टाप्॥
आद्याकाली॥ स्त्री॥ परायांप्रकृतौ॥
॥ यथा॥ कालसङ्कर्षणात्कालीसर्वेषा
॥ मादिरूपिणी॥ कालत्वादादिभूत
॥ त्वादाद्याकालीति गीयतइति श्री
॥ मद्यानिर्वाणतन्त्रम्॥

आधार

आधूनः । त्रि । आदिहीने । औद्धरिके । विजिगीषाविवर्जिते ॥ विजिगीषा व्यवसायः कश्चित् प्रकर्षो वा आलस्यात्तेनविहीनोयः केवलमुदराधीन इतिभरतः ॥ आङ्पूर्वाद्धीङ्धारणे क्तः । दिवो विजिगीषायामिति निष्ठातस्यनेत्त्वम् । यस्यविभाषेतिनेट् । ह्रस्वोरित्यूठ् । आद्योपान्तम् । न । पूर्वापरमित्यर्थे । आधमनम् । न । बन्धके । इतिस्मृतिः ।

आधर्मिकः । त्रि । अधर्मशीले । अधर्मं चरति । अधर्माच्चेतियात्तिकाट्ठञ् । चरतिरिहासेवायाम् । नत्वेनुष्ठानमात्रे । तेन दैवयोगात् अधर्मे प्रवृत्तोऽपि सुवृत्तः आधर्मिक इतिनोच्यते ।

आधर्षितः । त्रि । अवमानिते ।

आधानम् । न । अग्न्याधाने । गर्भाधाने । बीजमत्तेपकाले । आधीयते । डुधाञ् । ल्युट् । बन्धके । स्थापितद्रव्ये ।

आधानिकम् । न । गर्भाधानसंस्कारे ।

आधानम् प्रयोजनमस्य । प्रयोजनमितिठक् ।

आधारः । पुं । अधिकरणे । आश्रये । औपश्लेषिको वैषयिकोऽभिव्यापकश्चेत्याधारस्त्रिधा । यथा । कटेआस्ते आत्मा मनसोवैषयिकोऽभि-

आधिक्य

व्यापकस्य सर्वस्मिन्नात्मास्तीत्यभिन्नौपश्लेषिकस्योदाहरणम् । अम्बुधारणे । वेश्वादिसेकार्थं सेतुना बहुनालंजलं निरर्थंयवस्थाप्यते स आधारोवदुकन्दरादिः बांधबन्धइतिख्यातः टांकइतिचेतिभरतः । अस्याधार्यं जलबन्धनमाधारइति वैकुण्ठः । क्षेत्रादिसेकार्थं जलाधारस्थान माधारः इति मधुः । आडवाले । आधियन्तेऽस्मिन्निति आधारः । अध्यायन्याये तिसूत्रे अवहाराधारे ल्युप्संख्यानादधिकरणेघञ् ।

आधारशक्तिः । स्त्री । सर्वाधारशक्तिरूपायां परदेवतायाम् ।

आधार्मिकः । त्रि । अधार्मिके । इतिचिकाण्डशेषः । नाधार्मिकेवसेद्राज्ञे नध्यायिबहुलेभृशम् ॥

आधिः । पुं । मनःपीडायाम् । मनस्याशायाम् । अधिष्ठाने । बन्धके । यथा । आधिर्विनश्येद्दृढगुणेधनेयद्विनश्यतीहति । ष्यसने । यथा । आधिमासोयोनमुञ्चेत् सधीरः । आधीयतेदुःखमनेन आधानंवा । डुधाञ् धारणपोषणयोः । उपसर्गेघोः किः ॥

आधिक्यम् । न । अतिशयतायाम् । अधिकस्यभावः । ष्यञ्

आधिवे

आधिवेदनिकं [illegible] आधिते । इत्य
जयपालः [illegible]
आधिदैविकम् । त्रि । दारुणीतायुत्थे
दुःखेऽतिवातातिवृष्ट्यादिहेतु
के दुःखेदेवान् अग्निवाय्वादीन्
अधिकृत्यकृतम् । अधिदेवंवाभ
वम् । अध्यात्मादेष्ठञिष्यते । अनुश
तिकादीनाञ्चेत्युभयपदवृद्धिः । यच्च
राक्षसविनायककृग्रहादावेशनिबन्धन
माधिदैविकंदुःखमितिसाङ्ख्याः ।
आधिपत्यम् । न । अधिपतित्वे । प्रभु
त्वे । स्वामित्वे । अधिपतेःकर्मभावो
वा । ब्राह्मणादित्वात्ष्यञ् ।
आधिभोगः । पुं । वन्यकद्रव्यस्यभोगे ।
आधिभौतिकम् । त्रि । व्याघ्रसर्पादिप्र
युक्तदुःखदे । भूतानिप्राणिनोधि
कृत्यकृतमधिभूतंतत्कृतम् । च
ष्यात्मादेष्ठञ् । अनु० उ० ।
आधिमन्थ्यः । पुं । स्त्रियाम् ।
आधिवेदनिकम् । न । स्त्रीधनविशेषे ।
पितृमातृपतिभ्रातृदत्तमध्यग्न्यु
पागतम् । आधिवेदनिकञ्चैवस्त्रीधनं
परिकीर्त्तितमित्यत्राधिवेदनिकस्य
पृथक्त्वेनोक्त्वात्तात्पर्यरूपमाह ।
द्वितीयंयोविवाहार्थिनापूर्वस्त्रियैपा
रितोषिकं धनंयद्दत्तंतदाधिवेदनिक
मुच्यते । यथा । अधिविन्नस्त्रियैदेय

आध्मानः

माधिवेदनिकं समम्नानदत्तंस्त्रीध
नंयस्यैदत्तेस्वयंप्रकीर्त्तितमाह इति
योज्ञवल्क्यः ।
आधिस्तेनः । पुं । वन्यकचोरेरोगविशेषे । यथा ।
नभोतव्योबलादाधिर्मुञ्जानोवृद्धिमु
त्सृजेत् । मूल्येनतोषयेच्चैनमाधि
स्तेनोन्यथाभवेदितिमनुः ।
आधुतः । त्रि । आधूते । आधुयतेस्म
धूञ्कम्पने क्तः ।
आधुनिकः । त्रि । इदानीन्तनेनूत्ने ।
अधुनाशब्दात्ठञ् ।
आधूतः । त्रि । ईषत्कम्पिते । आधू
यतेस्म । धूञ्कम्पने क्तः । यस्य
विभागेतिनेट् ।
आधेयम् । त्रि । आधारिणिआधार
स्थितवस्तुनि । आधातुंयोग्यम् ।
दध्नोयोगम्ईहीति ठञ्तत्राहे य
ग्राःपक्वसन्नयपाचे । कृत्तागुरुसत्व
क्षिप्तंयोगादिनानिष्पाद्यते ।
आधोरणः । पुं । निषादिनि । हस्तिप
के । आधोरयति । धोरङ्गतौ ल्युट्
तुट्च ।
आध्मातः । पुं । शब्दिते । दग्धेन । त्रि ।
वातरोगविशेषविशिष्टे । यथा । सा
टोपमध्युषजमाध्मातमुदरंभृश
मिति । जानीयादित्यन्वयः ।
आध्मानः । पुं । वातव्याधिविशेषे । त

आनक:

स्त्रियंस्वरूपम्। स्फोटोपमर्च्युग्रहजमा
तीध्मातमुदरंभृशम्। आध्मानमिति
जानीयाद्घोरं वातनिरोधजमिति
। निदानम्। आनाहे॥ किंगो
आध्मानी स्त्रीलिङ्गतन्त्रिकानामगन्ध
द्रव्ये॥ किंगो
आधा। स्त्रीलक्ष्मीनेत्रेनाकृतौति
आध्यात्मिकम्। निजशरीरादिभवो
कर्मोद्भवज्वरशिरोरोगादिनिमित्त-
दुःखादौ। दुःखविशेषे॥ आत्मा
संस्वसङ्घातमधिकृत्यप्रवृत्तम्। अ
ध्यात्मंभवंवा। अध्यात्मादेशुञ्॥
तच्चद्विविधम्। शारीरमानसञ्च।
तचशारीरंआधाद्युत्यर्मानसंका
मामाद्युत्यर्मेति। हे। किंगो
आध्यानम्। न। चिन्तने। उत्कण्ठा-
पूर्वकस्मरणे। अधि चिन्तायाम् ल्युट्।
आध्यापकः। पुं। अध्यापके। स्वार्थेण्॥
आध्वर्यवम्। न। यजुर्वेदविहिते
अध्वर्युसम्बन्धिनि॥ अध्वर्योरिदम्
यज्ञोध्वर्युपरिषदश्चेत्यञ्। अध्व
र्योःकर्मभावोवा। उङ्गादित्वा
दिञ्॥ किंगो
आनः। पुं। अन्तर्मुखश्वासो उच्छ्वासे॥
आनकः। पुं। पटहे। मेदिन्यामुक्तः। मेद
के। घनदम्भुदे। शब्दमेघे। आ
नयति प्रापयति सोऽन्ताक्षान् करो

आनन्दः

तियोधिनि। आङ् पूर्वकात् अनप्रा
णनदृत्यस्मात् खुल्॥ किंगो
आनकदुन्दुभिः। पुं॥ कृष्णजनकेवि
सुदेवे। आनकैर्दुन्दुभिश्चोपलक्षितः
वसुदेवजन्मनिदेवैरानकदुन्दुभि
शब्दनात्। पुंस्त्रीलिङ्गवृहद्ढक्का
याम्। किंगो
आनतः। त्रि। नते। अवाग्रे। अधोमु
खे॥ विनयनम्रे। आनमतिस्म। ण
। मप्रत्यये। गत्यर्थेतिक्तेः। किंगो
आनतिः। स्त्री। नम्रतायाम्॥
आनद्धम्। न। चर्मवद्धमुखमाद्यमाचे
मुरजपटहादौ। वेशभूषादिक
ल्पिमाचे। वि। सन्दिते। ग्रथिते॥
बद्धे। आसे। यथा। आनद्धोक्षिभि
तिर्दोषैरिति। आनह्यते मुखेचर्म
णावध्यतेऽनेनेति आङ्पूर्वबन्धने। करणे। घञ्॥ न
होपः॥ किंगो
आननम्। न। मुखे। आ अनन्त्यनेन
। अनप्राणने। ल्युट्॥ किंगो
आनन्तर्यम्। न। अनन्तरे। चतुर्व
र्णादित्वात् स्वार्थेष्यञ्। किंगो
आनन्त्यम्। न। अनन्तमित्यर्थे। दे
शकालवस्तुपरिच्छेदशून्ये। अनन्त
स्येदं। अनन्तावस्तुतेतिष्ठेयञ्॥ किंगो
आनन्दः। पुं। सन्मदे। हर्षे। सुखे

आनन्द

मदे । छन्दोभेदे । दंशने । आदि गुणविकलो । प्राक्पश्चिमोत्तरद्वार गृहे । आत्मनि । बुद्ध्या दीप्तिविभावितया । अवस्थितस्य प्रियादिशब्दवाचस्य आनन्दमयस्यकारणभूते ब्रह्मणि । आनन्दनम् । टुणदिसमृद्धौ । ल्युट् । ४८ वत्सरे । निष्पत्तिः सर्वसस्यानांसर्वशस्यसमाधौ । तत्तत्फलम् । त्रि । आनन्दविशिष्टे । सुखिनि । हर्षयुक्ते । आनन्दः स्वरूपमस्यास्ति आनन्दोस्ति अस्य अस्मिन् वा अर्शआदिभ्योऽच् । आनन्दयुः । पुं । सुखे । आनन्दे । त्रि । सुखिनि । टुणदि° । द्वितोऽथुच् । आनन्ददत्तः । पुं । मेहने । आनन्दनम् । न । गमनागमनसमये सुहृदादेरखिलनारोग्यस्वागतादि प्रश्नादिद्वारानन्दोत्पादने । सभाजने । आप्रश्ने । टुणदि° । ल्युट् । आनन्दपटः । पुं । नवोढावस्त्रे । आनन्दप्रभवम् । न । रेतसि । वीर्य्ये । आनन्दात् प्रभवोऽस्य । आनन्दभुक् । पुं । प्राज्ञे । यथा लोके निरायासेस्थितःसुखी आनन्दभुगुच्यते तथा सुषुप्तोपि आनन्दभुक् । अत्यन्तानायासरूपाहीयं सुषुप्तिरूपा

आनन्दी

स्थितिरनेन प्राज्ञेनानुभूयते तस्मा दानन्दभुक् प्राज्ञः । आनन्दमय । पुं । जीवे । आनन्द प्रचुरे । प्राज्ञे । मनसोविषयविषया कारस्यन्दनायासदुःखाभावादानन्द मयः आनन्दमायः प्राज्ञउच्यते । कारणशरीरे सर्वोपरमत्वात् सुषु प्तौस्थूलसूक्ष्मप्रपञ्चलयस्थाने । पञ्च मकोषे । कांचिदलमुखवृत्तिरानन्दमितिविम्बभाक् पुण्यभोगे भोग शून्यो निद्रारूपेणवर्त्तते । कादा चित्कत्वेतो नात्मस्वादानन्दमयो ऽयम् । मयट् । त्रि । आनन्दमधीते । नं । ब्रह्मणि । आनन्दसम्भवः । पुं । परमानन्दे । आनन्दसंप्लवे लीनेनापथ्यमुभयंमुने । आनन्दा । स्त्री । विजयायाम् । आरामशीतलतायाम् । आनन्दार्णवः । पुं । परमेश्वरे । यादा योगान्तरे । यथा । स्वोच्चमूलत्रिकोणस्थःसौम्यःपापविवर्जितः । आनन्दार्णवयोगोयं धर्मेणैवलयावहति । आनन्दिः । पुं । कौतुके । हर्षे । आनन्दितः । त्रि । आनन्दयुक्ते । आह्लादिते । हृष्टे । आनन्दः सञ्जातोऽस्य । तारकादित्वादितच् । पुं । सुखिनि । हृष्टे । आ

आनायः
नन्दविशिष्टे ॥ सर्वसम्पदासमृद्धे ।
आनन्दोऽस्यास्ति । इनि ॥
आनन्दी । स्त्री । आकनमाता इति
गौडभाषा प्रसिद्धे दक्षिविशेषे ॥
आनमनम् । न । सर्वतोभावेन नमने ।
आनमितः । वि । आवर्जिते ॥
आनयः । पुं । उपनयने ।
आनयनम् । न । स्थानान्तरात् स्थाना
न्तरनीते । खायी इति भाषा ॥
आनर्त्तः । पुं । द्वारकाइतिख्याते देशे ॥
यथा । आनर्त्तान् सउपेत्यर्ज्य स्वदृढान्
जनपदान् स्वकान् । इध्मौदरेव-
रतेषांविषादं शमयन्निवेति । आ
नर्त्तदेशवासिनिजने । जले । रणे-
रङ्गस्थशालायाम् । आन्तस्यन्त्यव
र्त्तीगात्रविशेषे । कलञ्चेति घञ् ॥
आनर्त्तपुरम् । न । द्वारावत्यांपुर्याम् ।
आनर्त्तितः । वि । कम्पिते ॥
आनाम्यः । त्रि । अभिभवनीये । आ-
ङ् पूर्वस्य नमतेरभिभवार्थः । पो
रदुपधादितियतिप्रसङ्गे निपातना-
त्क्यप् ॥
आनायः । पुं । जाले ॥ नयनम् । णी
अ प्रापणे । स्त्रियांभुवोनुपसर्गे इ
तिघञ् । आसमन्तान्नायोऽनेन ॥
यद्वा । आनयन्ति मत्स्याननेन । जा
लमानाय इति घञन्तोनिपातितः ॥

आनुकू
आनाय्यः । पुं । दक्षिणाग्नौ । आनी
यते । णीञ् । आनायोऽनित्ये
इत्याङ्पूर्वान्नयतेर्ण्यदायादेश्च
निपात्यते दक्षिणाग्निविषये ॥ दक्षि
णाग्निर्हिगार्हपत्यादानीयते आनि
त्यश्च सततमप्रज्वलनात् ॥
आनाहः । पुं । विघ्नकरोरोगे । वि
बन्धे । विष्टम्भे । तस्यसम्प्राप्तिरूपे य
थोक्ता । आमेशकृद्दानिचितंक्रमेणभूयो
विवर्द्धविगुणानिलेने । प्रवर्त्तमानंन
यथास्वमेनंविकारमानाह मुदाह-
रन्तीतिनिदानेम् ॥ दैर्घ्ये ॥ आन
हनम् आनह्यतेऽनेनवा । णह्बन्ध
ने ॥ भावे करणेवा घञ् ॥
आनिलिः । पुं । हनूमति । भीमे ॥
अनिलस्यापत्यम् । अत इञ् ॥
आनिली । स्त्री । स्वातिनक्षत्रे । अनि
लोदेवता अस्याः । अण् । ङीप् ॥
आनीतः । वि । आहृते । आनीयतेस्म
। णीञ् । क्तः ॥
आनीलः । पुं । नीलघोटके । वि । ई
षन्नीले ॥
आनुकल्पिकः । पुं । अनुकल्पज्ञे । अनु
कल्पमधीते वेद्यः । उक्ठक् ॥
आनुकूलिकः । वि । अनुकूले । अनुकू
लंवर्त्तते । तत्पूर्त्यनुपूर्वमीपलोम-
कूलमिति ठक् ।

आनुज्य

आनुकूल्यम् । न । अनुकूलतायाम् । साधार्थे । भावे कर्मणि वा ष्यञ् ।
आनुपदिकः । त्रि । अनुपदं यास्यमाने । अनुपदं धावति । भाषेऽक्षरपदप । दव्यनुपदं धावतीति । ठक् । अनुप दमधीते । ष्टन् ठक् ॥ ।
आनुपूर्वम् । न । अनुक्रमे । पूर्वं पूर्वं । पूर्वानुक्रमेणवा । वीप्सायां योग्यता क्रियां वाऽव्ययीभावः । अनुपूर्वभावः । वर्णदृढादिभ्यः ष्यञ् चेतिष्यञ् । डीष् । बलस्तद्धितस्येतियलोपः । स्त्रियां वेतिपक्षेङीषता ।
आनुपूर्वी । स्त्री । परिपाट्याम् । मूला धिक्रमे । अनुपूर्वं भावः । वर्णदृढा दिभ्यः ष्यञ्चेति ष्यञ् । पित्त्वान्ङी प्रा यस्लोपः ।
आनुमानिकम् । न । प्रकृतौ । प्रधाने ॥ त्रि । युक्तिसिद्धे । सैद्धान्ते ॥ अनु मानविषयीभूते ॥ अनुमानसम्ब न्धीये ।
आनुरक्तिः । स्त्री । अनुरागे ।
आनुलोमिकः । त्रि । अनुलोमे । अनु लोमं वर्त्तते । तत्प्रत्यनुपूर्वमित्या दिना ठक् ।
आनुष्यिकः । पुं । स्वर्गादिसाधनेकर्म कलापे । शब्दप्रतिपद्ये स्वर्गभोगादौ । गुरुपाठादनुश्रूयते इत्यनुषूयते-

आन्तर

दः । तत्र भवइत्यर्थे ठक् प्रत्ययः ॥
आनुषक् । ग्ना । आनुपूर्व्याम् ॥
आनूपम् । न । भौमपानीयमभेदे । यथा । ब्रह्मन्मुहुर्दुर्दुरवातरेणाम यान्वितः । देशो ऽनूपइतिख्यात आ नूपं तद्भवंजलम् । आनूपंवार्यभिष्य न्दि स्यादुस्निग्धं घनंगुरु । श्लेष्मलं कफकृन्निन्द्यं विकारान्कुरुतेबहून् ॥ पुं । अनूपदेशस्थजन्तुमात्रे ।
आन्तः । त्रि । अन्तस्वभावे । अन्तं योऽमस्य । ऋवादिभ्योऽण् ।
आन्तर्यम् । न । अनुकम्पायाम् । अ निष्ठुरतायाम् । भावेष्यञ् ।
आनेयः । पुं । आग्नेय्यकुलाद्या नीते दक्षिणाग्नौ । त्रि । आनेतुंयो ग्येघटादौ । आनीयते । योज्ञ । अचोयत् ।
आन्तरः । त्रि । अभ्यन्तरे ।
आन्तरमप्यः । पुं । आभ्यन्तरेदैतवि शाखे । सचाक्षमयादिपञ्चकोपकरी राद्विचयास्त्रीत्यादिषड्भामधिकार त्वड्मांसादिपाट्कौगिकाग्नापि पासादिपदूर्म्मिर्योवादिज्ञानेन्द्रिय पञ्चकवागादिकर्मेन्द्रियपञ्चकप्राणा दिपञ्चकमनआदिक्ष करणचतु ष्टयमङ्गुष्ठादिक्षः करणएतद्व्यापार यतद्व्यापारतदभिमानिविश्वतैजस

आन्यसि

प्राप्तसमाधिमूर्च्छीकरणत्रयकाम-क्रोधादरिषड्वर्गसाधनचतुष्टयसाधित्विकादिगुणत्रयसुखदुःखज्ञानाज्ञानपञ्चक्लेशमैत्र्यादिचतुष्टयमाद्यष्टाङ्गप्रत्यूहादि प्रमाणचतुष्टयरोग्यरोग्यादिसमुदायो ज्ञेयो यो योग्यविधिनामरूपगुणधर्मशक्त्याश्रयोबोध्यः ।

आन्तराल: । पुं । आत्मनोऽणुत्वादि० नि० । अणुं वदन्त्यान्तरालो सूक्ष्मनाडीप्रचारतः । योगः सहस्रभागेन तुल्यासु प्रवदन्त्ययम् ।

आन्तरीक्षम् । न । अन्तरीक्षे । गगने । वि । अन्तरीक्षभववस्तुनि ।

आन्तिका । स्त्री । अन्तिकायाम् ।

आन्तम् । न । अन्ते । अमतिथनेनवा । अमगतौ । अमिचिमीतिक्तः । अनुनासिकस्यक्किझलोरितिदीर्घः । वि । अन्तसम्बन्धिनि ।

आन्दोलनम् । ने । पुनःपुनरालोचनायाम् । कम्पने । चलने ।

आन्दोलितम् । वि । कृतान्दोलने । कम्पिते । चलिते ।

आन्यसिक: । वि । पाचके । सूपकारे । अन्योमांसमिल्पमस्य । शिल्पमिनिठक् ।

आन्त्र: । वि । अन्त्रेभव: । अन्त्रमया ।

आपक्व

अन्नाण: । न । अन्यभाव्यम् । नञ् । अन्यभावे । अन्यस्य भावोऽन्यभाव: । ततोब्राह्मणादित्वात् स्वार्थेष्यञ् । अथवा अन्योभावो ऽन्यद्वस्तु तस्यभावइति भावेष्यञ् ।

आन्वयिक: । त्रि । प्रशस्तकुलजे । सत्कुलोद्भवे । कौले । दिव्यभावरतेकुलाचारिणि साधके । ऊर्द्धस्रोतसि० क: शेष: कौल आन्वयिक: स्मृत इति विकाण्डशेष: । अन्वयेकुलेभव: । ठक् ।

आन्वाहिकम् । त्रि । प्रतिदिनसम्भवे । पाकादौ ।

आन्वीक्षिकी । स्त्री । तर्कविद्यायाम् । गौतमादिप्रणीते न्यायशास्त्रे । आत्मविद्यायाम् । अनुन्यवर्णोत्तरमीक्षणं परीक्षणमन्वीक्षा । सा प्रयोजनमस्या: । प्रयोजनमिति ठञ् ।

आन्वीपिक: । त्रि । अनुकूले । अन्वीपं वर्त्तते । तत्प्रत्यनुपूर्वमीपलोमकूलमिति ठक् ।

आप: । पुं । अष्टवसुभेदे वसुविशेषे । न । अम्भसमूहे । तस्यसमूहइत्यण् ।

आपक्कम् । न । अभ्यूषे । भर्जितेहरितयवादौ । ईषत्पक्कम् । आङीषदर्थइति समास: ।

आपद्

आयगा। स्त्री। नदीमार्गे। अपांसमूहः॥ आपगम् तेनगच्छति। गम्+ड। अन्येभ्योपीतिडः॥

आपण. । पुं। हट्टी हाट इतिभाषाप्रसिद्धायां क्रयविक्रयशालायाम्। निषद्यायाम्। आङ्समन्तात्पणायनेऽत्र। पण+। गोचरसञ्चरेतिघञ्तः साधुः।

आपणिकः। पुं। वणिजि। पण्याजीवे॥ आपणो व्यवहारोऽस्यास्ति। अत इति ठन्॥ आपणेन व्यवहरति इत्यर्थेवाठक्। यद्वा। आपणायते। पणव्यवहारे। आडिपनिपतिखनिभ्यइति इकन्॥ आपणस्यधर्म्ये। तस्यधर्म्यमितिठक्॥ आपणस्यापक्रये। अर्घक्रय इति ठक्॥

आपतिकः। पुं। प्रयोने। वाल इतिभाषाप्रसिद्धवर्गे॥ त्रि। दैवायत्ते॥ आपतति। पत्लृगतौ। आडिपणीति इकन्॥

आपत्तिः। स्त्री। आपदि। प्राप्तौ॥ दोषे॥ आपदनम् अनयावा। पद्गतौ। स्त्रियांक्तिन्॥

आपत्प्राप्तः। त्रि। आपन्ने। विपद्ग्रस्ते॥ आपदं प्राप्तः।

आपद्। स्त्री। विपत्तौ। विपदि। क्लेशे॥ मनसापि नकुर्यात्आपदंप्राप्यपार्थिवः। समयुक्तिः प्रसन्नात्मासुखदुःखसहिष्णुः। खेसमेमवेदित्युपदेशः॥ आपदाम् पहर्त्तारं दातारं सर्वसम्पदाम्। लोकाभिरामंश्रीरामंभूयोभूयोनमाम्यहम्॥ आपदनमनयावा। पदे. सम्पदादित्वात् क्विप्। आपत्कालेनास्तिमर्यादा।

आपदा। स्त्री। विपत्तौ। भागुरिमते। हलन्तादपि टाप्॥

आपनम्। न। मरिचे। प्रापणे॥

आपनिकः। पुं। इन्द्रनीलमणौ। किराते॥ आपनायते। पनव्यवहारे। आडिपणिपनीति इकन्।

आपनेय. । त्रि। प्रापणीये। हस्तस्थे।

आपन्न. । त्रि। विपद्ग्रस्ते। आपत् प्राप्ते॥ प्राप्ते। यथा। आपन्नः संसृतिं घोरां यन्नाम विवशो गृणन्। ततः सद्योविमुच्येतयद्बिभेतिस्वयं भयम्॥ इतिभागवतम्। आपदंगतस्य। पद्गतौ। क्तः। आगते।

आपन्नसत्त्वा। स्त्री। गर्भयुक्तायाम्। आपन्नः सत्त्वोजन्तुरनया स्यांया।

आपमित्यकम्। न। विनिमयात् प्राप्ते। परिवर्त्तनेनाप्ते। बदले कर्जेन योगेवस्तु इति भाषा। अपमानम्। मेड्मगिटाने। उदीचां माङो। व्यतीहारे इतिश्ना। जुगतीतिममालसः। समासेऽनञ्पूर्वे क्त्वोल्यप्देश. । स.

आपात

यतेरिदन्यतरस्यामितीत्वम् । अपमित्य निवृत्तम् । अपमित्ययाचितान्यां कंकंनावितिकंकम् । आपरोक्षिकम् । त्रि । अपरोक्षेतने । अपरोक्षेभवम् । कालाट्ठञ् । आपवः । पुं । वशिष्ठमुनौ । आपठ । न । जले । आपोभिर्मार्जनं कृत्वेतिस्मृतिः । आप्नोतेरसुनिसान्तस्त्रीवम् । आपः कर्मख्यायांह्रस्वोनुट्चवेत्यत्र बाहुलकात् आपः आपसो इत्युक्तकौमुद्याम् । तत्रबाहुलकादित्युपलक्षणेम ह्रस्वनुटौ वास्तीति व्याख्यानात् । तथाच ब्रुवते के तमेपि नपुंसकमापइतिकोशमुद्दीक्ष्य सर्वमापोमयं जगादिति मवोगो दुर्घटवृत्तौ समर्थित इति । आपस्तम्बः । पुं । कल्पसूत्रकारे । शाखान्तरे । आपस्तम्बिनी । स्त्री । लिङ्गिन्यांखेतायाम् । आपाकः । पुं । आवाइतिप्रसिद्धकुम्भकारपक्वपात्रादिदहनस्थाने । पवने । आपातः । पुं । पतने । तत्काले । तदाख्ये । पातने । मार्गे । आपतन्ति सर्वेरन्ति अस्मिन् घञ् । आपातलठ । त्रि । अवधारणविनेत्यर्थे । अकस्मादर्थे ।

आपूपि

आपानम् । न । पानगोष्ठ्याम् । सुरापानायसम्भूयोपवेशनेन मद्यपानार्थसभायाम् । आसम्भूयपिबन्त्यत्र । आपापाने । ल्युट् । आपानभूमिः । स्त्री । मधुपानस्थाने । आपिञ्जरम् । न । स्वर्णे । आपीडः । पुं । शेखरे । शिखामाल्ये । शिरोभूषणे । वह्निनिःसृतदारुणि । आपीडयति पीडअवगाहने । पचाद्यच् । आपीडिता । त्रि । आकृष्टे । समन्तात्पीडिते । आपीतम् । न । भाद्रिकधान्ये । आपीनम् । न । ऊधसि । आप्यायते स्म । आप्यायीवृद्धौ । गत्यर्थेतिकः । प्यायःपी निष्ठायाम् । सोमसर्गेस्यन् । आङ्पूर्वस्यान्धूधसोःस्यादेवेतिपीभावः । आप्तपीतेतिनिष्ठानत्वम् । पुं । अन्धौ । कूपे । इतिविश्वदेवः । त्रि । अतिस्थूले । ईषत्स्थूले । आपूपिकम् । न । पिष्टकसमूहे । आपूपानांसमूहः । अचित्तहस्तिधेनोरुक् । त्रि । पिष्टकाजीवे । कान्दविके । भक्ष्यकारे । आपूपःपण्यमस्य । तदस्यपण्यमितिठक् । यद्वा आपूपभक्षणंशीलमस्य । शीलमितिअ । पूपभक्षणंहितमस्य । हितंभक्षा इ

आसग

तिवाठक् । अपूपेसाधुर्वा । गुडादि
भ्यष्ठञ् ॥
आपूप्यः । पुं । सक्तुषु । अपूपार्थकपिष्टा
दौ । चूर्णके ॥
आपूरितः । त्रि । अभिव्याप्ते । परिपू
र्णे । यथा । आपूरितं महापात्र
मिति ॥
आपूर्त्तिः । स्त्री । ईषत्पूरणे । सम्यक्
पूरणे ।
आपूपम् । न । रङ्गे । रांग इतिभाषा ॥
आपृच्छा । स्त्री । आख्याने । आभाषणे
॥ आपृच्छनम् । पृच्छ्+ण्यु । गुरोश्चहल
इत्यः ॥
आपृष्टः । त्रि । अनुज्ञाते ।
आप्तोक्तिमम । न । सम्मतेतृतीयपदु
नवमेदशभवनेषु ।
आप्तः । त्रि । प्रत्ययिते । विश्वासाधारे ।
प्राप्ते । लब्धे । सत्ये । रागद्वेषादिवि
र्जितेयथार्थवक्तरि ॥ चित्तोपदेष्टरि-
॥ युक्ते । भ्रमादिशून्ये । तत्त्वार्थवेदि
नि ॥ पुं । भ्रमप्रमादविप्रलिप्साक
रणापाटवरूपदोषचतुष्टयरहितेऽ
प्तादौ । आप्यतेस्म । आप्+क्तः । तस्मिन् । जिने ।
आप्तकामः । त्रि । प्राप्तस्वरूपानन्द
हसे । आप्तः कामोयेन ।
आप्तगर्भः । त्रि । प्राप्तगर्भाधारे ।

आप्तज्ञ

आप्तजनः । पुं । हिते । हितोपदेष्टरि
। आप्तश्चासौजनश्च ।
आप्तवचनम् । न । आप्तश्रुतौ । शब्दे
॥ आप्तस्यवचनम् । कर्मधारयोवा ॥
आप्तवाक्यम् । न । आगमे ।
आप्तवाक् । स्त्री । वेदे । कर्मधारयः ॥
बहुव्रीहिणामुनौ ॥ पुं ।
आप्तश्रुतिः । स्त्री । आप्तवचनेच । वेदे
। आप्ताचासौश्रुतिश्च ।
आप्ता । स्त्री । जटायाम् । इतिहेमा
वुधौ ।
आप्तिः । स्त्री । सम्बन्धे । योगे । लाभे
। सम्प्राप्तौ । व्याप्तौ । आप्यते । आप्
+ क्तिन् । स्त्रियांक्तिन्नादिभ्यः ॥
आप्तोक्तिः । स्त्री । राद्धे । सिद्धान्तवाक्ये ।
आप्यम् । न । वृष्टौषधौ । त्रि । अम्ल
ये । जलविकारे फेनादौ । कर्मण्ये
यभूते मन्त्रादौ । आप्तस्ये । अपां
विकारः । तस्यविकारइत्यणोन्ताश्च-
तुर्वर्णादित्वात् यार्थेष्यञ् ॥ स्त्री ।
आप्या ।
आप्यायकः । पुं । पुष्टिकरे ।
आप्यायनम् । न । तर्पणे । हर्षे । प्री
णने ॥ परिपूरके ।
आप्यायितः । त्रि । हृष्टे । प्रीते ॥ पू
रिते ।
आप्रच्छनम् । न । आनन्दने । पृच्छ

आप्त

क्तीस्यार्थाम् । आङ्पूर्वोयमानन्दनार्थः । क्युट् ॥

आप्रदानम् । न । आदाने ॥

आप्रपदम् । न । पादाग्रपर्य्यन्ते ॥

आप्रपदीनम् । वि । पादाग्रपर्य्यन्तलम्बमाने वस्त्रादौ । पादस्याग्रं प्रपदम् । तन्मर्य्यादीकृत्य आप्रपदम् । आप्रपदंप्राप्नोतीत्यर्थे अनेन खः ॥

आप्लवनम् । न । उत्प्लवने । उड्डयने ॥

वि । ईषदवनते ॥

आप्लवः । पुं । स्नाने । आप्लवनम् । प्लुङ् गतौ । घञ्भावपक्षे कृदोरप् ॥

आप्लवव्रतो । पुं । स्नातके । समाप्तवेदाध्ययनकृतस्नाने । आप्लवते । प्लुङ् । अच् । आप्लवश्चासौव्रतोच ॥ आप्लवः स्नानम् । तन्नित्यव्रतीत्यायीतिमुकुटः ॥

आप्लावः । पुं । स्नाने । आप्लवनम् । प्लुङ् ° । विभाषाडिश्रुवोरितिवा घञ् ।

आप्लाव्यम् । न । आप्लवे । आप्लवते । प्लुङ् ° । भव्यगेयेतिसाधु ॥

आप्लुतः । वि । स्नाते । कृतस्नाने । पुं । स्नातके । आप्लवनम् । प्लुङ् ° । क्तः ॥

आप्लुतव्रतो । पुं । श्रुतेः पाठात् स्नाते । स्नातके । आप्यमान्तरमगते समाप्तवेदव्रते । आप्लवते । प्लुङ् ° । गत्यर्थाकर्मकेतिक्तः । सचासौव्रतोच ॥ मुकु

आमर

टस्तु आप्लुतं स्नानं तन्नित्यव्रती नित्यस्नायीत्याह ॥

आप्वा । पुं । वायौ ॥ आप्नोतिसर्वम् । आप्नृ ° । शेवयज्ञेतिवनन्तः ॥

आफूकम् । न । अहिफेने ॥ आफूकंशोषणंग्राहिश्लेष्मसंवातपित्तलम् । तथा खसफलेऽपि तवत्कालप्रायमित्यपि ॥

आबद्धः । पुं । दृढबन्धे । प्रेम्णि । अलङ्कारे । भूषणे । पुं । योद्धरि । वि । आबध्यतेस्म । बधः । क्तः ॥

आबन्धः । पुं । बन्धने । प्रेम्णि । योद्धरि । आबध्यतेऽनेन । बन्धबन्धने । हलश्चेति घञ् ।

आबाधा । स्त्री । पीडायाम् । दुःखे ॥

आभुग्नखण्डे । चिकोणचेवमध्यरज्जुनिचेपेण यत्खण्डद्वयं जायते तस्मिन् । बाधृलोडने । आङ्पूर्वःगुरोश्चेत्यः ।

आभिषः । वि । अनृच्छे । अप्रसन्ने । कलुषे ॥ आभिषति । षिषभेदने । इगुपधेतिकः ॥

आभिषकन्दः । पुं । मालाकन्दे ॥

आभुत्तः । पुं । नाभ्योरन्या भगिनीपतौ ॥ आपनम् आप् । सम्पदादित्वात् क्विप् । आपमुत्तनोति । अन्येभ्योपीतिडः ।

आभरणम् । न । निरूपणे ॥

आभरणम् । न । अलङ्कारे । भूषणे ॥

आभिम

आभिनतेऽनेन । भृञ्भरणे । ल्युट् । आभा । स्त्री । उपमायाम् । कान्त्याम् । शोभायाम् । दीप्तौ । वबूले । आभा वबूलपर्यायः कथितः कोविदैरिहेति भावप्रकाशे वातव्याधौ त्रिकण्टकचिकित्सा ॥

आभाति: । स्त्री । छायायाम् ।

आभाषणम् । न । आलापे । कथने । भाषव्यक्तायांवाचि । आङ्पूर्वः । ल्युट् ।

आभाषितः । त्रि । अभिमुखीकृते ।

आभासः । पुं । प्रतिबिम्बे । दीप्तौ । सदृशे ॥ आभिमुख्येनभासते । भास० । घञ्चच् । ईषद्भासनंवा ॥

आभास्वरः । पुं । चतुष्षष्टिसङ्ख्यकगणदेवताविशेषे ॥ आभास्वराश्चतुष्षष्टिरित्युक्तेः ॥ द्वादशसङ्ख्यकेगणदेवताविशेषे ॥ आत्माचातादभोदान्तः शान्तिर्धानंयमस्तपः । कामः क्रोधोमदोमोहोद्वादशाऽऽभास्वरादमे । आसमन्ताद्भासनयोगः । भास्वदौ । स्वेऽभासपिसकसोवरलितिवरच ।

आभिजात्यम् । न । कौलीन्ये । पाण्डित्ये । अभिजातस्यभावः । ष्यञ् ।

आभिमन्यवः । पुं । परीक्षिति नृपे ॥ अभिमन्योरपत्यम् । अण् ।

आभीर

आभिरः । पुं । गोपे । आसमन्तात्भिवंराति । रादाने । आत इतिकः ।

आभिरूप्यम् । न । अभिरूपत्वे ।

आभीक्ष्ण्यम् । न । भृशे । अत्यन्ते । अतिशये ॥ नित्ये । त्रि । तद्युक्तक्रियायाम् ॥

आभीक्ष्ण्यम् । न । पौनःपुन्ये । भृशार्थे । भावेष्यञ् ।

आभीरः । पुं । अहीर इतिप्रसिद्धेगोपे । ब्राह्मणादम्बष्ठ्यायामुत्पन्ने । वैद्यमेदेच आभीरोगधादुपजीवीतिस्मृतौ । देशविशेषे । यथा । स्त्रीकोङ्कणादवोभागेतापीतः पश्चिमेपरे । आभीरदेशो देवीगिरिविन्ध्यगैलेब्धस्थित इतिशब्दसङ्गमेतन्त्वम् । न । मात्रावृत्तप्रभेदे । यथा । रेफाटश्चकलधारि कविकुलमानसहारि । इदमाभीरमवेहिजगणमन्तमनुधेहि । यथा । तरुणनेयनयस्तिलेन मदमन्यरचलितेन । सुमुखिहृदयमभिलषि सपदिनकस्यकरोषीति ॥ आभिरयति । ईषद्गतौकम्पनेच । घञ्चच् ।

आभीरपल्लिः । स्त्री । गोपग्रामे ॥ गोपगृहसङ्घो । आभीरग्रामपल्लिः ।

आभीरपल्ली । स्त्री । गोपग्रामे । गोपे । अहीरयाला इति भाषा । आ

आभः
भीराणांपल्ली । आभीरी । स्त्री । महाशूद्रग्राम । अहीरनी इति भाषा । आभीरस्त्री जाती यां वा । पुंयोगादिति जातेरिति च ङीष् । आभीलम् । न । कृच्छ्रे । दुःखे । त्रि । कष्टयुक्ते । भयानके । आसमन्तात् भियं लाति । ला । क । आभुग्नः । त्रि । ईषदृजुके । आकुञ्चिते । आभेरी । स्त्री । रागिणीविशेषे । आभोगः । पुं । वरुणस्यक्षेत्रे । परिपूर्णतायाम् । यत्ने । आभोजनम् । भुज । भावे अधिकरणे वा घञ् । कविनामयुक्तगानसमाप्तकाव्ये । यथा । यत्रैवकविनामस्यात्सआभोग इतीरितइतिसङ्गीतदामोदरः ।
आभ्यन्तरः । त्रि । अभ्यन्तरभवे । तत्रभव इत्यण् ।
आभ्युदयिकः । त्रि । अभ्युदयनिमित्ते आद्यादिकर्मणि ।
आभ्रिकः । पुं । काष्ठकुद्दालेन खनने कर्त्तरि । अभ्राखनति । तेनदीव्यतीत्यादिनाठक् ।
आम । । । अङ्गीकारे । ज्ञाने । निश्चये स्मृतौ । । मतिवचने । आमयति । । अमगत्यादिषुगणस्थः किम् ।
आमः । पुं । रोगभाजे । रोगविशेषे

आमन्त्रि
। मलवैषम्यरोगे । न । षट्प्रकारा । जीर्णरोगमध्ये रोगविशेषे । आहारस्यरसःसारो । योनपक्कोऽग्निलाघवात् । आमसंज्ञां सलभते बहुव्याधिसमाश्रयः । आममन्नरसंकेचित् केचित्तुमलसञ्चयम् । प्रथमांदोषदुष्टिंवा केचिदामंप्रचक्षते । अपिच । अग्निपक्कमसंसक्तं दुर्गन्धिबहुपिच्छिलम् । सादनंसर्वगात्राणामाममित्यभिशब्दितम् । तेनामेन सदायुक्तादोषादूष्यास्तुष्टयः । तदुद्भवा आमयाश्चसामान्यैतिबुधैः स्मृताः ।
त्रि । अपक्के । असिद्धे । पाकरहिते ।
आमगन्धि । न । अवाद्युत्थगन्धयुक्ते । विल्वे । अपक्कमांसादिगन्धार्थे ।
आमण्डः । पुं । शुक्तेरण्डे ।
आमनस्यम् । न । पीडायाम् । व्यथायाम् । अमनसो भावः । ब्राह्मणादित्वात् ष्यञ् ।
आमन्त्रणम् । न । सम्बोधने । आनन्दने । निमन्त्रणे । कामचारानुज्ञायाम् । यस्याकरणे प्रत्यवायोनस्यात् । यथा । दृष्ट्वा अधीत्य भावन् । मन्त्रिगुप्तभाषणे । आङ्पूर्वः । स्युट् ।
आमन्त्रणा । स्त्री । पृच्छायाम् ।
आमन्त्रितम् । न । । सम्बोधनप्रथमायाम् । त्रि । निमन्त्रिते ।

आमवा

आमन्दः । पुं । वासुदेवे ॥
आमन्दा । स्त्री । खड्गाभेदे ।
आमयः । पुं । रोगे । अमरोगे । भावे घञ् । आमंयाच्यनेन । यामाप र्णे । अन्येभ्योपीतिडः । यद्वा । आमयनमनेनवा । मीङ् हिंसायाम् । अरच् । धोवा । न । कुंष्ठोपधौ ॥
आमयावी । त्रि । रोगिणि । नन्दान खयुक्ते । विकृते ॥ आमयो स्यास्ति । आमयस्योपसंख्यानंदीर्घश्चेति-विनिः ॥
आमर्शनम् । न । स्पर्शे ।
आमर्षः । पुं । कोपे । मर्षणम् । संप तितिक्षायाम् । घञ् । नञ् समासः । अन्येषामपीतिदीर्घः । निरुद्धो गोनिरामर्षं निर्वीर्यमरिनन्दनमि-तिप्रयोगः ॥
आमलकः । पुं । वासकवृक्षे । न । धात्रीफले । क्षुद्रामलके । आमलते । मल । क्वुन्शिलिपसंज्ञयोः । आ मलकया फलम् । फलेलुगितिविकारावयवप्रत्ययस्यलुक् । वि । धात्री वृक्षे । तिष्यफलायाम् ।
आमलकी । स्त्री । अमृतायाम् । तिष्य फलावृक्षे । आमलते । मलधारणे । क्वुन् । जातेरितिङीष् ।
आमवातः । पुं । स्वनामख्यातेरोगवि

आमिचा

शेषे । तल्लक्षणं यथा युगपत्कुपि तावेतौ विकसन्धिप्रवेशकौ । स्तब्ध त्वकुरुतो गात्रमामवातःसउच्यते । एतौयातकफौ । विकसन्धिप्रवेशकौ वेदनयेतिवोद्धव्यौ ॥
आमश्राद्धम् । न । आमान्नविहितश्रा द्धे । आपद्यनग्नौतीर्थेच चन्द्रसूर्य ग्रहेतथा । आमश्राद्धंद्विजैःकार्यंशूद्रे णेतुसदैवहि । अपत्नीकः प्रवासीच भार्यायैस्यरजस्वला । आमश्राद्धंद्विजैः कार्यंशूद्रेणतुसदैवहीतिच ॥
आमातीसारः । पुं । षट्प्रकारातीसा रभेदेरोगविशेषे ॥
आमात्यः । पुं । अमात्ये ।
आमानस्यम् । न । पीडायाम् ॥
आमान्नम् । न । अपक्वतण्डुलाद्यन्ने ।
आमाशयः । पुं । नाभिस्तनयोर्मध्यभा गे अपक्वस्थाने ।
आमिक्षा । स्त्री । वैद्यदेव्याम् । तप्ते पक्वेचपयसि दधियोगतो ज्ञातायांदु ग्धविकृतौ । सवघनीभूतःपिण्डआ मिक्षा जलंयाजिनम् ॥ आमिष्यते । मिषुसेचने । बाहुलकात्सक् । य द्वा । आमक्षति । मक्षरोषे सङ्घा तेच । अच् । पृषोदरादिः ॥
आमिक्षीयम् । न । आमिक्षे । दधि नि । आमिक्षायैहितम् । विभाषाङ्

आमुषि

विरूपपादिभ्यइतिछः॥ ।

आमिष्यम्। न। आमिषीये। आमिषायैहितम्। यत्।

आमिषम्। न। पुं। भोग्यवस्तुनि॥ सम्भोगे॥ उत्कोचे॥ पिशले। मांसे॥ सुन्दराकाररूपादौ। लोभसत्त्वये। लाभे। कामगुणे। रूपे। भोजने। लोभ्यवस्तुनि। विषये।

आमिषति। मिषस्पर्द्धायाम्। भेषतिवा। मिषुसेचने। इगुपधेतिकः। यद्वा॥ अमति॥ अमगत्यादिषु। अमेर्दीर्घश्चेतिटिषच्॥ यद्वा। आमिष्यते भुज्यते। मिषस्पर्शेपणे। घञ्। संज्ञापूर्वकत्वान्नगुणः। घञर्थेकः इतितुपरिगणनाद्युक्तम्।

आमिषप्रिय। वि। मांसाभिलाषिणि॥ पुं। कङ्कपक्षिणि।

आमिषाशी। वि। मत्स्यमांसभोजनशीले। शौष्कले॥ आमिषमश्नाति। अशभोजने। सुपीतिणिनि।

आमीक्षा। स्त्री। आमिक्षायाम्। आङ्पूर्वान्मिहेर्दीर्घश्चेतिसः॥

आमुक्त। वि। पिनद्धे। परिहितवस्त्रादौ। परिहितकवचेजने। आमुच्यवेस्म। मुचृमोचणे। क्तः।

आमुषः। पुं। कणटकयुक्तवंशविशेषे।

आमुष्मिक। वि। स्वर्गसुखादनुभवे।

आम्नायः

अमुष्मिन् परलोकेभवः। ठक्।

आमुष्यायणः। वि। ख्यातवंशोद्भवे। सत्कुलजाते। अमुष्यापत्यम्। नडादिभ्यत्फक्। पदव्याः अलुक्॥

आमूलम्। न। मूलपर्य्यन्ते।

आमोदः। पुं। अतिदूरगामिनिगन्धे। गन्धे। हर्षे। निश्वासगन्धे॥ सुमनोगन्धे। आमोदनम् आमोदयतिवा। मुदहर्षे। आङ्पूर्वः। भावे घञ्। स्वार्थेण्यन्तः। यंचाद्यज्वा॥

आमोदनम्। न। आमोदकरणे। ल्युट्।

आमोदिनः। वि। आनन्दिते॥ सहर्षे। सुगन्धिते। आमोदःसञ्जातोऽस्य। तारकादिभ्यइतच्।

आमोदी। वि। मुखवासने। कर्पूरादिनानाद्रव्यरचितमुखवासार्हद्रव्ये॥ आमोदोऽस्त्यस्य अस्मिन्वा। इनि॥

आम्नातः। वि। अभ्युक्तः। यथा। अनाम्नातेष्वमन्त्रेष्विति।

आम्नायः। पुं। आगमे। निगमे। वेदे॥ सम्प्रदाये। गुरुपरम्परागतसदुपदेशे। देशे। वंशे। कथने। कुलक्रमे। अभ्यासे। यथा। तस्यसन्दिदिहे बुद्धिर्मुहुः सीतांनिरीक्ष्यच। अम्नायानामयोगेनविद्यामग्निशिखा

आम्रः

मिवेति रामायणम् ॥ आम्रियते अभ्यस्यते । म्रा+अभ्यासे । कर्मणिघञ् । ण्यासश्रन्थेतिणः । आम्रानंवा । भावे घञ् । आत इति युक् । आम्बिकेयः । पुं । कार्त्तिकेये । स्कन्दे । धृतराष्ट्रेराजनि । अम्बिकायाः अपत्यम् । स्त्रीभ्योढक् । आम्रसिकः । पुं । मत्स्ये । अम्रसावर्त्ततेऽत्रेति । आजम्रहोम्रसावर्त्ततेइतिठक् । ठस्येकः ।

आम्रः । पुं । चूते । रसाले । अथास्यपुष्पादीनांगुणाः । आम्रपुष्पमतीसारकफपित्तप्रमेहनुत् । अस्रकृद्दृष्टिहरंशीतंबद्धविकृद्ग्राहिवातलम् ॥ आम्रंबालंकषायाम्लं रुच्यंमारुतपित्तकृत् । तरुणंतु तदत्यम्लरूक्षं दोषत्रयास्रकृत् । * । आम्रमामंत्वचाहीनं मांसमेतीवमोपितम् । अम्लस्वादुकषायंस्याद्भेदनंकफवातजित् । पक्वन्तु मधुरंस्निग्धं शुक्रबलप्रदम् । गुरुवातहरद्व्यंवर्ण्यंशीतमपित्तलम् । कषायानुरसं बद्धिश्लेष्मशुक्रविवर्द्धनम् । * । तदेववृक्षसम्पक्वं गुरुवातहरंपरम् । मधुरास्वंसरंकिञ्चित् भवेत् पित्तप्रकोपनम् । । आम्रकूविमपक्वंयत्तद्भवेत् पित्तनाशनम् । रसस्याम्बुग्रहाने

आम्रः

स्तुमाधुर्याच्च विशेषतः । चूर्णितंतत्तापरंरुच्यंबलवीर्यकरंलघु । शीतलंशोथपाकिन्यो दातपित्तहरंसरम् । * । तद्वेगालितेवल्योगुरुर्वातहरःसरः । अम्लद्यस्तुपर्णीस्तोवरट्टहणः-कफवर्द्धनः । । तस्यखण्डंगुरुपरंरोचनं चिरपाकिच । मधुरंबृंहणंबल्यं शीतलंवातनाशनम् । वातपित्तहरं रुच्यंदहणं बलवर्द्धनम् । दृष्यंवर्ण करंस्वादुदुग्धाल्लंगुरुशीतलम् । * । मन्दानलत्वं विषमज्वरश्वरक्तामयं वेदगुदोद्दरञ्च । आम्रातियोगेन यनोमयञ्चकरोति तस्मा दतितानि नाचात् । । एतद्दलाम्रविषयंमधुरा म्रपरंनतु । मधुरस्य परंनेदहितत्वा दागुणायतः । * । गुरुव्यम्लवनुपानंस्याद्दाहाणा मतिमत्तणे । चीरकं याम्रयोरत्यं सक्तुभोपचलेनच । * । आम्रबीजं कषायंस्या च्छर्द्यतीसार नाशनम् । ईषदम्लंचमधुरं तथा हृदयदाहनुत् । * । आम्रस्यपल्लवंरुच्यं कफपित्तविनाशनम् । पल्लवंमधुरं वेदलम् । अस्य शाकमकारन्तु । स्विन्ना निष्पीडिता: कामंकोकिलाक्षा रपल्लवा: । एतस्मिन्मृत्यसंसिद्धाच्या गामठयासिता: । सर्षिवाग्यएडयुक्ता स्तेतस्मिताम्लपल्लवा: । नंवद्राट्टक

आम्र

-सयुक्तामारीचैरुचिकारकाः॥ ॥ अ
स्यपक्वफलमुकुलानां प्रकारस्तु । आम्र
स्यचैवनवताम्रकचिप्रवालाः खण्डी
-कृतालवणमिश्रितपिण्डिताश्च । वा
ल्लोकधूपनजुषोघृतदुग्धसिद्धाःसन्दी
पयन्ति पवनस्यसखंहिणस्ते । मुकुलः
सहकारशाखिनः शृतखण्डीकृतसै
न्धवान्वितः । दधिमध्यमरीचसंस्कृत
श्चिरयातामरुचिंछिनत्तिहि ॥ कफ
पित्तहरौहृद्यौमुखवैरस्यनाशनौ ।
वह्निसञ्जननौरुच्यौ चूतजौ पुष्पपल्ल
वौ ।॥ आम्रमामंजलस्विन्नंमर्दितं
दृढपाणिना । सिताघृताम्बुसंयुक्तं
कर्पूरमरिचान्वितम् ॥ प्रमानकमि
दंश्रेष्ठंभीमसेनेननिर्मितम् । सद्योरु
चिकरंबल्यंश्रीघ्रमिन्द्रियतर्पणमिति
॥ अम्यते । अमगत्यादौ । अमित-
म्योर्दीर्घश्चेतिरक्दीर्घश्च ॥

आम्रगन्धकः । पुं । सप्तपिलायाम् । भा
वकविशेषे ॥

आम्रमेथी । स्त्री । शुष्काम्रखण्डे ॥

आम्ररसाकृतिः । स्त्री । रसालायाः प्र
भेदे । यथा । किञ्चित्कुङ्कुमसंयुक्तं
घिसस्तुदधिगालितम् । सशर्करं भवे
त् पीताम्बक्षाम्ररससन्निभा ॥ पीता
शिखरिणीया साखड्वोवर्णवतीहि-
सा । सुरुच्यामधुराबल्यावातपित्तह

आम्रात

रापरेति ॥

आम्रवणम् । न । चूतवने ॥ प्रनिगत्ता-
श्वरेत्यादिनावनप्रत्ययस्यलुक्त्वम् ॥

आम्रातः । पुं । आम्रडा अम्बाडाइति
विख्यातेफलवृक्षविशेषे ॥ कपीतने ।
पीतने । आम्रातमम्लंवातघ्नंगुरूष्णं
रुचिकृत्परम् । पक्वन्तुतुवरं स्वादुरक्त
पाकं हिमंस्मृतम् ॥ तर्पणंश्लेष्मलंवृ
ष्यंबृंहणंविष्टम्भिदंहृणम् । गुरुवल्यंम
रुत्पित्तश्वासदाहक्षयास्रजित् ॥ अ
म्बाट इतिख्याते आम्रातके ॥ रा-
जाम्रे ॥

आम्रातकः । पुं । आम्राते । कपीतने-
वृक्षे । अमैाट इतिख्याते । आम्रावर्त्ते
॥ पक्वस्यसहकारस्यकटे विस्तारितो
रसः । घर्मशुष्कोमुहुर्दत्त आम्रात-
क इतिस्मृतः ॥ आम्रमतति ॥ अत
सातत्यगमने । कृवृदृक्षिराजुस्तुस्फु
जिभ्यउन् ॥

आम्रातकेश्वरः । पुं । सिद्धस्थानविशेषे
॥ आम्रातकेश्वरे रुद्रच्छागरुद्रच्छागाख्याप
रमेश्वरीत्यागमः । रुद्रच्छागाचाम्रात
केश्वरे इति देवीगीताच ॥

आम्रावर्त्तः । पुं । आम्रातके । अमावट
अमैाट इतिभाषाप्रसिद्धे ॥ आम्रा
वर्त्तस्तुपाक्यहृद्यंवातपित्तहरःसरः ।
रुच्यःसूर्य्यांशुभिःपाकात्तद्गुण्यस्तद्वि-
कीर्त्तितः ॥

आयत

आम्रेडितम् । न । द्विरुक्ते ॥ यथा । सर्पःसर्प इति ॥ आम्रेड्यते आधिक्येनोच्यतेस्म । म्रेडृउन्मादे । क्तः ॥

आम्लवेतसः । पुं । अम्लवेतसवृक्षे ॥

आम्ला । स्त्री । अम्लिकायाम् ॥ तिन्तिडीवृक्षे । श्रीवल्ल्याम् ॥

आम्लिका । स्त्री । चिञ्चायाम् । अम्लोद्गारे ॥

आयः । पुं । धनागमे । प्राप्तौ । लाभे । एकादशभवने ॥ वास्तुविधये । ध्वजादयष्टसु ॥ आयाध्वजोधूम्रहरिद्गोखरेभध्वाङ्क्षवृकाः इष्टुकेः । ग्रामादिषुस्वामिग्राह्ये भागे । स्वयंगारचके ।

आयःशूलिकः । त्रि । तीक्ष्णकर्म्मणि ॥ तीक्ष्णोपायेनयोऽन्विच्छेत्तमायःशूलिकोजनः । अयःशूलेनेवार्थानन्विच्छतिआयःशूलदण्डाजिनाभ्यांठक्ठञौयथाविहितठक् ॥

आयतः । त्रि । दीर्घे । लम्बा इति भाषा ॥ आयम्यतेस्म । क्तः । आयतते वा । यतीप्रयत्ने । पचाद्यच् । आकृष्टे ॥ अतिप्रसक्ते ।

आयतच्छदा । स्त्री । कदल्याम् । आयतावृच्छदाः यस्याः सा ॥

आयतनम् । न । आश्रये । विश्रामस्थाने । यज्ञस्थाने । चैत्ये । देवस्थाने ।

आयस्तः

। आयतस्तोऽर्थे । यतीप्रयत्ने । अधिकरणे क्तः ॥

आयतिः । स्त्री । दैर्घ्ये । प्रभावे । कोपदण्डजे तेजसि । उत्तरकाले । आगामिकाले । फलदानकाले । प्रापणे । सङ्गे । संयमे । आयम्यते अनया अस्मा आयमनं वा । यमउपरमे । स्त्रियांक्तिन् । आयास्यतिवा । यातेर्वा हुखकाडुतिः ॥

आयती । स्त्री । भविष्यत्काले । कृदिकारादिति ङीष् ॥

आयत्तः । त्रि । अधीने । वशीभूते । आयततेस्म । यतीप्रयत्ने । अकर्मकत्वात्कर्त्तरिक्तः ॥

आयस्तिः । स्त्री । स्नेहे । वह्निज्वे । वासरे । बले । स्थाम्नि । सामर्थ्ये । सीमनि । आयतनम् । यतीप्रयत्ने । स्त्रियांक्तिन् ।

आयमनम् । न । आकर्षणे ॥ यथाहेदस्यधनुष आयमनमिति । आकृष्य दीर्घीकरणे ।

आयस्कम् । न । उत्कलायाम् ॥ इति हेमचन्द्रः ॥

आयसम् । न । लौहे । त्रि । अयसोविकारे । अयोनिर्म्मिते ॥ अण् ॥

आयसी । स्त्री । लौहमयकवचे । अङ्गरक्षिण्याम् । जाङ्घिकायाम् । ङीप् ।

आयुः

आयस्तः । त्रि० तेजिते शस्त्रादिना-तीक्ष्णीकृते । चिते ॥ क्षेपिते । कृ-पिते । हते । उत्क्षिप्ते । प्रयत्नकर्त्रीके ॥ यसुप्रयत्ने । कर्त्तरिक्तः ॥

आयस्थानम् । न । स्वामिग्राह्योभागः आयः स यस्मिन्नुत्पद्यतेतस्मिन् ।

आयातः । त्रि० आगते ॥

आयानम् । न । स्वभावे । इतिजटाधरः ॥

आयामः । पुं । दैर्घ्ये । आयम्यते अनेन वा आयमनं वा घञ् । यद्वा । आयांति । या० । अस्मिन् सुच्चिति मन् ॥

आयामवान् । त्रि । आयामिनि ॥ आयामोऽस्ति अस्यअस्मिन् वा । वलादिभ्योमतुवन्यतरस्यामिति मतुप् ।

आयामी । त्रि । आयामवति ॥ पक्षे इनिः ॥

आयासः । पुं । व्यायामे । श्रमे ॥ आयसनम् । यसु० घञ् ॥

आयी । त्रि । स्वामिवति ॥ मतुवर्थे इनिः ॥

आयुः । पुं । छान्दसः । मनुष्ये । एति । इण० । छन्दसीणश्चेत्युण् । बहुलवचनात् भावार्थायोमपीति व्याख्यानकृत् । जीवितव्याप्यकाले । आयुषि ॥ वायुनाजगदायुनेतिवर्णविवेकः ।

आयुर्वे

वधिघ्राजटायुमोमितिभट्टिः । तटीविन्यस्यद्रेरभजतजटायोः प्रथमज इत्यादिप्रयोगार्थानुकूलाख्येषाम् ॥ आयाति । या० । उणादिर्वा ॥

आयुक्तः । त्रि । व्यापारिते । प्रेषयुक्ते । कर्माध्यक्षे । नियोगिनि ॥

आयुतः । त्रि । समन्तात्युक्ते ॥

आयुधम् । न । शस्त्रमात्रे ॥ आयुधानां त्रयोभेदः प्रहरणानि पाणिमुक्तानि यन्त्रमुक्तानि चेति । तत्र । प्रहरणानि खड्गादीनि । पाणिमुक्तानि चक्रादीनि । यन्त्रमुक्तानि अश्मशरखादीनि ॥ आयुध्यन्तेऽनेनि । युधसम्प्रहारे घञर्थेकविधानम् ॥

आयुधधर्मिणी । स्त्री । लतायां वृक्षे ॥

आयुधागारम् । न । अस्त्रगृहे ॥ अत्र नियुक्तस्यलक्षणं मुक्तमात्स्ये १८८ अध्याये । स्थापनाजातितत्त्वज्ञः सततं प्रतिजागरः । रात्रःस्यादायुधागारेदक्षःकर्म शुचोयते इति ॥

आयुधिकः । पुं । अस्त्रजीविनि । शस्त्रजीवे । काण्डपृष्ठे । आयुधेनजीवति । आयुधाच्छ्चेतिचाढक् ॥

आयुधीयः । पुं । आयुधिके ॥ आयुधेन जीवति । छः ॥

आयुर्द्रव्यम् । न । औषधे ।

आयुर्वेदः । पुं । अष्टादशविद्यान्तर्गतश्च

आयुः

न्वन्तरिप्रणीतविद्याविशेषः । चिकित्साशास्त्रे । रोगोपशमपूर्वकानन्दफलके अष्टस्थानसंयुते अथर्ववेदस्योपाङ्गे । आयुःशरीरेन्द्रियसत्त्वात्मसंयोगः तदस्मिन् विद्यते । अथवा आयुरनेनविन्दतीत्यायुर्वेदः । ऋग्वेदस्योपवेदे । इति भावप्रकाशचरणव्यूहः ॥

आयुर्वेदी । त्रि । आयुर्वेदज्ञे । चिकित्सके । वैद्ये ।

आयुर्योगः । पुं । औषधे ।

आयुष्मान् । त्रि । चिरंजीविनि । दीर्घायुषि । अतिशयित आयुरस्य । मतुप् । तस्यामत्त्वेर्धे ॥ पुं । हतीय योगे । तच्चजातिसंज्ञं फलं यथा । यस्या युष्मानजन्मकालेधनुष्मान् यानेयानं तस्यदेशेषुकार्य्यम् । कुर्याद्भूनं क्रीडनं पुष्पवाद्यादासैर्वासैरन्वितोगर्भितश्चेति ।

आयुष्यम् । त्रि । पथ्ये । आयुषोनिमित्ते । आयुषेहिते ॥ यत् ।

आयुस् । न । जीवितकाले । परमायुषि । पथ्याशिनांशीलवतांनराणांसद्वृत्तिभाजांविजितेन्द्रियाणाम् । एवंविधानामिदमायुरत्रचिन्त्यंसदाष्टशतमुनिप्रमाणादः । इते । अदिगतौ । एतेर्णिघेरसुः । णिलोपः । आदृदीकृतायामायादेशः ।

आरघः

आयुस्करः । त्रि । परमायुर्जनके ।

आयोगः । पुं । गन्धमाल्योपहारे । व्यापृतौ । व्यापारे । रोधे । आयोजनम् । युजिर् । घञ् ॥

आयोगवः । पुं । शूद्रादैव्यायामृत्यन्ने-जातिविशेषे । कायस्थचरणमस्यकर्म ।

आयोजनम् । न । आहरणे । द्रव्यासादने । यथा । कुत्रचित्तण्डुलाःसन्तिकश्चित्शालीक्षचेन्धनम् । तेषामायोजनं कुर्वन् मुखःकर्त्तामियीयत इति ।

आयोधनम् । न । युद्धे । वधे । युधसमूहारे । भावे ल्युट् ।

आरः । पुं । भङ्गखण्डे । अनिग्रहे । पित्तले । रेफस्य इतिगौडभाषाप्रसिद्धे मधुराम्लफले । वृक्षविशेषे । न । मुण्डलोहे । पित्तले । रीत्यां ॥ कोणे । प्रान्तभागे । ऋगतौ । भावे घञ् ।

आरकूटः । पुं । न । पित्तले । रीत्याम् । यथा । अकाम्बनेकाम्बननायिकाङ्के किमारकूटाभरणेन न त्रियदृति ॥ आरंकूटयते । कूटदाहे । पचाद्यच् ।

आरघः । पुं । हस्तिकुम्भाधःस्थले । गजकुम्भसन्धौ । हस्तिशीर्षमर्म्मणि । सैन्ये ॥ त्रि । रक्षके ॥ रक्षणीये ।

आरण्य

। स्त्री । रक्षायाम् । आरक्षति । र
क्षपालने । पचाद्यच् ।
आरग्वधः । पुं । धनवल्लेडा सोमालु गि
रमाखव अमलतास इतिभाषाप्रसि
द्धे राजवृक्षे । व्याधिघाते । अस्यगु-
णाः । आरग्वधोगुरुःस्वादुःशीतलः
स्रंसनोत्तमः । ज्वरहृद्रोगपित्ता-
स्रवातोदावर्त्तभूतनुत् । तत्फलंस्रं
सनंकृम्यंकुष्ठपित्तकफापहम् । ज्वरे-
तुसततं पथ्यंकोष्ठशुद्धिकरंपरमिति-
। आरनेणम् । रोगशङ्कायाम् । सम्प
दादित्वात् क्विप् । आरंरोगशङ्का
मपिहन्ति । कर्म्मण्यण् । बहुलंतथो
क्तिहन्तेर्वधः अदन्तः । यद्वा । रक्षरा
गे । सम्पदादित्वात् क्विप् । आरं-
रोगशङ्कामपिहन्ति ।
आरट्टः । पुं । अश्वयोनौ देशविशेषे ।
आरट्टनः । पुं । आरट्टदेशोद्भवघोटके
। पारसीके । आरट्टे जातः । जनी°
। ढः ।
आरणिः । पुं । पयसांभस्मे । आवर्त्ते ।
कुलहरण्डके । इतिहरावली ॥
आरण्यः । त्रि । रक्षपक्षिमृगादौ । अ
रण्ये भवः । अरण्यायुः । गोमये ।
वागोमयेषु ।
आरण्यकः । पुं । पथि । अध्वगे । न्या
र्ये । विदारे । जनुम्बे ॥ हस्तिनि ।

आरना

गजे । अरण्ये भवः । पथ्यर्थाद्यच्-
र्थे अरण्यान्मनुष्येइतिवुञ् । गोम-
याये । वा गोमयेषु । न । काण्वानां-
माध्यन्दिनानाञ्चाङ्गत्वविशेषे । अ
रण्येनूच्यमानत्वात् तस्य । अर-
ण्येध्ययनादेतदारण्यकमुदाहृतम् ॥
आरण्यकुक्कुटः । पुं । वनकुक्कवाकौ ।
आरण्यकुक्कुटःस्निग्धोदृंहणःश्लेष्मलो
गुरुः । वातपित्तक्षयवमीविषमज्वर
नाशनः ।
आरण्यपशुः । पुं । अरण्यजातपशौ ।
। सचसप्तधा । यथा । महिषः । वान
रः । ऋक्षः । सरीसृपः । रुरुःपृष-
तः । मृगः । इतितिथ्यादितत्त्वे पैठी
नसिः ॥
आरण्यमुद्गा । स्त्री । मुद्गपर्ण्यांम् ।
आरण्यराजिः । पुं । मेषे । वृषे । सिं-
हे । मकरमथमार्द्धे ।
आरतिः । स्त्री । उपरमे । निवृत्तौ ।
आरमणम् । रमक्रीडायाम् । क्ति-
न् ।
आरश्यः । पुं । एकाश्वगन्तव्याम् ।
आरनालम् । न । काञ्जिके । आरना-
लन्तुगोधूमै रामैः स्याच्चिरुपीकृ-
तैः । पक्वैर्वासन्धितैस्तत्तुसौवीरसद्व
र्णगुणैः । आर्च्छति । ऋगतौ । अच्
। गच्छति । यत्तगन्धे । च्यवतीतिवः ।

आरम्भ

आरो नालोऽस्य ॥

आरनालकम् । न । काञ्जिके । आरो नालोऽस्य । शेषाद्विभाषेतिकप् ॥

आरवी । स्त्री । आरवनाम्नोम्लेच्छविशेषदेशस्यभाषायाम् । अस्यपठनमुहूर्त्तःपारसीवद्बोध्यः ॥

आरब्धः । त्रि । कृतारम्भे । न । आरम्भे ॥

आरवः । पुं । म्लेच्छदेशभेदे ॥

आरवभाषा । स्त्री । आरवीभाषायाम् ॥

आरभटी । स्त्री । नाट्यवृत्तौ ॥

आरमणम् । न । आरामे ॥

आरम्भः । पुं । त्वरायाम् । उद्यमे । स्वार्थंपरोपकारार्थंवागृह्यचेष्टादिसम्पादनप्रयत्ने । वधे । दर्पे ॥ प्रस्तावनायाम् । उपक्रमे । प्रथमकृतौ । प्रारम्भे । आरभ्यतेऽनेन । रभेरप्यलिटोरितिनुम् ॥

आरम्भवादः । पुं । तार्किकाणां मीमांसकानाञ्चवादे ॥ सयथा । आत्माकाशाणुमुखतः कारणं पूर्वमिष्यते । कुलालादिव दण्डन्तुघटवज्जन्मनाशभाक् । पृथिव्यम्भोऽग्निवायूनांकर्मसंयोजितात्मयः । द्व्यणुकादिक्रमेणा एडमारभन्तद्वदंमहदिति ।

आरम्भवादी । पुं । वैशेषिके । त्रि । तन्मतवादिनि ॥

आरती

आरम्भसिद्धिः । स्त्री । कार्यसिद्धौ ॥

आरम्भी । पुं । आरम्भेवादिनि । वैशेषिके । समवाय्यसमवायिनिमित्तकारणेभ्योभिन्नस्यकार्यस्ययोत्पत्तिस्तां योवक्तितस्मिन्नित्यर्थः । सचवैशेषिकः ॥

आरर्घः । पुं । शब्दभाषे ॥ आरवणम् । रवशब्दे । विभाषाडिरैडुवोरितिघञोभावेऽकृदेरय् ॥

आरा । स्त्री । चर्मप्रभेदकाख्ये । चर्मप्रभेदिकायाम् । आदृयर्त्तिकृच्छ्रतिवा । ऋगतौ । अच् । आर्यतेवा । भिदादिवाराग्रस्त्र्यामितिपाठात् साधुः । प्रतोदे । अर्यन्तेऽनयाऽश्वाः । आङ्पूर्वार्त्तिः । आङोर्त्तेश्च । उपसर्गादृतीति टिड्डिः ॥

आराग्रम् । न । अर्द्धचन्द्रादस्त्रमुखे ॥ अर्द्धचन्द्रचुरप्रादिधाराग्रंमुखमुच्यते । आराग्रन्तुमुखन्तेषांपुष्पपत्रादिभेदतः । इतिशब्दरत्नावलिः ॥

आरात् । ऐ । दूरे । समीपे ॥ कारातिः । रादाने । बाहुलकादातिप्रत्ययः ।

आराति । पुं । अरौ । अघौ ।

आरातीय । त्रि । दूरस्थे । निकटस्थे । आराद्भवः जातः आगतोवा । दूराच्च ॥

आराम

आरात्रिकम् । न । नीराजनायाम् ॥ नीराजननिमित्तदीपे । नीराजनामन्त्रे । आदौ घृतपुष्पादितले च विष्णो र्दीनाभिदेशे मुखमण्डलैकम् । सर्वेषु चाङ्गेष्वपि सप्तवारानारात्रिकं भक्तजनस्तु कुर्यात् ॥

आराधनम् । न । पचने ॥ साधने ॥ आवासौ । तोषणे ॥ पूजने ॥ असार-संसारविवर्त्तनेषु मायात तोषं प्रसभं ब्रवीमि । सर्वत्र दैन्यात्समतामुपेत्य मुक्त्वमाराधनमच्युतस्येति प्रह्लादः ॥ असारोयंसंसारस्तत्र विवर्त्तनानि देव मनुष्यतिर्यगादिजन्मानि तेषु तत्तद्दुश्चितैर्भोगैस्तोषं मायात किन्तु सर्वत्र सर्वेषु भूतेषु समतां समदर्शितामुपेत्य मामुत ॥ तदेवाच्युतस्याराधनमित्यर्थः ॥ आराध्यतेऽनेन । राधसंसिद्धौ । भावकरणादौ ल्युट् ॥

आराधना । स्त्री । साधनायाम् । सेवायाम् । परिचर्यायाम् । टाप् ॥

आराधनीयः । वि । आराधयितुंयोग्ये ॥

आराध्यः । वि । उपास्ये । सेव्ये ॥

आरामः । पुं । उपवने । कृत्रिमवने । क्रीडार्थवने ॥ आरमन्त्यत्र । रमक्रीडायाम् । हलश्चेतिघञ् ॥

आरामशीतला । स्त्री । सुगन्धिपथिविशेषे । आनन्द्याम् । गन्धाढ्यायाम् ।

आरूढः

आरालिकः । वि । पाचके । सूपकारे ॥ जिह्मगामिनि ॥ आरालंकुटिलं चरति । चरतीतिठक् ॥

आरावः । पुं । आरवे । निनादे । निस्वने । आरवणम् । रुशब्दे । विभाषाडिरुवो रितिघञ् ॥

आरुः । पुं । वृक्षविशेषे । कर्कटे । शूकरे ॥

आरुणिः । पुं । उद्दालके । गोतमे ॥ अरुणस्यापत्यम् । अतइञ् ॥

आरुणेयः । पुं । श्वेतकेतुमुनौ ॥ आरुणेरपत्यम् । ढक् ॥

आरुरुक्षुः । वि । आरोढुमिच्छौ ॥

आरुः । पुं । तरोर्भेदे । कर्कटे । दंष्ट्रिणि । शूकरे । पिङ्गलवर्णे । वि । पिङ्गलवर्णयति । रुटच्छति । अर्तेर्वा । ऋगतिप्रापणयोः । खित्कसिपद्यर्त्तिरिभ्यः ॥

आरूकम् । न । वीरसेनवृक्षे । आडूइति भाषा । हिमाचलमसिद्धौषधीविशेषे । आडइति गौडभाषा ॥ तत्पचपुष्पादिभेदतस्तुर्जाति ॥

आरूढः । वि । कृतारोहणे ॥ उच्चस्थानगते ॥ आङ्पूर्वाद्रुहेर्गत्यर्थेक्तः । ढत्वधत्वष्टुत्वढलोपदीर्घाः ॥ आरूढोनैष्किंचन्यमभ्युपैति यस्तु प्रच्यवते पुनः । प्रायश्चित्तमपश्यामि येनगुध्येत्सआ

आरोपि

आरेवतः । पुं । आरग्वधे । राजवृक्षे । न । पारेवतवृक्षफले । आरेवयति निस्सारयतिमलम् । सारकत्वात् । रेवृप्लवगतौ । णिच् । विच् । अतति । अत° अच् । आरेवचासौ अतस्य । आरोग्यम् । न । अनामये । लाघवे । रोगराहित्ये । अरोगस्य भावः । ष्या । ञ्णादित्वात्ष्यञ् । रोगाभावसाधने ।

आरोग्यशाला । स्त्री । चिकित्सालये । यथा । धर्मार्थकाममोक्षाणामारोग्यंमूलमुत्तमम् । अतस्त्वारोग्यदाता । चनरोभवति सर्वदः । आरोग्यशालाकुर्वीतमहौषधपरिच्छदाम् । विदग्धवैद्यसंयुक्तांबद्धन्नरससंयुताम् । वैद्यस्तुशास्त्रवित् प्राज्ञोदृष्टौषधपरायणः । स्रोषधीमूलतत्त्वज्ञःसमुद्दरणकालवित् । बलवीर्यविपाकज्ञः शास्त्रिमांसौषधीगणे । त्यागिपदेस्थिनां तद्दनुकूलःप्रियंवदरतिवैद्यकम् ।

आरोपः । पुं । मिथ्यारोपणे । यद्यारोप्येसर्पारोपयेत् वस्तुन्यवस्त्वारोपः । मिथ्याविकल्पः ।

आरोपणम् । न । न्यासे । संस्थापने ।

आरोपितः । वि । कल्पिते । कृतारो

आर्द्रम्

पणे । निहिते । न्यस्ते ।

आरोहः । पुं । अवरोहे । वरारोहाकटौ । वरस्त्रियाःश्रोणिभाग । गजारोहे । दीर्घत्वे । समुच्छ्राये ॥ परिमाणविशेषे । नितम्बे । आरुह्यते अनेनवा आरोहणम् आरोहतिवा । रुहेःकरणेभावेवा घञ् । अच्वा ।

आरोहकः । वि । आरोहणकर्त्तरि ॥

आरोहणम् । न । सोपाने । पैंडी इति भाषा । पाषाणादिनिर्मिते सौधादु परिगमनमार्गे । समारोहे । नीचादूर्ध्वगमने । चढना इतिभाषा ।

प्ररोहणे । अङ्कुरादिजनने । आरोहतेऽनेन । रुहप्रादुर्भावे । करणेल्युट् ।

आर्किः । पुं । अर्कपुत्रे । शनैश्चरे ।

आर्गवः । पुं । रावणेदृष्टे । आरग्वधे ।

आर्द्रा । स्त्री । नक्षत्रविशेषे । यायीतादीदंतुण्डा षट्पदसन्निभा भवति ।

आर्द्रम् । न । मधुप्रभेदे । मधूकवृक्षा निर्यासंजरत्काष्ठाश्मोद्भवाः । स्वच्छन्यार्द्रंतदाख्यातंशैलजं मार्दवेपुनः । तीक्ष्णतुण्डास्तुयाःपीतास्तिलपुष्पसमाः । षट्पदोपमाः । आर्द्रात्तत्स्यात् कृतं यत्तदार्द्रंनिष्टप्तरेणुः । आर्द्रम् ज्यति यद्युष्कंकर्षितंकरं परम् ।

आर्त्तव

कषायं कटुकं पाके तिक्तञ्चवर्त्त पुष्टि
कृत्। [illegible] । पुं । [illegible]
आर्त्तवः । त्रि । अर्त्तवति । अर्चोस्ति अस्य
अस्मिन्वा । प्रज्ञाद्यण्वाचोभ्योण इति
पार्त्तिकोक्तेः । [illegible]
आर्त्विकः । पुं । ऋत्वर्थाख्याने । त्रि ।
ऋतुभवे । द्विजवृद्धाक्षणकर्मग्रथमाध्व
रपुरश्चरणनामाख्याताद्वक् ।
आर्जवम् । न । अकौटिल्ये । आर्जवंहि
कुटिलेषु न नीतिः । यथा हृदयंवच्च
हरणे । परप्रतारणारादित्वे । पर
चित्तानुसारित्वे । व्यङ्गधानेषुओष्ठ
पुस्वत्तांतार्थासङ्गोपने । विहितप्रति
षिद्धयोरेकरूपंप्रवृत्तिनिवृत्तिशालि
त्वे । शारीरमार्जवम् । ऋजोर्भा
वः । इगन्ताच्चलघुपूर्वादित्यण् ।
आर्त्तः । त्रि । पीडिते । असुस्थे । जरा
व्याधादिनाऽवश्यंप्राप्ते । दुःखाभि
भूते । पुत्रवियोगादिदुःखिते ।
आर्त्तगलः । पुं । नीलझिण्ट्याम् । वा
चायाम् । आर्त्तिः चीणोगलतिगल
स्रवणे । पृ० अव० [illegible]
आर्त्तभागः । पुं । ऋषिविशेषे । ऋतभा
गस्य गोत्रापत्यम् । विदाद्यञ् ।
आर्त्तवम् । न । रजसि । स्त्रीपुष्पे । पु
ष्पे । त्रि । ऋतुजे । ऋतुसम्बन्धि
नि । ऋतुः प्राप्तोऽस्य । ऋतोरण

आर्थीभा

॥ ऋतुरेवा । प्रज्ञादिभ्यश्चेत्यण् ।
आर्त्तवी । स्त्री । घोटक्याम् । वाजि
न्याम् । [illegible]
आर्त्तिः । स्त्री । पीडायाम् । रोगे ।
आङ्ऋच्छतेः क्तिनिउपसर्गाद्दीर्घती
तिदृद्धिः । [illegible]
आर्त्विजीनः । पुं । ब्राह्मणे । यजमाने
। ऋत्विक्कर्मार्हति । ऋत्विजंवा
अर्हति । यत्तर्त्विग्भ्योघरुञ्चावितीति
खूचेग यत्तर्त्विग्भ्यांतत्कर्मार्हतीति
चोपसङ्ख्या नमितिवार्त्तिकेन
खञ्च । विद्वान्यजेत विद्वानेवया
जयेदितिद्वयोरपिविदुषोरधिकारा
त् । योवाऽमांपदशब्दस्वरश्चोच्चरशो
ब्राह्मं विदधाति स आर्त्विजीनोभव
ति आर्त्विजीनाःस्यामेत्येध्येयंव्याक
रणमितिभाष्यम् ।
आर्त्विज्यम् । न । ऋत्विक्साध्यकर्मणि
ऋत्विजः कर्म । ष्यञ् ।
आर्थिकः । त्रि । अर्थग्राहके । अर्थादा
गते । अर्थंगृह्णातीति । प्रतिकरणार्थ
खञ्मस्येतिठक् ।
आर्थीभावना । स्त्री । भावनाविशेषे
॥ प्रयोजनेच्छाअनितरयोगादिविषये
च्छाविषयव्यापारः आर्थीभावना ।
साचाख्यातत्वांशेनोच्यते । आख्यात
सामान्यस्य व्यापारवाचित्वात् । सो

आर्द्रक

चांगवयमपेक्षते । साध्यंसाधनमिति कर्त्तव्यतांच्वि किमीक्षयेत् केन भाषयेत् कथंभावयेदिति ॥ तिक्षसाध्याकाङ्क्षायां स्वर्गादिफलंसाध्यत्वेनान्वेति । साधनाकाङ्क्षायांयागादिः करणत्वेनान्वेति । इतिकर्त्तव्यतांकाङ्क्षायां मयाजायेङ्गजातमितिकर्त्तव्यतात्वेनान्वेति ॥

आर्द्रिकः, पुं॥ कृषके ॥

आर्द्रः । त्रि॥ सजलेवस्तुनि । क्लिन्ने । स्निग्धे । भीजा गीला इतिभाषा ॥ अर्द्यतेस्म । आर्द्गतौ । ऋर्द्दीर्घश्चेतिरक् ॥ आर्द्रद्रव्यंद्विधाप्रोक्तंसरसंनीरसंतथा । सदुग्धंगुरसरसकंद्विधानीरसमुच्यते ॥ वास्तूकंसार्षपंशाकंनिर्गुण्डीरसएवमार्षकम् । धत्तूराद्यमिदंसर्वमार्द्रंसरसमुच्यते । वटाश्वत्थिकरीरादिमार्द्रद्रव्यन्तुनीरसम् । सदुग्धन्तुद्विधाप्रोक्तंसेदुतीक्षमिति क्रमात् । आतलावर्जसीहुण्डशैरिषेक्षाद्यास्तुतीक्ष्णकाः । दुग्धिकार्कचीरिण्याद्यास्तुदुग्धाः प्रकीर्त्तिताः ॥

आर्द्रकम् । न । मूलविशेषे । अदरख इतिभाषा । आर्द्रिकाभेदिनीगुर्वीतीक्ष्णोष्णा दीपनीचसा । कटुकामधुरापाके

आर्द्रक

रूक्षवातकफापहा ॥ येगुणाःकथिताःगुण्याश्चार्द्रेपिसन्त्यार्द्रकेखिलाः । भोजनाग्नेसदापथ्यंलवणार्द्रकभक्षणम् । अग्निसन्दीपनंरुच्यंजिह्वाकण्ठविशोधनम् ॥ क्षुत्पीनाशङ्खमयेकण्ठे रक्तपित्ते कफज्वरे । दाहेनिदाघेशरदिनैवपूजितमार्द्रकम् । अपित्ते । चक्षुष्यंरोचनंस्वर्य्यंविकाग्निविशदंसरम् । स्तम्भाटोपानिलश्लेष्मलवणार्द्रकभक्षणम् ॥ गुडार्द्रकंवातहरंचक्षुष्यंपित्तनाशनम् । ज्वरघ्नंपाचनंरुच्यं स्वर्यं भेदिकफापहम् ॥ सच्चचारहितमङ्कुरतःसंत्वाचितंविमलकैर्बहुतोयैः । मिश्रितंलवणनिम्बुपयोभिर्वाक्षमार्द्रकमुपैतियोग्यताम् । तैलसुरीरजनिसिन्धुजपङ्कसन्निभस्यन्दमाननवनिम्बुरसप्लुतम् । स्वादुस्तरांशिशिरवासरभोजनेषु कस्तेतिवर्णनपथंखलुशुद्धवैरम् । इत्थो ष्णदीपनंरुच्यंसद्यःश्लेष्मचुपाचनम् । रोचनंतर्पणंबल्यंचार्द्रकंपरिकीर्त्तितम् । वातपित्तकफेभ्यांशरीरवनचारिणाम् । एकएवतिहन्त्यार्द्रकेकेशरी । आर्द्रीयांजातम् । पूर्वाह्णापराह्णार्द्रेति वुन् । आर्द्रंसंज्ञयतिजिघ्रायांवा । कुन् । आर्द्रसंज्ञकंवा संज्ञायामितिकन् । अर्द्यतिक

आर्य्यकः

फंवा । अर्दः । अर्दर्दीर्घश्चेतिरक् ।
। कः ॥
आर्द्रकवटः । पुं । मुक्ताईकवटे ।
आर्द्रता । स्त्री । पङ्किलत्वे ॥
आर्द्रपटवासाः । पुं । तापसविशेषे ।
आर्द्रपटवासआच्छादनमस्य ।
आर्द्रमाषा । स्त्री । माषाणीति गौड
भाषा प्रसिद्ध माषपर्णीमे ।
आर्द्रशाकम् । न । आर्द्रके ।
आर्द्रा । स्त्री । षष्ठनक्षत्रे । तत्रजात
स्यफलंयथा । बुधाधिकोक्लेशकरी
रक्तान्तिःकलिप्रियः कोपियुतोविनी
तः । प्रसूतिकालेचभवेत्किलार्द्रिन
क्षत्रेचेतांशरणागतेपीति । टाप् ।
आर्द्रोलुब्धकः । पुं । केतुग्रहे ।
आर्ष्टिः । स्त्री । अक्ष्यादरोटी स्त्री ।
आर्य्यः । पुं । स्वामिनि । वृद्धे । गुरौ ॥
सुहृदि । त्रि । श्रेष्ठकुलोत्पन्ने । सत्कु
लोद्भवे ॥ पूज्ये । श्रेष्ठे । सज्जने । ना
य्योग्ये । मान्ये । उदारचरिते । स्व
च्छस्वान्ते । कर्त्तव्यमाचरन् काम
मकर्त्तव्यमनाचरन् । तिष्ठतिप्रकृता
चारे सतु आर्यइतिस्मृतः । कर्त्तुयो
ग्यः अर्यतेवा गम्यतेवा । ऋहलो
ण्यत् ।
आर्य्यकः । पुं । पितामहे । मातामहे ।
न । पिण्डपित्रादिपितृकार्य्ये । इति

आर्य्यिका

हेमचन्द्रशेषः ॥
आर्य्यिका । स्त्री । श्रेष्ठायानार्य्याम् ।
। उदीचामाचार्य इति पचेष्टच्वाभावः ।
आर्य्यगृह्यः । त्रि । आर्य्यपक्षाश्रिते । आ
र्य्यैर्गृह्यते । पदास्वैरिवाह्यापेक्ष्येषुचे
तिग्रहेः पक्षेक्ष्येप्
आर्य्यधर्म्मः । पुं । सदाचारे । त्रि । त
दति ।
आर्य्यपुत्रः । पुं ॥ भर्त्तरि । गुरुपुत्रे ।
आर्य्यमिश्रः । त्रि । गौरवयुक्ते ।
आर्य्यहलम् । न । बलात्कारे ।
आर्य्या । स्त्री । उमायाम् । गौर्य्याम् ।
पार्व्वत्याम् । मात्रावृत्तप्रभेदे । य
स्यां प्रथमे द्वादशविषमे मात्राश्चत्वा
रश्चाष्टादशद्वितीयेहि पञ्चदशचेत्तुरी
ये कथितागाथा तथैवार्य्या सान
वधा । पथ्या विपुला चपला मुखचप
ला जघनचपलाच । गीत्युपगीत्यु
द्गीतय आर्यागीतिश्चनवधागद्य
आर्य्यावर्त्तः ॥ पुं । देशविशेषे । पुराभू
मौ । यथा । आसमुद्रात्तुवैपूर्वादा
समुद्रात्तुपश्चिमात् । तयोरेवान्तरं गि
र्य्योरार्य्यावर्त्तंमनुर्जगौ ॥ आ
र्य्याः आसमन्तात् वर्त्तन्ते पुनः पुन
रुद्भवन्त्यत्र । वृतु ॥ इलश्चेतिघञ् ।
आर्यिका । स्त्री । आर्य्यकायाम् । उदी
चामिति पचेष्टच्

आर्षी

आर्षः । वि । ऋषिमर्हतीति । वेदोक्ते ॥ पुं । विवाहविशेषे । वरात् गोद्वयं गृहीत्वा तेनैवसह कन्यादाने ॥ यत्र स्वायत्तिनैवैव आर्षे आदाय गोयुगम् । चतुर्दशमयमजः पुनाच्युत्तरजन्मघट् । इतियाज्ञवल्क्यः । ऋषेरिदमायम् । अण् । ऋषिणाप्रोक्तम् । तेनप्रोक्तमित्यण् ॥

आर्षधर्म्मः । पुं । मन्वत्रिविष्णुहारीतयाज्ञवल्क्यादिप्रणीतोधर्म्मे ।

आर्षभिः । पुं । चक्रवर्त्तिनि । भरते । ऋषभस्यापत्यम् । अतइञ् ॥

आर्षभी । स्त्री । कपिकच्छाम् ॥ नथमनार्गे नच्च विशेषाणांसंज्ञाविशेषे ॥ यथा । तथाद्वेचापिफल्गुन्यौमघाचैवार्षभीमतेति ।

आर्षभ्यः । पुं । वृषभत्वयोग्येवृषे । ऋषभस्यप्रकृतिः । ऋषभोपानहोर्ज्यः ।

आर्ष्टिषेणः । पुं । मुनिविशेषे ॥ ऋष्टिषेणस्यगोत्रापत्यम् । विदादिञ् । अपत्यसामान्ये गिवाद्यण् ।

आर्हतः । पुं । सप्तपदार्थवादिनिजिनविशेषे । वाद्यादिनि ।

आर्हन्ती । स्त्री । योग्यतायाम् ॥ ऋहतोभावः । ब्राह्मणादिषु अर्हतोनुमचेतिनु आगमः व्यञ्च । ङीप् ।

आलव

यलोपः ॥

आर्हन्त्यम् । न । योग्यत्वे । अर्हतोभावः । नुमभ्यञौ ॥

आर्षम् । न । हरितालेः । वि । अनल्पे ।

आर्षालयति । अलभूषादौ । अच् । आर्षालतिवा । ला० । आतश्चोपेतिकः ।

आलक्षितः । वि । ज्ञाते ।

आलगर्दः । पुं । चलगर्दे । स्वार्थेऽण् ।

आलभनम् । न । स्पर्शने ।

आलम्बः । पुं । अवलम्बे । आश्रये । घञ् ।

आलम्बनम् । न । आश्रये । विभावविशेषे । लबि अवस्रंसने । आङ्पूर्वाद् ल्युट् ॥

आलम्बितः । वि । धृते ।

आलम्बी । वि । आलम्बितुंशीले । सर्वि० । सुपीतिणिनिः ॥

आलम्भः । पुं । वधे । मारणे । स्पर्शे । आलभनम् । डुलभष् प्राप्तौ । घञ् । लभेश्च । उपसर्गोत्खलघञोरिति नुम् ॥

आलम्भ्यः । वि । वधार्हे ।

आलयः । पुं । गृहे । आलीयतेऽत्र । स्त्रीक्षेत्रेणे । पुंसीतिदः ।

आलयम् । । मोक्षपर्यन्ते । सर्वंसर्वीकृत्य ।

आलयविज्ञानम् । न । अष्टकारान्तरे

आलापः
पूर्वापरानुसन्धातरि ॥
आलवालम् । न । वृक्षमूलसेकार्थंस्य
ल्पजलखाते । आवाले । आसमन्ता
ज्जलस्रवमालाति । ला आदाने ।
मूलविभुजादित्वात्कः ॥
आलस्यः । त्रि । अलसे । क्रियामन्दे । आ
। लसति । लस श्लेषणे । पचाद्यच् ॥
आलस्यम् । न । अलसत्वे । सतिसाम
र्थ्ये अवश्यकर्त्तव्यकरणानुत्साहरूपचि
त्तधर्मे । कौसीद्ये । सत्त्वामर्थ्यौदासीन्य
प्रच्युतौ कफादिना तमसाच कार्यचि
त्तयोर्गुरुत्वे ॥ व्याधित्वेनाप्रसिद्धम
पियोगविषये प्रवृत्तिविरोधिनि ॥
प्रवृत्त्यसामर्थ्यंरजः कार्यविरोधि आ
। लस्यम् ॥ त्रि । अलसयुक्ते । तुन्दपरि
मृजे । मन्दे । आलस्यमेव । स्वार्थेष्यञ्
॥ अलसस्य कर्मभावोवा । ब्राह्मणा-
दित्वात् ष्यञ् । आलस्यमस्यास्ति ।
अ० अश्वा ॥
आलातम् । न । अङ्गारे ॥ स्वार्थेऽण् ॥
आलानम् । न । करिणो बन्धनस्तम्भे ॥
गलबन्धनरज्जौ । बन्धने । आलीय
तेऽत्र । ली श्लेषणे । अधिकरणेल्यु
ट् । विभाषालीयतेरित्यात्त्वम् ॥
आलापः । पुं । आभाषणे । कथोपक
थने । सम्भाषणे ॥ आलपनम् । भावे
घञ् ॥

आलिङ्गि
आलाप्यः । त्रि । आलापयोग्ये ॥
आलावर्त्तम् । न । वस्त्रनिर्मितव्यजने ॥
आलावुः । स्त्री । } अलाबाम् । तुम्ब्याम् ।
आलाबूः । स्त्री । }
आलास्यः । पुं । कुम्भीरे । इतिहेमच-
न्द्रः ॥
आलिः । पुं । भ्रमरे ॥ वृश्चिके । स्त्री ।
वयस्यायाम् । सख्याम् । सेतौ । चु
द्रसेतौ । आगन्तुजलवारणार्थायां-
वृतौ । सस्यार्थजलधारणे । पङ्क्तौ
। आरामस्थपुष्पादिगुल्मपङ्क्त्याम्
। सन्ततौ । त्रि । विशदाशये । शुद्धा-
न्तःकरणे ॥ अनर्थे । अलति दंशेसम
र्थो भवति । अलेर्बाहुलकादिण् ॥
आलयति । अल भूषणे । अच् ॥
आ अल च्यमः । अलवारणे । सर्वधा
तुभ्यइन् । अल्यतेऽनयावा । अल भू
षादौ । इजादिभ्यः ॥ आलति ।
आडिइन् ॥
आलिङ्गनम् । न । प्रीतिपूर्वकमिश्रीदे
हसंश्लेषे । उपगूहने । परिरम्भे । का
मशास्त्रे तत्सप्तधा । यथा । आमो
दालिङ्गनम् । मुदितालिङ्गनम् । प्रे
मालिङ्गनम् । आनन्दालिङ्गनम् । र
त्यालिङ्गनम् । मदनालिङ्गनम् ।
विनोदालिङ्गनमिति ॥
आलिङ्गितः । त्रि । आश्लिष्टे ॥

आलीढ

आलिङ्गी । पुं । मृदङ्गविशेषे । आलिङ्ग्ये ।

आलिङ्ग्यः । पुं । यथाकृतिर्मृदङ्गे । गोपुच्छाकृतिरालिङ्ग्यः ॥ शब्दार्णवेतु । चतुरङ्गुलहीनोऽङ्गान्मुखेचैकाङ्गुलेनयः । यथाकृतिः सआलिङ्ग्यआलिङ्ग्यसहिवाद्यते इत्युक्तम् । आलिङ्ग्यते । लिगिगतौ । । कृत्यल्युटोण्यत् ।

आलिञ्जरः । पुं । माट कुण्डा गोल जालादृत्यादि भाषाप्रसिद्धे मणिके । अलभाण्डे । अलिञ्जरएव । स्वार्थे अण् ॥

आलिन्दः । पुं । अलिन्दे । स्वार्थे प्र° अण् ।

आलिम्पनम् । न । मृल्लालेपने । आतर्पणे । मण्डोदके । इतित्रिकाण्डशेषः ॥

आली । स्त्री । आलिशब्दार्थे ॥ कृदिकारादितिङीष् ।

आलीढम् । न । धन्विनःपादन्यासप्रभेदे । दक्षपत्सङ्कोचान्यपादप्रसारणे । दक्षिणजङ्घाप्रसारणामपादसङ्कोचरूपायस्थानेच । लक्षणं यथा । नमितापूर्वजङ्घाच पश्चिमाप्रगुणाभवेत् । असमोमध्यकायश्चस्याद्दालीढस्य लक्षणमिति । त्रि । अ

आलु

गिते । भुक्ते ॥ क्षते । सेनान्यमालीढमिवासुराक्षे रितिक्षतेलक्षम् । आलेहनम् । लिह्लेनपुंसकेभावे क्तः ।

आलीढकम् । न । तर्णकानांस्वखीपुंक्रीडने ।

आलीनकम् । न । रङ्गे । रांग इतिभाषा ।

आलुः । पुं । कोकणदेशप्रसिद्धे कन्दविशेषे । कासकन्दे । कासालो । विश्वालपचे ॥ मेचके ॥ स्त्री । भारी इतिभाषाप्रसिद्धे सनाखजलपाचे । कर्कर्य्याम् ॥ न । कचालू इत्यादिप्रसिद्धेषु मूलविशेषेषु । अथोच्यते । कन्दोवृक्षविधोलोकेआलुशब्देनभण्यते । कच्यालुचैवघण्टालुपिण्डालुशर्करादिकम् ॥ इन्द्रेजैर्यस्समानीतंविख्यातीपदपूर्वकम् कोषादिपुनटष्टंतत्मधितव्यंविवेकिभिः ॥ निघण्टोनास्यपर्यायानगुणाःपरिकीर्त्तिताः । आप्तैर्नैतद्यवहृतमभव्यंतद्धितार्थिभिः । साधूदानायद्याऽभव्यस्तथैतत्कथितंबुधैः । निजधर्ममलानङ्गिर्गृहीतं पालिभिर्यथेति । भेलके । आलाति । ला° । मितद्वादित्वात् डुः । इयर्त्ति ऋयतेया । ऋ° । घोरश्चलइत्यथ घोरितिहित्वाऋधातोरपि म

आलूक

क्षेपात्सु गितिकेचित् ॥

आलुकः । पुं । नागाधिपे । शेषनागे । कासालौ । न । मूलविशेषे ॥ न दिवरणं यथा । आलुकमप्यालूकं तत्कथितं वीरसेनस्य । काष्ठालुक शब्दालुकहस्त्यालूकानिकथ्यन्ते । पिण्डालुकमध्वालुकरक्तालूकानिकथितानि । काष्ठालुकंकाठिन्ययुक्तंकठाल । शठ्खालुकं श्वेततायुक्तंसाँखालु । हस्त्यालुकं दीर्घतयुक्तंमहाशरीरम् । पिण्डालुकंवर्त्तुलं । सुथनी । मध्वालुकं मधुरतायुक्तं रोमान्वितदीर्घ सुथनी । रक्तालुकं रक्तारुरतखंडा इतिच । एषांगुणाः । आलुकं शीतलंसर्वंविष्टम्भिमधुरं गुरु । स्रष्टमूत्रमलंरुचंदुर्जरंरक्तपित्तानुत् । कफानिलकरं वल्यंवृष्यंस्तन्यविवर्द्धनमितिभावप्रकाशः ॥ एलवालुके ।

आलुकी । स्त्री । अरुष्कं घुटवा इतिख्याते । रक्तालुप्रभेदे । रक्तालुभेदेया दीर्घातन्वीचपथितालुकी । आलुकीवलकृत् स्निग्धागुर्वीहृत्कफनाशिनी । विष्टम्भकारिणीतैलेतलिता तिरुचिप्रदा ।

आलू । स्त्री । आलुशब्दार्थे । आलुनाति । लूञ् ० । क्विप् ।

आलूकम् । न । आलुके । वीरसेने ॥

आवप

आलूकं शीतलंसर्वंविष्टम्भिमधुरंगुरु । स्रष्टमूत्रमलंरुचंदुर्जरंरक्तपित्तनुत् । कफानिलकरं वल्यं वृष्यंस्तन्यविवर्द्धनम् । एलवालुके ।

आलूनः । वि । छिन्ने ।

आलेख्यम् । न । चित्रे ॥ नानार्थे ।

आलेख्यशेषः । वि । भग्ने ।

आलेपः । पुं । उपलेपे ॥

आलोकः । पुं । द्योते । प्रकाशे । चाँदनाइतिभाषा । दर्शने । देखना इतिभाषा । वन्दिभाषणे । स्तुताविति-यावत् । आलोकनम् । लोकृदर्शने । घञ् ॥

आलोकनम् । न । दर्शने । लोकृ ल्युट् ।

आलोकितः । वि । दृष्टे ॥

आलोचनम् । न । दर्शने । विवेचने ।

आलोचितः । वि । विवेचिते । कृतालोचने । इतिकर्त्तव्यतयावधारिते ॥

आवनेयः । पुं । भौमग्रहे । वि । अवनीसम्भूते ॥

आवन्त्यः । पुं । वाटधाने । वाच्यादञ् । ञ्णात्सवर्णायामुत्यञ्चे ॥

आवपनम् । न । द्रव्यस्थापनपात्रे । भाण्डे । गोशब्दान । वपमत्तिप्य धान्यादिनीयते तस्मादित्यर्थः । क्ष्यते निक्षप्यते धान्यमत्र । टुवप्वी

आवर्जि

ततन्तुसन्ताने । ल्युट् ॥ वपने । सम्य
क्कुरिकर्मणि ॥ ... । ... ।
आवरकः । पुं । अपवरके । आच्छादके
॥ आव्रियतेऽनेन । इत्र् । कृत्रादि
भ्यःसंज्ञायांवुन् ॥ ... ।
आवरणम् । न । ढक्कने । इतिप्रसिद्धम
र्के ॥ आच्छादने ॥ अविद्यादिव
र्यने । अज्ञाने ॥
आवरणच्युतिः । स्त्री । बन्धनाशे ॥
आवरणशक्तिः । स्त्री । अज्ञानशक्तौ ॥
यथा ऽल्पोपिमेघोऽनेकयोजनभाय
तमादित्यमखण्डमवलोकयिष्टन
यनपथपिधायकतयाच्छादयतीव त
था ऽज्ञानंपरिच्छिन्नमपि आत्मा
नमपरिच्छिन्नम संसारिणमवलो
कयिष्टबुद्धिपिधायकतयाच्छादयती
वताद्यं सामर्थ्यम् । अनया आवर
णशक्त्या ऽऽवृतस्यात्मनः कर्त्तृत्वभो
क्तृत्व सुखित्वदुःखित्वादिसंसारस
म्भावनापि भवति । यथा स्वाज्ञाने
नावृतायांरज्जौ सर्पत्वसम्भावना भ
वति । अन्तर्गुण्यबोर्भेदं वहिश्चत्र
ह्मसर्गयोर्भेदं वा स्वात्मावलोकयिष्ट
बुद्धिमखण्डसच्चिदानन्दस्वरूपंवा आ
वृणोति । इत्यवरणे । कर्त्तरिल्युट् ।
तदेवशक्तिः ।
आवर्जितः । त्रि । आकृष्टे । प्रविष्टे ।

आवर्त्त

यथा । हविरावर्जितंहोतस्रुवाविधि
वदग्निंप्रीणाति । आनमिते ॥
आवर्त्तः । पुं । चक्राकारेवारिभ्रमे ॥
ध्रुवाख्येरोमसंस्थानविशेषे । आव
र्त्तने । चिन्तने ॥ राजावर्त्तना
मोपरत्ने ॥ मेघनायकचतुष्टयान्त
र्गतमेघाधिपविशेषे । आवर्त्तोनि
र्जलोमेघः ॥ न । माक्षिकधातौ ॥
आवर्त्तनम् । इत्र् । भावेघञ् ।
आवर्त्तकी ॥ स्त्री । लताविशेषे । भग
तयल्ली इति लोकख्यातायाम् ।
मनोज्ञायाम् । रत्नपुष्पाम् ॥
आवर्त्तनम् । न । अक्षोमध्यभागे । सूर्य
स्यपश्चिमदिगवस्थितच्छायायाः पूर्व
दिग्गमनारम्भसमये । आवर्त्तनात्तु
पूर्वाह्णोह्यपराह्णस्ततःपरम् । दुग्धा
देरालोडने । ओटाना इतिभाषा
॥ धातुद्रव्यस्यद्रवीकरणे । गलायना
इतिभाषा ॥ पुं । जम्बुद्वीपेमहद्वीप
विशेषे ॥ श्रीहरौ ॥ पुनःपुनर्जनन
मरणदृष्टिप्रलयादिरूपंसंसारचक्र
मावर्त्तयति । इत्यु० । बहुलमन्यत्रा
पीतियुच् ॥
आवर्त्तनमणिः । पुं । राजावर्त्तनामो
परत्ने ॥
आवर्त्तनी । स्त्री । ताम्राटिपात्रद्रव्यद्रा
वणार्थे मृत्पात्रविशेषे । तैजसावर्त्त

आवस

न्यास॰ मूर्धन्याम् ॥ [illegible] ॥
आवर्त्तितः [illegible] गुणिते ॥ [illegible]
आवर्त्ती॰ [illegible] आवर्त्तनशीले ॥ आव
र्त्तयति [illegible] प्रशंसायां णिनिः ॥ [illegible]
आवर्त्तिनी॰ स्त्री॰ अजशृङ्गीवृक्षे ॥
आवह॰ पुं॰ उत्पाटने ॥ आवहणम् ॥
[illegible] उद्यमे ॥ घञ् ॥ [illegible]
आवर्हितः॰ त्रि॰ उत्पाटिते ॥ उन्मू
लिते ॥ [illegible]
आवलिः॰ स्त्री॰ घीयाम् ॥ श्रेण्याम् ॥
[illegible] पंक्तौ ॥ आवलति॰ वल
संवरणे ॥ आडिदन् ॥ परम्परा-
याम् ॥ [illegible]
आवलित॰ त्रि॰ चञ्चले ॥ [illegible]
आवली॰ स्त्री॰ आवलेः श्रेण्याम् ॥
आवश्यमान॰ दौर्बल्ये ॥ भावेशानच् ॥
आवश्यकम्॰ न॰ अवश्यमावे ॥ अवश्य
[illegible] आदित्वाट्ठञ् ॥ अव्ययानां भमात्रे
[illegible] टिलोपः ॥ अवश्यकर्त्तव्ये ॥
आवसथः॰ पुं॰ गृहे ॥ त्रेधाग्नि॰ आ
वसथ्यकोपे ॥ आर्षाच्छन्दसि मयभेदे ॥
व्रतविशेषे ॥ नाट्यगृहे ॥ गेहे ॥ दव
सिते ॥ वसतिस्थाने ॥ विश्रामस्था
ने ॥ आवसन्त्यत्र रात्र्या वसन्तियत्रवा ॥
वसनिवासे ॥ उपसर्गेघसेरित्थः ॥
आवसथिकः॰ पुं॰ गृहस्थे ॥ त्रि॰ गृह
वासिनि ॥ आवसथेवसति॰ आवस

आषाप

[illegible] थान्ठञ् ॥ स्त्री॰ ङीष् ॥
आवसथ्यः॰ पुं॰ आवसथसम्बन्धिनिलो
[illegible] किक्रोग्नौ ॥ आवसथएव॰ अन्तावस
[illegible] येतिछभेयज्ञाङ्ग्यः ॥ [illegible]
आवसितम्॰ त्रि॰ कृद्वे [illegible] निष्पन्नधा
न्ये ॥ आवसीयतेस्म॰ घोन्तकर्म
[illegible] णि [illegible] क्तः ॥ रक्षार्थमाच्छादितेधान्ये
॥ आवस्यतेस्म॰ वसआच्छादने ॥
[illegible] क्तः ॥ मर्दनानन्तरमपनीततृणेवहु
[illegible] लीकरणयोग्ये धान्यराशौवितिरा
प्रायमुकुटः ॥ [illegible]
आवहः॰ पुं॰ कामदेवस्य प्रथम
[illegible] गणे ॥ भूमिवायौ ॥ यथा ॥ द्यौश्चक्ष
[illegible] ज्योतिरादित्यो नन्दोहरिस्तपास्त-
था ॥ चित्रज्योतिः सत्यज्योतिर्ज्यो
तिष्मान्स्कन्धआवहतीति॰ आभिमुख्ये
नवहतीति॰ अभिमुखमागच्छन्वा
वायुरावहः ॥ पचाद्यच् ॥
आवहमानः॰ त्रि॰ क्रमागते ॥
आवापः॰ पुं॰ आलवाले ॥ पानभेदे
॥ प्रक्षेपे ॥ भाण्डपर्वणे ॥ आपाके ॥
वलये ॥ शत्रुचिन्तने ॥ परराष्ट्रचिन्ता
याम् ॥ निम्नोन्नभूमौ ॥ प्रधानहोमे
॥ आवपन्तिजलमत्र ॥ टुवपबीजसन्तु
सन्ताने ॥ हलश्चेति घञ् ॥
आवापकः॰ पुं॰ वलये ॥ प्रकोष्ठाभरणे
॥ आउप्यते ॥ टुवप॰ कर्मणिघञ्

आविकः
। स्वार्थे संज्ञायांवाकन् ॥ ।
आवापनम् । न । सूत्रयन्त्रे । ताँत इति
भाषा ॥
आवापस्थानम् । न । आहुतिमंचेपस्थ
देशे ॥
आवारि । न । हट्टगालये । हट्टवेश्मनि ।
हाटघर इतिभाषा । इत्युणादिको
षः ॥
आवारितः । त्रि । छादिते ।
आवासम् । । । वासमभिव्याप्येत्यर्थे
। आङ्मर्यादाभिविध्योरित्यव्ययी
भावः ॥
आवासम् । न । आसवाले । वृत्तमूल
कृतजलाधारे । आवसंते प्रक्षोनेन
। वसंवरणे । घञ्चेतिघञ् । आ
ईषत्वाल्लाघवा । अथवा ॥
आवासः । पुं । गेहे । वासस्थाने । आ
वसत्यत्र । वसेर्घञश्चेतिघञ् ।
आवाहनम् । न । आह्वाने । यथा ।
विनायकं तथादुर्गां वायुमाकाशमे
वच । आवाहयेद्याहृतिभिस्तथैवा
श्विकुमारकाविति मत्स्यपुराणम् । नि
मन्त्रणे ।
आवाहनी । स्त्री । मूलायांमुद्राविशेषे ।
आविकः । पुं । कम्बले । त्रि । मेषस
म्बन्धिनिमांसादौ । भेडीदुग्धे ।
आविकंसवर्णं स्वादुस्निग्धोष्णंचाम-

आविष्कृ
रीप्रणुत् । अहर्यंसर्पणं केश्यंगुरु
पित्तकफप्रदम् । गुरुकोसेनिलो
ल्लिते केवलेचानिले वरम् ।
आविकः । पुं । करंसहे ॥ करोंदा इति
भाषा । आविजतेस्म । ओविजीभ
यचखनयोः । आङ्पूर्वः । गत्यर्थो
कर्मकेति क्तः । ओदितश्चेनिष्ठम् ।
भीते ।
आविदुः । त्रि । कुटिले । पराङ्मुखे । चि
त्ते । मूर्खे । अभिमूते । विद्वे । आ
विद्यतेस्म । व्यधेः क्तः । सेम्प्रसारण
म् ।
आविद्धकर्णी । स्त्री । पाठायाम् ।
आविधः । पुं । वेधनास्त्रे । वेधसाधने
सूच्यादौ । भ्रमरसूच्यादौ । भ्रमर
इतिभाषा । आविध्यन्त्यनेन आविध्य
ते येनवा । व्यधः । घञर्थेक
आविधा । पुं । रावणमन्त्रिवृद्धे ।
आविः । । । प्राकाश्ये । प्रादुः । अवते ।
उड्शब्दे । इर् ।
आविर्भावः । पुं । प्रकाशे । प्रादुर्भावे ।
देवावतरणे । उत्पत्तौ ।
आविर्भूतः । त्रि । प्रकाशिते । प्रादुर्भूते
। अवतीर्णे ।
आविष्कारः । पुं । प्रकाशे ।
आविष्कृतः । त्रि । प्रकटिते । प्रकटीकृ
ते । आविः अकारि । दुकृञ् । क्तः

आवृतः

आविः क्रियतेस्मवा । [illegible]
आविष्टः । त्रि । प्रेतबाधिते । भूतादि-
ग्रस्ते । आवेशयुक्ते । निविष्टे । व्याप्ते ।
आविर् । अव्य । प्राकाश्ये । स्फुटत्वे । प्रा
दुः । अयंनिपातः प्रकाशवाची ।
आवीतः । पुं । व्यतिरेकन्यायेन । य-
था । येनकृतकंतिदनित्यमित्यन्व-
यादनित्यत्वमयगम्य यन्नानित्यंनत
त्कृतकमितिव्यतिरेकदृष्टि । विशेषे
णस्पष्टमितोवीतःसनभवतिइत्ययी
तः । अवीतएव आवीतः ।
आवीरचूर्णम् । न । फागइति आवीरइ
तिख्यातेविदिते फल्गुनिमासेयथा
चन्दनागुरुकस्तूरीकुंकुमद्रवसंयु
तम् । आवीरचूर्णंरुचिरंरंजितांपर
मेश्वरेति ब्रह्मवैवर्ते श्रीकृष्णजन्म
खण्डे ८ अध्यायः ।
आवुकः । पुं । नाप्योक्याजनके । अव
ति । अव° । वाहुलकादुण् । णित्वा
दुपधावृद्धिः ।
आवृत्त । स्त्री । अनुक्रमे । परिपाट्याम्
। आवर्त्तनमवा । वृतुवर्त्तने ।
सम्पदादिक्विप् ।
आवृतः । त्रि । कृतावरणे । आच्छादि
ते । वेष्टिते । संवीते । आवियते
स्म । वृञ्वरणे । क्तः । ब्राह्मणादुग्र
वान्यायामुत्पन्ने ।

आवेश

आवृतिः । स्त्री । आवरणे । [illegible]
आवृत्तः । त्रि । व्यावृत्ते । निवृत्ते ।
यथा । आवृत्तानांगुरुकुलादिप्राणां
पूजकोभवेदिति । कृतावरणे । आ
वर्त्ततेस्म । वृतु° । क्तः ।
आवृत्तचक्षुः । त्रि । कार्यकारणभावा
दुपरतकरणग्रामे । आवृत्तानि वि
मुखीकृतानिविषयेभ्य श्चक्षूंषि कर-
णानियेन चक्षुर्ग्रहणस्योपलक्षणार्थ
त्वात् । निवृत्तचक्षुषि ।
आवृत्तिः । स्त्री । अभ्यासे । पुनरुच्चारणे
। आवर्त्तनम् । वृतु° । क्तिन् । ध्याने ।
आवेगः । पुं । त्वरायाम् । वेगे । आवे
जनम् । ओविजी° । घञ् ।
आवेगी । स्त्री । वृहदारकवृक्षे । आवे
गो-ल्लस्याः । अर्शआद्यच् । गौर
दिः ।
आवेदनम् । न । निवेदने । आङ्पूर्वा
द्विदेर्ल्युट् ।
आवेशः । पुं । अहङ्कारविशेषे । आटो
पे । संरम्भे । अभिनिवेशे । सङ्गे ।
अनुप्रवेशे । ग्रहावेशे । भूतसञ्चारे ।
भूतादिनारोगे । अपस्मारेरोगे ।
आवेशनम् । विश° । घञ् ।
आवेशनम् । न । शिल्पशालायाम् ।
गृहादन्यस्मिन्कारुणां कर्मस्थाने ।
भूतावेशे । प्रवेशे । कोणे । परिवेशे ।

आशक्तः । सूर्यादिपरिधौ । आविशन्त्यत्र । विशप्रवेशने ॥ करणे क्तिच् युच्वा ॥ आवेशिकः । त्रि । अतिथौ । असाधारणे । स्वीये । अवेशे अगृहे भवः । अध्यात्मादित्वाट्ठञ् ॥ आवेशितः । त्रि । निवेशिते । स्थापिते । यथा । नमय्यावेशितधियां कामः कामायकल्पते । भर्जिता. क्षथिताधानाः प्रायोबीजायनेष्यते इतिश्रीभागवतेश्रीकृष्णोक्तिः ॥ मयि परमात्मनीत्यर्थः ॥ आवेष्टकः । पुं । प्राचीरादौ । घेर इति भाषा ॥ आशंसा । स्त्री । इच्छायाम् । स्पृहायाम् । अप्राप्तप्राप्तीच्छायाम् ॥ आशंसनम् । शंसुस्तुतौ । गुरोश्चेत्यः । टाप् ॥ आशंसितः । त्रि । वांछिते । आख्याते । उक्ते । नपुंसके भावेक्तः ॥ आशंसिता । त्रि । इच्छावति । आकाङ्क्षाशीले । आशंसते । आङः शासुइच्छायाम् । तृन् ॥ आशंसुः । त्रि । इच्छौ । इच्छाशीले । इष्टार्थप्राप्तीच्छौ । आशंसितरि । आशंसते । आङःशा० । सनाशंसेत्युः ॥ आशक्त । त्रि । सम्यक्शक्तिविशिष्टे ॥

आशा

आशङ्का । स्त्री । भये । त्रासे । सङ्कोचे ॥ ईषदितर्के ॥ आशनः । पुं । असनवृक्षे । आशयः । पुं । अभिप्राये । मनसे । आधारे ॥ विभवे । अजीर्णे । चेतसि ॥ वासनाख्ये संस्कारे । आफलविद्या काञ्चित्तभूमौशेते इतिव्याख्यानात् ॥ कोष्ठागारे ॥ सन्ताने । आलयस्थाने । आशेरते ऽस्मिन्कर्मानुभववासना इत्यर्थात् । किम्पचाने ॥ धर्माधर्मे । अदृष्टे ॥ शयने ॥ आशयनम् । शीङ्स्वप्ने । एरच् ॥ हृदेशे ॥ यथा । अहमात्मागुडाकेशसर्वभूताशयस्थितइति ॥ आशयाश. । पुं । पावके । वह्नौ । आशेरतेऽत्रेत्याशयः । एरच् । आधारः । तमश्नाति । कर्मण्यण् ॥ आशयिता । त्रि । भोजयितरि । अशेर्णिच्यात् तृच् ॥ आशरः । पुं । अग्नौ । राक्षसे । आशृणाति । शृहिंसायाम् । पचाद्यच् ॥ आशा । स्त्री । दीर्घाकाङ्क्षायाम् । अप्राप्तोपायार्थविषयायां तृष्णायाम् । अनवगतोपायार्थविषयायांवागाद्यर्थनायाम् । अप्राप्तवस्त्वाकाङ्क्षायाम् । अनिर्ज्ञातप्राप्तीष्टार्थप्रार्थनायाम् । आयतायांतृष्णायाम् ॥

यथा । पिशाचमोचनंतीर्थंकतिधानावगाहितम् । तथाप्याशा पिशाचीनामाशामिश्रंनमुच्यतीति । हरितिदिशि ॥ आसमन्तादश्नुते । अशूङ्व्याप्तौ । पचाद्यच् ।

आशापुरस्सरः । पुं । भूमिजगुग्गुलौ । आसापुरीधूप इतिभाषा ।

आशाबन्धः । पुं । समाश्वासे । मर्कटजालके । दिग्बन्धे ॥ आशयाबन्धः । आशायाः बन्धोवा ॥

आशाम्बरः । वि । दिगम्बरे ।

आशासनम् । वि । आशंसनीये । आशीःसाध्ये ॥

आशित । वि । अशिते । भुक्ते । आशायतेस्म । शीतनूकरणे । क्तः । आशोरन्यतरस्यामितीत्वम् ।

आशितङ्गवीनम् । वि । पुरागोस्तृप्तिकृतस्थले । पहलेगायजबांचरी हैं इतिभाषा । विश्वाशितङ्गवीनंतत्गावोयत्राशिता पुरा ॥ आशिताः भोजिताः गावोयत्र । अषडक्षाशितेत्यत्वलमितिखः । निपातनात्पूर्वस्य मुन ॥

आशितम्भवः । पुं । हृत्तौ । न । अन्नादौ । आशितो भवत्यनेन आशितस्य भवनंनेतिविग्रहे । आशिते भुवःकरणभावयोरित्यशितभ्वोम

यदाङ्भवतेः करणभावयोः खच्प्रत्ययः । मुमागमः पूर्वपदस्य ॥ यावतान्नेनातिष्यादिर्भोजितो भवतितावमुच्यते । भावे आशितम्भवम् ॥

आशिता । वि । अक्षरे । बहुभोजनशीले ।

आशिरः । पुं । अग्नौ । सूर्ये । राक्षसे । अश्नुते । अशूव्याप्तौ सङ्घातेच । अश्नातेर्वा । अशभोजने । अशेर्शिदितिकिरच् ।

आशीः । स्त्री । हितस्याशंसने । यस्य यदेपेक्षितं तस्मातितद्दिमिदृद्धिप्रार्थने । आशीर्वादे ॥ सर्पतालुगदन्ते । आशीस्तालुगतादंष्ट्रा तयाविद्धोनजीवति । इति विषविद्या ॥ फलदृष्टायाम् । आमोक्षप्रार्थने । दृद्धिनामौषधौ । आशास्ते इतिविग्रहे । आङः शासुइच्छायाम् । शासुअनुशिष्टौ । अस्मात् किप्चेति किप् । आशासः कौ उपधायाश्चम् । यद्वा आशासनमनयोर्वा सम्पदादिः । आशासःक्वावितीत्वम् ।

आशीः । स्त्री । सर्पदंष्ट्रायाम् । सर्पविषे ॥ हितार्थसंसने ॥ आशीमिवकक्षा मिन्दोरितिराजशेखरोक्त्या ईकारान्तोयम् । आशीराशीर्यद्दिदंष्ट्रायामितिहिरूपकोशात्रे ।

आशुग

आशीर्वादः। पुं। आशीर्वचने। मङ्ग
लप्रार्थनायाम्। आशिषोवाद।
आशीविषः। पुं। विषधरे। सर्पे। आ
शिषि विषमस्य। पृषोदरादिः॥
आशु। त्रि। क्षिप्रे।
आशु। पुं। न। व्रीहिभेदे। वर्षाभव
धान्येषष्टिकादौ। पाटले व्रीहौ।
न। द्रुते। शीघ्रे। शीघ्रक्रियाविशे
षणत्वेक्षीवर्म्। सत्त्वगामित्वे वाच्य
लिङ्गम्। अश्नुते। अशूङ्व्याप्तौ।
कृवापाजिमिस्वदिसाध्यशूभ्यउण् इ
त्युण्।
आशुगः। पुं। वायौ॥ बाणे। शरे।
अर्के। त्रि। शीघ्रगामिनि। आशु
गच्छति। अन्यत्रापीतिगमेर्डः।
आशुतोषः। पुं। महादेवे। महेश्वरे।
त्रि। शीघ्रसन्तुष्टे। आशुशीघ्रतोषस्तु
ष्टिर्यस्य।
आशुपत्री। स्त्री। गजभक्ष्यायाम्। श
ल्लकीलतायाम्।
आशुव्रीहिः। पुं। आशुधान्ये। पाटले।
आशुसंज्ञकोव्रीहिः॥
आशुशुक्षणिः। पुं। अग्नौ। वायौ।
आसमन्तात् शोष्टुमिच्छति। आङ्
पूर्वाच्छुष्यतेःसन्वन्तात् आङिशुषे.
सनश्छन्दसीत्यनि। छान्दसानाम
पिकचिङ्गाषायांप्रयोगः।

आश्यम.

आशेकुटी। पुं। पर्वते॥ इति शब्दमा
ला।
आशौचम्। न। अशुद्धौ। वर्णाश्रमवि
हितकर्मानुष्ठानसङ्कोचावस्थायाम्।
अशौचमेव। स्वार्थे अण्।
आश्चर्यम्। न। अपूर्वे। अद्भुते। वि
स्मये॥ वि। अद्भुतवति॥
आद्रियतेचर्यते अभिनीयते। आश्च
र्यमनित्य इति अभूततद्भावेसुट्नि
पात्यते। यथा। आश्चर्यंयदिसभु
ञ्जीत। अद्भुतमित्यर्थः।
आश्मः। पुं। अश्मनोविकारे। तस्यवि
कारइत्यण्।
आश्मनः। पुं। अरुणे। सूर्यसारथौ।
आश्मरथ्यः। पुं। ऋषिविशेषे। अश्म
रथस्यगोत्रापत्यम्। गर्गादिभ्यो
यञ्॥
आश्यान. । त्रि। शोषिते॥
आश्रम. । पुं। न। ब्रह्मचारिणि। गृ
हिणि। वानप्रस्थे। भिक्षौ। यथा।
ब्रह्मचारीगृहस्थश्चवानप्रस्थोयतिस्त
था। एतेगृहस्थप्रभवाश्चत्वारः पृथ
गाश्रमाः। सर्वेषिक्रमशस्त्वेते यथा
कालंनिषेविताः। यथोक्तकारिणं वि
प्रंनयन्ति परमाङ्गतिमिति। अत्र
कलोविशेषो यथा। ब्रह्मचर्याश्रमो
नास्तिवानप्रस्थोपिनप्रिये। गार्ह-

आश्रम

स्योभैक्षुकश्चैव आश्रमौ द्वौकलौ युगे इति॥ वने। मठे॥ मुनीनांवा संस्थाने। आश्रमत्यत्रानेनवा। श्रमुतपसि खेदेचाघञ्। नोदात्तोपदेशस्येतिटिड्ढिनं॥ यद्वा। आसमन्ताच्छ्रमोऽत्र स्वधर्मसाधनक्लेशात्॥ परमात्मनि। आश्रमवत् सर्वेषांसंसारारण्येभ्रमतांविश्रामस्थानत्वादाश्रमः परमात्मा। अस्यार्थः। आश्रमवदाश्रमः यथारण्येचरतामाश्रमस्थायादानां श्रमस्थानम् एवं संसारारण्येभ्रमतांप्राणिनां सुषुप्तेमोक्षेच विश्रामस्थानं भवति परमेश्वर इति।

आश्रमधर्मः। पुं। आश्रमाणां ब्रह्मचारिप्रभृतीनां शास्त्रविहिते साधने॥ यथा। ब्रह्मचारिणः स्वाध्यायः। गृहस्थस्य दानंदमश्च यज्ञश्च। वानप्रस्थस्यतपः। परिव्राजकस्य अभयंसत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिरिति॥ य स्वाश्रमंसमाश्रित्य अधिकारःप्रवर्त्तते। सखल्वाश्रमधर्मस्तु भिक्षादण्डादिको यथा। यतीनान्तुशमोधर्मो नियमोवनवासिनाम्। दानमेवगृहस्थानांशुश्रूषा ब्रह्मचारिणामिति श्रुतिः। मन्वादिभिर्मुनिभिस्तु। पूर्वैवकथितंतावत्कलिसम्भवचेष्टितम्। तपःस्वाध्यायध्यानानांत्रेतायामस्यायुषामपि॥ क्लेशप्रयासाश्रमानां कृतोदेहपरिश्रमः। ब्रह्मचर्य्याश्रमोनास्तिवानप्रस्थोऽपिनेष्यते। गार्हस्थोभैक्षुकश्चैवंत्रयाश्रमौद्वौकलौयुगे। गृहस्थस्य क्रियाः सर्वाआगमोक्ताः कलौद्विजे॥ नान्यमार्गैः क्रियासिद्धिः कदाचिद्गृहमेधिनाम्॥ भैक्षुकेप्याश्रमेदेवि वेदोक्तं दण्डधारणम्। कलौनास्त्येवतत्त्वज्ञे यतस्तच्छ्रौतसंस्कृतिः। शैवसंस्कारविधिनाव धूतात्र्यमधारणम्। तदेव कथितंभद्रेसंन्यासग्रहणंकलौ॥ विप्राणामितरेषाञ्चवर्णानां प्रबलेकलौ। उभयत्राश्रमेदेविसर्वेषामधिकारिता॥ सर्वेषामेवसंस्काराः कर्माणिश्रौतवर्त्मना। विप्राणामितरेषाञ्चकर्मलिङ्गंपृथक् पृथक्॥ दृष्ट्युक्तेरागमोक्त एव आश्रमधर्मः कलावनुष्ठेयः। सचतस्मादेवतन्त्रोक्तमादनुसन्धेयः॥

आश्रमवित्। पुं। दक्षप्रभृतिषु। तेहि आश्रमाः परमार्था इतिसमर्थयन्ते। तदसत्। वेदस्याश्रमशब्दार्थत्वेशूद्रादेरपि प्रसङ्गात्। जातेश्चदुर्विवेचनत्वात्। तन्मूलस्याश्रमस्यदुर्ग्रहयितुमशक्यत्वात्। संस्कारस्यचदेहसम्बन्धित्वे पारलौकिकत्वायोगात्। अस

आश्रमाः

25183

आश्रितः

[illegible] चात्मनितदसम्भवात्। [illegible]
आश्रमिकः। त्रि। आश्रमयुक्ते। स्त्री
आश्रमी। पुं। ब्रह्मचर्य्यादाश्रमविशि
ष्टे। अनाश्रमी न तिष्ठेत दिनमेकम
[illegible] पितृजः। [illegible]
आश्रयः। पुं। व्यपदेशे। सामीप्ये।
आधारे। अवलम्बे। यथा। परिजन
स्यराजादिः। निकेते। आयतने।
गृहे। रात्रां सन्ध्यादिषड्गुणान्तर्गत
गुणविशेषे। अरिणापीड्यमानस्य-
जिगीषोर्बलवदाश्रयणे। विषये।
आश्रयणम्। श्रिञ् ल्युट्च्। [illegible]
आश्रयाशः। पुं। अग्नौ। पावके। त्रि।
कटुके। त्रि। आश्रयनाशके। आ
श्रयध्वंसिनि। आश्रयमाधारमश्नु
ते अशभोजने। कर्मण्यण्।
आश्रयासिद्धः। पुं। हेत्वाभासविशेषे।
यथा। गगनारविन्दं सुरभि अरविन्द
त्वात् सरोजारविन्दवत् इति। अत्र
गगनारविन्दमाश्रय. सचनास्त्येव।
आश्रयो असिद्धोयस्यसः।
आश्रवः। पुं। अङ्गीकृतौ। क्लेशे। त्रि।
प्रवृत्तिनिवृत्त्योर्विधातुंशक्ये। यत्र
नस्थिते। आशृणोतिवाक्यम्। शृ
श्रवणे। पचाद्यच्। आङ्पूर्वाच्छृणो
तेर्वा दीर्घश्च।
आश्रितः। त्रि। आश्रयप्राप्ते। आश्रय

आश्वयु

कृते। आधेये। उपविष्टे। न्यायमतेप
रमाणवाकाशादिनित्यद्रव्यभिन्नस-
र्वद्रव्याणामाश्रितत्वंसाधर्म्यम्। आ
श्रयति आश्रीयतेऽस्मिन्वा श्रि-क्।
गत्यर्थेति कर्मणिवा क्तः।
आश्रुतः। त्रि। अङ्गीकृते। स्वीकृते।
कृतश्रवणे। आकर्णिते। आश्रूयते
स्म। श्रुश्रवणे। क्तः।
आश्लिष्टः। त्रि। आलिङ्गिते। श्लिषआ
लिङ्गने। गत्यर्थाकर्मकेति क्तः।
आश्लेषः। पुं। आलिङ्गने। एकदेशस
म्बन्धे। आश्लेषणम्। श्लिष-घञ्।
आश्वमीन। अश्वीये। अश्ववृन्दे। अ
श्वानांसमूहः छस्याभावेअण्।
अश्वस्यकर्मभावयोः। मार्गभृज्जाति
त्वात्ञ्। त्रि। रथादौ। अश्वैर
ह्यतो गेपदृत्यण्।
आश्वतराश्विः। पुं। बुडिलमुनौ। अ
श्वतराश्वस्यापत्यम्। इञ्।
आश्वत्थम्। न। अश्वत्थवृक्षफले। अ
श्वत्थस्यफलम्। प्रत्यादिभ्योण् विधे-
र्लुक्।
आश्वयुजः। पुं। आश्विनमासे। आश्व
युजीपौर्णमास्यस्मिन्नस्ति। साऽस्मि
न्पौर्णमासीति अण्।
आश्वयुजी। स्त्री। आश्विनपूर्णिमायाम्
। अश्वयुजायुक्तापौर्णमासी। नच

आषाढः
नक्षत्रेणयुक्तःकालोऽस्त्यर्थे ठिट्ठेति-
डीषौ । [illegible]
आश्वलायनः । पुं । ऋषिविशेषे । अ
श्वलक्षणोऽपत्यमर्थे नडादिभ्यः-
फक् । [illegible]
आश्वस्तः । त्रि । जातविश्वासे ।
आश्वासः । पुं । निर्वृतौ । आख्यायिका
परिच्छेदे । आश्रयप्रदाने । आश्व
सनम् । श्वस प्राणने । घञ् ।
आश्वासकः । त्रि । आश्वासकारिणि ।
आश्विनः । पुं । शरदःप्रथममासे । दृषे
[illegible] तज्जातस्यफलम् । राज्ञांप्रियः का
व्यकर्त्रविद्यः स्याद्भगभाग्प्रसुतौ
कृणवृद्धिः । सुखीवदान्योबंहुमान
शाली भवेदाश्विनमासजन्मे
[illegible] । अश्विन्यायुक्तापौर्णमासी अ
स्मिन्नस्ति । साऽस्मिन्पौर्णमासीत्य
ण् । रवेःकन्याराशिस्थितिकाले ।
आश्विनेयौ । पुं । अश्विनौकुमारयोः ।
स्वर्वैद्ययोः । अश्विन्याः अपत्ये । स्त्री
भ्योढक् । नित्यद्विवचनान्तः ।
आश्वीनः । त्रि । एकाहेनैकाश्वगम्य
मार्गे । अश्वेनैकाहेनातिक्रम्यते ।
अश्वस्यैकाहगम इति खञ् ।
आषाढः । पुं । ग्रीष्मद्वितीयमासे । गु
रौ । आषाढीपौर्णमासी अस्मिन्
। साऽस्मिन् पौर्णमासीत्यण् । नक्ष

आषाढः
त्रजातस्यफलम् । अनल्पजल्पोप्रमदा
भिलाषी प्रमादशीलोगुरुवत्सलश्च
[illegible] । बहुव्ययेमन्दहुताशनःस्त्री दासा
ढमासप्रभवोमनुष्यः । व्रतिनां
पालाशदण्डे । आषाढीपूर्णिमाम्
यैजिनमस्य विशाखाषाढादण् म
न्यदण्डयोरित्यण् । मलयाचले ।
[illegible] मिथुनराशिस्थितिकाले ।
आषाढकः । पुं । आषाढमासे ।
आषाढभवः । पुं । भौमग्रहे । त्रि ।
आषाढजाते ।
आषाढभूः । पुं । बुधे । मङ्गलग्रहे ।
आषाढा । स्त्री । पूर्वाषाढायाम् । उ
त्तराषाढायाम् ।
आषाढाभूः । पुं । मङ्गलग्रहे ।
आषाढिः । पुं । रतिदेव्याःस्थाने ।
आषाढी । स्त्री । आषाढमासस्यपूर्णि
मायाम् । आषाढयायुक्ता पौर्णमा
सी । नचवेनयुक्तःकालइत्यण् । त
तो ङीप् ।
आषाढीयः । त्रि । आषाढायांजाते ।
अधिष्ठाषाढाभ्यांछण् वक्तव्यः ।
आष्टम् । नि । आकाशे । वियति । अ
श्नुते अशूव्याप्तौ सङ्घातेच । अश्ना
तिवा । अशभोजने । अस्त्रिगमिन
मीत्यादिनाष्ट्रन्वृद्धिश्च ।
आठ । । स्मरणे । अपाकरणे । को-

आसत्तिः

[illegible] आरुचिस्थितिसिद्धसन्नाशे। य
था। विद्यामातरमाः प्रदर्श्यन्तपशू
न्भिक्षामहे निरूपाइति। पीडाया
म्। आःगीतम्। क्रोधाविष्कारे॥ सा
ट्टोपतर्जने। आस्ते। आसउपवेशने
। क्विप्। आङ्पूर्वादसतेर्वा। वी
आस। । वमूवेर्त्यर्थे॥ [illegible]
आसः। पुं। धनुषि। अस्यन्तेक्षरा अने
न। असु॰ अकर्त्तरिचकारकेसं
ज्ञायामिति घञ्॥ [illegible]
आसक्तः। त्रि। आसक्तिविशिष्टे। विष
यान्तरपरिहारेण सर्वदानिविष्टे। त
त्परे। उषिते। अन्यत्ररते। न
निरूपे। अनवरते। आसञ्जि। घञ्
सङ्गे। कर्मणि क्तः॥
आसक्तिः। स्त्री। अनुरागे। प्रीतौ।
आनुरक्तौ। आङ्पूर्वात्पञ्जेः क्तिन्।
आसङ्गम्। नि। अनवरते। निरूपे॥ पुं।
अभिनिवेशे। परिष्वङ्गे। प्राप्तसो
पस्थिते पि विनाशे संरक्षणाभिलाषे
। कर्तृत्वाभिमाने। भोगाभिलाषे
। वि। तयुक्ते। स्त्री। तुषर्य्याम्।
गौराद्यृहि। आसञ्जनम। पञ्च॰
घञ्।
आसञ्जिनी। स्त्री। वातभेदे। वाक्य
याम्।
आसत्तिः। स्त्री। सङ्गमे। लाभे। स

आसनः

त्रिधा॥ मदसन्निधानकारणेऽन्यत्
पदार्थेस्थितपदार्थेनान्वयेसेक्षित-
स्तयोरव्यवधानेनैवस्थितिकारण-
मिति न्यायमुक्तावली॥
आसनः। पुं। जीवकद्रुमे। अस्यति।
असुक्षेपणे। ल्युः॥ प्रज्ञादिगण। न
। विरदक्षन्यदेशे। यत्नसहामाहो
निर्वसति। पीढा चौकी इत्यादिभा
षाप्रसिद्धे पीठे। भिदरे। विजिगीषेः
दुर्गादीनवर्द्धयतःस्थितौ। याज्ञानि
वर्त्तने। अरिविजिगीष्वोः प्रतिबद्ध
क्त्योः कालप्रतीक्षयातूष्णीमवस्थाने
। यथा। परस्वस्यसैन्यानां साम्यंना
स्वाविषद्यगः। आसनंस्वामिनेबूया
न्मन्त्रीस्वामिहितेरतः॥ अष्टाङ्ग
योगस्यतृतीययोगाङ्गे। पञ्चप्रकार
करचरणादिसंस्थानविशेषे। यथा।
पद्मासनंस्वस्तिकाख्यं भद्रंवज्रासनंत
था। वीरासनमितिप्रोक्तं क्रमादास
नपञ्चकमिति॥ एषांलक्षणानि य
थास्थानेद्रष्टव्यानि। अन्यच्च। आस
नानिकुलेयानि। यावन्तो। जीवज
न्तवः। चतुरशीतिं लक्षाणि चैकैकं
समुदाहृतम्। आसनेभ्यःसमस्तेभ्यः
साम्प्रतंत्रयमुच्यते। एकंसिद्धासनंना
महितीयंकमलासनम॥ इतिनिरु
त्तरतन्त्रम्। स्थिरसुखमासनमिति

आसव

पतञ्जलिः । सुखेनैव भवेद्यस्मिन्नज
स्रं ब्रह्मचिन्तनम् । आसनं तद्विजानी
यान्नेतरत्सुखनाशनमिति पूज्यपा-
दाः । आस्यतेऽनेन आसउपवेशने
। करणे ल्युट् । मृगाद्यासनानि
तन्त्रशब्देदृष्टव्यानि ।
आसनबन्धः । पुं । उपवेशने । स्त्री ।
आसनी । स्त्री । स्थितौ । आस्यतेऽस्या
मिति आस० ण्यासश्रन्थोयुच् ।
आसनी । स्त्री । विपणौ । स्थितौ ।
आसन्दः । पुं । वासुदेवे । श्रीकृष्णे ।
आसन्दी । स्त्री । क्षुद्रखट्वायाम् । पीठि
कायाम् । सभामध्यवेदिकायाम् ।
आस्यतेऽस्याम् । आस० । अन्दिद्य
श्चेतिसाधुः ।
आसन्नः । वि । निकटे । उपस्थिते । आ
सीदतिस्म । क्त । गत्यर्थेतिक्तः । आसा
दितेसेतिवा । क्तः ।
आसन्यः । पुं । प्राणे । वि । आस्यभवे ।
आस्येभवः । यत् । पदेवेत्यासन्नादे
शः प्रभृतिग्रहणस्यप्रकारार्थत्वात् ।
आसवः । पुं । मद्यभावे । मद्यविशेषे ।
मेरेये । क्लीबे । क्षीबे । क्षीबुचुरसैः प
क्वैरपक्वैरसिद्धे । भवेत् । मेरेयंधात
कीपुष्पगुडधान्यैः सन्धितंमितिमा
धवेन भेदः कृतः । आर्येरासायणेतु ।
यत्तैरासवमाध्वीकाः पुष्पासवफला

आसित

सवाः । वासचूर्णैश्चविविधैर्दृष्टास्तैस्तै
रुपृथक्पृथगित्युक्तम् । कुल्लूकभट्टस्तु ।
आस्यतेऽत्यासवो मद्यानामयस्वा
विशेषः सद्यःकृतसंसाधनः सञ्जातम
ध्यभावइत्याह । यदपक्वैर्यवाम्बुभ्यां
सिद्धंमद्यंसआसवः । आसवस्यगुणा
श्चे यावीजद्रव्यगुणैः समाः । आह
त्यते । पुंस् अभिषवे । कृदोरप् ।
आसवद्रुः । पुं । तालवृक्षे ।
आसादनम् । न । सन्निधापने । स्थापने ।
आसादितः । वि । प्राप्ते । लब्धे । आलि
ङ्गनोपरेकामकेलीपरे किंमयासा
दितंमौनमालोपितम् । आपोजिते
सन्निधापिते । आसाद्यतेस्म ।
षद्लृ० । ण्यन्तः । क्तः ।
आसारः । पुं । धारासम्पाते । वेगवृष्टौ
। सुहृद्दले । प्रसरणे । सैन्यानांसर्व
तोव्याप्तौ । अन्वागच्छद्दले । आस
रणम् । आस्रियतेनेनवा । सृगतौ ।
घञ् ।
आसिकः । वि । खड्गधारिणि । असिः
प्रहरणमस्य । प्रहरणमितिठक् ।
आसिका । स्त्री । आसने । आसउपवे
शने । धात्वर्थेनिर्देशेण्वुल् ।
आसिक्तः । वि । ईषत्सिक्ते ।
आसितम् । न । स्थानविशेषे । आस्यते
ऽस्मिन् । आस० । तोधिकरणेचेत्य

आसुर

धिकरणोक्तः ॥

आसीनः । त्रि । उपविष्टे । बैठा इतिभाषा ॥ आसनेोपविष्टे॥ अचेले॥ बुद्धावभिव्यक्तविज्ञानप्रकाशने । आस्ते । आस॰ । खटःशानच् । ईदासः ॥ आसीनमचलायितम् । न । उपविश्य निद्रावशेनदोलने । जंघना इतिभाषा॥

आसुतिः । पुं । अभिषवे । मद्यसन्धाने । मदचुवानादितिभाषा । पुंज्ञ॰ क्तिन्॥

आसुतीवलः । पुं । कन्योपाले । शूद्रजातिविशेषे ॥ यज्वनि । श्रौण्डिके।

आसुति रस्यास्ति । रजःकृष्यासुतिपरिषदोवलच् । वले इति दीर्घः॥

आसुरः । पुं । असुरेोपत्याद्यण् । ब्राह्मादष्टविवाहान्तर्गतविवाहविशेषे । आसुरोद्रविणादानात्तृतियाच्चवलेक्वः ॥ ज्ञातिभ्योद्रविणंदत्त्वा कन्यायै चैवशक्तितः । कन्याप्रदानं स्वाच्छन्द्यादासुरोधर्म उच्यते इतिमनुः । अस्यमानुषत्वंपिशंचा । शुल्केनमानुषतिहारीतसूचात् । असुराणामिदंमायम । अण् । न । विड्वरोः । असुरसम्बन्धिनि । अण् ।

आसुरनिश्चयः । पुं । वेदार्थविरोधिनिश्चये । आसुरो विपर्यासरूपोवेदार्थविरोधीनिश्चयोयस्य ॥

आसुरी

आसुरभावः । पुं । हिंसान्वतादिस्वभावे । आसुराणामसुरप्रकृतीनां भावः स्वभावः ।

आसुरस्वम् । नं । अयज्वनार्धने । योगादिशून्यानांवित्ते । अयज्वनान्तुयद्वित्तमासुरस्वंतदुच्यतेइतिमनोः॥ आसुराणांस्वम् ॥

आसुरिः । पुं । कपिलमुनेःशिष्येब्राह्मणे ॥

आसुरी । स्त्री । रात्रिकायाम् । छेदभेदाद्यात्मिकायां चिकित्सायाम् । असुरस्येयम् । तस्येदमित्यण् । अस्यतिर्वा । असेरन् । प्रज्ञाद्यर्थः । टिट्ढेतिङीष्॥

आसुरीप्रकृतिः । स्त्री । शास्त्रनिषिद्धानुज्ञातविषयभोगहेतुरागप्रधानायां राजस्यां प्रकृतौ । वैदिकनिषेधातिक्रमेण स्वभावसिद्धरागद्वेषानुसारिसर्वानर्थहेतुप्रवृत्तिहेतुभूतायां राजस्यां प्रकृतौ । विषयभोगप्राधान्येन रागप्रायत्वादासुरीत्वम् ।

आसुरीसम्पत् । स्त्री । असुररमणहेतुभूतायां रजस्तोमय्यां सम्पदि । अशुभवासनासन्ततौ । यथा । दम्भोदर्पोभिमानश्चक्रोधःपारुष्यमेवच । अज्ञानंचाभिजातस्य पार्थसम्पदमासुरीमिति । शरीरारम्भकालेपापकर्मभि

आस्कन्दि

रभिव्यक्ता मभिलक्ष्यजातस्यकुपुरुष स्यदम्माद्याःअज्ञानान्नादोषास्वभवन्ति नत्त्वभयाद्यागुणाइत्यर्थः॥

आसेकः। पुं। आसेचने॥

आसेक्यः। पुं। नपुंसकविशेषे। तल्लक्षणंयथा। पित्तोत्तुस्वल्पवीर्यत्वादासेक्यः पुरुषो भवेत्। स शुक्रंमाष्यलभते ध्वजोन्नतिमसंशयमिति॥

आसेचनः। त्रि। अतृप्तिकृति। असेचनके॥ न आसिच्यतेमनोऽत्र। षिचरणे। करणेल्युट्॥

आसेचनकम्। त्रि। असेचनके। आसेचने॥ संज्ञायांकन्॥ तदासेचनकं दृष्टेनोल्बणोवस्यदर्शनात्॥

आसेदिवान्। त्रि। आसन्ने॥

आसेधः। पुं। राजाज्ञया ऽवरोधे॥

आसेवनम्। न। यौनः पुन्ये॥

आसेवा। स्त्री। स्वारसिक्यां प्रवृत्तौ॥

आस्कन्दनम्। न। तिरस्कारे। रणे। संशोधणे॥ स्कन्दिर्गतिशोषणयोः भावे ल्युट्॥

आस्कन्दितम्। न। अश्वगतिविशेषे। उत्तेरितास्खलेवेगे॥ सचसम्यग्गतिः। आस्कन्दने॥ स्कन्देः स्वार्थण्यन्तात् भावेक्तः। आस्कन्द. सञ्जातोऽस्य। तारकादित्वादितच्वा॥

आस्कन्दितकम्। न। आस्कन्दिते। अ

आस्तिका

श्वानांपञ्चमगतौ। उत्तेरिते। उपकाणे॥

आस्तः। त्रि। क्षिप्ते॥

आस्तरः। पुं। करिकम्बले॥ वस्त्राद्यास्तरणे॥

आस्तरणम्। न। हस्तिपृष्ठस्थितचित्रकम्बले। प्रवेण्याम्। झूलइतिभाषा॥ आस्तीर्यतेऽनेनवा। स्तृञ्आच्छादने। कर्मणि करणेवा ल्युट्॥

आस्तारकः। पुं। माषेखड्रीप्रभृतिखाद्यद्रव्यसिद्ध्यर्थं स्नाक्षीस्नजलोपरिदीयमाने दृषादौ। थर इतिभाषा॥

आस्तावः। पुं। यज्ञीयदेशविशेषे॥ वाचिकानां संवाददेशे॥ आगत्य स्तुवन्त्यस्मिन्। ष्टुञ्स्तुतौ। घञ्॥

आस्तिकः। पुं। मुनिविशेषे। सतुजरत्कारुमुनेः पुत्रः। सत्पिता गर्भस्थंतं ज्ञात्वा अस्तीत्युक्त्वा गतइत्यस्मादास्तिकः। इतिमहाभारतम्॥ आस्तीके॥ त्रि। नास्तिकभिन्ने। वेदप्रमाणवादिनि। अदृष्टे॥ अस्तिपरलोक इत्येवं मतिर्यस्यसः। अस्तिनास्तिदिष्टंमतिरिति अस्तीतिनिपातात् यद्वा वचनसामर्थ्यादस्तीत्याख्यातात् ठक्॥

आस्तिकार्थदः। पुं। वनमेजयेराजनि।

आस्पद

आस्तिक्यम् । न । ग्रहणाम् । आस्तिकस्यकर्म भावो वा । पुरो° यक् ।

आस्तीकः । पुं । मनसापुत्रे । आस्तिकमुनौ ।

आस्तीकजननी । स्त्री । मनसादेव्याम् ।

आस्था । स्त्री । आलम्बनायाम् । स्थाने । यत्ने । अपेक्षायाम् । आस्थान्याम् । आतिष्ठन्त्यस्याम् आस्थानंवा । ष्ठा° । आतश्चोपेक्षयड् । टाप् । तात्पर्येणवर्त्तने ।

आस्थानम् । न । सभायाम् । निवासस्थाने । आतिष्ठन्त्यस्मिन् । ष्ठा° अधिकरणे ल्युट् । यत्ने ।

आस्थाननिकेतनाजिरम् । न । सभामण्डपाङ्गने ।

आस्थानी । स्त्री । सभायाम् । आतिष्ठन्त्यस्याम् । ष्ठा° । अधिकरणे ल्युट् । ङीप् ।

आस्थानीधूर्त्तः । पुं । सभाधूर्त्ते ।

आस्थित: । त्रि । आरूढे । प्राप्ते । आङ्पूर्वात्तिष्ठतेर्गत्यर्थेतिक्त. । यति । स्वतीतीक्ष्ण । अङ्गीकृतवति ।

आस्थितिः । स्त्री । आस्थायाम् । तात्पर्येणवर्त्तने ।

आस्पदम् । न । पदे । स्थाने । प्रतिष्ठायाम् । यथा । अनुवाद्य मनुज्ञातं न

आस्फोटा

विधेयमुदीरयेत् । नह्यसदास्पदं किञ्चित्कुत्रचित् प्रतितिष्ठतीति ।

कृत्ये । प्रभुत्वे । दशमगृहे । आपद्यते ऽस्मिन् । आत्मनः पदंस्थानं वा । आस्पदं प्रतिष्ठायामितिनिपातनात् सुट् ।

आस्पन्दनम् । न । कम्पने । स्पन्दने ।

आस्फालः । पुं । हस्तिकर्णास्फालने । झलञ्झालायाम् ।

आस्फालनम् । न । ताडने । आटोपे । प्रागल्भ्ये ।

आस्फुजित् । पुं । शुक्राचार्ये ।

आस्फोटः । पुं । अर्कद्रुमे । शूरादेर्वाद्यादिशब्दे । आस्फोटयति । स्फुटिर् विकसने । अच् ।

आस्फोटकः । पुं । खरोट इति भाषाप्रसिद्धे शैलपीलौ ।

आस्फोटनम् । न । मुद्रणे । विकाशे । वाद्यादिशब्दे । स्फुटने । आस्फुटे ल्युट् ।

आस्फोटनी । स्त्री । वेधनिकायाम् । मुक्तादिवेधिन्याम् । आस्फुट्यते ऽनया । स्फुटभेदनेचुरादिः । करणे ल्युट् ।

आस्फोटा । स्त्री । नवमल्ल्याम् । वनमल्ल्याम् । आस्फोटयति । स्फुटिर° । घञादयच् ।

आस्या

आस्फोटितम् । न । करास्फोटे ।
आस्फोतः । पुं । अर्कवृक्षे । कोविदारे । भूपलाशवृक्षे ॥ आस्फोटयति । स्फुटिर् । पचाद्यच् । पृषोदरादिः ।
आस्फोतकः । पुं । अर्कपर्णे ।
आस्फोता । स्त्री । अपराजितायाम् ॥ वनमल्लिकाम् । सारिवायाम् । छापरमालीति गौडभाषाप्रसिद्धवृक्षविशेषे । कुष्ठविषरोगनाशित्वं मत्स्यगुणः ॥ टाप् ।
आस्राकः । त्रि । अस्रसम्बन्धिनि । युष्मदस्मदोरितिपक्षेऽण् । तस्मिन्नपि चयुष्माकास्माकौ ।
आस्यम् । न । मुखे ॥ मुखमध्ये । त्रि । मुखमध्यभवे ॥ आस्यन्दते । आस्रवति । आस्यन्द्यते आतश्चोदिना द्रवीक्रियते । स्यन्दृ प्रस्रवणे । अन्येभ्योपीतिडः । यद्वा । अस्यते क्षिप्यतेऽन्नमनेन । अस्यतेर्घञर्थे कः । चेपणे । कृत्यल्युट इति ण्यत् ।
आस्यपचम् । न । पद्मे । आस्यमिवपद्मं यस्य ॥
आस्यलाङ्गलः । पुं । शूकरे ।
आस्यलोम । न । श्मश्रुणि ।
आस्यशुद्धिः । स्त्री । मुखस्यप्रक्षालनरूपे ।
आस्या । स्त्री । स्थितौ । आसनम् । आ

आहतः

सउपवेशने । चतुर्दशोणादिवाहुलकात् यत्वा ।
आस्यासवः । पुं । लालायाम् ।
आस्रपः । पुं । मूलनक्षत्रे ।
आस्रवः । पुं । क्लेशे । अनेकान्तवादिनां पदार्थान्तरे । चक्षुरादीन्द्रियस्य स्वकस्य यथास्वं प्रवृत्तौ ॥ वृत्तिः पञ्चविकल्पा ध्रुवाध्रुवा चक्षुरादिवर्गस्य । यैषास्रवस्तत्प्रत्ययतस्तेसाविहास्रवः ॥ मापेक्षडरीम्नृ
आस्वादः । पुं । रसे । खाडीरसजलेषु
आस्वादवान् । त्रि । युक्ते । वर इतिनुयुक्ते ।
आस्वादितः । त्रि । भुक्ते । विशेषे ।
आह । अ । क्षेपे । नियोगे । दृढसम्भावने ॥ उवाचेत्यर्थे ॥ कालसम्बन्धिनि द्वुः । प्यम् ॥
आहनुभवे । पुं । नासाज्वरइतिप्रसिद्धरोगे । स्त्रीविशेषे । तल्लक्षणं यथा ।
आहतशोथेन युक्तोनासापुटान्तरोढे ॥ गाढश्लेष्मज्वरकरः श्लेष्मणाच्छादकज्वरइति ॥
आहतः । त्रि । गुणिते । ताडिते । मिथ्योक्ते । सपार्थके । वन्ध्यासुतोसीत्यादिवचने । ज्ञाते ॥ पुं । आनके । दक्कायाम् । न । पुरातनेवस्त्रे । नूतनेऽन्यत्रे । सपार्थकवाक्ये । आङ्

आहरः

र्णिते । आहन्यतेऽस्मै । हन्+क्तः ॥
आहतलक्षणः । वि । कृतलक्षणे । गुणैः
मिसिद्धे । आहतमध्यस्तंलक्षणंयस्य ।
आहरः । पुं । उच्छ्वासे । अन्तर्मुखश्वासे ॥
आहरणम् । न । द्रव्याद्यानयने । अ
मानीते ।
आहवः । पुं । युद्धे । यज्ञे ॥ आह्वानम्
आह्वयते ऽस्मिन्निति या । ह्वेञ्स्प
र्द्धायांशब्देच । आङ्युद्ध इत्यप्स
मसारणञ्च ॥
आहवनम् । न । योगे । आसमन्तात्
जुहोत्यस्मिन् । ल्युट् ॥
आहवनीयः । पुं । यज्ञाग्निविशेषे । हो
मार्हे । आहुत्यधिकरणे । गार्हप-
त्याग्नेरुद्धृत्यहोमार्थं योग्निः संस्कि
यते तस्मिन् । आहूयतेप्रीण्यते म-
न्त्रिभिर्यावह्निरत्र । कृत्यल्युट इत्य
धिकरणे अनीयर् । यद्वा । आहवन
मर्हति । तदर्हतीतिछः ॥
आहा । पुं । अभियोगारि । आहिण्डी-
ते । ओहाङ्गतौ । विच् । विश्वमा-
वत्प्रक्रिया ।
आहारः । पुं । द्रव्यगलाधः करणे । जे-
मने । भोजने । चर्व्यचोष्यलेह्यपे-
याात्मके । इष्टफले । सात्त्विकराजस-
तामसभेदात्त्रिविधे । आहरणम्
हृञ् । घञ् । यद्वा । आहरन्ति

आहितः

रसमस्मात् । अकर्त्तरिचेति घञ् ।
आहियते इ० व्यु० अन्ने । हारे ।
आहरणे ।
आहारसम्भवः । पुं । शरीरस्थरसधातौ ।
आहार्य्यम् । त्रि । आगन्तुके । आहर-
णीये । आरोप्यमाणे । आहर्त्तुं
योग्यः । हृञ् । ऋहलोर्ण्यत् । पुं ।
नाट्योक्तौ भूषादिना रचिते व्यञ्जक
विशेषे ।
आहार्य्यशोभा । स्त्री । कृत्रिमशोभा-
याम् । चित्रभूषादिना कृतद्युतौ ।
आहावः । पुं । निपाने । कूपसंनीये
पश्वादीनां जलपानाय प्रस्तरादि-
निर्मिते जलाधिये । खेल इतिभाषा
॥ आह्वाने ॥ युद्धे । विग्रहे । आहूयन्ते
ऽत्र । ह्वेञ् स्पर्द्धायांशब्देच । निपा
तनादाहावइति ह्वेञः । समासारण-
मयप्रत्ययश्चनिपाने निपात्यते ।
आहिकः । पुं । पाणिनिमुनौ ॥ केतुग्रहे ॥
आहिण्डिकः । पुं । नियादेन वैदेहाज-
निते अन्त्यजविशेषे । अस्य च मन्त्र-
स्थानेषु० वाद्यसंरचणं दाहिण्डि-
कानामित्यौणादिकसेटसिरुलाः । का-
रावराहिण्डिकयोः समान मौलापि
त्वकत्वेपि वृत्तिभेदात् संज्ञाभेदः ।
आहितः । त्रि । अर्पिते । निहिते ।
न्यस्ते । स्थापिते । संपादिते । कृते ।

आहुल्य

यथा । आहितोजयविपर्ययोपिमे आद्य एव परमेष्ठिनात्वयेति रघुवंशे रामं प्रतिभार्गववाक्यम् । आधीयतेस्म । डुधाञ् ॰ क्तः । दधातेर्हिः ।

आहितलक्षणः । त्रि । सौन्दर्य्यादिगुणविशिष्टे । गुणैः प्रतीते । प्रख्यातगुणे । आहितानिलक्षणानि यस्मिन् ॥

आहिताग्निः । पुं । अग्निहोत्रिणि । साग्निके ॥ आहितः अग्निर्येन । वाहितान्यादिः ।

आहितुण्डिकः । त्रि । व्यालग्राहिणि ॥ अहेस्तुण्डं मुखं तेन दीव्यति । तेन दीव्यतीति ठक् ॥

आहुकः । पुं । उग्रसेने ॥

आहुतम् । न । भूतयज्ञे । पञ्चमहायज्ञान्तर्गतन्तद्यज्ञे । त्रि । हुतवस्तुनि । समिदादिहविर्भिराभिमुख्येनहुते ।

आहुतिः । स्त्री । देवयज्ञे । होमे । देवमुद्दिश्यमन्त्रोच्चारणपूर्वकाग्नौ हविर्निक्षेपे । सर्वविशेषो यथा । अल्पे रूक्षेसस्फुलिङ्गेवामावर्त्ते भयानके । आर्द्रकाष्ठैः समुत्पन्ने फुत्कारपवनावके । कृष्णार्चिषि सुदुर्गन्धे तथा क्षितिमेदिनीम् । आहुतिं जुहुयाद्यस्तु तस्यनाशोभवेद्ध्रुवमिति ।

आहुल्यम् । न । तरघट इ० काश्मीरादिषु प्रसिद्धेचुपविशेषे । काञ्चनपुष्पे । शिम्बीफले ॥

आहूतः । त्रि । कृताह्वाने । ह्वयतेः कर्मणिक्तेसम्प्रसारणदीर्घौ ।

आहूतसम्प्लवः । त्रि । प्रलयकालपर्य्यन्ते ॥ आहूतस्य विश्वस्यसम्प्लवःलिले सम्यक् प्लवनं यत्र ।

आहूतिः । स्त्री । आह्वाने । आङ्पूर्वात् ह्वेः स्त्रियांक्तिनिति भावेक्तिन् । सम्प्रसारणम् ।

आहृतः । त्रि । आनीते ।

आहेयम् । त्रि । अहिसम्बन्धिविषाद्यादौ ॥ अहेर्भवम् । दृतिकुक्षीत्यादिना ढञ् । स्त्री । आहेयी ।

आहो । अ । प्रश्ने । विकल्पे । विचारे । आहन्ति । हन्तेर्डो प्रत्ययः ।

आहोपुरुषिका । स्त्री । दर्पोत्थात्मसम्भावनायाम् । आत्मनि शक्त्याविष्करणे । अहो अहम्पुरुषः । गुणुपेतिसमासः अहोइति अहमित्यर्थे । मयूरव्यंसकादित्वात्समासः । अहोपुरुषस्यभावःमनोर्युञ् । आहोपुरुषिकाटर्पाद्यास्यात् सम्भावनात्मनीत्यमरः ।

आहोस्वित् । अ । विकल्पे । आहो । आहो चास्यित्व ।

आङ्कः । पुं । अङ्कां समूहे । खण्डिका

दृ

दित्वा दृज् । अक्षदृक्खोरेवेति नियमा
दिलोपोन॥
आह्निकः । दिननिर्वृत्ते । दिनसाध्ये ।
दिनसम्बन्धिनि । न । प्रकरणसमू
हे । ग्रन्थभागे । भोजने । नित्यकि
यायाम् । अह्नानिर्वृत्तम् । तेननि
र्वृत्तमितिठञ् । आह्निकञ्चविसन्ध्या-
न्तंभवति॥
आह्लादः । पुं । मेघशब्दे । स्तनने ।
आह्लादः । पुं । आनन्दे । हर्षे ॥
आह्लादितः । त्रि । आनन्दिते । हृष्टे ।
आह्वयी । पुं । नामनि । आह्वयतिइ-
त्याह्वः । आतोनुपसर्गेकेति के
प्राप्ते कविधौ सर्वत्रप्रसारणम्योड
इतिडः । तैर्यायते प्राप्यते । या० ।
घञर्थेकः ॥
आह्वा । स्त्री । नाम्नि । संज्ञायाम् ।
आह्वानमाह्वा । आतश्चोपसर्ग
इत्यङ् ॥
आह्वानम् । न । आवाहने । आकां
रणे । द्यूतौ ॥ नामनि । आङ्पूर्वा
त् ह्वेल्युट् ।

दृ

दृ । अ । भेदे । कपोले । अपाकरणे ॥

दृक्षुः

अनुकम्पायाम् । खेदे । सम्बोधने ।
जुगुप्सायाम् । विस्मये । प्रत्यक्षस
न्निधावितिकश्चित् ।
दृः । पुं । कामदेवे । भेदने । इकारे ।
दृकटः । पुं । इक्षुशाकरे ॥
दृकटः । पुं । तृणविशेषे । बहुमूले ।
दृचवः । पुं । इक्षुभाषे । इतिशब्दरत्ना
वली ॥
दृचोणिका । स्त्री । अनिच्छौ ।
दृचुः । पुं । ईख इतिस्वनामप्रसिद्धरसा
ले । मधुतृणे । गुडतृणे । असिपत्रे । म
ध्युपुष्पे । अथगुणाः । दृचवोरक्तपि
त्तप्रावल्यादृष्याः कफप्रदाः । स्वादु
पाकरसाः स्निग्धागुरवोमूत्रस्राविमाः
॥ अस्यभेदाः । पौण्ड्रकोभीरुकश्चवा
पिवंशकः शतपोरकः । कान्तारिस्ता
पसेक्षुस्काण्डेक्षुःसूचिपत्रकः । नै
पालोदीर्घपत्रश्चनीलपोरोथकोभ-
कृत् । इत्येतेजातयस्तेषांगुणावि
ध्यायथास्खलम् ॥ पौण्ड्रदृचुः कफंकु
र्य्यान्नेदोमेहकरस्तसः । युषातुवा
तहृत्स्वादुरीषत्पित्तंनुत् । रक्तपित्तहरोवृद्धःचतक्षतक्षयवीर्य-
कृत् । मूलेतुमधुरोरस्यं मध्ये पि-
मधुरःस्मृतः । अग्रेग्रन्थिषुचन्नेयद
क्षुः पटुरसोजनैः । * । दन्तनिर्घी
डितस्येक्षोरसः पित्तास्रनाशनः ।

इक्षुग

शर्करासमवीर्यःस्यादविदाह्यकफप्रदः। मूलाग्रमन्थुग्रन्थ्यादिपीडनान्मलसङ्करात्। किञ्चित्कालंविधृत्याचविकृतिंयाति यान्त्रिकः। तस्माद्विदाह्यविष्टम्भीगुरुःस्याद्यान्त्रिकोरसः। रसः पर्य्युषितोनेष्टोऽस्रोवातापहोगुरुः। कफपित्तकरःश्लेष्मभेदनस्त्वतिमूत्रलः। * । पक्वोरसोगुरुःस्निग्धःसुतीक्ष्णःकफवातनुत्। गुल्मानाहश्रमहरःकिञ्चित्पित्तहरःस्मृतः। * । इक्षोर्विकारास्तृट्दाहमूर्च्छापित्तास्रनाशनाः। गुडस्तेषुमधुरोवल्यःस्निग्धोवातहरोसरः। वृष्यःश्लेष्महरःशीतोबृंहणोविषहारिणइति॥ इष्यते। इषइच्छायाम्। इषेःक्षुः। षढोःकःसि। आदेशप्रत्यययोः। कयोर्योगेच्छः। अस्यविकाराः। खसीकाफाणितगुडखण्डमत्स्यण्डिकासिताः। निर्मलत्वलघुत्वेतुगौडीयायपरोत्तरमिति॥ कोकिलाक्षटङ्के।

इक्षुकाण्डः। पुं। मुञ्जे। काशतृणे॥

इक्षुक्षुद्रकः। पुं। गौडिके। इक्षून्क्षुद्रयति। क्षुद्रच्छेदने। क्षुनशिल्पिसंज्ञयोरपूर्वस्यापि॥

इक्षुगन्धः। पुं। काशतृणे। क्षुद्रगोक्षुरे।

इक्षुग

इक्षुगन्धा। स्त्री। कोकिलाक्षे। कोद्रवाम्। शुक्लविदार्याम्। कृष्णभूमिकूष्माण्डे। काशे। गोक्षुरे। इक्षुगन्धइवगन्धोऽस्याः। वा इक्षुःगन्धोऽस्याः। इक्षुशब्दस्तद्गन्धसदृशेगौणः।

इक्षुगन्धिका। स्त्री। भूमिकूष्माण्डे। इक्षुगन्धैव।

इक्षुजः। पुं। फाणितादिषु। फाणितञ्चैवमत्स्यण्डीगुडःखण्डकमेवच। सितासितेतिपञ्चैतेषड्भेदाइक्षुजामताः॥

इक्षुतुल्या। स्त्री। आनाखुवृतिगौडभाषाप्रसिद्धेतृणविशेषे। इक्षुवालिकायाम्।

इक्षुदर्भा। स्त्री। तृणविशेषे। तृणपत्रिकायाम्। सुदर्भायाम्।

इक्षुनेत्रम्। न। इक्षुमूले।

इक्षुपत्रः। पुं। जुन्हरीजुवार इति च प्रसिद्धेधान्ये। यावनाले।

इक्षुभः। पुं। शरत्तृणे॥

इक्षुवालिका। स्त्री। तालमखाणाइतिप्रसिद्धे क्षुरके। इक्षुवालिकायाम्। काशे।

इक्षुमती। स्त्री। सरिद्भेदे।

इक्षुमूलम्। न। मोरटके। यंशनेपेक्षुचे।

उद्भवः । पुं । जन्मनि । उत्पत्तौ ॥ उत्कर्षेभगवद्विभूतिशब्दिते ॥ उद्भवनम् । उद्भवत्यस्मादितिवा । भू० । घञ् देरप् ॥ हरौ ॥ प्रपञ्चंप्रत्युपादानकारणत्वात् । उद्गतोभवात् संसाराद्वा । उत्कृष्टंजन्मस्वेच्छयाभजते इति वा ॥

उद्भावनम् । न । कल्पने ॥

उद्भावितः । त्रि । उत्थापिते ॥

उद्भासितः । त्रि । प्रकाशिते ॥

उद्भेदः

उद्भिज्जः । त्रि । उद्भिद्यजाते । बीजकाण्डप्ररोहिस्थावरभाचे । भूमिमुद्भिद्यजातेतृणवृक्षादौ ॥ यथा । उद्भिज्जाः स्थावराः सर्वे बीजकाण्डप्ररोहिण इतिमनुः ॥ उद्भेदनमुद्भित् । सम्पदादिक्विप् । उद्भिदोजातम् । पक्ष्यामजातावितिढक् ॥

उद्भिद् । पुं । यागविशेषस्यनामनि ॥ उद्भिद्यते पशुफलमनेन यागेनेतिनिरुक्तेः ॥ त्रि । उद्भिज्जे ॥ तत्पञ्चविधम् । तृणवृक्षगुल्मलतावल्लीभेदात् ॥ भुवमुद्भिनत्ति । भिदिर् वि० । इगुपधेतिकः ॥

उद्भूतम् । त्रि । उत्पन्ने । जाते ॥ उद्भवतिस्म । भू० । क्तः ॥ प्रत्यक्षयोग्ये ॥

उद्भिदम् । त्रि । तरुगुल्मादौ । उद्भिज्जे ॥ न । पांशुलवणे ॥ उद्भिनत्ति । भिदिर् ० । इगुपधेतिकः ॥

उद्भूतरूपम् । न । नयनगोचररूपे ॥ यथा । उद्भूतरूपंनयनस्यगोचरोद्रव्याश्रितन्नित्यृथक्त्वसङ्ख्ये । विभागसंयोगपरापरत्वस्नेहद्रवत्वं परिमाणयुक्तम् ॥ क्रियाजातियोग्यवृत्तिंसमवायश्चताद्दशम् । गृह्णातिचक्षुस्मन्यादालोकोद्भूतरूपयोरितिकारिकावली ॥

उद्भेदः । पुं । रोमाञ्चे ॥ उद्भिद्यतेऽ

उद्गारः

ते । अर्शान्ते ॥ प्रगल्भे ॥ आढ्यते ॥ उद्गतमनस्कत्वम् । न । अभिमाने । गर्वे ॥

उद्गतिः । स्त्री । उन्नतौ ।

उद्गरणम् । न । उद्गारे । मुक्तौ ॥ वान्तौ ॥ उन्मूलने ॥ ऋणशुद्धौ ॥ उद्गये ॥ उद्गिर्यते । उद्गरते ल्युः भावेवा ॥

उद्गर्षः । पुं । उत्सवे । उद्गर्षयति । हृष्यत्यलीकेगिजन्तः । उद्गतोहर्षोयेति वा । घञ् ॥

उद्गर्षणम् । न । रोमाञ्चे ।

उद्गवः । पुं । कृष्णमातुले । कृष्णशिष्ये । दृष्णीनांसम्मतो मन्त्री कृष्णस्यदयितः सखा । गिर्योद्दहस्पतेः साक्षा दुद्गवोबुद्धिसत्तमइतिस्मीविष्णुभागवतम् ॥ उत्सवे । महे ॥ क्रतुपावके ॥ यज्ञाग्नौ ॥ उद्गुनोति दुःखम् । धूञ् कम्पने पचाद्यच् ॥

उद्गानम् । न । चुल्ल्याम् ॥ उद्गीयतेऽत्र । ल्युडधाञ्० । ल्युट् ॥ त्रि । उद्गते । शमिते ॥

उद्गारः । पुं । उद्गतौ । मुक्तौ ॥ यथा । पण्डितोपिहि मूर्खोसौ शक्तियुक्तोप्यशक्तिकः । यःसंसाराच्चचात्मानं समुत्तारयितुंचमन्यते पञ्चिपुराणम् ॥ ऋणे ॥ परहस्तगतद्रव्यस्य पुनरादाने ॥ उद्गिर्यते । हृञ्० । गृञ्० वा ।

उद्गृतिः

कर्मणिघञ् ॥

उद्गारणम् । न । उद्गारकर्मणि ॥

उद्गुरः । त्रि । निर्भरे । दृढे । ऋक्पूरित्यादिनासमासान्तः ॥

उद्गूतः । त्रि । अतिशयिते ॥ उत्थापिते ॥

उद्गूननम् । न । ऊर्द्धप्रक्षेपे ॥

उद्गूलनम् । न । व्यञ्जनोपकरणभूतेचूर्णे ॥ यथा । एलालवङ्गकर्पूरकस्तूरीमरिचचन्दनाम् । चूर्णस्योद्गूलनंदेयंभोज्येचीरेचुसम्मवे ॥ व्यञ्जनेषुचसर्वेषुशाकेष्वम्लेषुच । मांसमत्स्यमवेष्वेवंप्रलेपेतखनादिषु ॥ आदावेवपचेत्स्नेहे ततोद्विद्रुदकंक्षिपेत् । वेसवारंसखवणंचिन्नातत्रिभिर्मितंपचेत् ॥ अर्द्धस्विन्नेक्षिपेत्तक्रम यथा दाडिमीरसम् । सिद्धेपाके क्षदातव्यंचूर्णमुद्गूलनस्यतदिति ॥

उद्गूषणम् । न । रोमाञ्चे ॥ इतिहेमा युधः ॥

उद्गृतः । त्रि । उत्क्षिप्ते ॥ परिभुक्तो ज्झिते ॥ कृतोद्धरणे । समुद्धृते । उठाया इतिभाषा । पृथक्कृते ॥ उच्छेदिते ॥ उद्गिर्यतेस्म । हृञ्० । गृञ्० वा । क्तः ।

उद्गृहपाणिः । त्रि । उत्तरीयाद्धिष्कृतदक्षिणबाहौ ॥ उद्गृतः पाणिर्येन ॥

उद्गृतिः । स्त्री । उद्गारे ॥ गृञ् क्तिन् ।

उद्घासि

उद्घानम् । न । चुल्लिमाधे । चूल्हा भट्ठी इतिभाषा ॥ उत् ध्मायतेऽग्निर्न । ध्मा शब्दाग्निसंयोगयोः । ल्युट् ॥

उद्धः । पुं । नदे ॥ उज्झत्युदकम् । उज्झउत्सर्गे । भिदादौनदे इति कर्त्तरिक्विप् उज्झेर्धत्वञ्चनिपात्यते ॥

उद्बन्धनम् । न । ऊर्द्ध्वबन्धने । गलेनेर स्त्रीदेकरखटकमनौ फांसी इतिभाषा ॥

उद्बुद्धः । त्रि । विकसिते ॥ इतिहलायुधः ॥

उद्बोधः । पुं । किञ्चिद्ज्ञाने ॥

उद्भटः । पुं । कच्छपे ॥ शूरे । प्रस्फोटने । कूप इतिभाषा ॥ अन्याद्दग्भूतेश्लोके ॥ त्रि । श्रेष्ठाशये । महाशये । महात्मनि ॥ प्रवरे ॥

उद्भवः । पुं । जन्मनि । उत्पत्तौ ॥ उत्कर्षेभगवद्विभूतिशब्दिते ॥ उद्भवनम् । उद्भवत्यस्मादितिषा । भू० । ऋहोरप् ॥ हरौ ॥ प्रपञ्चंप्रत्युपादानकारणत्वात् । उद्गतोभवान् संसाराद्वा । उत्कृष्टंजन्मस्वेच्छयाभजते इति वा ॥

उद्भावनम् । न । कल्पने ॥

उद्भावितः । त्रि । उत्थापिते ॥

उद्भासितः । त्रि । प्रकाशिते ॥

उद्भेदः

उद्भिज्जः । त्रि । उद्भिद्यजाते । बीजकाण्डप्ररोहिस्थावरभाधे । भूमिमुद्भिद्यजातेऽण्टच्चादौ ॥ यथा । उद्भिज्जाः स्थावराः सर्वे बीजकाण्डप्ररोहिण इतिमनुः ॥ उद्भेदनमुद्भित् । सम्पदादिक्विप् । उद्भिदोजातम् । पञ्चम्यामजातावितिडः ॥

उद्भिद् । पुं । यागविशेषस्यनामनि ॥ उद्भिद्यते पशुफलमनेन यागेनेतिनिरुक्तेः ॥ त्रि । उद्भिद्ये ॥ तत्पञ्चविधम् । तृणवृक्षगुल्मलतावल्लीभेदात् ॥ भुवमुद्भिनत्ति । भिदिर्वि० । इगुपधेतिकः ॥

उद्भूतम् । त्रि । उत्पन्ने । जाते ॥ उद्भवतिस्म । भू० । क्तः ॥ प्रत्यक्षयोग्ये ॥

उद्भिदम् । त्रि । तरुगुल्मादौ । उद्भिद्ये ॥ न । पांशुलवणे ॥ उद्भिनत्ति । भिदिर्० । इगुपधेतिकः ॥

उद्भूतरूपम् । न । नयनगोचररूपे ॥ यथा । उद्भूतरूपंनयनस्यगोचरोद्रव्याश्रितद्वन्तिपृथक्त्वसङ्ख्ये । विभागसंयोगपरापरत्वस्नेहद्रवत्वं परिमाणयुक्तम् ॥ क्रियाजातिसंयोग्यवृत्तिसमवायश्चताद्दशम् । गृह्णातिचचुस्त्वन्यादालोकोद्भूतरूपयोरितिकारिकावली ॥

उद्भेदः । पुं । रोमाञ्चे ॥ उद्भिद्यतेऽ

उद्योगः

स्मिन्वा । अकर्त्तरि चेतिघञ् ॥ स्फु
रणे ॥

उद्गमः । पुं । उद्वेजने । उद्वेगे ॥ उद्गम
यम् । अमुञ्नर्नयस्थाने । घञ् । नोदा
त्तोपदेशेति न वृद्धिः ॥

उद्भ्रान्तः । त्रि । भ्रमान्विते । भ्रान्तिमा
पन्ने ॥ न । बाहुमुद्यम्य मण्डलाका
रेणखड्गभ्रामणे ॥

उद्यतः । त्रि । ग्रहीते ॥ उद्यूर्णे ॥ ऊर्द्ध-
कृते ॥ पुं । ग्रन्थपरिच्छेदे ॥ उद्यम्य
तेस्म । यमउपः । क्तः ॥

उद्यमः । पुं । उद्योगे । गुरणे ॥ उद्यम
नम् । यमउपरमे । घञ् । संज्ञापू
र्वकत्वाद्वृद्ध्यभावः । अडउद्यमइति-
निर्देशाद्वा ॥

उद्यमनम् । न । उत्क्षेपणे ॥

उद्यमितः । त्रि । प्रेरिते ॥

उद्यानम् । न । निस्सरणे ॥ प्रयोजने ॥
आक्रीडे । फलप्रधानेराज्ञः सर्वोप-
भोगयोग्येवने ॥ उद्गमे ॥ उद्यान्त्यने
नअस्मिन्वा । या प्रापणे । करणेल्यु-
ट् ॥

उद्यानपालः । पुं । माली इतिख्याते
आक्रीडरक्षके ॥ उद्यानाध्यक्षे ॥

उद्युक्तः । त्रि । उद्यमयुक्ते । उद्योगवि
गिष्टे । उद्योगिनि ॥

उद्योगः । उद्यमे । यत्ने । चेष्टायाम् ।

उद्वर्त्तः

यथा । उद्योगादनिवृत्तस्य सुसहा
यस्य धीमतः । छायेवानुगतास्तस्य
नित्यश्रीः सहचारिणीति ॥

उद्योगी । त्रि । उद्योगयुक्ते । उद्यमिनि
॥ यथा । उद्योगिनंपुरुषसिंहमुपैति
लक्ष्मीर्दैवेनदेयमितिकापुरुषावद-
न्ति । दैवंनिहत्यकुरुपौरुषमात्मश
क्त्यायत्नेकृतेयदिनसिद्ध्यतिकोऽत्रदो
षः ॥

उद्योजकः । त्रि । प्रवर्त्तके ॥

उद्रः । पुं । जलजन्तुविशेषे । अम्बुविडा
ल ओडविडाल इतिचभाषा ॥ उन
त्ति । उन्दी० । स्फायीतिरक् ॥

उद्रङ्गः । पुं । प्रतिमार्गके । चक्रे ॥

उद्रङ्गः । पुं ।

उद्रथः । पुं । रतंकीले ॥ ताम्रचूडखगे ॥

उद्रिक्तः । त्रि । स्पष्टे । स्फुटे ॥ उद्रिच्यते
स्म । रिचं० । क्तः ॥

उद्रेकः । पुं । अतिशये । वृद्धौ ॥ उपक्र
मे ॥

उद्रेका । स्त्री । महानिम्बे । डेक वका
यन इतिचभाषा ॥

उद्वत्सरः । पुं । यत्सरे ॥

उद्वमनम् । न । उद्गिरणे ॥

उद्वर्त्तः । त्रि । अतिरिक्ते । उवरा इति
भाषा ॥ यथा । उद्वर्त्तोधियन्यः सम
धिकफलमाचष्टे ॥

उद्वर्त्तनम् । न । उत्पतने । ऊर्द्ध्वगतौ ॥ विलेपने ॥ घर्षणे ॥ उत्सादने । शरीरनिर्मलीकरणगन्धद्रव्यादौ । उवटना इतिभाषा ॥ उद्वर्त्यतेऽनेन । वृतुवर्त्तने । करणे ल्युट् ॥

उद्वर्त्तितः । त्रि । उद्गमिते ॥

उद्वर्हणम् । न । अन्तर्धाने ॥

उद्वर्हितः । त्रि । उद्धृते ।

उद्वसनः । त्रि । वासोरहिते ॥

उद्वहः । पुं । पुत्रे ॥ सप्तवाय्वन्तर्गतवायुविशेषे ॥ सप्तप्रवहवायोरूर्द्ध्वस्थितः ॥ इतिशिरोमणिः ॥ उत्कर्षेण वहति । वहप्रापणे । घञर्थे क ॥ नायके ॥

उद्वहा । स्त्री । कन्यायाम् । पुत्र्याम् ॥

उद्वान्तः । पुं । निर्वेदगते ॥ उद्गतंवान्तमनेनमदं यमनमस्मात् ॥ त्रि । उद्गमिते । उद्गते । वमिच्छार्द्यनोरित्वादौ ॥ उद्वम्यतेस्म । क्तः । ॥

उद्वासनम् । न । वधे । मारणे । वासच्छेदने । चुरादिः । भावे ल्युट् ॥

उद्वाहः । पुं । विवाहे । दारपरिग्रहे । भार्य्याचसम्पादकग्रहणे । परिणये ॥ उत्कृष्टंवहनम् । वहः । घञ् ॥

उद्वाहनम् । न । विवाहे । रणरणे ॥ द्विगुणाकृते । द्विसीत्ये । द्विवारकृष्टेचषे ॥

उद्वाहनी । स्त्री । रज्जौ । वराटके । रस्सीइतिभाषा ॥

उद्वाहितः । पुं । परिणीते ॥

उद्वाहिता । स्त्री । परिणीतायाम् ॥ कलिकाले आगमोक्तान्यमार्गेण विवाहितागर्हिता भवति । यथा । उद्वाहितापिधानारीजानीयात्सातुगर्हितेत्यागमसिद्धान्तः ॥

उद्वाहुः । त्रि । ऊर्द्ध्वबाहुयुक्ते । उद्यतहस्ते ॥ उद्बाहुरिवषामनः ॥

उद्विग्नः । त्रि । क्षुभिते । उद्वेगयुक्ते । दुःखपरिहाराच्चमतया व्याकुलचित्ते ॥ भीते । ओविजीभयचलनयोः । क्तः । ओदितश्चेति तस्य नः । श्वीदितइतिनेट् ॥

उद्विग्नमनाः । त्रि । कम्पितहृदये ॥

उद्विवर्हणम् । न । उद्वरणे ॥

उद्वृत्तः । त्रि । उत्क्षिप्ते । उत्क्षिप्ते ॥ परिभुक्तोज्झिते ॥ दुर्वृत्ते ॥

उद्वेगः । पुं । उद्वेजने । उद्भ्रमे । एकाकीविजने कर्त्तव्यसर्वपरिग्रहशून्योऽहं विद्यामीत्येवंविधे व्याकुलताहृदयचित्तवृत्तिविशेषे ॥ विरहजन्येदुःखे ॥ उद्गमने ॥ भये ॥ न । गुदाकर्षने । बवासीर इतिभाषा ॥ उद्वेगादेगोऽस्मात् ॥ त्रि । क्षिप्तमिते ॥ श्रीधरमिनि ॥ उद्वाहो ॥ उद्वेजनम् ।

उद्वः

स्रोविजी॰ । यत् ॥

उद्वेजनम् । न । उद्वेगे ॥

उद्वेजनीयः । त्रि । उद्वेगकरे ॥

उद्वेलः । त्रि । वेलामुल्लङ्घ्यवर्त्तमाने सिन्धौ ॥ उद्गतो वेलाम् । अव्ययी॰ । यद्वृत्तिसमासः ॥

उद्वेष्टनम् । न । रुक्षपादयोर्दृढौ । वाँ जटा सरखी इतिभाषा ॥ उन्मुक्तव-न्धविश्लेषे ॥

उद्वोढा । पुं । परिणेतरि ॥ कलिकाले आगमोक्तान्यमार्गेण विवाहंकुर्वा-णोगर्हितोभवति । यथा । उद्वोढापि भवेत् पापी संसर्गात् कुलनायिके । वेश्यागमनजं पापं तस्यपुंसोदिनेदि ने । इतिमहानिर्वाणतन्त्रम् ॥

उनः । त्रि । निकृष्टे ॥

उननुन्नः । त्रि । निकृष्टेन विद्धे ॥

उन्दः । पुं । क्लेदने । आर्द्रीभावे ॥

उन्दनम् । न । क्लेदने ॥

उन्दरः । पुं । मूषिके ॥ इतिहिरूपकोषः ॥

उन्दुरः । पुं । मूषिके ॥

उन्दुरुः । पुं । आखौ । मूषिके ॥ उनत्ति । उन्दी॰ । वाहुलकादुरुः ॥

उन्दुरुकर्णी । स्त्री । आखुकर्णीखतायाम् ॥

उन्दूरुः । पुं । मूषके ॥ इतिहेमचन्द्रः ॥

उन्नः । त्रि । क्लिन्ने ॥ दयापरे ॥ उनत्ति

उन्नादः

स्म । उन्दीक्लो॰ । कर्त्तरिक्तः । मुद-भिदेतिपक्षे नत्वम् ॥

उन्नतः । त्रि । उच्चे । प्रांशौ ॥ उन्नम तिस्म । नमप्रह्वत्वे । गत्यर्थेतिक्तः ॥ महति ॥ उन्नतानां मनुगमने खलु सम्पदोऽग्रतःस्थाः ॥

उन्नतनाभिः । त्रि ॥ वृद्धनाभौ ॥

उन्नतभूतलम् । न । माले ॥ उन्नतञ्च तत्भूतलञ्च ॥ चेदमारुह्यसालम् ॥

उन्नतानतम् । त्रि । उन्नतीचस्थानादौ । वन्धुरे ॥ उन्नतश्चतदानतञ्च ॥

उन्नतिः । स्त्री । उदये ॥ संवृद्धौ ॥ ग रुडभार्यायाम् ॥

उन्नतीशः । पुं । गरुडे । वैनतेये ॥ स म्बुद्धे ॥

उन्नदुः । त्रि । उत्कटे ॥ उद्धते ॥

उन्नमितः । त्रि । उत्तोलिते ॥ ऊर्द्धीकृ ते ॥

उन्नयः । पुं । कूपादेर्जलादेरुच्छ्रय-णे ॥ उन्नयनम् । णीञ् ॰ । क्वचि दपवादविषयेप्युत्सर्गोभिनिविशतेइत्येरच् ॥

उन्नयनम् । न । वितर्के ॥ उन्नये ॥ त्रि । क्षोभके ॥ णीञ् ॰ । ल्युट् ॥

उन्नसः । त्रि । उन्नतनासिके ॥ उन्नतानासिकाऽस्य । उपसर्गाद्वेतिनसादेशः ॥

उन्नादः । पुं । महच्छब्दे ॥

उन्नायः । पुं । अर्द्धनयने । उन्नये । उठाना इतिभाषा ॥ उन्नयनम् । णी नृ प्रापणे । अपोद्यानिय इतिघञ् ।

उन्नाहम् । न । काञ्चिके ॥

उन्निद्रः । वि । उत्फुल्ले । विकसिते । प्रबुद्धे ॥ अयनादुद्बुद्धे ॥

उन्मज्जकः । पुं । तपोविशेषाल्लब्धसंज्ञे तापसविशेषे ॥ कण्ठदघ्नजलेस्थित्वा तपःकुर्वन्प्रवर्त्तते । उन्मज्जकः सविशेषस्तापसोलोकपूजितः ॥

उन्मत्तः । पुं । धत्तूरे । धूस्तूरे ॥ मुचुकुन्दवृक्षे ॥ त्रि । उन्माद्यति । ग्रहवातादावेशयति ॥ उन्माद्यतिस्म । मदीहर्षे । गत्यर्थेति क्तः । नेथाङ्गेति न नत्वम् ॥ उन्मत्तयतिवा । तत्करोतीतिणिच् । पचाद्यच् ॥

उन्मत्तकः । पुं । तापसान्तरे ॥ उन्मत्तो मत्तो मत्तत्वंयस्यसः । स्वार्थेकः ॥

उन्मथनम् । त्रि । व्यथके ॥ बाहुलकात्कर्त्तरि ल्युट् ॥

उन्मथितः । वि । उद्घर्षिते ॥

उन्मदः । त्रि । उन्माद्यतिस्मिष्टे । उन्मदिष्णौ ॥ उन्नतोमदोहर्षोऽस्य ॥ मदकरे । उन्मद्यति । पचाद्यच् ॥

उन्मदिष्णुः । त्रि । उन्माद्यशीले । उन्मदे ॥ उन्मदनशीलः । मदीहर्षे । अलङ्कृञीतीष्णुच् ॥

उन्मनाः । त्रि । उत्के । उत्कण्ठितमनसि ॥ उन्नतंमनोऽस्य ॥

उन्मनी । स्त्री । योगिनोवस्थाविशेषे । यथाहुःपूज्यपादाः । उन्मन्यवस्थागमायविद्वदुपायमेकंतेवनिर्दिशामः । पश्यंस्तुदासीनहृत्प्रपञ्चंसङ्कल्पमुन्मूलयसावधानइति ॥

उन्मन्थः । पुं । वधे । मारणे ॥

उन्माथः । पुं । कूटयन्त्रे । मृगादिवधोपयुक्ते यन्त्रे । आमिषंदत्त्वामृगपक्षिबन्धनार्थंयत्सन्धानयन्त्रंनिवेश्यते तस्मिन् ॥ उन्मथ्यतेऽनेन । मथेविलोडने । हलश्चेति घञ् ॥ मारणे ॥ घातके ॥ उन्मथनम् । मथहिंसायाम् । घञ् ॥

उन्मादः । पुं । चित्तविभ्रमे ॥ मूतादावेशाच्चित्तानवस्थितौ ॥ विरञ्चिनः कस्मिंश्चिदवस्थाविशेषे ॥ वातिकरोगविशेषे । मतिभ्रंशे ॥ मदयन्त्युन्मादोदोषायस्मादुन्मार्गमास्थिताः । मानसोयमतोव्याधिरुन्मादइतिकीर्त्तितः ॥ उन्मादनम् । मदीहर्षे । घञ् ॥

उन्मादकः । त्रि । उन्मत्तताजनकेधत्तूरादौ ॥

उन्मादनः । पुं । स्मरस्यपञ्चबाणान्तर्गतबाणविशेषे ॥

उन्मूलि

उन्मादवान् । वि । उन्मत्ते । वातकृत चित्तविभ्रमे ॥ उन्मादोऽस्यास्ति । मतुप् ॥

उन्मादी । वि । उन्मादिणौ ॥ उत्पूर्वान्मदेः शमिन्यष्टाभ्योधिनुण् ॥

उन्मानम् । न । ऊर्द्धमाने ॥ द्रव्यान्तरपरिच्छिन्नगुरुत्वेन पलादिशब्दवाच्येन पाषाणादिना तुलादिवारोपितेन, येनसुवर्णादेर्गुरुत्वमुन्मीयते तदूर्द्धारोपणादूर्द्धमानमितिशब्देन विवक्षितं तदुन्मानमिति ऊर्द्धमानं किलोन्मानमितिवार्त्तिकार्थेदीक्षितोक्तेः ॥ वैद्यकपरिभाषायांतु द्रोणपरिमाणे ॥ सामान्यतो लोकव्यवहारेणतु परिमाणमात्रे ॥

उन्मिषितः । वि । प्रफुल्ले । विकसिते ।

उन्मीलनम् । न । उन्मेषे । विकासने ॥ उन्मीलनंचित्तकुतूहलानाम् । मीलनिमेषणे ल्युट् ॥

उन्मीलितः । वि । प्रस्फुटिते । विकसिते ।

उन्मुखः । वि । उत्पन्ने । ऊर्द्धास्ये ॥ उद्गूर्द्धंमुखंयस्य ॥ उद्युक्ते ॥

उन्मुद्रः । वि । प्रफुल्ले । विकसिते ॥

उन्मूलनम् । न । उत्पाटने ॥ उन्मूलनं पापविनिन्दकानाम् ॥

उन्मूलितः । वि । उत्पाटिते । कृतो

उपका

त्पाटने ॥

उन्मेषः । पुं । चक्षुषोरुन्मीलने ॥ उन्मिषति । मिषश्लेषणे । इगुपधेतिकः ॥

उप । अ । अधिकार्थे ॥ हीनार्थे ॥ आसन्ने । सामीप्ये ॥ सादृश्ये ॥ प्रतियत्ने । गुणाधाने ॥ व्याप्तौ ॥ पूजायाम् ॥ शक्तौ ॥ आरम्भे ॥ दाने ॥ दोषाख्याने ॥ आश्चर्यकरणे ॥ अल्पत्वे ॥ निदर्शने ॥ उद्योगे ॥

उपकरणम् । न । ग्रामान्ते । उपश्लेषे ॥ अश्वस्यपश्चमगतौ । आस्कन्दिते ॥ कण्ठसन्ने ॥ वि । निकटे । समीपे ॥ उपगतः कण्ठम् । अत्यादय इति समासः । उपगतः कण्ठःसामीप्यमस्येतिवा ॥

उपकरणम् । न । नृपादीनां छत्रचामरादौ । परिच्छदे ॥ साधनसामग्र्याम् ॥ यथा । भोजनादौ व्यञ्जनादि । पूजायां गन्धादि । रणे शस्त्रादि । मृगवन्धनादौ वागुरादि । एवमन्यदप्यूह्यम् ॥ उपक्रियते । कृ० । ल्युट् ॥

उपकर्त्ता । वि । प्रतिकर्त्तरि ॥ उपकारकारिणि ॥

उपकल्पितः । वि । समर्पिते ॥

उपकारः । पुं । उपकृतौ ॥ विकीर्णकुसुमादिषु ॥ उपकरणम् । कृ० । घञ् ।

उपका

उपकु

घञ् ॥

उपकारिका। स्त्री। उपकारकर्व्याम् ॥ पिष्टभेदे ॥ सामान्यनृपालये। पटमण्डपादिराजसदने ॥ उपकरोति-। ण्वुल्। इत्वम् ॥

उपकारी। त्रि। उपकारकर्त्तरि। उपकारविशिष्टे। उपकारिणि मित्रेयो नोपकुर्य्यात्कथञ्चन। तंधिगस्तुनरंदेवा भवेच्चटणवद्भुवि॥ देवानासत्यावितिसंबोध्य च्यवनोक्तिः॥ मृग्दृनिः॥

उपकारी। स्त्री। सामान्यशैवे। पटमण्डपादिराजसदने ॥ उपकारय-। ति। पचाद्यजन्तात् गौरादित्वान्ङीष् ॥

उपकार्य्यः। त्रि। उपकारयोग्ये ॥ कृ-। ञोण्यत् ॥

उपकार्य्या। स्त्री। नृपालये। सामान्यराजगृहे ॥ पटमण्डपादिराजसदने-। पटभवने ॥ उपक्रियते। कर्म्मणि कृञ्चलोर्ण्यत्। टाप् ॥

उपकुञ्चिः। स्त्री। कृष्णजीरके ॥ कक्षाजाड्याम् ॥

उपकुञ्चिका। स्त्री। कृष्णाजीरके ॥ कक्षाजाड्याम् ॥ तुल्यायाम्। सूच्यां-। याम् ॥ उपकुञ्चति। कुञ्चकोटिल्ये। ण्वुल् ॥

उपकुर्व्वाणः। पुं। सावधिब्रह्मचर्य्यवति।

उपक्र

स्वाध्यायग्रहणार्थिनि ॥

उपकुल्या। स्त्री। वैदेह्याम्। पिप्पल्याम्॥ उपकोलति। कुलसंस्त्यानेबन्धुषु च। अघ्न्यादिः ॥ त्रि। कुल्यासन्ने-। ॥ उपगता कुल्याम् ॥

उपकूजितम्। त्रि। नादिते। शब्दिते ॥

उपकूपः। पुं। कूपसमीपस्थजलाशये। आहावे ॥ उपगतः कूपम् ॥ न। कूपसमीपे ॥

उपकृतिः। स्त्री। उपकारे ॥ उपकरण-। म्। स्त्रियांक्तिन् ॥

उपकोसलः। पुं। वेदप्रसिद्धे कामलायनर्षौ ॥

उपक्रमः। पुं। उपधायाम्। राज्ञा धर्म्मार्थकाममयैरमात्यादेः परीक्षणे ॥ उपधाऽमात्यपरीक्षणमितिस्वामी-। उक्तोच इतिनव्याः ॥ शास्त्रारम्भे। अयमस्योपायः अनेनैतत् सिद्ध्यतीतिज्ञात्वा प्रथमारम्भे॥ यथा माने नन्दस्य प्रथमारम्भः उपक्रमःसः। उपायपूर्वंआरम्भे॥ प्रथमारम्भे ॥ चिकित्सायाम् ॥ उपक्रमणम्। अनेनवा। क्रमु°। भावे घञ्। उपक्रम्यते इतिकर्म्मणिवा घञ्। नोदात्तोपदेशस्येतिनवृद्धिः ॥

उपक्रमोपसंहारौ। पुं। तात्पर्य्यनिर्णायकषड्विधलिङ्गेषु प्रथमलिङ्गयोः ॥ प्र-

उपग

करणप्रतिपाद्येस्यार्थस्य तदाद्यन्तयो
रुपपादनमुपक्रमोपसंहारौ । यथा
छान्दोग्येषष्ठप्रपाठके प्रकरणप्रतिपा
द्यस्याद्वितीयवस्तुनः एकमेवाद्विती
यमित्यादौ ऐतदात्म्यमिदंसर्वमि
त्यन्तेचप्रतिपादनम् ॥ उपक्रमश्च
उपसंहारश्चेतौ ॥ ... ॥

उपक्रान्तः । त्रि । ततेऽ विस्तृते ॥

उपक्रोशः । पुं । निन्दायाम् । परीवा
दे ॥ उपक्रोशनम् । क्रुशआह्वाने
भावे घञ् ॥ न । क्रोशासन्ने ॥

उपक्रोष्टा । पुं । स्त्री । गर्दभे ॥ त्रि ।
निन्दके ॥

उपक्लृप्तः । त्रि । विन्यस्ते ॥ उपभोगा
र्थंकृतसंस्कारे । रचिते ॥

उपक्लेशः । पुं । मर्दादिषु ॥

उपक्वाणः । पुं । वीणानिनदे ॥

उपक्वाणः । पुं । वीणायाः क्वणिते ॥
क्वणशब्दे । क्वणोवीणायाश्चेतिपा
चिको घञ् ॥

उपक्षेपणधर्म्मः । पुं । शूद्रस्वामिकामा
त्रस्य पाकार्थं ब्राह्मणगृहेसमर्पणे ॥
इतिशुद्धितत्त्वैकल्पतरुः ॥

उपगतः । त्रि । स्वीकृते । आसन्ने ॥
प्राप्ते ॥ उपगम्यतेस्म । गम्लृ० । क्तः
। प्राप्ते ॥

उपगतिः । स्त्री । उपाये ॥ उपगम्यतेऽ

उपग्रा

नया । गम्लृ० । क्तिन् ॥

उपगमः । पुं । अन्तिकेगतौ । समीपग
मने ॥ अङ्गीकारे ॥ उपगमनम् ।
करणेल्युट् । ग्रहवृदृनिश्चिगमश्चेत्यप् ॥

उपगीतिः । स्त्री । आर्याप्रभेदे । आर्या
परार्द्धसदृशं प्रथमार्द्धमपीरितंयस्या
म् । उपगीतिर्यशवर्म्मचितिनायक
सेदितारिकविभिः ॥ नवगेपसुन्दरी
णां रासेल्लासेसुरारातिमंत्र अस्मा
दयदुपगीतिः स्वर्गङ्गुरङ्गीदृशांगी-
तिम् ॥

उपगूढः । त्रि । गृहीते । उपगूहने ॥

उपगूहनम् । न । आश्लेषे । परिरम्भे ॥
गुहू० । ल्युट् ॥

उपग्रहः । पुं । ग्रग्रहे । वन्दीग्रहणादौ
। वन्दीवान् वंदुवा इतिभाषा । व
न्दाम् ॥ उपयोगे ॥ अनुकूलने ॥
अनुकूलयति ॥ सर्वतोभद्रचक्रोक्तो
ल्कादौ ॥ उपगृह्यते । ग्रहउपादा
ने । ग्रहवृदृत्यप् ॥

उपग्रहणम् । न । उपग्रहे ॥

उपग्रामम् । अ । ग्रामाधिकरणे । ग्रा
ममेदित्यर्थे ॥ ग्रामे इति । विभक्त्यर्थे
अव्ययीभावः ॥

उपग्राह्यम् । न । उपायने । उपढौक
ने । भेट इतिभाषा ॥ उपगृह्यते ।
ग्रह० । ण्यत् ॥

उपचा

उपघातः । पुं । रोगे ॥ अपकारे ॥ उ
पहननम् । उपहन्यतेऽनेन वा भावे
करणेवा हन्तेर्घञ् ॥
उपघ्नः । पुं । निकटाश्रये ॥ उपहन्यते
उपहननंवा ॥ उपघ्नआश्रयइति
साधुः ॥
उपचक्रः । पुं । चक्रवाके पक्षिणि ॥
उपचयः । पुं । उन्नतौ । वृद्धौ ॥ अरि-
किर्मलाभदुश्चिक्यसंज्ञकगृहेषु न-
वेद्वक्तितेवृद्धाः यामस्वस्वामिशबु-
भिः ॥ उपचयनम् । चिञ् । अरच् ॥
उपचरितः । त्रि । उपासिते । शुश्रूषि
तेसेविते ॥ उपचर्यतेस्म । चरः ।
क्तः ॥
उपचर्य्यः ॥ त्रि । उपचरणीये ॥
उपचर्य्या ॥ स्त्री ॥ चिकित्सायाम् ॥ उ
पसमीपे चर्य्या ॥
उपचाय्यः । पुं । यज्ञाग्नौ ॥ अग्निधार
णार्थेस्थलविशेषे ॥ उपचीयतेऽग्नि
धारणार्थमिष्टकाचयनेन निर्मितं स्थ
लमग्निः तस्मिन्नभिधेये उपपूर्वाच्चि
नोतेः अन्येयरिचाय्योयचाय्यसमूहा
इतिण्यद्वायादेशौनिपात्येते ॥
उपचारः । पुं । रुक्प्रतिक्रियायाम् । नि
ग्रहे । रोगप्रतीकारे । चिकित्सायां
म् ॥ सेवायाम् ॥ व्यवहारे ॥ उल्लो
चे ॥ पूजाद्रव्ये ॥ उपचर्यते उपचर

उपचि

र्गंवा । चरः । घञ् ॥
उपचारच्छलम् । न ॥ धर्मविकल्पनिर्दे
शेऽर्थसद्भावप्रतिषेधे ॥ तथाहि । ध
र्मशब्दस्याऽर्थेनसम्बन्धः तस्य विक-
ल्पो विविधः कल्पः शक्तिलक्षणान्य
तररूपः । तथाचशक्तिलक्षणयो-
रेकतरवृत्त्यामयुक्तो शब्दे तदपरवृ-
त्त्याय प्रतिषेधः सउपचारच्छलम् ।
यथा । मञ्चाः क्रोशन्ति नीलोघट
इत्यादौ मञ्चस्था एवक्रोशन्ति नतु
मञ्चाः एवंघटस्य कथंनीलरूपाभेदः
। एवमर्हंनित्यइतिशक्त्यामयुक्ते अमु
कस्मादुत्पन्नस्त्वंकथंनित्यइतिप्रति
षेधोप्युपचारच्छलम् । वाच्यमिप्रेता
र्थस्यादूषणेन छलस्यासदुत्तरत्वम् ।
नचश्लिष्टलाक्षणिके प्रयोगाद्वादिन
अपराधःस्यादितिवाच्यम् । तत्तदर्थ
बोधकतयाप्रसिद्धस्य शब्दस्य प्रयोगे
वादिनोऽनपराधात् । अन्यथापर्वतो
वह्निमानित्युक्ते पर्वतोयं कथमवह्नि
मानित्यादिदूषणेनानुमानाद्युच्छे
दः स्यात् ॥
उपचार्य्यः । पुं । चिकित्सायाम् । रो-
गप्रतीकारे ॥
उपचितः । त्रि । दग्धे ॥ समृद्धे ॥ समा
हिते ॥ निदिग्धे । लेपादिनावर्द्धिते
॥ पुष्टे ॥ सञ्चिते ॥ उपचीयतेस्म ।

चिञ्° । क्तः ॥

उपचितिः । स्त्री । पूजायाम् ॥

उपचित्रम् । न । एकादशाक्षरवृत्तविशेषे ॥ यथा । मुरवैरिवपुस्तनुतां मुदं हेमनिभांशुकचन्दनलिप्तम् । गगनंचपलासिलितं यथा शारदनीरधरैरुपचित्रमिति ॥

उपचित्रा । स्त्री । मूषिकपर्ण्याम् ॥ दन्तीवृक्षे ॥ स्वातीनक्षत्रे ॥ उपगता चित्राम् ॥

उपच्छन्नः । त्रि । गूढे ॥

उपजनः । पुं । नानाविधदेहभेदसङ्घहे ॥ समीपजने ॥ उपसमीपेजनः ॥

उपजपः । पुं । उपजापार्हे ॥ रिपुवधेच्छा राज्यार्थिनः क्षुद्रामात्याश्चोपजापा हीभवन्ति ॥

उपजातिः । स्त्री । वर्णवृत्तप्रभेदे ॥ यथा । उमेन्द्रवज्रापदसङ्गतानि यदीन्द्रवज्राचरणानिसन्ति । तदोपजातिःकथिताकवीन्द्रैर्भेदाभवन्तीह च तुर्दशास्याइति ॥

उपजापः । पुं । खलादीनामिष्टेभेदकभाषिते । भेदे । विच्छेदे ॥ उपांशुजपनम् । जपव्यक्तायांवाचि । जपमानसेच । घञ् ॥

उपजापसहः । त्रि । भेदयोग्ये ॥ सहते । सहमर्षणे । सचाचच् । उपजापे

उपत

सहः ॥

उपजिह्वा । स्त्री । कीटविशेषे ॥ यस्यां दीमक सीमक इतिचभाषा ॥ इतिहेमचन्द्रः ॥

उपजिह्विका । स्त्री । प्रतिजिह्वायाम् । यष्टिकायाम् ॥ कीटविशेषे । उत्पादिकायाम् ॥

उपजीविका । स्त्री । उपजीव्ये । जीवनोपाये ॥ उपजीव्यतेऽनया । जीवप्राण्° । गुरोश्चेत्यः । संज्ञायांकन् कुन्वा ॥

उपजीवी । त्रि । आश्रिते ॥

उपजीव्यम् । न । उपजीविकायाम् ॥

उपजोषम् । अ । आनन्दे । सुखे ॥ कल्याणार्थे ॥ उपजोषणम् । जुषीप्रीतिसेवनयोः ॥ अमप्रत्ययः ॥ यथा कर्मभोगमित्यर्थे ॥

उपजोषणम् । न । सेवने ॥

उपज्ञा । स्त्री । आद्यज्ञाने ॥ यथापाणिनेर्व्याकरणस्य वाल्मीकेःश्लोकनिर्माणस्य । उपज्ञायते । ज्ञाअवबोधने । आतश्चोपसर्गे इतिकर्मण्यङ् । उपज्ञानंवा ॥ विनोपदेशेनाद्यज्ञाने ॥

उपज्ञातः । त्रि । विनोपदेशेनज्ञाते ॥

उपढौकनम् । न । पारितोषिकद्रव्ये । उपहारे । उपायने ।

उपतन्त्रम् । न । शास्त्रविशेषे ॥ यथा ।

उपता

सैद्धोक्तान्युपतन्त्राणि कापिलोक्तानि यानिच । अर्हतानिचतन्त्राणिजैमिन्युक्तानियानिच । वशिष्ठःकपिलश्चैवनारदोगर्गएवच । पुलस्त्यो भार्गवः सिद्धोयाज्ञवल्क्यो भृगुस्तथा ॥ शुक्रोबृहस्पतिश्चैव अन्ये ये मुनिसत्तमाः । एभिः प्रणीतान्यन्यानि उपतन्त्राणियानिच ॥ नसङ्ख्यातानितान्यत्र धर्मविघ्नभयादमिः । सारात्सारतराण्येव सङ्ख्यातानिनिबोधतेति वाराहीतन्त्रम् ॥

उपतपनम् । न । सन्तापकरे ॥ तपस्तापे । करणे ल्युट् ॥

उपतप्ता । पुं । उपतापकर्त्तरि ॥ उपतपति । तप° । तृच् । उपतपनम् । कृत्यल्युटोबहुलमितिभावे तृच् ॥

उपतापः । पुं । त्वरायाम् ॥ उत्तापे ॥ उपघाते । गदे ॥ इष्टवियोगादिना मानसपीडायाम् ॥ उपतापयति । तपदाहे । चुरादि० । अच् ॥ उपतपनं वा । तपसन्तापे । घञ् । यथा । परोपतापनंकर्म नकर्त्तव्यंकदाचन । नसुखंविन्दतेप्राणी परपीडापरायणइति ॥

उपतापी । त्रि । त्वराद्युपतापवति ॥ म° इनिः ॥

उपदी

उपत्यका । स्त्री । अद्रेरासन्नायांभूमौ ॥ तरार्इतितलन्तेदूण इतिचभाषा ॥ उपासन्ना । उपाधिर्म्यांत्यकर्न्नासन्नारूढयोरिति त्यकन् । त्यकनश्चनिषेधइतीत्त्वाभावः ॥

उपदंशः । पुं । अवदंशे । मद्यपानरोचके भक्ष्यद्रव्ये ॥ मेढ्ररोगविशेषे ॥ तत्स्वनिदानम् । हस्ताभिघातान्नखदन्तघाता दृधा वनाद्व्युपसेवनाद्वा । योनिप्रदोषाद्भवन्तिशिश्ने पञ्चोपदंशाविविधाप्रचारैरिति ॥ समष्टिस्त्वेषां शिश्नगुह्ये ॥ दंशने ॥ उपदंश्यते । दंशदशने । कर्मणिभावे घञ् ॥

उपदर्शकः । पुं । द्वारपाले ॥ दर्शयितरि ॥

उपदा । स्त्री । उत्कोचे ॥ उपायने ॥ उपदीयते । डुदाञ्° । आतश्चोपसर्गइत्यङ् ॥

उपदानम् । न । उत्कोचे ॥ उपायने ॥ उपदीयते । डुदाञ्° । ल्युट् ॥

उपदानकम् । न । उपदाने ॥ स्वार्थेकः ॥

उपदिका । स्त्री । वल्म्याम् ॥ इतिहेमचन्द्रः ॥

उपदिष्टः । त्रि । देशिते । प्राप्तोपदेशे ॥ उक्ते ॥ उपदिश्यते । दिशअतिसर्जने । क्तः ।

उपदी । स्त्री । वन्दायाम् । वन्दाके ।

उपद्र

उपदेशः । पुं । अनुशासने ॥ चोदनायाम् । प्रवर्त्तकवाक्ये ॥ हितकथने ॥ मन्त्रकथने । दीक्षायाम् ॥ यथा । चन्द्रसूर्यग्रहेतीर्थे सिद्धक्षेत्रे शिवालये । मन्त्रमात्रप्रकथनमुपदेशः सउच्यत इतिरामार्चनचन्द्रिका ॥ गुरुसम्प्रदाये ॥ यत्रापेक्षितस्यार्थजातस्य प्रतिपादकोग्रन्थसन्दर्भः प्रथ्यते स उपदेशः ॥ उपदेशनम् । दिश°। घञ् ॥ साधनहीनायेापदेशोनिरर्थकः ॥

उपदेष्टा । पुं । उपदेशकर्त्तरि । आचार्ये ॥ उपदिशति । दिश°।तृच् ॥ आचार्यद्वारा आत्मसुखेापदेशके चिद्रूपे ॥

उपदेहः । पुं । वृद्धौ ॥

उपदेहिका । स्त्री । कीटविशेषे । उपजिह्वायाम् । दीमक इतिभाषा ॥

उपद्रवः । पुं । उत्पाते ॥ रोगारम्भकदोषप्रकोपजन्येऽन्यस्मिन् विकारे ॥ यथा । येाव्याधिस्तस्येाहेतुर्दोषस्तस्यप्रकोपतः । येान्येाविकारो भवति सउपद्रवउच्यते ॥ उपद्रवणम् । द्रु । क्विप् ॥

उपद्रष्टा । त्रि । उपदर्शके । उदासीनवोधरूपत्वेन गुणप्रचारदर्शिनि ॥ देहचक्षुर्मनोबुद्ध्यात्मसु द्रष्टृसुमध्ये-

उपधा

वाह्यान्देहादीनपेक्ष्यांऽत्यऽथवर्त्ति ते द्रष्टृात्मनि पुरुषे । साक्षिपुरुषे ॥ यथा । ऋत्विग्यजमानेषु यजनकर्मव्यापृतेषु तत्समीपस्थोऽन्यः स्वयमव्यापृतेा यज्ञविदाकुशलत्वात् ऋत्विग्यजमानव्यापारगुणदोषाणामीक्षिता तद्वत् कार्यकरणव्यापारेषु स्वयमव्यापृतेा विलक्षणस्तेषांकार्यकरणानांसव्यापाराणां समीपस्थेा द्रष्टा उपद्रष्टा साक्षिपुरुषः ॥ उपपश्यति । दृशिर्° । वाहुलकात् तृन् ॥

उपद्रुतः । त्रि । व्याकुले ॥

उपधर्म्मः । पुं । पाषण्डे ॥ इतिश्रीभागवतम् ॥

उपधा । अ । भेदे ॥

उपधा । स्त्री । पदेापान्त्यवर्णे ॥ धर्मावैः परीक्षणे । राज्ञा धर्मार्थकाममयेापन्यासेन अमात्यादीनामाशयान्वेषणे । यथोक्तं कालिकापुराणे । धर्मार्थकाममेाक्षैश्चप्रत्येकं परिशोधनैः । उपेक्ष्यधीयतेयस्मादुपधापरिकीर्त्तिता ॥ अर्थकामेापधाभ्यांतु भार्याः पुत्रांस्तुशोधयेत् । धर्मेापधाभिर्विप्रांस्तु सर्वाभिः सचिवान् पुनरिति ॥ उपधीयते शुद्ध्यानमत्र । डुधाञ्° । आतश्चेापसर्गेक्यङ् । टाप् ॥ ॥

उपधा

उपधातुः । पुं । अष्टप्रधानधातुसङ्घेषु स्वर्णमाक्षिकादिसप्तसु ॥ यथा । स सोमधातवः स्वर्णमाक्षिकं तारमाक्षिकम् तुत्थं कांस्यञ्चरीतिश्च सिन्दूरञ्चिलाजतु ॥ उपधातुपुसर्वेषुतद्धातुगुणाश्रयि । सन्ति किन्त्वेषुते गौणास्तत्तद्गांशमावतद्गति ॥ शरीरस्थधातुभवोपधातवश्चसप्त । यथा । रसात् स्तनदुग्धम् १ । रक्तात् स्त्रीरजः २ । मांसात् वसा ३ । मेदसो घर्मः ४ । अस्थ्नोदन्तः ५ । मज्जनःकेशः ६ । शुक्रात्स्नोमः ७ इति वैद्याः ॥

उपधानम् । न । विधे ॥ गण्डो । उपधर्हे । सिराद्दना इति भाषा । प्रणये ॥ प्रणे ॥ उपधीयते आरोप्यतेऽस्मिन्नेऽधि । डुधाञ्° । करणेल्युट् ॥ विशेषे ॥

उपधानीयम् । न । उपधर्हे । शिरोधाने ॥

उपधिः । पुं । कपटे । व्याजे ॥ रथचक्रे ॥ उपधीयते आरोप्यतेऽनेन । डुधाञ्° । उपसर्गेधोः किः ॥

उपधूपितः । वि । आसन्नमरणे ॥ परिधूपिते ॥

उपधृतिः । स्त्री । किरणे ॥

उपध्मानीयः । पुं । पफयोः पूर्वमर्द्धवि

उपमूलि

सर्गसदृशे विसर्गविशेषे ॥

उपनतः । त्रि । उपस्थिते ॥ प्राप्ते ॥

उपनयः । पुं । उपनयने ॥ यथा । गृह्योक्तकर्मणायेन समीपंनीयतेगुरोः । । बालोऽनेदा यतद्योगाद्बालस्योपनयं विदुरितिस्मृतिः ॥ ज्ञानविशेषे ॥ यथा । उदाहरणापेक्षस्तथेत्युपसंहारो नतथेतिवा साध्यस्योपनयः॥ न्या° सू° १ । ३९ साध्यस्यपक्षस्य उदाहरणापेक्षउदाहरणानुसारी य उपसंहारः उपन्यासः प्रकृतोदाहरणोपदर्शितव्याप्तिविशिष्टहेतुविशिष्टपक्षविशिष्टबोधजनकोपायावयवइत्यर्थः । निगमनंहेतुविशिष्टत्वेन नपक्षबोधकम् किन्तुपक्षवृत्तिहेतुबोधकमिति तद्व्युदासः । अत्रच अन्वयव्यतिरेकव्याप्योरन्यतरत्वादिनानुगमःकार्यः उदाहरणोपदर्शितेतितुपरित्यक्तमाचमितितु नवाच्यम् । उदाहरणविपरीतव्याप्त्युपदर्शकोपनयवारकत्वात् । वस्तुतोऽवयवपदेनैव तद्व्युदासः । सचोपनयोद्विविधोऽन्वयिव्यतिरेकिभेदात् । तथेतिसाध्यस्योपसंहारोन्वय्युपनयः । नतथेतिसाध्यस्योपसंहारोव्यतिरेक्युपनयः । अत्रच तथाशब्दप्रयोगावश्यकत्वे नतात्पर्यम् किन्तुव्याप्तिविशिष्टपक्षबोधे

उपना

। तथाचवह्निव्याप्यधूमवाँश्चायमिति वातथाचायमितिवोपन्यासः।एवं व्यतिरेकिण्यपि वह्नयभावव्यापकीभूताभावप्रतियोगिधूमवांश्चायमितिवा नतथेतिवोपन्यासः ॥

उपनयनम् । न । आचार्यैर्वटुकृत्यायाम् । ब्राह्मणक्षत्रियविशां यज्ञसूत्रधारणादिरूपप्रधानसंस्कारे । ब्रतबन्धे । अध्ययनार्थमाचार्यस्य उपसमीपंनीयते येनकर्मणातस्मिन् ॥ णौ ओल्युट् ॥ पादयोर्निपतने ॥ प्रायणे॥

उपनागरिका । स्त्री । वृत्त्यनुप्रासघटकवृत्तिप्रभेदे ॥ माधुर्यव्यञ्जकैर्वर्णैरुपनागरिकेष्यते ॥ उदाहरणम् । अपसारय घनसारं कुरुहारंदूरएवकिं कमलैः । अलमलमालिमृणालैरितिवदतिदिवानिशंबालेति ॥ वैदर्भीरीतौ॥

उपनायः । पुं । उपनयने ॥

उपनायनम् । न । उपनयने ॥ उपनयनमेव । अन्येषामपिदृश्यत इतिदीर्घः ॥

उपनाहः । पुं । व्रणालेपनपिण्डे । प्रलेपेपट्टतिभाषा॥ वीणायां यत्तन्त्रीनिबध्यते तस्योर्द्धभागे । निबन्धने ॥ वीणादितन्त्रवन्धनस्थाने ॥ उपनह्यतेस्मिन् । कर्मणि० । हलश्चेति-

उपनि

घञ् ॥

उपनिधिः । पुं । विश्वासार्पितवस्तुनि । उपन्यस्तवस्तुनि । न्यासे । वासनस्थमनाख्याय हस्ते न्यस्यदर्पितम् । द्रव्यमुपनिधिः प्रोक्तः स्मृतिषुस्मृतिवेदिभिः ॥ उपनिधीयते । डुधाञ् ० । उपसर्गेघोः किः ॥

उपनिषत् । स्त्री । वेदशिरोभागे ॥ तत्राशीतिसहितशताधिकसहस्रसङ्ख्याका उपनिषदृग्यजुःसामवेदानाम् । तथाहि । ऋचएकविंशतिः । यजुषोनवाधिकशतम् । साम्नःसहस्रम् । पञ्चाशदुपनिषदोऽथर्वणस्य ॥ ब्रह्मविद्यायाम् । ब्रह्मात्मैक्यसाक्षात्कारे ॥ यथाहुः । अत्रचोपनिषच्छब्दोब्रह्मविद्यैकगोचरः । तच्छब्दाभ्यवार्थस्यविद्यावामेव सम्भवात् ॥ उपोपसर्गः सामीप्ये तत्प्रतीचिसमाप्यते । सामीप्यतारतम्यस्यविश्रान्तेः स्वात्मनोऽणात्॥ विविधस्यसदर्थस्य निश्चयोपिविशेषणम् । उपनीयत आत्मानं ब्रह्मापास्तद्वयंयतः ॥ निहन्त्यविद्यांतज्ज्ञत्वतस्मादुपनिषद्भवेत् । निहन्त्यानर्थमूलंस्वाविद्यां प्रत्यक्तयायरम ॥ गमयत्यस्तसम्भेदमतोवोपनिषद्भवेत्॥ प्रदत्तिहेतून्निःशेषांस्तन्मूलोच्छेदकत्वतः । यतोऽवसादयेद्वि

उपन्य

घातस्यादुपनिषङ्गवेत्॥ यथोक्तवि
धाहेतुत्वाङ्गन्योपितदभेदतः। भवेदु
पनिषत्तामिलिङ्गं जीवनंयथेति ॥
उपनिषदनम् उपनिषीदति श्येनो-
ऽस्यांवा। षद्लृविशरणगत्यवसादने
षुं। संज्ञिप् सत्सूद्विष दृतिवा-
। सदिरप्रतेरितिषः ॥ धर्म्मे ॥ नि
र्जनस्थाने ॥ रहसि ॥ समीपसद
ने ॥ व्रतविशेषे ॥ रहस्यग्रन्थे पुराणोप
निषदादौ ॥
उपनिष्करम् । न । महति राजमार्गे । पु
रस्यघण्टापथे ॥ उपनिष्किरन्तिसैन्या
न्यच । क्वचिच्चेपेन घः । क्षुद्रोरपतुन ।
अपोवाधकत्वच्युटोपि घस्याऽपवाद-
त्वात् ॥ यद्वा ॥ उपनिष्कीर्यते सैन्ये
र्हन्यते । कृहिंसायाम् । कर्मण्यप् ।
इदुदुपधस्येति षः ॥
उपनिष्क्रमणम् । न । निष्क्रमणाख्यसं
स्कारे ॥ प्रधानमार्गे । राजपथे ॥
उपनिष्पूर्वात्क्रमे र्ल्युट् ॥
उपनिहितः । पि । निचिप्ते ॥
उपनीतः । पुं । कृतोपनयने ॥ त्रि ।
प्रापिते ॥ समर्पिते ॥ उपपूर्वान्नय
तेः क्तः ॥
उपनेत्रम् । अ । स्फटिकादिनिर्मितेने
त्रोपकारके ॥ नेत्रयोः समीपम् ॥
उपन्यस्तः । त्रि । समर्पिते ॥

उपमा

उपन्यासः । पुं । वाक्यमुखे । वाक्योपक्रमे
॥ ॥ उपन्यसनम् । असुचेपणे । घञ् ॥
उपपतिः । पुं । जारे ॥ उपमितःपत्या
। अवादयःक्रुष्टाद्यर्थेतृतीययेतिस
मासः । उपसृष्टःपतिरनेनवा । प्रा
दिभ्योधातुजस्यवाच्योवाचोत्तरपद
लोपश्चेतिसमासः ।
उपपत्तिः । स्त्री । सङ्गतौ ॥ समाधाने
। सिद्धान्ते ॥ अनुग्राहिकायांयुक्तौ ।
युक्तौ ॥ षड्विधलिङ्गेषुषष्ठलिङ्गे ॥ य
था । प्रकरणप्राप्तिपाद्यार्थसाधने तत्र
श्रूयमाणायुक्तिरुपपत्तिः । यथा ।
छान्दोग्येषष्ठप्रपाठके यथासोम्यैके
न मृत्पिण्डेन सर्वंमृन्मयं विज्ञातंस्या
त्वाचारम्भणं विकारो नामधेयं मृ
त्तिकेत्येवसत्यमित्यादावद्वितीय-
वस्तुसाधने विकारस्य वाचारम्भणमा
त्रत्वयुक्तिःश्रूयते ॥ उपपदनम् । पद
गतौ । स्त्रियांक्तिन् ॥
उपपत्तिमत् । त्रि । युक्तियुक्ते ॥
उपपदम् । न । पदस्यसमीपपदे । समी
पोच्चारितेपदे । व्याकर्त्तके॥ यथाना
मोत्तरे ब्रह्मवर्म्मादि॥लेखे॥ समभि
व्याहृतस्वार्थेपापकपदे ॥ यथा प्रहा
रादौ प्रादि ॥ उपोच्चारितं पदम् ॥
उपपन्नः । त्रि । अर्हे ॥ युक्ते । सङ्गते ॥
उपपातकम् । न । पापविशेषे ॥ यथाह

उपपा

मनुः- । गोवधोऽयाज्यसंयाज्यपार-
दार्य्यात्मविक्रयाः । गुरुमातृपितृ
त्यागः स्वाध्यायाग्न्योःसुतस्यच॥
परिवित्तितानुजेनोढे परिवेदनमे
वच । तयोर्दानञ्चकन्यायास्तयोरेव
त्ययाजनम् । कन्यायादूषणञ्चैव वा
र्द्धुष्यं व्रतलोपनम् । तडागारामदा
राणामपत्यस्यचविक्रयः॥ त्रात्यता
बान्धवत्यागो भृत्याध्यापनमेवच ।
भृताध्ययनादानमपण्यानाञ्च-
विक्रयः॥ सर्वाकरेष्वधीकारोमहा
यन्त्रप्रवर्त्तनम् । हिंसौषधीनांस्त्री
जीवोऽभिचारो मूलकर्मच ॥ इन्ध
नार्थमशुष्काणांद्रुमाणामवपातनम्
। आत्मार्थञ्चक्रियारम्भो निन्दिता
न्नादनंतथा॥ अनाहिताग्नितास्तेय
मृणानामनपक्रिया । असच्छास्त्राधि
गमनंकौशीलव्यस्यच क्रिया॥ धा
न्यकुप्यपशुस्तेयं मद्यपस्त्रीनिषेवण
म् । स्त्रीशूद्रविट्क्षत्रवधो नास्ति
क्यञ्चोपपातकमिति॥ अस्यार्थः। गो
धनम् १। जातिकर्मदुष्टानांयाजन
म् २ । परपत्नीगमनम् ३ । आत्म
विक्रयः४ । गुरुत्यागो मातृत्यागः
पितृत्यागः ५ । गुर्वादीनांशुश्रूषा-
करणमित्यर्थः॥ सर्वदावेदाध्ययनत्या
गः ८ । अग्नेरुत्पादनत्यागः ९ । सु

उपपा

तस्यच संस्कारभरणोद्वाहकरणरूप-
त्यागः १०॥ कनिष्ठेनाद्यविवाहे
कृते ज्येष्ठस्य परिवित्तिता भवति
११ । अकृतदारज्येष्ठसत्त्वेकृतदा-
रस्य कनिष्ठस्य परिवेदनम् १२-
। तयोश्चकन्यादानम् १३ । तयोरे
वविवाहहोमादियागेष्वार्त्विज्यम्-
१४॥ कन्यायां मैथुनवर्जमङ्गुलीप्रवे
शादिना दूषणम् १५ । वृद्धिजीवन
म् १६ । व्रतलोपनं ब्रह्मचारिणोमै
थुनम् १७ । तडागविक्रयः १८ । आ
रामविक्रयः १९ । भार्याविक्रयः २०
अपत्यविक्रयः २१॥ यथाकालमनु
पनयनं त्रात्यता २२ । बान्धवानां
पितृव्यादीनामननुवृत्तिः २३ । प्रति
नियतवेतनग्रहणपूर्वकमध्यापनं भृ
त्याध्यापनम् २४ । प्रतिनियतवेत
नप्रदानपूर्वकं मध्ययनञ्च भृताद्ध्य
यनादानम् २५ । अविक्रेयाणां तिल
लाक्षागोरसादीनां विक्रयः २६ ॥
सुवर्णाद्युत्पत्तिस्थानेषु राजोच्चया-
धिकारः २७ । मत्तां जलप्रवाहप्रति
बन्धहेतूनांयन्त्राणां सेतुबन्धादीनां
प्रवर्त्तनम् २८ । ओषधीनां जाति
मात्रादीनां हरितानां धान्यानां हिं
सनंनाशः २९ । भार्यादिस्त्रीणांवेश्या
त्वं कृत्वातदुपजीवनं स्त्र्याजीवः ३०

उपधा

श्येनादियज्ञेनानपराधस्य मारणम् ३१। मन्त्रौषधादिना वशीकरणं मूलकर्म ३२॥ इन्धनार्थं शुष्काणां द्रुमाणां छेदनम् ३३। अनातुरस्य देवपित्राद्युद्देशमन्तरेण पाकान्नानुष्ठानं मासार्धं क्रियारम्भः ३४। निन्दितस्य स्वगुणादेर्भक्षणं निन्दितान्नादनम् ३५। सत्त्वेधिकारे ऽन्यनाधानमनाहिताग्नितां ३६। स्तेयं सुवर्णादन्यस्य सारद्रव्यस्यापहारः ३७। देवर्षिपितृणामृणस्य अनपक्रियाऽशोधनम् ३८। असच्छास्त्रस्य श्रुतिस्मृतिविरुद्धस्य शिक्षणं ३९। कौशीलव्यस्यतैर्थिकस्य उपसेवनं सततानुष्ठानम् ४०॥ धान्यस्तेयम् ४१। कृष्णलताम्रलोहादेश्चौर्यम् ४२। पशूनांचौर्यम् ४३। द्विजातीनां पीतमद्यावाः स्त्रियाः गमनम् ४४। स्त्रीवधः ४५। शूद्रवधः ४६। वैश्यवधः ४७। क्षत्रियवधः ४८। अदृष्टार्थकर्माभावबुद्धिर्नास्तिक्यम् ४९॥ एतत् प्रत्येकमुपपातकमित्यर्थः॥

उपपादनम्। न। सम्यक्कथने॥

उपपादितः। त्रि। सम्यक्कथिते॥ समर्पिते॥

उपपादी। त्रि। उपपादनशीले॥

उपपा

उपपापम्। न। उपपातके॥ ६।

उपपुरम्। न। शंखानगरे॥ पुरसन्निधौ॥ उपसमीपे पुरम्॥

उपपुराणम्। न। व्यासोक्ताष्टादशपुराणसदृशनामानिमुनिप्रणीताष्टादशपुराणेषु॥ तानियथा। आद्यंसनत्कुमारोक्तं १ नारसिंहमतः परम् २। तृतीयं वायवीयञ्च ३ कुमारेणानुभाषितम्। चतुर्थंशिवधर्माख्यं ४ साक्षान्नन्दीशभाषितम्। दुर्वाससोक्तमाश्चर्यं ५ नारदीयमतः परम् ६॥ नन्दिकेश्वरयुग्मञ्च७ तथैवौशनसेरितम् ८। कापिलं ९ वारुणं १० भाम्यं ११ कालिकाह्वयमेवच १२॥ माहेश्वरं १३ तथापाद्मं १४ दैवं सर्वार्थसाधकम् १५। पराशरोक्तमपरं १६ मारीच १७ भास्कराह्वयम् १८॥ इतिकूर्मपुराणम्॥ दैवं देवीपुराणम्॥

उपपुत्रिका। स्त्री। जन्मायाम्। छायिकायाम्॥ इतिशब्दरत्नावली॥

उपप्रदानम्। न। उत्कोचे॥ उपसमीपेप्रदानम्॥ दानाख्यउपाये॥ भूमिधनादीनांप्रदानमुपप्रदानम्॥

उपप्लवः। पुं। सैद्धिकेये॥ विप्लवे॥ उत्पाते॥ ग्रहणे॥ यथा। उप्लवेचन्द्रमसोरवेश्चेति स्मृतिः॥ उपप्लवनम्

। प्रुङ्गतौ । ऋदोरप् ॥

उपप्लवी । स्त्री । सभये ॥

उपप्लुतः । त्रि । मर्दिते । प्रथमाने ॥ पीडिते ॥

उपबृंहितः । त्रि । वेष्टिते ॥

उपभुक्तिः । स्त्री । उपभोगे ॥ उपभोजनम् । भुज° । क्तिन् ॥

उपभूषणम् । न । घण्टाचामरादिषु ॥ यथा । घण्टाचामरकुंभादि पात्रोपकरणादिकम् । तद्रूपणान्तरेदृश्यत्वात् तदुपभूषणमिति ॥ प्रावारः पानपात्रञ्चगेण्डुकोगृहमेवच । पर्यङ्कादियदन्यच्चसर्वंतदुपभूषणमिति कालिकापुराणे ६८ अध्यायः ॥

उपभृत् । स्त्री । स्रुचोभेदे । चक्राकारेयज्ञपात्रे ॥ आर्त्विज्यमुपभृदित्याप स्तम्बः ॥ उपविभर्त्ति । डुभृञ् । क्विप ॥

उपभोगः । पुं । निर्भोगे । भोजनातिरिक्तभोगे ॥ उपभोजनम् । भुज° । घञ् ॥

उपमन्त्रणम् । न । रहस्युपच्छन्दने ॥

उपमन्युः । पुं । मुनिविशेषे ॥

उपमर्दः । पुं । धर्मिनिवृत्तौधर्म्यन्तरप्रयोगे ॥ यथा अस्तेभूः ॥ अभावे ॥

उपमा । स्त्री । उपमाने । सादृश्ये ॥ अलङ्कारविशेषे । यथा । उपमायत्र

सादृश्यलक्ष्मीर्ललसतिद्वयोः । हंसी वकृष्णेतेकीर्त्तिः स्वर्गङ्गामवगाहते ॥ यद्वोपमानोपमेययोःसहृदयहृदयाह्लादित्वेनचारुसादृश्यमुद्भूततयो ल्लसति व्यङ्ग्यमर्यादांविनाप्यष्टप्रकाशते तद्वोपमालङ्कारः । हंसीवेत्युदाहरणम् । द्वयश्चपूर्णोपमेत्युच्यते । हंसीकीर्त्तिः स्वर्गङ्गावगाहनमिवशब्दश्चेत्येतेषामुपमानोपमेयसाधारणधर्मोपमावाचकानाञ्चतृतीयमप्युपादानात् ॥ यत्रावा गुणदोषौ बुधोगृह्णन्निन्दुक्षेडाविवेश्वरः ॥ शिरसाश्लाघतेपूर्वंपरंकण्ठेनियच्छति ॥ अत्रयद्यप्युपमानोपमेययोरेकःसाधारणोधर्मः ॥ उपमानेईश्वरे चन्द्रगरलयोर्ग्रहणमुपादानंतयोर्मध्येपूर्वस्यचन्द्रस्य शिरसाश्लाघनंवहनम् । उत्तरस्य गरलस्यकण्ठे नियमनंस्थापनम् । उपमेयेबुधेगुणदोषयोर्ग्रहणं ज्ञानंतयोर्मध्ये पूर्वस्यगुणस्य शिरसाश्लाघनं शिरःकम्पनेनाभिनन्दनम् । उत्तरस्यदोषस्यकण्ठेनियमनंकण्ठादुपरि वाचा अनुद्घाटनमिनिमेदात् । तथापिचन्द्रगरलयोर्गुणदोषयोश्च बिम्बप्रतिबिम्बभावेनाभेदात् उपादानज्ञानादीनांग्रहणित्यादेकशब्दोपादानेना भेदा

उपमा

ध्यवसायाश्च साधारणधर्मतेति पूर्व
स्मादिशेषः । वस्तुतोभिन्नयोरप्युप
मानोपमेयधर्मयोः परस्परसादृश्या
दभिन्नयोः पृथगुपादानं बिम्बप्रति
बिम्बभाव इत्यालङ्कारिकसमयः ॥
* ॥ उपमाने ॥ उपपूर्वान्माङोभावे
करणेवा अङ् ॥ उपमानं येनोपमी
यते याचोपमितिः सेोपमेत्यर्थः ॥
उपमाता । स्त्री । मातुस्तुल्यायाम् ॥
सापद्विधा । यथा । मातुःस्वसा-
मातुलानी पितृष्यस्त्री पितृष्वसा ।
श्वश्रूःपूर्वजपत्नीच मातृतुल्याःप्रकी
र्त्तिताः इतिस्मृतिः ॥ यायइतिभाष-
यामापितायां धात्र्याम् ॥ त्रि । उप-
मानकर्त्तरि ॥

उपमानम् । न । उपमायाम् । सादृश्ये
॥ अधिकगुणेचन्द्रादौ ॥ सादृश्यज्ञा
ने । उपमितिकरणे । यथा गौर्गवय
स्तथेतिवाक्ये ॥ प्रसिद्धसाधर्म्यात् सा
ध्यसाधनमुपमानमिति न्यायसूत्रम्
। १। ६। प्रसिद्धस्यपूर्वप्रमितस्यगवा
देः साधर्म्यात् सादृश्यात् तज्ज्ञाना
त् साध्यस्यगवयादिपदवाच्यत्वस्यसा
धनंसिद्धिरुपमान मुपमितिर्यतइ
त्यर्थाद्वारेणच करणलक्षणम् । अ
थवा साध्यसाधनमिति करणल्युटा
करणलक्षणमेवेदम् अथचवैधर्म्यो

उपमिति

पमितिमपिमन्यन्ते टीकाकृतः । य
थाच अतिदीर्घग्रीवत्वादिपश्चक्तर-
वैधर्म्यज्ञानादुष्ट्रेकरभपदवाच्यताग्र-
हः । एवमन्योप्युपमानस्य विषय
इतिभाष्यम् । तथामुञ्जपर्णीसदृसी
ओषधी विषघ्नीत्यतिदेशवाक्या
र्थं ज्ञाते मुञ्जपर्णीसादृश्यज्ञानेजा-
ते इयमोषधी विषघ्नीत्युपमि-
त्या विषयी क्रियते इत्यादि । उप
मिती । उपमित्यनुयोगिनि ॥ उप
मीयतेयेन तदुपमानम् । उपपूर्वा
न्माङः करणे ल्युट् । प्रादिसमासः ।
उपपूर्वकेोमाङ् सादृश्यहेतुके परि
च्छेदेरूढः । येनपश्चकरं सादृश्ये-
न परिच्छिद्यते तदुपमानमित्यर्थः ।
यथागौरिव गवयः । इहद्विगोःकरण
म् । सादृश्यंहेतुः । पुरुषः परिच्छेत्ता
। सद्विगोःसादृश्येन गवयंपरिच्छिनत्ति ॥

उपमितः । त्रि । सादृश्यज्ञाते ॥ उपमे-
ये ॥

उपमिति । स्त्री । उपमायाम् ॥ मिति
भेदे । संज्ञासंज्ञिसम्बन्धज्ञाने ॥ न्या
यमतेन सादृश्यज्ञानजन्यज्ञाने । उ
पमाने ॥ यथा गोःसदृशोगवयपद-
वाच्यइत्याकारशक्तिज्ञानम् । अस्य
करणंगवादिसादृश्यवत् पिण्डप्रत्य

उपमे

चम् । अस्यव्यापारः अतिदिष्टवाक्यार्थस्मरणम् । इत्युपमानखण्डम् ॥ अपिच । ग्रामीणस्य प्रथमतः पश्यतो गवयादिकम् । सादृश्यधीर्गवादीनां यास्यात्सोपमितिः स्मृता ॥ वाक्यार्थस्यातिदेशस्य स्मृतिर्व्यापारउच्यते । गवयादिपदानान्तु शक्तिधीरुपमाफलम् ॥ पदज्ञानन्तुकरणं शक्तिधीरुपमाफलमिति भाषापरिच्छेदः ॥ उपमानम् । डुमिञ्° । क्तिन् ॥

उपमेतः । पुं । शालट्टचे ॥ इतिशब्दचन्द्रिका ॥

उपमेयम् । त्रि । उपमिते ॥ उपमीयते यत् तत् । भाड् । अचोयत् । ईद्यति ॥

उपमेयोपमा । स्त्री । अर्थालङ्कारविशेषे ॥ यथा । पर्यायेणद्वयोरुक्तेदुपमेयोपमामता । धर्मोर्थद्वयपूर्णश्रीरर्थोधर्मद्वयच्छवि ॥ द्वयोः पर्यायेणोपमानोपमेयत्वकल्पनं तृतीयसादृश्यव्यवच्छेदार्थम् । धर्मार्थम् । धर्मार्थयोरैहिकस्यचित्-कैनचित्सादृश्येवर्णिते तस्याप्यनेन सादृश्य मर्थसिद्धमपिमुखतोवर्ण्यमानं तृतीयसादृश्यव्यवच्छेदार्थंफलति । यथावा । खमिव जलं जलमिवखं हंसश्चन्द्रद्वय

उपया

चन्द्रद्वयवर्त्तसः ॥ कुमुदाकारास्तारास्ताराकाराणि कुमुदानि ॥ पूर्वत्र पूर्णश्रीरितिधर्म उपात्तः इहामलत्वादिधर्मानोपात्त इति भेदः । उदाहरणद्वयेऽपिप्रकृतयोरेवोपमानोपमेयत्वकल्पनम् । रात्रि धर्मार्थसमृद्धेः शरदि गगनसलिलादिनैर्मल्यस्यचवर्णनीयत्वात् । प्रकृताप्रकृतयोरप्येषा सम्भवति । यथा । गिरिरिवगजराजोयं गजराजद्वयेनैवविभातिगिरिः । निर्झरद्वयमदधारामदधारेवास्यनिर्झरःस्रवतीति ॥

उपयन्ता । पुं । दयिते । पत्यौ ॥ उपयच्छति । यमउपरमे । तृच् ॥

उपयमः । पुं । विवाहे ॥ उपयमनम् ॥ यम° । यमः समुपनिविषुचेत्यप् ॥

उपयमनम् । न । विवाहे ॥

उपयाचकः । त्रि । समीपे याच्ञाकर्त्तरि ॥

उपयाचितः । त्रि । दिव्यदोहदे । स्वेष्टार्थसिद्धये देवायदेये वस्तुनि ॥ प्रार्थिते ॥

उपयाचितकम् । त्रि । उपयाचिते । स्वेष्टलब्धये देवदेये ॥

उपयाजः । पुं । यज्ञाङ्गे ॥ एकादशोपयाजाः । उपपूर्वाद्यजेर्घञि प्रयाजानुयाजयोः प्रदर्शनार्थत्वात्कुत्वाभावः ॥

उपर

उपयामः। पुं। विवाहे॥ उपयमनम्। यम॰। यमःसमुपनिविषुचेतिपचे घञ्॥

उपयुक्तः। त्रि। उचिते। योग्ये॥ उपयुज्यते। युजिर॰। क्तः॥

उपयोगः। पुं। आचरणे॥ इष्टसिद्ध्यर्थव्यापारे॥ उपयुज्यते। युज॰। घञ्॥

उपयोगिता। स्त्री। आनुकूल्ये। प्रयोजने। फलसाधनतायाम्॥ उपयोगिनो भावः। तल्॥

उपयोगी। त्रि। अनुकूले। उपयुक्तः। ग्यादौ। क्रियासाधने॥ उपयोगोऽस्ति अस्यास्मिन् वा। अतइनिठनौ॥

उपरक्तः। पुं। स्वर्भानौ। राहौ॥ राहुग्रस्ते इन्दौ सूर्येच। राहुकर्त्तृकग्रहणकर्मीभूते चन्द्रे अर्केच॥ त्रि। व्यसनार्त्ते। दैवमानुषान्यतरपीडायुक्ते॥ आसक्ते॥ उपरज्यतेस्म। रागे। कर्मणिक्त॥

उपरचकः। त्रि। रचितरि॥

उपरचणम्। न। रचायैसैन्यविन्यासे। सज्जने। चौकी पहरा इति च भाषा॥

उपरतः। त्रि। सर्वैषणाविनिर्मुक्तेपरिव्राजि। संन्यासिनि॥ मृते॥ विरते॥

उपर

। निवृत्ते॥

उपरतसृहः। त्रि। इच्छारहिते॥ सत्यपिसत्वे स्वगतधनेच्छारहिते॥

उपरतिः। स्त्री। विषयेभ्यइन्द्रियाणांपराबृत्तौ। निवर्त्तितानामेषांश्रोत्रादिपञ्चेन्द्रियाणां अवणादिव्यतिरिक्तविषयेभ्यउपरमणे॥ विहितानांकर्मणां विधिनापरित्यागे॥ पुमर्थःकर्मणानेतिधीरेषोपरतिर्भवेदिति युक्तेः॥ लाभप्राप्तावौदासीन्ये॥ विरतौ॥ उपरमणम्। रमक्रीडायाम्। ल्युट्॥

उपरत्नम्। न। गौणरत्ने॥ तानियथा उपरत्नानिकाचश्च कर्पूराश्मातथैवच। मुक्ताशुक्तिस्तथाशङ्खइत्यादीनिवहून्यपि॥ गुणायथैवरत्नानामुपरत्नेषुतेतथा। किन्तुकिञ्चित्ततोहीनाविशेषोयमुदाहृतइति॥

उपरथ्या। स्त्री। क्षुद्रवीथिकायाम्॥

उपरन्ध्रम्। न। अश्वस्यरन्ध्रोपरिभागे॥ यथोक्तम्। क्वचिन्नाभ्यन्तरेरन्ध्रमुपरन्ध्रंतथोपरीति॥

उपरमः। पुं। उपरतौ। वैराग्ये॥ उपरमणम्। रम॰। घञ्। यमउपरमेइति निपातनान्नदृद्धिः॥ नाशे॥ उपरमतेऽस्मिन्वा॥

उपरमणम्। न। पराबृत्तौ॥

उपरस

उपरसः । पुं । गन्धकादिषु ॥ यथा ।
गन्धोहिङ्गुलमभ्रतालकशिलास्रो-
तोञ्जनंटङ्कणंराजावर्त्तकंचुम्बकंस्फ
टिकयाग्रहुःखटीगैरिकम् । कासी
संरसकंकपर्दसिकताबोलाश्वकङ्कुष्ठ
कं सौराष्ट्रीचमताअमीउपरसाःस्यू
तस्यकिञ्चिदूनैः ॥ अथैषांशोधनवि
धिः । सूर्यावर्त्तोवज्रकन्दः कदली
देवदालिका । गिरुःकोपातकोव-
न्याकाकमाचीचपालुकम् ॥ एवा
मेकरसेनैव विचारैर्लवणैःसह ।
भावयेदम्लवर्गेणदिनमेकं प्रयत्नतः
॥ ततःपचेद्वतद्द्रावैर्दोलायन्त्रेदिनं
सुधीः । एवंशुद्ध्यन्तितेसर्वे प्रोक्ताउ
परसाहिये ॥ विशेषश्च । कङ्कुष्ठंगै-
रिकंग्रहुकासीसंटङ्कणंतथा । नीला
ञ्जनंगुक्तिभेदाः चुल्लकाः सवराटि-
काः ॥ जम्बोरवारिणास्विन्नाःक्षाखि
ताः कोष्णवारिणा । नित्यमायान्त्य
मोयोज्याभिषग्भिर्योगसिद्धयेदिति ॥

उपरागः । पुं । ग्रहणे । राहुग्रस्तार्कच
न्द्रयोः । राहुकर्तृकचन्द्रादिकर्मक
ग्रहणरूपक्रियायाम् ॥ दुर्नये ॥ग्रह
कल्लोले ॥ व्यतने ॥ विमाने । नि
न्दायाम् ॥ उपरज्यतेऽनेन सूर्यश्चन्द्र
श्च । रञ्जरागे । हलश्चेति घञ् ।
घञिचभावकरणयोरितिनलोपः ॥

उपरी

सम्बन्धे ॥ यथा । गुणोपरागःस्वेच्छा
तः पुरुषस्यकल्पत इतिसहस्रनाम
भाष्यम् ॥

उपरामः । पुं । निवृत्तौ । विरतौ ॥
उपरमणम् ॥ रम° । घञ् । रमे
रनुदात्तोपदेशत्वान्न वृद्धिनिषेधः ॥
। निरहङ्कारत्वे ॥

उपरि । अ । ऊर्द्धे ॥ ऊर्द्धे ऊर्द्धाया-
म् ऊर्द्धात् ऊर्द्धायाः ऊर्द्धम् ऊर्द्धा
वा वसति आगतो रमणीयंवा । उप
र्यूपरिष्टादिति ऊर्द्धेऽर्थेनिपातोऽयम् । प्र
त्ययश्च ॥

उपरिचरः । पुं । वसुविशेषे ॥ विमाने
नोर्द्धंनिरन्तरंगमनादुपरिचर इति
नामास्य । नृपतिरयंचेदिदेशाधिप
तिरासीत् ॥

उपरिबुद्धिः । वि । उत्तानबुद्धौ ॥ उप
र्यूपरिबुद्धीनां चरन्तीश्चरबुद्धयश्च
उपरिबुद्धीना मुत्तानबुद्धीना मु-
परिचरन्तीत्यर्थात् ॥

उपरिष्टात् । अ । ऊर्द्धे ॥ ऊर्द्धे ऊर्द्धाया
म् ऊर्द्धात् ऊर्ध्वायाः ऊर्ध्वम् ऊर्ध्वं
वा वसति आगतो रमणीयंवा । उ
परिउपरिष्टादित्यूर्द्धस्य उपादेशो-
रिष्टातिलुच प्रत्ययः॥

उपरीतकः । पुं । शृङ्गारवन्धविशेषे ॥
तल्लक्षणं यथा । एकपादमुरौ कृत्वा

द्वितीयं स्कन्धसंस्थितम् । नारीकामयतेकामीवन्धःस्था दुपरीतकंइति ॥ अत्रविपरीतकेा पिपाठः ॥

उपरुद्धः । त्रि । मूत्रादिवेगवृति ॥

उपरूपकम् । न । नाटकप्रभेदे । स चाष्टादशविधेा यथा । नाटिका त्रोटकं गोष्ठी सट्टकं नाट्यरासकम् स्था नोल्लाप्यकाव्यानि प्रेङ्खणं रासकं तथा ॥ संलापकं श्रीगदितं शिल्पक ञ्चविलासिका । दुर्मल्लिकाप्रकरणी हल्लीशेभाणिकेतिच ॥ अष्टादशप्रा हुरूपरूपकाणिमनीषिणः। विनावि शेषंसर्वेषांलक्ष्मनाटकवन्मतमिति-साहित्यदर्पणे ६ परिच्छेद ॥

उपरोधः । पुं । अनुरोधे ॥ उपरोधन म् । रुधिर्० । घञ् ॥

उपरोधकम् । पुं । न । गर्भागारे । वास गृहे ॥ त्रि । उपरोधकर्त्तरि ॥

उपल । पुं । पाषाणे । प्रस्तरे ॥ मणौ । रत्ने ॥ उपलाति । ला दाने । आ-तश्चतिकः॥ उंशम्भुंप्रति औशम्भो वा पलति । पल गतौ । पचाद्यच् ॥ औ. शम्भोः पल. वेधकेा वा ॥

उपलक्षकः । त्रि । लक्षयितरि ॥

उपलक्षणम् । न । अजहत्स्वार्थलक्षणा याम् । एकपदेन तदर्थान्यपदार्थक थने ॥ यथा । देशान्तरेगते पत्यौ

साध्वी तत्पादुकाद्वयम् । निधायेार-सिसंशुद्धा प्रविशेज्जातवेदसम् ॥ अ त्रपादुकाद्वयमित्युपलक्षणम् द्रव्या न्तरस्यापि॥ उपसमीपस्थं लक्षणमा लेाचनंयत्र ॥ स्वसिद्धयेपराक्षेपःपरा र्थेस्वसमर्पणम् । उपादानंलक्षणञ्चे त्युक्ताशुद्धैवसाद्विधा ॥ यथाकुन्ताःप्र विशन्तीत्युपादानम् । गङ्गायां घोष इत्युपलक्षणमितिकाव्यप्रकाशः ॥

उपलक्षणभावः । पुं । शक्यतावच्छेदक त्वे ॥

उपलक्षितः । त्रि । बेाधिते ॥ ज्ञाते ॥

उपलधिप्रियः । पुं । चमराख्यवनजन्तौ ॥ इतिराजनिर्घण्टः ॥

उपलब्धः । त्रि । दृष्टे ॥

उपलब्धार्थः । त्रि । अनुभूते ॥ उपल ब्ध.अर्थेाऽस्य ॥

उपलब्धार्था । स्त्री । आख्यायिकायाम् ॥ उपलब्ध. केनापि प्रमाणेन अर्थेाऽभि धेयं यस्याः सा । भूतार्थशब्दरचने-ति यावत् ॥

उपलब्धि. । स्त्री । सत्त्वाम् ॥ प्राप्तौ ॥ ज्ञाने ॥ उपलभ्भे ॥ उपलभ्यते ऽन-या । डुलभष्० । क्तिच्वात् प्राप्तमङ्-वाधित्वा बाहुलकात् क्तिन् ॥

उपलभ्या । पुं । आत्मनि ॥

उपलभेदी । पुं । पाषाणभेदिनि स्था

उपव

वरे ॥

उपलम्भः । पुं । उपलब्धौ । अनुभवे ॥ उपलम्भनम् । डुलभष् प्राप्तौ । घञ् । उपसर्गात् खल्घञोरितिनुम् ॥

उपलम्भनम् । न । उपलम्भे ॥ उपलभ्यते । डुलभष्° । कर्मणिभावेवाल्युट् ॥

उपलक्षितः । त्रि । ज्ञापिते ॥

उपलभ्यः । त्रि । स्तवोपयुक्ते । स्तव्ये ॥ यथा । उपलभ्यः साधुः । इति मुग्धबोधव्याकरणम् ॥

उपला । स्त्री । अश्मशर्कायांस्वदि ॥ शर्करायाम् ॥ उपलाति । लाआदाने । आतश्चोपसर्गइतिकः । उंशब्दंप्रति औ शब्दौवा । पलति । पलगतौ । पचाद्यच् । टाप् ॥

उपलिङ्गम् । न । अरिष्टे । उपद्रवे ॥ इतिहेमचन्द्रः ॥

उपलेपः । पुं । उपलेपने ॥

उपलेपनम् । न । गोमयादिना आलेपे । उपाञ्जने ॥ उपलिप्यते । लिपउपदेहे । कर्मणि ल्युट् ॥

उपवट । पुं । प्रियालवृक्षे । पियाले ॥

उपवनम् । न । आरामे । कृत्रिमेवृक्षसमूहे ॥ पुष्पप्रधाने रोपितवृक्षसमूहे ॥ उपगतं वनम् । प्रादयोगतार्थं इतितत्समासः ॥

उपवर्त्तनम् । न । देशे । विषये । स्था

उपवा

नमात्रे ॥ उपवर्त्तन्तेऽत्र । वृतुं° । घञ् । ओल्युटोपवादत्वादन्यत्रापीतियुच् ॥

उपवर्षः । पुं । मुनिविशेषे । कृतकोटौ ॥

उपवर्हः । पुं । शिरोधाने । उपधाने ॥ उपवृह्यतेऽत्रानेनवा । वृहवृद्धौ वृहू उद्यमनेवा । घञ् ॥

उपवर्हणम् । न । उपवर्हे । उच्छीर्षके ॥ उप वृह° । ल्युट् ॥

उपवल्गिका । स्त्री । अस्तत्सवालतायाम् ॥

उपवसथः । पुं । ग्रामे ॥ उपवसन्तियत्र । वस° । उपसर्गेवसेरित्यथः ॥

उपवस्तम् । न । उपवासे ॥ उपवसनम् । वसुस्तम्भे । भावे क्तः । अनेकार्थत्वादशनेवृत्तिः ॥

उपवासः । पुं । उपवस्ते । अहोरात्रभोजनाभावे ॥ तपनोदयमारभ्य यामाष्टकमभोजनम् । उपवासः सविज्ञेयः प्रायश्चित्तेविधीयते । आस्तोदिते नित्ये काम्येवा अहोरात्राभोजने ॥ वैधोपवासे भोजनचतुष्टयनिवृत्तिरुक्ताभारते । सायमाद्यन्तयोरह्नोः सायम्भातश्च मध्यमे । उपवासफलं प्रेम्णोर्वज्यं भक्तचतुष्टयमिति ॥ काम्योपवासाश्च भारते । विरात्रं पञ्चरात्रंवा पक्षव्रतमथापिवा । मासोपवासान् कुर्वीताचान्द्रायणमथा

उपवा

उपवेति ॥ उपाढत्तस्य पापेभ्योयस्तु वासोगुणैःसह । उपवासःसविज्ञेयःसर्वभोगविवर्जितः ॥ उपाढत्तस्य निक्तस्य । पापेभ्यः पापकर्मभ्यः । गुणाः सर्वभूतेषुदया क्षान्तिः अनसूया शौचम् अनायासः मङ्गलम् अकार्पण्यम् अस्पृहाच । सर्वभोगविवर्जितः स्नानानुलेपनत्वक्स्थगीतादिसुखरहित इत्यर्थः ॥ उपवासासामर्थ्यप्रतिनिधयःस्कन्दपुराणे । पुत्रं वा विनयोपेतं भगिनीभ्रातरं तथा । एषामभावएवान्यं ब्राह्मणंविनियोजयेत् ॥ गरुडपुराणे । भार्यामर्तृव्रतंकुर्यात् भार्यायाश्चपतिस्तथा । असामर्थ्येद्वयोस्ताभ्यांव्रतभङ्गोनजायते ॥ अनुकल्पमाह वायुपुराणे । नक्तंहविष्यान्नमनोदनञ्च फलंतिलाः क्षीरमथाम्बुचाज्यम् । यत् पञ्चगव्यंदिवाशवायुः प्रशस्तमेषोत्तरमुत्तरञ्चेति ॥ उपवासासमर्थेविशेषमाह ब्रह्मवैवर्त्ते । उपवासासमर्थश्चेद्देयंविप्रान्तुभोजयेत् । तावद्गुनाविवाद्याद्य द्भक्ताद्विगुणं भवेत् ॥ सहस्रसम्मितांदेवींजपेद्वा प्राणसंयमान् । कुर्याद्वादशसंख्याकान्यथा शक्तिनतेनरः ॥ वैधायनस्त्वाह । अष्टौतान्यत्र तप्तानि आमोमूलंफलंपयः । हवि

उपवि

र्ब्राह्मणकाम्याचगुरोर्वचनमौषध - मिति ॥ अत्र श्रीसदाशिवः ॥ अलाबुवन्नगताः प्राणानोपवासः प्रशस्यते । उपवासप्रतिनिधावेकंदानंविधीयतेऽति ॥ उपवसनम् । वसनिवासे । घञ् ॥ उपवासफलंनरश्चेद्वास्यप्राह्मैथुनात् । स्त्रीणांसम्पेच्च णात्स्पर्शात्ताभिःसङ्कथनादपीत्येकादशीतत्त्वम् । सङ्कथनम् सम्यग् भाषणम् ॥

उपवासी । त्रि । उपवासयुक्ते । व्रतोपवासनिष्ठे तपस्विनि ॥ उपवासोऽस्यास्ति । इनिः ॥

उपवाह्यः । पुं । राजवाहकहस्तिनि । राजवाह्यौ ॥

उपविषम् । न । कृत्रिमविषेगरेचारे ॥ पुं । गौणविषे ॥ अर्कक्षीरं स्नुहीक्षीरं तथैवकलिकारिका । करवीरोदयधत्तूरः पञ्चचोपविषाः स्मृताः ॥ तत्र तत्रगुणाज्ञेयाद्रष्टव्याः सुविचक्षणैः ॥

उपविषा । स्त्री । सहौषधे । गुडूच्याम् । अतीस इतिभाषा ॥ विषमुपगता । शुक्लकन्दाचोपविषा भङ्गुराघुणवल्लभा ॥

उपविष्टः । त्रि । आसीने । आसनावस्थिते । समासीने । बैठा इतिभा

उपवे:

उपविशतेःक्तः ॥

उपविष्टहोमः । पुं । स्वाहाकारप्रयोगान्ते याज्यापुरोनुवाक्यारहिते होमे॥

उपविष्टिः । स्त्री । आस्थायाम् । स्थितौ ॥

उपवीतम् । न । वामांसस्थापिते यज्ञसूत्रे । यज्ञोपवीते । त्रिगुणीकृत्यत्रिगुणितेकार्पासादिसूत्रविशेषे ॥ तदुक्तंछन्दोगपरिशिष्टे । ऊर्द्धन्तुचित्रं तं कार्यं तन्तुत्रय मधोहतम् । चित्रं तच्चोपवीतं स्यात् तत्रैकाग्न्यरिप्य । तद्गति॥ उपवीयतेस्म । अजगः । अजे र्व्यघञपोः । वीगत्यादिषु वा । क्तः ॥ यद्वा । उपाजतिस्म उपवेतिस्मवा । गत्यर्थेतिक्तः ॥ उपवीतं यज्ञसूत्रं प्रोद्धृतेदक्षिणेकरे । प्रोद्धृतेवहिस्कृतेसति वामस्कन्धार्पितइत्यर्थः ॥

उपवीती । पुं । उपवीतवतिद्विजे ॥ उद्धृतेदक्षिणेपाणावुपवीत्युच्यतेद्विजः । दक्षिणेपाणौ। उद्धृते वामस्कन्धस्थिते दक्षिणकक्षावलम्बे यज्ञसूत्रेवस्त्रे वा उपवीती द्विजःकथ्यतइत्यर्थः । उपवीतमस्यास्ति । व्रतइनिठनौविनीनिः ॥

उपवेष्टितः । त्रि । वर्द्धिते ॥

उपवेदः । पुं । प्रधानवेदाति रिक्तेवेदे॥ सचतुर्विधः । आयुर्वेदोधनुर्वेदोगान्धर्ववेदोऽर्थ शास्त्रमितिभेदात् । तत्रर्ग्वेदस्यायुर्वेदउपवेदः । यजुर्वेदस्य धनुर्वेदः । सामवेदस्य गान्धर्ववेदः । अथर्ववेदस्य शस्त्रशास्त्राणीति शौनकोक्तचरणव्यूहः ॥

उपवेशनम् । न । स्थितौ ॥

उपव्याघ्रः । पुं । मृगान्तके । चित्रके । चीताइति भाषा सिद्धे ॥

उपव्याख्यानम् । न । विस्पष्टप्रकथने ॥

उपशमः । पुं । शमे । इन्द्रियाणां संयमे । तृष्णाक्षये ॥ यतेरुपशमोधर्म इति स्मृतिः ॥ अभावे । प्रतीकारे ॥ सावशेषनाशे ॥ उपशमनम् । शम । भावेघञ् ॥ उपशाम्यत्यनेनवा । इ । लश्चेति घञ् ॥

उपशयः । पुं । निदानपञ्चकान्तर्गतरोगशमनजनके ॥ तल्लक्षणम् । हेतुव्याधिविपर्यस्तविपर्यस्तार्थकारिणाम् । औषधान्नविहाराणामुपयोगंसुखावहम् ॥ विद्यादुपशयंव्याधेःसहि सात्म्यमितिस्मृतः ॥ इतिनिदानम् ॥ व्याधिहेतुविपरीतौषधादित. सुखावहोपयोगे ॥ न । समीपशयने ॥ वि । शयमासे ॥ उपशयनम् । शीङ० । एरच् ॥

उपशल्यम् । न । ग्रामान्ते । ग्रामान्तभागे ॥ शल्यमुपगतम् । प्रादिसमासः॥

उपश

उपसं

उपशान्तः । त्रि । बाधिते । सम्यग्बाधिते ॥ यथा ॥ उपशान्तेऽगच्छीवश्चिष्याचार्येश्वरब्रह्मभमिति ॥

उपशान्तिः । स्त्री । शमे ॥ उपशमनम् । शम° । स्त्रियां क्तिन् ॥

उपशायः । पुं । प्रहरिणांकमेषशयने । विशाये ॥ उपशयनम् । शीङ° । ल्युटि अयोः शेतेः पर्यायेऽपीति घञ् । तत्रा स्तराजोपशायः ॥

उपश्रुतम् । त्रि । अङ्गीकृते । स्वीकृते ॥ उपश्रूयतेस्म । श्रुश्रवणे । क्तः ॥

उपश्रुतिः । स्त्री । दैवप्रश्ने ॥ यथा । नक्षत्रनिर्गत्ययत्किञ्चिच्छुभाशुभकरंवचः । श्रूयते तद्विदुर्धीरा दैवप्रश्न मुपश्रुतिमिति ॥ उपश्रूयते । श्रु० । कर्मणि स्त्रियां क्तिन् ॥

उपश्लेषः । पुं । सम्बन्धविशेषे ॥ यथा-आधाराधेययोरन्यत्रसिद्धयोः प्रादेशिकःसम्बन्ध उपश्लेषः । कटेऽऽस्ते स्थाल्यांपचतीत्यत्रौपश्लेषिकाधिकरणे सप्तमी ॥

उपष्टम्भकम् । न । स्थूणायाम् ॥ पुं । आधिक्ये ॥

उपसंयमः । पुं । उपसंहारे ॥

उपसंव्यानम् । न । परिधानांशुके । अन्तरीये ॥ उपसंवीयतेऽनेन वा । व्ये ञ् संवरणे । कृत्यल्युटइतिल्युट् ॥

उपस

उपसंहरणम् । न । उपसंहारे ॥ ल्युट् ॥

उपसंहारः । पुं । समाप्तौ ॥ सङ्ग्रहे ॥ उपसंहरणम् । हृञ्° । घञ् ॥

उपसङ्ग्रहः । पुं । अभिवादे । पादस्पर्शपूर्वकनमस्कारे । पादग्रहणे ॥ मेलने ॥ उपसङ्ग्रहणम् । ग्रहउपादाने । ग्रहइदृनिश्चिगमश्चेत्यप् ॥

उपसङ्ग्राह्यः । त्रि । अभिवाद्ये ॥ उपसङ्ग्रहणीये ॥

उपसत्तिः । स्त्री । सेवायाम् ॥ सङ्गमाचे ॥ प्रतिपादने ॥ उपसदेर्भावेक्तिन् ॥

उपसद् । पुं । प्रवर्ग्याहः प्रसिद्धायामिष्टौ ॥ गार्हपत्यादित्रयभिन्नेऽग्नौ ॥ यथा । गार्हपत्योदक्षिणाग्निस्तथैवाहवनीयकः । एतेऽग्नयस्त्रयोमुख्याः शेषाश्चोपसदस्त्रयइतिधर्मपुराणे गणभेदनामाध्यायः ॥

उपसद्व्रती । पुं । उपसत्सु दृष्टिपूतंपन्यासमाचमेत्तदुपेत ॥

उपसन्नः । त्रि । उपनते । उपस्थिते ॥ यथा । भगवच्छुद्धौ मतिर्जन्मजले सुखदुःखभूपे पतितंव्यथितम् । कृपयाशरणागत मुद्धरमा मनुशाध्युपसन्नमनन्यगतिमितितोटकाचार्य्यः ॥ शरणागते ॥ उपासदत् उपसीदतिस्मवा । षद्लृ° । गत्यर्थेक्तः ॥

उपसमाधानम् । न । रागीकरणे ॥

उपसम्पन्नः । त्रि । प्रमीते । प्रोचिंते । वैचार्थहतपशौ ॥ प्रणीते । सुसंस्कृते । पाकेनसंस्कृते मांसादौ ॥ पर्याप्ते ॥ प्राप्ते ॥ मृते ॥ उपसम्पद्यतेस्म । तौयदग । कर्त्तरिकर्मणिवागत्यर्थे क्तः ॥

उपसम्भाषा । स्त्री । उपसान्त्वने ॥ सम्भाषणे ॥

उपसरः । पुं । स्त्रीगव्यादिषुपुंङ्गवादीनां प्रथमगर्भाधानार्थाय मैथुनाभियोगे । प्रजने ॥ उपसरणम् । सृगतौ । प्रजनेसर्त्तरित्यप् । यथा गवामुपसरः ॥

उपसरणम् । न । समीपगमने ॥ उपसर्त्तव्ये ॥ सृ अप् ल्युट् । उपसमीपे सरणम् ॥

उपसर्ग । पुं । रोगप्रभेदे ॥ उपप्लवे । उत्पाते । उपद्रवे । शुभाशुभसूचके महाभूतविकारे ॥ क्रियायोगे प्रभवादिषु ॥ यथा । निपातास्त्वादयोज्ञेया उपसर्गास्तु प्रादयः । द्योतकत्वात् क्रियायोगे लोकादवगताद्दमे ॥ सविधा । धात्वर्थं वा धते कञ्चित् कञ्चित्तमनुवर्त्तते । तमेवविशिनष्टान्यउपसर्गगतिस्त्रिधा ॥ क्रमेणोदाहरणानि यथा । आदत्ते प्रहृते प्रणमतीति ॥ अपिच । उपसर्गेण धात्वर्थो

बलादन्यत्रनीयते । प्रहाराहारसंहारविहारपरिहारवत् ॥ उपसर्ज्जनम् उपसृज्यते वा । सृज° । घञ् ॥

उपसर्ज्जनम् । न । प्रधानभिन्ने । गौणे । अप्राग्रे । अमुख्ये । विशेषणे ॥ त्यागे ॥ उपसृज्यते । सृज° । कर्मणि ल्युट् ॥

उपसर्त्तव्यम् । त्रि । उपगन्तव्ये ॥

उपसर्पकः । त्रि । उपासके । उपसर्पणकर्त्तरि ॥

उपसर्पणम् । न । अनुगमने । अनुवृत्तौ ॥ सृप्गतौ ल्युट् ॥

उपसर्य्या । स्त्री । ऋतुमत्यां गवि । कार्य्यायाम् ॥ गर्भाधानार्थं वृषभेणोपगन्तुं योग्यायाम् ॥ उपसिव्यते वृषेण । सृगतौ । उपसर्य्याकाल्याप्रजने । इति साधुः । काल्यापुसर्य्याप्रजने इत्यमरः ॥

उपसादितः । त्रि । प्रापिते ॥

उपसार्य्यः । त्रि । समीपगमनीये ॥ प्राप्तव्ये ॥ कर्मणि ण्यत् ॥

उपसुन्दः । पुं । रामायणप्रसिद्धे सुन्दभ्रातरिराक्षसे ॥

उपसूर्य्यकम् । न । चन्द्रार्कमण्डले । चन्द्रार्कसमीपवर्त्तिनिमण्डले ॥ उपगतंसूर्य्यम् उपसूर्य्यम् । प्रादिसमासः । ततःस्वार्थेकन् । चन्द्रपचे उप

उपस्था

सूर्यमिव । इवार्थेकन् ॥
उपसूर्यक मण्डलम् । न । परिवेषे ॥
उपसृप्यः । त्रि । गम्ये ॥
उपहसनम् । न । मैथुने । सुरते ॥ त्रि ।
। उपसर्गयुक्ते । निकृष्टे ॥
उपसेकः । पुं । सेचनेन मृदुकरणे ॥
उपसेचनम् । न । घृते ॥ उपसिच्यते-
ऽनेन । सिच्+करणे । ल्युट् ॥
उपस्करः । पुं । कटकक्षुण्डखड्गारादौ
॥ वेसवारे । व्यञ्जनादिसंस्कारार्थं घृ
। व्याकसर्षपादिपिष्टे ॥ दग्धदुग्धस्थ-
र्पीदौ । गृहोपकरणक्षुण्डसम्मार्ज
न्यादौ ॥ उपकरोति व्यञ्जनेन सम
वैति । डुकृञ् । समवायेचेतिसुट् ॥
उपस्करणम् । न । परिकरे ॥
उपस्कृतः । त्रि । मण्डिते ॥
उपस्तरणम् । न । आस्तरणे ॥ उपस्तृ
र्यते । स्तृञ् । ल्युट् ॥
उपस्थः । पुं । न । लिङ्गे । शेफसि ॥ भ
गे । मदनागारे ॥ क्रोडे ॥ त्रि । स
मीपस्थे ॥ उपतिष्ठते । ष्ठा । सुपी-
तिकः । अङ्गेचीदिः ॥
उपस्थपवः । पुं । भाण्डीरे । वटे ॥
उपस्थाता । त्रि । भृत्ये । सेवके ॥
उपस्थानम् । न । नमस्कारे ॥ उपेत्य
स्थानम् ॥ उपस्थीयते । ष्ठा । ल्यु
ट् ॥ सङ्गतौ ॥

उपहा

उपस्थितः । त्रि ॥ आगते ॥ निकटस्थि
ते । उपसन्ने ॥ प्राप्ते ॥ उपपूर्वात्-
तिष्ठतेर्गत्यर्थाकर्मकेति क्तः । इति
श्वतीतीत्वम् ॥
उपस्पर्शः । पुं । स्पर्शमात्रे ॥ स्नाने ॥ आ
चमने ॥ उपस्पर्शनम् । स्पृशस्पर्शे ।
घञ् ॥ उपस्पृश्यन्ते स्नान्यत्र । स्पृश-
श्चेत्यधिकरणे घञ्वा ॥
उपस्पर्शनम् । न । उपस्पर्शे ॥ स्पृशे
ल्युट् ॥
उपस्पृष्टः । त्रि । आचान्ते ॥ सन्निधिम्
। वेगा सेविते ॥ उपस्पृशेक्तः ॥
उपस्वत्वम् । न । उत्सन्नेऽन्ये । त-
द्धिक्ते तत्प्रयोपजाते स्वत्वास्पदीभू
॥ तभूम्यादिस्वर्धनादौ ॥
उपहतः । त्रि । तिरस्कृते ॥ विघट्टिते
॥ अशुद्धद्रव्ये ॥ उत्पातग्रस्ते ॥ नष्टे ॥
प्रिया । कृत्यास्रस्रविभीषिकां कति
पयग्रामेषुदीना प्रजा मन्त्रतोविठज
ल्पितैरुपहताः चोरीभुजस्तेकिल-
। विद्वांसोभिवयं किल त्रिजगतां स
र्गेस्थितिव्यापदामीशस्तत्परिचर्यया
नगमितोयैरेपनारायणः इति ॥
उपहसितम् । न । हास्यप्रभेदे ॥
उपहारः । पुं । उपायने । भेट इतिभा
षा ॥ नैवेद्यादिपूजासामग्र्याम् ॥ उ
पह्रियते । हृञ् । घञ् ॥

उपहारपाणिः । त्रि । उपायनहस्ते ।
-ने॥ उपहारः पाणौयस्य॥ ब । कि
उपहालकः । पुं । कुन्तलाख्यदेशे ॥
उपहासः । पुं । परीहासे । निन्दार्थवा
क्यादौ । हांसी ठट्ठा इति भाषा ॥
उपहासाय किं न स्यादसत्तद्गो न
नीषिणाम् ॥
उपहितः । त्रि॥ आहिते॥ उपधीयते
स्म॥ डुधाञ्-क्तः । दधातेर्हिरिति-
प्रकृतेर्हिरादेशः ॥
उपहृतः । त्रि । समर्पिते ॥
उपह्वरः । पुं । रथे॥ न । एकान्ते । र
हसि ॥ निकटे ॥ उपह्वरे गन्तव्येस
मीपदेशेऽतिवेदभाष्यम् ॥ उपह्वर
त्यच । ह्वृ कौटिल्ये । पुंसीतिघः ॥
उपांशु । अ । विजने । रहसि ॥ अप्र-
काशोच्चारणे ॥
उपांशुः । पुं । जपविशेषे ॥ यत्समीप
स्थोपिपरोनशृणोति तदुपांशुरित्यु
च्यते । यत्तदोरुच्चारणमर्थः । जिह्वौ
ष्ठौचालयेत् किञ्चिद्देवतागतमान-
सः । निजश्रवणयोग्यः स्यादुपांशुः
सजपः स्मृतः ॥ विधियज्ञाज्जपयज्ञो
विशिष्टोदशभिर्गुणैः । उपांशुः स्या-
च्छतगुणः ॥ उपगताः अंशवोयत्र ॥
उपाकरणम् । न । श्रुतेः संस्कारपूर्वग्र
हणेन॥ स्कार उपनयनं पूर्वंयत्र तत्

तच्चतद्ग्रहणञ्च । संस्कारपूर्वंग्रहणंश्रु
॥ दुपाकरणंश्रुतेरित्यमरः ॥ श्रावण्या
दिविधातव्ये संस्कारविशेषे ॥ प्रारम्भे
॥ संस्कारपूर्वंपशूनां हनने ॥ उपा
क्रियतेऽनेन ततः । कृञो ल्युट् ॥
उपाकर्म्म । न । उपाकरणे ॥
उपाकृतः । पुं । अश्वरेअभिमन्त्यहते-
पशौ ॥ उपद्रवे ॥ त्रि । उपद्रुते ॥
प्रारब्धे ॥ उपाक्रियतेस्म । कृञ् हिं-
सायाम् । क्तः॥
उपाख्य । त्रि । प्रत्यक्षेतरउपलब्धे । प्र
त्यक्षे॥ उप आख्यायते । ख्या आ
तश्चोपसर्गेदृश्येड्॥
उपाख्यानम् । न । आख्याने । पुराणा
दिग्रथितवार्त्तायाम् । वर्णने ॥ उपा
ङ्पूर्वात्ख्यातेर्ल्युट् ॥ विशेषकथने ॥
उपागमः । पुं । समीपगमने ॥ स्वीकार
रे ॥ उपागमनम् । गम्लृ । ग्रहवृदृनि
श्चिगमश्चादिना अप् ॥
उपाङ्गः । पुं । तिलके । तमालपत्रके ।
पत्रलेखायाम् ॥
उपाजे । अ । दुर्बलस्यसामर्थ्यायाने ॥ स
समीप्रतिरूपकोयं निपातः ॥
उपाजेकृत्य । अ । दुर्बलस्यबलमाधा
येत्यर्थे॥ उपाजेऽन्याजे इतिगतिसं
ज्ञा । कृगतीतिसमासः ॥
उपाजेकृत्वा । अ । उपाजेशब्दार्थे ॥

उपादे

उपाञ्जनम् । न । उपलेपने ॥
उपात्तः । पुं । निर्मदहस्तिनि । वि । गृ
हीते । स्वीकृते ॥ प्राप्ते ॥ चयंकेऽपि
दुपात्तस्यदुरितस्यप्रचक्षते ॥
उपात्त्ययः । पुं । शास्त्रतो लोकव्यवहा
रेऽपि अतिक्रमे ॥ अतिक्रमे । क्रमो
ल्लङ्घने ॥ उपात्ययनम् । इण् । ए
रच् । उपगतस्या तिक्रम्यायनं वा ॥
उपादानम् । न । स्वस्वविषयेभ्य इन्द्रि-
याणां विकर्षणे । प्रत्याहारे ॥ हेतौ ॥
ग्रहणे ॥ अननुष्ठितस्यानुष्ठाने ॥ सम
वायिकारणे ॥ प्रवृत्तिजनकज्ञाने ॥
उत्पादके । उत्पत्तिस्थितिनाशाय-
कारणे ॥ उपादानोल्युट् ॥ आरम्भे ॥
उपादानाख्या । स्त्री । तुष्टेः प्रभेदे ॥
योगेनप्रकृत्यापि विवेकख्यातिः नसा
प्रकृतिमात्राङ्गवति भास्मभूत् सर्वस्य
सर्वदातन्मात्रस्यसर्वान्प्रत्यविशेषात्
। प्रव्रज्यायास्तुसा भवति तस्मात् प्रव्र
व्यामाददीथाः कृतं ते ध्यानाभ्यासे
नेत्यायुक्तिरुपदेशे वा आध्यात्मि
कातुष्टिः सा उपादानाख्या नामवि
ख्याता या संक्षिप्तमुच्यते ॥ उपादानमि
त्याख्यायस्याः ॥
उपादिकः । पुं । कीटविशेषे । वराट्याम् ।
देहिकायाम् ॥
उपादेयः । वि । उत्कृष्टे । उत्तमे । ग्रा

उपाध्या

ह्ये ॥
उपाधिः । पुं । धर्मचिन्तायाम् ॥ कुटुम्ब
व्यापृतेः ॥ छले ॥ विशेषणे ॥ यथा ।
धर्मादेर्वश्च विप्रस्य वर्म्मोक्तातांच भू
भुजः । भूतिदत्तश्चवैश्यस्यदासः शूद्र
स्यकारवेदिति ॥ यःस्वधर्मंमन्यनि
ष्टतया भासयतिसः । उपाधेः प्रतिवि
म्बपक्षपातित्वं नबिम्बपक्षपातित्वम्
। लक्षणन्तु । यावत्कार्यमवस्थायिभे
दहेतोरुपाधितेति ॥ अथयावद्व्य-
वहृतौ ॥ साध्यव्यापकत्वे सतिहेतो
रव्यापके ॥ यथा । धूमवान् वह्निरि
त्यत्र आर्द्रकाष्ठमुपाधिः । यत्र धूमस्त
त्रार्द्रेन्धनसंयोगइति साध्यव्यापक-
ता । यत्रयत्रार्द्रेन्धन संयोगइ-
तिनास्ति अयोगोलकेआर्द्रेन्धनाभा
वात् । अस्यप्रयोजनम् । व्यभिचार
स्यानुमानम् ॥ समीपआधेः । उपप
न्नआधिर्वा । आधानमाधिः । उपस
र्गघोः किः । उपगत आधिम् । अ-
च्यादय इति समासः । उपधीयतेऽने
नेतिवा ॥
उपाध्यायः । पुं । अध्यापके ॥ वेदैकदे
शाध्यापके ॥ यथाह मनुः । एकदेश
न्तुवेदस्यवेदाङ्गान्यपिवापुनः । यो
ध्यापयतिवृत्त्यर्थमुपाध्यायःसउच्यते
इति ॥ उपेत्यास्मादधीयतेइतिवि-

उपान

ग्रहः । इडन्यचेति घञ् ॥
उपाध्याया । स्त्री । उपाध्याय्याम् । स्व-
र्यंविद्योपदेशिन्याम् ॥ उपेत्यावीय-
तेऽस्याः । इडन्यचेतिसूत्रे अपादाने
स्त्रियामुपसङ्ख्यानं तदन्ताच्चवाङी-
षितिघञ् । टाप् ॥
उपाध्यायानी । स्त्री । उपाध्यायपत्न्या
म् ॥ उपाध्यायस्य स्त्री । मातुलोपा-
ध्याययोरानुग्वा ।
उपाध्यायी । स्त्री । उपाध्यायायाम् ॥
स्वर्यंविद्योपदेशिन्याम् ॥ उपेत्यअ-
स्मादधीयतेऽस्मिन्निति विग्रहे यातुस्वयमे
वाध्यापिकातेऽवाङीषुवाच्यइति इ-
डन्यचेतिसूत्रस्यवार्त्तिकात् घञ्चचे
ङीष् ॥ उपाध्यायान्यौ ॥ उपाध्या
यस्यस्त्री । मातुलोपाध्याययोरानुग्
वेत्यानुगभावः ॥
उपानत् । स्त्री । पन्नध्याम् । पादुकाया
म् । चर्मादिनिर्मितेपादकोषे ॥ अ-
स्याधारणविधिर्यथा । वर्षातपादिके
छत्री दण्डी रात्र्यटवीषुच । शरीर
त्राणकामोवै सोपानत्कःसदाव्रजेदि
ति ॥ गुणायथा । पादुप्रधारणं वृष्य
मोजस्यं चक्षुषोर्हितम् । सुखप्रदा
रमायुष्यं वल्यंपादरुजापहमिति ॥
पादे उपनह्यते बध्यते । पादम् उप
नह्यतिवा । णह्बन्धने । सम्पदादि

उपाय

क्त्वात् क्विप्चेतिवाक्विप् । नहिवृति
दधोतिपूर्वपदस्यदीर्घः ॥
उपान्तिः । त्रि । निकटे ॥ प्रान्ते ॥
उपान्त्यम् ॥ त्रि । अन्त्यसमीपे ॥ उत्तर
भाद्रपदायाम् ॥
उपायः । पुं । राजादीनामरिवशीकर
णहेतौ । सामादिचतुष्टये । भेदोद-
ण्डःसामदानमित्युपायचतुष्टयमि-
त्युक्ते ॥ क्वचित् सप्तोपाया अप्युक्ताः
। यथा । सामदानञ्चभेदश्चदण्डश्चे
तिचतुष्टयम् । मायोपेक्षेन्द्रजाल-
ञ्चसप्तोपायाः प्रकीर्त्तिताइति । शृ
ङ्गारेतुपुराविद्भिरुपायौद्वौ प्रकीर्त्ति
तौ ॥ यथा । उपायौद्वौप्रयोक्तव्यौ
कान्तासु सुविचक्षणैः । सामदानावि
तिप्राहुः शृङ्गाररसकोविदाः ॥ भेदे
प्रयुज्यमानेहि रसाभासस्तुजायते ।
निग्रहेरसभङ्गःस्यात्तस्मात्तौदूषि-
तौबुधैः ॥ भेदेकपटस्यावश्यंजायमा
नत्वात् कपटंविनाभेदासम्भवात् स-
तितस्मिन्कपटे रसाभास एव ॥ उ
पगतौ ॥ स्वार्थसम्पादके । साधने ।
पुरुषकारे ॥ उपायतेऽनेन ॥ अय०
। कृञश्चेति घञ् ॥
उपायज्ञः । त्रि । कार्यसाधनकुशले ॥
उपायनम् । न । तोषकारिणि । उपेक्षा
रे ॥ व्रतादिप्रतिष्ठायाम् ॥ उपगमने

उपास

॥ उपेयते उपाय्यतेवा । इण्गतौ अ
यगतौवा । कर्मणि ल्युट् ॥
उपारतः । त्रि । सन्निवृत्ते ॥
उपार्ज्जनम् । न । उद्योगादिना उर्थस
ङ्ग्रहे । अर्ज्जने ॥ स्वत्वहेतुभूतव्यापा
रे स्मृतिः ॥
उपार्ज्जित. । त्रि । कृतोपार्ज्जने ॥
उपार्ज्जयः । त्रि । अधिक्षिप्ते ॥
उपालम्भः । पुं । दुर्वचने । दुर्वाक्ये ॥
सिसचगुणाधिक्करणेन स्तुतिपूर्वकः । य
था । महाकुलस्य भवत किमिदमु
चितमिति । निन्दापूर्वकस्य । यथा
। धिग्धन्यकीर्सुतस्य भवत स्तदिदमुचित
मिति ॥ परपक्षदूषणे ॥ उपालभ्य
ते । लभ° । घञ् । उपसर्गात् खल्
घञोरितिनुम् ॥
उपावृत्त. । त्रि । शमशानीयर्थं मुहुर्भू
मौ लुठिताङ्गे । लुठिते ॥ पुनरागते
॥ निवृत्ते ॥ उपावृत्तस्य पापेभ्य. पा
पेभ्यो निवृत्तस्येत्ययात् ॥ उपावर्त्त
तेस्म । वृतु° । क्त ॥
उपाश्रय. । पुं । स्थाने ॥ उपाश्रयस्थ
म । श्रिञ° । घञ् ॥
उपाश्रित. । त्रि । एकान्तप्रेमभक्त्या श
रणागते ॥ उपाश्रयति उपाश्रीयतेस्म
वा । श्रिञ° । गत्यर्थेतिकर्मणिक्तः ॥
उपासकः । पुं । स्त्री । भृत्ये । सेवके ॥

उपास

त्रि । उपासनाकर्त्तरि ॥ शाक्तः सौरो
वैष्णवश्च सैरोगाणपतस्तथा । दि
व्यवीरःपशुश्चैव तेषु भावा क्रमेणा
मताः ॥ सात्त्विकादिविभेदेनपुनश्चै
ते त्रिभेदिताः ॥ उपासते । उप आ
सं० ण्वुल् ॥
उपासङ्गः । पुं । तूणीरे । उपासज्यन्ते
शरा अत्र । घञ्सञ्ज्ञे । हस्वश्चेति-
ह्रस्वः ॥
उपासनम् । न । शरीराभ्यासे ॥ उप आसु उ
पवेशने । भावे ल्युट् ॥ उपास्तौ ॥ आस
नेन ॥ सगुणब्रह्मविषयकमानसव्या-
पाररूपे श्राद्धिकर्त्तव्यविद्यादौ ॥ शुश्रू
षानमस्कारादिप्रयोगेण सेवने ॥
भावनायाम् ॥ लौकिकात्माभिमान
वत्. यावत्तत्तद्देवतादिस्वरूपात्मा-
भिमानाभिव्यक्तिस्तावल्लौकिकप्रत्य
क्षव्यवधानेन स्वेष्टदेवतादिरूपं म
नसोपगम्य आसनंचिन्तनमित्यर्थः ॥
नकैवल्यमुपासनात् ॥ आसउपवेश
ने । भावेल्युट् ॥
उपासना । स्त्री । परिचर्य्यायाम् । शु-
श्रूषायाम् । परिचर्य्यायाम् ॥ देवा
राधने । देवताचिन्तने ॥ अथोक्तं
श्रीदेवीभागवते । न विष्णूपासना
नित्या वेदेनोक्तातुकुत्रचित् । नवि-
ष्णुर्दीक्षानित्यास्तिशिवस्यापितथैव

उपाह-

च॥ गायत्र्युपासनानिष्ठासर्ववेदैः समीरिता। यथाविना क्षयः याती-ब्राह्मणस्यास्तिसर्वथा॥ तावता कृत कृत्यत्वं नान्यापेक्षादिजस्यहि। गा यत्रीमात्रनिष्णातो द्विजो मोक्षम-वाप्नुयात्॥ कुर्यादन्यत्रवा कुर्यादि तिमाहमनुःस्वयम्। विहायतान्तुगा यत्रीविष्णूपास्तिपरायणः॥ शिवो-पास्तिरतोविप्रोनरकंयातिसर्वथा। तस्मादाद्ययुगेराजन् गायत्रीजपते त्परः॥ देवीपादाम्बुजरता आसन् सर्वेद्विजोत्तमाः॥ इति॥ उपासना प्रयोजनं चित्तैकाग्र्यम् सूक्ष्मार्था वधारणसमर्थत्वम्। सत्यलोकप्राप्ति रुपासनाया अवान्तरफलम्॥ उपास नम्। आस॰ ल्युट्। टाप्॥ उपासितः। त्रि। वरिवसिते। सेविते। कृतोपासने॥ उपास्यते स्म। आस॰ क्त। गत्यर्थेति क्तः॥

उपासीनः। त्रि। समीपस्थे॥ उपसमी पे आसीनः॥ कृतोपासने॥

उपास्तिः। स्त्री। सेवायाम्। तात्पर्ये-णानुष्ठाने॥ उप आस॰ क्तिन्॥

उपास्यः। त्रि। आराध्ये॥ ध्येये॥ उपा सितुं योग्यः। ण्यत्॥ उपास्यं यत्तत ब्रह्मतत्त्वमित्येषडिण्डिमः॥

उपाहतम्। त्रि। ताडिते॥ उपाहन्य

उपेन्द्रः

ते स्म। हन॰ क्तः॥

उपाहितः। पुं। अग्नेरुत्पाते। उल्का पातादौ। अग्न्युत्पाते॥ उपआस न्नमाहितंफलंयस्य॥ त्रि। आरोपि ते॥ संयोजिते॥ उपाधीयतेस्म। द धातेर्हिः। क्तः॥

उपाह्वयः। पुं। उपनामनि॥

उपेक्षकः। त्रि। द्वयोर्विवदमानयोर्जय पराजयासंसर्गिणि। तत्कृतहर्षविषा दाभ्यामसंस्पृष्टे। उदासीने॥ प्रती काररहिते॥

उपेक्षणम्। न। त्यजने। वर्जने॥

उपेक्षा। स्त्री। क्षुद्रोपायभेदे। त्यागे॥ अयत्नयुद्धविषये॥ औदासीन्ये। अ नपेक्षणे॥ यथा। अपुण्यवस्तुवोदा सीन्यमेवभावये त्रानुमोदनंनषाद्ये यम्॥ उपेक्षणम्। ईक्ष॰ ल्युट्। टाप्॥

उपेक्षिता। त्रि। उपेक्षायाः कर्त्तरि॥

उपेक्ष्यः। त्रि। उपेक्षायुद्धविषये। य चेषाद्वेषयो रभावस्तस्मिन्॥

उपेतः। त्रि। युक्ते॥ अनुगते।

उपेता। पुं। उपायेनोपेयस्य साधके-आत्मनि॥

उपेन्द्रः। पुं। केशवे। विष्णौ॥ इन्द्रम् पगतोऽनुजत्वात्। कुगतीतिसमा सः॥ इन्द्रलोकादप्युपरिलोकेवर्त्त

उपोद

मानत्वाद्वा । मनोपरियथेन्द्रस्तंस्था पितोगोभिरीश्वरः । उपेन्द्रइतिकृष्णत्वां गास्यन्ति दिविदेवताः । इति हरिवंशः ॥ न । इन्द्रसन्निधौ ॥ अव गर्हे ॥

उपेन्द्रवज्रा । स्त्री । त्रिष्टुभेदे । एकाद शाक्षरावृत्तिविशेषे ॥ यथा । यदीन्द्रवज्रा चरणादयर्णा नरेन्द्रसर्वेलघवो भवन्ति । उपेन्द्रतुल्यामखशीलशालिनुपेन्द्रवज्राभिहितातदानीम् ॥ यथा । उपेन्द्रवज्रादिमणिच्छटाभिर्विभूषणानां च्छुरितंवपुस्ते । स्मरामिगोपीभिरुपास्यमानं सुरद्रुमूलेमणिमण्डपस्थमिति ॥

उपेयः । त्रि । उपायसाध्ये । प्राप्तव्ये ॥

उपेयिवान् । त्रि । उपगते ॥ उपेयिवाननाश्वाननूचानश्चेतिक्वसुप्रत्ययान्तोनिपातः ॥

उपेयुषी । स्त्री । सङ्गतायाम् ॥ क्वसुप्रत्ययान्ता दुगितश्चेति ङीप् ॥

उपोढः । पुं । वक्षविन्यासे । व्यूढे ॥ त्रि । निकटे ॥ ऊढे । विवाहिते ॥ वहेः कर्त्तरिक्तः ॥

उपोती । स्त्री । पूतिकायाम् । पोर्ईशाक ॥

उपोत्तमम् । न । अन्त्यस्य समीपे ॥

उपोदकी । स्त्री । पूतिकायाम् ॥

उपोष

उपोदिका । स्त्री । पीतवर्णाम् । मेराइन्याम् । पोई इतिप्रसिद्धे पत्रशाके ॥ यथा । एकाहं षड्रसोपेता किमन्ये व्यंजनान्तरैः । तरुणैरानतव्या वै दंसस्येषा उपोदिका ॥ षटपदवच्छुभपत्रिका परितप्ततैलसुपाचिता । नवहिङ्गुवासंसुवासिता परिभोक्तृचित्तविकासिका ॥ सुतप्ततैलविपाचिता सुघनाम्लतक्रविपाचिता । सुपेशिकाव्यविभर्जिता भोक्तुराशुरसनाग्रनर्त्तकी ॥ पोदिकाशीतलावल्याश्लेष्मलावातपित्तहा । पथ्याचदोषशमनी निद्रापुष्टिकरीमतेति ॥ उपाधिके मुदकमस्याम् । उत्तरपदस्यचेत्युदकस्योदादेशः । कप् । टाप् ॥

उपोदीका । स्त्री । पीतवर्णाम् ॥

उपोद्घातः । पुं । उदाहारे । प्रकृतोपपादके । प्रकृत्यर्थंवर्णयितुमर्थान्तरवर्णने । प्रस्तोप्यमाणोपपादके । प्रतिपाद्यमर्थं वृद्धैःसङ्गृह्य तदर्थमर्थान्तरवर्णने । युक्त्यासार्थनिदर्शने ॥ चिन्तांप्रकृतसिद्ध्यर्थामुपोद्घातंविदुर्बुधाः ॥ उपसमीपे उद्हननं क्षापनम् । घञ् ॥ निर्दिष्टोपपादकत्वमुपोद्घात इतिजगदीशतर्कालङ्कारः ॥

उपोषणम् । न । उपवासे । अभोजने

उभय :

॥ उषदाहे । क्युट् ॥

उपोषितम् । न । उपवासे ॥ उपवसन म् । वसंनिवासे । भावे गत्यर्थेति क्तः । वसतिक्षुधोरितीट् । ग्रासिव सीति षः ॥ वि । कृतोपवासे ॥

उप्तः । वि । कृतवपने । वोया । इति भाषा ॥ अवकीर्णं । वखेरा । इति भाषा ॥ उप्यते । टुवप० । क्तः ॥ मुण्डिते ॥

उप्तकृष्टम् । वि । सबीजकृष्टक्षेत्रे । बीजवपनानन्तरं कर्षितक्षेत्रे । बीजाकृते ॥ उप्तञ्चतत् कृष्टञ्च । पूर्वकालेति समासः ॥

उप्ति । स्त्री । वपने ॥ टुवप् । क्तिन् ॥

उभौ । वि । द्वयो ॥ द्वित्वविशिष्टस्य वाचकोनित्यद्विवचनान्तोयंशब्दः ॥

उभय । वि । द्विवचनोच्चारितद्वयोः । युगले । दो इतिभाषा ॥ उभौ अवयवौ अस्या तयप् । उभादुदात्तोनित्य मितितयपोऽयजादेशः । कथमुभये देवमनुष्यादृतियतोबहूनामुभावयवौ नघटतः । नैषदोषः । अवयविदौ राशीसमुदायस्यावयवौ । एकोदेवानाम् अपरोमनुष्याणामिति ॥ उभादुदात्तोनित्यमितिनित्यग्रहणस्येदमप्रयोजनम् वृत्तिविषये उभशब्दप्रयोगोमाभूत उभयशब्दस्यैव यथा

उभागु

स्यादिति ॥

उभयतः । अ । पार्श्वद्वये ॥ सर्वतः ॥

उभयस्मात् । तसिल् ॥

उभयथा । अ । उभयप्रकारे ॥ उभयैः प्रकारैः । प्रकारवचनेथाल् ॥

उभयद्युः । अ । उभयदिने । उभयोरह्नोः ॥ द्युप्रागपरादिति व्यृतिसाधुः ॥

उभयेद्युः । अ । दिनद्वये । उभयोरह्नोः ॥ सद्यःपरुत्परार्यैषमःपरेद्यवद्यवःपरसुश्वःपरारेत्यभयादेद्युस् निपातितः ॥

उम् । अ । रोषे ॥ अङ्गीकृतौ ॥ प्रश्ने ॥ अवनम् । उङ्शब्दे । डुम्प्रत्ययः ॥

उमा । स्त्री । कात्यायन्याम् । दुर्गायाम् ॥ श्रीर्मङ्गल्यश्च माल्लक्ष्मीः ॥ उमेति मात्रातपसेनिषिद्धत्वाद्वा । आकारान्तादपिटाप् । टायामिति भाष्यप्रयोगात् । अजादित्वाद्वा ॥ उंशिवं माति । मामाने मिमीतेवा । मा ङ्मा ने शब्देच । आतोनुपसर्गेतिकः । अजादित्वाट्टाप् ॥ अवति ऊयते वा । उङ्शब्दे । विभाषातिलमाषोमेतिनिपातनान् मक् ॥ अतसस्याम् ॥ हरिद्रायाम् ॥ कीर्त्तौ ॥ कान्त्याम् ॥ शान्तौ ॥

उमाकटम् । न । हरिद्रादिरजसि ॥ उमायारजः । अलाबूतिलेतिकटच् ॥

उमागुरुः । पुं । हिमालयाचले ॥

उरगः

उमाचतुर्थी । स्त्री । ज्येष्ठशुक्लचतुर्थ्यां म् ॥ यथोक्तं ब्रह्मपुराणे । ज्येष्ठशुक्लचतुर्थ्यान्तु जाता पूर्वमुमासती । तस्मात्सातपसम्पूज्या स्त्रीभिः सौभाग्यवृद्धये इति ॥

उमाधवः । पुं । सदाशिवे ॥ उमायाः धवः ॥

उमापतिः । पुं । शिवे ॥ उमायाःपतिः

उमावनम् । न । वाराणस्याम् । योगिनीपुरे । देवी कोटे ।

उमासुतः । पुं । } कार्त्तिकेये ॥ षष्ठी
उमासूनुः । पुं । } समासः ॥

उमेशः । पुं । } महादेवे । ईश्वरे ॥
उमेश्वरः । पुं । } षष्ठीसमासः ॥

उम्बरः । पुं । द्वारोदुंबरकाष्ठे ॥ देहल्याम् ॥

उम्बी । स्त्री । उम्बीतिलोकप्रसिद्धे धान्ये ॥ मञ्जरीच्छद्मपक्वा वा यवगोधूमयोर्भवेत् । तृणानलेनसम्भृष्टा बुधैरुम्बीतिसास्मृता ॥ उम्बीकफप्रदा वल्यालघ्वीपित्तानिलापहा ॥

उमम् । न । उमाचेधे । औमीने ॥ उमानां भवनंचेदम् । विभाषातिसमाघोमेतियत् ॥

उरःसूचिका । स्त्री । मुक्ताकृतहारविशेषे ॥ उरसः सूचमिव । इवेप्रतिकृताविति कन् ॥

उरगः । पुं । वासुकिप्रभृतौ सर्पे ॥

उररी

उरसागच्छति । उरसोलोपश्चेति डप्रत्ययः सकारलोपश्च ॥ सीसके ॥ खले ।

उरगस्थानम् । न । पातालें ॥

उरगाशनः । पुं । गरुडे ॥ उरगानश्नाति । अश° । ल्युः ॥ उरगाशनमस्येतिवा ॥

उरणः । पुं । मेषे ॥ ऋच्छति अर्यते वा । ऋगतौ । अर्तेः क्युरच्चेति क्युरादेशः ॥

उरणाचः । पुं । पद्माटौषधौ । दद्रुघ्ने ॥ उरणस्य मेषस्याचिरुवाचि यस्य तत्तुल्यपुष्पत्वात् । अक्ष्णोदर्शनादिच्यच् ॥

उरणाख्यः । पुं । पद्माटे । चक्रमर्दके । पर्वण्ड इतिभाषा ॥ उरणस्यमेषस्याख्या आख्याऽस्य ॥

उरभ्रः । पुं । स्त्री । मेषे ॥ उरुभ्रमति । भ्रमुचलने । अन्येभ्योऽपीतिडः । पृ° ॥ यद्वा । उनाभ्रम्युनारभ्यते । रभराभस्ये । बाहुलकाद्रक् ॥

उररी । अ । अङ्गीकृतौ ॥ विस्तारे ॥ वयतेर्वाबहुलकात् ररीक् । सम्प्रसारणञ्च ॥

उररीकारः । पुं । अङ्गीकारे ॥

उररीकृतम् । वि । अङ्गीकृते । स्वीकृते ॥ विस्तृते ॥ उररीक्रियतेस्म । क्तः ॥

उरस्या

उरश्छदः । पुं । कवचे ॥ उरश्छाद्यतेऽनेन । छद्अपवारणे । पुंसीतिघः । छादेर्घइतिह्रस्वः ॥

उरः । न । वक्षःस्थले । वक्षसि ॥ श्रेष्ठे ॥ इयर्त्ति । ऋगतौ । अर्त्तेरच्चेत्यसुन् । उरादिश्चकिश्च ॥

उरसिजः । पुं । स्तीस्तने ॥ उरसिजायते । जनी° । सप्तम्यामितिडः । ह खदन्तादिच्यसुक् ॥

उरसिलः । त्रि । प्रशस्तवक्षोयुक्ते । उरस्वति ॥ प्रशस्त मतिशयितंवा उरो वलंयस्य । पिच्छादिच्वादिलच् । उरसावलं लभ्यते इतिस्वामी ॥

उरस्कटः । पुं । वाहानामुत्तरीयविशेषे । वाहयज्ञोपवीतके । पञ्चवटे । वुक्वाछाड इतिगौडभाषाप्रसिद्धे । गातीइतिभाषा ॥

उरस्तम् । न । उरस्त्रे ॥

उरस्त्राणम् । न । नागोदरे । वक्षस्त्राणकवचे ॥

उरस्यः । त्रि । औरस्येपुत्रे । स्वजाते ॥ उरसानिर्मितः पुत्रः । उरसोऽण्चेतियत् ॥ उरसा एकदिक्षा । उरसो यश्चेतियत् ॥ घात्तसिः । उरस्तः ॥ उरसश्चा । गाग्वादिभ्योयः ॥

उरस्यान् । त्रि । उरसिले ॥ प्रशस्तमतिशयितंवा उरोयस्य विभाषत्वात्

उरोजः

। मतुप् । मादुपधाया इतिदः ॥

उरी । अ । अङ्गीकारे ॥ विस्तारे ॥ वयतेरीक् । सम्प्रसारणञ्च बाहुलकात् ॥

उरीकारः । पुं । स्वीकारे ॥ विस्तारे ॥

उरीकृतः । त्रि । स्वीकृते ॥ विस्तृते ॥ उरीक्रियतेस्म । क्तः ॥

उरुः । त्रि । विशाले । विपुले । महति । बडे ॥ ऊर्णोति । ऊर्णोनु° । महतिह्रस्वश्चेत्युकुप्रत्ययो नुलोपोह्रस्वश्च ॥

उरुकालः । पुं । } महाकालखलतायाम्
उरुकालकः । पुं । }

उरुक्रमः । त्रि । भगवति ॥ उरुमहान् क्रमः शक्तिर्यस्य ॥

उरुगायः । पुं । श्रीकृष्णे ॥ बहुकीर्त्तिमति ॥

उरुचक्षाः । त्रि । विस्तीर्णतेजसि ॥

उरुमानः । पुं । पूजायाम् ॥

उरुरी । अ । अङ्गीकारे ॥ विस्तारे ॥

उरुवुकः । पुं । रक्तैरण्डे ॥

उरुवूकः । पुं । एरण्डे ॥ रक्तैरण्डे ॥ उरुंमहान्तंवायति । ओवैंशोषणे । उल्मूकादयश्चेत्यूकः ॥ कायेऽस्यमूलं ग्राह्यम् ॥

उरुव्यचाः । पुं । राघवे ॥

उरोजः । पुं । स्तने ॥

उर्वीह

उर्जितः । त्रि । अवद्धितेजाः । (अतिशयेन ऊर्जितः) उर्द्दः । पुं । उर्द्दे । अस्फुटिताक्षे ॥ उर्वटः । पुं । वर्त्तरे ॥ इतिचिकाण्डशेषः ॥

उर्वरा । स्त्री ॥ सर्वशस्याढ्यभूमौ । भूमिमात्रे ॥ ऋच्छति । ऋगतौ । पचाद्यच् । यद्वा ईर्यते । ईदेरप् । उरुणा मरुता ॥ यद्वा उर्व्यते । उर्वीहिंसायाम् । खनेर्घञ्चेति वः । उपधा ॥ सांक्षेतिदीर्घः । सुसंज्ञापूर्वकत्वान्न । उर्वरान्ति । कः ॥ यद्वा । सम्पदादित्वात् क्विप् । राल्लोपः ॥ उरुणा सौवरात्च । ऊर्णुवरा वा ॥

उर्वरितः । त्रि । परिशिष्टे । अवशिष्टे । उवरा इतिभाषा ॥ क्षेपिते ॥

उर्वशी । स्त्री । स्वर्गवेश्यायाम् ॥ उरून् महतोऽश्नुते व्याप्नोति वशीकरोतीति यावत् । मू० कः । उरु अश्नातीति वा ॥

उर्वशीरमणः । पुं । चन्द्रवंशीयनृपतिविशेषे । पुरूरवसि । ऐले ॥

उर्वशीवल्लभः । पुं । पुरूरवसि । बौधे ॥

उर्वारुः । पुं । कर्कट्याम् ॥ स्वादुकर्कट्याम् ॥

उर्वारुकः । पुं । कर्कटिकाख्येचिर्भिटिकाख्येवा । फलविशेषे ॥

उर्वी । स्त्री । भूमौ ॥ ऊर्णोति । ऊर्णुञ्

उलूख

महतिह्रस्वश्चेतिकुत्वे ओह्रस्वश्च । ऊदोतोर्गुणवचनादिति ङीप् ॥

उलपः । पुं । न । गुल्मिन्याम् । शर्खिा मत्रप्रचयवर्च्यां लतायाम् । वीरुधि ॥ पुं । क्लीबे । तृणविशेषे । वल्लजे ॥ पु । उलुखड इतिगौडभाषा । वल्लतिः । वर्त्तसंवरणे । विटपविष्टपविशिखोलखया इतिवलेः सम्प्रसारणं कम श्च ॥ उल्यते । उल वरणे । आवरणार्थादिहार्थाद्वा । कपश्चाकृवर्मणश्चेतिकमो वा

उलिन्दः । पुं । देशविशेषे ॥ इत्युणादिकोषः ॥

उलूकः । पुं । पेचके । घूके । द्विवान्ध्रे । कौशिके । उल्लू इति भाषा ॥ इन्द्रे ॥ अङ्गनिपुत्रे । भारतयोधिनि ॥ न । तृणविशेषे ॥ उचतिं, उचसमवाये । उलूकाद्दय इतिसाधुः ॥ यद्वा । वलते । वल० । उलूकादित्वात् । वलेः सम्प्रसारणमूकश्च ॥

उलूकी । स्त्री । ताम्रायाः सुता शुकीतस्याः कन्यायाम् ॥ शुकी शुकान् जनयत् उलूकीप्रत्युलूकानिति विष्णुपुराणे १ अंशे २१ अध्यायः ॥

उलूखलम् । न । उदूखले ॥ गुग्गुलौ ॥ ऊर्द्ध्वमुलूपम् । पृषोदरादि ।

उलूबं क्लातिस्वीकारे । क्लातौ

उल्का

नुपेति कः ॥

उलूखलकम् । न । उलूखलार्थे ॥ स्वार्थे कः ॥

उलूतः । पुं । अजगरसर्पे ॥

उलूपी । पुं । शिशुके । ओंषु इतिप्रसिद्धे मत्स्यप्रभेदे ॥ चुलुम्पिनि । गौड़भाषायाम् उपल इतिप्रसिद्धे अतिचञ्चलेमत्स्यविशेषे ॥ शिशुमाराकृतौमत्स्यविशेषे ॥ उ विस्मयजनकंरूपमस्यास्ति । अतइनिः रलयोरैक्यम् । ओःशमोः रूपमस्यास्तीतिवा ॥

उलूपी । स्त्री । अर्जुनभार्यायाम् । कौरव्यनाम्नो नागस्य कन्यायाम् ॥

उलूलुः । पुं । उत्सवकालिके गौडादिदेशप्रसिद्धे स्त्रीभिःक्रियमाणे शब्दविशेषे ॥

उल्का । स्त्री । अग्निनिर्गतज्वालायाम् ॥ अनले ॥ तेजःपुञ्जे । रेखाकारेऽलरीचात् पतज्ज्योतिषि ॥ अस्याःरूपमदर्शनन्तु । दिविभुक्तशुभफलानां पततां रूपाणि यानि तान्युल्काः । धिष्ण्योल्काशनिविद्युत्तारा इतिपञ्चधाभिन्नाः ॥ अस्यालक्षणम् । उल्काशिरसिविज्ञाला निपतन्ती बहुतेजतनुपुच्छा । दीर्घाक्षभयति पुरुषंसेदावहयेमयन्त्यस्याः ॥ काश्यपोऽपि । दृष्टच्छिन्नाचलच्छाया रक्तनीलाग्नि

उल्लाघः

खोज्वला । पौरुषीयप्रमाणेन उल्का नानाविधास्मृता । इति ॥ ओषति । उषदाहे । अर्यतेवा । ऋगतौ । युकवल्कोल्का इति साधुः ॥

उल्कापातः । पुं । अग्निशिखावत्तेजःपाते ॥ उल्कायाःपातः ॥

उल्कामुखी । स्त्री । खिखो । लोमाशिकायाम् । दीप्तशिखायाम् । लोमडीइतिभाषा ॥ उल्कामुखेअस्याः ॥

उल्मुकम् । न । अङ्गारे । अलाते ॥ ओषति । उषः । उल्मुकंदर्वीतिनिपातनाद्वातेः षलुकः । मुकंप्रत्ययश्च ॥

उल्लङ्घनम् । न । अतिक्रमणे ॥ अन्यथाकरणे ॥ उत्पूर्वस्यल्युट् ॥

उल्लसः । त्रि । रोमञ्चे । बहुरोमयुक्ते ॥

उल्लसन् । त्रि । उत्प्लवमाने ॥

उल्लसितः । त्रि । आन्दोलिते । तरङ्गिते ॥ चलिते ॥

उल्लसन् । त्रि । शोभमाने ॥

उल्लसनकम् । न । रोमाञ्चे ॥

उल्लसितः । त्रि । उद्वृत्ते ॥ उद्गते ॥ त्रि चिक्षिते ॥

उल्लाघः । त्रि । शुचौ ॥ कृष्णे । मरिचे ॥ दक्षे ॥ गदान्निर्गते । नीरोगे ॥ उल्लाघतेस्म । लाघृसामर्थ्ये । गत्यर्थैतिकः । उल्लाघ्यतेस्म । अनुपसर्गा

उल्लेख

त् फुल्लचीवेतिवा सधिः ॥

उल्लापः । पुं । काकुवाचि । शोकरोगादिनाव्यक्तेविकारे ॥

उल्लापनम् । न । वर्त्तिकादिकृजुकरणे ॥

उल्लासः । पुं । ग्रन्थपरिच्छेदे ॥ प्रकाशे ॥ आह्लादे ॥ वृद्धौ ॥ उल्लसनम् । लसश्लेषणक्रीडनयोः । घञ् ॥ अलङ्कारविशेषे । एकस्यगुणदोषाभ्यामुल्लासोन्यस्यतौ यदि ॥

उल्लिखितः । त्रि । उत्कीर्णे ॥ तनूकृते ॥ उपरिलिखिते ॥ चित्रिते ॥

उल्लिङ्गितः । त्रि । भङ्गिभिरेवसम्यगवघातिते ॥

उल्लेखः । पुं । उद्धारणे । कथने ॥ अलङ्कारविशेषे । बहुभिर्बहुधोल्लेखादेकस्योल्लेखदर्शने । एकोनबहुधोल्लेखोप्यसौविषयभेदतः ॥ क्षीभिः कामेऽर्थिभिःस्वर्दुः कालः अघुभिरैक्षि सः । गुरुर्यत्रस्यर्जुनोऽयंकीर्त्तीभीषाः शरासने ॥ उल्लेखनम् । उत् लिख्यते घञ् ॥

उल्लेखनम् । न । घसने ॥ खनने ॥ उद्धारणे ॥ यथा । मासपक्षतिथीनाञ्चनिमित्तानाञ्चसर्वशः । उल्लेखनमकुर्वाणोनरकंप्रतिपद्यते ॥ लिख° । ल्युट् ॥

उल्लोचः । पुं । वितानेचन्द्रातपे । चंदोआ इतिभाषा ॥ ऊर्द्धं लोचति । लोचृमासने । अच् ॥ ऊर्द्धं लोच्यतेवा । लोचृदर्शने । घञ् ॥ क्तक्त्वन्तुनिष्ठायामनिट इतिवचनात् । अस्यतुतन्त्र सेट्त्वात् ॥

उल्लोलः । पुं । कल्लोले । महेर्मी । वडढेउ इतिगौडभाषा ॥ उत्लोडयति । लोडृउन्मादे । णिच् । घञ् । घञायच् । डलयोरेकत्वम् ॥

उल्वम् । न । जरायौ । गर्भवेष्टनेच मेदिनी ॥ कललेगर्भे ॥ उल्वीयते । लीङ्श्लेषणे । उलच्प्रत्ययेनसाधु । यद्वा । ओखति उल्यतेवा । उखृशोषोदाहे । वलच्प्रत्ययेनवलप्राणने । अथवा उव्यतिढच्यते समवैत्यवा । उचसमवाये । प्राग्वत् ॥

उल्वणः । त्रि । व्यक्ते । स्पष्टे ॥ उद्वणतिवशशब्दे । अचायच् । पृषोदरादिः ॥

उशन् । त्रि । कामयमाने ॥

उशत्तमः । त्रि । कमनीये ॥

उशना । पुं । भार्गवे । शुक्रे ॥ वष्टि । वशकान्तौ । वशेः कनसिः । अच्चादित्वात् सम्प्रसारणम् । ऋदुशनसित्यनङ् । उशना उशनसौ । अस्यसम्बुद्धौ वा अनङ्नलोपश्चवा । ते

उशना

उप०

नी० हेउशनन्, हेउशन, हेउशनः॥ उशिक्॥ पुं० अस्मीवीतिहोत्रे॥ इ० कितेः॥ त्रि० कमनीये॥ यथा॥ न यदचश्चित्रमदर्हरेयोजगत्यविन्द्रमगृणीत कर्हिचित्। तितृक्षायन्तीर्थमुशन्ति मानसा न यद्रङ्सा निरमन्त्युशिक्चयः॥ इतिश्रीभागवतम्॥ उशिष्टि उश्यतेवा॥ वंश०। उशः किदितिप्रत्ययः॥ हुनि० गौ० उशीः॥ स्त्री० वह्नौ विशेषे॥ उशीनरः॥ पुं० गान्धारराज्ये देशविशेषे। खन्धारइति प्रसिद्धे॥ चन्द्रवंशोद्भवस्यशिविनृपतेः पितरि॥ हि। उशीरः॥ पुं० नी० वीरणाङ्गे। नख इदोखसइतिप्रसिद्धे॥ उश्यतेऽनेनवा उशः किदितीरन्। अस्य गुणा यथा। उशीरं मोचनं शीतंसुगन्धं लघुतिक्तकम्। मधुरं व्रणरुङ्दाहमदनुत्कफपित्तहृत्॥ व्रणास्रविषवीसर्पदाहकृच्छ्रव्रणापहमिति॥ उशीरिक०। त्रि०। उशीरविक्रेतरि॥ उशीरेण मठः। किसरादिभ्यः उन्॥ उशेरी। स्त्री। क्षुपकाशे। नीरजे॥ उशीरेभ्यइमेवा पिवदाहच्छेदा नीरेत्॥ उशेय। पुं। कोनिनि॥ गुग्गुलौ॥ वा॰

उष०

विशेषे॥ न। यांशुलवणे॥ उषणम्। न। मरिचे॥ पिप्पलीमूले॥ ओषति। उषं। बाहुलात्कुन्। ल्युट्वा। संज्ञापूर्वकत्वात्गुणाभावः॥

उषणा। स्त्री। कणायाम्। पिप्पल्याम्॥ गुणाश्चास्याः॥ टाप्॥ त्रिकं॥

उषती। स्त्री। अकल्याणवत्यसि। निन्द्यार्थीयांवाचि॥ उषंशतरि आगमशासनस्यानित्यत्वात्नुमभावः॥ त्रि। अशुभयुक्तेवचसि॥ उपनिषद्वत्॥ उषः। पुं। सूर्य्ये॥ अमरः॥ ओषति। उषं०। उषिकुटिदलिकर्षिखनिभ्यः कित्॥ उ। ६। ६॥ उषर्बुधः। पुं। कृशानौ। पावके॥ र० क्षत्रियके॥ उषसि सन्ध्यायां बुध्यते प्रकाशते। बुधं०। इगुपधज्ञाकृः। क्विप्। कृहरादीनामित्यस्य व्यवस्थितविभाषात्वान्निष्पन्नः॥

उषट्। न। प्रत्यूषसि। अहर्मुखे॥ एतस्यस्वरूपन्तु पञ्चपञ्चउषः कालइति॥ पञ्चपञ्चाशत्घटिकात्मकउषःकालइत्यर्थः॥ आपत्यन्यकारम्। उषदाहे। उषःकिदित्यसिः॥ इदमादान्तुषः किदितिपाठः। वक्ति। ऊर्ध्वंगतहेति उषः। सर्पोभीति

उषा

सूचे । स्वसस्त्वतसोर्मासउषसश्च तद्भवतेऽतिवार्त्तिकस्य समुपङ्गिरित्युदाहरणं विवृण्वद्भिर्हरदत्तादिभिरयं पाठः पुरस्कृतः ॥ स्त्री । दिवो दुहितरि देवतायाम् ॥

उषसी । स्त्री । पिङ्गप्रस्वाम् । सायंसन्ध्यायाम् ॥

उषस्तिः । पुं । ऋषिविशेषे । चाक्रायणे ॥

उषस्यम् । न । ऋषिविशेषे ॥ त्रि । तद्देवताकऋच्यें ॥ उषस् शब्दोदिवोदुहितरं देवता माचष्टे । सा देवता अस्य विश्वृतुषिचुषसो यत् ।

उषा । अ । राज्ञी ॥ राज्यन्ते ॥ ओषति । उष० । का प्रत्ययः ॥ सातु न क्षत्रतेजः परिक्षानिमारभ्य भानोरर्द्धोदयं यावद्भवति । यथाह वराहः । अर्द्धास्तमयात् सन्ध्या व्यक्तीभूता न तारकायावत् । तेजः परिक्षानि रुषा भानोरर्द्धोदयं यावदिति ॥

उषा । स्त्री । बाणासुरसुतायाम् । अनिरुद्धस्य भार्य्यायाम् ॥ राज्ञी । घेनौ ॥ सायंसन्ध्यायाम् ॥ ओषति । उष० । इगुपधेति कः । टाप् ॥ यावानु हूर्त्तान्तरे ॥ यथा । प्रभ्रष्टद्युतितारकास्फुटतटी प्राचीभवे त्रिर्मुखा त्वो यद्गतविलोहितालघवलादेनैःसदा

उष्ट्रगो

वाञ्छिता । नो वारं न तिथिं न योगकरणं लग्नञ्च नापेक्ष्यते इत्वा दोषसहस्रसञ्चयमुषा नूनं करोत्युद्यतमिति ॥

उषाकालः । पुं । कुक्कुटे । ताम्रचूडे ॥ उषायां कलोऽस्य ॥

उषायतिः । पुं । अनिरुद्धे । कामात्मजे ॥ उषाया पतिः ॥

उषारमणः । पुं । अनिरुद्धे । कन्दर्पतनये ॥ उषायाः रमणः ॥

उषितः । त्रि । व्युषिते । पर्य्युषिते । वुसाद्यतिभाषा । प्लुष्टे । दग्धे ॥ स्थिते । कृतनिवासे ॥ त्वरिते ॥ उष्यतेस्म । उष० । क्त ॥ वसेर्गत्यर्थाकर्मकेतिकः । यजादि । अनुदात्तङ्वादिट् प्रतिषेधे प्राप्ते वसतिक्षुधेरितीट् ॥

उषेणः । पुं । अनिरुद्धे ॥

उष्ट्रः । पुं । करटकाश्वतरे । करभिपे । क्रमेलके । खम्बोष्ठे ॥ ओषति उष्यतेवा । उष० । उषिकुषिगार्त्तिकटिवटिगटिभ्यः कित् । तिष्ट्रन् । वाश्चरत्ये ॥ इतिभरतः ॥

उष्ट्रकाण्डी । स्त्री । रक्तपुष्प्याम् । कर्णपुष्प्याम् ॥ लंटाटीइतिगौडभाषा ॥

उष्ट्रगोयुगम् । न । उष्ट्रयोः ॥ द्वाभ्यां द्वित्वेगोयुगच् ॥

उष्ट्रगोष्ठम् । न । उष्ट्रशालायाम् ॥ उष्ट्रा

उष्णकः
गांस्थानम्। गोडच्॥
उष्ट्रधूसरपुच्छिका। स्त्री। विछाती विचिटीति गौडभाषाप्रसिद्धे वृक्षविशेषे॥
उष्ट्रपादिका। स्त्री। मदनमालीतिगौडभाषाप्रसिद्धे वृक्षविशेषे। भूमिमत्तायाम्॥
उष्ट्रशिरोधरम्। न। उष्ट्रग्रीवसंज्ञे भगन्दररोगविशेषे॥ तस्यलक्षणम्। प्रकोपणैः पित्तमतिप्रकोपितं करोतिरक्तांपिटकांगुदागताम्। तदाशुपाकाहिमपूतिवाहिनी भगन्दरन्तूष्ट्रशिरोधरं वदेतिनिदानम्॥
उष्ट्रिका। स्त्री। मद्भाण्डप्रभेदे। मृन्मयेमद्यभाण्डे॥ करभयोषिति। कंटिनीइतिभाषा॥ दुग्धिकावृक्षे॥
उष्ट्री। स्त्री। मद्भाण्डविशेषे॥ करभ्याम्। धाम्याम्॥ उष्ट्रस्त्रीत्वात्ङीष्॥
उष्णः। पुं। ग्रीष्मर्त्तौ। निदाघे॥ आतपे॥ पलाण्डौ॥ नरकान्तरे॥ त्रि। अशीते॥ ओषति। उष° दृक्षि॰जिदीङुष्यविभ्योनगितिनक्॥ निराशस्ये। चतुरे। दक्षे॥ उष्णस्यंशोग्रकारित्वमस्यास्ति। अर्शआद्यच्॥
उष्णकः। पुं। निदाघे॥ ज्वरे॥ त्रि। क्षिप्रकारिणि॥ आतुरे॥ उष्णमिव उष्णम्

उष्णिक्
। तंकारोति। शीतोष्णाभ्यांकारिणीतिकन्॥ उष्णं कार्यमस्य। कालप्रयोजनाद्रोगे इतिकन्॥ यावादिषु कृता षुष्णशीतइतिस्वार्थेकन्वा॥
उष्णगुः। पुं। सूर्य्ये॥ उष्णागावोऽस्य॥
उष्णनदी। स्त्री। वैतरिण्याम्॥
उष्णरश्मिः। पुं। सूर्य्ये॥ उष्णारश्मयोऽस्य॥
उष्णवातः। पुं। मूत्राघातविशेषे॥
उष्णवारणम्। न। आतपत्रे। छत्रे॥
उष्णवीर्य्यः। पुं। शिशुमारे॥ त्रि। वीर्य्योष्णवस्तुनि॥ उष्णं वीर्यमस्य॥
उष्णा। स्त्री। क्षयव्याधौ॥ सन्तापे॥ पित्ते॥
उष्णांशुः। पुं। सूर्य्ये॥
उष्णागमः। पुं। निदाघकाले॥ उष्णस्य आगमो यस्मिन्॥
उष्णालुः। त्रि। उष्णपीडिते॥ उष्णं नसहते। शीतोष्णेक्यालुः॥
उष्णासहः। पुं। हेमन्तर्त्तौ॥
उष्णिका। स्त्री। यवान्याम्। आउइतिगौडभाषा॥ अल्पमन्नमस्याम्। ब्राह्मणकोष्णिकेसंज्ञायामितिकन्। निपातनादन्नशब्दस्योष्णादेशः॥ दक्षायाम्॥
उष्णिक्। स्त्री। ससाक्षरायांवृत्तौ॥ यथा। रक्षे बाहुविरक्षणात् कुमीन्द्रा

उष्णकः
न्मदलेखा । तस्माभून्मुरशत्रोः क स्तूरीरसचर्चा इति ॥ उत् क्षिप्यति। क्षिप्रीतौ । ऋत्विगित्यादिना उत्पू र्वात् क्षिपेः किन् । निपातनादुपस र्गान्तलोपः पत्वञ्च । किन्नन्तत्वात् कुत्वेनहस्यधः ॥

उष्णीषः । पुं । न । शिरोवेष्टनवस्त्रे । पाघ पघडीइतिभाषा ॥ अस्यगुणा यथा। उष्णीषं कान्तिकृत् कोष्ण्यरुजो वातकफापहम् । लघुचेच्छस्यते यस्मादगुरुपित्तात्तिरोगकृदितिभा वप्रकाशः ॥ किरीटे ॥ सचखान्त रे ॥ उष्णमीषतेर्हिनस्ति । ईषगतिहिंसादर्शनेषु । इगुपधेतिकः । अ कन्प्रत्ययादिः ॥

उष्णोदकम् । न । तप्तजले ॥ काथ्य मानपादावशेषार्द्धावशेषपादहीन-जले । अस्यगुणाः । तत्पादहीनंवा तप्तं मधुहीनन्तुपित्तनुत् । कफघ्नं पादशेषस्थं पानीयं लघुदीपनमि-ति ॥ उष्णश्चतत् उदकञ्च ॥

उष्णोपगमः । पुं । निदाघे ॥ उष्णःउप गमोत्र ॥

उष्मः । पुं । निदाघे ॥ आतपे ॥ वसन्त काले ।

उष्मकः । पुं । ग्रीष्मर्त्तौ । ऊषति रुज ति । ऊषरुजायाम् । अन्येभ्योपीति मनिन् । यावादित्वात् कन् ॥

उष्मपाः । पुं । पितृगणविशेषे ॥ उष्म पास्तु कवेः सुताः ॥ उष्माणंपिबन्ति । पापाने । क्विप् ॥ यावदुष्णंभवत्य न्नं यावद्गन्धि वाग्यतः । पितरस्ता वद्गन्धियावच्चोष्णाहविर्गुणाः इति स्मृतिः ॥

उष्मागमः । पुं । आतपे । निदाघे ॥ ओषतीत्युष्मा । अन्येभ्यइतिमनि न् । आगच्छतीत्यागमः । अच् । उष्मातायआगमोऽत्र ॥

उष्रः । पुं । हर्षे ॥ मयूखे । किरणे ॥ वसन्तिरसा अस्मिन् । वस°स्कायि तच्चीतिरक् । यस्मादित्वात् सम्प्रसा रणम् । नरपरेतिपत्वाभावः ॥

उष्रा । स्त्री । अर्जुन्याम् । गवि ॥ उप चिनायाम् ॥ वसति चीरमस्याम् । उष्राट्टाप् ॥

उष्र । अ । सम्बोधनाय ॥ एवार्थे ॥ उ च ष्रचेतिविग्रहः ॥

उष्रच । अ । सम्बोधने ॥ उष्रच ष्रच ॥

उष्राणः । पुं । देशविशेषे ॥

उष्यमाणः । त्रि । आकृष्यमाणे ॥ वहने नाप्यमाणे ॥ वहेःकर्मणिशानचु ॥

उष्ट्रः । पुं । अनुदुहि ॥ वहति । वह°। दृगपाद्यां स्कायितच्चीतिसूत्रेदृग्भि यष्टिवसीतिपाठात् रक् ॥

ऊधः

ऊः

ऊ। अ। वाक्यारम्भे ॥ रक्षायाम् ॥ अनुकम्पायाम् ॥ सम्बोधने ॥

ऊः। पुं। मङ्गेश्वरे ॥ चन्द्रे ॥ प्राप्तिते ॥ अवति। अवरक्षणादौ। कर्त्तरि क्विप्। ज्वरत्वरेत्यूठ् ॥ ऊकारे ॥

ऊढः। त्रि। विवाहिते ॥ वहनकर्म्मणि। कृतवहने ॥ धृते ॥ ऊह्यतेस्म। वह। क्तः ॥

ऊढकङ्कटः। त्रि। वर्म्मिते। सन्नद्धे। वस्त्राढ्ये ॥ ऊढो धृतः कङ्कटः कवचो येन ॥

ऊढा। स्त्री। भार्य्यायाम् ॥ टाप् ॥

ऊतः। त्रि। स्यूते ॥ ऊयतेस्म। ऊयी तन्तुसन्ताने। क्तः ॥

ऊतिः। स्त्री। रक्षणे ॥ स्यूतौ। सिमा इति भाषा ॥ वीजायाम् ॥ अवनम्। अव°। ऊतियूतीत्यादिनाक्तिन्। ज्वरत्वरेत्यूठ् ॥

ऊधन्यम्। त्रि। ऊधसेदमिते ॥ गवादिषु ऊधसोनङ्चेतियत् ॥

ऊधः। न। आपीने। क्षीराशये ॥ वहतीति ऊधस्तिया। वहश्रामणे उन्दीक्ष्ये दनेषा। असुन्। ऊधसोनङिति निः

ऊरुप

देशात् ऊधादेशः ॥

ऊधस्यम्। न। दुग्धे। ऊधसि भवम्। यत् ॥

ऊनः। त्रि। न्यूने। हीने। असम्पूर्णे ॥ ऊनयति। ऊनपरिहाने ॥ पचाद्यच् ॥

ऊम्। अ। रोषोक्तौ ॥ पृच्छायाम् ॥

ऊयते ॥ ऊयी°। मुक्प्रत्ययः ॥

ऊमम्। न। नगरे ॥ अवति। अव°। अविसिवीत्यादिनामन्कित् ॥

ऊररी। अ। अङ्गीकारे ॥ ततौ। विस्तारे ॥ ऊर्यते। ऊर्यी°। बाहुलकादीक् ॥

ऊरव्यः। पुं। वैश्ये ॥ ब्रह्मण ऊरोर्जातः। शरीरावयवाद्यत्। गुणवादेशौ ॥ त्रि। ऊरुसमुद्भवे ॥

ऊरी। अ। अङ्गीकृतौ ॥ विस्तारे ॥ ऊर्यते। ऊर्यी°। बाहुलकादीक् ॥

ऊरीकृतः। त्रि। अङ्गीकृते ॥ ततः। विस्तृते ॥ ऊरीकृततेस्म। क्तः ॥

ऊरुः। पुं। जानूपरिभागे। सक्थनि ॥ ऊर्णूयते आच्छाद्यते। ऊर्णुञ्°। ऊर्णोतेर्नुलोपश्चेति कर्म्मणि कुः ॥

ऊरुजः। पुं। वैश्ये ॥ ऊरोर्जातः। जनी°। पञ्चम्या मजाताविति डः ॥

ऊरुपर्वा। पुं। न। जानुनि। अष्ठीवति। घैंटू घुटना इति भाषा ॥ ऊरोः पर्व ॥

ऊहरी । अ । अङ्गीकारे ॥ विस्तारे ॥

ऊरुस्तम्भः । पुं । रोगविशेषे ॥ तस्यरूपम् । परकीया विषगुरुस्यातामतिशयव्यथौ । थानाङ्गमर्दस्तैमित्यतन्द्राहर्षरुचिज्वरैः ॥ संयुतौ पादसदनकृच्छ्रोद्वरणसुप्तिभिः । तमूरुस्तम्भमित्याहुरार्यवातमयापरेइति॥

ऊरुस्तम्भा । स्त्री । कदलीवृक्षे ॥

ऊर्क् । न । बले ॥ अन्ने ॥ ऊर्ज्जेस्वच्छीत्यादिषु भ्राजभासेति क्विप् ॥ अस्य तच्छब्दाभिधेयोऽत्यन्तसारभूतः रूक्ष्मोत्तरस ऊर्गुच्यते इतिमीमांसकाः ॥

ऊर्जः । पुं । कार्त्तिकमासे ॥ उत्साहे॥ बले ॥ प्राणने ॥ कार्त्तिकनाम्निवर्षविशेषे ॥ न । जले । पानीये ॥ ऊर्जयति उत्साहयति जिगीषून् । ऊर्ज्जबलप्राणनयोः । एयन्तात् पचाद्यच् ॥ असुनिसान्तोप्ययम् ॥

ऊर्ज्जस्वलः । वि । बलाधिके । ऊर्जस्विनि ॥ अतिशयितः ऊर्जोबलमस्यास्ति । ज्योत्स्नातमिस्रेति ऊर्जसोयस्वच् । अदन्तऊर्जशब्दाद्वचि सगपिनिपाठ्यः ॥ अलङ्कारविशेषे ॥ रसभेदतदाभासतत्प्रकाशमानानिबन्धनेन रसवत् प्रायक ऊर्जस्वलालङ्कार इति रूपात् । तत्प्रकाशमा

नबन्धने समाहितालङ्कारईत्यर्थः ॥

ऊर्ज्जस्वी । वि । बलाधिके । ऊर्जस्वले ॥ अतिशयित ऊर्जोबलमस्यास्ति । ज्योत्स्नातमिस्रेति विनिः । अदन्तात् विनिकृते सगपिनिपाठ्यः ॥ न । अलङ्कारविशेषे ॥ ऊर्जस्विरुदाहृङ्कार मिति तस्यलक्षणम् । सालङ्कारस्वभिधान मित्यर्थः ॥

ऊर्जितः । वि । बलाद्यतिशययुक्ते । बलप्रकर्षशालिनि ॥ बलार्थादूर्जशब्दात्तारकादित्वादितच् ॥ बलार्थादूर्जशब्दार्थकर्मकेत्यादिनाकर्त्तरिक्तो वा ॥

ऊर्जितशासनः । पुं । नारायणे ॥ श्रुतिस्मृतिलक्षणमूर्जितंशासनमस्य । यथा । श्रुतिस्मृती ममैवाज्ञे यस्तोउल्लङ्घ्यवर्त्तते । आज्ञाच्छेदी ममद्वेषी मद्भक्तोपि न वैष्णवः ॥ इति भगवद्वचनम् ॥

ऊर्ज्जितिः । स्त्री । उत्कर्षे ॥

ऊर्णनाभः । पुं । मर्कटके । लूतायाम् । तन्तुसर्जने प्रसिद्धजीवे । मकडी इतिभाषा॥ ऊर्णेव तन्तुर्नाभास्य । अजिनियोग विभागादच् । डयापोरितिह्रस्वः ॥

ऊर्णनाभिः । पुं । लूतायाम् ॥ ऊर्णनाभाषस्य ॥

ऊर्णकः

ऊर्णा। स्त्री। मेषादिलोम्नि। ऊनदृति भाषा॥ भ्रुवोरन्तरावर्त्ते॥ सतुभ्रूद्वय मध्येमृणालतन्तुसूक्ष्मः शुभायतए कःप्रशस्तावर्त्तो महापुरुषलक्षणम्। चक्रवर्त्त्यादीनां महायोगिनाञ्च भवति॥ ऊर्णोति। ऊर्णुञ्°। अन्येभ्योपीतिडः। ऊर्णोतेर्डः इतिडो वा॥

ऊर्णायुः। पुं। क्षणभङ्गे। ऊर्णनाभे॥ मेषे॥ मेषलोमकम्बले। पटूदेवङ् लोई पक्खी इतिभाषा॥ ऊर्णा अस्यास्ति। ऊर्णायायुस्। सिच्वात् पदत्वम्। तेनयस्येतिलोपेन॥

ऊर्द्दरः। पुं। राक्षसे॥ शूरे॥ ऊर्ज्जम् ऊर्द्दयति। दृ°। ऊर्जिदृणातेरलौपूर्वपदान्त्यलोपश्च। अलचोःस्वरे भेदः॥

ऊर्द्धः। त्रि। उच्छ्रिते॥ तुङ्गे॥ उपरिष्टात्। उपर्य्यर्थे॥ दण्डवत् स्थिते॥ ऊर्द्धशब्दो दीर्घादिर्निर्विकारः सवकारश्चदृश्यते॥

ऊर्द्धकः। पुं। मदङ्गविशेषे॥ यवमध्याकृतिरूर्द्धकः॥ शब्दार्णवस्तु। ऊर्द्धकोशेपुच्छवत्सचितालोष्टाङ्गुलोमुखे। धृत्वोर्द्धंवाद्यतेयोवादनंदुर्जननंनना॥ इति॥ अपिच। हरीत्रयाकृतिस्वङ्गस्तयालिङ्ग्योयवाकृ

ऊर्द्धपुं

तिः। ऊर्द्धकोदण्डतुल्यः स्यान्मुरजा भेदतोमताः॥ ऊर्द्धःकायति। कै शब्दे। सुपीतिकः॥

ऊर्द्धकण्ठी। स्त्री। महाशतावर्य्याम्॥

ऊर्द्धक्रमः। पुं। ऊर्द्धस्थे॥ इतिविकाण्डशेषः॥

ऊर्द्धजानुः। त्रि। उपरिभागेस्थूलजानुके। ऊर्द्धजौ॥ ऊर्द्धजानुनीयस्य॥

ऊर्द्धजः। त्रि। ऊर्द्धजानुनि॥

ऊर्द्धजुः। त्रि। ऊर्द्धजानुनि॥ ऊर्द्धजानुनोयस्य। ऊर्द्धादिभ्योपेतिपचेः॥

ऊर्द्धदेवः। पुं। विष्णौ। हरौ॥

ऊर्द्धपादः। पुं। शरभे॥

ऊर्द्धपुण्ड्रः। पुं। तिलकविशेषे॥ सतु ब्राह्मणलल्लाटे पुण्ड्रेक्षुवत् चन्दनादिनाकृतोर्द्धरेखाद्वयरूपः। यथा। ऊर्द्धपुण्ड्रेविपुण्ड्रंस्यात् त्रिपुण्ड्रेनोर्द्धपुण्ड्रकमिति। ऊर्द्धपुण्ड्रंद्विजःकुर्य्याद्वारिमृद्भस्मचन्दनैरित्यादिचवहवः। ऊर्द्धपुण्ड्रंसदाकुर्य्यात् त्रिपुण्ड्रं भस्मनासदा। तिलकंवैदिलःकुर्य्याच्चन्दनेनयदृच्छया॥ ऊर्द्धपुण्ड्रंद्विजःकुर्य्यात् त्रयमेतत्तुविपुण्ड्रकम्। ऊर्द्धचन्द्रन्तुवैश्यस्यवर्त्तुलंशूद्रयोनिजः॥ इतिब्रह्माण्डपुराणम्। अशुचिर्वाप्यनाचारोमनसापापमाचरे-

ऊर्द्धमु

त्। शुचिरेवभवेन्नित्यमूर्द्धपुण्ड्राङ्कि तोनरः॥ ऊर्द्धपुण्ड्रधरोमर्त्योप्रिय तेयचकुत्रचित्। श्वपाकोपिविमानस्थो ममलोकेमहीयते। इति॥ वैदिकातिरिक्तएवास्याधिकारी॥ यथोक्तंदेवीभागवते श्रीनारायणेन। ऊर्द्धपुण्ड्रं त्रिशूलञ्चवर्त्तुलंचतुरस्रकम्। अर्द्धचन्द्रादिकंलिङ्गंवेदनिष्ठो नधारयेत्॥ जन्मनाब्राह्मणजातिस्तु वेदमन्त्रानभिज्ञितः। पुण्ड्रान्तरंललाटेनैवधारयेत्॥ ख्यातिकान्त्यादिसिद्ध्यर्थंचापि विष्णुलक्ष्मादिषु। स्थितंपुण्ड्रान्तरंनैवधारये वैदिकोजनइत्यादि॥ ऊर्द्धञ्चासौ पुण्ड्रश्च॥

ऊर्द्धम्। अ। ऊर्द्धशब्दार्थे।

ऊर्द्धमानम्। न। उन्माने॥ मञ्चादिशब्दवाच्येनपाषाणादिनातुलादावारोपितेन येन सुवर्णादेर्गुरुत्वमुन्मीयतेतदूर्द्धारोपणादूर्द्धमानमितिशब्देनविवक्षितम्। वट धाट इतिचयस्वभाषा॥ कर्म्मदा॥ ऊर्द्धावस्थितेन येनमीयतेतत्। प्रथमश्चद्वितीयश्चऊर्द्धमाने मतौ ममेतिमहाभाष्योक्तेः। प्रथमद्वितीयौ द्वयसज्ञप्रदौ॥

ऊर्द्धमुखम्। न। नद्यवविशेषेषु। य-

ऊर्म्मिः

था। आर्द्रापुष्यापुनिष्ठाचशतताख्या श्रवणातथा। रोहिणीचोत्तराचैवनवैवोर्द्धमुखाः स्मृताः इति॥

ऊर्द्धमूलः। पुं। संसारवृक्षे॥ ऊर्द्धमुत्कृष्टंकारणंऽकार्यापेक्षया परमव्याकृतंमूलमस्येति। अस्तिहिसंसारस्यमूलम्। नेदममूलं भविष्यतीतिश्रुतेः॥

ऊर्द्धरेताः। पुं। महादेवे। सदाशिवे॥ मुनिविशेषे। सनकादिषु॥ भीष्मे॥ सन्न्यासिनि॥ ऊर्द्धंरेतो यस्यसः। नपतितवीर्य्ययस्येत्यर्थः॥

ऊर्द्धलिङ्गः। पुं। महेशे। देवदेवे। शिवे॥

ऊर्द्धलोकः। पुं। दिवि। स्वर्गे॥

ऊर्द्धस्थः। त्रि। उपरिस्थिते॥ ऊर्द्धंतिष्ठति। स्था। सुपिस्थइतिकः॥

ऊर्द्धस्थितिः। स्त्री। उपरिस्थितौ॥ ऊर्द्धावर्त्ते॥ सतु अश्वस्यपृष्ठस्थानम्॥

ऊर्द्धासितः। पुं। सरभसे॥ कारण्डवेभ्ले॥ त्रि। ऊर्द्धोपवेशिते॥ ऊर्द्धम्असितः आसितोवा॥

ऊर्म्मिः। पुं। स्त्री। वीप्साम्॥ प्रकाशे॥ वेगे॥ भङ्गे। स्वल्पतरङ्गे॥ यक्षसङ्कोचरेखायाम्॥ वेदनायाम्॥ पीडायाम्॥ उत्कण्ठायाम्॥ बुभुक्षादिपट्के। बुभुक्षाचपिपासाच मा

ऊर्व्वसी

शस्यमनसः स्मृतौ । शोकमोहौशरीरस्य जरासत्यू षड्भिर्मयङ्त्युक्तेः॥ ऋच्छति । ऋगतौ । ऋच्छेरूङादेशः ॥ अश्वगतिविशेषे ॥ यथा । पङ्क्तीकृतानां मश्वानांनमनोन्नमनाकृतिः । अतिवेगसमायुक्तांगतिमूर्मिरुदाहृतेतिवैद्यन्ती ॥

ऊर्म्मिका । स्त्री । अङ्गुलीये ॥ वस्त्रभङ्गे ॥ तरङ्गे ॥ उत्कण्ठायाम् ॥ भृङ्गनादे ॥ ऊर्मिरिय । इवेप्रतिकृताविति कन् । ऊर्मिं प्रकाशं कायति वा । कै० । आतोनुपेतिकः ॥

ऊर्म्मिमान् । त्रि । वक्रे । अराले । वाँकाइतिभाषा ॥ तरङ्गिणि ॥ ऊर्मिरस्यास्ति । मतुप् । यवादिः ॥

ऊर्म्मिमाली । पुं । समुद्रे । अकूपारे ॥ ऊर्मीणांमालासाअस्तिअस्य । इनिः॥

ऊर्म्मिला । स्त्री । सरिति ॥ लक्ष्मणभार्यायाम् ॥ काचमालायाम् ॥ ऊर्म्मिंलाति । आतोनुपेतिकः ॥

ऊर्व्वरा । स्त्री । उर्वरायाम्भूमौ॥

ऊर्व्वसी । स्त्री । नारायणोरुनिर्भिन्नसम्भूता वरवर्णिनीतिहरिवंशप्रसिद्धा यां स्वर्गवेश्यायाम् । उर्व्यांम् ॥ ऊरौउषितेति । वसनि० । ऊर्वसी दीर्घादिदन्त्यान्तापृषोदरादिषु बु

ऊषा

त्पादिता ॥

ऊर्व्यङ्गम् । न । गोमयच्छत्रिकायाम् । शिलीन्ध्रके ॥

ऊषः । पुं । चारसदि ॥ प्रभाते ॥ प्रातःसन्ध्यायाम्॥ रन्धे ॥ चन्दनाद्रौ॥ अवोविले ॥ ऊषति । ऊषरुजायाम् । इगुपधेतिकः ॥

ऊषकम् । न । ऊषे । स्वार्थेकन् ॥

ऊषणम् । न । मरिचे ॥ पिप्पलीमूले ॥ गुणत्राम् ॥ पुं । चित्रके ॥ ऊषति । ऊषॅवाहुलकात्क्युन् ल्युट्वा ॥

ऊषणा । स्त्री । पिप्पल्याम् ॥ चव्ये ॥ टाप् ॥

ऊषरः । पुं । चारभूमौ । ऊषवति ॥ यवबीजमुप्तंन प्ररोहति तस्मिन्नित्यर्थः ॥ ऊषोऽस्यस्मिन् । ऊषमुषीतिरः ॥ रेणुकादिनदतीर्थेषु ॥ यथा । रेणुका सूकरः काशी काली कालो वटेश्वरौ । कालिञ्जरोमहाकालऊषरानवमुक्तिदा इति वराहपुराणम् ॥

ऊषरजम् । न । पांशवलवणे ॥ रोमकनामायस्कान्तभेदे ॥ इतिराजनिर्घण्टः ॥

ऊषवान् । त्रि । ऊषरे ॥ मतुप् ॥

ऊषा । स्त्री । वाणसुतायाम् ॥

ऊष्मा । पुं । निदाघे ॥ ऊष्माणः शपस

ऊहः

हाः । ऊष्मावायुस्तत्प्रधाना इत्यर्थः। एतच्चोष्माणइत्यस्य वायुनासहवर्त्तन्तइत्यर्थ इति प्रातिशाख्यभाष्येस्पष्टम् ॥

ऊमा । स्त्री । ऊष्मणि ॥ टाप्तन्तः । ऊष्मया सार्द्धमूमा प्रीतिर्विरूपः ॥

ऊहः । पुं । अध्याहारे । तर्के ॥ अपूर्वोत्रेचरणे इतिजैमिनिः ॥ आगमाऽविरोधिना न्यायेन आगमार्थपरीक्षणे ॥ परीक्षणञ्च संभव्य पूर्वपक्षनिराकरणेनोत्तरपक्षव्यवस्थापनम् । तदिदं मननमाचक्षते आगमिनः सा तृतीया सिद्धिः तारतारमुच्यते । अन्येत्वाचक्षते । विनोपदेशादिनाप्राग्भवीयाभ्यासवशात् तत्त्वस्य स्वयं मूहनंयत् सा सिद्धिरूहइति । विमर्शात्मकतर्क ॥ समूहे ॥ असम

ऊहा

वेतार्थकपदत्यागपूर्वकसमवेतार्थकपदसमभिव्याहारकरणे॥ साकाङ्क्षवाक्यस्य पदान्तरेणाकाङ्क्षापूरणे ॥ आरोपे ॥ ऊहनम् । ऊह्यतेऽनेन । भावे घञ् ॥

ऊहत्वम् । न । मानसत्वव्याप्ये जातिविशेषे । तर्कयामीत्यनुभवसिद्धे ॥ अन्यथाश्रुतस्यशब्दस्य अन्यथा लिङ्गवचनादिभेदेन विपरिणमनम् - ऽस्यभावे ॥

ऊहनम् । न । ऊहे ॥

ऊहनी । स्त्री । शोधन्याम् । सम्मार्जन्याम् ॥

ऊहा । स्त्री । अध्याहृतौ ॥ ऊहनम् । ऊह० । गुरोश्चहलइत्यप्रत्ययः । टाप् ॥

ऋः

ऋ । अ । गर्हणे ॥ वाक्ये ॥ मन्त्रस्तोभ वचने ॥ ऋकारे ॥ स्त्री । देवाम्बा याम् ॥ पुं । स्वर्गे ॥

ऋक्थम् । न । धने ॥ स्वर्णे ॥ ऋच्यते-ऋच्शब्दे । बाहुलकात् थक् ॥

ऋक्षः । पुं । गिरिविशेषे ॥ तापीप योष्णीनिर्विन्ध्याप्रमुखा ऋक्षसम्भ-वाः ॥ भल्लूके ॥ शोणके । श्योनाक प्रभेदे ॥ पुं । न । नक्षत्रे । भे ॥ मे षादिराशौ ॥ त्रि । कुत्सितेक्षणे ॥ अक्षे ॥ ऋक्षति । ऋक्षीगतौ । स्फुत्र श्चिकृत्यृक्षिभ्यःकिदिति ऋक्षे जौतौ सः । षढोःकःसि ॥ यद्वा । ऋक्षणो-ति । ऋक्षहिंसायाम् । अच् ॥

ऋक्षगन्धा । स्त्री । ऋषिजाङ्गलिक्याम् । ऋषिजाङ्गल इति गौडभाषाप्रसि द्धायाम् ॥ क्षीरविदार्याम् । महाश्वे तायाम् ॥ दृढदारको । छगलाख्याम् । वीरतार इतिगौडभाषा ॥ ऋक्षान् गन्धयति । गन्धअर्दने । मूलविभुजा दित्वात्कः ॥ यद्वा । ऋक्षोगन्धोऽ स्याः । ऋक्षशब्दस्तद्गन्धसदृशेगौणः । ऋक्षस्येवगन्धोस्याः । समासान्तस्या निच्यच्वात् उपमानाद्वेतिनेकारः ॥

ऋक्षगन्धिका । स्त्री । क्षीरविदार्याम् । श्वेतभूकूष्माण्डे ॥ ऋक्षगन्धार्थे ॥ ऋक्षगन्धैव स्वार्थेकन् ॥

ऋक्षगिरिः । पुं । ऋक्षाभिधे कुलाच ले ॥

ऋक्षरः । पुं । ऋक्षिञ्जि ॥ न । वारिधा रायाम् ॥ ऋक्षति । ऋक्षीगतौ । त न्यृषिभ्यां क्सरन् ॥ ऋक्षरःकण्टक-इतिवेदभाष्यम् ॥

ऋक्षराजः । पुं । जाम्बवति ॥ चन्द्रे ॥ ऋक्षाणांराजा । टच् ॥

ऋक्षवान् । पुं । नर्मदातीरस्थे पर्वतवि शेषे ॥ ऋक्षाःसन्त्यस्मिन् । मतुप् ॥

ऋक्षविडम्बी । पुं । नक्षत्रऋक्षके ॥

ऋक्षवरीश्वरः । पुं । सुग्रीवे ॥

ऋक्षेशः । पुं । चन्द्रमसि । सोमे ॥

ऋक्षोदः । पुं । पर्वतविशेषे ॥

ऋग्वेदः । पुं । देवदैवत्ये ऋग्वाङ्मय समुदाये । ऋचि ॥

ऋग्वेदाधिपतिः । पुं । गुरौ । बृहस्पतौ ॥ यथा । ऋग्वेदाधिपतिर्जीवः सामवे दाधिपःकुजः । यजुर्वेदाधिपःशुक्रः-शशिजोऽथर्ववेदराट् । इति ॥

ऋक् । स्त्री । नियताक्षरपादयुते देव दैवत्ये एकविंतिशाखात्मके वेदभा गे । समानाक्षरपादबन्धसमन्विते-मन्त्रविशेषे ॥ तस्यलक्षणम् । यद्वा

र्थवशेन पादव्यवस्थितिः । अस्यार्थः । यत्रार्थवशेन एकान्वयित्वेनानुष्टुवादिपादव्यवस्थितिः । इति जैमिनिः ॥ ऋच्यन्तेस्तूयन्तेदेवा अनया । ऋचस्तुतौ । क्विप् ॥

ऋचीषम् । न । पिष्टपचनपात्रे ॥ ऋचति । ऋचशब्दे । बाहुलकात् कीषन् ॥

ऋच्छरा । स्त्री । वेश्यायाम् ॥ ऋच्छति । ऋच्छगतीन्द्रियप्रलयमूर्त्तिभावेषु । ऋच्छेरः ॥

ऋजिमा । पुं । आर्जवे ॥ ऋजोर्भावः । इमनिच् ॥

ऋजीकः । त्रि । दुष्टे ॥ तमोधने ॥ अर्जते । ऋजगतिस्थानार्जनोपार्जनेषु । ऋजेरीकेति ईकन् ॥ यद्वा । ऋजोः कीकन् । ऋजीक इन्द्रो धूमश्वेति कौमदी ॥

ऋजीषम् । न । कटाहिकातम्बिकादौ पिष्टभर्जनपात्रे । पिष्टपचने ॥ धने ॥ उद्भृतरसे सोमलतायाः शेषे । एतद्भाष्येस्पष्टम् ॥ नरकविशेषे ॥ अवपिष्टपचन प्रक्षेपः ॥ अर्ज्यते । अर्जअर्जने । अर्जे र्वजचेतिईषन् ॥

ऋजुः । त्रि । अवक्रे । अजिह्मे । प्रगुणे । प्राञ्जले । सीधा इतिभाषा ॥ पदज्ञे द्विजात्मजा नेतरेस्वभावतः ॥ अ

र्जति । अर्जअर्जने । अर्जितशीतिसाधुः । अर्जयति गुणान् वा ॥

ऋजुकायः । पुं । कश्यपमुनौ ॥ त्रि । अवक्रशरीरे ॥ ऋजुः कायोस्य ॥

ऋज्वः । त्रि । गतिमति । ऋज्वार्यंहति मन्त्रे ऋज्वा गतिमन्तोऽश्वायस्येतिवेदभाष्यात् ॥ नायके ॥ अर्जयते अर्जयतिषा । ऋजगत्यादिषु । ऋज्वेन्द्रेतिरन् । निपातनाद्गुणाभावः ॥

ऋञ्जसानः । पुं । मेघे ॥ ऋञ्जते । ऋञ्जिभर्जने । ऋञ्जिवृधीति असानच् कित् । वेदभाष्येतु यौगिकार्थ एव पुरस्कृतः ॥

ऋणम् । न । अधमर्णेनोत्तमर्णात् पुनर्दैयतयास्वीकृत्यगृहीतेधने । पर्य्युदञ्चने । उद्धारे । उधार इतिभाषा ॥ जले ॥ दुर्गे ॥ दुर्गभूमौ ॥ अर्यतेस्म । ऋगतौ । क्त । ऋणमाधमर्ण्ये इति णत्वम् ॥

ऋणत्रयम् । न । त्रिविधे ऋणविशेषे ॥ यथा । देवानाञ्च पितॄणाञ्च ऋषीणाञ्चतथानरः । ऋणवान् जायते यस्मात् तत्तन्मोचे प्रयतेत्सदा ॥ तत्परिशोधनन्तु । देवानां मन्त्रणो जन्तुर्यज्ञैर्भवति मानवः । ऋषिपित्रोश्च पूजाभिरुपवासव्रतैस्तथा ॥ ब्रह्मेनप्रजयाचैव पितॄणामन्त्रणो भवेत् । ऋषीणां

ऋणादा

ब्रह्मचर्य्येण श्रुतेन तपसा तथा ॥ इतिविष्णुधर्मोत्तरम् ॥

ऋणमत्कुणः । पुं । प्रतिभुवि । खद्म ऋणमार्गणः । पुं । कें । जासिन् जमान इतिचभाषा ॥

ऋणमुक्तिः । स्त्री । विगणने । ऋणपरिशोधने ॥ ऋणस्य ऋणाद्वामुक्तिः ॥

ऋणमोचः । पुं । ऋणमुक्तौ ॥

ऋणहर्त्ता । पुं । भीमे ॥ ऋणस्यहर्त्ता ॥

ऋणादानम् । न । उत्तमर्णेनाधमर्णात्सलाभधनग्रहणे । व्यवहारविशेषे ॥ तत्सप्तविधम् । यथा । ईष्टश्रद्धेयम् १ । ईष्टश्रमदेयम् २ । अनेनाधिकारिणादेयम् ३ । अस्मिन् समये देयम् ४ । अनेनप्रकारेणदेयम् ५ । इत्यधमर्णेपञ्चविधम् । उत्तमर्णेतु दानविधिः ६ । आदानविधिश्च ७ । इतिद्विविधम् । तथाच नारदः । ऋणंदेयमदेयञ्चयेनयच्च यथाभवेत् । दानग्रहणधर्म्माश्च ऋणादानमितिस्मृतम् ॥ अदेयमितियदुक्तं तदाहकात्यायनः । नस्त्रीभ्योदासबालेभ्यः प्रदद्यात् किञ्चिदुद्धृतम् । दाता नलभतेतच्चतेभ्योदत्तन्तु तस्य ॥ तद्विशेषमाह बृहस्पतिः । परिपूर्णंगृहीत्वाधिं यन्यंवा साधुलक्षणम् । लेख्याकृतं साक्षिमद्वा ऋणंद

ऋतप

द्याद्धनीसदा ॥ इतिविवादार्णवसेतुः ॥

ऋणान्तकः । पुं । कुजे । मङ्गलग्रहे ॥

ऋणापनोदनम् । न । ऋणापनयने ॥

ऋणिकः । त्रि । अधमर्णे ॥

ऋणी । त्रि । ऋणवति । अधमर्णे । ऋणग्रस्ते ॥

ऋणोद्ग्राहणम् । न । अधमर्णगृहीतर्णग्रहणे ॥

ऋतम् । न । ब्राह्मणस्योत्तमवृत्तौ । उञ्छशिले ॥ ऋतमुञ्छशिलंज्ञेयमित्युक्तेः ॥ जले ॥ सत्ये ॥ मोक्षे ॥ कर्म्मफले ॥ सूनृतायांवाचि ॥ यथाशास्त्रे यथाकर्त्तव्ये वृद्धैः सुपरिनिश्चितेर्थे ॥ अवितथेस्वभावे परमार्थभूतवस्तुनि ॥ मानससत्त्वे ॥ त्रि । दीप्ते ॥ पूजिते ॥ अर्यतेस्म ऋच्छतिवा । ऋगतौ । निष्ठेति गत्यर्थेतिवाऽर्त्तः क्तः ॥

ऋतजित् । पुं । यज्ञविशेषे ॥

ऋतधामा । पुं । विष्णौ ॥ ऋतंसत्त्यं धाम अस्य ॥

ऋतपः । पुं । संसारिणिजीवे ॥ ऋतंकर्म्मफलंपिबति । पा० । कः ॥

ऋतपर्णः । पुं । राजर्षिविशेषे ॥ यथा ॥ कर्कोटकस्यनागस्य दमयन्त्यानलस्य च । ऋतपर्णस्यराजर्षेः कीर्त्तनं कलिनाशनमितिमहाभारतम् ॥

ऋतुः

ऋतम् । अ । सत्यमित्यर्थे ॥

ऋतम्भरा । स्त्री । प्रज्ञाविशेषे ॥ ऋतं सत्यमेव बिभर्त्ति न तत्र विपर्यासगन्धोऽप्यस्तीति यौगिक्येवेयं संज्ञा ॥ प्रज्ञादीपस्य नदीविशेषे ॥

ऋतव्यम् । त्रि । ऋतुदेवताके हविरादौ ॥ ऋतुर्देवताऽस्य । व्यृतुषिषु यसोयत् । गुणावादेशौ ॥

ऋतिः । स्त्री । कल्याणे ॥ वर्त्मनि ॥ जुगुप्सायाम् ॥ स्पर्द्धायाम् ॥ गतौ ॥ अशुभे ॥ ऋगतौ । क्तिन् ॥

ऋतीया । स्त्री । अर्त्तने । जुगुप्सायाम् ॥ ऋति सौत्रः । ईयङ्पक्षे । अप्रत्ययादित्वात् । टाप् ॥

ऋतुः । पुं । कालविशेषे ॥ सतु शिशिरादिभेदात् षड्विधः । यथा । मासद्वयात्मकः कालऋतु प्रोक्तोविचक्षणैरिति । मलमासेतु मासद्वयात्मक एकोमासः तेन मासद्वयात्मकत्वंविवक्षितम् । षष्टिनाडिदिवसैर्मासः कथितो बादरायणैरित्युक्तेः ॥ शिशिरः पुष्पसमयो ग्रीष्मो वर्षाश्चरद्भिम. । माघादिमासयुग्मैस्तु ऋतव षट्कमादित ॥ उत्तरायणमाद्यैस्तैस्त्रिभि.स्याद्दक्षिणायनमिति ॥ ऋतूनांव्यत्ययेजाते यदुक्तंतन्नखिलंहरे । यथा । शीतोष्णताविपर्यासः ऋतूनांरिपुजंभयम् ।

ऋतुः

पुष्पेफलेचविकृते रात्रौसत्युंतथा दिग्देदिति ॥ सत्रिविधोपि । कार्त्तिकाग्रहायणपौषमाघाः शीतः १ । फाल्गुनचैत्रवैशाखज्येष्ठाः ग्रीष्मः २ । आषाढश्रावणभाद्रश्विनाःवर्षाः ३ ॥ त्रिविधोपि । कार्त्तिकादिषण्मासाः शीतः । १ । वैशाखादिषण्मासाः ग्रीष्मः । २ । इति स्मृतिः ॥ स्त्रीपुष्पे । आर्त्तवे । रजसि । शोणितदर्शनेन पलक्षिते, गर्भधारणयोग्ये स्त्रीणामवस्थाविशेषे ॥ ऋतुःस्वाभाविकःस्त्रीणां रात्रयःषोडशस्मृता' । चतुर्भिरितरैःसार्द्धं, मह्नोभिः सद्विगर्हितैः ॥ दीप्तौ ॥ सुवीरे ॥ मासे ॥ इयर्त्ति गच्छति असाधारणं लिङ्गम् । ऋगतौ । अर्त्तेश्चतुरितितुः । चात्किच्चम् । ऋच्छति वा ॥

ऋतुमास' । त्रि । फलितरौ । फलेग्रहे । अवन्यादृचादौ ॥ ऋतुःप्राप्तोनेन ॥

ऋतुमती । स्त्री । रजस्वलायाम् । उद्वाहायाम ॥ ऋतुरस्त्यस्या. । मतुप् । ङीप् ॥

ऋतुराजः । पुं । वसन्ते ॥ ऋतूनांराजा । राजाह.सखिभ्यष्टच् ॥

ऋतुवृत्ति' । पु । वर्षे । संवत्सरे ॥ ऋतुषुवृत्तिरस्य ॥

ऋत्विक्

ऋतुसन्धिः । पुं । ऋतुद्वयसन्धिकाले । ऋत्वोरन्त्यादिसप्ताहयोः ॥ आह्निचा चवाम्भटः । ऋत्वोरन्त्यादिसप्ताहा ऋतुसन्धिरितिस्मृतः । तत्पूर्वो-विधिस्त्याज्यः सेवनीयःपरोविधिरिति ॥

ऋतुस्नानम् । न । रजस्वलायाश्चतुर्थाहकर्त्तव्येस्नाने॥ तत्स्नानानन्तरं भर्त्तुर्मुखंद्रष्टव्यम् । नान्यस्य॥ भर्त्रसन्निधाने भर्त्तारं मनसि ध्यात्वा सूर्यंविलोकयेदितिकाशीखण्डम् ॥

ऋते । अ । वर्जने । विना॥ ऋतीयते । ऋतिःसौत्रोधातुः । ततःके प्रत्ययः॥

ऋत्विक् । पुं । पुरोहिते । याजके ॥ ऋतेयजति ऋतुंयजति ऋतुप्रयुक्तो वायजति । ऋत्विरेषा यथाकथञ्चिद्यु त्पादा । यजदेवपूजादौ । ऋत्विगादिनाक्षिप्तो निपातितः॥ अन्यायेयंपाकयज्ञानग्निष्टोमादिकान्मखान् । यःकरोतिवृतोयस्य सतस्यर्त्विगिहोच्यते इतिमनुः ॥ तेचयज्ञे षोडश भवन्ति । तेषांनामानि यथा । अध्वर्युः १। प्रस्याता २ । नेष्टा ३ । उन्नेता ४ । ब्रह्मा ५ । ब्राह्मणाच्छंसी ६ । अग्नीध्रः ७ । पोता ८ । उद्गाता ९ । प्रस्तोता १० । प्रतिष्टा ११ । अच्छावाकः १२ । होता १३ । मैत्रावरुणः १४ । अच्छावाकः १५ । ग्रावस्तुत् १६ । इति ॥

ऋद्धम् । न । आवसिते धान्ये । सम्यक्पक्वधान्ये॥ परिपक्वमर्द्धितधान्ये ॥ सिद्धान्ते ॥ त्रि । सुसमृद्धे ॥ ऋध्यतिस्म । ऋधुवृद्धौ । क्तः॥

ऋद्धिः । स्त्री । समृद्धौ ॥ देवताविशेषे । पार्वत्याम् ॥ अष्टवर्गान्तर्गतौषधिविशेषे । लक्ष्म्याम् । सिद्धौ ॥ अस्याःस्वरूपम् । यथा । ऋद्धिर्द्विपत्रकन्दौ भवतः कोषयोमले । श्वेतलोमान्वितःकन्दोखतोजाल: सरन्मुकः ॥ सएवऋद्धिर्द्विपत्रभेदमप्येतयोर्भुवे । तूलग्रन्थिसमा ऋद्धि र्वीमावर्त्तफलाचसा ॥ वृद्धिस्तुदक्षिणावर्त्तफलाप्रोक्षामहर्षिभिः ॥ ऋद्धिर्वल्यातिदोषघ्नी युक्तक्षामधुरागुरुः । प्राणैश्वर्यकरीमूर्च्छारक्तपित्तविनाशिनी ॥ औषधकरणे ऋद्धिवृद्ध्योः स्थाने वाराहीकन्दो वला वा देया ॥ ऋध्नोति । ऋधुवृद्धौ । क्तिच् । यद्वा करणे क्तिन् ॥

ऋध्यक् । अ । सत्ये ॥ वियोगे ॥ क्षीणे ॥ सामीप्ये ॥ साधवे ॥

ऋनामा । स्त्री । अदितौ । देवमातरि ॥ ऋनाम ऋस्याः । डाबुभाभ्याम्

ऋनामा

र्चा ११ । अक्तुर्बोह्मणः १२ । होता १३ । मैत्रावरुणः १४ । अच्छावाकः १५ । ग्रावस्तुत् १६ । इति ॥

ऋद्धम् । न । आवसिते धान्ये । सम्यक्पक्वधान्ये॥ परिपक्वमर्द्धितधान्ये ॥ सिद्धान्ते ॥ त्रि । सुसमृद्धे ॥ ऋध्यतिस्म । ऋधुवृद्धौ । क्तः॥

ऋद्धिः । स्त्री । समृद्धौ ॥ देवताविशेषे । पार्वत्याम् ॥ अष्टवर्गान्तर्गतौषधिविशेषे । लक्ष्म्याम् । सिद्धौ ॥ अस्याःस्वरूपम् । यथा । ऋद्धिर्द्विपत्रकन्दौ भवतः कोषयोमले । श्वेतलोमान्वितःकन्दोखतोजाल: सरन्मुकः ॥ सएवऋद्धिर्द्विपत्रभेदमप्येतयोर्भुवे । तूलग्रन्थिसमा ऋद्धि र्वीमावर्त्तफलाचसा ॥ वृद्धिस्तुदक्षिणावर्त्तफलाप्रोक्षामहर्षिभिः ॥ ऋद्धिर्वल्यातिदोषघ्नी युक्तक्षामधुरागुरुः । प्राणैश्वर्यकरीमूर्च्छारक्तपित्तविनाशिनी ॥ औषधकरणे ऋद्धिवृद्ध्योः स्थाने वाराहीकन्दो वला वा देया ॥ ऋध्नोति । ऋधुवृद्धौ । क्तिच् । यद्वा करणे क्तिन् ॥

ऋध्यक् । अ । सत्ये ॥ वियोगे ॥ क्षीणे ॥ सामीप्ये ॥ साधवे ॥

ऋनामा । स्त्री । अदितौ । देवमातरि ॥ ऋनाम ऋस्याः । डाबुभाभ्याम्

ऋषभः

न्यतरस्यामितिडापि ॥

ऋभुः । पुं । देवे । सुरे ॥ ऋशब्दवाच्यः स्वर्गः अदितिर्वा । स्वरादित्वादव्ययम् । तत्र ततो वा भवति इति ऋ पूर्वाद्भवतेर्मितद्वादिभ्य उपसंख्यानमितिडुः । उपपदसमासः । क्विपि ऋभूरपि ॥ ब्रह्मणः पुत्रे परमहंसपरिव्राजके ॥

ऋभुक्षाः । पुं । वज्रे ॥ स्वर्गे ॥ ऋभवो देवाः क्षियन्त्यस्मिन् । क्षिनिवासगत्योः । अन्येभ्योपीतिडः ॥ इन्द्रे ॥

ऋभुक्षाः । पुं । इन्द्रे ॥ पाकशासने ॥ ऋभवो देवाः क्षियन्ति निवसन्त्यत्र । क्षेडः । ऋभुक्षः स्वर्गः । सोऽस्यास्तीति इनिः । ऋभुक्षाः पथिवत् ॥ यद्वा । ऋच्छति द्यवर्त्तीति वा । ऋर्त्तेर्भुक्षिनक् प्रत्ययः ॥

ऋषः । पुं । मृगविशेषे ॥ ऋच्छति द्यवर्त्तिवा । ऋगतौ । बाहुलकात्षक् ॥

ऋषभः । पुं । वृषे ॥ वर्षीरन्ध्रे ॥ कुम्भीरपुच्छे ॥ उत्तरस्थः श्रेष्ठे ॥ अद्रिविशेषे ॥ भगवदवतारविशेषे । आदिजिने ॥ अयश्चस्त्ययुगे ऋमीभस्तस्यनाभेः पुत्रः । ऋषपुत्रोजडभरत ॥ आहचसः । इदंशरीरं मम दुर्विभाव्यं तच्चंचिमे हृदयं यद्वयमः

ऋषभ

। पृष्ठे कृतो मे यदधर्म आरादतोहि मोऋषभं प्राहुराचार्यादति ॥ तन्त्री समुत्थितेकण्ठोत्थितेच सप्तस्वरान्तर्गतेद्वितीयस्वरे ॥ कस्योत्पत्तिः । नाभिमूलाद्यदावर्ण उत्थितः कुरुते ध्वनिम् । ऋषभस्येव निर्यातिर्हेला या ऋषभः स्मृतऋतिसङ्गीतदामोदरः ॥ ऋषति बलीवर्दकृतस्वरसाहश्यं गच्छति । ऋषी गतौ । ऋषिष्टधिभ्यांकिदित्कभच् । गावोनर्दन्ति चर्षभम् ॥ कटवर्गान्तर्गतौषधिविशेषे । शृङ्ग्याम् । विषाण्याम् । कक्षुच्याम् ॥ पश्य गुणान् जीवकें ॥ कोलपुच्छे ॥

ऋषभगजविलसितम् । न । अष्टिसंज्ञ । कपोडग्राचरवृत्तिप्रभेदे ॥ यथा । भविनगैः ऽ ऽ ऽ ऽ ऽ ऽ ऽ ऽ स्वराङ्कऋषभगजविलसितम् । यथा । योशरि रुद्रखान रुदतरनखशिखरै र्दुर्जय दैत्यसिंहमुविकटहृदयतटम् । किञ्चिच्चिदमेत दखिलमपहृतवतः कंसनिदेशहृद्य ऋषभगजविलसितमिति ॥

ऋषभतरः । त्रि । मन्दगतौ भारस्यवोढरि ॥ तनुर्ऋषभः । वत्सोचास्यर्षभेम्यश्चतनुत्वइतिष्टरच् । ङीषि । ऋषभतरी ॥

ऋषिकः

ऋषभध्वजः । पुं । चन्द्रमौलौ । स दाशिवे॥ ऋषभोऽस्यो ध्वजश्चिह्न मस्य ध्वजे अस्यर्वा॥ प्रथमजिने न्द्रे॥

ऋषभी । स्त्री । नराकारयोषिति॥ शू कशिंब्याम्॥ शिराजायाम्॥ विध वायाम्॥

ऋषिः । पुं । वेदे॥ दीधितौ । किरणे ॥ मन्त्रद्रष्टरि । शास्त्रकृदाचार्ये । स त्यवादिनि । भृगुवशिष्ठादिमुनौ । गो त्रप्रवर्त्तके । कश्यपमरद्वाजशाण्डि ल्यादौ॥ सप्त ब्रह्मर्षिदेवर्षिमहर्षि परमर्षयः । काण्डर्षिस्रुतर्षिश्च राजर्षिश्चक्रनावरा इतिरत्नकोषः॥ त त्र ब्रह्मर्षयो वशिष्ठाद्याः१ । देवर्षयः कणादयः२ । व्यासाद्या महर्षयः३ । भेलाद्याः परमर्षयः४ । जैमिन्याद्याः काण्डर्षयः५ । सुश्रुताद्याः श्रुतर्षयः ६ । ऋतपर्णादयो राजर्षयः ७ । ए तेपुराणप्रसिद्धाः । इतिविकाण्डशे षः॥ सूक्ष्मवस्तुविवेचनसमर्थे । स र्व्यापिनि॥ मन्त्रे॥ ज्ञानिनि । त त्त्वज्ञाननिष्ठे॥ ब्रह्मपुत्रे । अवगतप रमार्थे॥ ऋषति जानाति-पश्यति सर्वान्मन्त्रान्। ऋषी गतौ। इगुपधा न्किदितोन्॥

ऋषिकः । पुं । ऋषीके॥

ऋष्यग

ऋषिकुल्या । स्त्री । नदीभाजे॥ शुक्ति मत्पादोद्भवायां नद्याम्॥ ऋषिकु लस्थितायाम्॥ ऋषीणांकुल्यां॥

ऋषिजाङ्गलम् । न । ऋषिजाङ्गलिक्या म्॥

ऋषिजाङ्गलिकी । स्त्री । ऋष्यगन्धाया मं । ऋषिजाङ्गलवृत्ते॥

ऋषिपुत्रः । पुं । आचार्यविशेषे॥

ऋषिप्रोक्ता । स्त्री । माषपर्ण्याम्॥

ऋषियज्ञः । पुं । ब्रह्मयज्ञे । स्वाध्याये॥

ऋषिसर्गः । पुं । सर्गविशेषे॥

ऋषीकः । पुं । काव्याद्यृषिपुत्रे॥

ऋष्टिः । पुं । अस्त्रे । खड्गे॥ उभयतो धा रेखड्गे॥ ऋषति । ऋषी गतौ । क्तिच्॥

ऋष्यः । पुं । मृगविशेषे॥ ऋष्योनीलो रुरुर्लोके सरोमा हरितोकीर्त्तितः॥ ऋषति । ऋषी । अधृन्यादित्वात्-साधुः॥

ऋष्यकेतनः । पुं । अनिरुद्धे॥

ऋष्यकेतुः । पुं । अनिरुद्धे । कामदेवपु त्रे॥ कामदेवे॥ ऋष्योमृगः केतुर स्य॥

ऋष्यगता । स्त्री । ऋष्यप्रोक्तायाम् । ग तमूल्याम्॥

ऋष्यगन्धा । स्त्री । ऋषिजाङ्गलिक्याम् ॥ वृद्धदारके॥

ऋ

ऋष्यप्रोक्ता । स्त्री । शतावर्य्याम् ॥ अति बलायाम् ॥ शूकशिंब्याम् ॥ ऋष्यै र्मुनिभिः प्रोक्ता । ऋषिभिरप्रोक्तावा ॥ ऋष्यमूकः । पुं । अद्रिविशेषे ॥ ऋष्यमूक स्तुपम्पायाः पुरस्तात्पुष्पितद्रुमः । सुदुःखारोहणोनाम शिशुनागाभि रक्षितः ॥ अथवालिभयात्सुग्रीवा दयः पञ्च वानराः स्थिता आसन्नि तिरामायणम् ॥ ऋष्यशृङ्गः । पुं । विभाण्डकसुते मुनिविशेषे ॥ अस्यभार्या लोमपादरा जकन्या शान्ता । इतिरामायणम् ॥

ऋ:

ऋ । च । वाक्यारम्भे ॥ रचायाम् ॥ ऋ । न । वत्सि ॥ पुं । भैरवे । दनुजे ॥ ऋकारे ॥ स्त्री । देवाम्बायाम् ॥ दे नौ ॥ स्मृतौ ॥ गतौ ॥

ऋ:

ऋ । अ । देवतात्मायाम् ॥ देवमातरि

एक:

॥ भुवि ॥ कुत्रे । पर्वते ॥ मन्त्रस्तोम वचने ॥ लटकारे ॥

ऌ:

ऌ । अ । देवनार्याम् ॥ नार्यात्मनि ॥ मातरि ॥ पुं । महादेवे ॥ लृकारे ॥ स्त्री । दैत्यभार्यायाम् ॥ दनुजमा तरि ॥ कामधेनुमातरि ॥ इत्येका क्षरकोषः ॥

ए:

ए । अ । स्तुतौ ॥ असूयायाम् ॥ अनु कम्पायाम् ॥ आमन्त्रणे ॥ द्यूतौ । आ ह्वाने ॥

ए: । पुं । विष्णौ ॥ एकारे ॥

एक: । त्रि । प्रथमसङ्ख्यायाम् ॥ सङ् ख्येये । यद्येकोविप्रः । नतुविप्रस्यैका ॥ एकाकिनि । केवले ॥ एकादाकि निच्च सहाये । चात्यर्थेकन् ॥ श्रेष्ठे ॥ मुख्यरस्मिन् ॥ सत्ये । अद्वि तीये । सजातीयविजातीयादिभे दशून्ये । गुणगुणिभावशून्ये । अनु

मे ॥ एकोन्यार्थे प्रधानेच द्वितीयैकेवले तथा । साधारणे समानेऽलेसङ्ख्यायाञ्च प्रयुज्यते ॥ एति । इण्गतौ । इण्भीकापाशल्यतिमर्चिभ्यःकन्निति कन् ।

एकः । त्रि । असहाये । एकाकिनि । एकला इतिभाषा ॥ एकादाकिनिासहाय इत्यच चकारात्पचेकन्॥

एककार्यः । पुं । परस्परसारके अन्ते वासिप्रभृतिगणे ॥ एकंकार्यमस्य॥

एककार्यत्वम् । न । सङ्गतिविशेषे । एककार्यकारित्वे ॥

एककालः । त्रि । अभिन्नसमये ॥ एकः कालोयस्य ।

एककालिकः । त्रि । समानकालभवे ॥ एककालेभवः । कालाट्ठञ् ॥

एककालीनः । त्रि । एककालिके ॥

एककुण्डलः । पुं । बलरामे ॥ कुबेरे ॥ एकंकुण्डलमस्य ॥

एकगम्यः । त्रि । निर्विकल्पकज्ञानग्राह्ये॥

एकगुरुः । पुं । सतीर्थ्ये ॥ सतीर्थ्यास्त्वेकगुरवः ॥ एकोगुरुर्येषांते परस्परमेकगुरवोभवन्ति ॥

एकचक्रम् । न । मुखपुर्य्याम् । करिगेहे ॥ पुं । असुरविशेषे ॥

एकचक्रा । स्त्री । पुरीविशेषे ॥

एकचरः । पुं । सिंहपशुपक्षिभेदे । गण्ड-

के ॥ त्रि । एकाकिचारिणि । सर्पादौ ॥ व्याघ्रादौ ॥ एकश्चासौ चरश्च । एक एवचरतिवा । चरेःपचाद्यच् ॥ एकचर्य्या । स्त्री । असहायगमने ॥

एकचारी । पुं । बहुसहचारिणि ॥ एकके ॥

एकचित्तः । त्रि । अनन्यमनसि ॥ एकम् अनन्यविषयं चित्तं यस्य ॥

एकजटा । स्त्री । उग्रतारायाम् ॥

एकजन्मा । पुं । भण्डलेशे । भर्यापहे ॥ शूद्रे ॥ एकंजन्मास्य ।

एकजातिः । पुं । शूद्रे ॥ यथा । ब्राह्मणः क्षत्रियो वैश्यस्तुयोवर्णादिजातयः । चतुर्थ एकजातिस्तु शूद्रो नास्तितुपञ्चमइतिस्मृतिः॥ एकाजातिर्जन्म अस्य ॥

एकजातीयः । त्रि । तुल्यजातीये ॥ एकः प्रकारः । प्रकारवचनेजातीयर्॥

एकजीववादी । त्रि । एकश्चैतन्यमेकयैवाविद्ययावद्धं संसरति तदेवकदाचिन्मुच्यते नाक्षादादीनां बन्धमोक्षौस्तः इत्येवंवदनशीले । अयञ्च वादःश्रुतिविरुद्धत्वान्मुमुक्षुभिरनुपादेयः ॥

एकतमः । त्रि । बहूनांमध्ये एकस्मिन् ॥ एकाद्यात्तमिति डतमच् । क

तमो भवतां साधुः ॥

एकतरः । त्रि । द्वयोर्मध्येएकस्मिन् ॥ एकाच्चप्राचामितिडतरच् । कतरो । भवतोर्देवदत्तः ॥

एकतः । अ । एकस्मात् ॥ तसिल् ॥

एकता । स्त्री । एकत्वे ॥ एकस्यभावः । तल् ।

एकतानः । त्रि । अनन्यवृत्तौ । एकवि षयासक्तचित्ते । तन्वते ॥ एकं तानय ति । तनुत्यद्योपकरणयोः । कर्मण्य ण । एकस्मानो विस्तारो स्येतिवा ॥

एकतानकः । पुं । एकाग्रे । अनन्यवृद्द वे ॥ स्वार्थेकः ॥

एकतालः । पुं । समन्वितन्यये । न्रत्य गीतवाद्यानांयत्रसाम्यं तत्रेतियाव त् । विच्छेदरहिते ॥ एकः सम स्ता लोमानमस्येति ॥

एकत्र । अ । एकस्मिन् ॥ त्रल् ॥

एकत्वम् । न । एकतायाम् । अभेदे । भेदव्यावर्त्तके ॥ सायुज्यमुक्तौ ॥ ए कस्यभावः । तस्यभावस्त्वतला वि तिच्चः ॥ एकवचने ॥ यथा । एक त्वंन प्रयुङ्क्तेगुरावात्मनिचेश्वरे इ ति ॥

एकदंष्ट्रः । पुं । गणेशे । विघ्नराजे ॥ ए कादंष्ट्रा त्रस्य ॥

एकदण्डी । पुं । विदिततत्त्वे सन्यासि

नि ॥ यथा । यदातुविदितं तत्त्वं प रम्ब्रह्मसनातनम् । तदैकदण्डं सङ्गृ ह्य सोपवीतां शिखांत्यजेत् ॥ भैक्षं योगासनं योग स्तितिचैकात्मधीर ता । निस्पृहत्वं समत्वञ्च सप्तैतान्ये कदण्डिन इति ॥ एकंदण्डमस्यास्ति । इनिः ॥

एकदन्तः । पुं । विनायके । गणेशे ॥ एकोदन्तोऽस्य स्वब्देनोत्पाटितदन्त त्वात् ॥

एकदा । अ । युगपत् ॥ एकस्मिन् का ले । सर्वैकान्यकिंयत्तदः कालेदा ॥

एकदृक् । पुं । काके ॥ शम्भौ । मद्रा देवे ॥ त्रि । काणे ॥ एकादृक्यस्य ॥

एकदेशः । पुं । अवयवेन प्रतीके ॥ ए कश्चासौदेशश्च ॥

एकदेशी । पुं । अवयविनि ॥ एकदेश शब्दोऽवयवेरूढः । सोस्यास्ति । अ तद्धनिः । यद्यपीह एकशोपूर्वादिति ठञ प्राप्तस्तथापि पूर्वापराधरोत्तर मेकदेशिनेतिनिर्देशादिनिः ॥

एकदेहः । पुं । चन्द्रे । बुधग्रहे ॥

एकधा । अ । एवप्रकारे ॥ प्रकारे धा ॥

एकधुरः । त्रि । एकधुरीये । एकभार वाहके गवादौ ॥ एकाचासौधूश्च । ऋक्पूरित्यः समासान्तः । परवल्लि ङ्गात्स्त्रीत्वम् । टाप् । एकधुरां वह

एकप

ति । एकधुराल्लुक्चेतिखस्यलुक् ॥ एकधुरावहः । त्रि । एकधुरे । एकभारिके ॥ वहति इतिवहः ॥ अच् । एकधुरायावहः ॥

एकधुरीणः । त्रि । एकधुरे ॥ एकाधूः । पूर्वकालैकेतिसमासः । ऋक्पूरित्यः । एकधुरां वहति । एकधुराल्लुकेति चकारेण खस्यानुकर्षणसामर्थ्यात् । पक्षे अवणम् ॥

एकनटः । पुं । कथके । मुख्यनटे । नाटकवर्णनकर्त्तरि ॥

एकपत्नः । त्रि । अनन्यगे ॥ सहाये ॥ एकःपत्नीयस्य ॥

एकपत्नी । स्त्री । सपत्न्याम् ॥ साध्व्याम् ॥ एकः पतिर्यस्या इतिविग्रहे निष्पन्नपत्न्यादिष्विति एकपतिशब्दस्य नकारान्तादिश्चेक्तस्येत्यनेन ङीप् ॥

एकपत्निका । स्त्री । गन्धपचायाम् ॥

एकपदम् । न । तत्काले ॥ पुं । गृहारब्धविशेषे । तल्लक्षणम् । पादमेकं हृदिस्थाप्यद्वितीयं स्कन्धसंस्थितम् । स्तनौधृत्वारमेत् कामीबन्धस्त्वेकपद.स्मृतइति ॥

एकपदी । स्त्री । पथि ॥ एकःपादोऽस्याम् । कुक्षपदीपुचेतिनिपातः ॥ यद्वा । सङ्ख्यासुपूर्वस्येति पादस्यान्तलोपः । पादेत्यन्तरस्यामितिङीप् । स्वा

एकरु

ङ्गाङ्गेतिङीषवा । पाद.पत् ॥

एकपदे । अ । अवस्यादित्यर्थे ॥

एकपात् । पुं । शिवे ॥ विष्णौ ॥ एकः पादोऽस्य । सङ्ख्यासुपूर्वस्येति अन्तलोपः । पादेत्यतिश्रुतिः ॥

एकपिङ्गः । पुं । कुबेरे । धनाधिपे ॥ साहसं गौरीनिरीक्षणे तत्प्रभावात् वामेचक्षुषिनष्टे रुद्रानुनयात् तत्पिङ्गिमचिह्नं देव्या दत्तम् । अतएकं पिङ्गमस्य ॥

एकपिङ्गलः । पुं । गुह्यकेश्वरे । कुबेरे ॥ एकपिङ्गंलाति । ला० । आतोनुपेतिकः ॥

एकभक्तव्रतम् । न । रात्रिभोजनाभावविशिष्टे दिवाभोजने ॥ तदुक्तंस्कन्दपुराणे ॥ दिनार्द्धसमयेऽतीतेभुज्यते नियमेनयत् । एकभक्तमितिप्रोक्तं रात्रौतन्नकदाचनेति ॥

एकमूला । स्त्री । शाखगण्डीम् ॥ अतस्याम् ॥

एकयष्टिका । स्त्री । हारविशेषे । एकायष्ट्याम् । एकावलीकाहारइतिभाषा ॥

एकरजः । पुं । भृङ्गराजे । भंगरा । इतिभाषा ॥

एकराड् । पुं । चक्रवर्त्तिनि ॥

एकरूप । त्रि । समानाकारे ॥ एकंरूपं यस्य सः ॥

एकर्षिः । पुं । सूर्य्ये ॥ एक एव ऋषति गच्छति । इन् ॥

एकलः । त्रि । एकाकिनि । अद्वितीये ॥ इतिपदावली ॥ अनवयवे ॥

एकलिङ्गः । पुं । कुबेरे । त्र्यम्बकसखे ॥ नं । साधनस्थलविशेषे ॥ तथाचागमः । पञ्चक्रोशान्तरे यत्र न लिङ्गान्तरमीक्ष्यते । तदेकलिङ्गमाख्यातं तत्र सिद्धिरनुत्तमेति ॥

एकवचनम् । न । येन पदेनैकोऽर्थ उच्यते तस्मिन् । एकस्यार्थस्य वचनम् । वचेः करणेल्युट् ॥ कर्मणिषष्ठ्यासमासः ॥

एकवर्णी । स्त्री । वाद्यप्रभेदे । करतालयाम् । कङ्कमाख्यायाम् ॥

एकवर्षिका । स्त्री । एकहायन्यां द्रवि ॥ एकःवर्षोयस्याः । एकवर्षैव । कः । इत्त्वम् ॥

एकवाद्यः । पुं । डिण्डिमवाद्ये ॥

एकविंशतिः । स्त्री । एकाधिकविंशतौ ॥ यथा । नियुक्तस्तु यथान्यायं योमांसं नात्ति मानवः । सप्रेत्य पशुतां याति सम्भवानेकविंशतिमिति मनुः ॥ नैयायिकमते एकविंशतिदुःखानि यथा । षडिन्द्रियाणि षड्रूपादयोविषयाः षडरूपादिज्ञानानि सुखम् दुःखम् शरीरञ्चेति । एकविंशतिदुःखनिवृत्तिर्मुक्तिरिति ॥

एकवीरः । पुं । वृक्षविशेषे । महावीरे । सङ्कवीरे ॥ हैहये । कृतवीर्यपितरि ॥

एकवृक्षः । पुं । स्थानविशेषे ॥ यथा । चतुष्क्रोशान्तरे यत्र न वृक्षान्तरमीक्ष्यते । एकवृक्षःसविज्ञेयः इत्यागमः ॥

एकशफः । पुं । अश्वे ॥ एकखुरेजन्तुमात्रे ॥ यथा । खरोश्वोश्वतरोगौरः शरभश्चमरीतथा । एतेचैकशफाः प्रोक्ताः शृणु पञ्चनखान्मृगान् इति श्रीभागवतम् ॥

एकशृङ्गः । पुं । हरौ ॥ एकशृङ्गे पशौ ॥

एकशेषः । पुं । समासप्रभेदे ॥

एकश्रुतिः । स्त्री । उदात्तानुदात्तस्वरितानामविभागेनोच्चारणे ॥ एकाचामेकश्रुतित्व ॥

एकषष्टिः । स्त्री । सङ्ख्यासङ्ख्येयविशेषे ॥ एकाधिकाषष्टिः ॥

एकसर्म्मः । त्रि । अनन्यमनसि । एकतानेः । एकाग्रे ॥ एक एकस्मिन्वा सर्गो निश्चयोऽस्य ।

एकसूचः । पुं । डमरुवाद्ये ॥

एकस्थः । त्रि । एकत्रस्थिते ॥ एकस्मिन् तिष्ठति । ष्ठा । कः ॥

एकहायनी । स्त्री । एकाब्दायांगवि ॥ एकःहायनोयस्याः । द्व्यादिहायनान्ता

एकाग्रः

ङेति ङीप् ॥

एका । स्त्री । आर्यायाम् । कोट्टव्याम् । पार्वत्याम् ॥ इतिविकाण्डशेषः । यथा । एकैवाहंजगत्यत्रेति । एकैव शक्तिः परमेश्वरस्य भिन्ना चतुर्द्धा व्यवहारकाले । भोगे भवानी पुरुषे पुरुषिण्युकोपेषु काल्युसमरेषुदुर्गेतिच ॥

एकाकी । त्रि । एकके । एकले ॥ एकादाकिनिच्चासहाये ॥

एकाक्षः । पुं । काके ॥ त्रि । काणे ॥ एकमक्षि यस्य । षच् ॥

एकाक्षरम् । न । प्रणवे ॥ एकश्चतदक्षरञ्च ॥

एकाग्रः । त्रि । अनाकुले ॥ विषयान्तराचाचित्तचित्ते । एकताने । विक्षेपरहिते ॥ एकम् एकस्मिन्वा अग्रमस्य । अग्रंपुरोगतंज्ञेयमितिस्वामी ॥ चित्तस्य चतुर्थ्यांभूमौ । एकाग्रचित्ते ॥ एकविषयकधारावाहिकवृत्तिसमर्थातत्त्वोद्रेकेण तमोगुणकृततन्द्रादिरूपजडतयाभावादात्माकारावृत्तिः साच रजोगुणकृतचाञ्चल्यरूपविक्षेपाभावादेकविषयैवेति शुद्धे सत्त्वे भवति चित्तमेकाग्रम् । अस्यां भूमौ सम्प्रज्ञातःसमाधिः तत्रार्थेयाकारावृत्तिरपि भासते ॥

एकाद

एकाग्र्यम् । त्रि । एकाग्रे ॥ एकमग्र्यमस्य ॥

एकाङ्गः । पुं । वृधग्रहे ॥ न । चन्दने ॥

एकाङ्गीसुगन्धः । पुं । कर्पूरादीनाङ्गणे । सुगन्धगणे ॥

एकात्मा । पुं । परमात्मनि विष्णौ ॥ एकः केवलोऽद्वितीयश्चासावात्माचेत्येकात्मा । जीवेश्वरभेदस्य जीवानांपरस्परभेदस्य जडतद्भेदस्यच मिथ्यात्वात् ॥ ज्ञानंज्ञेयं तथाज्ञाता त्रितयं भाति मायया । विचार्यमाणे त्रितये आत्मैवैकोऽवशिष्यत इतिश्रीमहानिर्वाणतन्त्रोक्तेश्च ॥ आत्मनोऽन्यद्विजानीहिसर्वं त्यैवचागमादिष्वुक्तेश्च ॥

एकादशः । त्रि । एकादशानाम्पूरणे ॥ तस्य पूरणेडट् ॥

एकादशकः । पुं । इन्द्रियाङ्गवेगखे ॥

एकादश । त्रि । एकाधिकदशसङ्ख्यायाम् । ११ ॥ सङ्ख्येये ॥ यथा । एकादशेन्द्रियाणीति । तत्र । बुद्धीन्द्रियाणि चक्षुःश्रोत्रघ्राणरसनत्वगाख्यानि । वाक्पाणिपादपायूपस्थान् कर्मेन्द्रियाण्याहुः ॥ उभयात्मकमत्र मनः ॥ मनोधिष्ठितानामेवहि चक्षुरादीनां रागादीनाञ्च स्वस्वविषयेषुप्रवृत्तेः । एकादशसु इन्द्रियेषु मध्ये मन उभयात्मकम् ॥

एकान्त

एकादशद्वारम् । न । शरीराख्येपुरे ॥ एकादशेद्वाराणि अस्य । संज्ञायांपूर्वपदानि नाम्यासहार्वाञ्चीनि शिरस्येकम् । तेरेकादशद्वारमवति शरीराख्यम्पुरम् ॥

एकादशी । स्त्री । हरिदिने । हरिवासरे ॥ सातु शुक्लपक्षे सूर्यमण्डलात् चन्द्रमण्डलस्य निर्गमरूपैकादशकलाक्रियारूपा । कृष्णपक्षेसूर्यमण्डलेचन्द्रमण्डलस्यप्रवेशरूपैकादशकलाक्रियारूपा ॥ तत्रजातस्यफलम् ॥ क्रोधोत्कटः क्लेशसहः सुभगो योगादिकर्त्तास्वजनैकभर्त्ता । महामतिर्देवगुरुप्रियः स्यादेकादशी जोमनुजोतिहृष्टः ॥ एकादशानां पूरणी । डङन्तान्ङीप् ॥

एकाद्विंशिति । वि । एकोनविंशत्याम् ॥ एकेन न विंशतिः । एकादिश्चैकस्य चादुक् ॥

एकानंशा । स्त्री । पार्वत्याम् ॥

एकान्तम् । न । अत्यन्ते । अतिमात्रे । निर्भरे ॥ नियते ॥ क्रियाविशेषणत्वेऽस्यक्लीवत्वम् । द्रव्यविशेषणेतु वाच्यलिङ्गत्वम् ॥ वि । निर्जने । जनैरनाकीर्णे ॥ एकः अन्तः निश्चयोऽत्र । एकस्मिन्नेव अन्तः समाप्तिर्वस्यवा ॥

एकान्ततः । अ । अव्यभिचारिणि ॥

एकाय

एकान्तवादी । पुं । सप्तपदार्थवादिनि नास्तिकविशेषे ॥

एकान्ती । वि । विष्णुभक्तविशेषे ॥ यथा । एकान्तेनासमो विष्णुर्यस्मादेषो परायणः । तस्मादेकान्तिनः प्रोक्तास्तद्भागवत चेतसइत्यादिगरुडे १३१ अध्यायः ॥

एकान्नः । वि । एकभक्ते ॥

एकान्नविंशतिः । वि । एकोनविंशतौ ॥ एकेन नविंशतिः । नञोविंशत्या समासेकृते एकशब्देनसह तृतीयेति योगविभागात् समासः । अनुनासिकविकल्पः ॥

एकापारम् । न । तुष्टे प्रभेदे ॥ सेवादयोऽजनोपायाः तेचसेवकादीन् दुःखंकुर्वन्ति । इत्यदुरीश्वरदारस्वदण्डदण्डाद्यंचन्द्रजाम् । वेदनांभावयन् प्राज्ञः कः सेवासु प्रसज्यते ॥ एवमन्ये व्यजनोपायाः दुःखा इति विषयोपरमे या सन्तुष्टिः सा एकापारमुच्यते ॥

एकाब्दा । स्त्री । एकहायन्याङ्गवि ॥ एक अब्दोयस्याः सा ॥

एकाम्बरम् । न । पुरुषोत्तमक्षेत्रसन्निधौ वर्त्तमाने भुवनेश्वरनाम्नि विश्रुते परमशक्तिप्रतिष्ठिते पवित्रस्थाने ॥

एकायन । वि । एकाश्रये ॥ एकस्तने

॥ एकमयन मस्य ॥ न । नीतिशास्त्रे ॥ एकायनगतः । त्रि । एकाग्रे । एकताने ॥ एकश्चतदयनञ्च । एकायनंगतः । एकस्मिन्नयने गतं ज्ञानमस्येति वा ॥ एकावली । स्त्री । एकयष्टिकाख्ये हारे ॥ एकषड्त्याम् ॥ अर्थालङ्कारप्रभेदे ॥ यथा । गृहीतमुक्तरीत्यार्थमेखिरे कावली मता । नेचे कर्णान्तविश्रान्ते कर्णौ दोस्तम्भदोलिनौ ॥ दोस्तम्भौजानुपर्यन्तप्रलम्बनमनोहरौ । जानुनी रत्नमुकुराकारे तस्य हि भूभुजः ॥ उत्तरोत्तरस्य पूर्वपूर्वविशेषणभावः पूर्वपूर्वस्योत्तरोत्तरविशेषणभावो वा गृहीतमुक्तरीतिः । तत्राद्यः प्रकार उदाहृतः । द्वितीयो यथा । दिक्कालात्मसमेव यस्य विभुता यस्तत्त्वविद्योतते यस्यामुष्य सुधी भवन्ति किरणा राशेः स यासा मभूत् । यस्तत पित्तमुषः सुयोस्य हविषं यस्तस्य जीवातवे बोढा यद्गुणमेषमन्यधरिपोस्ताः पान्तु वेनूर्त्तयः ॥ अपिच । स्याप्यतेऽपोह्यतेवापि यया पूर्वंपरम्परम् । विशेषणतया यत्तवस्तु सैकावली द्विधा ॥ पूर्वंपूर्वं प्रतियत्तोत्तरोत्तरस्य वस्तुनोवी मयाविशेषणभावेन यत् स्थापनं निषेधोवासम्भवति सा द्विधाबुधै रेकावली भण्यते ।

क्रमेणोदाहरणम् । पुराणियस्यां सवराङ्गनानि वराङ्गनारूपपुरस्कृतानि दृश्यः । रूपंसमुन्मीलितसद्विलासमस्तं विलासाः कुसुमायुधस्य ॥ नृत्तज्ञं यन्न सुचारुपङ्कजं न पङ्कजत्तद्वदनं षट्पदम् । नषट्पदोसौ कलगुञ्जितो न यो न गुञ्जितं तन्न जहारयन्मनः ॥ पूर्वत्रपुराणां वराङ्गनास्तासामङ्गविशेषणमुखेन रूपं तस्य विलासास्तेषामप्यसम्भित्त्यमुना क्रमेण विशेषणं विधीयते । उत्तरत्र प्रतिषेधे प्येवंयोज्यम् ॥ एकावलीच ॥

एकाश्रयः । त्रि । अनन्यगतौ । अनन्यगतिके ॥

एकाश्रितगुणः । पुं । एकवृत्तिधर्म्मे ॥ यथा । रूपम् १ रसः २ गन्धः ३ स्पर्शः ४ एकत्वम् ५ एकपृथक्त्वम् ६ परिमाणम् ७ परत्वम् ८ अपरत्वम् ९ बुद्धिः १० सुखम् ११ दुःखम् १२ इच्छा १३ द्वेषः १४ यत्नः १५ गुरुत्वम् १६ द्रवत्वम् १७ स्नेहः १८ संस्कारः १९ अदृष्टम् २० शब्दः २१ ॥ इतिसिद्धान्तमुक्तावली ॥

एकाष्टीकः । पुं । वकपुष्पे । शिवमल्लिकाम् ॥ एकमस्यास्तीति । ला० । कः । सुधामादित्वात्पत्वम् । दीर्घत्वञ्च ॥

एजन

एकाष्ठीला । स्त्री । पाठायाम् । वनति क्तिकौषधौ॥ टाप् ॥

एकाहः । पुं । एकदिने ॥

एकाहगमः । त्रि । एकाहगम्यमार्गे ॥ एकाहेन गम्यते । कर्त्तृकरणे कृते तत्समासः ॥

एकाहारः । पुं । एकदिनवृत्त्येकवार भोजने ॥ यथा । एकाहारः सदा कार्य्यो न द्वितीयः कदाचन । पर्य्यङ्कशायिनी नारी विधवा पातयेत् प तिमितिस्मृतिः॥ त्रि । तद्वति ॥

एकीभावः । वि । विवेकानर्हत्वेनाविश्लेषतां प्राप्ते॥

एकीयः । त्रि । एकपक्षे । सहाये ॥

एकेन्द्रियसंज्ञा । स्त्री । वैराग्यविशेषे । इन्द्रियवृत्त्यसमर्थतया पञ्चानां कषायाणामौत्सुक्यमात्रेण मनसि व्यवस्थाने ॥ अथवा दृष्टानुश्रविकविषयप्रवृत्तेर्दुःखात्मकत्वबोधेन बहिरिन्द्रियप्रवृत्तिं भजनयन्त्याअपि तृष्णाया श्चौत्सुक्यमात्रेण मनस्यवस्थाने ॥

एकोद्दिष्टम् । न । प्रेतोद्देश्यकश्राद्धे ॥ एकोद्दिष्टविधिकसांवत्सरिके ॥ एक एव उद्दिश्यतेयत्र तत् ॥ एकमुद्दिश्य यच्छ्राद्धमेकोद्दिष्टं तदुच्यते ॥

एकोशिका । स्त्री । पाठायामोषधौ ॥

एजनम् । न । कम्पने ॥ पुं । बहि श्वा

एण

मे ॥ त्रि । कम्पके ॥

एडः । पुं । मेषे ॥ त्रि । बधिरे॥ इल ति । इलस्वप्ने । अच् । डलयोरै क्यम् ॥ यद्वा । आसर्वतः ईड्यते । ई डस्तुतौ । घञ् । अच्वा॥

एडक । पुं । वनच्छगले ॥ एडकस्य प लंचेयं मेषामिषसमं गुणे' ॥ पृथुशृ द्गे मेषे । मेढ्रे । उरभ्रे ॥ इलति । एल यतिवा । इलस्वप्नक्षेपणयोः । ण्वुल् । डलयोरैक्यता ॥

एडका । स्त्री । मेष्याम् ॥ अजादित्वा ट्टाप् । क्षिपकादित्वान्नेत्वम् ॥

एडगज । पुं । दद्रुघ्ने । चक्रमर्दके ॥ ए डो मेष एव गजो यस्य भक्षकत्वात् ॥ यद्वा । एलनम् । इलक्षेपे स्वप्ने च । घञ् । डलयोरैक्यता । एडे स्वप्ने गजति । गजमदशब्देच । अच् ॥

एडमूकः । त्रि । वाक्श्रुतिवर्जिते ॥ ग ठे ॥ एडोबधिरश्चासौ मूकश्च ॥

एडुकम् । न । एडूके ॥

एडूकम् । न । अन्तर्न्यस्तकीषधे कुम्भे ॥ ईड्यते । ईडस्तुतौ । उलूकादय श्चेतिसाधु ॥

एडोकम् । न । एडूके ॥ इतिविरूपकोषः ॥

एण । पुं । कृष्णवर्णे मृगे । हरिण जातिविशेषे ॥ अस्यमांसगुणाः । ए

एतनः

सः कषायो मधुरः पित्तास्रकफघात हृत्। सङ्ग्राही रोचनो वल्यो ज्वरघ्न श्रमनः स्मृत इति ॥ अपिच। एणो निलकफध्वंसी किञ्चित् पित्तकरो लघुः। उष्णो ग्राही रसेस्वादु र्बल्यो ज्वरहरःस्मृत इति ॥ एति। वाहुल काम्बुः ॥

एणकः। पुं। एणे ॥ स्वार्थेकः ॥

एणतिलकः। पुं। चन्द्रमसि ॥ एणस्ति लकमिव यस्य ॥

एणभृत्। पुं। चन्द्रे ॥

एणी। स्त्री। मृग्याम् ॥ एणस्य स्त्री। पुंयोगादितिङीष् ॥

एणीनयना। स्त्री। मृगाक्ष्याम् ॥ एणस्याः नयने इव नयने यस्याः। एणीनयने केलीकलङ्के प्रेयान् वदकिं किं नो कुरुते। धन्या रमणी सर्वं सहते दुःखं सुखवत् स्वान्ते मनुते॥

एतः। पुं। कर्बुरवर्णे ॥ त्रि। आगते ॥ कर्बुरवर्णयुक्ते ॥ एति वर्णान्। इण्° । इसिसृगिण्वामिदमिलूपूधूर्विभ्य स्तन्निति एतेस्तन् ॥

एतद्। त्रि। आसन्नवृत्तिस्थे। पुरोवर्त्ति वाचके सर्वनामनि ॥ एति इण्° । एतेस्तुट्चेत्यदिः ॥ निश्चायपरोक्ष आत्मनि ॥

एतनः। पुं। निश्चये ॥

एधः

एतर्हि। अ। सम्प्रति। इदानीम् ॥ अस्मिन्काले। इदमोर्हिल्। एतेतौ रथोः ॥

एतशः। पुं। द्विजोत्तमे। ब्राह्मणे ॥ एति। इण्° । इणस्तशन्तशसुनाविति तशन् ॥

एतशाः। पुं। ब्राह्मणे ॥ एति। इण्° । इणस्तशन्नितितशसुन् ॥ अत्वसन्त्स्येतिदीर्घः। एतशसौ। एतशसः॥

एता। स्त्री। आगतायाम् ॥ कर्बुरवर्णायाम् ॥ वर्णादनुदात्तात् तोपधात् तोनेति षाचिकोङीष्। तत्सन्नियोगशिष्टस्तकारस्य नकारादेशश्च न ॥

एतावान्। त्रि। एतत्परिमाणविशिष्टे ॥ एतत् परिमाणमस्य। यत्तदेतेभ्यः परिमाणेवतुप। आसर्वनामः॥ एतावान् साङ्ख्ययोगाभ्यां स्वधर्म परिनिष्ठया। जन्मलाभः परः पुंसा मन्ते नारायणस्मृतिः ॥

एध। पुं। इन्धने। ईंधन इति भाषा॥ इध्यतेऽनेनाग्निः। त्रिरन्धीदोसौ। हलश्चेति करणेघञ्। अवोदैधौद्म्रन्थदंशिमन्थय इति घञिनलोपोगुणश्चनिपातितः॥

एधतुः। पुं। पुरुषे ॥ अयौ ॥ एधते। एध°। एधियजोस्तुः॥

एधः। न। यज्ञियसन्दीपनार्थे काष्ठे।

एरण्डः

समिधि । इन्धने ॥ एधतेऽनेन । ए ध० । असुन् ॥

एधा । स्त्री । समृद्धौ ॥ एधनम् । एध० । गुरोश्चेत्यः । टाप् ॥

एधितः । त्रि । प्रवृद्धे । वर्द्धिते ॥ एधते । मत्वर्थेतिक्तः ॥

एनह । न । पापे ॥ अपराधे ॥ एतिग च्छति प्रायश्चित्तेन । इण आगसी त्यसुन् नुडागमश्च ॥

एनी । स्त्री । एतायाम् ॥ अवपाच्चिको ङीप् । तकारस्य नकारादेशश्च ॥

एरका । स्त्री । निर्गुण्डिवृक्षविशेषे । ए रकागुन्द्रमूलाच शिग्रु गुन्द्रा शरी तिचेतिनामान्तराणि । पटेरा इति भाषा ॥ एरका शिशिरा वृष्या चक्षुष्या वातकोपिनी । मूत्रकृच्छ्राश्मरी दाहपित्तश्लेष्मास्रनाशनी ॥

एरङ्गः । पुं । अरङ्गा रङ्गा इतिगौडेषु प्रसिद्धे मत्स्यविशेषे । एरङ्गो मधुरः स्निग्धोविष्टम्भी शीतलो गुरुरिति चास्यगुणाः ।

एरण्डः । पुं । अरण्ड इतिभाषाप्रसिद्धे वृक्षविशेषे । उरुबूके ॥ अस्यगुणा यथा । एरण्डयुग्मं मधुरं मृष्णं गुरु विनाशचेत् । शूलशोथकटीवस्तिशिरः पीडोदरज्वरान् ॥ ग्रहभ्वास कफानाहकासकुष्ठामवातनिति।

एरण्ड

एरण्डयुग्मम् शुक्लरक्तैरण्डौ ॥ एरण्डपत्रं वातघ्नं कफकृमिविनाशनम् । मूत्रकृच्छ्रहरञ्चापि पित्तरक्तप्रकोपणम् ॥ वातार्शग्रदलं गुल्मवस्तिशूलहरम्परम् । कफवातकृमीन् हन्ति वृद्धिंसप्तविधामपि ॥ एरण्डफलमत्युष्णंगुल्मशूलानिलाशयम् यकृत्प्लीहोदरार्शोघ्नं कटुकं दीपनं परम् ॥ तद्वन्मज्जा च विड्भेदी वातश्लेष्मोदरापहः इति ॥ कार्येऽस्यमूलंसंशुष्कमित्याङ्कुरपरेजनाः ॥ आ ईरयति वायुम् । ईरगतौ कम्पनेच । वा हुलकाद्दण्डच् ॥

एरण्डकः । पुं । एरण्ड ॥ स्वार्थेकः ॥

एरण्डतैलम् । न । एरण्डस्यस्नेहे ॥ स्नेहेतैलच् ॥ गुणा यथा । एरण्डतैलंतीक्ष्णोष्णं दीपनं पिच्छिलंगुरु । वृष्यं त्वच्यं वयःस्थायि मेधाकान्तिबलप्रदम् ॥ कषायानुरसं स्वल्पंयोनिशुक्रविशोधनम् । विस्रंस्यादुरसं याकेसतिलंकटुकं सरम् ॥ विषमन्दरक्तदोषगृध्रसीगुल्मादिशूलहृत् । हन्तिवातोदरानाहगुल्मपाष्ठीलाकटिग्रहान् ॥ वातशोणितविड्बन्धप्लीहार्शोयामविद्रधीन् ॥ आमवातगजेन्द्रस्य शरीरवनचारिणः । एकएवनिहन्तायमेरण्डस्नेहकेसरीति ॥

एलवा

एरण्डपत्रिका । स्त्री । दन्तोष्ठे ॥
एरण्डफलम् । न । रेंडीइतिप्रसिद्धे ए
रण्डस्य फले । ऐरण्डे ॥ ऐरण्डं को
मलं ग्राह्यं फलं तत्कोष्ण स्वेदितम् । पा
चितं कटुतैलेन छिन्नमाति सुवासि
तम् ॥ कफानिलहरं दृष्यं हृद्यमु-
ष्णञ्च पित्तलम् । अग्निसज्जननं रुच्यं
गुरुपाकेति पिच्छिलम् ॥
एरण्डफला । स्त्री । लघुदन्त्याम् ॥
एरण्डा । स्त्री । } पिप्पल्याम् ॥ इति
एरण्डी । स्त्री । } शब्दचन्द्रिका ॥
एर्वारुः । पुं । कर्कटीप्रभेदे । लोमशा
याम् । हस्तिदन्तफलायाम् ॥ आई-
रणम् । ईर° सम्पदादित्वात् क्विप्
। एरंडणोति वारयतिवा । दृष्° ।
बाहुलकादुण् ॥
एलकः । पुं । मेषे ॥ इतिराजनिर्घण्टः ॥
एलङ्गः । पुं । सत्त्वविशेषे । गौडभाषायां
रायकडा रायखाँडा एलङ्गा इति
च ख्याते ॥ एलङ्गो मधुरो वृष्यः
सङ्ग्राही कफवातहा । मेधाग्निपुष्टि
कारीच शीतलोगुरुरेवच ॥ श्लेष्म-
प्रसादनः प्रोक्तोनिर्घण्टे राजपूर्वके ॥
एलवालुकम् । न । सुगन्धिद्रव्यविशेषे
। वालुके । ऐलेये । चालुका इतिगौ
डभाषा ॥ एलति । इलप्रेरणे । पचा

एल्वालु

द्यच् । टाप । एलाइव वलते । वलप्रा
णने । बाहुलकादुण् । स्वार्थेकन् ।
डयापोरितिह्रस्वः ॥
एला । स्त्री । इलायचीति भाषासिद्धा
यां बहुलगन्धार्यायाम् । ऐन्द्र्याम् ॥
सा द्विविधा । स्थूलास्थूलेति भेदा
त् ॥ स्थूलोपकुञ्चिका तुत्याको
रङ्गी त्रिपुटा त्रुटि रित्यादिनाम
भिः प्रसिद्धा ॥ स्थूलातु । पृथ्वी-
का चन्द्रबालाच निष्कुटिर्बहुलात
येत्यादिभिःख्याता ॥ अस्यागुणास्तु
स्थूलैलायां स्थूलैलायाश्चद्रष्टव्याः ॥
एलयति । इलप्रेरणे । पचाद्यच् ।
टाप् ॥
एलापत्र । पुं । नागविशेषे ॥
एलापर्णी । स्त्री । सुपक्षायाम् । रा-
लायाम् । युक्तरसायाम् । काँटाआ
मरुली एलानी इति गौडभाषा ॥
एलाइव पर्णान्यस्याः । पाकर्णेति
ङीप् ॥
एलावालुकम् । न । ऐलेये । एलवालु
के ॥ ह्रस्वाभावः प्रक्रियापूर्ववत् ॥
एलीका । स्त्री । स्थूलैलायाम् ॥
एल्वालु । न । एलवालुके ॥ एल्वालु क
टुकं पाके कषायं शीतलं लघु । ह
न्ति कण्डूगण्डदर्दिहृट्कासाक्षिह
ट्टुजः ॥ वलासविषपित्तास्रकुष्ठमूष-

एवम्

गंदकुमीन् ॥

एव । अ । औपम्ये ॥ अनवकृप्तौ । अ
नियोगे ॥ वाक्यपूरणे ॥ अवधारणे ॥
चारनियोगे ॥ विनिग्रहे ॥ एवका
रस्त्रिविधः । विशेष्यसङ्गतः विशेषण
सङ्गतः क्रियासङ्गतश्चेति । तत्र विशे
ष्यसङ्गतस्यैवकारस्य अन्ययोगव्यव-
च्छेदोऽर्थः । पार्थएव धनुर्द्धर इत्या
दौ विशेषणे धनुर्द्धरे पार्थान्ययोगव्य
वच्छेदबोधात् । धनुर्द्धरपदस्योत्कृष्ट
धनुर्द्धरत्वाच्चणिकत्वात् तथैवतात्प
र्यात् । पार्थान्ययोगस्तादात्म्यम् ॥
विशेषणसङ्गतस्यैवकारस्य योगव्यव
च्छेदोर्थः । शङ्खः पांडुर एवेत्यादौ
विशेष्ये शङ्खे पांडुरत्वा योगव्यवच्छे
दबोधात् ॥ क्रियासङ्गतस्यैवकारस्य
चात्यन्तायोगव्यवच्छेदोर्थः । सम्म
वाभिप्रायके नीलंसरोजं भवत्येवे
त्यादावन्वयितावच्छेदकसरोजत्व
सामानाधिकरण्येन सरोजनील-
भवनकर्तृत्वात्यन्ताऽयोगव्यवच्छेद
बोधादिति सम्प्रदायः ॥ परिभवे ॥
ईषदर्थे ॥ अयनम् । इण् गीभ्यां वन् ॥

एवं । चि । गन्तरि । गमनकर्त्तरि ॥ ए
ति । इण् । इण् गीभ्यां वन् ॥

एवम् । अ । उपमायाम् । सादृश्ये । व
त् । या । यथा । तथा । इवेत्यस्य

एष्टव्यः

पर्य्यायाः ॥ यथा । अग्निरेवं विप्रः ।
अग्निरिवेत्यर्थः ॥ इदंप्रकारे । इ
त्थम् ॥ यथा । एवं वादिनि विप्रवौ
। अवधारणे । यथा । एवमेतत् ॥ अ
ङ्गीकारे ॥ अर्थप्रश्ने ॥ परकृतौ ॥ पृ
च्छायाम् ॥

एषणः । पुं । लौहमयेषाणे ॥

एषणा । स्त्री । इच्छायाम् । पुत्रलोक
वित्तकामनासु ॥ न कश्चिदन्यः सं
सारउक्तादस्त्येषणात्रयात् ॥ दृषेर्ल्यु
टिटार्पं ॥

एषणिका । स्त्री ॥ एषणायाम् । नारा-
च्याम् । स्वर्णकारादीनांतुलायाम् ।
निक्ति इतिगौडभाषा । काँटाइति
देशभाषा ॥ इष्यतेऽनया । इषगतौ ।
ल्युट् । स्वार्थे कः । टाबित्त्वे ॥

एषणी । स्त्री । एषणिकायाम् ॥ व्रणमा
र्गानुसारिण्याम् । व्रणवेधशलाका
याम् । वेलकार इतिगौडभाषाप्रसि
द्धायाम् ॥ चेतनाभिदि । इष्यतेऽने
या । इषग° । ल्युट् । गौरादिषु एष
णः करणइति ङीष् ॥

एषितव्यः । वि । अन्वेष्टव्ये ॥ एषितुं यो
ग्यः । तव्यः ॥

एष्टव्यः । वि । एषितव्ये ॥ यथा । एष्ट-
व्या बहवः पुत्रा यद्येकोपि गयांव्रजे
त् । यजेत वाश्वमेधेन नीलंवाएष

ऐकान्यि

नुत्सृतेदिति ॥

ऐ:

ऐ । अ । चूतौ । आह्वाने ॥ स्मृतौ ॥ आमन्त्रणे ॥ शोधने ॥ ऐकारे ॥

ऐ: । पुं । मन्त्रेश्वरे ॥

ऐकध्यम् । अ । एकधार्थे ॥ एकाद्धोध्यमुञन्यतरस्यामिति धा प्रत्ययस्य ध्यमुञ् ॥

ऐकभाव्यम् । न । एकभावत्वे ॥ ब्राह्मणादित्वात् ष्यञ् ॥

ऐकरस्यम् । न । सामरस्ये ॥ एकरसस्य भाव: । ष्यञ् ॥

ऐकागारिक: । त्रि । चौरे । तस्करे ॥ एकमसहायमगारं प्रयोजनमस्य । ऐकागारिकट् चौर इतिइकट् वृद्धिश्च निपातनात् ॥ स्त्रियां टित्वात् ङीपि । ऐकागारिकी ॥

ऐकाग्र: । त्रि । एकतानें ॥ एकाग्रात् स्वार्थेऽण् ॥

ऐकात्म्यम् । न । ऐक्ये ॥ एकात्मनोभाव: । ष्यञ् ॥

ऐकान्तिक: । त्रि । अव्यभिचारिणि । साधनानन्तर मवश्यम्भाविनि ॥

ऐकाध्यिक: । पुं । एकाध्यपाठेच्छाये ॥ यस्याध्ययने प्रवृत्तस्य परीक्षाकाले

ऐक्ष्वाक

विपरीतोच्चारणरूपं स्खलितमेकं-जातमेनेनोच्यते । एकमन्यदुत्तमस्ट । कर्माध्ययनेवृत्तमिति ठक् । एकमन्यदिति विगृह्य तद्धितार्थ इति समास: । ततष्ठक् । एवं द्वैयन्यिक: चैयन्यिक: ॥

ऐकाह्निक: । त्रि । एकाह्ननिष्पन्ने ॥ पुं । एकाह्नानन्तरभवे ज्वरे ॥ द्व्येद्युने एककालेसमागतज्वरे ॥ समुद्रस्योत्तरे तीरे द्विविदो नामवानर: । ऐकाह्निकज्वरंहन्तितस्य नामानुकीर्त्तनात् ॥ एकाह्नेभव: । ठक् ॥

ऐक्यम् । न । अभेदे । एकात्मभावे । एकत्वे व्यतिरेकाभावे ॥ भावेष्यञ् ॥

ऐक्षवम् । न । मोरटे । इक्षोर्मूले ॥

इक्षोरिदम् । अण् ॥ त्रि । इक्षोर्विकारे । गुडादौ ॥ तद्वयवे ॥ विक्षादण् ॥

ऐक्ष्वाक: । पुं । सूर्यवंश्यनृपे ॥ इक्ष्वाकोरपत्यम् । जनपदशब्दात्क्षत्रियादञ् । वहुत्वेलुक् । इक्ष्वाकूणां दुरापेर्थेत्वदधीनाधिस्थितय इतिप्रयोग: ॥ इक्ष्वाकुषु जनपदेषु भव: । कोपधादण् । अस्यवहुत्वेपिनलुक् । ऐक्ष्वाकेषु चमैथिलेषु च मत्तस्त्वाकमवाग्विसर्गतिमुरारि: ॥ दाक्षिनायनेष्वपि । कारनेप: ॥

ऐनसः

ऐङ्गुदम् । न । इङ्गुदीवृक्षस्यफले । हिंगोटा इतिभाषा ॥ इङ्गुदाइदम् । प्रचादिभ्योणविधेर्नाणोलुक् ॥

ऐडविडः । पुं । ऐलविले । कुबेरे ॥

ऐडूकम् । न । एडूके । सास्थिकुचे ॥ स्वार्थेऽण् ॥

ऐणम् । त्रि । एणस्य चर्मादौ ॥ एणस्य अवयवो विकारो वा । प्राणिरजतादिभ्योञ् ॥

ऐणिकः । त्रि । एणहन्तरि ॥

ऐणेयम् । त्रि । एणीस्वगादौ ॥ एण्या मृग्याविकारोऽवयवो वा एण्याढक् ॥ स्त्रीणांरतिबन्धविशेषे ॥

ऐतरेयः । पुं । ऋग्वेदोपनिषदि । तच्छाखायाम् ॥ त्रि । इतराया अपत्ये ॥

ऐतरेयी । पुं । ऋग्वेदीयशाखाविशेषाध्यायिनि ॥

ऐतिह्यम् । न । इतिह । पारम्पर्योपदेशे ॥ तद्यानिर्दिष्टप्रवक्तृकं पारम्पर्यप्रवादमात्रम् इतिह ऊचुर्दृष्टा इति ऐतिह्यम् । यथेह वटे यक्षः प्रतिवसतीति । इतिहेति निपातसमुदायः उपदेशपारम्पर्ये । तदेव । अनन्तावसथेतिवद्भेषजाजस्यः॥ यद्वा चतुर्वर्णादित्वात् । स्वार्थेष्यञ् ॥

ऐनसः । पुं । एनसि ॥ स्वार्थिकः प्रज्ञा

ऐन्द्री

दयण् ॥

ऐन्दवम् । न । मृगशिरोनक्षत्रे ॥ त्रि । इन्दुसम्बन्धिनि ॥ इन्दोरिदम् । तस्येदमित्यण् ॥

ऐन्दवी । स्त्री । सोमराज्याम् ॥ ङीम् ॥

ऐन्द्रः । पुं । अर्जुने ॥ वाह्निवानरे ॥ दैवसर्गान्तरे ॥ त्रि । शक्तसम्बन्धिनि ॥ इन्द्रस्यायम् । तस्येदमित्यण् ॥ न । ज्येष्ठानक्षत्रे ॥ मूलविशेषे । धनार्द्रकायाम् ॥ इन्द्रदेवताकेहविरादौ ॥ इन्द्रोदेवतास्य । साम्यदेवतेत्यण् ॥

ऐन्द्रजालिकः । पुं । मायाकारके । मायाविनि ॥ इन्द्रजालेन चरति । चरतीतिठक् ॥

ऐन्द्रलुप्तिकः । त्रि । केशमरोगविशिष्टे । खल्लीटे । गञ्जा इतिभाषा ॥

ऐन्द्रिः । पुं । जयन्ते । इन्द्रपुत्रे ॥ काके ॥ अर्जुने ॥ वाह्निवानरे ॥ अपत्यार्थे इञ् ॥

ऐन्द्रियकम् । त्रि । प्रत्यक्षे । इन्द्रियग्राह्ये । इन्द्रियविषये ॥ इन्द्रियेणाऽनुभूयते । कुलालादित्वाद्वुञ् ॥

ऐन्द्री । स्त्री । शच्याम् ॥ दुर्गायाम् ॥ अलक्ष्म्याम् ॥ एलायाम् ॥ इन्द्रवारुण्याम् । राखाखसषा इतिगौड़भाषा । इन्द्रायण इतिभाषा ॥ प्राच्यादिभ्यः ॥ इन्द्रस्येयम् । तस्येदमित्यण् ।

ऐरावत

टिड्ढेतिङीष् ॥

ऐभी । स्त्री । हस्तिघोषायाम् ॥

ऐरः । पुं । मण्डे ॥ इराऽन्नम् तन्मयः ॥ न । ऐरंमदीयसरः इतिस्मृतिप्रसिद्धे ॥ मण्डेन पूर्णे मदकरे ब्रह्मलोकस्थे सरसि ॥

ऐरण्डम् । न । एरण्डस्यफले ॥

ऐराकः । पुं । खुरासानमध्यस्थे च्छदेशविशेषे ॥ तन्मध्ये चोत्तरे देवि ऐराकः परिकीर्त्तितः । तन्मध्ये खुरासानमध्ये इति तन्त्रशास्त्रम् ॥

ऐरावणः । पुं । अभ्रमातङ्गे । ऐरावते । इन्द्रगजे ॥ इरया उदकेन वर्णति-वर्णशब्दे । पचाद्यच् । इरावर्ण एव । स्वार्थे प्रज्ञादिण् ॥ यद्वा इरा सुरा वन मुदकं यस्मिन् । पूर्वपदादितिण्ण्यम् । इरावणे भवः । तत्रभव इत्यण् ॥

ऐरावतः । पुं । नागे ॥ लकुचद्रुमे ॥ नागभेदे ॥ पञ्चमानस्य प्रथमे ॥ऽऽप्रभेदे ॥ शक्रदिग्गे । अभ्रमुवल्लभे । चतुर्दन्तगजे ॥ इराउदकानि सन्त्यस्मिन् । मतुप् । इरावान् समुद्रः । इरावत्यब्धौ भवः तत्रभवइत्यण् ॥ इरायत्या विद्युत इयार्यंवा । तस्येदमित्यण् ॥ न । महेन्द्रस्य कार्मुकी वंगरासने ॥

ऐशानी

ऐरावती । स्त्री । वटपत्रीवृक्षे ॥ विद्युतिति ॥ विद्युद्भेदे ॥ इराआपः सन्त्यस्य इरावान् मेघः । तस्येयम् । तस्येदमित्यण् । ङीप् । ऐरावतेनैकदिक् । तेनैकदिगित्यण्वा ॥ उत्तरमार्गेनच्च विशेषाणां संज्ञाविशेषे ॥ यथा । पुष्यास्त्रेषा तथादित्यावीथी चैरावतीस्मृतेति ॥

ऐरिणम् । न । पांशवलवणे ॥

ऐरेयम् । न । मद्यविशेषे ॥ विः कुत्सने ॥ इरायां अपत्यम् । स्त्रीभ्योढक् ॥

ऐलः । पुं । चन्द्रवंशीये पुरूरवसि नृपे ॥ इलायां अपत्यम् । अण् ॥

ऐलवालुकम् । न । ऐलेये । वालुके । हरिवालुके । गन्धद्रव्यमिदम् ॥ ऐलवालुकमेव । स्वार्थेऽण् ॥

ऐलविलः । पुं । कुबेरे । पुण्यजनेश्वरे ॥ इलविलायाः अपत्यम् । इडविलायावा अपत्यमितिविग्रहे । ऐडविलोपि । अष्टाभ्योनदीत्यण् ॥ इलयोरेकत्वस्मरणादैडविलोपि । इडविडा अस्तिमातृत्वेन अस्येतिविग्रहे ज्योत्स्नादित्वादणि ऐडविडोपि ॥

ऐलेयम् । न । ऐलवालुकनामगन्धद्रव्ये ॥ इलायाअपत्यम् । स्त्रीभ्योढक् ॥

ऐशानी । स्त्री । ईशदिग्गे । ईशानकोणे ॥ ईशानस्येयम् । अण् ङीप् ॥

ऐहलौ

ऐश्वरम् । न । अघटनघटनाचातुर्ये ॥ वि ॥ ईश्वरसम्बन्धिनि ॥ ईश्वरस्येदम् । अण् ॥

ऐश्वरी । स्त्री । ईश्वरसम्बन्धिन्यांशक्तौ ॥

ऐश्वर्यम् । न । विभूतौ । अणिमाद्यष्टसिद्धिषु ॥ सात्त्विकीबुद्धिधर्मऐश्वर्यम् । यतोऽणिमालघिमामहिमाप्राप्तिप्राकाम्यवशित्वेशित्वकामावसायिज्ञानां प्रादुर्भावः । ऐश्वर्यादिविधातइच्छायाभवति । ईश्वरोहियदेवेच्छतितत्करोति ॥ सम्पत्तौ ॥ नित्यनृत्ये ॥ ईश्वरस्यभावः । गुणवचनेति ष्यञ् ॥

ऐषमः । अ । वर्त्तमानवत्सरे । ऐसौंदतिभाषा ॥ अस्मिन् संवत्सरे । सद्यःपरुत्परार्यैषम इति इदमइश् समसण् प्रत्ययश्च संवत्सरे निपात्यते ॥

ऐषमस्तनः । वि । ऐषमोभवे ॥ ऐषमोद्यः स्वसोन्यतरस्यामिति शैषिकेष्वर्थेषु पचेष्ट्युट्युलौ ॥

ऐषमस्थः । वि । ऐषमस्तने । ऐषमोभवे जाते इत्यादयर्थेषु ॥ ऐषमोह्यसिति यचे त्यप् ॥

ऐहलौकिकम् । न । धने ॥ वि । इहलोकोपयोगिनि ॥ यथा । ऐहलौकिकमीहन्ते मांसशोणितवर्द्धनम् । पारलौकिककार्येषु प्रसुप्ताभूशना-

ओकः

क्षिका इतिमहाभारते पावकाध्ययनम् ॥ इहलोकेभवम् । अध्यात्मादेष्ठञ्यिष्यते ॥

ऐहिकः । वि । इहलोकभवे प्रतिपन्नशरीरसम्बन्धिनि स्रक्चन्दनवनिताद्यनुभवेनपशुभृत्यादिविषयजन्यसुखदुःखादिस्वरूपेभोगे ॥ इहभवम् । कालाट्ठञ् ॥

ओः

ओ । अ । सम्बोधने ॥ आह्वाने ॥ स्मरणे ॥ अनुकम्पायाम् ॥ ओंकारे ॥

ओः । पुं । ब्रह्मणि ॥ इत्येकाक्षरकोषः ॥

ओकः । पुं । शकुन्ते ॥ इषले ॥ उचेरिगुपधलक्षणेकेगुणः कुत्वञ्च ओकउचः के इतिनिपात्यते ॥

ओकणः । पुं । } केशकीटे । यूकायाम्
ओकणिः । पुं । } । जूँ इतिभाषा ॥

ओकः । न । पुं । आश्रयमात्रे ॥ गृहे । मन्दिरे ॥ उच्यते समवैत्यत्र । उचसमवाये । असुन् । गुणः । न्यङ्क्वादित्वात् कुत्वम् ॥

ओङ्कारः

ओघः । पुं । प्रवाहे । जलस्यवेगे ॥ वृन्दे । सङ्घाते ॥ परम्परायाम् ॥ उपदेशे ॥ कालाख्यायांतुटौ ॥ यथा । प्रव्यापिनसद्यो निर्वाणदेति मैव कालपरिपाकमपेक्ष्य सिद्धिं तेविधास्यति अलमुत्तप्ततया तवैत्युपदेशेया आध्यात्मिकातुष्टिःसाकालाख्या ओघउच्यते ॥ द्रुतन्दक्ष्ये ॥ न्दक्ष्यदृक्ष्युपलक्षणं गीतवाद्ययोः ॥ ओचनम् । उच० घञ् । पृषोदरादित्वात्घः ॥ वहतिवा । वह० पचाद्यच् । न्यङ्क्वादित्वात् साधुः ॥ यद्वा । आऊह्यतेऽनेन । ऊहः० हलश्चेतिघञ् ॥

ओङ्कारः । पुं । प्रणवे । वेदितव्ये ब्रह्मणि वेदनसाधने ॥ अवति । अवरक्षणादौ । अवतेष्टिलोपश्चेतिमन् । मन्प्रत्ययस्यैवायं टिलोपो नतु प्रकृतेः । अन्यथाडिदित्येव ब्रूयात् । ज्वरत्वरेत्यूट् । गुणः । वषट्कारइति खिद्भात् समुदायादधिकार प्रत्ययः ॥ अवाङ्मनसगम्यः ॥ ओङ्कारः स्वर्गादारं तद्वत्प्रथेष्यमाण एतदादि प्रतिपद्येत विकथांचान्याकृत्वा एवंलौकिक्यावाचाव्यावर्त्तते इति ॥ लौकिक्यावा चाव्यावर्त्तते तयामिश्रितं न भवतीत्यर्थः ॥

ओजः

ओङ्कारा । स्त्री । बहुशक्तिविशेषे । तारायाम् ॥

ओजः । पुं । विषमसङ्ख्यायाम् ॥ ओजैनौजस्समःपादे ॥ इतिभरतोदयः ॥

ओजतिथिः । पुं । विषमतिथौ ॥

ओजः । नः । दीप्तौ ॥ अवष्टम्भे ॥ प्रकाशे ॥ प्राणबले । निजबले । सामर्थ्ये ॥ प्रथमष्टतीयपञ्चमसप्तमनवमैकादशराशिषु ॥ धातुतेजसि ॥ शस्त्रादिकौशल्ये ॥ ज्ञानेन्द्रियाणां पाटवे ॥ काव्यगुणे गौडीरीत्याम् ॥ तल्लक्षणम् । बहुसमाससंयुक्तवर्णपदाडम्बरः । यथा ओजः प्रसादमाधुर्यगुणत्रितयभेदतः । गौडवैदर्भपाञ्चालीरीतयः परिकीर्त्तिताः ॥ ओजस्समासभूयस्त्वं मांसलं पदडम्बरम् ॥ तस्योदाहरणं यथा । गङ्गोत्तुङ्गतरङ्गसङ्गतजटाजूटाग्रजाग्रत्फणिस्फूर्जत्फूत्कृतिभीतिसम्भृतचमत्कारस्फुरत्सम्भ्रमा । आनन्दाहृतपार्वतीकुचयुगं विद्यतीचित्तं गिरीशप्रभोस्त्वां पायान्नवसङ्गमे भगवती सज्जावती पार्वतीति ॥ रसादिसप्तधातुसारभागजधातुविशेषे ॥ यथा । हृदि तिष्ठति यच्छुद्धं रक्तं मीषत्सपीतकम् । ओजश्शरीरे सञ्जातं त

ओड्रपु

वाशान्नाश मृच्छति ॥ भ्रमरैःफल पुष्पेभ्यो यथासम्भ्रियतेमधु । तद्वदोजश्शरीरेभ्योधातुःसम्भ्रियतेऽतएवौजस्वीगामितिवैद्यकशास्त्रम् ॥ उज्जत्यनेन । उज्जआर्जवे । उज्जेर्बलेबलोपश्चेत्यसुन् ॥

ओजिष्ठ.1 त्रि । ओजस्विनि ॥ सारतमे ॥ उभयत्र विन्यस्ता दोर्जस्विशब्दादिष्ठन् ॥ विन्मतोर्लुगिति लुक् टिलोपश्च ॥

ओडवः । पुं । पञ्चस्वरयुक्तरागे ॥ सतु रूपवर्जितः । प ग म ध नि युक्तः । यथा मल्लारादयः ॥ इतिसङ्गीतदामोदरः ॥

ओडिका । स्त्री । उडिधान् इतिगौडभाषाप्रसिद्धे धान्यविशेषे । नीवारे ॥

ओडी । पुं । ओडिका धान्ये ॥

ओड्रः । पुं । जवापुष्पे ॥ जवापुष्प वृक्षे ॥ जने ॥ आर्द्रंपदुनत्ति । उन्दी । स्फायितञ्चीतिरक् । बाहुलकादस्याडच्चम् ॥

ओड्राः । पुं । भूम्नि । उडीसा इति प्रसिद्धे नीवृद्विशेषे ॥

ओड्रपुष्पम् । न । ओडर गुडहर इतिप्रसिद्धायांजवायाम् । जवावृक्षे ॥ ओड्रं पुष्प मस्य । ओड्रपुष्पकुसुमप्रियेम्बिके इतिहरानन्दः ॥

ओम्

ओड्राख्या । स्त्री । जवावृक्षे ॥

ओतः । त्रि । पटेदीर्घतन्तौ ॥ अन्तर्व्याप्तौ ॥

ओतुः । पुं । स्त्री । विडाले ॥ अवतिविष्ठाम् आखुभ्योऽहंवा । अवरक्षणादौ । सितनीतितुन् । ज्वरत्वरेत्यूठ् । गुणः ॥

ओतुमदः । पुं । मार्जारधर्म्मे ॥

ओदनः । पुं । न । अन्ने । भक्ते । भात इति भाषा ॥ उनत्ति । उन्दी° । उन्देर्नलोपश्चेति युच् ॥ यद्वा ऊदृतेऽनेन । ऊदृक्षीडायाम् । करणे ल्युट् । पृषोदरादिः ॥

ओदनपाकी । स्त्री । ओषधिविशेषे । नीलभिण्टयाम् ॥ पाककर्णेतिङीष ॥

ओदनाह्वा । स्त्री । मल्लासमज्ञायाम् ॥

ओदनिका । स्त्री । मल्लासमज्ञायाम् ॥ वल्लायाम् ॥

ओदनी । स्त्री । वल्लायाम् ॥

ओद्मः । पुं । उन्दने ॥ उन्दी° । औणादिके मन् मच्चये । अबोदैधौम्रम्रथचिमथघा इतिनलोपोगुणश्च निपातितः ॥

ओम् । अ । उपकरणे ॥ प्रणवे ॥ अभ्युपगमे । अनुमतौ ॥ अपाकृतौ । अस्वीकारे ॥ मङ्गले । शुभे ॥ वेदोक्त

ओषधी

ग्निवेदनसाधने ॥ अवति । अव रक्षणादौ । अवतेष्टिलोपः । ज्वरघ्नरेचनू ठ् । गुणः ॥

ओलः । पुं । अर्शोभेदे । शूरणे । कन्दे ॥ त्रि । आर्द्रे । गीला भीजा इतिच भाषा ॥

ओल्लः । पुं । ओले । शूरणे ॥ ग्राम्यकन्दस्तुदोषलः ॥ त्रि । आर्द्रे । आला गीला इतिचभाषा ॥

ओषः । पुं । दाहे । प्रोषे । प्लोषे ॥ ओषणम् । उष° । घञ् ॥

ओषणः । पुं । कटुरसे । झाल इतिभाषा ॥

ओषणी । स्त्री । पुल्या इतिगौडभाषा प्रसिद्धे शाकविशेषे ॥

ओषधिः । स्त्री । फलपाकान्ते कदल्यादौ । व्रीहियवादौ ॥ जातिमात्रविवक्षायामोषधिशब्दस्य प्रयोगो भवति ॥ ओषः प्लोषः दीप्तिर्धीयते ऽत्र । डुधाञ् ° । कर्मण्यधिकरणेचेति किः ॥

ओषधिप्रस्थः । पुं । हिमालयस्य नगरविशेषे ॥

ओषधी । स्त्री । फलपाकान्ते व्रीहियवादौ ॥ किमत्ययात्तात् कृदिकारादितिङीष् ॥ जातिमात्रविवक्षाया

ओष्ठ्यः

मस्य प्रयोगो भवति । ओषध्यः पञ्चधाख्याता लतागुल्माश्चशाखिनः । पादपाः प्रसराश्चेति तेषां वक्ष्यामि लक्षणम् ॥ गुडूच्याद्यालताः प्रोक्ताः गुल्माः पर्पटकादयः । आम्रादयः शाखिनोज्ञेया वटाश्वत्थादि पादपाः ॥ कण्टकार्य्यादिकाः सर्वाः प्रसरा इति कीर्त्तिताः

ओषधीपतिः । पुं । इन्दौ । चन्द्रमसि ॥ ओषधीनांपतिः ॥

ओषधीशः । पुं । ग्लावि । चन्द्रे ॥ ओषधीनामीशः ॥ कर्पूरे ॥

ओष्ठः । पुं । दशनवाससि । रदनच्छदे । ऊपरला होठ इतिभाषा ॥ अधरे । नीचला ओठ होठ इतिच भाषा ॥ उष्यते उष्णाहारेण । उष° । उषिकुषीतिथन् ॥

ओष्ठपुष्पः । पुं । बन्धूकपुष्पवृक्षे ॥

ओष्ठरोगः । पुं । आस्यरोगान्तर्गतौष्ठभवव्याधौ ॥ विम्बेपोस्यनिदाने ॥

ओष्ठी । स्त्री । विम्बफले । कँदूरी इतिभाषा ॥

ओष्ठोपमफला । स्त्री । विम्बिकायाम् । कँदूरी इतिभाषा ॥ ओष्ठोपमानि फलानियस्याः ॥

ओष्ठ्यः । पुं । ओष्ठभवेवर्णे ॥ त्रि । ओष्ठहिते ॥ ओष्ठेभवः । शरीरावय

औष्णक

यवाङ्गेति यत् ॥ ओष्ठयोर्हितः । श
रीरावयवाद्यत् ॥
औष्ण्यम् । वि । ईषदुष्णे ॥ आडुष्णम् ॥

औ

औ । अ । आह्वाने ॥ सम्बोधने ॥ वि
रोधे ॥ निर्णये ॥ शूद्राणां प्रणवे ॥
यथा । चतुर्दशस्वरो येषां सैव सेतुरो
कार संज्ञितः सचानुस्वारनादाभ्यां
शूद्राणां सेतुरुच्यते इतिकालिका
पुराणम् ॥ औकारे ॥
औः । पुं । अनन्ते ॥ निस्वने ॥ स्त्री ।
विश्वम्भरायाम् ॥
औक्थिकः । पुं । उक्थाध्ययनकर्त्तरि ॥
उक्थमधीते वेदवा । क्रतूक्थादी
तिठक् ॥
औक्थिक्यम् । न । औक्थिकानां धर्मे
॥ तेषामाम्नायेपि॥ छन्दोगोक्थिके
तिष्यः ॥
औच्चम् । न । उच्चसमूहे ॥ उच्चां स
मूहः तस्यसमूहइत्यण् । औच्च
मनपत्य इतिटिलोपः ॥ अपत्येतु ।
औच्चः । षपूर्वहने च्यलोपः ॥
औच्चकम् । न । उच्चां समूहे । वृ

औत्तरे

षदन्दे ॥ गोत्रोच्चोष्ठेति बुञ् ॥
औत्थम् । वि । स्वार्थोपके ऽन्नादौ ।
पिठरपके ॥ उत्थ मेव स्वार्थेष्यञ् ॥
औचिती । स्त्री । औचित्ये ॥ सत्ये
॥ उचितस्य भावः । ब्राह्मणादित्वा
त्ष्यञ् । ङीष् । हलस्तद्धितस्येति
यलोपः ॥
औचित्यम् । न । उचितत्वे । योग्य
त्वे ॥ सत्ये ॥ उचितस्य भावः ।
ब्राह्मणादेराकृतिगणत्वात् ष्यञ् ॥
औजसिकः । पुं । शूरे ॥ ओजसा वर्त्त
ते । ओजसहोम्भसावर्त्तत इति
ठक् ॥
औड्रः । पुं । ओड्रदेशोद्भवे आदौ
चक्षिये पश्चाद्ब्राह्मणादर्शनेन क्रिया
लोपादिनाच शूद्रत्वमापन्ने दस्युप
दवाच्ये ॥ वि । ओड्रदेशजे ॥
औत्कर्ष्यम् । न । उत्कर्षतायाम् ॥ भा
वे ब्राह्मणादित्वात् ष्यञ् ॥
औत्तरपथिकः । वि । उत्तरपथेनाहृ
ते ॥ तेनगच्छति उत्तरपथेनाहृत
श्चेति ठञ् ॥
औत्तरपदिकः । वि । उत्तरपदग्राहि
णि ॥ उत्तरपदं गृह्णाति । ठक् ॥
औत्तराहः । वि । उत्तरस्मिन् जातः भ
वः ततआगतोवा ॥ उत्तराद्दाहञ् ॥
औत्तरेयः । पुं । परीक्षिन्नृपतौ ॥ उत्त

औदार्य्य

राया: अपत्यम् । स्त्रीभ्योढक् ॥ औत्तानपादि: । पुं । भुवे । स्वायम्भुव मनोःपौत्रे ॥ उत्तानपादस्यापत्यम् । इञ् ॥

औत्सर्गिक: । त्रि । उत्सर्गार्हे ॥ सामान्यविधिरुत्सर्ग: । उत्सर्गमर्हति । ठञ् ॥ सामान्यार्हे ॥

औत्सुक्यम् । न । उत्कण्ठायाम् ॥ उत्सुकस्य कर्मभावोवा । ष्यञ् ॥

औदनिक: । त्रि । सूपकारे ॥ ओदनं शिल्पमस्य । शिल्पमिति ठञ् ॥

औदमेधि: । पुं । उदमेधस्यापत्ये ॥ अतइञ् ॥

औदमेधी । स्त्री । उदमेधजातौ ॥ इञ् न्तात् ङीतोमनुष्यजातेरिति ङीष् ॥

औदरिक: । त्रि । उदरमात्रपूरके । आढ्ये । भेटार्थी इतिभाषा ॥ अत्यन्तबुभुक्षिते । बुभुक्षयात्यन्तपीडिते ॥ उदरे भवित: । उदराट्ठगाद्यूनइतिठक् ॥

औदश्वित्यम् । न । अर्द्धजलयुक्ते घोले ॥ त्रि । उदश्विति संस्कृते ॥ उदश्वितोन्यतरस्यामिति यत्वेऽण् ॥

औदश्वित्क: । पुं । औदश्विते ॥ उदश्विति संस्कृतम् । उदश्वितोन्यतरस्यामिति ठक् । इसुसुक्तान्तात्क: ॥

औदार्य्यम् । न । उदारतायाम् ॥ उदारस्यभाव: । गुणवचनेति ष्यञ् ॥

औदासीन्यम् । न । शुभाशुभयोरुभयोरुचायाम् ॥ तटस्थे ॥ उदासीनस्यभाव: । ष्यञ् ॥

औदास्यम् । न । अकर्तृत्वे ॥ वैराग्ये । अनुरागादिशून्यतायाम् ॥ मनोयोगाभावे ॥

औदुम्बर: । पुं । श्राद्धदेवे । यमे ॥ न । कुष्ठरोगप्रभेदे ॥ तल्लक्षणम् । रुग्दाहरागकण्डूभि: परीतं रोमपिञ्जरम् । उदुम्बरफलाभासं कुष्ठमौदुम्बरं वदेदिति ॥ ताम्रे ॥ उदुम्बरमेव । प्रज्ञादिषु ॥ यज्ञाङ्गशाखिन:फलादौ ॥ फलमौदुम्बरं बाल मम्लतक्रेणसाधितम् । वेसवारभृते साज्ये पाचितं सैन्धवान्वितम् ॥ शीतं क्षौद्रयुतं मधुरं रक्तपित्तप्रणाशनम् । मूत्रकृच्छ्रहरंसम्यग् विबन्धाध्मानकारकम् ॥ उदुम्बरस्यायमवयवोविकारोवा । प्राणिरजतादिभ्योऽञ् ॥ त्रि । ताम्रनिर्माणे पात्रादौ ॥

औद्गात्रम् । न । सामवेदविहिते उद्गातु: कर्मणि भावेच ॥

औद्दालकम् । न । वल्मीककीटसम्भृते मधुनि ॥ प्रायोवल्मीकमध्यस्था: कापिला: क्षुद्रकीटका: । कुर्वन्तिक्षिप्रं स्वल्पंतत् स्यादौद्दालक-

औपग

कंमधु ॥ औदाखकं रुचिकरं स्वर्यं कुष्ठविषापहम् । कषायमुष्णमम्लञ्च कटुपाकञ्चपित्तकृत् ॥

औदाखकिः । पुं । गौतमे ॥ उदाखकस्यापत्यम् । अतइञ् । आर्ष्यणौ ॥

औदुत्त्यम् । न । अविनीतभावे ॥ उद्धतस्य भावः । ष्यञ् ॥

औद्गिज्जम् । न । पांशुलवणे ॥

औद्गिदम् । न । रेह इति प्रसिद्धे पांशुलवणे ॥ औद्गिदं पांशुलवणं यज्जातंभूमितः स्वयम् । चारं गुरु कटु स्निग्धं श्लेष्मलंवातनाशनम् ॥ औभमस्य पानीयस्य प्रभेदे ॥ यथा । विदार्य्य भूमिं निर्य्या यन्महत्याधारया स्रवेत् । ततस्तोयमौद्गिदं नाम वदन्तीति महर्षयः ॥ औद्गिदंवारि पित्तघ्नमविदाह्यतिशीतलम् । प्रीणनं मधुरं वल्यमीषद्वातकरं लघु इति ॥

औदाहिकम् । न । उदाहसम्बन्धिधनादौ ॥ भार्य्याप्राप्तिकाले खड्गे भार्य्याधने ॥ तद्भ्रातृभिरविभाज्यम् । यथाह याज्ञवल्क्यः । पितृद्रव्याविनाशेन यदन्यत्स्वयमर्जयेत् । मैत्रमौदाहिकञ्चैव दायादानां न तद्भवेदिति ॥

औपगवः । पुं । उपगवपत्ये ॥ उपगोरपत्यम् । तस्यापत्यमित्यण् ॥ उप

औपच्छ

समीपे गौर्यस्य इति उपगुर्गोपः । लक्षणया ततपुरोहितोऽपि । यथाह हारीतः । यंवर्णं याजयेद्वस्तु सतदर्णत्वमाप्नुयात् । संध्योर्वर्णेन वर्णेश्वेत्येवमेवाब्रवीद्गुरुः ॥ तथाच लक्षणया ब्राह्मणोऽप्युपगुपदवाच्यः । तस्यापत्यमौपगवः ॥ इति श्रीधरस्वामिनः ॥

औपगवकम् । न । औपगवानां समूहे ॥ गोत्रोक्षोष्ट्रेतिवुञ् ॥

औपचारिकः । त्रि । उपचारार्थे ॥ विनयादित्वेति स्वार्थेठक् ॥

औपच्छन्दसिकम् । न । वैतालीयच्छन्दोविशेषे ॥ तत्रैवान्ते ऽधिकेगुरौ ॥ स्या दौपच्छन्दसिकं कविवृन्दहृदयभितिलक्षणम् ॥ यथा । आतन्वानं सुरारिकान्ता स्वौपच्छन्दसिकं हृदाविनोदम् । कंसं योनिर्जघानदेवो वन्देतं जगतां स्थितिं दधानमिति ॥ पुष्पिताग्राभिधंकेचि दौपच्छन्दसिकं विदुः ॥ अन्यच्च । विषमे ससजा गुरुसमेचेत् स्मरयाच्छन्दसिकं तदौपपूर्वम् । यथा । स्मररागमयी वपुःसमिश्रा परितस्मारशरैरसंख्यवश्यम् । प्रियमापदिवापिकोकिलेस्त्री परितस्मारशरैरसंख्यवश्यमिति ॥

औपधेयम् । न । उपधौ । रथाङ्गे ॥ छदिरुपधीतिस्वार्थेढञ् ॥

औपनिधिकम् । न । उपनिधौ । प्रीत्याभोगार्थमर्पिते द्रव्ये ॥

औपनिषदः । त्रि । श्रुतिवेद्ये परमात्मनि ॥ उपनिषदा दृश्यते गृह्यते वा । उपनिषदो व्याख्यान स्तवमर्हो वा । शेषद्दति अण्कृगमनादिभ्यद्दतिर्वा । अण् ॥

औपनिषदश्यः । पुं । भर्तृप्रपञ्चे ॥ अयंवेदान्तैकदेशी ॥ त्रि । अन्यत्र ॥

औपनीविकम् । त्रि । नीविसमीपे आपृते ॥ भवार्थे उपजानूपकर्णनीवेष्ठक् ॥

औपमन्यवः । पुं । प्राचीनशालक्यगोत्रे ॥ उपमन्योर्गोत्रापत्यम् । विदाद्यञ् ॥

औपम्यम् । न । अनुकारे । उपमायाम् । साम्ये ॥ उपमैव । चतुर्वर्णादित्वात्ष्यञ् ॥

औपयिकः । त्रि । उपयुक्ते ॥ न्यायागते वस्तुनि । लभ्ये ॥ उपायेनन्यनेन । अयगतौ । इष्टस्वेति घञ् ॥ उपायएव । उपायो ह्यवश्यमेवेतिठक्ठञौ च ॥

औपरोधिकः । पुं । मोक्षुदण्डे । मैलमे ॥ त्रि । उपरोधसम्बन्धिनि ॥

औपवस्तम् । न । उपवासे ॥ उपवस्तमेव । प्रज्ञादित्वात् ॥

औपवस्त्रम् । न । उपवासे । भोजनाभावे ॥ उपवसति । तृच् । उपवस्तुरिदंकर्म । तस्येदमित्यण् । मांसान्मधुमसूरांश्चवर्जये । दैपवस्त्रकमितिस्मृतिः ॥

औपसर्गिकः । पुं । सन्निपातरोगविशेषे ॥ तस्यलक्षणम् । कफोनुलोमगो तेन यदिपित्तानुगो भवेत् । स्वेदश्चेत्यादिभिर्जुष्ट स्तदाभवतिमानवः ॥ प्रतिलोमः पुनस्तेनश्वासस्थमायातितस्तृष्णांत । औपसर्गिकएवान्यः सन्निपातउदाहृत इति ॥ त्रि । उपसर्गसम्बन्धिनि ॥

औपस्थ्यम् । न । उपस्थेन्द्रियसुखे ॥

औपानह्यः । पुं । मुञ्जे ॥ न । चर्मणि ॥ उपानहे अयम् । तदुपभोगोपानद्दोन्यः ॥

औमीनम् । त्रि । उमे ॥ उमानाम्नश्चेनं । चेचम् । विभाषातिलमाषोमेति पञ्चेखञ् ॥

औरगम् । न । फणिभे ॥ त्रि । सर्पसम्बन्धिवस्तुनि ॥ उरगस्येदम् । अण् ॥

औरभ्रः । पुं । कम्बले । रङ्कवे ॥ उरभ्रस्य इदम् । अण् ॥

औरभ्रकम् । न । मेषवृन्दे ॥ उरभ्राणां समूहः । गोत्रोक्षोष्ट्रोरभ्रेतिवुञ् ॥

औरभ्रिकः । त्रि । मेषजीविनि ॥

और्वः

औरसः । पुं । स्त्री । उरस्ये । स्वात्मजे । ऊढसवर्णायां जनितापत्ये । यथा । सवार्णायां संस्कृतायां स्वयमुत्पादये त्पुत्रम् । औरसं तं विजानीयात् पुत्रंप्रथमकल्पितमिति ॥ उरसानिर्मितः । उरसोऽण् चेत्यण् ॥

औरसिकः । त्रि । उरइवेत्यर्थे ॥ अङ्गुल्यादिभ्यष्ठक् ॥

और्द्धदेहिकम् । त्रि । और्द्धदैहिके ॥ केचिदस्यानुशतिकादिषु पाठं नेच्छन्ति ॥

और्द्धदैहिकम् । त्रि । प्रेतकर्मणि । प्रेतदाने । प्रेतमुद्दिश्य मरणदिनमारभ्य सपिण्डीकरणपर्यन्तं प्रत्यहं दीयमाने जलपिण्डादौ । श्रुतार्थं तद्धेदानं विषु स्यादौर्द्धदैहिकम् ॥ देहादूर्द्धं और्द्धदेहः । राजदन्तादिः । और्द्धदेहेभवम् । अध्यात्मादित्वाट्ठञ् । अनुशतिकादित्वादुभयपदवृद्धिः ॥

और्द्धस्रोतसिकः । त्रि । प्रेते ॥ इति त्रिकाण्डशेषः ॥

और्व । पुं । वाडवानले ॥ सप्तभूगोलस्य दक्षिणसीमा । तत्र सर्वे नरकाः दैत्याश्च वसन्ति ॥ पञ्चप्रवरान्तर्गत मुनिभेदे ॥ उर्वस्य मुनेरपत्यम् । ऋष्यण् । गोत्रापत्ये विदाद्यञ् ॥ न।

औषध

पांशवलवणे ॥

और्वरः । त्रि । भौमे । रजसि ॥

और्व्वशेयः । पुं । अगस्त्यमुनौ ॥

औलूकम् । न । पेचकसमूहे ॥ उलूकानां समूहः । खण्डिकादित्वादञ् ॥

औलूक्यः । पुं । वैशेषिके । वैशेषिकदर्शनाभिज्ञे ॥

औशनसम् । न । शास्त्रविशेषे । विचित्रनिर्माणप्रतिपादके शिल्पशास्त्रे ॥ उशनसा प्रोक्तम् । तेनप्रोक्तमित्यण् ॥ उपपुराणविशेषे ॥

औशिजः । पुं । उशिजि ॥ स्वार्थिकः-प्रज्ञाद्यण् ॥

औशीरम् । न । शयनासने ॥ शयनंस्वापः शय्या वा । आसनन्पीठादि । स्वापपीठयोः समुदितयोरियं संज्ञा ॥ चामरे ॥ दण्डे ॥ पुं । चामरदण्डे ॥ त्रि । उशीरजे ॥ उश्यते । वशकान्तौ । यशः किदिति ईरन् । प्रज्ञाद्यण् ॥ यद्वा । उशीरस्येदम् । तस्येदमित्यण् ॥

औषधम् । न । रोगनाशकद्रव्ये । भेषजे । जाये । अगदे ॥ सर्वैः प्राणिभिर्भुज्यमाने ओषधिप्रभवेऽन्ने ॥ रोगहत्त्वेन द्रव्यमात्रविधत्वाया ओषधशब्दप्रयोगः । तेन हृततैलादिकमप्योषधशब्दवाच्यमिति ज्ञेयम् ॥

औषधेरिदम् । औषधिरेव वा । औषधे रजनी विक्त्यण् ॥ शुण्ठ्यो म् ॥

औषरम् । न । पांशवक्षवणे ॥

औषरकम् । न । सार्वगुणे । मृत्तिका क्षवणे ॥ खारीलौन खारीनून इति च भाष

औषसः । त्रि । प्राभातिके ॥ अनुदितौ षसराग इति औषसातमभयादि त्ति च भारवि र्लक्ष्यम् ॥ उषसिभ वः । सन्धिवेलेत्यादिनायोगविभा गादण् । अन्यथा कालाट्ठञ् त्यादि तिव्याख्यातारः । अपभ्रंश एवायमि ति प्रामाणिकाः ॥

औष्ट्रम् । त्रि । उष्ट्रसम्बन्धिनि ॥ औष्ट्रं दुग्धं लघु स्वादु क्षवणं दीपनं त था । कृमिकुष्ठकफानाहशोफोदर हरं सरम् ॥ उष्ट्रस्येदम् । अण् ॥

औष्ट्रकम् । न । उष्ट्रसमूहे ॥ तस्यसमू हइत्यर्थे गोत्रोक्षोष्ट्रेतिवुञ ॥ उष्ट्र विकारोऽवयवोवा । उष्ट्राद्वुञ् ॥

औष्ट्रः । त्रि । औष्ट्रभवे ॥ शरीराव यवाक्षेति यत् ॥

ओम् । न । परे ब्रह्मणि ॥ अनुस्वारे । पञ्चदशे स्वरे ॥ विन्दुमावानुनासि कवर्णोयम् । अवोकार उच्चारणार्थः । अयं नकारमकारस्थानेपि भव

ति ॥

कः । पुं । महेश्वरे ॥ विसर्ग । ओडपे स्वरे ॥ द्विविन्दुमावः कएवक्षवर्णोय म् । अवोकार उच्चारणार्थः । अयंरे फसकारस्थानेपि भवति ॥

इत्यादिगौडकुलोत्पन्नाडीचवाल प्रधानोपनामतुलारामभिश्रात्मज-श्रीधनपतिभिश्चापरनाम्ना तथा श्री सद्गुरुकृपालाधधूतश्रीपरमहंसपरि व्राजकाचार्यश्रीमद्धरिहरानन्दनाथभा रतिशिष्येण ब्राह्मावधूतश्रीसुखा-नन्दनाथपरनामधेयेन विरचितेश ब्दार्थचिन्तामणा वर्णः समाप्ति ङ्गतः ॥ १ ॥

तत् तत् ॥

क्षः । पुं । ब्रह्मणि ॥ समीरे ॥ आत्म-नि ॥ यमे ॥ दक्षप्रजापतौ ॥ भास्क रे ॥ कामग्रन्थौ ॥ चक्रिणि । नारा यणे ॥ पतत्रिणि । खगे ॥ पार्श्वेचे ।

राजनि ॥ मयूरे ॥ अग्नौ ॥ मनसि ॥ शरीरे ॥ काले ॥ घने ॥ शब्दे ॥ प्रकाशे ॥ न । सुखे ॥ शिरसि ॥ जले ॥ कायति । कचतिवा । कैशब्दे । कचदीप्तौ । अन्येभ्योपीतिडः ॥ ककारे ॥

कंबलः । पुं । कम्बलार्थेषु ॥

कंसः । पुं । उग्रसेनसुतेऽसुरविशेषे । श्रीकृष्णमातुले ॥ पुं । न । तैजस द्रव्ये । स्वर्णरजतादिनिर्मिते पात्रभाजने । ताम्ररङ्गमिश्रितधातुविशेषे । कांस्ये । काँसा काँसी इतिभाषा ॥ आढकपरिमाणे माने ॥ मद्यादिपानपात्रे । पानभाजने ॥ कम्यते । कमुकान्तौ । वृद्धवदिहनिकमीतिसः ॥

कंसकम् । न । नयनौषधे । सुश्रुतोक्तासौ से । क्षीराकसीप्रभेदे ॥

कंसकारः । पुं । कसेरा इतिप्रसिद्धे जातिविशेषे ॥ अस्योत्पत्तिर्यथा । वैश्यायां ब्राह्मणाज्जातोऽम्बष्ठोगान्धिको वणिक् । कंसकारश्च कारौ ब्राह्मणान्सम्बभूवतुः ॥ इतिबृहद्धर्मपुराणम् ॥ अपिच । विश्वकर्मा च शूद्रायां वीर्याधानं चकारसः । ततोबभूवुःपुत्राश्चनवैतेशिल्पकारिणः । मालाकारः कर्मकारःशङ्खकार,कुविन्दकः । कुम्भकारः कंसकारः षडेतेशिल्पिनोनरा

॥ इतिश्रीब्रह्मवैवर्तपुराणम् ॥

कंसजित् । पुं । वासुदेवे । श्रीकृष्णे ॥ कंसं जयति । जिजये । क्विप् । तुक् ॥

कंसवती । स्त्री । कंसस्य भगिन्याम् ॥

कंसहा । पुं । देवकीसुते ॥ कंसं हन्ति । हन्° । क्विप्चेति क्विप् ॥

कंसा । स्त्री । कंसवत्याम् । वसुदेवानुजपत्न्याम् ॥

कंसारातिः । पुं । श्रीकृष्णे ॥ कंसस्य कंसारिः । पुं । अरातिः अरिर्वा ॥

कंसास्थि । न । कांस्यधातौ ॥

कंसीयम् । त्रि । कंसार्यर्चिते ॥ छः ॥

कंसोद्भवा । स्त्री । सुगन्धिमृत्तिकाविशेषे । आढक्याम् । काक्याम् । सौराष्ट्राम् ॥

ककन्दः । पुं । कनके । स्वर्णे ॥

ककुज्जलः । पुं । स्त्री । चातकपक्षिणि ॥

ककुत्स्थः । पुं । सूर्यवंशजे राजविशेषे । शशादतनये । दृष्यक्रोःपौत्रे ॥ ककुदिष्टपांसे तिष्ठति । ष्ठा° । कः ॥

ककुत् । स्त्री । वृषाङ्गविशेषे ॥ श्वेतच्छत्रादौ राजचिह्ने ॥ वरे ॥ शैलशृङ्गे ॥ कं सुखं कौति । कुशब्दे । क्विप् । तुक् । पृषोदरादित्वात्दः ॥

ककुदः । पुं । न । प्रधाने । वरे । श्रेष्ठे ॥ राजचिह्ने । श्वेतच्छत्रादौ ॥ वृषाङ्गे । वृषांसस्थस्थूलमांसपिण्डे ॥ प्र

ककुभः

र्वतांशभागे ॥ कं सुखं कौति । कु° । क्विप् । तुक् । पृषोदरादि: ॥ ककुद्मान् । पुं । वृषे । वलीवर्दे ॥ क्वप भेषधौ ॥ पर्वते ॥ ककुदस्ति अस्मि । मतुप् । यवादित्वा न्न वत्वम् ॥ ककुद्मती । स्त्री । कन्यायाम् । पीछा इति भाषा ॥ ककुदपस्कन्धः । सदृव मो सपिण्डः ककुत् । सोऽतिशयितोऽस्याम् । मतुप् । यवादित्वा न्न वः ॥ ककुप् । स्त्री । प्रवेण्याम् ॥ दिशि ॥ शोभायाम् ॥ चम्पकस्रजि ॥ रागिणीविशेषे ॥ अस्यां लक्षणं यथा । पीतंवसाना वसनं सुकेशी वने रुदन्ती पिक्कनादद्रुना । विलोकयन्ती ककुभोरतिभीता मूर्च्छिः प्रदिष्टा ककुभस्येयमिति सङ्गीतदामोदरः ॥ ककते । ककलौल्ये । बाहुलकादुभ मत्ययः ॥ यद्वा । कंवातं स्कुभ्नाति विस्तारयति । स्कुभ्नाति स्तौतिः । किप् । पृषोदरादित्वात् सलोपः ॥

ककुभः । पुं । रागविशेषे ॥ वीणाङ्गे । प्रसेवके । वीणादण्डाधःस्थितं शब्दगाभीर्याय दारुमयं भाण्डं यन्नर्मणा च्छाद्यते तस्मिन् ॥ अर्जुनपादपे ॥

ककुभः शीतलोभग्नव्रतक्षयविषापहः । भेदोमेहव्रणान्हन्ति तुवरः कफपित्तहृत् ॥ ककुभोदिशः

ककुटः

सन्त्यस्य बहुविस्तरत्वात् । अर्शआद्यच् ॥ पर्वतान्तरे ॥ कश्च कुश्च ककू । तेभाति । भा° । अन्तर्भावितण्यर्थः । आतोनुपेतिकः ॥

ककुभा । स्त्री । दिशि ॥ केन आदित्येन जलेन वा कुत्सितानि भानि नक्षत्राण्यत्रेति टाबन्तोपीति केचित् । तन्न । व्यधिकरणबहुव्रीहिप्रसङ्गात् ॥ केन कुत्सिता भाति । भादीप्तौ । सुपीतिकः । भिदाद्यङ् वा ॥ रागिणी विशेषे ॥

ककुभादनी । स्त्री । नलीनामगन्धद्रव्ये ॥

ककुभः । पुं । खगान्तरे ॥

ककोलः । पुं । न । स्वनामख्यातसुगन्धिद्रव्यविशेषे । कोलके । काँकोला इतिगौडभाषा । काँकोलीइति फलकपूर इति गरुला इतिच प्रसिद्धे ॥ ककोलं लघु तीक्ष्णोष्णं तिक्तं हृद्यं रुचिप्रदम् । आस्यदौर्गन्ध्यहृद्रोगकफवातामयान्हरेत् ॥

ककरी । कक° । सम्पदादित्वात् क्विप् । कोलति । कुलसंस्त्याने । घञादिषु चासः । ककश्च तत् कोलश्च ॥

ककोलकम् । न । कोषफले । ककोले । सूक्ष्ममरिचे ॥ स्वार्थेकन् ॥

ककचटः । त्रि । कठिने ॥ कचटति ।

कचाप

कक्खडदसने । अकादिभ्योटन् ॥
कक्खटपत्रकः । पुं । पाट इतिगौड
प्रसिद्धे वृक्षविशेषे । पट्टे । राजशब्दे ॥
कक्खटी । स्त्री । वर्णलेखायाम् । कठि
न्याम् । खड्याम् । सेलखडी इति
भाषा ॥
कच्चः । पुं । बाहुमूले । काख इतिभा
षा ॥ वीरुधि । लतायाम् ॥ तृणे ॥
शुष्कतृणे ॥ शुष्कवने ॥ पापे ॥ कच्छे
॥ अरण्ये ॥ मार्गे ॥ कषति । कष्य
ते वा । कषहिंसायाम् । वृतृवदिह
निकमिकषिभ्यः सः ॥
कच्छरुद्रा । स्त्री । नागरमुस्तायाम् ॥
कच्छशयः । पुं । कुकुरे ॥
कच्छा । स्त्री । अन्तरीयवस्त्रस्य पश्चिमे
भ्रंशे । अधोंशुकस्य पृष्ठतो निहि
ताग्रभागे ॥ स्पर्शास्यदे ॥ इभरज्ज्वाम् ।
गजमध्यबन्धनरज्जौ ॥ काञ्च्याम्
॥ राजद्वारप्रवेशे ॥ गेहप्रकोष्ठके ॥
भित्तौ ॥ साम्ये ॥ रथभागे ॥ उद्भा
टिन्याम् ॥ क्षुद्ररोगविशेषे ॥ तक्ष
णम् । बाहुपार्श्वाग्रकक्षेषु कृष्ण
स्फोटा सवेदनाम् । पित्तप्रकोपस
म्भूतां कक्षामित्यभिनिर्दिशेदिति
॥ कषति कष्यते वा । कष° । वृवि
तिसेवृतेटाप् ॥
कच्छापटः । पुं । कौपीने ॥ इतिशब्दा

कच्छः

म्भायुधः ॥
कच्छावेचिकः । पुं । शुद्धान्तपाले ॥ उद्या
नपाले ॥ राजाज्ञावेत्रा कवौ ॥ पि-
ङ्गे ॥ द्वारस्थे ॥ कच्छायाः अवेक्षकः ॥
कच्छीघान् । पुं । स्फोटायने ऋषिवि
शेषे ॥ कच्छ्या अस्ति अस्य । मतुप्-
॥ आसन्दीवदष्ठीवदितिनिपातनात्
॥ कच्छ्यायाः सम्भसारणम् ॥ कच्छ्यावा
न् अन्यत्र ॥
कच्छोला । स्त्री । भद्रमुस्तायाम् ॥
कच्छ्यम् । न । एग्रणिकापाचे । काँटे
की कटोरी इतिभाषा ॥ इतिमि
ताक्षरा ॥
कच्छ्या । स्त्री । वृहत्तिक्कायाम् ॥ हर्म्या
दिप्रकोष्ठे । राजगृहादिवेष्टनावच्छि
न्ने देशे । राजगृहादीनां प्राकारको
ष्ठके ॥ सप्तकच्छ्या अतिक्रम्येति यथा
॥ साट्यश्ये ॥ कचरज्जौ ॥ काञ्च्या
म् । मेखलादामनि ॥ यथा । पेरि
धानादहिः कच्छ्यो निवद्धा घोसुरीम
रेति ॥ मध्येभवन्धने । गजमध्यब-
न्धनरज्जौ ॥ यथा । हेमकच्छ्यागजा
इति ॥ उद्योगे ॥ यथा । परार्थबद्ध
कच्छ्याणां तादृशामुद्भवः कुतः ॥ क
च्छेभवा । शरीरावयवाद्यत् ॥
कङ्कः । पुं । छद्मद्विजे ॥ काँक इतिगौ
डभाषा । प्रसिद्धे पक्षिविशेषे । लोह

कङ्कणी

पृष्ठे । कंकहडा इति भाषा॥ [illegible] युधिष्ठिरस्तस्मै । अज्ञातशत्रौ ॥ कंस भ्रातरि । उग्रसेनसुते ॥ महाराज चूते ॥ कङ्कते । ककिगतौ । अच् ॥ कङ्कटः । पुं । कवचे । सन्नाहे ॥ कङ्कते कङ्किलौल्ये । शकादिभ्योऽटन् ॥ यद्वा । कं सुखं कटति । कटे° । मू° क ॥ कङ्कटकः । पुं । सन्नाहे । तनुत्रे । वर्मणि ॥ स्वार्थे कन् ॥

कङ्कणम् । न । करभूषणे । कड़ा इति भाषा ॥ हस्तसूत्रे । कङ्कण इति भाषा ॥ मण्डने ॥ गुर्वंचरे ऽ ॥ कंगु मंकणति । कणशब्दे । अच् । कङ्कते वा । ककिलौल्ये । बहुलमन्यत्रापीति अनुदात्तेतश्चहलादेरितिवा युच् । पृषोदरादित्वात्साधुत्वम् ॥ शेखरे ॥

कङ्कणी । स्त्री । क्षुद्रयष्टिकायाम् । किङ्किण्याम् । कन्याभरणविशेषे ॥ कंगणीति भाषाप्रसिद्धे स्त्रीणांहस्ताभरणे ॥ कङ्कनम् । ककिगतौ । ल्युट् । कङ्के गतौ अणति । अण शब्दे । अच् । गौरादित्वात् ङीष् । शकन्ध्वादिः ॥ यद्वा । कं सुखं कणति । कण° । पचाद्यच् ॥

कङ्कणीका । स्त्री । प्रतिसरायाम् । क्षुद्रयष्टिकायाम् ॥ कंगणीति प्रसिद्धे

कङ्करः

स्त्रीणांकरभूषणे ॥ चङ्क्रम्यते । क [illegible] शब्दे । अस्माद्घञ्लुगन्तात्पचाद्यच् । [illegible] कङ्कणचेतिङीषन्ते । प्रातेः कङ्क [illegible] णादेशश्च ॥ [illegible] । [illegible] कङ्कतम् [illegible] । प्रसाधन्याम् । कङ्घी इति भाषा ॥ कङ्कते । ककि° । बाहुलकात् अतच् ॥ [illegible] कङ्कतिका । स्त्री । कङ्कते । प्रसाधन्याम् ॥ कङ्कते । ककिगतौ । बाहुलकात् अतच् । गौरादित्वात् ङीष् । स्वार्थे कन् । केण इति ह्रस्वः ॥ यद्वा । कं सुखं शिरसोङ्गः । शकन्ध्वादिः । किङ्के प्वतति । क्तुन् ॥ वलीप्रभेदे । नागवलायाम् ॥ [illegible] । [illegible] कङ्कती । स्त्री । कङ्कतिकायाम् ॥

कङ्कचोटः । पुं । काँकिला इतिगौड-भाषा प्रसिद्धे मत्स्यविशेषे । जलव्याधे ॥

कङ्कचोटिः । पुं । कङ्कचोटमत्स्ये ॥ कङ्क इव चोटिर्यस्य ॥

कङ्कपक्षः । पुं । शरविशेषे ॥ कङ्कस्य पक्षा गृध्रवत्पक्षाणि यस्य ॥

कङ्कमाला । स्त्री । करतालीवाद्ये ॥

कङ्कमुखः । पुं । न । सन्दंशे । संडसी सडांसीतिच भाषा ॥

कङ्करः । त्रि । कुत्सिते ॥ न । तके ॥ इतिहेमचन्द्रः ॥

कङ्कठ

कङ्कटोलः । पुं । निकोचकवृक्षे । अङ्कोठे । टेरा इतिभाषा ॥ काँकरोल इति । गौडभाषाप्रसिद्धायां लतायाम् ॥ ॥ कङ्कणः । पुं । पृश्निपर्ण्याम् ॥ कङ्की । स्त्री । उत्पलगन्धिकें । कृष्णता ॥ गौरीपर्यायचन्दनेऽपि ॥ उग्रसेनस्य कन्यायाम् । वसुदेवानुजपत्न्याम् ॥ कङ्कालः । पुं । शरीरास्थि । त्वङ्मांस रहिते शरीरारम्भके अस्थिपञ्जरे । कृकङ्के । अस्थिपञ्जरेऽकं सुखं शिरो दत्वा कोलयति । कल्चेपे । चुरादिः । अक । सेट् । कङ्कते । ककिगतौ । न्यङ्कादित्वात्कुत्वम् ॥ ॥ कङ्कालमाली । पुं । रुद्रे । त्रिरूपाक्षे ॥ कङ्कालमाला अस्ति अस्य । व्रीह्यादित्वादिनिः ॥ ॥ कङ्कुः । स्त्री । कांगुनी इतिख्याते कङ्कु धान्ये ॥ न । कंसासुरभ्रातरि ॥ कङ्कुटिम् । नु । पर्वतीयमृत्तिकाविशेषे । कालकुष्ठे । रङ्गदायके ॥ यथा । हिमवत्पादशिखरे । कङ्कुटमुपजायते । तच्चैकं नलिकाख्यंस्यात्तदन्यद्रेणुकस्मृतम् ॥ पीतप्रभं गुरुस्निग्धं श्रेष्ठं कङ्कुटमादिमम् । श्यामं पीतं लघु त्यक्तसत्त्वं नेष्टं द्वितीयं रेणुकम् ॥ कङ्कुष्ठं रेचनं तिक्तं कटूष्णं वर्णकारकम् । कृ

कचः

मिशोथेदराध्मानगुल्मानाहकफा पहमिति ॥ ॥ कङ्केरुः । पुं ॥ काकविशेषे । द्वारवासिभुजि ॥ ॥ कङ्केल्लिः । पुं । अशोकद्रुमे ॥ कङ्केल्लः । पुं । वास्तूके ॥ कङ्केल्लिः । पुं । अशोकवृक्षे ॥ वञ्जुले ॥ कङ्कम्लानः । भोगे ॥ यावभोगे ॥ कङ्गुः । स्त्री । कांगनीतिप्रसिद्धे धान्यविशेषे । प्रियङ्गौ ॥ स्त्रियां कङ्गुप्रियङ्गू द्वे कृष्णरक्तासितास्त्रिया ॥ पीता चतुर्विधा कङ्गुस्तासां पीतावरा मृदुः ॥ तिक्तः कङ्गुस्तु भग्नसन्धानवातकृद्व्रणीगुरुः । रूक्षश्लेष्महरातीव वा जितांगुणकृद्भृशम् ॥ कम् अङ्गति । अगिगतौ । अङ्गयतिवा खण्डः । खगव्यादित्वात्कुः । शकन्ध्वादिः ॥ कङ्गुनी । स्त्री । कांगुनीइतिभाषाप्रसिद्धे धान्यविशेषे । पीततण्डुले ॥ चीनके । अत्यन्तसुकुमारे ॥ कङ्गुनीपत्रा । स्त्री । व्रणविशेषे । पण्यान्यायाम् ॥ कङ्गूः । स्त्री । धान्यभेदे । प्रियङ्गौ ॥ कचः । पुं । केशे ॥ दृहस्पतेःपुत्रे ॥ बन्धे ॥ शुष्कव्रणे ॥ कच्यते । कचबन्धने । पुंसीतिघः ॥ कचत्यात्मानंवा । पचाद्यच् ॥ मेघे इतिशब्दमाला ॥

कच्चरः

कचङ्गनम्। न। करशून्यहट्टे। निर्मुंटे। पैंठ इतिभाषा॥

कचङ्गलः। पुं। पांथोधौ॥ समुद्रे॥

कचपम्। न। तृणे॥ पचे॥ शोकृपचे॥ कचते। कचबन्धने। उपिकुटिदलिकचिखजिभ्यः कपन्॥

कचर्पचा। पुं। केशसमूहे॥ पाशः पंचस्य हस्तस्य कलापार्थो। कचात्परे॥

कचपाशः। पुं। केशसमूहे॥

कचरिपुफला। स्त्री। शमीवृक्षे॥

कचहस्तः। पुं। केशसमूहे॥

कचा। स्त्री। इस्तिन्याम्॥

कचाकुः। त्रि। दुराधर्षे॥ दुष्टशीले॥ पुं। भुजङ्गमे॥

कचाग्रम्। न। वालाग्रे। घंसरेखष्टकौ॥

कचाचितः। त्रि। विकीर्णकेशे॥

कचाटुरः। पुं। दाक्षूहे। गितिकरणे॥

कचामोदम्। न। वाला इतिप्रसिद्धे वासके॥

कचुः। स्त्री। कच्यां। अरयी कचा इतिचभाषा॥

कचेलम्। न। पत्रीनिबन्धने॥

कच्चटम्। न। जलपिप्पल्याम्॥

कच्चरः। त्रि। मलिने॥ कुत्सितंचरति। पचाद्यच्। रथवटयोश्चेतिचकारात्। कोःकन्तत्पुरुषइतियोग-

कच्छकः

विभागादा कोःकते॥ न। तके॥

कच्चित्। अ। कामप्रवेदने॥ सांभिलाषप्रश्ने॥ इष्टपरिप्रश्ने॥ हर्षे॥ मङ्गले॥ कदितिकुशब्दादेशः। कत्+चित्। अनयोःसमाहारद्वन्द्वः॥

कच्छः। पुं। अनूपेजलप्रायदेशे॥ नदीपर्वतादिजलाशयसमीपे। तटे॥ तुम्बकद्रुमे॥ नौकाङ्गे॥ काछइतिभाषाप्रसिद्धे परिधानाञ्चले। कच्छायाम्॥ अवस्मृतिः। वामे पृष्ठेतथा नाभौ कच्छत्रय मुदाहृतम्। एभिः कच्छैःपरीधत्ते योविप्रो स शुचिः स्मृतिः इति॥ परिधानाद्बहिः कच्छानिवद्धाद्यासुरीभवेत्। इतियाज्ञवल्क्यः॥ पुं। भूमि। देशविशेषे। यथा गणेश्वरात् पूर्वभागे समुद्रादुत्तरे शिवे। कच्छदेशः समाख्यातस्तन्त्रे श्रीशक्तिसङ्गमे इति॥ कुचति केचदोष्ठौ। बाहुलकात्कच्छः॥ यद्वा कच्छेनछुगतिं। उछृदिरुहिदेवनयोः। अन्येभ्योपीतिडः। कंजं छंछति परिच्छिनत्ति। छोछेदने। आतोनुपेतिकः॥ त्रि। जलप्रान्ते॥ परिधानाञ्चले कच्छे। जलप्राये त्रिलिङ्गकोक्त्यमरः॥

कच्छकः। पुं। तुम्बके। तूणी इति प्रसिद्धे वाद्ये॥

कच्छपी

कच्छटिका । स्त्री । कक्षायाम् । कच्छो टी इतिभाषा ॥ इतिशब्दरत्नावली ॥

कच्छपः । पुं । पद्मनखे जलजन्तुभिदे । कमठे । कूर्मे । कच्छुआ इति भाषा ॥ अस्यमांसप्रकारो गुणाश्च । तत्तरोर्येप्रतिच्छंसर्व्यक्ते स्निग्धञ्च कच्छपम् । तन्मांसंखर्परांङ्गाच्यां खण्डितं स्वल्पावगुंठितं ॥ पाचितं सार्षपे तैले हिङ्गुसैन्धवसंयुते । त्रिसवा रसनायुक्तेदाडिमेन सशोभिते ॥ कच्छपो बलदो वातपित्तनुत् पुंस्त्वकारकः इति ॥ पुनश्च । कच्छपो बलकृच्छ्रीघ्रंवातजिच्छुक्रकारकः । स्निग्धोष्णः प्रीणनःसद्यो विपाकी कटुकः स्मृतइति ॥ कुबेरस्य निधिविशेषे ॥ मत्स्यस्यबन्धविशेषे ॥ मत्स्यस्यन्त्रविशेषे ॥ कच्छेन पिबति । पा० । सुपीतियोगविभागोक्तेः ॥

कच्छपिका । स्त्री । क्षुद्ररोगविशेषे ॥ तल्लक्षणम् । ग्रथिताः पञ्च वा षड्वा दारुणाः कच्छपोन्नताः । कफानिलाभ्यां पिडका ज्ञेयाः कच्छपिकायुधैरिति ॥ प्रमेहेप्रमेहचयाजातद्रुपिडकान्तर्गतपिडकाविशेषे ॥ विशेषन्तु । सदाहा कूर्मसंस्थाना ज्ञेया कच्छपिका बुधैरिति ॥

कच्छपी । स्त्री । यागीयोगायाम् ॥ दु

कच्छुरा

ष्टलौ । कमठ्याम् ॥ क्षुद्ररोगविशेषे । कच्छपिकायाम् ॥ कच्छंकच्छेवा पिबति । कच्छेन प्रातिवा । सुपीतिकः । गाग्रोष्टकतु न पिबते सुरागोश्वेत्यादितिवचनात् । गतिकारकेतिसुबुत्पत्तेः प्राक्समासः । ज्ञातेरितिङी । प् ॥

कच्छरघा । स्त्री । दूर्व्वायाम् ॥ कच्छेरोहति । रुह० । डुगुपधेतिकः ॥

कच्छा । स्त्री । धारोष्णाम् । गंटिभेपञ्जे ॥ चीरिकायाम् । भिंजी मजीरा इतित्रभाषा । भिंभीभोका इतिगोडभाषा ॥ परिधानाप्रराष्ट्रले । काछ इतिभाषा ॥ कदन्तत्वाट्टाप् ॥

कच्छाटिका । स्त्री । कच्छटिकायाम् ॥

कच्छु । स्त्री । रोगविशेषे ॥ तल्लक्षणं यथा । क्षुद्रामिश्रैः पिडकाः सावयवः पामेत्युक्ता कण्डुमत्यः सदाहा । सैवस्फोटै सोत्सदाचैकमेता ज्ञेया प्राज्ञैः कच्छुकण्डूसिचेत्यचेति ॥

कच्छुमी । स्त्री । पटोले ॥ वपुषाप्रभेदे ॥

कच्छुरः । पुं । पुंश्चले ॥ त्रि । पामने । पामासहिते ॥ कच्छूरइति अश्व । कच्छा अस्त्यस्येतिरः ॥

कच्छुरा । स्त्री । शूकशिंब्याम् ॥ गवीनाम् । गन्धद्रव्याम् ॥ दुस्पर्शायाम्

कञ्जली

॥ यवासे ॥ पुंस्त्वल्याम् ॥ कच्छूं राति । रादाने । आत इति कः । पृषोदरादित्वात् । ह्रस्वः ॥

कच्छूः । स्त्री । खाज इतिप्रसिद्धेपामरोगे ॥ कपति ॥ कपहिंसायाम् । कषेश्छश्चेच्चूः ॥

कच्छूमती । स्त्री । शूकशिंब्याम् ॥ त्रि । कच्छूयुक्ते ॥

कच्छोटिका । स्त्री ॥ कच्छे । परिधानाश्वले । कछोटी इतिभाषा ॥

कच्ची । स्त्री । अरबी घुंआ इति प्रसिद्धे शाकविशेषे । वितण्डायाम् ॥

कञ्जम् । न । कमले ॥ केजातम् । जनी । डः ॥

कज्जलम् । न । काजल इति प्रसिद्धे अञ्जने । लोचके ॥ पुं । मेघे ॥

कज्जलध्वजः । पुं । दीपे ॥ कज्जलं ध्वजं यस्य ॥

कज्जलरोचकः । पुं । न । ज्योत्स्नाटवे । दीपदत्वे । दीवट इतिभाषा ॥

कज्जला । स्त्री । मत्स्यविशेषे । कज्जल्याम् ॥

कज्जली । स्त्री । मत्स्यविशेषे ॥ मिश्रितरसगन्धके ॥ यथा । शुद्धं सूतं तथागन्धं खल्वे तावद्विमर्दयेत् । सूतं न दृश्यते यावत् किन्तु कज्जलवद्भवेत् ॥ एषा कज्जलिका ख्याता हंत्र्यौषधी

कञ्चुकी

यैवर्द्धिनी । नानानुपानयोगेन सर्वव्याधिविनाशिनीति ॥

कञ्चटम् । न । जलतण्डुलीये । लाङ्गल्याम् । काँचडादाम इतिगौडप्रसिद्धे जलजशाकविशेषे ॥ पानीय तण्डुलीयो यस्य लकञ्चट मुदाहृतम् । कञ्चटं तिक्तकं रक्तपित्तानिलहरं लघु ॥ चँवराई शाकस्य विशेषे ॥ इति भावप्रकाशः ॥

कञ्चडः । पुं । कञ्चटभेदे । चक्रमर्दे । अम्बुपे ॥

कञ्चारः । पुं । सूर्य्ये ॥

कञ्चका । स्त्री । वंशशाखायाम् । कुञ्चिकायाम् । कम्ची इतिभाषा ॥ क्षुद्रस्फोटे ॥

कञ्चुकः । पुं । वारवाणे । भटादेश्चोलकाकृतिसन्नाहे ॥ लोहवर्मणि ॥ कञ्चते । कचिदीप्तौ बन्धनयोः । बा हुलकादुकन् ॥ कवचे ॥ निर्मोके । अहिनिर्ल्वयिन्याम् । सर्पत्वचि । काँचली इतिभाषा ॥ चोलके । कूर्पासे । अङ्गिकायाम् । अङ्गिया काँचली चोली इतिचभाषा ॥ वस्त्रे ॥ मर्दापकगृहीताङ्गस्थितवस्त्रे ॥

कञ्चुकालुः । पुं । सर्पे ॥

कञ्चुकी । पुं । अन्तःपुराध्यक्षे । सेवितदासे । खापत्ये । राज्ञांस्त्र्यगारेष

कटः

चीरचाधिकृते ॥ पिङ्गे ॥ अहौ । सर्पे ॥ जोङ्गकद्रुमे ॥ यवे ॥ चणके ॥ आवर्तुकवचे ॥ कञ्चुकश्चोलकोऽस्त्रियाम् । अतद्रनिः ॥ नखात् कर्मणि कञ्चुकीतिं स्मृतिः ॥

कञ्चुकी । स्त्री । ओषधिप्रभेदे ॥ चीरीशवृक्षे ॥

कञ्चुलिका । स्त्री । कञ्चुके । स्त्रीणामङ्गरक्षिण्याम् ॥

कञ्जः । पुं । केशे ॥ विरिञ्चौ । चतुरानने ॥ न । पीयूषे ॥ पद्मे ॥ कम् जलं जातम् । जनी° । डः ॥

कञ्जकः । पुं । मयना इति प्रसिद्धे पक्षिणि विशेषे ॥ इतिशब्दचन्द्रिका ॥

कञ्जजः । पुं । ब्रह्मणि । विरञ्चौ ॥

कञ्जनः । पुं । कन्दर्पे । कामे ॥ मयना इति प्रसिद्धे पक्षिणि ॥

कञ्जयोनिः । पुं । गालूके ॥ कञ्जस्य पद्मस्य योनिरुत्पत्तिस्थानम् ॥

कञ्जलः । पुं । मयनाइ प्रसिद्धे पक्षिणि ॥

कञ्जारः । पुं । जठरे ॥ सूर्ये ॥ विरिञ्चौ ॥ पारदे ॥ मुनौ ॥ कञ्जति । कञ्जिः सौत्रः । कञ्जिमञ्जिभ्यांचिदिभ्यारन्

कञ्जिका । स्त्री । ब्राह्मणयष्टिकाशब्दे । वह्मनेटी इतिभाषा ॥

कटः । पुं । श्रोणौ ॥ कटिपार्श्व ॥ किलञ्जे । वीरणनडादिमये तृणादिमये ॥ चटाई भाँदरी इतिभाषा ॥ अतिशये ॥ समये ॥ गुंजागण्डे ॥ तृणे ॥ शवे ॥ शवरथे ॥ औषधौ ॥ श्मशाने ॥ त्रि । क्रियाकारे ॥ कटति कथ्यतेवा कटे वर्षावरणयोः । पचाद्यच् । पुंसीतिघः ॥

कटंवरा । स्त्री । कटुरोहिण्याम् । कटुकीतिख्यातायाम् ॥ कटंवृणोति । वृञ्वर° । संज्ञायां भृतृ इति खच् । अरुर्द्विषदिति मुम् ॥

कटकः । पुं । न । अद्रेर्नितम्बे । मेखलाख्ये पर्वतमध्यभागे ॥ वलये । बाहुभूषणे ॥ दन्तिनांदन्तमण्डले ॥ चक्रे ॥ सामुद्रलवणे ॥ राजधान्याम् ॥ नगर्याम् ॥ सेनायाम् ॥ कटति कथ्यते वा कटे° । कृञ्गिलिप्सिसंज्ञभ्यो वुन् । कृत्यादिभ्यः संज्ञायां वुन्निति वुन् वा ॥ सानौ ॥

कटकी । पुं । नगे । पर्वते ॥ सेनाधिपे ॥ कटकोऽस्त्यस्ति । इनिः ॥

कटकोषः । पुं । मतङ्गजे । निष्ठीवनपात्रे । इति विकाण्डशेषः ॥

कटकृत् । त्रि । तृणासनकर्त्तरि ॥

कटखादकः । पुं । काचकलङ्के ॥ काके ॥ नम्रुके । त्रि । खादके । भक्षके ॥

कटङ्कटः । पुं । अग्नौ ॥

कटभ

कटङ्कटेरी । स्त्री । दारुहरिद्रायाम् ॥ हरिद्रायाम् ॥

कटभूः । पुं । महादेवे ॥ विद्याधरे ॥ अच्छदेवने ॥ कामरूपिणि ॥ राक्षसे ॥ कीटे ॥ कटं प्रवर्त्ते तच्छीलः । भुवः क्विप् । तं बिभर्त्तीति । कि पदीर्घः ॥

कटप्रोथः । पुं । स्फिचि । कट्याम् ॥

कटभङ्गः । पुं । सस्यानां छेदनच्छेदे ॥ नट पाक्षये । राजविनाशे ॥

कटभी । स्त्री । ज्योतिष्मत्याम् ॥ वृक्षभेदे । स्वादुपुष्पे । कटभीतु प्रमेहार्शोनाडीव्रणविषकृमीन् । हन्त्युष्णा कफकुष्ठघ्नी कटुरुष्णा च कीर्त्तिता ॥ तत्फलं तद्गुणं चेयं विशेषाल्लघुशुक्रकृत् । श्वेताचेक्षुरसंयुक्ता ॥

कटभ्राति । अन्येभ्योपीडितः । गौरादिः ॥ काँटागिरीप इतिगौडभाषाप्रसिद्धे वृक्षविशेषे ॥ अमराजितायाम् ॥

कटमालिनी । स्त्री । मदिरायाम् ॥

कटम्बः । पुं । वाद्यभेदे ॥ नागे ॥ कटति । कट° । कृञ्कटिकडिकटिभ्यो म्बच् ॥

कटमारः । पुं । श्योनाकवृक्षे ॥ कटभी वृक्षे ॥

कटमरा । स्त्री । मसानगयाम् । गन्धभादालिया इति गौडभाषा ॥ रोहिषतृणम् । कट्की इतिभाषा ॥ हस्तिन्यां । हथिनी इतिभाषा ॥ कक्षिकायाम् ॥ रोलायाम् ॥ वर्षाभ्वि ॥ मूर्षायाम् ॥ कटं बिभर्त्ति डु भृञ्धो° । संज्ञायांभृतृवृजिधारिसहितपिदमः इति खच् । मुम् ॥

कटग्रणः । पुं । भीमसेने ॥

कटशर्करा । स्त्री । गुडेष्ठोलतायाम् । नाटा इतिगौडभाषा ॥

कटाक्षः । पुं । अपाङ्गदृष्टौ ॥ कटौ क्षति शयितौ अक्षिणीयच् । बहुव्रीहौसक्थ्यक्ष्णोरितिसच् ॥ कटं गण्डमक्षति वा । अक्षूञ्व्याप्तौ । कर्मण्यण् ॥ भक्तेषु तिर्यङ्निपातात्कुत्सितः कटाक्षः ॥

कटायनम् । न । वीरणे ॥

कटारः । पुं । नागरे । कामिनि ॥

कटाहः । पुं । कूर्मकपर्परे । कमठपृष्ठे ॥ द्वीपभेदे । तैलादेः पाकपात्रे ॥ जायमानविषाणाग्रमक्षिपीशायके । अक्षिपीशिशौ ॥ स्वर्परे ॥ नरके ॥

कटिः । स्त्री । श्रोण्याम् ॥ वध्यते । कट आवरणे । सर्वधातुभ्यइन् ॥

कटित्रम् । न । रसनायाम् । काञ्च्याम् । कर्धनी कौंधनी तघडी इति भाषा ॥ कटिवस्त्रे ॥ कटिवर्मणि ॥

कटित्र

कटीत

कटी । पुं । द्वमे । गले ॥ वि । कटयति ॥

कटिप्रोथः । पुं । स्फिचि । चूतड़ इति भाषाप्रसिद्धे कटिदेशस्थमांसपिण्डे ॥ प्रोथति । प्रोथृपर्याप्तौ । पुंसीति घः । कट्याः प्रोथो मांसपिण्डः ॥

कटिरोहकः । पुं । हस्तिपश्चाद्भागारोहके ॥

कटिल्लकः । पुं । कारवेल्ले ॥ कटति । कटे० । वाहुलकादिल्लः । स्वार्थे कन् ॥

कटिशीर्षकः । पुं । कटिदेशे ॥

कटिशूल । पुं । कटिदेशस्थे शूलरोगे ॥ अस्योपधं यथा । रजनीकदलीचारलेपः सिध्माविनाशनः । कुष्ठस्य भागमेकन्तु पथ्याभागद्वयं तथा ॥ उष्णोदकेन सम्पीत्वाकटिशूलविनाशनमिति ॥

कटिशृङ्खला । स्त्री । चिलिकायाम् । कटिधार्यक्षुद्रघण्टिकायाम् ॥

कटिसूत्रम् । न । चन्द्रहार गोट् इति गौडभाषाप्रसिद्धे कट्यलङ्कारविशेषे ॥

कटी । स्त्री । पिप्पल्याम् ॥ श्रोणिदेशे ॥ कथ्यते । कटे० । सर्वधातुभ्यइन् । कृदिकारादिति कटाच्छीङ्निषेधे नहति गौरादिषुपाठाद्वा ङीष् ॥

कटीतल । पुं । न्युब्जखड्गे । बाँका खाँडा इति भाषा । सुर्पुडी इति सुखडी इतिबङ्गेपाठभाषा ॥

कटुकः

कटीरः । पुं । जघने ॥ कन्दरे ॥ न । कटौ ॥ कटति कट्यते वा कटीगतौ कटे० वा । कृशृपकटिपटिशौटिभ्य ईरन् ॥

कटीरकः । पुं । नितम्बे ॥ कटीरएव । स्वार्थेकः ॥

कटुः । पुं । रसविशेषे । चर्परा इति भाषा । झाल इति गौड भाषा ॥ कटूरूचः स्नन्यसेदःश्लेष्मकण्डूत्रिदोषप्रदः । यातपित्तकृदाग्नेयः श्रोणीप्राचनरोचकृत् ॥ चम्पकवृक्षे ॥ चीनकर्पूरे ॥ पटोले ॥ कट्फलतायाम् ॥ स्त्री । कटुक्याम् । कटुरोहिण्याम् ॥ प्रियङ्गुवृक्षे ॥ रास्निकायाम् ॥ न । अकार्य्ये ॥ दूषणे ॥ वि । कटुरसयुक्ते ॥ सुगन्धौ ॥ तीक्ष्णे ॥ मत्सरे ॥ अप्रिये ॥ कटत्याक्षिपतीति तीक्ष्णतया सुगम् । कटे० । कटिवटिभ्यांचेत्युः । वस्तुतस्तु गम्यृकिचिन्नपीत्यप चकारादुः । कटिवटिभ्यामिति सूत्रस्योज्ज्वलदत्तादिष्वदर्शनात् । स्त्रियां वोतोगुणेतिङीषि कट्वी कटुर्वा ॥ कटति । सु० उर्वा ॥

कटुकः । पुं । पटोले ॥ सुगन्धितृणे ॥ अर्कवृक्षे ॥ कुटजवृक्षे ॥ राजसर्षपे ॥ न । व्योषे । त्रिकटुरिति । स्वार्थेकः ॥

कटुकन्दः । पुं । शिग्रुवृक्षे ॥ आर्द्रके । शृङ्गवेरे ॥ लशुने ॥ कटुकन्दोऽस्य ॥

कटुकफलम् । न । कक्कोले ॥

कटुकस्नेहः । पुं । सर्षपे ॥

कटुका । स्त्री । क्षुद्रचञ्चुचुपे ॥ कटुरोहिण्याम् । कटम्बरायाम् । कुटुकी इतिभाषा ॥ कटुका कटुका पाके तिक्ता रूक्षा हिमा लघुः । भेदिनीदीपनी हृद्या कफपित्तज्वरापहा ॥ प्रमेहश्वासकासास्रदाहकुष्ठकृमिप्रणुत् ॥ ताम्बूल्याम् ॥ राजिकायाम् ॥ तिक्तालाबुके ॥

कटुकी । स्त्री । कटुकायाम् । मत्स्यपिशायाम् । शतपर्व्यायाम् ॥ कुटकी इति भाषा ॥

कटुकीटः । पुं । मशके ॥

कटुकाण्डः । पुं । टिट्टिभे ॥

कटुग्रन्थि । न । पिप्पलीमूले ॥ गुणवत्त्वात् ॥

कटुचातुर्जातकम् । न । एलात्वक्पत्रकमरिचात्मकचतुष्के ॥ इतिराजनिर्घण्टः ॥

कटुच्छदः । पुं । तगरवृक्षे । टगर इति गौडभाषा ॥

कटुतिक्तकः । पुं । भूनिम्बे ॥ शणवृक्षे ॥

कटुतिक्तिका । स्त्री । कटुतुम्ब्याम् ॥

कटुतिन्दुकः । पुं । कुपीलौ । कुचला

इतिभाषा ॥

कटुतुण्डी । स्त्री । खतापभेदे । तिक्ततुण्ड्याम् । कटुतराइ इति गौडभाषा ॥

कटुतुम्बी । स्त्री । इक्ष्वाकौ । तिक्तालाबाम् ॥ कटुतुम्बी हिमा हृद्या पित्तकासविषापहा । तिक्ता कटुर्विपाके च वातपित्तज्वरान्तकृत् ॥ कटुश्चासौतुम्बीच ॥

कटुत्रयम् । न । त्रिकटुनि ॥ कटूनां त्रयम् ॥

कटुदला । स्त्री । कर्कट्याम् । ककडी इतिभाषा ॥

कटुनिम्बः । पुं । नदीनिम्बवृक्षे ॥

कटुपत्रः । पुं । पर्पटे ॥ सितार्जके ॥

कटुपत्रिका । स्त्री । कारवीवृक्षे ॥

कटुफलः । पुं । पटोले ॥ इतिराजनिर्घण्टः ॥

कटुफला । स्त्री । श्रीवल्लीवृक्षे ॥

कटुभङ्गः । पुं । कटुभद्रम् । न । } गुणवत्त्वात् ॥

कटुमञ्जरिका । स्त्री । अपामार्गे ॥

कटुमोदम् । न । जयादिनामसुगन्धिद्रव्ये ॥

कटुरवः । पुं । मण्डूके ॥

कटुरोहिणी । स्त्री । कटुकायाम् । कटुरोकरोहिण्याम् ॥ कार्येस्या स्वरूपा

कटोलः

[illegible] ॥ कटुर्ध्वासौ रोहिणीच ॥

कटुवार्त्ताकी । स्त्री । वृन्ताकरङ्कोर्या-म् ॥ [illegible]

कटुबीजा । स्त्री । पिप्पल्याम् ॥

कटुशृङ्गाटकम् । न । गौरसुवर्णशृङ्के ॥

कटुस्नेहः । पुं । सर्षपे ॥ गौरसर्षपे ॥

कटूत्कटम् । न । आर्द्रके ॥ [illegible]

कटूत्कटकम् । न । शुण्ठ्याम् ॥

कटोरम् । न । कटोरा इति प्रसिद्धे पात्रे ॥ यथोक्तं भैषजतत्त्वे प्रकाशे । सुवर्णपट्टसंयुतकोचकूप्यां दृष्ट्वामृतं लोहपलोद्धृतैः । निष्कासितो धूमरसस्तु तस्य सौगन्धिकैः काचकटोरकेय इत्यादि ॥ जैमिन्याश्वमेधिके पर्वणि ९ अध्यायेपिच । रत्नौघं देवकीदत्तं पात्रे काञ्चननिर्मिते । कटोराणां चतुःषष्टिः पात्रयोभयतः स्थिता इति ॥ कटति । कटे० । ओरच् । रत्नयोरैक्यम् ॥

कटोरकम् । न । कटोरा इतिप्रसिद्धपात्रभेदे ॥ स्वार्थेकः

कटोरा । स्त्री । स्वनामख्यातपात्रे । इति ब्रह्मवैवर्त्तपुराणम् ॥

कटोलः । पुं । कटुरसे ॥ चण्डाले ॥ कटति । कटे० । कपिगडिगण्डिकटिपटिभ्य ओलच् ॥

कटोलकः । पुं । कटोलार्थे ॥ स्वार्थे

कंडी

कः ॥ [illegible]

कटोलवीणा । स्त्री । केन्दुडा इति गौडभाषाप्रसिद्धे यन्त्रे । चण्डालवल्लक्यिाम् ॥ कटोलस्य चण्डालस्य वीणा ॥ [illegible]

कट्टारः । पुं । कटिशस्त्रे । कटार इतिभाषा ॥

कट्फलः । पुं । कायफले इति प्रसिद्धे वृक्षे । स्त्रीपर्य्यायम् । कुसुदिकायाम् ॥ कट्फलस्तुवरस्तिक्तः कटुर्वातकफज्वरान् । हन्ति श्वासप्रसेकार्शः कासकण्ठामयारुचीः ॥ कटति । कटे० । क्विप् । कट्फलमस्य ॥

कट्फला । स्त्री । गम्भार्य्याम् ॥ दहत्त्वा [illegible]म् ॥ काकभाण्डाम् ॥ दैवटाख्याम् ॥ [illegible]वार्त्ताकायाम् ॥ सप्तलेर्ष्वारौ ॥

कट्वङ्गः । पुं । सूर्य्यवंशजे दिलीपनृपतौ ॥ श्योनाकवृक्षे । सोनापाठा इतिभाषाप्रसिद्धे ॥ कटूनि अङ्गान्यस्य ॥

कट्वरम् । न । दधिसरे ॥ वञ्चने ॥ तक्रे ॥ दग्धः संसारकक्षान्न तक्रंकट्वर मुच्यते ॥ कटति । कटे० । लिच्चर लच्चर धीवर धीवरमीवरची वरती वरनीवरगह्वरकट्वरसंवरादितिष्वरन्तं साधु ॥

कट्वी । स्त्री । कटुकायाम् ॥ लतायिभेदे । कटुकयष्ट्याम् । काष्ठवल्लिकायाम् ॥ मुकाष्ठायाम् ॥ वीतोगुणवच-

कठिनी

नादिति ङीष् ॥

कठः । पुं । मुनिविशेषे ॥ कठशाखाध्ययनकर्त्तरि ॥ कठशाखाभिज्ञे ॥ चरणां प्रभेदे ॥ स्वरे ॥ यजुश्शाखाविशेषे ॥ कठेन प्रोक्तमधीते । वैशम्पायनान्तेवासित्वात् जातस्यणिनेः कठचरकाल्लुगिति लुक् ॥

कठमर्दः । पुं । शिवे ॥

कठरः । पुं । कठिने ॥

कठा । स्त्री । करिण्याम् ।

कठाकुः । पुं । पक्षिणि ॥ कठति । कठ कृच्छ्रजीवने । कठिकुधिभ्यां काकुः ॥

कठाहकः । पुं । दात्यूहखगे ॥

कठिञ्जरः । पुं । तुलस्याम् । पर्णासे ॥ कृष्णवर्षरायाम् ॥ कठिनं जरयति । जॄष् वयोहानौ । गत्यन्तः । कर्मण्यण् । पृषोदरादिः ॥

कठिनः । त्रि । क्रूरे । निष्ठुरे । कठोरे ॥ स्तब्धे ॥ न । स्त्रियाम् ॥ वैद्यशास्त्रप्रसिद्धेषु यवान्यजाजीषिकटुभूनिम्बादिद्रव्येषु ॥ कठति । कठ° । बहुलमन्यत्रापीति इनच् ॥

कठिनपृष्ठकः । पुं । कमठे । कूर्मे ॥

कठिना । स्त्री । गुडशर्करायाम् ॥

कठिनिका । स्त्री । कठिन्याम् ॥

कठिनी । स्त्री । पर्णलेखिकायाम् । पाकशुक्लायाम् मेषशृङ्गी इतिभाषा ॥

कडङ्ग

गुणिगणगणनारम्भे न पतति कठिनी ससम्भ्रमाद्यस्य । तेनास्यायदि सुतिनी वद वन्ध्या कीदृशी नाम ॥

कठिल्लः । पुं । कारवेल्ले ॥ कठति । कठशोके । याचुलकादिल्लः ॥

कठिल्लकः । पुं । कारवेल्ले ॥ तुलस्याम् ॥ पुनर्नवायाम् ॥ स्वार्थे कन् ॥

कठी । स्त्री । कठेन प्रोक्तमधीयानायां ब्राह्मणयाम् ॥ शाखाध्येतृवाचित्वेन जातित्वान् ङीष् ॥

कठेरः । पुं । कृच्छ्रजीविनि । दरिद्रे ॥ कठति । कठकृ° । पतिकठिकुठीत्येरक् ॥

कठेरुः । पुं । चामरवाते । मन्थरौ ॥

कठोरः । त्रि । कठिने ॥ कठति । कठ° । कठिचकिम्यामोरन् ॥ पूर्णे ॥ कठोरता राधिपलाक्षनच्छविः । इति माघः ॥

कडः । पुं । मूर्खे ॥ कडति । कडमदे । पचाद्यच् ॥

कडकम् । न । सामुद्रे । विकूटे । कर्कचइति गौडभाषाप्रसिद्धे सामुद्रलवणे ॥

कडङ्करः । पुं । माषमुद्गादिकाष्ठे । घुणे ॥ कडङ्करोति । कृ° । कडङ्करदक्षिणादिति निपातनात् खच् ॥

कडङ्करीयः । त्रि । कडङ्कर्य्यं । त्रि । } कडङ्करार्हे गयि ॥

कण:

कडङ्कर मर्हति । कडङ्करदक्षिणा च्छेति छः यत्च ॥
कडङ्कः । पुं । सुराविशेषे ॥
कडङ्करः । पुं । वृसे ॥ गृणाति गिरति इला । गृशब्दे निगरणे वा । अच् । कडस्य गरः । कडङ्करेतिनिर्देशान्मुम् ॥ यद्वा । कंडति । कडं० । क्विप् । कडञ्च तत् अङ्गञ्च । कडङ्गं राति । रा० । क ॥
कडचम् । न । मानविशेषे ॥
कडम्बः । पुं । शाकनाडिकायाम् । कलम्बे । डाँठ डंठल इतिचंभाषा ॥ कोणे । प्रान्तभागे ॥ कडति । कड० । कृकदिकडीच्यम्बच् । केन जलेन लम्बते वा लबि० । अच् । डलयोरैक्यम् ॥ अग्रभागे ॥
कडम्बकः । पुं । कलम्बे । स्वार्थेकन् ॥
कडम्बी । स्त्री । कलम्बीशाके ॥
कडारः । पुं । पिङ्गलवर्णे । चि । पिङ्गलयतीति ॥ कडारस्तृणवल्लिपदिभ्य इतिभरतः ॥ दासे ॥ गडति । गड सेचने । गडेः कडचेत्यारन् ॥
कणः । पुं । अतिसूक्ष्मे । लेशे ॥ धान्यांशे । चूर्णतण्डुले ॥ सूक्ष्मस्तण्डुलावयवः कणतीति व्याख्यातारः ॥ वनवीरके ॥ कणति । कण निमीलने । पचाद्यच् ॥

कणित

कणगुग्गुलुः । पुं । गुग्गुलुप्रभेदे । त्रिंशत्पीते । स्वर्णक्षीर्यौ । गन्धराजे ॥
कणजीरः । पुं । श्वेतजीरके ॥
कणजीरकनामन् । क्षुद्रजीरके । द्विच० । गन्धिनि ॥
कणभः । पुं । कीटविशेषे ॥
कणभचक्रः । पुं । भारिटखगे । श्यामचटके । गैरिके ॥
कणलाभः । पुं । आवर्त्ते । जलभ्रमे ॥
कणा । स्त्री । जीरके ॥ कुम्भीरमत्स्ये । कायाम् ॥ पिप्पल्याम् ॥ श्वेतजीरके ॥ अजे ॥ टाप् ॥
कणाटीरः । पुं । खञ्जनपक्षिणि ॥
कणाटीरकः । पुं ।
कणादः । पुं । वैशेषिकदर्शनकर्त्तरि मुनिविशेषे । काश्यपे ॥
कणिकः । पुं । कणायाम् । अजो । नीराजनाविधौ ॥ सूनीइतिभाषाप्रसिद्धे शुष्कगोधूमचूर्णे ॥
कणिका । स्त्री । अत्यल्पसूक्ष्मवस्तुनि ॥ अग्निमन्थे । अरणीतिख्याते ॥ कणति । कणगतौ । पचाद्यच् । स्वार्थे कन् । यद्वा । कणति । कणशब्दे । कुन् ॥ कणाः सन्त्यस्या । अतइनिठनाविति ठन् ॥
कणितम् । न । पीडितानां शब्दे । आ

कण्टकः

तनादे ॥ इति हेमचन्द्रः ॥ कणिशम् । न । शस्यमञ्जर्याम् । धान्यादिशीर्षे ॥ कणयः कणाः सन्त्यस्य । लोमादित्वाच्छः ॥ यद्वा । कणिनं स्वावयवं श्यति । शोतनूकरणे । आत इति कः ॥ कणी । स्त्री । हयकरञ्जतायाम् ॥ कणिकायाम् ॥ न । अल्पे ॥ कणीचिः । स्त्री । कणीच्यर्थेषु ॥ कणति । कणगतौ । इकणिभ्यामीचिः ॥ कणीची । स्त्री । पुष्पितलतायाम् ॥ गुञ्जायाम् ॥ कणाची इति किरोषी इतिच प्रसिद्धे अकटे ॥ कृदिकारादितिङीषं ॥ कणे । अ । अभिलाषातिशये । सप्तमीप्रतिरूपकोयं निपातः ॥ कणेरः । पुं । कर्णिकारवृक्षे ॥ कणेरा । स्त्री । वेश्यायाम् ॥ हस्तिन्याम् ॥ कणेरुः । स्त्री । कर्णिकारे ॥ करिण्याम् ॥ वेश्यायाम् ॥ कण्टकः । पुं । न । सूच्यग्रे ॥ क्षुद्रशत्रौ ॥ सत्यादिकीकसे ॥ नैयायिकादिदोषोक्तौ ॥ रोमाञ्चे ॥ द्रुमाङ्गे । कांटा इति भाषा ॥ केन्द्रे । लग्नचतुर्थसप्तमदशमस्थानेषु ॥ यथा ॥ लग्नाम्बुहिबुकर्मगानि केन्द्रमुक्तानि कण्टक

कण्टका

म् । चतुष्टयञ्चानयेटोवक्षीलग्ने विशेषत इति ॥ वेणीतोऽपि ॥ कण्टकद्रुमः । पुं । शाल्मलिवृक्षे ॥ इति राजनिर्घण्टः ॥ कण्टकप्रावृता । स्त्री । गूढकन्यायाम् । घृतकुमार्याम् ॥ कण्टकफलः । पुं । चुरे । गोक्षुरे ॥ कण्टकबृन्ताकी । स्त्री । वार्ताक्याम् ॥ कण्टकश्रेणी । स्त्री । कण्टकार्याम् ॥ कण्टकानां श्रेणी यस्याम् ॥ कण्टकागारः । पुं । सरटजन्तौ ॥ कण्टकाढ्यः । पुं । कुब्जकण्टचे ॥ त्रि । कण्टकयुक्ते ॥ कण्टकारिका । स्त्री । निदिग्धिकायाम् । दृहत्याम् । भटकटैया इति भाषा ॥ कण्टकान् दूयति । दुःख तौ । कर्मण्यण् ॥ स्वार्थेकन् । कण्टकारिका फले ॥ कण्टकारिकायाः फलम् । हरीतक्यादिभ्यश्चेति यिकारावयवप्रत्ययस्य लुप् ॥ हरीतक्यादिषु लिङ्गमेवप्रकृतिवन्न सङ्ख्या ॥ कण्टकारी । स्त्री । व्याघ्र्याम् । कण्टकारिकायाम् । भटकटैया इति भाषा ॥ कण्टकारी कण्टकिनी तथा स्वादुश्च शुक्ला । चक्षुष्या । चतुर्थी श्लेष्मातिसारिणी ज्वरदाहनुत् ॥ दोषत्रयहरीलक्ष्मीग्रहगण्डार्शोतिसारजित् ॥

सुश्रुतेतु। कण्टकारी सरा तिक्ता कटुकादीपनी लघु। रूक्षोष्णापाचनीकासश्वासज्वरकफानिलान्॥ निहन्ति पीनसं पार्श्वपीडाकृमिहृदामयान्। तयोःफलं कटुरसं पाकेच कटुकं भवेत्॥ शुक्लस्तरेचनं भेदि तिक्तं पित्ताग्निकृल्लघु। हन्यात् कफमरुत्कण्डूकासमेदकृमिज्वरान्॥ कण्टकारीकृतःक्वाथः सकृष्णः सर्वकासहा॥ तद्वत् प्रोक्तासिता क्षुद्राविशेषाद्भेकारिणी॥ श्यामलक्ष्याम्॥ कण्टकान् इयर्त्ति। ऋगतौ। कर्मण्यण्। ङीप्॥

कण्टकारीफलम्। न। कण्टकार्याः फले॥ कण्टकारीफलं तिक्तंकटुकंदीपनं लघु। रूक्षोष्णंश्वासकासघ्नं ज्वरानिलकफापहम्॥ शाकप्रकारस्तु। तोयाक्तस्विन्नवृन्ताकीफल मार्द्रकञ्च दग्धाहतं चिरविपाचित माज्यकेन। चूर्णेन सैन्धवभवेन विमिश्रितञ्च वह्निं प्रबोधयति कासनिवारणंहीति॥

कण्टकालुक। पुं। यवासे। यासे॥

कण्टकाशनः। पुं। उष्ट्रे। कण्टकानिभक्षण मस्य॥

कण्टकाष्टीलः। पुं। मत्स्यविशेषे। कुलिशे॥

कण्टकितः। त्रि। पुलकिते॥

कण्टकी। पुं। मत्स्ये॥ खदिरवृक्षे॥ विकङ्कते। मदनवृक्षे॥ गोक्षुरे॥ बंशे॥ वदरवृक्षे॥ कण्टकाःसन्त्यस्मिन्। इनिः॥

कण्टकिनी। स्त्री। वार्त्ताक्याम्॥ गोरक्षिकण्ट्याम्॥ मधुरवल्लूर्याम्॥

कण्टकिफलः। पुं। कटहल इतिप्रसिद्धे वृक्षविशेषे। पनसे॥ कण्टकाःसन्त्यस्य। अत इनिठनौ विनीनिः। कण्टकि फलमस्य॥ समष्ठिलाटवे॥

कण्टकिलः। पुं। वेतुवाँश इति गौडभाषाप्रसिद्धे वंशविशेषे॥

कण्टकिलता। स्त्री। चपुष्याम्॥ खीरा इति भाषा। कण्टकिनीचासौलताचेति॥

कण्टकी। स्त्री। वोर्त्ताकीविशेषे। कँटोलावैगन इति भाषा॥

कण्टकुरण्टः। पुं। झिण्ट्याम्॥

कण्टतनुः। स्त्री। इक्षुक्ष्याम्॥

कण्टदला। स्त्री। केतक्याम्॥

कण्टपत्रः। पुं। विकङ्कतवृक्षे॥

कण्टपत्रफला। स्त्री। ब्रह्मदण्ड्याम्॥

कण्टपादः। पुं। विकङ्कतवृक्षे॥

कण्टफलः। पुं। क्षुद्रगोक्षुरे॥ पनसे॥ धुस्तूरे॥ लताकरञ्जे॥

कण्टफला। स्त्री। देवदालीलतायाम्॥

कण्ठनी

कण्ठलः । पुं । [बाबची] [वबूल इति भाषा] ॥ इतिशब्दचन्द्रिका ॥

कण्ठवल्ली । स्त्री । [श्योवल्ली वृक्षे] ॥

कण्ठवृक्षः । पुं । तेजःफलवृक्षे ॥

कण्ठाफलः । पुं । कण्ठकिफलेन । कटहलि इति भाषा ॥ विशेषात् पनसं वर्ज्यं गुल्मिभिर्मन्दवह्निभिः ॥

कण्ठारिका । स्त्री । नीलझिण्ट्याम् ॥

कण्ठालुः । पुं । [वंशे] ॥ वृहत्यां ॥ वाल्लीक्याम् ॥ वर्बूरे ॥

कण्ठाल्वियम् । न । पद्मकन्दे ॥

कण्ठीरः । पुं । कलायें ॥ अपामार्गे ॥ खदिरे ॥ गोक्षुरे ॥

कण्डः । पुं । मदनद्रुमे ॥ होमकुण्डा दिरङ्गुलिपरिमितेस्थाने ॥ यथा । खाता द्व्यङ्गुलः कण्डः सर्वकुण्डेष्व यंविधिरिति ॥ त्रि । गले । ग्रीवाग्र भागे ॥ अत्रविशुद्धनामपोडशदल पद्म मस्ति ॥ सन्निधाने । निकटे ॥ ध्वनौ ॥ कण्डति । कण्डशब्दे कण्डे ष्टः ॥ यदा । कण्डते । कठिण्ये । क्विप् ॥

कण्डकूणिका । स्त्री । वीणायाम् ॥

कण्डतल्लासिका । स्त्री । अश्वग्रीवावेष्ट करज्जुचर्म्मादौ ॥ इति शब्दमाला ॥

कण्डनीडकः । पुं । चिल्लपचिणि । चील इति भाषा ॥ इतिचिकाण्डशेषः ॥

कण्डी

कण्डनीलकः । पुं । [टल्कायाम्] [नसा ल इतिभाषा] ॥ इतिशब्दमाला ॥

कण्डपाशकः । पुं । हस्तिकण्ठवेष्टक रज्जौ ॥

कण्डभूषा । स्त्री । ग्रैवेयके । कण्ठी गो पसकरी इतिचभाषा ॥ भूष्यतेऽनया । भूष अलङ्कारे । गुरोश्चेत्यङ् । क ण्ठस्यभूषा ॥

कण्डमणिः । पुं । ग्रैवेयकमणौ । काक ले ॥ कण्डस्य मणिः ॥

कण्डग्रहिः । स्त्री । गलस्य कर्म्मादिलिप्त च्चे ॥

कण्डरुचम् । न । स्तनाभिङ्गने ॥ यथा यत् कुर्वते वचसि वल्लभस्य स्तनोभिघातं निविडोपगूढ । परिश्रमार्घं प्रनकै र्विदग्धास्तत्कण्डरुचं प्रवदन्तिसन्त इति ॥

कण्डाग्निः । पुं । पचिणि ॥ कण्डे अग्नि रस्य ॥ इति त्रिकाण्डशेषः ॥

कण्डालः । पुं । शूरणे ॥ युद्धे ॥ गोणी प्रभेदे । खुर्जी इतिभाषा ॥ क्रमेलके ॥ नौकायाःखनित्रे ॥

कण्डाला । स्त्री । जालगोणिकायाम् ॥

कण्डिका । स्त्री । कण्डाभरणे । एकल डीकण्ठी इति भाषा ॥ इतिहेम चन्द्रः ॥

कण्डी । स्त्री । गले ॥ अश्वकण्ठवेष्टनर

कण्डूः

ज्युचर्म्मादौ ॥

कण्ठीरवः । पुं । सिंहे ॥ मत्तमातङ्गे ॥ पारावते ॥

कण्ठीरवी । स्त्री । वासकवृक्षे ॥

कण्ठेकालः । पुं । महादेवे ॥ कण्ठेका-लोस्य । हलदन्तादित्वच्लुक् ॥

कण्ठ्यः । त्रि । कण्ठभवे शब्दादौ ॥ क-, ण्ठहिते ॥ उभयत्र शरीरावयवत्वा-त् यत् ॥

कण्डनम् । न । निस्तुषीकरणे । उदू-खलादिना तण्डुलादेर्निर्मलीक-रणे । छडना इतिभाषा ॥

कण्डनी । स्त्री । उलूखले ॥ मुषले ॥

कण्डरा । स्त्री । महास्नायौ । महाना-व्याम् ॥

कण्डिका । स्त्री । वेदैकदेशे ॥

कण्डूः । स्त्री । कण्डूयायाम् । गात्रवि-घर्षणे ॥ कण्डते । कडिमदे । मृग-य्वादित्वात् कुप्रत्ययः ॥

कण्डुरः । पुं । कारवेल्ललतायाम् ॥ कु-न्दरक्षणे ॥

कण्डुरा । स्त्री । आत्मगुप्तायाम् । शूक-शिंब्याम् ॥ अत्यन्तपरुषाम् ॥ क-ण्डूरातिं । रादाने । आतोनुपे-तिकः । पृषोदरादित्वात् ह्रस्वः ॥

कण्डूः । स्त्री । खाज इतिप्रसिद्धे रोगे । खर्व्वाम् । कण्डूयायाम् ॥ कण्डूय-

कण्डोल

नम् । कण्डूञ् गात्रविघर्षणे । सम्प-दादित्वात् क्विप् ॥

कण्डूकरी । स्त्री । शूकशिंब्याम् ॥

कण्डूमः । पुं । आरग्वधे ॥ गौर सर्षपे ॥

कण्डूतिः । स्त्री । कण्डूम् । खाज इ-ति भाषा ॥ कण्डूयतेः क्तिच् ॥

कण्डूयनम् । न । कण्डूम् ॥

कण्डूयमानः । त्रि । कण्डूयितरि । क-षमाणे ॥

कण्डूया । स्त्री । कण्डूयने । खर्व्वाम् ॥ कण्डूयनम् । कण्डूञ् । कण्डूादि-भ्योयक् । अप्रत्ययात् ॥

कण्डूयिता । त्रि । कण्डूयमाने ॥

कण्डूरा । स्त्री । प्रावृषायण्याम् । म-र्कट्याम् ॥ कण्डूंरातिं । रा० । आत इति कः ॥

कण्डूलः । पुं । शूरणे ॥ त्रिं ॥ कण्डू-युक्ते ॥

कण्डोलः । पुं । उष्ट्रे ॥ गोणीप्रभेदे ॥ पिष्टे । वंशादिनिर्मिते धान्यादिस्था-पनभाण्डे ॥ कण्डते । कडिमदे । बाहुलकादोलच् ॥ यद्वा । कपिग-डिगण्डीतिसूत्रे कण्डेः पाठादोल-च् ॥

कण्डोलकः । पुं । कण्डोले ॥

कण्डोलवीणा । स्त्री । केट्टडा इति

कति

गौडभाषा प्रसिद्धे वाद्ययन्त्रे। चण्डा लवल्लक्याम्। किङ्करीति प्रसिद्धे वाद्ये॥ कण्डते। कडि°। वाहुलका दोलच्। कण्डोलस्य वीणा॥

कण्डोली। स्त्री। कण्डोलवीणायाम्॥

कण्डोघः। पुं। शूकशीटे। शूयामेका इतिगौडे भाषा॥

कण्वः। पुं। मुनिविशेषे॥ पुरुवंशजाताप्रतिरथनामक्षत्रियपुत्रे॥ यथा। सुमतिर्भुवो ऽप्रतिरथः कण्वोऽप्रतिरथात्मजः। तस्य मेधातिथिस्तस्मात् प्रस्कण्वाद्याद्विजातयः। इतिश्रीभागवतम्॥ न। पापे॥ कणनम्। कणशब्दे॥ उल्वादयश्चेतिसाधुः॥ कणति। अणूमुषिखटिकणीत्यादिनाकन्वा॥

कतः। पुं। मुनिविशेषे॥ कतकवृक्षे॥

कतकः। पुं। तिक्तफले। पयःप्रसादिनि। निर्मली इतिभाषा॥ कतकस्य फलं नेत्र्यं जलनिर्मलकारकम्। वातश्लेष्महरं शीतं मधुरं तवरंगुरु॥

कतफलः। पुं। कतकवृक्षे॥

कतमः। पुं। बहूनां जातिपरिप्रश्ने॥ किमोऽतमच्॥

कतमाक्षः। पुं। वक्षौ॥

कति। त्रि। कियति। सङ्ख्यापरिमाणप्रश्ने॥ का सङ्ख्यापरिमाणमेधा-

कथकः

म्। किमः सङ्ख्यापरिमाणेऽतिचेति डतिः। नित्यंबहुवचनान्तोयम्॥

कतिथः। त्रि। कतीनां पूरणे॥ षट्कतिकतिपयचतुरांथुगिति डटिथुगागमः॥

कतिपयः। त्रि। कतिशब्दार्थे। कितने क इतिभाषा॥

कतिपयथः। त्रि। कतिपयानां पूरणे। षट्कतीत्यादिना कतिपयस्यास्ङ्ख्यात्वेपि अतएवन्नामकाडुट्तस्मिन् थुगागमः॥

कत्तृणम्। न। रामकर्पूर इतिगौडभाषाप्रसिद्धे सुगन्धितृणविशेषे। पौरे। सौगन्धिके। रौहिषे॥ अस्यगुणाः। कटुत्वम् तिक्तत्वम् कफशस्त्रव्रण्यादिदोषवाजग्रहविनाशित्वमिति राजनिर्घण्टः॥ चाकुलिया इति गौडभाषाप्रसिद्धे पृश्न्नौ॥ मृश्निकायाम्। कुक्षिकायाम्॥ कुत्सितं तृणम्। तृणेच जातावितिकोः कत्॥

कत्तोयम्। न। मद्ये। मैरेये॥

कत्थनम्। न। श्लाघायाम्॥ कत्थ°। ल्युट्॥

कत्थवरम्। न। स्कन्धे

कत्थकः। त्रि। कत्थोपजीविनि॥ एकनटे। नाटकवर्णनकर्त्तरि॥ वक्तरि॥ यथा। वाद्युक्तसाधनियमच्युतो

कथा

पिकयकै रुपाधिरङ्गाव्य इतिचिन्ता मणिः ॥ कथयति । कथवाक्यप्रबन्धे । बहुलमन्यत्रापीति कुन् ॥

कथङ्कथिकः । त्रि । प्रश्नकर्त्तरि । प्रष्टरि ॥

कथङ्कथिकता । स्त्री । पृच्छायाम् ॥ इति हेमचन्द्रः ॥

कथङ्कारम् । अ । केन प्रकारेण कृच्चेत्यर्थे । कथमित्यर्थे ॥ अनर्थकादेव करोतेः कथम्पूर्वात्समुच् ॥

कथञ्चन । अ । केनाप्यंशेनेत्यर्थे ॥

कथञ्चित् । अ । अतिप्रयत्नेनेत्यर्थे ॥

कथनम् । न । कथायाम् । कहना इति भाषा ॥ इतिचन्द्रायुध ॥

कथम् । अ । हर्षे ॥ गर्हायाम् ॥ प्रकारार्थे ॥ सम्भ्रमे ॥ प्रश्ने ॥ सम्भावनायाम् ॥ केन प्रकारेण । किमर्थेति यमुः ॥

कथमपि । अ । यत्नगौरवे ॥ बाढमित्यर्थे ॥ कथमादितथाप्यन्तंयत्नगौरव भेदयोः ॥

कथम्भूत । त्रि । किम्प्रकारे ॥ कं प्रकारं किवा प्रकार मापन्नः । द्वितीयान्तादपियमु ॥

कथा । स्त्री । प्रबन्धकल्पनायाम् ॥ प्रबन्धकल्पनासोकसत्त्वां प्रज्ञाः कथां विदुः । परम्पराश्रया या स्यात्सा म

कदन्न

ताख्यायिका क्वचिदिति क्षीरस्वामी आर्यः ॥ पञ्चप्रतिपक्षोपन्यासेन विचारणायाम् ॥ नैयायिकमतेहि नानावक्तृकपूर्वपक्षसिद्धान्तवान् वाक्यसन्दर्भः कथा । तद्भेदास्त्रय. । वादे जल्पेवितण्डायेति ॥ कथा काद म्बर्यादिस्वरूपा सैवगद्यपद्यमयी चम्पूरितिग्रन्थान्तरे ॥ कथयति । कथवाक्यप्रबन्धे । चिन्तिपूजिकथिकुम्बिचर्चश्चेत्यङ् । टाप् ॥

कथाप्रसङ्गः । त्रि । वार्त्तालेशे ॥ वार्त्तायाम् । गोष्ठीवचने ॥ विषयवैद्ये ॥

कथाप्राणः । त्रि । कथके । कथोपजीविनि । नाटकवक्तरि ॥ कथायां प्राणो. यस्य ॥

कथितः । त्रि । उक्ते । कहा इतिभाषा ॥ कथ° । क्त. ॥

कदः । पुं । मेघे ॥ कं जलं ददाति । दु दाञ । कः ॥

कदकः । पुं । उल्लोचे । विताने ॥

कदध्वा । पुं । कापथे । निन्द्यमार्गे ॥ कुत्सितोऽध्वा । कुगतीतिसमासः । कोः कत् तत् पुरुषेऽचीति कदादेशः ॥

कदनम् । न । मर्दे । युद्धे ॥ पापे ॥ बाधायाम् ॥ मारणे ॥

कदन्नम् । न । कुत्सितान्ने ॥

कदम्ब

कदम्बः । पुं । नीपे । प्रियके ॥ कदम्बो मधुरः शीतः कषायो लवणो गुरुः । सरो विष्टम्भकृद्रूक्षः कफस्तन्यानिलप्रदः ॥ अत्रसाञ्जः । नीपो महाकदम्बःस्याद्धाराकदम्बइत्यपि । द्वितीयोऽल्पप्रसरश्च दत्तपुष्पः कदम्बकइत्यस्यभेदः । तथारत्नेपि । हरिद्रस्तुरजोवलः । धूलीकदम्बको धाराकदम्बः षट्पदप्रियः ॥ दत्तपुष्पः केशराढ्यः प्रावृषेण्यः कदम्बकः । नीपोमहा कदम्बोपि तथा वहुफलोमतः । इत्यमरटीकायांभरतः ॥ सर्षपे ॥ देवताडकतृणे ॥, न । निकुरम्बे । सङ्घे । समूहे ॥ कदति । कदः सौत्रोधातुः । कृकदिकडिकटिभ्योम्बच् ॥

कदम्बकः । पुं । हरिद्रौ ॥ कदम्बार्थेषु ॥ स्वार्थेकन् ॥ यद्वा । कदति क्रन्दयतिवा । कदहिंसायाम् । कदि आह्वाने रोदने च । कृकदीत्यम्बच् । अनित्यत्वान्ननुम् । स्वार्थेकः ॥ न । निकुरम्बे । समूहे ॥

कदम्बगोलकन्यायः । पुं । कदम्बगोलकस्य सर्वावयवेषु युगपदेव पुष्पाणामुत्पत्तिरूपे दृष्टान्तविशेषे ॥

कदम्बपुष्पा । स्त्री । मुण्डितिकायाम् । मुण्डी इतिभाषा ॥

कदल

कदम्बपुष्पी । स्त्री । महाश्रावणिकायाम् । मुण्डीर्यास्म् ॥

कदम्बी । स्त्री देवदाल्याम् ॥

कदरः । पुं । सोमवल्के श्वेतखदिरे ॥ कदरो विशदो वर्ण्यो मुखरोगकफापहः । कजित् ॥ ऋकचे । करपत्रे । करवत् करौत आरा इतिच भाषा ॥ कडाजामुडा इति गौडभाषाप्रसिद्धे व्याधिभेदे ॥ तल्लक्षणम् । अङ्गुल्यादीनां मथिते पादे क्षते वा कण्टकादितः । ग्रन्थिः कोलवदुत्सन्नो जायते कदरस्तु सः ॥ अङ्कुरे ॥ दृणाति । दृविदारणे । पचाद्यच् । कल्यनलस्य दरः ॥

कदर्थितः । त्रि । विडम्बिते । दूषिते ॥ कुत्सितोऽर्थः कदर्थः । कोः कत् । कदर्थः प्राप्तः कदर्थितः ॥

कदर्य्यः । त्रि । क्षुद्रे । कृपणे । सतिविभवे अदातरि ॥ यथा । आत्मानं धर्मकृत्यञ्च पुत्रदारांश्च पीडयन् । योलोभात् सञ्चिनोत्यर्थान् सकदर्य इतिस्मृतः ॥ कुत्सितोऽर्थः स्वामी ॥ कुगतीतिसमासः । कोः कत् तत्पुरुषे ॥

कदलः । पुं । रम्भावृक्षे ॥ वृक्षीलतायाम् ॥ क्रन्दते क्रन्द्यते वा । कदिआह्वानेरोदनेच । वृषादित्वात् कलच्

कदली

कदलकः । पुं । कदलार्थे ॥ स्वार्थेकः ॥

कदला । स्त्री । पृश्न्याम् ॥ डिम्बिकायाम् ॥ शाल्मलीवृक्षे ॥ अजादेराकृतिगणत्वाट्टाप् ॥

कदली । स्त्री । वारणवृक्षायाम् । रम्भायाम् ॥ यथा । माणिक्यमर्त्यामृतचम्पकाद्या भेदाः कदल्या बहवोपि सन्ति । उत्तागुणास्तेष्वधिकाभवन्ति निर्दोषता स्वाद्लघुताचतेषाम् ॥ गुणान् पश्य मोचाफले ॥ पताकावाम् ॥ कारिवैजयन्त्याम् ॥ मृगविशेषे ॥ के दलति । दल्विशरणे । अच् । ङीष् ॥ कन्दते कन्द्यते वा कदिआ० । इ पृषोदरित्वात् साधुः । गौरादिः ॥

कदलीकन्दः । पुं । रम्भामूले । केराकन्द केलाकन्द इतिच भाषा ॥ शीतलः कदलीकन्दो बल्यः केश्यो क्षपित्तजित् । वह्निकृद्दाहहारीच मधुरो रुचिकारकः ॥ कन्दः कदल्या दलितो निर्यान्तं संवेदितो द्विरुदतेन राहुः । उद्भूषितः सैन्धवरेणुनाथ मरीचसम्कीर्तितवल्कचः ॥

कदलीकुसुमम् । न । रम्भापुष्पे ॥ कदल्या कुसुमं स्निग्धं मधुरं तुवरंगुरु । वातपित्तहरं शीतं रक्तपित्तक्षयप्रणुत् ॥

कदाचि

कदलीदण्डः । पुं । थोड इति गौडभाषाप्रसिद्धेमोचामध्यस्थदण्डे ॥ कृत्तः स्विन्नः सन्निलविधृतः कृत्ततन्तुः प्रभिन्नः कम्बुभृत्त्वाजजविरचितः चारुरत्नम्बीरपुष्टः । मध्ये मध्ये तनुशकलितेनार्द्रकेणातिपूर्णः स्वादुस्तूर्णं भवतिसुतरांगर्भदण्डः कदल्याः ॥ योनिदोषहरोदण्डः कादल्योऽसृक् प्रदरंजयेत् । रक्तपित्तहरः शीतः सुरुच्योग्निप्रवर्द्धनः ॥

कदा । अ । कस्मिन् काले । कब इति भाषा ॥ सर्वैकान्यकिंयत्तदः कालेदा ॥

कदाकारः । त्रि । कुत्सितोवयवे ॥ कुत्सितः आकारोऽस्य । कोः कदादेशः ॥

कदाख्यम् । न । कुष्ठोपधौ ॥ त्रि । कुत्सितनामनि ॥ कुत्सितं आख्यायस्य । कोः कत् तत्पुरुषेचेतिकदादेशः ॥

कदाचन । अ । कस्मिन्काले । किसी समयमे इतिभाषा ॥

कदाचारः । त्रि । कुत्सिताचारे ॥ कुत्सितः आचारोयस्य । कोः कत् आदेशः ॥

कदाचित् । अ । जातु । कस्मिंश्चित्काले प्रश्नावे ॥ कदाचिच्चिन्त्य अनयोःसमाहारः ॥

कनक

कदुष्णम् । न । ईषदुष्णे ॥ ईषदुष्णम् । कवच्चोष्णे इतिपचेकदादेशः ॥ चि । तद्वति ॥

कदर्थः । पुं । कुत्सितरथे ॥

कद्रुः । पुं । पिङ्गलवर्णे ॥ चि । तद्वति । स्वर्णपिङ्गे ॥ कन्दति । कंदि आह्वाने । सृगव्यादित्वात् साधुः ॥

कद्रुपुत्रः । पुं । नागे ॥ कद्रूःपुत्रः ॥

कद्रूः । स्त्री । नागमातरि ॥ संज्ञायामित्यूङ् ॥

कद्वदः । चि । गर्ह्यवादिनि । दुर्वाचि ॥ कुत्सितंवदति । वदेः पचाद्यच् । रथवदयोश्चेति कोः कात् ॥ कुत्सितस्य वदोवा ॥

कनकम् । न । स्वर्णे । हेम्नि ॥ पुं । किंशुकवृक्षे ॥ नागकेशरवृक्षे ॥ कृष्णधूस्तूरे ॥ धूस्तूरे ॥ काञ्चनालवृक्षे ॥ कासीसे । कृष्णचन्दने ॥ चम्पकवृक्षे ॥ कासमर्दवृक्षे ॥ कणागुग्गुलुवृक्षे ॥ लघ्वक्षरे । ॥ कनति । कनीदीप्तौ । वृज्ञादिभ्योवुन् ॥ लाक्षाद्रुमे ॥

कनकाचारः । पुं । टङ्कणे । सुहागा इति भाषा ॥

कनकदण्डः । पुं । राजभृङ्गे । राजच्छत्रे ॥ कनकखदण्डोऽस्मिन् ॥

कनकदण्डकम् । न । राजभृङ्गे । राजच्छत्रे ॥ स्वार्थेकन् ॥

कनिष्ठः

कनकपलः । पुं । सुवर्णादिपरिमाणके । षोडशमाषके । पलपरिमाणे । कुरुविल्वे ॥ इतिहारावली ॥

कनकप्रभा । स्त्री । महाज्योतिष्मत्याम् ॥

कनकप्रसवा । स्त्री । स्वर्णकेतक्याम् ॥

कनकरम्भा । स्त्री । सुवर्णकदल्याम् ॥

कनकरसः । पुं । हरितालें ॥

कनकलोङ्गवः । पुं । राले ॥

कनकाचलः । पुं । सुमेरुपर्वते ॥ दानविशेषे ॥ कनकमयःअचलः ॥

कनकाध्यक्षः । पुं । भैरविके । सुवर्णाधिकृते ॥ कनकस्यअध्यक्षः ॥

कनकारकः । पुं । कोविदारवृक्षे ॥

कनकासुका । स्त्री । भृङ्गारे । सौवर्णकलशे ॥ कनकस्य आलुः । संज्ञायांकन् ॥

कनकाह्वम् । न । नागकेशरपुष्पे ॥

कनकाह्वयः । पुं । धत्तूरे ॥ कनकमाह्वयोऽस्य । भुक्तेऽस्मिन् कनकवर्णदृष्ट्यादर्शनात् ॥ नागकेशरे ॥

कनखलः । पुं । उग्रादेव्याःस्थानेतीर्थविशेषे ॥ उग्राकनखलेस्नाते तिपुराणम् ॥

कननः । पुं । काणे । एकदृशि ॥ इति हेमचन्द्रः ॥

कनिका । स्त्री । संमितायाम् ॥

कनिष्ठः । त्रि । अतियुनि ॥ अत्यल्पे ॥

कन्तुः
जघन्यजे । अनुजे । पश्चाज्जाते ॥ अयमेषामतिशयेन युवा अल्पो वा । अजादीगुणवचनादेव तीष्टनौ । युवाल्पयोः कनन्यतरस्यामिति कनादेशः ॥
कनिष्ठकम् । न । शूकदण्डे ॥
कनिष्ठा । स्त्री । दुर्वलाङ्गुलौ ॥ पश्चाज्जातायाम् । अनुजायाम् ॥ कनिष्ठस्य भार्यायाम् ॥ कनिष्ठस्य स्त्री । पुंयोगलक्षणं ङीषं बाधित्वा अजादित्वा टाप् ॥ नायिकाभेदे ॥
कनी । स्त्री । दुहितरि । कन्यायाम् ॥
कनीनिका । स्त्री । अक्षिताराकेः ॥ कनिष्ठाङ्गुलौ । कनति । कनीदीप्तौ । वाहुलका दीनः । स्वार्थे कन् । टाप् । इत्वम् ॥
कनीयान् । वि । कनिष्ठार्थे ॥ अयमनयोरतिशयेन युवा अल्पो वा । द्विवचनविभज्योपपदेतरीयसुनौ । अजादीगुणवचनादेवेति ईयसुन् । युवाल्पयोरितिकनादेशः ॥
कनीयसम् । न । ताम्रे ॥
कन्तुः । त्रि । सुखविशिष्टे । सुखिनि ॥ कं सुखम् अस्ति अस्य ॥ कं शम्भ्वभयुस्तितुतयसः इति तुः ॥ कामदेवे ॥ कमूच्छे ॥ कामयते । कमुकान्तौ । अजिदृशिकम्यमीतिक्नुः प्रत्यये ।

कन्दः
योधातोस्तुगागमश्च ॥ कंमिमनीतितुर्वा ॥ हृदये ॥
कन्था । स्त्री । मृन्मयभित्तौ । काँथ इतिभाषा ॥ प्रावरणान्तरे । सूतजीर्णपटनिर्मिताच्छादनवस्त्रे । कथरी गुदरी इतिच भाषा ॥ यथा । भिक्षा प्राणस्थितेरर्थं कन्था शीतनिवारणी । अचला केशवे भक्तिर्विभवैः किमयेजनमिति ॥ क्रियते । कमु० । वाहुलकात् थन् । टाप् ॥
कन्यारी । स्त्री । कन्यरी दुर्ग्रहा सी ॥ कृष्णकण्टकारी । तीक्ष्णगन्धा दुष्प्रवेशा इत्यादिपर्यायवति वृक्षे ॥
कन्दः । पुं । न । सूरणे ॥ ग्राम्य कन्दस्तुदीपनः ॥ सस्यमूले ॥ सलगमइति प्रसिद्धे मूलविशेषे । गुच्छने ॥ पुं । मेघे ॥ योनिरोगविशेषे । तस्य निदानलक्षणे यथा । दिवास्वापादतिक्रोधाद्व्यायामादतिमैथुनात् । क्षताच्च नखदन्ताद्यैर्वाताद्याः कुपिता यदा । पूयशोणितसङ्काशं लकुचाकृतिसन्निभम् । उत्पद्यते यदा योनौ नाम्ना कन्दस्तु योनिजः इति ॥ सचतुर्विधः । लक्षणभेदात् । यथा । रूक्षंविवर्णं स्फुटितं वातिकं तं विनिर्दिशेत् । दाहरागज्वरयुतं विद्यात् पित्तात्मकन्तुतम् ॥ नीलपुष्पम

कन्दरा

तीकार्थं कण्डूमन्तं कफात्मकम् । स
न्निङ्गसमायुक्तं सन्निपातात्मकं वि
दुः॥ सन्निपातात्मकोऽसाध्यः शेषाः
कृच्छ्रप्रसाधनाः इति ॥ कन्दति क
न्दयति कन्द्यते वा । कदि आह्वाने
रोदनेच । अच् यञ्वा ॥
कन्दगुडूची । स्त्री । गुडूचीविशेषे । क
न्दोद्भवतायाम् । पिण्डालुनि । सुश्रु
तो इति काश्यादिदेशेप्रसिद्धे कन्दे ॥
कन्दटम् । न । शुक्लोत्पले । कोँई-
इति भाषा ॥
कन्दफला । स्त्री । क्षुद्रकारवेल्याम् ॥
कन्दमूलम् । न । मूलके ॥
कन्दरः । पुं । अङ्कुशे ॥ पुं । स्त्री । गुहा
याम् ॥ न । आर्द्रके । शृङ्गवेरे ॥
कैन जलेन दीर्यते । दृ विदारणे ।
क्वदोरप् ॥
कन्दरा । स्त्री । दर्याम् । कुविभाकुवि
भेगृहाकारे गिरिविवरे ॥ कन्दरा
ट्टाप् ॥
कन्दराकरः । पुं । शिलोच्चये । पर्वते
॥ कन्दराणामाकरः ॥
कन्दराल: । पुं । गर्दभाण्डवृक्षे ॥ कन्द
रालाति । ला आदाने । आत इति
कः ॥ प्रचण्डमे ॥ कर्परालो । आखोट
वृक्षे ॥ कन्दरा मलति । अलभूषणा
दौ । कर्मण्यण् ॥ कन्दराऽस्त्यस्ति

कन्दल

वा॥ सिध्मादित्वाल्लच्॥
कन्दरालकः । पुं । कन्दराले ॥
कन्दरी । स्त्री । गुहायाम् ॥
कन्दरोद्भवा । स्त्री । क्षुद्रपाषाणभेदि
नि वृक्षे ॥
कन्दर्पः । पुं । कामदेवे॥ पुंसोत्पत्त्यर्थो
यः कामानां मध्ये कामःसच भगवतो
विभूतिः॥ कमि कन्दर्पे कुत्सायाम् ।
कुत्सितोदर्पोऽस्य अस्मादा ॥ यद्वा ।
कं सुखं तच तेन वा दृप्यति । दृप हर्ष
मोहनयोः । घञर्थेच॥ अथवा । के
ब्रह्मणि दृप्तवान् कं ब्रह्माणं दर्पित
वान् वा । पृषोदरादिः ॥ ध्रुवकम
भेदे ॥ यथा । एषो विंशतिवर्णोऽ
भिध्रुवः कन्दर्पसंज्ञकः । वीरे वा क
रणे वा स्यात् खण्डतालेविधीयते
इति सङ्गीतदामोदरः ॥
कन्दर्पकूपः । पुं । भगे । योनौ ॥
कन्दर्पजीवः । पुं । कामेदहिनामवृक्षे ॥
कन्दर्पमुषलः । पुं । मेढ्रे । शिश्ने ॥ इ
त्यजिकाखण्डशेषः ॥
कन्दर्पशृङ्खलः । पुं । शृङ्गारबन्धविशे
षे ॥ तल्लक्षणम् । नारी पादद्वयं स्था
प्य कान्तस्योरुद्वयोपरि । कटिच्छेदो
लयेदाशुबन्धः कन्दर्पशृङ्खलः इति॥
कन्दलम् । न । कलाये॥ उपरागे ॥ न
वाङ्कुरे॥ अरघ्नौ॥ अपवादे ॥ पुं।

कन्दुः
कनके॥ पुंड्रे॥ कपाले॥ भूमिकन्द
ल्यां पुंस्त्री॥
कन्दलता। स्त्री। मालाकन्दे॥
कन्दली। स्त्री। मृगविशेषे॥ गुल्मभ
क्षीभेदे॥ पंक्तावाम्॥ पद्मबीजे॥
कन्देसस्यमूले क्लीयते। क्लीङ् क्षेपणे।
अन्येभ्योऽपीति डः। कल्यते।
कन्दते। कदि॰ दृशि॰ कलच्। गौ॰ ङीप्॥
भूमिकन्दल्याम्॥
कन्दकीकुसुमम्। न। शिलीन्ध्रे॥
कन्दवर्द्धनः। पुं। शूरणे॥
कन्दवल्ली। स्त्री। वन्ध्याकर्कोटक्याम्॥
कन्दशुद्धा। स्त्री। त्रिपर्णिकायाम्॥
कन्दशूरणः। पुं। ओल्ले। शूरणे॥
कन्दसंज्ञम्। न। योन्यर्शसि। योनि
रक्तरोगविशेषे॥ तल्लक्षणनिदानादिकं
कन्दे द्रष्टव्यम्॥
कन्दसारम्। न। नन्दनवने॥
कन्दाढ्यः। पुं॥ धरणीकन्दे॥
कन्दाहः। पुं। शूरणे॥
कन्दालुः। पुं। कासालौ॥ धरणीकन्दे
॥ त्रिपर्णिकायाम्॥
कन्दी। पुं। शूरणे॥
कन्दिरी। स्त्री। लज्जालुवृक्षे॥
कन्दुः। पुं। स्त्री। कडाही इतिभाषा
प्रसिद्धे भर्जनपात्रे। स्वेदन्याम्॥
स्कन्दति। स्कन्दिर् गतिशोषणयोः।

कन्यका
स्कन्देः सलोपश्चेत्वञ्च॥
कन्दुकः। पुं। गेन्दुके। गेंद इति भा
षा॥ कन्दते। कदि॰ वाहुलकादुः
। कंसुखं ददाति दयते यति यच्छति
वा मितद्वादुः। स्वार्थे कन्॥ कंशि
रोदुनोति द्रवति वा। टुदु उपतापे
दुगतौ वा। आवश्यकात्॥
कन्दुपक्वम्। न। जलोपसेकं विना के
वलघृतपाचे यद्गृतपक्वं मृष्टतण्डुला
दि तस्मिन्॥ यथा। कन्दुपक्वानि
तैलेन पायसं दधिसक्तवः। द्विजैरे
तानि भोज्यानि शूद्रगेहकृतान्यपी
ति तिथ्यादितत्त्वे कूर्मपुराणम्॥
कन्दोटः। पुं। शुक्लोत्पले॥ न। नीलो
त्पले॥
कन्दोतः। पुं। कुमुदे। निशाहसे॥
कन्धः। पुं। मेघे। वारिदे॥
कन्धरः। पुं। वारिवाहे॥ वारिपंबुचे॥
कमम्बुसंधरः॥
कन्धरा। स्त्री। ग्रीवायाम्॥ कंशिरो
धारयति। संज्ञायां भृदृ॰ खच्। खचिदृस्वः॥ यद्वा। धरतिर्धृञ्
। पचाद्यच्। कंशिरसोधरा॥
कन्धि। स्त्री। ग्रीवायाम्॥ पुं। सिन्धु
दे॥
कन्नम्॥ न। पातके॥ मूर्च्छायाम्॥
कन्यका। स्त्री। दशवर्षीयाऽक्षुण्णायां

कन्या

म्॥ अज्ञाता कन्या । अज्ञातादौ
क॥ चिपकादित्वान्नेत्वम्॥
कन्यकाजातः । वि । अनूढापत्ये । का
नीने॥
कन्यकापतिः । पुं । जामातरि॥
कन्या । स्त्री । कुमार्याम्॥ दशवर्षायां
बालिकायाम्॥ नार्याम्॥ यच्चोद्वृत्तक
न्यासु॥ यथा । यच्चगन्धर्वसिद्धानां क
न्यका नरनागयोः। विद्याधरकिम्पुरु
षयोश्चाना मपीहताद्रतिः॥ ऋक्ष
स्याद्दे॥ पदीतारा कुलीमन्दोदरीप्र-
भृतिषु॥*॥ कन्यायांजातिमात्रायामुपहा
संहिकुर्वते। नवरात्रादिपूजार्थं जा
तोऽप्यकुमारिका॥ कन्यादानप्र-
सिद्ध्यर्थं वंशद्वयविवृद्धये। इतितेना
पिजननाद्दशमान्तर्हितङ्गच्छेत्॥ क
न्याविक्रयेदोषो यथा। यः कन्यापा
लनं कृत्वाकरोति यदि विक्रयं। वि
क्रेता धनलोभेन कुम्भीपाकंसगच्छ
ति॥ कन्यामूत्रपुरीषञ्चतत्रभच्चति
पातकी। कृमिभिर्दंशितः काकैर्यो
वहिन्द्राश्चतुर्दश॥ मृतश्च व्याधयो
नीच सत्त्वभेज् जन्मनिश्चितम्। वि
क्रीणीते मांसभारं वहत्येव दिवा
निशमिति ब्रह्मवैवर्तपुराणम्॥ *
॥ अथ कन्या लक्षणम्। तत्रपादल
क्षणम्। स्निग्धोन्नताग्रतनुताम्रनखो

कन्या

कुमार्याः पादौ समोपचितचारुनि
गूढगुल्फौ। श्लिष्टाङ्गुलीकमल
कान्तितलोचयस्तांमुदहेद्विभु
र्वाधिपतित्वमिच्छेत्॥ १॥ पाद
। जङ्घाजानूरुगुह्यमणीनां लक्षणानि
॥ मत्स्याङ्कुशाब्जयवज्रहलासिचि
। ह्नां वस्वेदनीमृदुतलौ चरणौ प्रश
स्तौ। जङ्घेच रोमरहिते विसिरे
सुवृत्ते जानुद्वयं समसमानुल्बणसन्धि
देशम्॥ २॥ ऊरू घनौ करिकर
प्रतिमावरोमौ वृत्तौसुपत्रसदृशं वि
पुलञ्चगुह्यम्। श्रोणीललाटमुर
। कूर्मसन्निभतञ्च गूढोमणिश्चविपुलां
श्रियमादधाति॥ ३॥ नितम्बनाभ्यो
र्लक्षणम्। विस्तीर्णमांसौ पचितौ
नितम्बौगुरुश्च धत्ते रशनाकलापम्
। नाभिर्गभीराविपुलाङ्गनानां प्रद
क्षिणावर्त्तगताचशस्ता॥ ४॥ मध्य
स्तनोरुवक्त्रोग्रीवाल°। मध्यं स्त्रिया
स्त्रिवलिनाथमरोमशञ्च वृत्तौघना
ववियौकठिनावुरस्थौ। रोमभव
र्जितमुरोमृदुचाङ्गनानां ग्रीवोचक
म्बुनिचितार्थसुखानिधत्ते॥ ५॥
अधरदन्तयोर्ल°। बन्धुजीवकुसु-
मोपमोधरोमांसलो रुचिरविम्ब-
रूपभृत्॥ कुन्दकुड्मलनिभाः स
। माद्विजायोषितां पतिसुखोमिता

कन्या

र्थदाः ॥ ६ ॥ वचननास्तिकाद्दर्शा-
ल० । दक्षिणेयुक्तमगठं परपुष्टवं
सवर्णगुप्रभाषित मदीनमनल्पसौ
ख्यम् । नासा समा समपुटा रुचिरा
प्रशस्ता दृङ्नीलनीरजदलद्युति-
हारिणीच वा ७ ॥ भ्रूललाटवं० ।
नोसङ्गते नातिपृथूचरम्ये श्रस्तेम्बु-
वैवालशशाङ्कयुक्के । अर्द्धेन्दुसंस्था
नसरोमशश्च श्रस्तं ललाट ननतं न
तुङ्गम् ॥ ८ ॥ कर्णकेशशिरोल० ।
कर्णौयुगमप्रियुक्तमांसलं श्लक्ष्णतेम
दुसमाहितं समम् । स्निग्धनील
मृदुकुञ्चितैकशोमूर्द्धजाः सुखकं-
राः समंशिरः ॥ ९ ॥ हस्तपादरेखा-
लेखाल० । भद्रासनवाजिकुञ्ज-
रेरथश्रीवृक्षयूपेषुभिर्लोकुण्ड-
लचामराङ्कुशयवैः शैलेर्ध्वजैस्तोर
णैः । मत्स्यस्वस्तिकवेदिकाव्यज-
नकैः शङ्खात पत्राम्बुजैः पादे पा
णितलेच या युक्तयो गच्छन्ति रा
चीपदम् ॥ १० ॥ हस्तल० । नि-
गूढसन्धिबन्धनौ तरुणपद्मगर्भोप-
मौ करौनृपतियोषित स्तनुविकृ
ष्टपर्वाङ्गुली । न निम्नमतिनोन्नतं
करतलं सुरेखान्वितं करोत्यविध
वांचिरं सुतसुखार्थं सम्भोगिनीम्
॥ ११ ॥ मध्याङ्गुलिं या मणिबन्धनो

कन्या

ल्या रेखा गतापाणितलेऽङ्गनाया:
र्ध्वं स्थितोपादतलेथवाया पुंसो
ऽर्थवाराज्यसुखायसास्यात् ॥ १२ ॥
कनिष्ठिकामूलभवा गतो या प्रदेशि
नी मध्यमिकान्तराले । करोति
रेखां परमायुषः सा प्रमाणे मूला
दतदूनमायुः ॥ १३ ॥ अथोपच्छा
यालक्षणम् । अङ्गुष्ठमूले प्रसवस्यरेखाः
सुता घृतच्याः प्रमदास्तुतिन्याः । अ
च्छिन्नमध्या दृढदीर्घपर्वाता: स्वल्पा
युषां छिन्नलघुप्रमाणाः ॥ १४ ॥ शुभ
लक्षणान्युक्ता अशुभलक्षणान्याह । इ
तीदमुक्तं शुभमङ्गनानामतोविपर्य
स्तमनिष्टमुक्तम् । विशेषतोऽनिष्ट
फलानि यानि समासतस्तान्यनुकी
र्तयामि ॥ १५ ॥ पादयो रनिष्ट
लक्षणम् । कनिष्ठिकाधातदनन्तरा
या मर्द्दीनयस्याःस्पृशतिक्षिया स्यात्
। गताग्रयाङ्गुष्ठसमतीर्घ्यस्याःप्र दे
शिनीसा कुलटातिपापा ॥ १६ ॥ ज
ङ्घागुल्फोदराणां ल० । उद्वाभ्यां पि
ण्डिकाभ्यां सिराले शुष्के जङ्घे लो-
मशेचासिमांसे । यामावर्त्तेनिर्विमल
श्वगुह्यं कुम्भाकारंचोदरंदुःखितानाम
॥ १७ ॥ ग्रीवाल० । ह्रस्वयातिनि:
स्वतादीर्घया कुलक्षयः । ग्रीवया
पृथूत्यया योषित: प्रचण्डता ॥ १८

कन्या

॥ नेत्रगण्डयोर्ल° । नेत्रे यस्याः केक
रेपिङ्गलेबा साटुः शीलाश्यावलो
लेचणाच । कूपौयस्या गण्डयोश्च
स्मितेषु निस्सन्दिग्धं वन्ध्यकीं तांवद
न्ति॥ १९ ॥ अन्यदप्याह । प्रविल
म्बिनिदेघरं ललाटे श्वशुरंहन्युद
रेस्फिजौ। पतिञ्च । अतिलोमच-
यान्वितोत्तरौष्ठी नशुभाभर्त्तुरती
वयाचदीर्घा॥ २० ॥ स्तनकर्णदन्त
ल° । स्तनौ सरोमौ मलिनोल्वणौ
चुचुकेगंदद्राते विषमौचकर्णौ । स्थू
लाः कराला विषमाश्चदन्ताः क्लेशा
य चैर्य्यायच कृष्णमांसा ॥२१॥ ह
स्तल° । क्रव्यादरूपैर्वृककोककङ्कैः
सूरीरूपोलूक समानचिह्नैः । शु-
ष्कैः सिरालैर्विषमैश्चहस्तैर्भवन्ति
नार्यः सुखवित्तहीनाः ॥ २२ ॥ अ
न्यदप्याह । यातूत्तरोष्ठेन समुन्नतेन
रूक्षाग्रकेशीकलहप्रियासा । प्रा-
यो विरूपासु भवन्तिदोषायदा कृ
तिस्तद्गुणावसन्ति ॥२३॥ अधुना
शरीरचेष्टाविभागमाह । पादौसगु
ल्फौ प्रथमं प्रदिष्टं जङ्घे द्वितीयं तु
सजानुचक्रे । मेढ्रोरुमुष्कञ्चततस्तृ
तीयं नाभिंकटिंचैवचतुर्थमाहुः ॥
२४॥ उदरंकथयन्तिपञ्चमं हृदयंष
ष्ठमथस्तनान्वितम् । अथसप्तममा-

कन्याटः

स्यजत्रुणी कथयन्त्यष्टममेष्ठकन्धरे
॥२५॥ नवमंनयनेचसम्मुखी सल
लाटं दशमंशिरस्तथा । अशुभेष्वशु
भं दशाफलं चरणाद्येषुशुभेषुशोभ
नम्॥२६॥ इतिवाराह्यां कन्यालच
णं नामाध्यायः । ६७ ॥ * ॥ अथकु
मार्याम् । सहायाम् ॥ स्थूलेलायां-
मं॥ वाराहीकन्दे ॥ वन्ध्याकर्कोट
क्याम् ॥ षष्ठरांशौ ॥ जन्मकालीन
चन्द्रास्थितैतद्राशिफलम् । युवति
रंगे शशिनि मदजनमबलकेलि
विलासकुतूहलैः । विमलशीलयु-
तोजननोत्सवैः सुविधिनाविधिना
संहितः पुमान् ॥ कन्यालग्नोद्भवो
मर्त्यो नानाशास्त्रविशारदः । सौ-
भाग्यगुणसम्पन्नः सुन्दरः सुरतप्रि
यः ॥ चतुरश्चरात्तिभेदे । मृगौ
चेत् कन्या । भास्वत्कन्या सैकाधन्या
। यस्याः कूले कृष्णोऽखेखत् ॥ कन
ति । कनदीप्तौ । अच् । अन्यादिः । क
न्यायाः कनीनचेतिनिर्देशाद्ययसि-
प्रयम इतिनङीप् ॥ दक्षिणार्यवस
तीपेदुर्गादेव्याम् ॥

कन्याकुब्जः । पुं । कान्यकुब्जदेशे ॥ इ
तिहेमचन्द्रः ॥

कन्याटः । पुं । वासस्त्रानि ॥ इतित्रिका
ण्डशेषः ॥

कपर्दः

कन्याधिपः । पुं । बुधग्रहे ॥
कन्यापतिः । पुं । जामातरि ॥
कन्यापालः । पुं । कनैत इतिहिमगिरिप्रसिद्धे शूद्रजातिविशेषे । पालवणिजि ॥
कन्याराशिः । पुं । द्वादशभेदे ॥
कन्युपम् । न । हस्तपुच्छैः हथौंछा औंछा इति भाषा ॥
कपः । पुं । वरुणे ॥
कपटः । पुं । न । व्याजे । दम्भे । छद्मनि ॥ के मूर्द्धनि पटइव आच्छादकः ॥ यद्वा । पटति । पट° । अच् । कस्य ब्रह्मणोऽपि पटोव्यापकः ॥
कपटधारी । त्रि । छद्मवेशे ॥
कपटिक । त्रि । कपटविशिष्टे । कपटिनि ॥ मत्वर्थे ठन् ॥
कपटी । त्रि । अयथार्थव्यवहारवति । दम्भविशिष्टे ॥ कपटोऽस्ति अस्यास्मिन्वा । इनिः ॥
कपटिनी । स्त्री । गौडभाषया चोडा नामनि गन्धद्रव्ये ॥
कपटेश्वरी । स्त्री । श्वेतकण्टकार्याम् ॥
कपर्दः । पुं । शिवसम्बन्धिजटाजूटे ॥ वराटके ॥ पर्वपूरणे । सम्पदादित्वात्भावे क्विप् । राल्लोपः । केन सुखेन जलेन वा परं पूर्त्तिं ददाति । सुपातियोगविभागात्कः ॥ कस्य जलस्य परापूरणेन दार्ढ्यं यतीति वा । दृढ्यशोधने । आत इतिकः ॥

कपर्दिका । स्त्री । वराटिकायाम् ॥
कपर्दकः । पुं । हरजटाजूटे ॥ चराचरे । वराटके ॥ अस्याः प्रभेदाः । सुवर्णवर्णा सिंही १ । धूम्रवर्णा व्याघ्री २ । पीतपृष्ठासितोदरा मृगी ३ । श्वेतवर्णा हंसी ४ । नातिदीर्घिका विदग्धा ५ ॥ इतिराजनिर्घण्टः ॥
कपर्दी । पुं । शिवे । ईशे ॥ कपर्दोजटाजूटोऽस्यास्ति । इनिः ॥
कपाटम् । त्रि । अरे । कवाटे । किंवाड इतिभाषा ॥ कं वातम् शिरोवा पाटयति प्रविशते । पटगतौ । कर्मण्यण् ॥ अट्टर्चादि ॥
कपाटिका । स्त्री । क्षुद्रकपाटे । किवाँडी इतिभाषा ॥ कपाट्येव । स्वार्थे कः । टाप् ॥
कपाटी । स्त्री । कपाटे ॥ अजन्तात् ङीप् ॥
कपालः । पुं । न । शिरोस्थिनि । कर्परे ॥ घटादेरर्द्धशकले । खपरा इतिभाषा ॥ व्रणे । समूहे ॥ यतीनां सन्न्यासकर्परादिभिक्षापात्रे ॥ यथा । कपालं वृक्षमूलानि कुचेलमसहायता । समतावैवसर्वस्मिन्नेतन्मुक्तस्य लक्षणमिति ॥ कुष्ठरोगविशेषे ॥ तस्य

कपिला

कपिः रथः रथे वा ऋक्ष ॥ कपिलः । पुं । अनले ॥ वासुदेवे । सिद्धेशे भगवतो विभूतिविशेषे देवहूत्याङ्गर्भमाजगते । आविर्भूते ॥ सिद्धानाङ्कपिलोमुनिरिति भगवदुक्तेः ॥ ॥ अयञ्च ज्ञानभक्तिवैराग्यसाङ्ख्ययोगप्रचारार्थो भगवदवतारः ॥ अनीश्वरसाङ्ख्यमतप्रवर्त्तकेच । मुनिविशेषे ॥ कुक्कुरे ॥ दानवविशेषे ॥ पिङ्गले वर्णविशेषे ॥ नीलपीतः कपिलः इति रभसः ॥ कपिलोरोचनाछविरित्यन्ये ॥ चि । पिङ्गलवर्णयुक्ते ॥ कवते । कष्टवर्णे । कवेः पक्वेति इलच् प्रत्ययः ॥ मत्वर्थे सिध्मादित्वाल्लच्वा ॥

कपिलद्युतिः । पुं । सूर्य्ये ॥

कपिलद्रोणा । स्त्री । गोरुतन्यां । द्रोणवाराधाम् ॥

कपिलद्रुमः । पुं ॥ सुगन्धिकाष्ठविशेषे ॥

कपिलधारा । स्त्री । गङ्गायाम् । स्वर्गद्वाराम् ॥ तीर्थविशेषे ॥

कपिलपुराणम् । न । कापिलेउपपुराणे ॥

कपिलशिंशपा । स्त्री । शिंशपावृक्षविशेषे । पीतायाम् । कृष्णशिंशपायाम् ॥

कपिला । स्त्री । गोविशेषे । स्वर्णवर्णायाङ्गवि ॥ कपिलवर्णयोगात् । अनुदात्तलक्षणाभावात् वर्णादिति नङीष् ॥

कपिला

भस्मगर्भायाम् । कपिलवर्णपुष्पायां शिंशपायाम् ॥ भस्मगन्धिन्यौषधौ । रेणुकायाम् ॥ कपिलो वर्णोऽस्त्यस्याः । अर्शआद्यच् ॥ पुण्डरीकदिग्गजकरिण्याम् ॥ नदीविशेषे ॥ यथा । कज्जलाचलशैलात्तु पूर्वस्थिन् शुभ्रपर्वतः । गत्या सह पुरा रेमे यत्र शक्रः सुरेश्वरः ॥ तत्पूर्वस्यां महादेवी नदीकपिलसंज्ञिता । तस्यांस्नात्वा नरो गङ्गास्नानजं फलमाप्नुयादितिकालिकापुराणे ८१ अध्यायः ॥

कपिलाक्षी । स्त्री । कपिलशिंशपायाम् ॥ मृगेवारौ ॥

कपिलाचार्य्यः । पुं । वासुदेवे ॥ कपिलस्य सैव सांख्यस्य गुह्यात्मतत्त्वविज्ञानस्य आचार्य्यस्य ॥

कपिलाश्वः । पुं । विडौजसि । इन्द्रे ॥

कपिलेक्षुफला । स्त्री । कपिकच्छाम् ॥

कपिलेक्षुमा । स्त्री । रेणुकायाम् ॥

कपिलोहम् । न । पिङ्गले ॥

कपिल्लिका । स्त्री । गजपिप्पल्याम् ॥

कपिवक्त्रः । पुं । नारदे ॥

कपिशद्रव्यः । पुं । आम्रातके ॥

कपिशवल्ली । स्त्री । कपिपिप्पल्याम् । कोशवल्ल्याम् ॥ कपिशिव वल्ली तत्तुल्यरोमत्वात् ॥

कपिशः । पुं । सिद्धकनामगन्धद्रव्ये ॥

कपीत

श्यावे । कृष्णपीतमिश्रितवर्णे ॥ त्रि । तद्वर्णयुक्ते ॥ कपिवर्णे विशेषोऽस्या स्ति । लोमादित्वात् शः ॥ विरक्तस न्ध्याकपिशमित्यत्र कपिशं ताम्रमि तिमल्लिनाथः ॥

कपिशा । स्त्री । माधव्याम् । माधुरीसु रायाम् ॥ नदीविशेषे ॥ टाप् ॥

कपिशाशनः । पुं । शिवे ॥

कपिशासुतः । पुं । पिशाचे ॥

कपिशी । स्त्री । माधव्यामदिरायाम् ॥

कपिशीका । स्त्री । मदिरायाम् ॥ इति चिकाण्डशेषः ॥

कपिशीर्षम् । न । कपशीर्षे । प्राकारा ग्रे ॥

कपिशीर्षकम् । न । छिङ्गुले ॥ खोड कशीर्षके । प्राकाराग्रे ।

कपिष्ठलः । पुं । ऋषिविशेषे ॥ कपिष्ठ लोगोत्र इतिनिपातनात् घत्वम् ॥

कपीज्यः । पुं । चीरिकाष्टचे ॥

कपीतः । पुं । श्वेतवृक्षाष्टचे ॥

कपीतनः । पुं । गर्दभाण्डे ॥ गिरीष वृक्षे ॥ आम्रातके ॥ अश्वत्थे ॥ पूगवृ क्षे ॥ मालूरवृक्षे । बिल्वे ॥ तनोति । तनुविस्तारे । पचाद्यच् । कपीना म् कपेर्वर्णस्य वा तनः । अन्येषामपी तिदीर्घः ॥ यद्वा । वाः स्वच्यायाः त नः ईतनः । कपीनाङ्कपेर्वा ईतनः ॥

कपोत

कपीन्द्रः । पुं । हनूमति ॥ सुग्रीवे ॥ रा घवे ॥ वराहमूर्त्तौ ॥ कपिश्वासावि न्द्रश्च । कपीनामिन्द्रो वा ॥

कपीशः । पुं । हनूमति ॥ कपीशमच्यु तहन्तारं वन्दे लङ्काभयङ्करम् ॥ कपी नामीशः ॥

कपीष्टः । पुं । राजादनवृक्षे ॥ कपित्थे ॥

कपूयः । त्रि । कुत्सिते ॥ कुत्सितं पूय ते । पूयी विसरणे । पचाद्यच् । पृ षोदरादिः ॥

कपूयचरणः । त्रि । दुष्कृतिनि । कुत्सि तकर्मणि ॥ कपूयं निन्दितं चरणं क र्म्म ॥

कपोतः । पुं । पारावते । कलरवे ॥ क पोतको गुरुः स्निग्धो रक्तपित्तानि लापहः । सङ्ग्राही शुक्रलः शीतः सु स्वादूरुचिकारकः ॥ घुघुती इति प्र सिद्धे चिबुकशिरोविहङ्गमे । धूसरे । धू म्रलोचने ॥ कस्य वायोः पोत इव । कोवायुः पोतो नौरिवास्य वा ॥ य द्वा । कवते । कवृवर्णे । कवेरोतच् पच्च ॥ पचिमाचे ॥

कपोतकम् । न । सौवीराञ्जने ॥

कपोतचरणा । स्त्री । नलीनामगन्ध वस्तुनि ॥

कपोतपालिका । स्त्री । सम्भाग्रप्रसारि ते दारुविशेषे ॥ सौधादिप्रान्तेकाष्ठा

कपिला

कपिः रथः रथे वा अस्य ॥
कपिलः । पुं । अनले ॥ वासुदेवे । सिद्धेशे भगवतो विभूतिविशेषे देवहूत्याङ्गर्दमप्रजापतेः राविर्भूते ॥ सिद्धानाङ्कपिलोमुनिरिति भगवदुक्तेः ॥ ॥ अयञ्च ज्ञानभक्तिवैराग्यसाङ्ख्ययोगप्रचारार्थो भगवदवतारः ॥ अनीश्वरसाङ्ख्यमतप्रवर्त्तकेच मुनिविशेषे ॥ कुक्कुरे ॥ दानवविशेषे ॥ पिङ्गले वर्णविशेषे ॥ नीलपीतः कपिलः इति रभसः ॥ कपिलोरोचनोल्लविरित्यन्ये ॥ त्रि । पिङ्गलवर्णयुक्ते ॥ कवते । कटवर्णे । कपेः पश्चेति इलच् प्रत्ययः ॥ मत्वर्थे सिध्मादित्वाल्लच्वा ॥
कपिलद्युतिः । पुं । सूर्य्ये ॥
कपिलद्राक्षा । स्त्री । गोस्तन्याम् । द्राक्षाराक्षायाम् ॥
कपिलद्रुमः । पुं ॥ सुगन्धिकाष्ठविशेषे ॥
कपिलधारा । स्त्री । गङ्गायाम् । स्वर्गद्वाराम् ॥ तीर्थविशेषे ॥
कपिलपुराणम् । न । कापिलेउपपुराणे ॥
कपिलशिंशपा । स्त्री । शिंशपाविशेषे । पीतायाम् । कृष्णशिंशपायाम् ॥
कपिला । स्त्री । गोविशेषे । स्वर्णवर्णा याज्ञवि ॥ कपिलवर्णयोगात् । ऋनृ ङ्ङीप्तस्याभावात् वर्णादितिनङीप् ॥

कपिशः

भस्मगर्भायाम् । कपिलवर्णपुष्पायां शिंशपायाम् ॥ भस्मगन्धिन्यौषधौ । रेणुकायाम् ॥ कपिलो वर्णोऽस्त्यस्याः । अर्शआद्यच् ॥ पुण्डरीकदिग्गजकरिण्याम् ॥ नदीविशेषे ॥ यथा । कज्जलाचलशैलात्तु पूर्वस्यान् गुह्यपर्वतः । शच्या सह पुरा रेमे यत्र शक्रः सुरेश्वरः ॥ तत्पूर्वस्यां महादेवी नदी कपिलसंज्ञिता । तस्यां स्नात्वा नरो गङ्गास्नानजं फलमाप्नुयादितिकालिकापुराणे ८१ अध्यायः ॥
कपिलाची । स्त्री । कपिलशिंशपायाम् ॥ सर्पेर्वारौ ॥
कपिलाचार्य्यः । पुं । वासुदेवे ॥ कपिलाख्यश्चासौ साङ्ख्यशास्त्रगुह्यात्मतत्त्वविज्ञानस्य आचार्य्यश्च ॥
कपिलाश्वः । पुं । विडौजसि । इन्द्रे ॥
कपिलेक्षुफला । स्त्री । कपिकच्छाम् ॥
कपिलेक्षुमा । स्त्री । रेणुकायाम् ॥
कपिलेक्षुरम् । न । पित्तले ॥
कपिल्लिका । स्त्री । गजपिप्पल्याम् ॥
कपिवक्त्रः । पुं । नारदे ॥
कपिशद्रव्यः । पुं । आम्रातके ॥
कपिवल्ली । स्त्री । कपिपिप्पल्याम् । कोलवल्ल्याम् ॥ कपिरिव वल्ली तत्तुल्यरोमत्वात् ॥
कपिशः । पुं । सिल्हकनामगन्धद्रव्ये ॥

कफोणी

रादिति पक्षेऽङीष् ॥

कफप्रकृतिकः । त्रि । कफस्वभावे ॥ तल्लक्षणं यथा। गम्भीरबुद्धिः स्थूलाङ्गः स्निग्धकेशो महाबलः । स्वप्नेजलाश्रयालोकी श्लेष्मप्रकृतिकोनरः इति ॥

कफबर्द्धनः । पुं । पिण्डीतगरवृक्षे ॥ त्रि । श्लेष्मवर्द्धिकारके ॥

कफविरोधि । न । मरिचे ॥

कफात् । पुं । कफनाशके ॥ कफमत्ति । अद्° । क्विप् ॥

कफान्तकः । पुं । वसुरवृक्षे ॥ इतिराज निर्घण्टः ॥

कफारिः । पुं । शुण्ठ्याम् ॥

कफी । पुं । गजे । हस्तिनि ॥ त्रि । श्लेष्मले । श्लेष्मणे । श्लेष्मयुक्ते ॥ कफोऽस्यास्ति । इन्द्रोपतापमेतीनिः ॥

कफेलूः । पुं । श्लेष्मातके ॥ कफंलाति । ला आदाने । अन्येष्वपीत्यूप्रत्ययो निपातनादेत्वम् ॥

कफोणिः । पुं । कूर्परे । भुजमध्यग्रन्थौ । कोहणी इति भाषा ॥ कं सुखं स्फोरयति । स्फुरस्फुरणे सञ्चलनेच । यङन्तः । अचइः ॥ पृ° । यद्वा । केन सुखेन फणति स्फुरतिवा । फण° । स्फुर° । घञ् । पृ° ॥

कफोणी । स्त्री । कूर्परे ॥

कम्

कफोत्क्लेशः । पुं । कफस्य वमनायोपस्थितौ ॥

कबन्धः । पुं । उदरे ॥ धूमकेतौ ॥ राहौ ॥ रक्तोविशेषे ॥ न । जले । उदके ॥ पुं । न । क्रियायुक्तशिरश्शून्यकलेवरे ॥ कबन्धोऽस्त्रीक्रियायुक्तमपमूर्द्धकलेवरम् ॥ यथा । मनुष्याणां सहस्रेषुहतेषु हतमूर्द्धसु । तदावेशात्कबन्धः स्यादेकोऽमूर्द्धाक्रियान्वितः॥अपिच। नागानामयुतं तु रङ्गनियुतं सोर्द्धरथानांशतं पत्तीनां दशकोटयोनिपतिता एकः कबन्धो रणे । तादृक्कोटिकबन्धनर्त्तनविधौ खेखञ्चत्खेशिरस्तेपाङ्कोटिनिपातनेरघुपतेः कोदण्डघेष्टारवः। इति प्राचीनाः ॥ कं सुखं बध्नाति। बन्धबन्धने। कर्मण्यण् ॥ कंबध्यतेऽच्छिद्यतेऽत्र स्नात्। घञ्॥ केन वायुना बध्यतेवा । कोवायुरेवबन्धःआश्रयोयस्यवा ॥

कबन्धी । पुं । ऋषिविशेषे ॥

कबित्थः । पुं । कपित्थवृक्षे ॥ कपयः तिष्ठन्त्यत्र ष्ठा° । सुपिस्थइतिकः । पृ° ॥

कबिलः । पुं । कपिलवर्णे ॥ त्रि । कपिलवर्णार्थे ॥

कभम् । न । रोहिणीनक्षत्रे ॥

कम् । अ । पादपूरणे ॥ जले ॥ मस्तके ॥ सुखे ॥ मङ्गले ॥ निन्दायाम् ॥

कफः

दिरचिते पक्षिस्थाने । विटङ्के ॥ पा लयति । पालरक्षणे । खुञ् । कपो तानां पालिका ॥ कपोतान् पालय ति वा । कर्मण्यण् । संज्ञायां कन्ट् ति कन् ॥

कपोतपाली । स्त्री । विटङ्के ॥ कपोता नं पालयति । कर्मण्यण् । ङीप् ॥

कपोतवङ्का । स्त्री । ब्राह्मीवृक्षे ॥

कपोतवर्णी । स्त्री । वृश्चिकालायाम् ॥

कपोतवाणा । स्त्री । नलीनामगन्धद्र व्ये ॥

कपोतसारम् । न । स्रोतोञ्जने ॥

कपोताङ्घ्रिः । पुं । कपोतपादे ॥ स्त्री । नल्याम् । गन्धद्रव्यविशेषे ॥ कपो तस्याङ्घ्रिरिव ॥

कपोताभः । पुं । कपोतवर्णे ॥

कपोतारिः । पुं । श्येनपक्षिणि ॥ कपो तानाम् अरिः ॥

कपोलः । पुं । गण्डे । गल्ले । वक्त्रस्य तिर्यक्सन्निधिभागे । नास इतिभा षा ॥ कम्पते । कपिचलने । कपिग लिगण्डीत्योलच् । कपीतिनिर्देशा दलोपः ॥ कं सुखं पोलति वा । पुल महत्त्वे । कर्मण्यण् ॥

कप्पासः । पुं । सिल्हके ॥

कप्पासः । पुं । वानरगुदे । कपिपृष्ठान्ते ॥

कफः । पुं । शरीरस्थधातुविशेषे । श्लें

कफणी

ष्मणि । सौम्यधातौ ॥ कफस्यकोपः कुसुमागमेभवति । अस्यप्रकोपहे तुः । गुरुमधुररसातिस्निग्धदुग्धेचु भक्ष्यद्रवदधिदिननिद्रापूपसर्पिःप्रपूरैः । तुहिनपतनकाले श्लेष्मणः सम्यको पः प्रभवति दिवसादौ भुक्तमात्रेवस न्ते ॥ अपिच । गुरुपटुमधुराम्लस्निग्धमा षैस्तिलैश्चद्रवदधिदिननिद्राप्रीतनि श्चेष्टताभिः । प्रथमदिवसभागे रात्रि भागे पिचाद्ये भवति हि कफकोपो भुक्तमात्रे वसन्तेऽति ॥ विधाविभक्त स्य दिवसस्यप्रथमे भागे एवं रात्रे श्चाद्ये भागे ॥ फाल्गुनेचैत्रसासेचज न्तूपीडाकरोमतः । सर्वशास्त्रविचा रदैःश्लेष्मा राजाप्रकीर्त्तितः ॥ केन जलेनफलति । फलनिष्पत्तौ । अन्ये भ्योपीतिडः ॥ यद्वा । केशिरसिफल ति वा पूर्ववत्डः ॥

कफकूर्चिका । स्त्री । जालायाम् । स्त्री कायाम् । आस्यासने । जाल थू क इत्यादिभाषा ॥

कफघ्नी । स्त्री । वपुषाप्रभेदे ॥

कफजिः । पुं । स्त्री । कफोगे ॥ केन सुखेन फलति स्फुरति वा । फल गतौ स्फुरस्खलने वा । डून् । पृषो दरादिः ॥

कफणी । स्त्री । कफोणी ॥ कृदिका

कफोणी

रादिति पक्षेऽीष् ॥

कफप्रकृतिकः । त्रि । कफस्वभावे ॥ तल्लक्षणं यथा। गम्भीरबुद्धिः स्थूलाङ्गः स्निग्धकेशो महाबलः । स्वप्नेलस्याश्च यो लोकः श्लेष्मप्रकृतिकोनरः इति ॥

कफवर्द्धनः । पुं । पिण्डीतगरवृक्षे ॥ त्रि । श्लेष्मवर्द्धिकारके ॥

कफविरोधि । न । मरिचे ॥

कफात् । पुं । कफनाशके ॥ कफमत्ति । अद° । क्विप् ॥

कफान्तकः । पुं । वसुरत्नेन ॥ इतिराज निर्घण्टः ॥

कफारिः । पुं । शुण्ठ्याम् ॥

कफी । पुं । गजे । हस्तिनि ॥ त्रि । श्लेष्मजे । श्लेष्मणे । श्लेष्मयुक्ते ॥ कफोऽस्यास्ति । इन्दोपधात्वेतीनिः ॥

कफेलूः । पुं । श्लेष्मातके ॥ कफंलाति । लाआदाने । अन्येभ्योऽपीत्यूप्रत्ययेन निपातनादेत्वम् ॥

कफोणिः । पुं । कूर्परे । भुजमध्यग्रन्थौ । कोहणी इति भाषा ॥ कं सुखं स्फोरयति । स्फुरस्फुरणे सम्बन्धने च । यद्वा । कफेन श्लेष्मणा सुखेन फलति स्फुरतिवा । फल° । स्फुर° । इन् । पृ° ॥

कफोणी । स्त्री । कूर्परे ॥

कम्

कफोत्क्लेशः । पुं । कफस्य वमनार्थोपस्थितौ ॥

कबन्धः । पुं । उदरे ॥ धूमकेतौ ॥ राहौ ॥ रक्षोविशेषे ॥ नि । जले । उदके ॥ पुं । न । क्रियायुक्तशिरश्शून्यकलेवरे ॥ कबन्धोऽस्त्रीक्रियायुक्तमपमूर्द्धकलेवरम् ॥ यथा । मनुष्याणां सहस्रेषुहतेषु हतमूर्द्धसु । तदावेशात्कबन्धाः स्युरेकोऽमूर्द्धाक्रियान्वितः॥अपिच। नागानामयुतं तु रङ्गनियुतं सार्द्धरथानांशतं पत्तीनां दशकोटयोनिपतिता एकः कबन्धो रणे । तादृक्कोटिकबन्धनर्त्तनविधौ खेखच्चखत्खेशिरस्तेषाङ्कोटिनिपातनेरघुपतेः कोदण्डघण्टारवः। इति प्राचीनाः ॥ कं सुखं बध्नाति । बन्धबन्धने । कर्मण्यण् ॥ कंबध्नतेऽस्मिन्नेत्र स्यात् । घञ् ॥ केन वायुना बध्यतेवा । कोवायुरेवबन्धः आश्रयोयस्यवा ॥

कबन्धी । पुं । ऋषिविशेषे ॥

कबिल्व । पुं । कपित्थवृक्षे ॥ कपयः तिष्ठन्त्यत्र ष्ठा° । सुपिस्थ इतिकः । पृ° ॥

कबिलः । पुं । कपित्थवर्णे ॥ त्रि । कपित्थवर्णार्थे ॥

कभम् । न । रोहिणीनक्षत्रे ॥

कम् । अ । पादपूरणे ॥ जले ॥ मस्तके ॥ सुखे ॥ मङ्गले ॥ निन्दायाम् ॥

कमन

कम्यते । कमु॰ । णिजन्तभावे विच् ॥
कमठः । पुं । कच्छपे ॥ दैत्यविशेषे ॥ मुनिभाजने ॥ शल्लक्याम् ॥ भगवतोऽवतारविशेषे ॥ न । मुनीनांञ्च लघुपात्रविशेषे । वक्तो वतकी लोट इतिभाषाप्रसिद्धे ॥ काम्यते । कमु॰ । कमेरठः ॥ के जले मठतिवा । मठमदनिवासयोः । पचाद्यच् ॥
कमठी । स्त्री । कच्छप्याम् । दुल्याम् ॥ स्वल्पकूर्मजातौ ॥ शल्लक्याम् ॥ पुंयोगादिति जातेरितिवा ङीप् ॥
कमण्डलुः । पुं । न । करके । कुण्ड्याम् । सन्न्यासिनां मृत्काष्ठादिमयेपात्रे ॥ अलाबुं दारुपात्रञ्च मृन्मयं वैदलं तथा । एतानि यतिपात्राणि मनुः स्वायम्भुवोऽब्रवीत् ॥ पुं । प्रचयादिभे ॥ चतुष्पाज्जातिविशेषे ॥ कस्य प्रजापतेर्मण्डलञ्च वा मण्डःसारः । संज्ञायां । ञा॰ । मितद्वादित्वात्डुः ॥ यद्वा । मण्डनम् । मडिभूषायाम् ॥ घञ् । कस्य मण्डंभूषां लाति । डुः ॥
कमनः । पुं । कामे ॥ अशोकवृक्षे ॥ वल्लभे ॥ त्रि । कामुके ॥ कामयते कमु॰ । कर्त्तरिल्युट् ॥ अभिरूपे । कमनीये । मनोहरे ॥ अनुदात्तश्चेतिकमेर्युच् ॥
कमनच्छदः । पुं । कङ्कपक्षिणि ॥

कमल

कमनी । स्त्री । कामयित्र्याम् । ङीप् ॥
कमनीयः । त्रि । कामनायोग्ये । वल्गुनि । मनोहरे । रुचिरे । कान्ते । शोभने ॥ कमेरनीयर् ॥
कमरः । त्रि । कामभोक्तरि । कामिनि ॥ कामयते । कमु॰ । अर्त्तिकमिभ्रमीक्ष्यरश्चित् ॥
कमलः । पुं । मृगविशेषे । कुरङ्गे ॥ न । जले । ताम्रे ॥ क्लोमनि ॥ भेषजे ॥ सारसपक्षिणि । जलजे । पद्मे ॥ अस्यगुणाः । कमलं शीतलं वर्ण्यं मधुरं कफपित्तजित् । तृष्णादाहास्रविस्फोटविषवीसर्पनाशनम् ॥ विशेषतः सितंपद्मं पुण्डरीकमितिस्मृतम् । रक्तंकोकनदंप्रोक्तं नीलमिन्दीवरंस्मृतम् ॥ धवलंकमलं शीतंमधुरङ्कफपित्तजित् । तस्मादल्पगुणंकिञ्चिदन्यद्रक्तोत्पलादिकमिति ॥ षण्मात्रस्यसप्तम्यां प्रभेदे ॥ कामयतेकाम्यते वा । कमु॰ । णिजभावे वृषा॰कलच् ॥ कञ्चलम् अलति । अलभूषणादौ । मू॰ कोषा ॥ ध्रुवकप्रभेदे ॥ यथा । उक्तोमलयतालेन लघुमध्ये स्फुरेद्गुरुः । सप्तदशाक्षरैर्युक्तःकमलोऽयं भयानके इति ॥
कमलखण्डम् । न । कमलानांसमूहे । कमलादित्वात्खण्डः ॥

कमलच्छदः । पुं । पद्मदले । पद्मपत्रे ॥
कमलजः । पुं । अजयोनौ । धातरि ॥
कमले जातः । जनी । डः ॥
कमला । स्त्री । लक्ष्म्याम् । श्रियि ॥ कमलालयस्यायं देव्याम् ॥ वरस्त्रियाम् ॥ कालकट्टादिपत्तने कमलानींवृक्षे तिन्तिडीकं कमलानागरङ्गकम् । फलान्येतानि भोज्यानि सभ्योऽन्यानि विवर्जयेदिति तन्त्रसारे पुरश्चरणप्रकरणम् ॥ काम्यते । कमु० । घञा० कलच् ॥ कमलम् अस्ति अस्याः । अर्शआद्यजन्तात् ॥ छन्दोविशेषे । यथा । द्विगुणनगणसहितः सगणः पुनरेकसहितो विहितः । फणिपतिमतिविमलास्थितिपभवतिकमलेति ॥ सवैयाभेदे गंता कमला यथा । वसुभिः प्रमितः सगणो विहितः पुनरेकमितो निहितो गुरुरन्ते । यदिसत्कवयो विलसन्मतयेऽभिधयाकमलेतितदा कलयन्ते । विदधत्यनघारमणीयतया रसनापरिखेखितयाकृतकन्ते । यशवन्तनरेशविशोभियशोधिकशोभितसाविदधातुमुदन्त इति ॥
कमलाक्षयः । पुं । सिद्धस्थानविशेषे ॥ यथा । कमलाक्षयेमहास्थानेकमलाक्षोमहेश्वरः । कमलावनदेशानी

सकलार्थप्रदायिनीत्यागमोक्तिः ॥
कमलालया । स्त्री । लक्ष्म्याम् ॥ कमलमालयेवयस्याः ॥
कमलासनः । पुं । धातरि ॥ कमलमासनमस्य ॥ न । आसनविशेषे ॥
कमलासनस्थः । पुं । पृथिवीपद्ममध्ये मेरुकर्णिकासनस्थे भगवन्नाभिकमलासनस्थे विधातरि ॥
कमलिनी । स्त्री । पद्मिन्याम् ॥ पद्मखण्डे । पद्माकरे ॥ कमलानि सन्त्यत्र । पुष्करादिभ्योदेशे इति इनिः ॥
कमलोत्तरम् । न । कुसुम्भपुष्पे ॥ कमलादुत्तरम् ॥
कमा । स्त्री । शोभायाम् ॥ इतिराजनिर्घण्टः ॥
कमिता । वि । कामुके ॥ कमेर्णिङ् भावे तृच् ॥
कम्पः । पुं । गात्रादिचलने । वेपथौ । वेपने ॥ कम्पनम् । कपिकम्पिचलने । भावे घञ् ॥
कम्पनः । पुं । शिग्रौ ॥
कम्पनम् । वि । कम्पे । लोले । चञ्चले ॥ न । कम्पे ॥ कम्पनशीलः । कपि० । चलनशब्दार्थादितियुच् ॥
कम्पलक्ष्मा । पुं । वायौ ॥
कम्पाकः । पुं । वायौ ॥
कम्पितम् । न । कम्पने । वेपने । कम्पे

कम्बली

॥ त्रि । कम्पयुक्ते ॥ कम्पतेस्म । क
पि° क्तः ॥
कम्पिल्लः । पुं । कम्पिल्लके । रक्ताङ्गे ।
कंवीला कामला इतिच भाषा प्रसिद्धे
वृक्षे ॥ देशविशेषे ॥
कम्पिल्लकः । पुं । कम्पिल्ले ॥
कम्प्रः । त्रि । कम्पयुक्ते । अतिचञ्चले
॥ कम्पनशीलः । नमिकम्पीतिरः ॥
कम्बरः । पुं । चित्रवर्णे । कर्बुरवर्णे ॥
त्रि । चित्रवर्णयति ॥
कम्बलः । पुं । नागरङ्गे ॥ सास्नायाम्
॥ प्रावारे ॥ कृमौ ॥ वैकक्ष्ये । स्व
नामख्यातेमेदादिलोमरचिते व-
स्त्रासनादौ । रत्नकंबले ॥ मृगविशेषे ॥
न । जले । सलिले ॥ कम्यते । क
मुं° कमेर्बुक्चेतिकलच् ॥ कंकुत्सितं
शिरो ऽम्बु वा वलते । वलसंवरणे
सम्वरणेच । अच् ॥ कम्बति कम्ब्य
तेवा । कम्बगतौ । वृषादित्वात्
कलच् ॥
कम्बली । पुं । वृषे ॥ त्रि । कम्बलयति
॥ कम्बलोऽस्त्यस्य । इनिः ॥
कम्बल्यवाद्यकम् । न । गव्यम् ॥ वृ
षदाद्ये शकटे ॥ कम्बलः सास्ना । सा
स्न्येषाम् । इनिः । कम्बलिभिर्हैपै
रच्यते । वहः ण्यत् । स्वार्थेकन् ॥
कम्बलीया । स्त्री । ऊर्णायाम् ॥ कम्ब

कम्बोजः

लायहिता । असंज्ञायाञ्चान्नयत् । त
स्मैहितमिति छः ॥
कम्बल्यम् । न । ऊर्णापलग्रते ॥ कम्ब
लाच्छसंज्ञायामिति प्राक्कीतीयेष्व
र्थेष्यत् ॥
कम्भिः । स्त्री । खिजाकायाम् । दर्व्याम्
॥ वंशांशे ॥ कम्यते । कमुः । वाहु
लकात्विन् ॥
कम्भुः । पुं । नागशङ्खे ॥ पुं । गम्भूके ॥
वलये । हस्तिनि । गजे ॥ कर्चूरे ॥
ग्रीवायाम् ॥ नलके । भोलाहाडइति
। भाषा । कास्यते । कमुः । जलुादय
श्चेतिनिपातितः ॥ कम्बति । कम्ब
गतौ । भृगव्यादिर्वा ॥ कुत्से ।
कम्बुकः । पुं । कम्बुशब्दार्थे ॥
कम्बुकण्ठी । स्त्री । कम्बुग्रीवायाम् ॥
कम्बुकाष्ठा । स्त्री । अन्धगन्धायाम् ॥
कम्बुग्रीवा । स्त्री । शङ्खाकृतिरेखाव
ग्रीवायाम् ॥ कम्बुः शङ्ख इवग्री
वातिस्रो रेखा यस्याः ॥
कम्बुपुष्पी । स्त्री । शङ्खपुष्पीम् ॥
कम्बुमालिनी । स्त्री । शङ्खपुष्पीम् ॥
कम्भूः । पुं । यज्ञे ॥ शङ्खे ॥ त्रि । प
रट्व्यां पर्वतारिणि ॥ अन्दूदम्भूजम्भू
कम्भूद्रुच्युल्लदन्तोत्पाठात् साधुः ॥
कम्बोजः । पुं । हस्तिविशेषे ॥ शङ्ख वि
शेषे ॥ देशविशेषे ॥ सयथा । यज्ञन

करकः

दंसमारभ्यते च्छादर्चिणपूर्वतः। क
म्मोनदेशो देवेशि वाजिराशिपरा
यणः ॥ इतितन्त्रशास्त्रम् ॥
कम्बातायी । पुं। शङ्खचिल्ले ॥
कम्बारी । स्त्री । गम्भार्य्याम् ॥ कंजलं
विभर्त्ति । डुभृञ् । । कर्मण्यण् ।
ङीष् ॥
कम्बु । न । उशीरे ॥ इतिराजनि-
घण्टः ॥
कम्रः । त्रि । कामुके । कैशुनेच्छाविशि
ष्टे ॥ कमनीये ॥ कामयते । कमु°
। । नमिकम्योरितिरः ॥
करः। पुं। वर्षोपले ॥ रश्मौ ॥ पाणौ ।
। मध्याये । भागधेये । कर्षकादि द्वा
रा । प्रत्येकस्यावरजङ्गमादेर्येरा
। जग्राह्यभागे ॥ शुण्डायाम् । हस्त
नखे ॥ चतुष्कलेऽपगुरोः ॥ ऽ
। संज्ञायाम् ॥ कीर्य्यते । ङाविच्छेपे ।
। च्छदेरप् ॥ करोति वा । अच् ॥
कर्मोपदेशति कर्त्तृवाचकोयंशब्दः
। यथा । आनन्दकरः ॥
करक । पुं । करञ्जवृक्षे ॥ पक्षिविशेषे
॥ दाडिमवृक्षे ॥ कारे ॥ खड्गायाम् ॥
पलाशवृक्षे ॥ कोविदारवृक्षे ॥ वक्र
खदृक्षे ॥ करीरवृक्षे ॥ नारिकेला
स्थनि । माला इतिगौड भाषा ।
नरेली कपाली इतिचभाषा ॥ पुं ।

करग्र

। न । करङ्गे ॥ कमण्डलौ ॥ पुं॥ स्त्री ।
। वर्षोपले ॥ कृणोति । । कृञ् हिंसा
। योम् । करोति दोषोभावं वा । कृ
। आदिभ्यः संज्ञायांबुन् ॥ ।
करकङ्कणन्यायः। पुं। कङ्कणशब्देनैव
। करभूषाविशेषबोधसम्भवेऽपि क
रशब्दपूर्वकः कङ्कणशब्दः करसंलग्न
। कङ्कणबोधार्थकइत्यर्थपरे दृष्टान्ते॥
करकचः । पुं । योगविशेषे ॥ यथा ।
। शनिभार्गवजीवक्षकुजसोमार्कवा
सरे । षष्ठ्रादितिथयः सप्तक्रमात्
। करकचाः स्मृता इति ॥
करकच्छपिका । स्त्री । कूर्ममुद्रायाम् ॥
करकण्टकः । पुं । नखे ॥
करका। स्त्री ।वर्षोपले । मेघोपले ।
। ओलाइतिभाषा ॥ कृणोतेर्वुन्नन्ता
। दापि क्षिपकादित्वात् प्रत्ययस्यादि
॥ तीव्रत्वं न ॥
करकाजलम् । न । दिव्यपानीयभेदे
॥ दिव्यवाय्वग्निसंयोगात्संहता सा
। लूपतन्तिया ॥ पाषाणखण्डवद्घना
। सा:करकोऽम्लतोयमा ॥ करका
। जंजर्जरूक्षंविशदंगुरुचक्षिरम् । दा
। रुणं शीतलं सान्द्रंपित्तघ्नं कफवायु
। कृत् ॥
करकामाः । पुं ।नारिकेलवृक्षे ॥
करग्रहः। पुं । विवाहे ॥ करग्रहणे ॥

करजः

करग्रहारम्भः । पुं । नववर्षसम्बन्धिनः करस्यराज्ञाप्रजाभ्यःप्रथमादाने । पुण्याहइतिप्रसिद्धे ॥ तत्रदिननिर्णयो यथा । तीक्ष्णोग्रवज्रीतरभेषु लग्ने शीर्षोदये भानुदिने शुभाह्ने । कुर्यादनुक्तानि समीहितानि करग्रहारम्भमसम्पिप्रजाभ्यइति ॥

करग्राहः । पुं । पाणिग्राहे ॥ करंगृह्णाति । ग्रह° । अण् ॥

करघर्षणः । पुं । दधिमन्थनदण्डे । तक्राटे ॥ न । हस्तघर्षणे ॥

करघर्षी । पुं । क्षुद्रमन्थानदण्डे । छोटीरवीइतिभाषा ॥

करङ्कः । पुं । मस्तके ॥ अशक्यनारिके फलास्थनि । नारियलकाखोलइतिभाषा । नोखानारियलइतिच ॥ शरीरास्थि ॥ इक्षुविशेषे ॥

करङ्कशालि । पुं । करङ्काभिधेक्षौ ॥

करच्छदः । पुं । शाखोटवृक्षे । सिंहोडाइतिभाषा ॥

करच्छदा । स्त्री । सिन्दूरपुष्पवृक्षे ॥

करजः । पुं । नखे ॥ करञ्जवृक्षे ॥ न । व्याघ्रनखाख्यगन्धद्रव्ये । करजंनखंतद्विव ॥ करेजातजन्यत्ते । जनी° । अन्यत्रापीतिडः ॥ कं सुखं जलंवा रञ्जयति । रञ्जेःकर्मण्यण् । त्यन्रञ्जेतिनिर्देशादकृङित्त्वेपिनलोपः

करञ्ज

। संज्ञापूर्वकत्वान्नवृद्धिः ॥

करञ्जोडिः । पुं । हस्तज्योडिवृक्षे । हाथाजोडीइतिभाषा ॥ इतिराजनिर्घण्टः ॥

करञ्जः । पुं । वृक्षविशेषे । करंजुवाइतिभाषाप्रसिद्धे ॥ सपर्यायः । तत्र गौडभाषायाडरकरञ्जस्यपर्यायाः । शिरविल्वोनक्तमालः करजश्चकरञ्जके ॥ नाटाकरञ्जस्यपर्यायाः । प्रकीर्यः पूतिकरञ्जःपूतिकःकलिकारकः ॥ गौडभाषयाकाँटाकरञ्जगाँठियाकरञ्जइतिप्रसिद्धस्य । षड्ग्रन्थः ॥ मांकडाकरञ्जस्य । मर्कटी ॥ विषकरञ्जस्य । अङ्गारवल्लरी ॥ इति ॥ अस्यकरञ्जस्य पर्यायास्तु । करमर्दोघनेक्षुराकरालःकरमर्दकः । इति ॥ कं सुखंजलंवा रञ्जयति । रञ्जेःकर्मण्यण् ॥

करञ्जकः । पुं । करञ्जे ॥ स्वार्थेकन् ॥ करञ्जःकटुकस्तीक्ष्णो वीर्योष्णोऽनिलदोषहृत् । कुष्ठोदावर्त्तगुल्मार्शोव्रणकृमिकफापहः ॥ तत्पर्यायकफवातार्शःकृमिशोथहरम्परम् । भेदनंकटुकम्लाकेवीर्योष्णं पित्तलंलघु ॥ तत्फलंकफवातघ्नंभेदनार्शःकृमिकुष्ठजित् । घृतपूर्णकरञ्जोपिकरञ्जसदृशगुणः ॥ भृङ्गराजे ॥

करञ्जफलः । पुं । कपित्थवृक्षे ॥

करञ्जी । स्त्री । उदकीर्ये । नक्तमाल वृक्षे ॥ करञ्जी स्तम्भिनी तिक्ता तुवरा कटुपाकिनी । वीर्योष्णा वमिवाता र्शःकृमिकुष्ठप्रमेहजित् ॥

करटः । पुं । गजगण्डे ॥ कुत्सिते वृत्ते ॥ निन्द्यजीवने ॥ एकादशाहादिश्रा द्धे ॥ दुर्दुरुटे ॥ वायसे ॥ वाद्यविशे षे ॥ करोति शकुनम् । शकादिभ्यो ऽटन् ॥ केति रटतिषा । रटशब्दे । पचाद्यच् ॥

करटकः । पुं । करटार्थे । स्वार्थेकन् ॥

करटा । स्त्री । दुःखदोच्छायाङ्गवि ॥ अजायतष्टाविति अदन्तलक्षणष्टा प् ॥

करटी । पुं । हस्तिनि ॥

करटिनी । स्त्री । हस्तिन्याम् ॥

करटुः । पुं । कर्करेटौ । करकटियाद्वि तिगौडभाषाप्रसिद्धपक्षिवि° ॥

करणम् । न । हेतौ । साधकतमे । क्रि यासिद्धौ प्रकृष्टोपकारके ॥ यद्व्यापा रानन्तर मव्यवधानेन फलोत्पत्ति स्तस्मिन्नित्यर्थः । तेनदात्रेण धान्यं लु नातीत्यत्रहस्तादेः करणत्वेपि दा त्रस्यैव करणत्वम् । तथाचोक्तम् । का रणाव्यवधानेपि क्रियानिष्पत्तिकार णम् । यद्वैविवक्षितं तेषुकरणत्वं प्र कीर्तितमिति ॥ साधने ॥ कर्मणि

॥ तिथ्यर्द्धपरिमितेषु बवाद्येकादशसु ॥ यथा । बवाख्यबालवकौलवतैतिल गरवणिजविष्टयः सप्त । जगदुरर्थति चराणि तिथिखण्डात्मकानि करणा नि ॥ अचराण्युत्तरशकुन्याद्यामास्त्रा चतुर्द्धा तस्याः । शकुनिचतुष्पदनाग किंस्तुघ्नानि भवन्ति करणानि ॥ सि तादेः करणव्येकोयातितिथ्यर्द्धसञ्चयः । सप्तभक्तोवशेषेणमितस्याद्यवतोग तम् ॥ चराणि विष्टिकरणान्यृतेचसा भवन्ति सौम्याखिलकर्मसिद्धये । त चैवधीराणिचपित्रकर्मणे विष्टिर्वि घातादिविधौवराभवेदिति ॥ हस्त लेखे ॥ नृत्त्यप्रभेदे ॥ नृत्त्यविषयका ष्टोत्तरशतकरणविशेषेषु ॥ यथा । करणानान्तुसंबंधासामान्यं लक्षणं त्विदम् । प्रायेणामकरोवक्षः स्थि तोन्यः पुरतोनुगः ॥ पादाभ्याङ्कर णंज्ञेयं तदिहाष्टोत्तरंशतम् । निकु म्भितंपार्श्वक्रान्तमतिक्रान्तंविवर्त्तक म् ॥ विद्युद्भ्रान्तंगजक्रीडं क्रान्तञ्च गरुडप्लुतमित्यादिसङ्गीतदामोदरः ॥ गीतप्रभेदे ॥ क्रियाप्रभेदे ॥ व्रत बन्धे ॥ कायस्थसंज्ञतौ ॥ कृतादौ ॥ चेष्टे ॥ गात्रे । काये ॥ संवेशने ॥ कायस्थे ॥ इन्द्रिये ॥ वर्णानांसृष्टता दौ ॥ योगिनांआसनादौ ॥ न्याय

मते व्यापारवदसाधारणं कारणङ्करणम्। समवाय्यसमवायिनिमित्तकारणमध्येयदसाधारणंकारणं तदेव करणमिति॥साङ्ख्यनये इन्द्रियेषु ॥ यथा। करणं त्रयोदशविधम्। इन्द्रियाण्येकादश बुद्धिरहङ्कारश्चेति त्रयोदशप्रकारं करणम्। त्रयोदश विधेकरणेऽवान्तरविभागंकरोति। अन्तःकरणं त्रिविधं दशधा बाह्यं त्रयं स्वविषयाख्यम्। साम्प्रतकालं बाह्यं त्रिकालं साभ्यन्तरङ्करणम्॥३२॥ अस्यार्थः। अन्तःकरणंत्रिधम्। बुद्धिरहङ्कारोमनइति। शरीराभ्यन्तरवृत्तित्वादन्तःकरणम्॥ दशधाबाह्यमिन्द्रियम् त्रयस्यान्तःकरणस्य विषयाख्यम्। विषयमाख्यातीति विषयाख्यम्। सङ्कल्पाभिमानाध्यवसायेषु कर्त्तव्येषु द्वारीभवति। तत्र बुद्धीन्द्रियाण्यालोचनेन कर्मेन्द्रियाणि यथास्वंव्यापारेण। बाह्याभ्यन्तरयोः करणयोर्विशेषमाह। साम्प्रतकालमित्यादि। साम्प्रतकालं वर्त्तमानकालंवाद्येन्द्रियम्। वर्त्तमानस्यालोपमनागतमपिवर्त्तमानम् अतीतागपिवर्त्तमानविषयाभवति। त्रिकालमाभ्यन्तरं करणम्। तद्यथा। पुरश्चेदादभूतदृष्टि. अस्तिधूमाद् अग्निरिहनगनिकुञ्जे असत्युपघातके पिपीलिकाण्डसञ्चरणादिहभविता वृष्टिरिति, तदनुरूपाश्चसङ्कल्पाभिमानाध्यवसाया भवन्तीति॥ श्रोत्रादिपञ्चज्ञानेन्द्रियाणि वागादि पञ्चकर्म्मेन्द्रियाणि मनोबुद्धिश्चेति त्रयोदशसंख्यके॥ करणवर्गेमनोबुद्धिश्चेतिवृत्तिविशेषौ वृत्तिमांस्त्वहङ्कारः कर्त्तैव। चिदाभासस्तुसर्व्वैवाऽविशिष्टः। अनात्मा भौतिकः कल्पितश्च॥ सेतिकर्त्तव्यताके साधने॥ धात्वर्थे॥ पुं। वैश्याच्छूद्रास्तुते। अर्थलिखनवृत्तिः कायस्थइतिख्यातः। इति भरतः॥ धनधान्याध्यचताच राजसेवातथैव च। द्विजातेः परिचर्याच दुर्गान्तः पुररक्षणम्॥ एषा पारशवस्याक्तोऽयस्य करणस्यच। प्रोक्ताऽथनसा वृत्तिः सभयत्नसुखप्रदा॥ ब्राह्मात्क्षत्रियात् सवर्णायामुत्पन्नेभल्लमल्लादिसंज्ञके॥ यथा। भल्लोमल्लश्चराजन्याद्ब्राह्मण्यामिच्छविरेवच। नटश्च करणश्चैव खसोद्रविडएवचेतिमनो १०ऽध्याय.॥ वानरादौ॥ किरति कीर्य्यते ऽनेनवा। ल्युट्। बहुलमन्यत्रापीतियुच्। कृत्यल्युटो बहुलमिति ल्युट्वा॥

करणकार्य्यम्। न। इन्द्रियाणाङ्कार्य्यं॥ आ

हरणादिक्रियाणां सकर्मकत्वात् किं कर्म कतिविधञ्चेत्यत आह ॥ कार्यञ्चतस्य दशधा हार्यं ध्यार्यं प्रकाश्यञ्च । तस्य त्रयोदशविधस्य करणस्य दशधाकार्यम् । आहार्यम् धार्यम् प्रकाश्यञ्च । आहार्यं व्याप्यम् कर्मेन्द्रियाणां वचनादानविहरणोत्सर्गानन्दाः ज्ञानेन्द्रियाणां शब्दस्पर्शरूपरसगन्धमया यथास्वं व्याप्याः । ते च दिव्यादिव्यतया दशधा । एवं धार्यमपि अन्तःकरणत्रयस्य प्राणादिलक्षणया वृत्त्या शरीरम् तच्च पार्थिवादि पाञ्चभौतिकम् शब्दादीनां पञ्चानां समूहः पृथिवीति । तेऽपि दिव्यादिव्यतया दशधेति धार्यमपि दशधा । एवं बुद्धीन्द्रियाणां प्रकाश्यं दशधेति शब्दादीनांपञ्चानां दिव्यादिव्यभेदात् । करणानाङ् कार्यम् ॥

करणत्राणम् । न । मस्तके ॥

करणव्यापारः । पुं । करणानां व्यापारे ॥ कारकविशेषः करणम् । नच व्यापारावेशंविना कारकत्वमिति व्यापारमाह । तदाहरण धारण प्रकाशकरम् । तत्रकर्मेन्द्रियाणि वागादीनि आहरन्ति स्वस्वविषयं यथा स्वमुपाददते स्वव्यापारेण व्या-

मुवन्तीतियावत् । बुद्धयहङ्कारमनांसि तु स्ववृत्त्या प्राणादि लक्षणया धारयन्ति । बुद्धीन्द्रियाणितु प्रकाशयन्ति ॥

करणाधिपः । पुं । जीवे । हृषीकेशे ॥ श्रोत्रादिचतुर्दशेन्द्रियाणामधिपा यथा । श्रोत्रस्य दिक् । त्वचोवातः । चक्षुषः सूर्यः । रसनायाः प्रचेताः । घ्राणस्याश्विनौ ॥ वाचो वह्निः । हस्तस्य इन्द्रः । पादस्य विष्णुः । पायोर्मित्रः । उपस्थस्य प्रजापतिः ॥ मनसश्चन्द्रः । बुद्धेश्चतुर्मुखः । अहङ्कारस्य शङ्करः । चित्तस्याच्युत इति ॥

करणाधिपाधिपः । पुं । जीवस्येश्वरे ॥ करणाधिपस्य अधिपः ॥

करणी । स्त्री । वैश्यायाञ्चूड्यामुत्पन्नायाम् ॥ ङ्युङ्लान् ङीप् ॥

करणीयः । त्रि । कर्त्तव्ये । कार्ये ॥ कृ अनीयर् ॥

करण्डः । पुं । मधुकोषे ॥ अक्षौ । गण्डे ॥ कारण्डवे खगे ॥ दक्षाढके ॥ वंशादिरचिते भाण्डविशेषे । करंडीकरण्डी इतिचभाषा प्रसिद्धे पुष्पादिधारणार्थे भाण्डे ॥ समुद्गे । सम्पुटे ॥ करोति । डुकृञ्° । अण्डन्कुत्सभृतजङ्त्यण्डन् ॥

करण्डा । स्त्री । कालखण्डे । यकृति ॥

करतो

करण्डी । पुं । मत्स्ये ॥ इन्नन्तः ॥
करतलः । पुं । हस्ततले । हथेली इति भाषा ॥ गुर्वन्तः ॥ ऽ चतुर्मात्रे ॥
करतालम् । न । वाद्यविशेषे । खड्ताल इतिभाषा ॥ यथा । शिवागारे भल्लकञ्च सूर्यागारेच शङ्खकम् । दुर्गागारे वंशियाद्यं मधुरीध्वनं वादयेत् ॥ भल्लकं कांस्यनिर्मितकरतालकमिति रघुनन्दनभट्टाचार्येण व्याख्यातम् ॥ पुं । ढगणेशे । ऽ आदिगुरुचिकले ॥
करतालो । स्त्री । करतलध्वनौ ॥ तथाच । यथा नस्यादोलीकपटकरतालीपटुरवः । इत्युद्भटः ॥ करतालिख्ड्ताल इतिचभाषा प्रसिद्धे वाद्यविशेषे । करट्यांम् ॥
करतोयम् । न । वर्षापद्मजले ॥
करतोया । स्त्री । कामरूपदेशप्रसिद्धनद्याम् । सदानीरायाम् ॥ कर्म्मनाशाजलस्पर्शात् करतोयाविलङ्घनात् । गण्डकीबाहुतरणाद्गौर्यः पयतिकौ त्तनात् ॥ गौरीविवाहसमये शङ्करकरगलितसम्प्रदानतोयप्रभवत्वात् करस्य तोयम् तदस्ति । अर्शआद्यच् ॥ अत्रस्मृतिः । अथादौ कर्कटेदेवी त्यङ्गगङ्गारजस्वला । सर्वारक्तंवहानद्यः करतो

करम

याम्बुवाहिनीति ॥
करदीकृतः । त्रि । वशीकृते ॥ करम्भागं ददाति । डुदाञ् । कः । ततः च्विः । अकरदः करदः सम्पद्यमानः कृतः करदीकृतः । अस्य च्वितीत्वम् ॥
करद्रुमः । पुं । कारस्करवृक्षे ॥
करपत्रम् । न । क्रकचे । करवत करपत्र इतिचभाषा ॥ अम्बुक्रीडायाम् ॥
करेण करादा पतति । पत्लृ । सर्वधातुभ्यः ष्ट्रन् ॥
करपत्रवान् । पुं । तालतरौ ॥ त्रि । करपत्रयुते ॥ करपत्रमस्यास्ति मतुप् ॥
करपत्रिका । स्त्री । अम्बुक्रीडायाम् ॥
करपर्णः । पुं । भिण्डीतिप्रसिद्धे फलेशाकवृक्षे । भिण्डायाम् ॥ रक्तैरण्डे ॥
करपल्लवः । पुं । अङ्गुलौ ॥
करपानम् । न । जलक्रीडायाम् ॥
करपाचिका । स्त्री ।
करपालः । पुं । खड्गे ॥ करम्पालयति । पालेरचि । कर्म्मण्यण् ॥
करपालिका । स्त्री । ह्रस्वे गदाकारे हस्तदण्डे । सोठाइतिप्रसिद्धे । इतिभरतः ॥ एकधारास्त्रे । इतिस्वामी ॥ ईस्याम् ॥ अल्पार्थेकन् ॥
करपीडनम् । न । विवाहे ॥
करग्राह्यः । त्रि । पाणिग्राह्ये ॥ करेण

करभो

प्रचेयः ॥

करभः । पुं । मणिबन्धादाकनिष्ठं करस्य बहिर्भागे ॥ करिशावके ॥ उष्ट्रशावके । वाताइतिभाषा ॥ उष्ट्रे ॥ नखनाम गन्धद्रव्ये ॥ कृणाति किरत्यनेन कीर्यतेवा । डुकृञ्करणे । डविचेपे डभृञ्हिंसायांवा । डभृञ्शलिकलिगर्दिभ्योऽभच् ॥ करे भातिवा । भादीप्तौ । सुतिकः ॥

करभकाण्डिका । स्त्री । उष्ट्रकाण्डीवृक्षे ॥

करभञ्जिका । स्त्री । उदकीर्ये । करञ्ज्याम् ॥

करभप्रिया । स्त्री । क्षुद्रदुग्धलभायाम् ॥

करभवल्लभः । पुं । कपित्थवृक्षे ॥ पीलुवृक्षे ॥

करभादनी । स्त्री । क्षुद्रदुग्धलभायाम् ॥

करभी । पुं । हस्तिनि ॥

करभी । स्त्री । उष्ट्रयोषायाम् । वाम्याम् ॥

करभीरः । पुं । सिंहे ॥ इतिशब्दरत्नावली ॥

करभूषणम् । न । कङ्कणे ॥ करंभूषयति करो भूष्यतेऽनेनवा । भूषकरणाधारे । ल्युट् ॥ हस्ताभरणमात्रे ॥

करभोरुः । स्त्री । उत्तमस्त्रीविशेषणे ॥ करभइव ऊरुर्यस्याःसा । ऊरूत्तरपदादौपम्यडट्यूङ् ॥

करम्भः

करमर्दः । पुं । गुवाकवृक्षे । तन्तुसारे ॥

करमरी । पुं । बंदुआइतिप्रसिद्धे । वन्हिनि ॥ इतिविकाण्डशेषः ॥

करमर्दः । पुं । करमर्दके । करौंदाइतिभाषा ॥ करंमर्दनाति । मृदोरे । कर्मण्यण् ॥ लघुदीर्घफलाभ्यान्तु करमर्दद्वयं मतम् । करमर्दद्वयं त्वाम्लमम्लंगुरुदीपनम् ॥ उष्णं रुचिकरं प्रोक्तं पित्तरक्तकफप्रदम् । तत्पक्वं मधुरं रुच्यं लघु पित्तसमीरजित् ॥

करमर्दकः । पुं । कृष्णपाकफले । करौंदाइतिभाषा । सुपेणे । अविम्ले ॥ करमर्दवत् । स्वार्थेकन् ॥

करमर्दिका । स्त्री । वनकरमर्दके ॥ करमर्दोक्तगुणका सा ज्ञेया करमर्दिका ॥

करमर्दी । पुं । करञ्जवृक्षे ॥

करमर्दी । स्त्री । करमर्दकवृक्षे ॥

करमालः । पुं । खतमाले । धूमे ॥ इतिहेमचन्द्रः ॥

करमाला । स्त्री । करपर्वरूपमालायाम् ॥

करमुक्तम् । न । वरछी भाखी इतिभाषाप्रसिद्धे अस्त्रविशेषे ॥

करम्भः । त्रि । व्यामिश्रे । मिश्रिते ॥ करोति । डुकृञ्° । कृकदिकडीत्यम्बच् ॥

करबी

करम्बितः । त्रि । सम्पृक्ते । मिश्रिते ॥ करम्भः । पुं । दधिमिश्रितसक्तुषु ॥ के न जलेन रभ्यते मिश्रीक्रियते । केन वायुना वा रभ्यते । रभिरनेकार्थः । अकर्त्तरिचेति घञ् । रभेरशब्लिटोरितिनुम् ॥

करम्भकम् । न । कर्कसारे । करम्भे ॥ करम्भा । स्त्री । प्रियङ्गौ ॥ शतावर्य्याम् ॥

करहः । पुं । नखे ॥ करेरोहति । रुहेरिगुपधेति कः ॥

करहिः । स्त्री । करताल्याम् ॥ करस्पदि ॥ करस्य ऋहिः ।

करवालः । पुं । कृपाणे ॥ करंवलति । करेण वलति वा । वलप्राणने । कर्मण्यण् । व्यलादिभ्योणो वा । यद्वा । वलनंवालः । वलबेष्टने । घञ् । करेवालोस्य करेण वल्यते वा । कर्मणि घञ् ॥

करवालिका । स्त्री । ईल्याम् । करपालिकायाम् ॥ करंवलते । वलहिंसादानयोः । अण् । करेण वाल्यते वा । णिजन्तादचः । कन् ॥

करवी । स्त्री । छिन्नपत्रे ॥

करवीरः । पुं । कृपाणे । खड्गे ॥ दैत्यविशेषे ॥ ब्रह्मावर्त्ते हयवतीनदीतीरे चन्द्रशेखरराजपुरे ॥ श्मशाने ॥ विषप्रभेदे । करवीरमूले ॥ कनेर

करवू

इतिप्रसिद्धे वृक्षे । प्रतिहासे । हयभारके ॥ करवीरद्वयं तिक्तं कषायं कटुकञ्चतत् । व्रणलाघवकृन्नेत्र्यं कुष्ठव्रणापहम् ॥ वीर्य्योष्णं कृमिकण्डूभं भक्षितं विषवन्मतम् ॥ रक्तश्वेतप्रभेदेन करवीरद्वयं मतम् ॥

करं वीरयति । वीरविक्रान्तौ । कर्मण्यण् ॥ न । अश्वपुष्पे ॥ करवीरस्य विकारोवा पुष्पम् । पुष्पमूलेषु बहुलमिष्यणो लुक् ॥

करवीरकः । पुं । अर्जुनवृक्षे ॥ करवीरार्थे ॥

करवीरकन्दसंज्ञः । पुं । तैलकन्दे ॥

करवीरभूषा । स्त्री । झाटक्याम् । अरडड इतिभाषा ॥

करवीरी । स्त्री । अदितौ । देवमातरि ॥ सङ्ख्याम् । अष्टगव्याम् ॥ पुनर्नवायाम् ॥

करशाखा । स्त्री । अङ्गुलौ ॥ करस्यशाखाइव ॥

करशीकरः । पुं । वमथौ । हस्तिमुखात्निर्गतेजलकणे ॥ करस्यशीकरः ॥

करशूक । पुं । नखे ॥ इतित्रिकाण्डशेषः ॥

करसूत्रम् । न । विवाहादौ मङ्गलार्थं मूर्द्धादिभये हस्तसूत्रे ॥ यागादौहस्तबन्धसूत्रंतत्प्रचारात् ॥

करहू

करालः

करहाटः । पुं । पद्मादिमूले । शिफा कन्दे ॥ मदनद्रुमे ॥ महापिण्डीतकौ ॥ देशविशेषे ॥ करंहाटयति । हटदीप्तौ । ण्यन्तः । कर्मण्यण् ॥

करहाटकः । पुं । मदनपादपे । भयनफल इति भाषा ॥ स्वार्थेकन् ॥ न । हस्तसम्बन्धिस्वर्णे ॥

कराटः । त्रि । विकटे । भयानके ॥

करामर्दः । पुं । करमर्दे ॥

करास्फुकः । पुं । अविप्ले । सुपेषे ॥

करास्फुक. । पुं । करमर्दे ॥

करायिका । स्त्री । कूटपूर्यां । करांजी इति गुरुसल इतिचभाषा ॥

करारोटः । पुं । अङ्गुरीयके ॥

कराल । पुं । गर्जनतैल इति गौडभाषाप्रसिद्धे सर्जरसयुक्ततैले । धूनतैले ॥ भल्लाततैले ॥ राक्षसविशेषे ॥ दन्तरोगविशेषे । यथा । अनैः अनैः प्रकुरुते वायुर्दन्तसमाश्रितः । करालान् विकृतान् दन्तान् करालेति स निश्यति ॥ न । कृष्णकुठेरके । श्यामतुलसी इतिभाषा ॥ वेसवारप्रभेदे ॥ यथा । तप्तस्नेहे पचेत पूर्वंवेसवारकसंज्ञकम् । पाकप्राप्तिसौरभ्यं कराल इदकै मंतमिति ॥ त्रि । दन्तुरे ॥ तुङ्गे । उच्चे ॥ विकृते । भीषणे ॥ करेणलाति

करिणी

। ला० । आतश्चोपसर्गे इति सुपीति योगविभागादा कः ॥ यद्वा । अलभूषणादौ । कर्मण्यण् ॥

करालकः । पुं । करालार्थे ॥

करालजिमुटा । स्त्री । कार्पिकायाम् । लङ्काधान्ये ॥

करालता । स्त्री । शारिवायाम् ॥

करालास्यः । त्रि । दन्तुरवदने ॥ करालं दन्तुरमास्यं यस्य ॥

करालिकः । पुं । वृक्षे ॥ इति हेमचन्द्रः ॥

करालितः । त्रि । भीषिते । पीडिते ॥

करालो । स्त्री । वङ्गे समजिह्वान्तर्गतजिह्वाविशेषे ॥ देवीविशेषे ॥ पचाद्यच्चेति पाचिको ङीप् ॥

करास्फोटः । पुं । आस्फोटिते । वक्षस्यवाहो द्वितीयहस्तेनताडने ॥

करिकः । पुं । अरिमेदवृक्षे । विटखदिरे ॥

करिकणावल्ली । स्त्री । चविकावृक्षे ॥

करिका । स्त्री । नखरेखे ॥ करिका नखरेखिकेति वैजयन्ती ॥

करिकुसुम । पुं । नागकेसरवृक्षके ॥

करिगर्ज्जितम् । न । हस्तिते । हस्तिगर्ज्जने ॥

करिणी । स्त्री । देवताभेदे ॥ धेनुकायाम् । हस्तिन्याम् ॥ इन्नन्तान्नान्तलक्षणो ङीप् ॥

करिस्क

करिदारकः । पुं । सिंहे ॥
करी । पुं । हस्तिनि ॥ करः शुण्डा अस्ति अस्य । इनिः ॥ लक्ष्मीकामो युद्वाद्न्यत्र करिबंधनं कुर्यात् दुर्यहि श्रीर्यं करिण इतिचाचुपः ॥
करिनासिका । स्त्री । यन्त्रविशेषे ॥
करिपत्रम् । न । तालीशपत्रे ॥
करिपिप्पली । स्त्री । गजपिप्पल्याम् । चविकाफले ॥ करीषपिप्पली इह ख्यात ॥
करिपोतः । पुं । करिशावके ॥
करिबन्धः । पुं । प्रारब्धे । गजबन्धनस्तंभे ॥ इतिहारावली ॥
करिमाक्षः । पुं । सिंहे ॥
करिमुखः । पुं । गणेशे । विनायके ॥ करिणोमुख मिवमुख मस्य ॥
करिरतम् । न । रतबन्धान्तरे ॥ भूगतस्तनभुजास्तमस्का मुच्यतां स्वयमधोमुखीं स्त्रियम् । क्रामति स्वकरकृष्टमेखने वल्लभे करिरतंतु दुच्यते ॥ करियदमिति पाठान्तरम् ॥
करिशावकः । पुं । कलभे । हस्तिशिशौ ॥ करिणः शावकः ॥
करिष्ठः । त्रि । अतिशयेन कर्त्तरि ॥ अतिशायने इष्ठन् । तुरिष्ठेमेयस्सु ॥
करिस्कन्धः । पुं । करीणां समूहे ॥ न करितुरगाणांस्कन्धच् ॥ गजांसे ॥

करीरः । पुं । घटे ॥ ककरे । ग्रन्थिले । करील इतिभाषाप्रसिद्धे वृक्षे ॥ करीरः कटुकस्तिक्तः स्वेदघ्नोभेदनः स्मृतः । दुर्नामकफवातामगरशोथव्रण मणुत् ॥ पुं । न । वंशाङ्कुरे ॥ कृणाति किरति कीर्यते वा । कृहिंसायाम् कविचेपेवा । कृशृपृकटीति ईरन् ॥ करिणमीरयति वा । ईर० । कर्मण्यण ॥
करीरफलम् । न । कारीरे । टींटइति ख्याते ॥
करीरा । स्त्री । हस्तिदन्तमूले ॥ चीरिकायाम् । झिल्याम् । झींगुरइतिभाषा । झेनझींगर नींदराइति चख्यते कीटे ॥ अजाद्यतष्टाप् ॥
करीरिका । स्त्री । हस्तिनोदन्तमूले ॥
करीरी । स्त्री । चीरिकायाम् ॥
करीषः । पुं । न । शुष्कगोमये । छगणे । छाँणा करसी इतिभाषा ॥ कीर्यते । कृविक्षेपे । कृहृभ्यामीषन् ॥
करीषङ्गषा । स्त्री । वाट्यायाम् ॥ करीषङ्गमति । कंषहिंसायाम् । सर्वे कूलाभ्रकरीषेषु कषइतिकषेःखच् । मुमागमः ॥
करीषाग्निः । पुं । छागणे । गोमयानले ॥
करुणः । पुं । करुणा नी कृ इतिभाषाप्र

करुणः

करेटः

सिद्धे उचविशेषे ॥ शृङ्गारादेष्टरसा
न्तर्गततृतीये रसे ॥ इष्टनाशा दनि
ष्टाप्तेः करुणाख्यो रसो भवेत् ॥ बुद्ध
भेदे ॥ सर्वभूताभयदातरि परमहंस
परिव्राजके ॥ त्रि । दीने ॥ सदये ।
दुःखितेषु दया कृपा तद्वति ॥ अ
र्श आद्यच् ॥ करोति मनः । डुकृ
ञ् । कृवृदारिभ्यउनन् ॥

करुणमल्ली । स्त्री । नवमल्लिकायाम् ॥

करुणविप्रलम्भः । पुं । पूर्वरागादिचतु
र्भेदविप्रलम्भशृङ्गारमध्ये विप्रलम्भ
विशेषे ॥

करुणा । स्त्री । कृपायाम् । दयायाम् ।
परदुःखहानीच्छायाम् ॥ दुःखिने
पुःकथन्नु नामैषां दुःखनिवृत्तिः स्या
दिति कृपासेयभावये नोपेक्षां न
बाष्पम् ॥ करणन् । कृवृदारिभ्यउ
नन् । टाप् ॥

करुणापरः । त्रि । दयालौ । हरते ॥

करुणामयः । त्रि । कृपाप्राचुर्यवति ॥

करुणी । स्त्री । ग्रीष्मपुष्पवृक्षे । रक्तपुष्
प्याम् । ककरखिरुणी इतिकोकण
भाषा ॥

करुषः । पुं । देशविशेषे ॥

करेटः । पुं । नखे ॥

करेटव्या । स्त्री । यनच्छूपचिणि ॥

करेटुः । पुं । स्त्री । कर्करेटौ । करकटि

कर्कचि

या इतिगौडभाषाप्रसिद्धे विहगे ॥
के जले वायौ वा रेटति । रेटृभाष
णे । अ० क्विः ॥

करेणुः । पुं । इभे । मतङ्गजे । गजे ॥ क
र्णिकारवृक्षे ॥ स्त्री । हस्तिन्याम् ॥
करोति । वृतृभ्यामेणुः ॥ के रेणुर
स्येति वा ॥

करेणुभूः । पुं । पालकाप्यमुनौ ॥

करेणुसुतः पुं । मुनिविशेषे ॥ इभभाव
के । कलभे ॥ करेणोः सुतः ॥

करेन्दुकः । पुं । भृङ्गे ॥

करेवरः । पुं । नृवृक्षे । सिल्लके ॥

करोटः । पुं । न । शिरोऽस्थनि ॥ कंवा
युं रोटते । रुटं० । अच् ॥

करोटिः । स्त्री । शिरोऽस्थि ॥ कंवायुं
रोटते । रुटदीप्तौ प्रतिघातेच । के
नरुध्यतेवा । इन् ॥ रोटयति वा ।
रुटिभ्यरोटिः । अचइः ॥

करोटिका । स्त्री । शिरोऽस्थि । कपाले
॥ करोटिरेव । स्वार्थे कन् ॥

करोटी । स्त्री । करोटौ ॥ ङीष् ॥

कर्कः । पुं । कर्कोतने ॥ वक्रौ ॥ मुक्ता-
स्थे ॥ दर्पणे ॥ घटे ॥ चतुर्थराशौ
॥ कर्कटवृक्षे ॥ क्षुद्रोरे ॥ करोति
कृणोति क्रियते वा । कृदाधारार्त्ति
कलिभ्यः कः ॥

कर्कचिर्भिटी । स्त्री । चिर्भिटायाम् ।

कर्कटी

कर्कटीभेदे ॥

कर्कटः । पुं । वृत्तविशेषे । क्षुद्रामलक सन्निभे । कर्कफले ॥ पक्षिवि० । कर्करेटौ ॥ जलजन्तुविशेषे । कुलीरे । काँकडा इतिभाषा ॥ मेषादिराश्यन्तर्गतचतुर्थराशौ ॥ जन्मकालीनचन्द्रास्थितैतद्राशिफलम् । श्रुतकीर्त्तामलनिर्मलवृत्तयः सुकृतगन्धजलाशयकेलयः । किल नरास्तु कुलीरगते विधौ वसुमतः सुमतोऽर्थिलब्धयः ॥ कर्किलग्ने समुत्पन्नो भोगी सर्वजनप्रियः । मिष्टान्नपानभोगीच जायते स्वजनप्रियः ॥ वालुकायाम् ॥ शाल्मलीफले ॥ स्त्रीयांकरणे ॥ कृणाति । कृहिं० । अन्येभ्योपीतिविच् । कटति । कटे० । पचाद्यच् । कर्चासौकटश्च । अहरादित्वाद्रेफः ॥ कर्कटतिसौत्रोधातुः । अकादिभ्योटन्वा ॥ कर्कंश्वेतवर्णं टलति । टल गतौ । डो वा ॥

कर्कटकः । पुं । इक्षुविशेषे ॥ कुलीरे ॥ कर्कटएव । स्वार्थे कन् ॥

कर्कटशृङ्गिका । स्त्री । कर्कटशृङ्गी । स्त्री । } अजशृङ्ग्याम् ॥ महाघोषायाम् । कुलीरशृङ्ग्याम् । काँकडा सींगी इतिख्यातायाम् ॥

कर्कटाख्या । स्त्री । कर्कटशृङ्ग्याम् ॥

कर्कन्धूः

कर्कटाधिपः । पुं । चन्द्रे ॥

कर्कटाह्वः । पुं । विल्ववृक्षे ॥

कर्कटाह्वा । स्त्री । कर्कटशृङ्ग्याम् ॥

कर्कटिः । स्त्री । वालुकायाम् । इर्वारौ ॥ शाल्मलीफले ॥ करङ्कटति । कटे० । सर्वधातुभ्यइन् । अकंन्ध्वादिषु पररूपं वाच्यम् ॥

कर्कटिनी । स्त्री । दारुहरिद्रायाम् ॥

कर्कटी । स्त्री । इर्वारौ । वालुकायाम् । ककडी इतिभाषा ॥ कर्कटी शीतला रूक्षा ग्राहिणी मधुरा गुरुः । रूक्षा पित्तहरा सामा पक्वा मन्दाग्निपित्तकृत् ॥ अस्याःपाकप्रकारस्तु । बीजरहिता प्रौढा गुलिकाकारखण्डिता । तक्षिता सुष्टते तप्ते कर्कटीवाग्रलेहिता ॥ विपाण्डुखण्डेक्षुतदुग्धसार्द्धं विभावितंवल्लजशर्कराभ्याम् । कृतैष वासष्वकदुग्ध मेतत् प्रतिच्छर्दिरुचं नसातनोति ॥ शाल्मलीफले ॥ देवदालीलतायाम् ॥ कर्कटशृङ्गीवृक्षे ॥ घोटिकावृक्षे ॥ करङ्कटति । कटे० । इन् । पचेडीष् । अकंन्ध्वादिः ॥

कर्कटुः । पुं । करेटुपक्षिणि ॥

कर्कन्धूः । पुं । स्त्री । कोलिपादपे । बदरीवृक्षे ॥ बदरीफले । बेर इति भाषा । कर्कन्धूः क्षुद्रबदरं कथितम्

कर्कोरो

पूर्वसूरिभिः । अम्लं स्यात् चुद्रवदरं कषायं मधुरं मनाक् ॥ स्निग्धं गुरु च तिक्तञ्च वातपित्तापहं मृतम् । शुष्कं भेद्यग्निकृत् सर्वं लघुतृष्णाक्लमास्रजित् ॥ दैत्यान्तरे ॥ कर्कटकंदधाति । डुधाञ् ० । अन्येष्वपीति विच् । निपातितः कू प्रत्ययान्तः । कर्कं दधाति वा । नियातनात्कुम् ॥

कर्कर । पुं । दर्पणे । मुकुरे ॥ न । चूर्णजनकचुद्रयावाग्रखण्डे । चूर्णखण्डे । कङ्कर काँकर इतिच भाषा ॥ मुकुरे ॥ त्रि । कठिने । दृढे ॥ कर्कनम् । कर्कहासे । घञ् । कर्कं राति । रा० । आतोनुपेतिक ॥

कर्करान्त्र । पुं । कालकण्ठविहङ्गमे । खञ्जने ॥

कर्कराटुः । पुं । कटाहे ॥ इतिकश्चित् । चटाधरः ॥

कर्कराटुकः । पुं । कर्करेटुपक्षिणि ॥

कर्करान्धुक । पुं । अन्धकूपे ॥

कर्करालु । पुं । चूर्णकुन्तले ॥

कर्करिका । स्त्री । घर्षे । नेत्रखर्ज्जास् ॥

कर्करी । स्त्री । गलन्तिकायाम् । सना खजखपाचे । झारी इति भाषा ॥ कठिनायाम् ॥ कन्दोर्द्धतपक्वनिका सनसाधने । झर्ना झारा इति च भाषा ॥ गौरादित्वात् ङीष् ।

कर्कश

कर्करीका । स्त्री । गलन्तिकायाम् । कर्कर्याम् ॥ फर्फरीकादित्वात् साधुः ॥

कर्करेटम् । न । अर्द्धचन्द्रे । अङ्गुलितोरणे । गलेहस्तधाने ॥

कर्करेटुः । पुं । करेटो । करकटिया इति गौडभाषा प्रसिद्धे खगे ॥ कर्कैतिरेटति । रेटृभाषणे । रुगश्वादि ॥

कर्कश । पुं । काम्पिल्लवृक्षे ॥ कासमर्दे ॥ दृढो ॥ खड्गे ॥ त्रि । साहसिके ॥ शूरे ॥ दृढे ॥ अमङ्गले । खरस्पर्शे । दुस्पर्शे ॥ निर्दये ॥ कृशोति । कृञ् हिंसायाम् । अन्येभ्योपीतिविच् । कशति । कशशब्दे । पचाद्यच् । कर्षादौ कशश्च ॥ यद्वा । करेकशति । कशे । पचाद्यच् । अनर्थावितथवर्थौ वा ॥ शकन्ध्वादि । कर्कान्मत्वर्थे लोमादित्वात् शोधा ॥

कर्कशच्छद । पुं । शाखोटवृक्षे । पटोले ॥

कर्कशच्छदा । स्त्री । दन्तधावने । दतौन इतिभाषा ॥ दन्तधावनायाम् ॥

कर्कशदल । पुं । पटोले ॥

कर्कशदला । स्त्री । दन्तधावने ॥

कर्कशवाक्यम् । न । निष्ठुरवचने । एकवचनेपि ॥

कर्कैत

कर्कशा । स्त्री । वृश्चिकालीवृक्षे ॥ क्रू रायाम् ॥

कर्कसारम् । न । करम्बे । दधिसक्तुषु ॥

कर्कारुः । पुं । कुष्माण्डे ॥ स्त्री । कुष्माण्ड्याम् ॥ कर्कारुर्ग्राहिणी शीता रक्तपित्तहरा गुरुः । पक्वा तिक्ता ग्निजननीसक्षाराकफवातनुत् ॥ कर्कं शुक्लवर्णम् ऋच्छति । ऋगतौ । वा हुलकादुण् ॥

कर्कोरुकः । पुं । काखिन्नेवृक्षे ॥

कर्कोरुः । स्त्री । कुष्माण्ड्याम् ॥

कर्क्षिः । पुं । कर्कटराशौ ॥

कर्क्षी । पुं । कर्कटे ॥

कर्क्षेतनः । पुं । न । रत्नविशेषे ॥ अस्यो त्पत्त्यादिकमुक्तंगारुडे ७५ ध्याये । सूतउवाच । वायुर्नखान् दैत्यपते र्गृहीत्वाचिक्षे पसम्यग्यवनेषुहृष्टः । ततः प्रसूतं पवनोपपत्त्यं कर्केतनं पूज्यतमं पृथिव्याम् ॥ वर्णेन तद्बुधि रसोममधुप्रकाश मातामयोतिदह नोज्ज्वलितं विभाति । नीलं पुनः खलुसितं परुषं विभिन्नं व्याध्यादिदोषकरणेन नतद् विभाति ॥ स्निग्धा विशुद्धाः समरागिणश्च आयीतवर्णा गुरवोविचित्राः । भासप्रणष्याधि विसर्जिताश्च कर्केतनास्ते परमाः पवित्राः ॥ पक्षेणकाञ्चन मयेनतु वेष्टयित्वा हस्ते गले ऽथधृतमेतदति प्रकाशम् । रोगमणाशनकरं बलिनाशनञ्च आयुष्करं कुलकरञ्च सुखिप्रदञ्च ॥ एवंविधं बहुगुणं मणि मावहन्ति कर्केतनं शुभमलङ्कृतयेनराये । तेपूजिता बहुधना बहुबान्धवाश्च निश्चोज्ज्वलाः प्रमुदिता अपिते भवन्ति ॥ एकेऽपनह्यविकृताकुलनीलभासः प्रम्लानरागकुसिताः कलुषाविरूपाः । तेजोतिदीप्तिकुलपुष्टिविहीनवर्णाः कर्केतनस्य सदृशंवपुरुद्वहन्ति ॥ कर्केतनं यदि परीक्षित वर्णरूपं प्रत्यग्रभा स्वरदिवा करस्य प्रकाशम् । तस्योत्तमस्य मणिशास्त्र विदामहिमा तुष्यन्तु मूल्यमुदितं तुलितस्य कार्य्यमिति ॥

कर्कोटः । पुं । नागराजविशेषे ॥

कर्कोटकः । पुं । बिल्ववृक्षे ॥ स्त्री ॥ कांकरोल इति गौडभाषासिद्धे फलजातिविशेषे । किञ्चासन्ने । तिक्तपटे ॥ काश्मर्य्ये । कर्कोटको नाम सर्पोयोदष्टोविघट्यते । तस्य सर्पस्य सर्पत्वंतस्मै सर्पनमोस्तुते । इतिस्तुति प्रसिद्धे नागराजे ॥ अपिच । कर्कोटकस्य नागस्य दमयन्त्यानलस्य च । ऋतुपर्णस्य राजर्षेः कीर्त्तनं कलिनाशनमिति ॥

कर्कोट

कर्चूरा

कर्कोटकी । स्त्री । पीतघोषायाम् । महावाल्याम् । खखसा इति ख्याते फले ॥ कर्कोटकीफलं कुष्ठकृमिसारुचिनाशनम् । श्वासकासज्वरान् हन्ति कटुपाकञ्च दीपनम् ॥ ईषद्विभिन्नमरिचैःपरिपूर्णगर्भं तैलेन रन्धितसुसैन्धवधानयोगम् । वाल्ली कयुक्तपयसा विहिताभिषेकं कर्कोटकीफलमिदंरुचिकृत्तरुण्यम् ॥

कर्कोटिका । स्त्री । ककौडा इतिभाषाप्रसिद्धे । कर्कोटके । कूष्माण्ड्याम् ॥

कार्कोटी । स्त्री । कर्कोटिकायाम् ॥

कर्चरिका । स्त्री । कचौरीतिख्याते पिष्टकप्रभेदे ॥ इतिपाकरात्नेश्वरः ॥

कर्चरी । स्त्री ॥ कचरीतिख्याते फले ॥ क्षीरास्रकृतसंस्कारा शुष्का स्नेहविपाचिता । अरोचकादिरोगाणां कचरी कण्ठकर्चरी ॥ कर्चरी रुचिकृद्दृष्या सुस्वादुरतिलेखनी । उष्णा पित्तकरी प्रोक्ताकफ कृत सारिका स्मृता ॥

कर्चूरः । पुं । कचूर इतिभाषा प्रसिद्धे गन्धसारे । द्राविडे ॥ कर्चूरोदीपनो रुच्यः कटुकस्तिक्त एवच । सुगन्धिः कटुपाकः स्यात् कुष्ठार्शो व्रण कासनुत् ॥ उष्णो लघुर्हरेच्छ्लेष्मगुल्मवातकफ क्रिमीन् ॥ अस्याः ॥

कर्णगू

र्न । स्वर्णे ॥ कर्जति । कर्ज व्यथने । खर्जूरादित्वादूरः । पृ० ॥

कर्चूरकः । पुं । द्राविडके । कचूर इति भाषा ॥ स्वार्थे कन् ॥

कर्ण । पुं । पृथायाज्येष्ठसुते । वसुषेणे । चम्पापतौ ॥ सुवर्णाञ्जिटचे ॥ श्रवणेन्द्रिये । श्रोत्रे ॥ गुरुयुगले ऽऽ ॥ अरिचे ॥ कीर्यते शब्दग्रहणाय छिद्यते यद्वा कीर्यते शब्दो ऽस्मिन् किरतिशरीरे सुखं वा । कृविक्षेपे । कृवृजृसीतिनन् । बाहुलकादुणः ॥ यद्वा । कर्णयति । कर्णभेदने । अदन्तः ॥ अर्च ॥ यद्वा । करोति शब्दस्थानम् । डुकृञ्° । कृवृदृक्षादिना नन् ॥

कर्णकण्डुः । पुं । कर्णरोगविशेषे ॥ तस्यनिदानं यथा । मारुतः कफसंयुक्तः कर्णकण्डुं करोतिचेति ॥

कर्णकीटी । स्त्री । कर्णजलौकायाम् । शतपद्याम् । कानसलाई इतिभाषा ॥

कर्णच्वेडः । पुं । कर्णरोगविशेषे ॥ वायुः पित्तादिभिर्युक्तो वेणुघोषसमं स्वनम् । करोतिकर्णयोः च्वेडंकर्णच्वेडः सउच्यते ॥ इति माधवः ॥

कर्णगूथम् । न । कर्णमले ॥ कर्णस्रगूथम् ॥

कर्णपू

कर्णगूथकः । पुंसः कर्णरोगविशेषे ॥ पित्तोष्मशोषितः श्लेष्मा जायते कर्ण गूथकस्तत्स्वे निदानम् ॥

कर्णचापः । पुं । काष्ठपृष्ठाख्येधनुषि ॥ कर्णस्य राधेयस्य चापः ॥

कर्णजलौका । पुं । शतपद्याम् । गौड । कानसलूरा इतिभाषा ॥

कर्णजलौका । स्त्री । शतपद्याम् । चि । चाडिर्य्याम् । कानसलाई इतिभा षायाम् ॥

कर्णजाहम् । न । कर्णस्थमूले ॥ तस्य । पाकमूलइत्यादिना जाहचप्र० ॥

कर्णजित् । पुं । अर्जुने ॥ गुडाकेशे ॥

कर्णः जयति । जि० । सत्सूद्विषे त्यादिनाक्विप् । तुक् ॥

कर्णदर्पणः । पुं । ताडङ्कनामनि कर्णभू षणे । कानतडका इतिभाषा ॥

कर्णदुन्दुभिः । स्त्री । शतपद्याम् ॥

कर्णधारः । पुं । नाविके । काण्डोरि इ तिमौंडभाषा । मल्लाह मांझी इति भाषा ॥ कर्णमरित्रम् धरति । धृञ् । ० । कर्मण्यण् ॥

कर्णपाली । स्त्री । कर्णभूषणे । कान बाला । याली इत्यादिभाषा प्रसि द्धे ॥ कर्णपल्लिमदेशयोः ॥

कर्णपिशाची । स्त्री । देवीविशेषे ॥

कर्णपूः । स्त्री । कर्णपूरे । चम्पायाम् ॥

कर्णपूर

कर्णपूरम् । न । चम्पानगर्याम् । मालि न्याम् ॥

कर्णपुष्पः । पुं । मोरटलतायाम् ॥

कर्णपूरः । पुं । शिरीषवृक्षे । नीलोत्प लेः ॥ अवतंसे । कर्णाभरणे ॥ अशो कवृक्षे ॥ कर्णम्पूर्यति । पूरी० । क र्मण्यण् ॥

कर्णपूरकः । पुं । कदम्बवृक्षे । नी । शि रीषे ॥ नीलोत्पले ॥ अवतंसे ॥

कर्णप्रतिनाहः । पुं । कर्णरोगविशेषे ॥ तस्य सम्प्राप्तिरुक्ता यथा । सकर्णगू थो द्रवतां व्यतीतगतेः विलोपितो घ्राणमुखस्यपद्यते । तदा स कर्णप्र तिनाहसंज्ञितो भवेद्विकारः शिर सोर्द्धभेदकृदिति ॥

कर्णफलः । पुं । कानलि माचुइति गौड प्रसिद्धे मत्स्यविशेषे ॥

कर्णभूषणम् । न । कर्णाभरणे ॥

कर्णमलम् । न । कर्णगूथे ॥

कर्णमुकुरः । पुं । ताटङ्कनामनि कर्णभू षणे ॥

कर्णमोटिका । स्त्री । चामुण्डादेश्या

कर्णमोटी । स्त्री । म् ॥

कर्णरोगः । पुं । स्रोतस्याधौ ॥

कर्णलतिका । स्त्री । पाल्याम् । कान कायत्ता इति भाषाइति हेमचन्द्रः ॥

कर्णवंश । पुं । सर्पे ॥ इतिशब्दरत्नावली ॥

कर्णवं

कर्णसं

कर्णवर्जितः । पुं । सर्पे ॥ त्रि । बधिरे ॥
कर्णवेधः । पुं । कर्णपटकदोषनिवारणार्थं कर्णयोर्वेधने ॥ सोदरभ्रातॄणां संस्कारणाञ्च पौर्वापर्यक्रमः । कर्णवेधस्य संस्काररूपत्वात् न तथा नियमः । यथा । यदापत्त्यदयंतिष्ठेत् स[illegible]म्बोप्यपरस्यच । कर्णपटं विजानीयात् तत्र तत्रयस्यच ॥ इत्याश[illegible]तयोर्मध्ये शुद्धिर्यस्याथ वत्सरे । कर्णवेधोहितस्तस्य नाचूड्येष्टवि[illegible]चारणा ॥ पटकर्णोत्पत्तिमाशङ्क्य । भानोः शुक्लासमेपिचेत् कर्णवेधो न दोषः स्यादन्यथा मरणम्भवेत् ॥ इतिमाण्डव्यः ॥
कर्णवेधनी । स्त्री । हस्तिकर्णवेधनास्त्री । कर्णारायाम् ॥ इतिशब्दरत्नावलिशेषः ॥
कर्णवेष्टः । पुं । कर्णवेष्टकम् । न । कर्णवेष्टनम् । न । कुण्डले ॥ कर्णस्य वेष्टनम् ॥
कर्णशष्कुली । स्त्री । वेष्टने । कर्णगोलके ॥ कर्णमध्यवर्त्यवकाशे ॥
कर्णशूलः । पुं । कर्णरोगविशेषे ॥
कर्णसंस्रावः । पुं । कर्णरोगविशेषे ॥ तस्य निदानसम्प्राप्तिरूपाणि यथा ।
शिरोभिघातादथवा निमज्जतोज[illegible]लेप्रपाकादथवापि विद्रधेः । स्रवे

कर्णि

दिपूयं श्रवणोऽनिलाद्दितःसकर्णसंस्राव इति प्रकीर्त्तित इतिमाधवः ॥
कर्णस्फोटा । स्त्री । कानफाटा इतिगौ॥ ङ भाषा प्रसिद्धे लताविशेषे । कृष्ण[illegible]तण्डुलायाम् ॥
कर्णाटः । पुं । देशविशेषे ॥ यथा । रा[illegible]मनाथं समारभ्य श्रीरङ्गान्तं विले[illegible]श्वरि । कर्णाटदेशो देवेशि सीमा[illegible]ज्यभोगदायकः ॥ इतिशक्तिसङ्गम[illegible]तन्त्रम् ॥
कर्णाटी । स्त्री । रागिणीविशेषे । मालवरागस्त्रीनायाम् ॥ हंसमदीवृत्ते ॥
कर्णानुजः । पुं । युधिष्ठिरे । अर्जुनेतथा । कर्णस्य अनुजः ॥
कर्णान्दुः । स्त्री । कर्णपाल्याम् । कानमण्डा इतिभाषा ॥ वर्त्तुलिकायाम् । कानकेडा इतिगौडभाषा[illegible]प्रसिद्धे कर्णाभरणविशेषे ॥
कर्णान्दूः । स्त्री । कर्णपाल्याम् ॥
कर्णाभरणकः । पुं । आरग्वधवृक्षे ॥
कर्णारी । स्त्री । नाड्याम् । कर्णवेधन्याम् ॥
कर्णारिः । पुं । अर्जुनपाण्डवे ॥ नदीसर्जवृक्षे ॥
कर्णास्फालः । पुं । करिणः कर्णचालने । भल्लजभल्लातायाम् ॥
कर्णिः । पुं । कर्णीकारफलके बाणे ॥

कर्णी

कर्णिकः । त्रि । कर्णिले ॥ विवृद्धौ कर्णौ वस्य । तुन्दादिषु । स्वाङ्गादिवृद्धौ विति ठक् ॥

कर्णिका । स्त्री । करिहस्ताग्रे । पुष्करे ॥ करमध्या ङ्गुली ॥ क्रमुकादिच्छटा-भेदे । नोंटा इतिगौड भाषा ॥ अज्ञ वरोटे । बीजकोषे ॥ कर्णाभरण विशेषे । तालपत्रे । ढेढी । इतिभा ॥ लेखन्याम् ॥ कुट्टन्याम् ॥ अग्नि मन्थदण्डे ॥ अजशृङ्गीवृक्षे ॥ कर्ण स्या लङ्कारः कर्णेभवो लङ्कारो वा । कर्णललाटादितिकन् ॥

कर्णिकाचलः । पुं । सुमेरुपर्वते ॥

कर्णिकाद्रिः । पुं ।

कर्णिकारः । पुं । आरग्वधविशेषे । प्रय हे । कृतमालके । ढोटा धनवहेडा इतिभाषा ॥ कर्णिकारः कटुस्तिक स्तुवरः शोधनो लघुः । रक्तनः सुख दः शोथश्लेष्मास्रव्रणकुष्ठजित् ॥ द्रुमोत्पले । कणियार इतिगौडभा षा ॥ कर्णिकाग्निपर्णि । कृगतौ । कर्मण्यण् ॥

कर्णिकारकः । पुं । द्रुमोत्पले ॥ कृत माले । सुवर्णके ॥ स्वार्थे कः ॥

कर्णिकी । पुं । हस्तिनि ॥ न । अम्बुजे ॥ कर्णिका अस्ति अस्य । ग्रौ° इनिः ॥

कर्णी । पुं । कर्मभर्यन्तसप्तकान्तर्गतपर्व

कर्णेजप

तविशेषे ॥ आरग्वधे ॥ कर्णिके ॥ विवृद्धौ कर्णौ वस्य । तुन्दादिभ्यश्च इति अकारादिनिः ॥

कर्णिलः । पुं । कर्णिनि । कर्णिके ॥ वि वृद्धौ कर्णौ वस्य । तुन्दादित्वात् पचे इलच् ॥

कर्णीरथः । पुं । स्कन्धवाह्ये याने । प्रव हणे । खर्खरिया चौपाया डोला पौनस पालकी तानयान इत्यादि भाषा प्रसिद्धे ॥ कर्णसाध्यो व्रण क्रिया उपचारात् कर्णः । कर्णोऽस्या स्ति । इनिः । कर्णीचासौरथश्च । शब्दमात्रेणरथो नवस्तुतोरथः ॥ य द्वा । सामीप्यात्कर्णशब्देन स्कन्धोल क्ष्यते । सोऽस्यास्ति वाहकत्वेन । इनि रित्यौणादिकः । कर्णीचासौरथश्च । अन्येषाम पीतिदीर्घः ॥

कर्णीमान् । पुं । आरग्वधे ॥

कर्णीसुतः । पुं । कंसासुरे । मूलदेवे ॥

कर्णेजपः । त्रि । सूचके । पिशुने । दु र्जने । खले ॥ कर्णे जपति । जप° । सप्तम्यकर्णेरित्यम् । कृत्यदृन्ना दित्वं खुक् ॥

कर्णेन्दुः । पुं । उत्तरचित्रिकायाम् । अर्द्ध चन्द्राकृतिकर्णा भरणे ॥ कर्णयास्त्या म् ॥

कर्णेम् । त्रि । कर्णहिते ॥ कर्णेनेहितं

क्र० शरीरावयवाद्यत् ॥ कर्त्तनम् । न० छेदने ॥ नारीणां स्तन निर्म्मितौ । कातना इतिभाषा ॥ कृ ती० । ल्युट् ॥ कर्त्तरी । स्त्री० । कृपाणयाम् ॥ पत्रीकृत स्वर्णादेः कर्त्तनोपाये । कात कातरी इतिभाषा ॥ नापितोपकरणविशेषे । कैंची इतिभाषा ॥ योगविशेषे ॥ यथा । क्रूरमध्यगतश्चन्द्रो लग्नंवा क्रूरमध्यगम् । कर्त्तरी नामयोगोयं कन्यानिधनकारक इति ॥ अपिच । लग्नात् पापाद्व्यत्वजूव्ययार्थस्थो यदातदा । कर्त्तरी नाम सा ज्ञेया सद्यो दारिद्र्यशोकदेति ॥ कृत्तति । कृती छेदने । याचुलकादरः । यद्वा । कर्त्तनम् । घञ् । कर्त्तं राति । रादाने । आतोनुपेतिकः । गौरा दित्वान्ङीप् ॥ कर्त्तव्यम् । त्रि । करणीये । करणयोग्ये । कार्य्ये ॥ यस्मिन् क्रियमाणे न दोष स्तत्कर्त्तव्यम् ॥ तव्यप्रत्ययः ॥ कर्त्ता । पुं । परमेष्ठिनि ॥ ज्वरनियन्त्रणे दाहे । कीर्य्यते विक्षिप्यते इतस्तत श्चाल्यते कार्य्यो येन । कृ विक्षेपे । ट च् ॥ त्रि । स्वतन्त्रः कर्त्तेतिनिरुपि तेपट्कारकान्तर्गतकारकविशेषे ॥ अ वोक्तार्थेप्रथमा अनुक्तार्थे तृतीयादि

भक्तिर्भवति । तस्यवचनम् । क्रियानुकूलकृतिमत्त्वं कर्त्तृत्वम् ॥ यः करोतिसः ॥ कृत्याश्रयः कर्त्तेति तार्किकाः ॥ चेतनान्तरव्यापाराव्यवधानेन धात्वर्थनिष्पादकश्चेतनः कर्त्ता । कर्म्मकरणादिकारकचक्रमयोक्तावा । इति प्रायश्चित्तविवेकः ॥ कृतिमति ॥ उत्पादके ॥ कारणानुकूलव्यापारवति । अनुष्ठातरि ॥ धानूपात्तव्यापाराश्रये ॥ क्रियायांस्वातन्त्र्येण विवक्षितेऽर्थे ॥ सतुपञ्चविधः । यथा । क्रियामुख्यो भवेत् कर्त्ता हेतुकर्त्ता प्रयोजकः । अनुमन्ता ग्रहीता च कर्त्तापञ्चविधः स्मृतइति ॥ स चविविधोपि भवति । यथा । विधेय चायते कर्त्ता विशेषेण प्रतिक्रियाम् । योग्यत्वप्रतिपित्सत्वविशेषणपदान्वयैः ॥ तस्यार्थः ॥ क्रियांप्रति प्रकारत्वेन कर्त्ता विधायतेतस्य विवरणम् । स्वाध्यायोऽध्येतव्य इत्यत्र योग्यत्वेन तव्यविधेयत्वेनार्थिकः । १ । अहरहर्दद्यात् दीक्षितो न ददातीत्यत्र प्रतिपित्सत्वेन दीक्षितेतरपरः । २ । स्वर्गकामोयजेतेत्यत्र विशेषणपदान्वयेन स्वर्गकामः कर्त्ता धायते । ३ ॥ अहङ्कारोमीत्याद्यभिमानवति ॥ ज्ञानशक्तिप्रधानपञ्चीकृतपञ्चम

कर्त्री

ज्ञेच्छाभूतकार्यो ऽहङ्कारो ऽन्तःकरणंवु द्धिर्विज्ञानेमित्यादिपर्यायशब्दवा च्यस्तादात्म्याध्यासेनात्मनि कर्त्तृत्वा दिधर्माध्यारोपहेतुः अनात्मा भौ तिको मायाकल्पितस्सः ॥ क्रियाश्र येत्तरकारकाप्रयोज्यत्वेसतिस्व कर्त्रंकारकीणांप्रयोक्तरि क्रियायां निर्वर्त्तके चिदचिन्निरूपे फलका मनावति पुरुषे ॥ सच सात्त्विकादि भेदात् त्रिविधउक्तोभगवता । तत्र सात्त्विको यथा । मुक्तसङ्गो ऽनहंवा दीधृत्युत्साहसमन्वितः सिद्ध्यसि द्ध्योर्निर्विकारः कर्त्तासात्त्विकउच्यते इति ॥ राजसोयथा । रागी कर्मफ लप्रेप्सुर्लुब्धोहिंसात्मको ऽशुचिः । ह र्षशोकान्वितः कर्त्ता राजसः परि कीर्त्तितः इति ॥ तामसोयथा । अ युक्तः प्राकृतः स्तब्धः शठोनैकृतिको लसः । विषादी दीर्घसूत्रीच कर्त्ता तामसउच्यते इति ॥ अन्तः करणो पहिते चिदाभासे ॥ करणोपहित त्वकर्तृत्वात् ॥ करोति । डुकृञ् । ल्ट् । ह्नया ॥

कर्त्तृका । स्त्री । क्षुद्रखड्गे ॥

कर्त्तृत्वम् । न । कर्त्तृधर्मे ॥ भावेकर्म णिघञ् ॥

कर्त्री ॥ स्त्री । कारिकायाम् ॥ करोति

कर्पटः

। डुकृञ् । खुलृट्चाधितिदृच् । कृत्येभ्योङीप् ॥ छुरिकायाम् ॥

कर्दः । पुं । न । कर्दमे ॥ कर्दति । कर्द क्रीडास्तिते शब्दे । पचाद्यच् ॥

कर्दटः । पुं । करहाटे ॥ पङ्के ॥ प्रङ्कारे ॥

कर्दनम् । न । कुत्सितशब्दे ॥

कर्दमः । पुं । ब्रह्मणश्छायाया मुत्पन्ने प्र जापतिविशेषे । कर्दिलमुनेर्जनके । पा मे ॥ पङ्के ॥ कीच कादा इतिभाषा ॥ नि । मांसे ॥ कर्दति । कर्द । क स्किर्दीरम ॥ वि । कर्दमवति ॥ अर्श॰ अच् ॥

कर्दमकः । पुं । गालिविशेषे ॥

कर्दमाटकः । पुं । विटादिनिचेपस्थाने । उत्पादः । भा॰ ॥ इतिशब्दरत्नावली ॥

कर्दमी । स्त्री । मुद्गरे । मोगरा इति भाषाप्रसिद्धे पुष्पे ॥ इतिवैद्यकम् ॥

कर्पटः । पुं । न । लक्षके । जीर्णवस्त्रे । खप्पा इतिभाषा ॥ प्रस्थेदादिमार्ज नार्थं हस्तास्यवस्त्रखण्डे । द्रव्यं येन पूयते तत्रूढौ लक्षाकर्पटशब्दौ तत्तुल्येवस्त्रेपिवर्त्तते इति स्वामी । मुकुटस्तु मलिनत्वादिदुष्टजीर्णवस्त्र खण्डेवर्त्तते इत्याह ॥ किरति कृ णाति वा । कृविक्षेपे कृहिंसायां वा । करोति वा । विच् । कर्चासौ पट श्च ॥ यद्वा कर्त्र्यपटः । शकंध्वादिः ॥

कर्पासः

पर्वतविशेषे ॥ ... । ... । ... कर्पटधारी । त्रि । मलिनजीर्णवस्त्रधारिणि भिक्षुके ॥ ... । कर्पटिकः । त्रि । कर्पटान्वितेत्यर्थे । कर्पटी । त्रि । कर्पटान्विते ॥ मं० इनिः ॥ कर्परः । पुं । मूर्द्धास्थिनि । कपाले । खोपरी इति भाषा । शस्त्रविशेषे ॥ कटाहे ॥ कल्पतेऽनेन कृपू सामर्थ्ये । वाहुलकादरः । लत्वाभावश्च ॥ कर्परांशुः ॥ पुं । स्फटिकपाषाणखण्डे ॥ कर्पराली । पुं । अचोटे । कन्दरालेः ॥ कर्परम् । अलसी । अलभू० । क्लमे रण् ॥ ... कर्परिकातुल्यम् । न । तुत्थविशेषे । कर्पर्यम् ॥ गुडूचीयोगजाञ्जने ॥ कर्परी । स्त्री । दार्विकायाम् । काथोद्भवतुत्थे । दारुहरिद्रायाः काथस्य तुत्थे । आवर्त्तननिष्पन्ने कृत्रिमरसाञ्जने । कल्पते । कृपू० । वाहुलकादरट् । लत्वाभावश्च । टित्त्वान्ङीप् ॥ कर्परीतुत्थकम् । न । रसके । खपरिया खोंया इति ख्याते ॥ कर्परीतुत्थकं तुत्थादन्यत् तद्रसकं स्मृतम् । ये गुणास्तुत्थके प्रोक्तास्ते गुणा रसके स्मृताः ॥ कर्पासः । पुं । नानुष्ठिकेयाम् । वस्त्रयो-

कर्पूरः

नौ ॥ क्रियते । डुकृञ्० । कृञः पासः ॥ कर्पासफलम् । न । कार्पासे ॥ विनौ ला इतिभाषा ॥ कर्पासफलमित्यु क्तं कषायं मधुरं गुरु । वातश्लेष्महरं रुच्यं विशेषेणास्रवर्द्धनम् ॥ कर्पासी । स्त्री । कार्पास्याम् । कर्पास काद्वच इति भाषा ॥ कर्पासात् जातित्वात् गौरादित्वाद्वा ङीष् ॥ कर्पूरः ॥ पुं । न । घनसारे । चन्द्रसंज्ञे । सितास्रे । कपूर इति भाषा ॥ कर्पूरः शीतलो वृष्यश्चक्ष्यस्तीक्ष्णो लघुः सुरभिर्मधुरस्तिक्तः कफपित्त विषापहः ॥ दाहतृष्णास्रवैरस्यमेदोदौर्गन्ध्यनाशनः ॥ कर्पूरो द्विविधः प्रोक्तः पक्वापक्वप्रभेदतः । पक्वात् कर्पूरतः प्राहुरपक्वं गुणवत्तरम् ॥ अपिच । कर्पूरो नूतनस्तिक्तः स्निग्धश्चोष्णस्तदाहदः । चिरस्थो दाहशोषघ्नः सधौतः शुभकृत् परः ॥ पोतासभीमसेनाद्या अस्य भेदा भवन्ति । तेषभीमसेने द्रष्टव्याः ॥ किरति कृणाति वा । करति, करोति वा । ह्रविक्षेपे हिंसायां वा । कृञ्० डुकृञ्० वा । विच् । पूर्यते पूरी० । इगुपधेति कः । कर्चासौ मूरश्च ॥ युड्वा । कल्पते । कृपू० । रक० ऊरः । वाहुलकाल्लत्वा भा-

कर्व्वरः
वेा वा ॥
कर्पूरकः । पुं । कर्पूरे ॥ कर्व्वूरके । क
र्व्वूरके ॥
कर्पूरतिलका । स्त्री । उमायाः सखी
भेदे । जयायाम् ॥
कर्पूरतैलम् । न । कर्पूरस्नेहे । हिमते
ले ॥
कर्पूरनालिका । स्त्री । कपूरनारीति
ख्याते पक्वान्नविशेषे ॥ यथा । घृता
क्तया समितया कृत्वा लम्बपुटंततः
। लवङ्गोषणकर्पूरयुतया सितया-
न्वितम् ॥ पचेद्दाज्येन सिद्धैषा ज्ञेया
कर्पूरनालिका । संधावसदृशीज्ञेया
गुणैः कर्पूरनालिका ॥
कर्पूरमणिः । पुं । पाषाणप्रभेदे । क
र्पूराश्मनि ॥ कर्पूरमणिनामार्य युक्ता
वातादिदोषनुत् ॥
कर्पूररसः । पुं । रसकर्पूरे ॥
कर्पूरवल्लिका । स्त्री । कपूरछल्लीति
ख्यातायाम् । सर्वकण्डूविनाशि-
न्याम् ॥
कर्पूराश्मा । पुं । उपरत्नविशेषे । कपूर
चीनियेति ख्याते ॥
कर्फरः । पुं । दर्पणे ॥ इतिजटाधरः ॥
कर्बरः । पुं । व्याघ्रे ॥ रक्तवि ॥ कृणा
ति । कृञ्चिं । कृगृमृवृङ्चतिभ्यः
वरच् ॥

कर्म्मक
कर्व्वरी । स्त्री । शिवायाम् ॥ पिच्चान्
। ङीष् ॥
कर्व्वुदारः । पुं । कोविदारे ॥ नोखभि
धटयाम् ॥ खेतकाञ्चने ॥
कर्व्वुदारकः । पुं । क्षेमातकवृक्षे ॥
कर्व्वुरः । पुं । पापे ॥ राक्षसे ॥ नानाव
र्णे । चित्रे । किर्म्मीरे ॥ नंदीनिम्बा
वधान्ये ॥ न । जले ॥ काञ्चने ॥ धु
स्तूरवृक्षे ॥ वि । चित्रवर्णवति ॥ क
र्वति ॥ कर्वंचिं । कर्वंक्यनेन वा ।
कर्वंगतौ वा । ओषधेोषधः । मह
रादयश्चेति उरच् ॥ कर्व्वुरोवर्णेन
वा । वयोरभेदादन्तस्थमध्योपि ॥
कर्व्वुरफलः । पुं । साकुरण्डवृक्षे ॥
कर्व्वुरा । स्त्री । कृष्णदन्तायाम् । पोर
ल इति गौड भोषाप्रसिद्धे वृक्षे ॥
वर्व्वरायाम् । वायुदृतुलसी इति गौ
ड भाषा ॥ उरजन्ता ङीष् ॥
कर्व्वुरी । स्त्री । दुर्गायाम् ॥ इतिशब्दा
वडशेषः ॥
कर्व्वूरः । पुं । शय्याम् ॥ द्राविडके । क
शोहलदो इतिभाषा ॥ राक्षसे ॥
न । स्वर्णे ॥ हरितालेवि । चि
चिते ॥ कर्वति । कर्वंगतौ । खर्जा
दित्वादूरः ॥
कर्व्वूरकः । पुं । कर्व्वूरार्थे ॥ स्वार्थेकः ॥
कर्म्मकरः । पुं । कीनाशे । यमे ॥ वि ।

कर्म्मकी

भृत्ये ॥ वेतनाजीविनि । भरण्यभुजि । मूल्येन कर्म्मकुर्व्वति । कर्मेरा इति भाषा ॥ कर्म्म करोति । कृञ्° । कर्म्मणिभृताविति टः ॥

कर्म्मकरी । स्त्री । मूर्व्वालतायाम् ॥ विस्मिकालतायाम् ॥ मूल्येन कर्म्मकुर्व्वत्याम् । दास्याम् ॥ टित्त्वात् ङीप् ॥

कर्म्मकर्त्ता । पुं । कर्म्मात्मककर्त्तरि ॥ यथा । क्रियमाणस्तुयत् कर्म्म स्वयमेव प्रसिध्यति । सुकरैः स्वैर्गुणैः कर्त्तुः कर्म्मकर्त्तेति तद्विदुरिति ॥ त्रि । कर्म्मण. कर्त्तरि ॥

कर्म्मकाण्डः । पुं । यावज्जीवमग्निहोत्रं जुहुयादित्यादिरूपेण चित्तशोधके कर्म्मप्रतिपादके वेदभागे ॥ संसारफलके ज्योतिष्टोमादिकर्म्मकलापे ॥ कर्म्मणांसमूह. । दूर्व्वादित्व. काण्डः ॥

कर्म्मकारः । पुं । वर्णसङ्करजातिविशेषे । लोहकारे । लुहार इतिभाषा ॥ गोपालतन्त्रवाक्यात् वै कर्म्मकारोऽभूत सुत. । ब्रह्मवैवर्त्ते तु शूद्रायां विश्वकर्म्मणोजातइत्युक्तम् ॥ वृषे ॥ त्रि । भृतिंविना भारवहनादिकर्म्मकारके । बेगारी इतिभाषा ॥ कर्म्म करोति । कर्म्मण्येण् ॥

कर्म्मकोसिक. । पुं । रञ्जके ॥ इतित्रिका

कर्म्मण्य

ण्डशेष. ॥

कर्म्मक्षम. । पुं । अलङ्कर्म्मीणे । कर्म्म करणसमर्थे ॥ कर्म्मसु क्षम. । सप्तमीतियोगविभागात् समास. ॥

कर्म्मक्षेत्रम् । न । भारतवर्षे ॥

कर्म्मचोदना । स्त्री । कर्म्मविधयाप्रेरणायाम् ॥ कर्म्मक्रिया पुरुषव्यापाररूपाऽर्थभावना तद्विधयाचोदना प्रेरणा विधिरूपा शाब्दीभावनेत्यर्थः ॥

कर्म्मज. । पुं । कलियुगे ॥ स्वर्गादौ ॥ अदृष्टे ॥ वटद्रुमे ॥ त्रि । कर्म्मसम्भवे । कायिकवाचिकमानसकर्म्मोद्भवे ॥ कर्म्मणोजात. । जनी° । पञ्चम्यामजातावितिड. ॥

कर्म्मजगुण. । पुं । क्रियाजन्यगुणे ॥ स च संयोग. । विभाग. । वेग. । इति भाषापरिच्छेद. ॥

कर्म्मठ । त्रि । कर्म्मशूरे । प्रयत्नेन भारं कर्म्मसमापयति यः सतथोच्यते ॥ कर्म्मकुशले ॥ कर्म्मणि घटते । कर्म्मणिघटोऽठच् ॥

कर्म्मण्य. । त्रि । कर्म्मयोग्ये ॥ कर्म्मणि प्रवीणे ॥ कर्म्मणि साधु. । तत्रसाधुरितियत् ॥

कर्म्मण्यभुक् । त्रि । भरण्यभुजि । कर्म्मकारे । वेतनोपजीविनि ॥ कर्म्मण्यं वेतनं भुङ्क्ते । भुज° । क्विप् ॥

कर्म्म

कर्मण्या । स्त्री । वेतने । मूल्ये ॥ क
र्म्मणा सम्पद्यते । कर्मवेशाद्यत् ॥ क
र्मणि साधुर्वा । तत्रसाधुरितियत् ॥
कर्म्मदेवः । पुं । यज्ञेन स्वर्गं प्राप्ते ॥ य
था । ज्योतष्टोमादिना स्वर्गम्प्रा
साःसुःकर्मदेवताःइति॥अपिचाहुः
। अस्मिन्कल्पेऽश्वमेधादिकर्म कृत्वा
महत् पदम् । अवाप्याजानदे वैर्याः
पूज्यास्ताःकर्मदेवताः इति ॥
कर्म्मधारयः । पुं । समानाधिकरणे त
त् पुरुषे ॥
कर्म्म । न । क्रियायाम् । देहेन्द्रियादि
व्यापारे ॥ संयोगवियोगयो रसम
वायिकारणजातीयकर्मेति लक्षिता
क्रिया । उत्क्षेपणापक्षेपणाकुञ्च
नप्रसारणगमनानि पञ्चकर्माणिभ
वन्ति । नित्यनैमित्तिककाम्यप्राय
श्चित्तप्रतिषिद्धभेदाच्चापिपञ्चविधं भ
वति । तच्चचत्वारिधर्म्याणिअन्त्यमध
र्म्यमितिनिश्चयः ॥ निष्फलं क्लेशब
हुलंसन्दिग्धफलमेवच । न कर्मकु
र्यान्मतिमान् सदा वैरानुबन्धिच ॥
सञ्चितक्रियमाणप्रारब्धभेदात् क-
र्मत्रिविधं भवति ॥ कायिकवाचिक
मानसिकभेदात् पुनस्तत् त्रिविधं
भवति ॥ विधिप्रतिषेधसञ्चरं शा-
स्त्रप्रसिद्धं कर्म । तत्र नित्यनैमित्ति

कर्म्म

कप्रायश्चित्तभेदात् त्रिविधम्भवति
॥ यागदानहोमात्मकेवेदविहिते ॥
भूतभावोद्भवकरो विसर्गः कर्मसं-
ज्ञितः । भूतानां भवनधर्माणां सर्वे
षां स्थावरजङ्गमानां भावमुत्पत्ति
म् उद्भवं वृद्धिञ्चकरोति योविसर्ग
स्त्यागः तत्तच्छास्त्रविहितो यागदा
नहोमात्मकः सद्गुह कर्म संज्ञितः
॥ सात्त्विकादिभेदात् पुन स्तत्त्रि
विधम् । तत्रसात्त्विकं यथा । निय
तं सङ्गरहितमरागद्वेषतः कृतम् ।
अफल प्रेप्सुना कर्म यत् तत् सात्त्वि
कमुच्यते ॥ राज संयथा । यत्तुकामे
प्सुना कर्मसाहङ्कारेणवापुनः । क्रि
यते बहुलायासं तद्राजसमुदा हृत
म् ॥ तामसं यथा । अनुबन्धं क्षयं
हिंसा मनपेक्ष्यचपौरुषम् । मोहा
दारभ्यते कर्म यत् तत् तामस मुच्य
ते ॥ तत्तदर्थाभिमाननिमि
त्ते ऽन्तः करणबोधके । शास्त्रविहि
तक्रियाकलापे नित्यनैमित्तिक-
काम्यात्मके ॥ शुक्लं कृष्णंशुक्लकृष्ण
श्वेतत्रिविधभेदभिन्ने ॥ तत्त्रिविधं
जनमप्रयच्छति । तदाहु र्विश्वरू
पाचार्याः । शुभैरवाप्नोति देवत्वंनि
षिद्धैर्नारकीङ्गतिम् । उभाभ्यांपुण्य
पापाभ्यां मानुष्यं लभते ऽथवः ।

इति ॥ क्रियतेतत्तत्फलार्थिभिरिति कर्म । तच्चानादित्वम् आद्यकोटेरनुपलभ्यमानत्वात् । यतः शरीरवतः कर्मकरणम् तच्छरीरं कर्मारब्धम् । तान्यपिशरीरान्तरेण कृतानि । तच्चकर्मजमिति सोयं तृतीयः पाठः ॥ जन्मनिमित्ते अदृष्टविशेषे ॥ उक्तमवार्त्तिककारैः । नकर्मकारणं मुक्ते र्नाभिसन्धिफलैर्विना । कर्मभ्योजन्म नियतं जन्म चेन्निर्हेतिः कुतः । इति ॥ वासना कर्म विद्याच चयं जन्मप्रयोजकम् । उक्तं तच्च प्रधानत्वं कर्मणा श्रूयते पुनः ॥ उत्तमाधमदेहाख्यं वैषम्यं कर्मणा भवेत् । देहे विद्यावासनाभ्यां भवेद्भोगस्य कौशलम् ॥ कर्म साध्येयं कर्मव्यमिच्छताभ्युदयञ्चिरम् । पापन्तु सर्वदाहेयं दुःखेभ्यश्च स्वतामृषम् ॥ पूर्वकाण्डपरा इत्थं कर्मप्राधान्यमूचिरे । अथवेदान्त शास्त्रज्ञा प्राहुः कामप्रधानताम् ॥ पुमानादौ काममय एवभूत्वाथ कर्मकृत् । यतोयं कर्मणोहेतुः कामोनोस्य प्रधानता ॥ अकामस्य क्रिया काचिद्दृश्यते नेहकस्य चित् । यद्यद्धि कुरुते जन्तु तत्तत्कामस्यचेष्टितम् ॥ यत्तादिरूपं नित्यं कर्मविधा

। संस्कारकं विविदिषाजनकञ्च । तच्च विहितत्वमात्रबुद्ध्या क्रियमाणं संस्कारकम् । ईश्वरार्पणबुद्ध्या क्रियमाणं विविदिषाजनकम् । यत्करोषीत्यादि भगवद्वचनादितिविवेकः ॥ षटकारकान्तर्गतकारकविशेषे ॥ अचदितीया विभक्तिर्भवति । उक्ते कर्मणि प्रथमाभवति । धातूपात्तव्यापारजन्यफलाश्रयं कर्मेतितल्लक्षणम् । यत् क्रियते फलार्थिभिस्तत कर्मेति प्रसिद्धम् । करोतेर्निखिलक्रियावाचकत्वात कर्त्तुव्यापारैर्यत् साध्यते तदित्यर्थः । अतएव क्रियाव्याप्यं कर्मेति क्रमदीश्वरः । तच्चतुर्विधम् । निर्वर्त्त्यम् १ यथा घटं करोति पुत्रं प्रसूते ॥ विकार्यम् २ तच्चद्विविधम् । प्रकृतेरुच्छेदकम् प्रकृतेर्गुणान्तराधायकञ्च । आद्यं यथा काष्ठं भस्म करोति । अन्त्यं यथा । सुवर्णं कुण्डलं करोति । तथाचोक्तंभर्त्तृहरिणा । यदुत्पद्यते पूर्वं जन्मना यत् प्रकाशते । तन्निर्वर्त्त्यं विकार्यञ्चकर्मद्वेधा व्यवस्थितम् ॥ प्रकृत्युच्छेदसम्भूतं विकार्यं काष्ठभस्मवत् । अन्यद्गुणान्तरोत्पत्त्या सुवर्णादिविकारवत् ॥ प्राप्यम् ३ यथा ग्रामङ्गच्छति चन्द्रम् पश्यती

कर्म्मभू

त्यादि ॥ अनीप्सितञ्च ४ यथा पा
पं त्यजती त्यादि ॥ तस्माद्दशमभ
वने ॥ ज्ञानसाधनविशेषे ॥ यथाहुः
। कषायपक्वैकर्म्माणि ज्ञानञ्चपरमा
गतिः । कषाये कर्म्मभिः पक्वे ततो ज्ञा
नंप्रवर्त्तते इति ॥ क्रियते । फलार्थि
भिः । डुकृञ् । कृञो भावे कर्म
णिच सर्वधातुभ्योमनिन् इतिमनि
न् ॥ अर्च्चादिः ॥ आरभेतैव कर्मा
णि आत्मः आत्मः पुनः पुनः । कर्मा
रब्धारभमाणं हि पुरुषंश्रीर्निषेवते ॥

कर्म्मदी । पुं । भिक्षौ । परिव्राजि ॥
कर्मन्देन प्रोक्तम् भिक्षुसूत्र मधीते
। कर्मन्दकृशाश्वादिनिः ॥

कर्म्मफलम् । न । कर्मरङ्गफले ॥ कर्म
विपाके ॥ संसारे ॥ सर्वकर्म्मणाम्
फलं व्याकृतंसंसार एवेति भाष्यो
क्तेः ॥ कर्मण फलम् ॥

कर्म्मफलप्रेप्सु । वि । कर्मफलार्थिनि ॥

कर्म्मफलासङ्गः । वि । कर्मणि फलेच
आसङ्गः कर्त्तृत्वाभिमानो भोगाभि
लाषश्च यस्य तस्मिन् ॥

कर्म्मभू । स्त्री । आर्य्यावर्त्ते ॥ कृष्टभूमौ
। कर्म्मान्ते ॥

कर्म्मभूमि । स्त्री । आर्य्यावर्त्ते । पु
ण्यभूमौ ॥ अल्पकालिकयायुक्ता दृ
ष्टैव इति निर्भयाः । सर्वभक्षा नप

कर्म्मवि

ध्यन्ति कर्मभूमिमचेतसः ॥ कर्मणो
भूमिः ॥ भारतवर्षे ॥ यथा । तत्रापि
भारतं श्रेष्ठं जम्बुद्वीपे महामुने । य
तोहिकर्मभूरेषा अतोन्या भोगभूम
य इतिविष्णुपुराणम् ॥

कर्म्ममीमांसा । स्त्री । पूर्वमीमांसाया
म् । कर्मकाण्डवेदविचारग्रन्थे जैमि
निप्रणीते ॥

कर्म्ममूलम् । न । कुशे । दर्भे ॥ कर्म
णो हेतौ ॥ कर्मणो मूलम् ॥

कर्म्मयुगम् । न । कलियुगे ॥ इतिवि
काण्डशेषः ॥

कर्म्मयोगः । पुं । ईश्वरार्पणबुद्ध्या क्रिय
माणे फलाभिसन्धिरहिते तत्तद्वर्णा
श्रमोचिते वेदविहिते कर्मकलापे
सद्भावो ज्ञानसाधन भूते ॥ चित्त
शुद्धिजनके वैदिके कर्मणि ॥

कर्म्मरङ्गः । पुं । न । कमरङ्ग इति प्रसि
द्धे फलवृक्षे । पीतफले । कर्मारे ।
न्युब्जे ॥ कर्मरङ्गं त्रिदंशारिस्वादम्लं
कफवातहृत ॥

कर्म्मरी । स्त्री । वंशरोचनायाम् ॥

कर्म्मवज्रः । पुं । रुद्रे ॥ इतिमहाभा
रतम् ॥

कर्म्मवाटी । स्त्री । तिथौ ॥

कर्म्मविपाकः । पुं । कर्मजन्यफलस्य परि
पाके ॥ ज्ञातातपभृगुभरद्वाजोक्ते पाप

कर्म्मस

रोगप्रायश्चित्तानां विवरणग्रन्थे ॥

कर्म्मव्यतिहारः । पुं । क्रियाविनिमये ॥ परस्परकरणे ॥

कर्म्मशीलः । त्रि । कर्म्म । कर्म्मणि ॥ कर्मशील मस्य ॥

कर्म्मशूरः । त्रि । कर्मठे । प्रयत्नेन प्रारब्धकर्मपरिसमापके ॥ फलपर्य्यन्तकर्मकर्त्तरि ॥ कर्म्मणिशूरः । सप्तमी समासः ॥

कर्म्मशेषः । त्रि । उत्पाद्यविकार्य्याप्यसंस्कार्य्येषु पुरोडाशसोममन्त्रदीक्षादिषु ॥

कर्म्मसङ्गः । पुं । कर्मसुदृष्टादृष्टार्थेषु अहमिदङ्करोमि एतत् फलम्भोक्ष्ये इत्यभिनिवेशविशेषे ॥

कर्म्मसङ्गी । त्रि । श्रुतिस्मृतिविहितप्रतिषिद्धकर्मफलाधिकारिणि । कर्त्तृत्वाभिमानेन फलाभिसन्धिना च कर्मण्यभिनिविष्टे ॥

कर्म्मसङ्ग्रहः । पुं । कर्मसङ्गृह्यते सम्बध्यतेऽनेति व्युत्पत्त्या कर्मान्वये ॥ कर्मणः पुंव्यापाररूपस्य अर्थभावनायाः सङ्ग्रहे सङ्क्षेपे ॥

कर्म्मसचिवः । पुं । कर्मोपयुक्तसचिवे । धीसचिवातिरिक्ते मन्त्रिविशेषे ॥ कर्मणि सचिवः सहायः ॥

कर्म्मसन्न्यासिकः । पुं । यतौ । सन्न्यासिनि ॥

कर्म्मसन्न्यासी । पुं । यतौ ॥ द्विविधः कर्मसन्न्यासः फलसाधनभेदतः । फलाय ज्ञानिनस्त्यागो विद्यासेवार्थनसिद्धये ॥ फलवत् कर्मणोपित्याज्यत्वे कर्मण्येवाधिकारस्ते इत्यादिस्मृतिविरोध इत्याशङ्क्य तस्यावरक्तविषयत्वान्नैवमित्याह । अविशुद्धधियः कर्मण्यधिकारो विशुद्धधीः । सन्त्यां विविदिषोत्पत्तौ तदर्थंकर्मसन्न्यसेत् ॥ तदर्थंशुद्ध्यर्थम् ॥ कर्मणः सन्न्यासः कर्मसन्न्यासः । सोऽस्यास्ति । इनिः ॥ कर्मणा बध्यतेजन्तुर्विद्ययाचविमुच्यते । तस्मात् कर्म न कुर्वन्ति यतयः पारदर्शिनः ॥

कर्म्मसाक्षी । पुं । सूर्य्ये ॥ सूर्यादिनवसु ॥ सूर्यः सोमो यमः कालो महाभूतानि पञ्चच । एते शुभाशुभस्येह कर्मणो नव साक्षिणः ॥ कर्मणः साक्षी ॥

कर्म्मसिद्धिः । स्त्री । इष्टानिष्टलक्षणायां फलप्राप्तौ ॥

कर्म्माध्यक्षः । त्रि । क्रियासाक्षिणि ॥

कर्म्मान्तः । पुं । कर्मभुवि । कृष्टभूमौ ॥ इक्षुधान्यादिसङ्ग्रहस्थाने ॥ शुचौ नाकरकर्मान्ते इत्युक्तेः ॥ कर्मावसाने ॥ कर्मान्ते दासभृत्याश्चेत्युक्तेः ॥

कर्म्मान्तः

कर्म्मेन्द्रि

ले. ॥

कर्म्मारः । पुं । कर्मकारे । लोहकारे । लुहार इतिप्रसिद्धे जातिविशेषे ॥ वंशे । त्वचिसारे । बाँस इतिप्रसिद्धे वृक्षे ॥ कर्म्मरङ्गे । कमरख इतिभाषा ॥

कर्म्मार्हः । पुं । पुरुषे ॥ त्रि । क्रियायोग्ये ॥

कर्म्मौशीचः । पुं । अनडुद्धारे ॥

कर्म्मी । पुं । दक्षिणासहितज्योतिष्टोमादिकर्मानुष्ठायिनि । यजमाने । देवानामग्ने ॥ केवलकर्मीहि चन्द्रमण्डलाधिकारी परतन्त्रोदेवानामजभूतः इति श्रौतोप्रसिद्धिः ॥ त्रि । कर्मविशिष्टे ॥ कर्मास्ति अस्य । व्रीह्यादिनिः ॥

कर्म्मिष्ठः । त्रि । क्रियावति ॥

कर्म्मीरकः । पुं । शाखोटे ॥

कर्म्मेन्द्रियम् । न । कर्मसाधकेन्द्रिये । पाय्वादिपञ्चके व्यस्ते समस्तेच ॥ पायूपस्थम् पाणिपादौ वाक्चैवेन्द्रियसङ्ग्रहः । उत्सर्गानन्दनादानगत्या लापाच्च तत्क्रियाः ॥ वागादीनीन्द्रियाण्याकाशादीनां रजोंशेभ्यो व्यस्तेभ्यःपृथक्पृथक् क्रमेणोत्पद्यानिभवन्ति । यथोक्तं भागवते । तेषां रजोंशेभ्योतानि क्रमात् कर्म्मेन्द्रियाणिच ॥ प्रत्येकमिति ॥ कर्मसाधकमिन्द्रि

कर्षः

यञ्च कर्म्मेन्द्रियम् ॥ कर्म्मेन्द्रियदेवताः अग्नीन्द्रोपेन्द्रयमप्रजापतयः । कर्मेन्द्रियाणांवागादीनां क्रमेणाग्न्यादयो देवता भवन्ति ॥ कर्म्मेन्द्रियाणां विषयास्तु वचनादानगमनविसर्गानन्दाःक्रमेण वागादीनांविषयाः ॥

कर्व्वः । पुं । कामदेवे ॥ आखौ ॥ कृणाति । कृञ् हिंसायाम् । किरतिवा । कृविक्षेपे । कृगृशॄदृभ्योवः ॥

कर्व्वटः । पुं । न । दशतग्राममध्ये मनोरमस्थाने ॥ ग्रामशतस्थजनाःक्रयविक्रयादिना सेवादिना वा येनग्रामेण जीवन्ति तस्मिन् ॥ इति केचित् ॥ चतुःसमग्रामे ॥ चतुःसमेतग्रहस्थाने ॥ चतुःशतग्रामसङ्ग्रहस्थाने ॥ न । नगरे । पुरे ॥ ।

कर्व्वरः । पुं । राक्षसे ॥ भामे ॥ भेषजविशेषे ॥ व्याघ्रे ॥ कृणाति । कृञ्° । कृगृदृवनिभ्यः करच् ॥

कर्व्वरी । पुं । उमायाम् । शिवायाम् ॥ हिङ्गुपत्र्याम् ॥

कर्ष्यः । पुं । कार्ष्णरे । कचूर इतिभाषा ॥ इति राजनिर्घण्टः ॥

कर्षः । पुं । न । अर्चे । मापषोडशके माने । अशीतिरत्तिकासु ॥ भिषजां व्यवहारेतु कर्षः स्यात् तोलकद्वयम् । सुवर्णे । विडालपदके ॥ राज

कर्षूः
निर्वण्टकमते कर्षः स्याद्दशमाषकः
॥ पुं । कर्षणे ॥ विभीतक वृक्षे ॥
कर्षति । कृषविलेखने । पचाद्यच् ।
भावे घञ्वा ॥
कर्षकः । त्रि । क्षेत्राजीवे । कृषीवले ॥
आकर्षणकर्त्तरि ॥ पुं । अयस्कान्ते ॥
कर्षति । कृष° । ण्वुल् ॥
कर्षणम् । न । वैश्यवृत्तिविशेषे । कृषि
कर्मणि । खान्नखादिना भूमिखनने ।
खेती इतिभाषा ॥ आकर्षणे ॥ शो
षणे ॥ पीडने ॥ कृषेर्ल्युट् ॥
कर्षणी । स्त्री । चीरिणीवृक्षे ॥
कर्षफल । पुं । विभीतकवृक्षे । कलि-
द्रुमे ॥ कर्षम् फलमस्य ॥
कर्षफला । स्त्री । आमलक्याम् ॥
कर्षाङ्कम् । न । तोलकपरिमाणे ॥
कर्षिणी । स्त्री । कविकायाम् । अश्व
मुखबन्धनरज्जुस्थितलौहे ॥ चीरि
कावृक्षे ॥
कर्षितः । त्रि । पीडिते ॥ यथा । अध
र्मकर्षित. दृक्तिकर्षितऋति ॥
कर्षूः । पुं । करीषाग्नौ ॥ तृषाग्नौ ॥ वा
स्तूयाम् । जीविकायाम् ॥ क्षुधिवि
क्षेपे ॥ स्त्री । कुल्यायाम् ॥ कुल्यो
कीकसे ॥ नदीभावे ॥ दृष्टिखाते ।
चतुरङ्गुलखातविशेषे । कर्षणम् कृ
ष्यते कर्षति वा कृषवि° । कृषिच

कलघो
मितनिधनिसर्जिखर्जिम्य कः ॥
कर्हि । अ । कदा ॥ कस्मिन् काले । अ
नद्यतनेऽर्हिलन्यतरस्याम् ॥
कर्हिचित् । अ । कस्मिंश्चित्काले ॥ क
स्माच्चिदप्यवस्थायाम् । जातु ॥ क
र्हिच चित् चेति विग्रहः ॥
कलः । पुं । मधुरध्वनौ । अव्यक्त मधु
रध्वाने ॥ साधुवृत्ते ॥ न । शुक्ले । रे
तसि ॥ त्रि । अजीर्णे ॥ कडति माद्य
ति अनेन । कडमदे । हलश्चेति
घञ् । संज्ञापूर्वकत्वाद्वृद्ध्यभावः । ड
लयोरेकत्वम् ॥
कलकः । पुं । शकुलमत्स्ये ॥
कलकण्ठः । पुं । कलध्वाने ॥ हंसे ॥
पारावते ॥ पिके ॥ कलः कण्ठोऽस्य ।
कलकलः । पुं । कोलाहले । बहुभिः
कृते उच्चैः शब्दे ॥ यथा । विशाला
भ्यां माभ्यां किं सिद्ध नयनाभ्यां ख
लुफलं न याभ्यां मालीढा परमरम
णीया तव तनुः । अयहि न्यक्कारो ज
ननिमनुजस्यावणयोर्ययोर्नान्तर्या
न्तस्तव लहरिलीलाकलकल इति-
जगन्नयविशूली ॥ सर्ज्जनिर्यासे ॥
कलशब्दे । कलनम् । घञ् । संज्ञा
पूर्वकत्वाद्वृद्ध्यभावः । कलादपि
कच् ॥
कलघोषः । पुं । कोकिले ॥ कलो घो

कलङ्कः

पो यस्य ॥

कलङ्कः । पुं । अङ्के । चिह्ने ॥ अपवादे ॥ काखायसमले । लौहकिट्टे ॥ कम् ब्रह्माणं लङ्कयति हीनतां गमयति व्याप्नोति वा । लकि गतौ । कर्मण्यण् ॥ यद्वा । कलति । कलश्च व्दसंख्यानयोः । क्विप् । कल् चासौ वङ्कश्च ॥

कलङ्कलेखा । स्त्री । मालिन्यरेखायाम् ।

कलङ्कषः । पुं । सिंहे ॥

कलङ्कषा । स्त्री । करतायाम् ॥

कलङ्की । त्रि । अपवादग्रस्ते ॥ सचिह्ने ॥ लौहमलविशिष्टे ॥ मत्वर्थीय इनिः ॥

कलङ्करः । पुं । आवर्त्ते । जलभ्रमे ॥ इतिचिकाण्डशेषः ॥

कलञ्जः । पुं । सविषास्त्रेण क्षतयोर्मांसपचिणोः ॥ ताम्रकूटे । तामाकू सुरती इति भाषा ॥ यथा । विष्णुसिद्धान्तसारावल्यां वैद्यके । अथ धूमपर्णीधूमपानगुणाः । कलञ्जसंवेष्टन धूमपानात् स्याद्दन्तशुद्धिर्मुखरोगहानिः । कफप्रसेकज्वरहानिकृच्च गान्धर्वविद्याप्रवणैकसेव्यम् ॥ संज्ञा विशेषे ॥ यथा । सच्चाली प्रोच्यते गुच्छा सालिञ्जो रूपकं भवेत् । रूपकैर्दशभिः प्रोक्तः कलञ्जोनामनाकलनः

मत इतियुक्तिकल्पतरुः ॥

कलनूलिका । स्त्री । कामुकायाम् । वाल्किन्याम् । लक्ष्मिकायाम् ॥

कलत्रम् । न । श्रोणौ ॥ भार्य्यायाम् ॥ न्यपादीनां दुर्गस्थाने ॥ गडति गण्यते वा । गडसेचने । गडेरादेश्च क इति अत्रन् । डलयोरैक्यम् ॥ कलंचायते वा । चैङ् पालने । कः ॥ कडति कण्यते वा । कडशासने । वाहुलका दत्रन् ॥

कलधूतम् । न । रूप्ये ॥ इतिराजनिर्घण्टः ॥

कलधौतम् । न । स्वर्णे । हेम्नि ॥ रज्यते । रूप्ये ॥ पुं । कलध्वनौ ॥ कलोऽस्मलो धौतोऽस्य ॥

कलध्वनिः । पुं । पारावते ॥ पिके ॥ कोकिले ॥ मयूरे ॥ गम्भीरशब्दे ॥ कलोध्वनिर्यस्य । कर्मधारयो वा ॥

कलध्वानः । पुं । पारावते ॥ भरभृते ॥ वर्हिणि ॥ कलोध्वानोऽस्य ॥

कलनः । पुं । वेतसवृक्षे ॥ न । चिह्ने । लक्ष्मणि ॥ दोषे ॥ लङ्घने ॥ ग्रसने ॥ यथा । कलनात् सर्वभूतानां महाकालः प्रकीर्त्तितः । महाकालस्य कलनात् त्वमाद्याकालिकापरेति ॥ एकमासिकगर्भे ॥ गर्भे मिश्रिते शुक्रयोगिते । तत्तु एकरात्रे

कलमो

ण भवतीति श्रीभागवतम्॥ सङ् ख्याने। गणने॥ [illegible]
कलना। स्त्री। वञ्चनायाम्॥ गणना याम्॥ [illegible]
कलन्दरः। पुं। सङ्कीर्णजातिविशेषे। स तु लेटात्तीवरकन्यायां जातः। इति ब्रह्मवैवर्ते पुराणम्॥
कलन्दिका। स्त्री। सर्वविद्यायाम्॥ इति हेमचन्द्रः॥
कलन्धुः। स्त्री। पक्षशाकविशेषे। कुवकालुकायाम्॥ घोलिकायाम्॥
कलभः। पुं। पञ्चवर्षपर्यन्तेकरिशावके॥ इतिसुभूतिः॥ त्रिंशद्वर्षंस्तुकलभ इतिवैजयन्ती॥ अत्तूरदृचे॥
कलयति। कल विक्षेपे गतौ सङ् ख्याने वा। कलते वा। कलशब्दसङ्ख्यानयोः। हशूशलिकलिगर्दिभ्योऽच्। कलेभाषते वा। भाषव्यक्तायां वाचि। अन्येभ्योपीतिडः॥
कलभयल्लभः। पुं। पीलुवृक्षे॥
कलभी। स्त्री। चञ्चुवृक्षे॥
कलभैरवः। वि। मधुरभीषणे॥
कलमः। पुं। लेखन्याम्। वर्णतूल्याम्॥ शालिधान्यप्रभेदे॥ चौरे। पाटच्चरे॥ कलते। कल शब्० कलिकर्यो रमः।
कलमोत्तमः। पुं। गन्धशालौ॥

कलर

कलम्बः। पुं। नालिकाशाके॥ पूषन्। के। शरे॥ कल्यते। कल विक्षेपे। डलयोरेकत्वात्। कृकदिकडिकटिमियोम्बजिक्षम्बच्॥ कदम्बे। नीपपादपे॥ कडम्बे। शाकनाड्याम्॥ कडति। कडमर्दे। अम्बच्॥ केन लम्बतेवा। लबिअवंसने। पचाद्यच्॥
कलम्बकः। पुं। कलम्बार्थे॥ घोराकदम्बे॥
कलम्बिका। स्त्री। कलम्बीशाके। नालीइतिभाषा॥ ग्रीवापश्चान्नाड्याम्॥ मन्यायाम्॥ इति हेमचन्द्रः॥
कलम्बी। स्त्री। जलजलताशाकविशेषे। कलम्बिकायाम्। कलमीशाक इतिगौडभाषा। करेंटु इतिभाषा॥ कडति। कडा मदे। कृकदीच्यम्बच्। डलयोरेकत्वम्॥ केन लेन लम्बते वा। लबि० अच्। गौरादित्वान्ङीष्। कलम्बी सन्मदा प्रोक्ता मधुरा शुक्रकारिणी॥
कलम्बुः। पुं। कलम्बिकायाम्॥
कलम्बुटम्। न। नवनीते। हैयङ्गवीने॥ इतिशब्दावली॥
कलम्बूः। स्त्री। कलंब्याम्। करेंटु इति प्रसिद्धेशाके॥
कलरवः। पुं। कपोते। पारावते॥ कोकिले॥ कलध्वनौ॥ वि। कल

कलसः

ध्वनिविशिष्टेः॥ कलो रवोऽस्य॥ कलल्लः। पुं। न। गर्भवेष्टनचर्मणि। जरायौ॥ कलने। शुक्रशोणितस्य श्लेष्मणि॥ कल्यते। कलसड्ख्याने। वृषादिभ्यश्चित्। इतिअकः॥ कलला। पुं। रोगे। सालनिर्य्यासे॥ कलखोड्डवः। पुं। सालवृक्षे॥ कलविङ्कः। पुं। षट्के। कलिङ्गकङ्के। इन्द्रयवे॥ कलं बङ्गतेऽव्यक्तं गतौ॥ अण्। पृषो॰॥ कलमः। पुं। न। घटे। कूटे। कलसइति भाषा॥ कलं अवति। शुद्धगतौ। अन्येभ्योपीतिड्॥ कलशिः। स्त्री। पृश्निपर्य्याम्। पिठरइति भाषा॥ चाकुलिया इतिगौडभाषा॥ गर्गर्याम्। अन्यपाचे॥ कलं श्यति। शोतनूकर्मणि। इन्। वा हुलकादाकारलोपः। कलशि मुद्गिरगुर्वीवल्लवालोडयन्तीतिमाघः॥ कलशी। स्त्री। पृश्निपर्य्याम्॥ गर्गर्याम्॥ जातिलक्षणोङीष्॥ कलसः। पुं॥ द्रोणपरिमाणे॥ त्रि। घटे॥ यथा। कलां कलां गृहीत्वा तु देवानांविश्वकर्मणा। निर्मितो यं सवै यस्मात् कलसस्तेन कथ्यत इति श्रीमहानिर्वाणतन्त्रम्॥ अपि च। सागरे मथ्यमाने तु पीयूषा

कलसं

र्थं सुरासुरैः। प्रीयूषधारणार्थाय निर्मितो विश्वकर्म्मणा॥ कलाः कलासु देवानामसिता स्ताः पृथक् पृथक्। यतः कृतास्तु कलसास्ततस्ते परिकीर्त्तिताः इत्यादि कालिकापुराणे ८७ अध्याये द्रष्टव्यम्॥ केन जलेन खसति। खसश्लेषणकीडनयोः। अच्। पचाद्यच्॥ कलसिः। स्त्री। पृश्निपर्य्याम्। गर्गर्याम्॥ कलसीसुतः। पुं। अगस्त्यमुनौ॥ कलसोदधिः। पुं। समुद्रे। कलस इव कुम्भइव उदधिः मन्थानाधारत्वात्॥ इतिमहाभारतम्॥ कलहः। पुं। खड्गकोषे॥ भण्डने॥ पुं न। युद्धे। समरे। लडाईइतिभाषा॥ पुं। राढे॥ कलस्य मधुरध्वनेर्हननम्। अन्येभ्योपीतिड्॥ कलहंसः। पुं। कादम्बे। सालिहाँस इतिगौडभाषाप्रसिद्धे हंसविशेषे। कलनादे॥ राजहंसे॥ त्रयोक्तमे॥ परात्मनि॥ त्रयोदशाक्षरावृत्ति प्रभेदे॥ सजसाः सगौचकथितः कलहंसः। इतिछं॰। यमुनाविहार कृतुके कलहंसो वर्त्तकामिनीकमलिनीकृतकेलिः। जनचित्तहारिकलकण्ठनिनादः प्रमुदं तनोतुतवन

दतनूजः ॥ अस्य सिंहनादस्तत्राप्य
स्ति ॥ कलोमधुरवाक्चंसः ॥
कलहनाशिनी । पुं । पूतिकरञ्जे ॥
कलहप्रियः । पुं ॥ नारदे ॥ इतिमहा
भारतम् ॥ [illegible]
कलहप्रिया । स्त्री । सारिकायाम् ॥
कलहान्तरिता । स्त्री । नायिकाभेदे ॥
अस्त्रीलक्षणं यथा । पतिमेवमन्य
पश्चात् परितप्ता । यथा । कोपात्
कान्तं पराणुद्य पश्चात् तापसमन्वि
तेति । कलहान्तरितेतिप्रोक्ता नायिका
नयशास्त्रविभिरिति ॥
कला । स्त्री । मूलधनवृद्धौ । हृद्द
तिभाषा ॥ गिल्याद्दा । अंशमाने ॥
चन्द्रस्यषोडशांशे ॥ कालमाने । चिं
शत्काष्ठात्मकेकाले ॥ क्षीरेजलसि
क्तायाम् ॥ कपटे । छद्मनि ॥
विभूतौ ॥ शक्तौ ॥ केसनीयाम् ॥
मरीचिपत्न्याम् । कर्दमात्मजायाम्
॥ राशेस्त्रिंशद्भागोऽशस्यषष्टिभागः
कलेतिज्योतिर्विदः । यथा । विकला
नां कलाषष्ट्या तत्षष्ट्याभाग उ
च्यते । तत्त्रिंशता भवेद्राशिर्भगणो
द्वादशैवते । इति ॥ अथगीतन्तोक्ता
श्चतुःषष्टिकला लिख्यन्ते ॥ गीतम्
१ । वाद्यम् २ । नृत्यम् ३ । नाट्य
म् ४ । आलेख्यम् ५ । विशेषकच्छे

द्यम् ६ । तण्डुलकुसुमवलिविकाराः
७ । पुष्पास्तरणम् ८ । दशनवसना
ङ्गरागाः ९ । मणिभूमिकाकर्म १० ।
शयनरचनम् ११ । उदकवाद्यम् १२
। उदकघातः १३ । चित्रायोगाः १४
। माल्यग्रथनविकल्पाः १५ । शेखरा
पीडयोजनम् १६ । नेपथ्ययोगाः
१७ । कर्णपत्रभङ्गाः १८ । गन्धयु
क्तिः १९ । भूषणयोजनम् २० । इ
न्द्रजालम् २१ । कौचुमारयोगाः
२२ । हस्तलाघवम् २३ । चित्रशाक
पूपभक्ष्यविकारक्रिया २४ । पान
कारसरागासवयोजनम् २५ । सूची
वामकर्माणि २६ । सूचकीडा २७ ।
प्रहेलिका २८ । प्रतिमाला २९ ।
दुर्वचकयोगाः ३० । पुस्तकवाचन
म् ३१ । नाटिकाख्यायिकादर्शनम्
३२ । काव्यसमस्यापूरणम् ३३ ।
पट्टिकावेत्रवाणविकल्पाः ३४ ।
तर्कुकर्माणि ३५ । तक्षणम् ३६ ।
वास्तुविद्या ३७ । रूप्यरत्नपरीक्षा
३८ । धातुवादः ३९ । मणिरागज्ञा
नम् ४० । आकरज्ञानम् ४१ । वृ
क्षायुर्वेदयोगाः ४२ । मेषकुक्कु
टलावकयुद्धविधिः ४३ । शुकसारि
काप्रलापनम् ४४ । उत्सादनम्
४५ । केशमार्जनकौशलम् ४६ । अ

कलाकू

चरमुष्टिकाकथनम् ४७ । म्लेच्छित कविकल्पाः ४८ । देशभाषाज्ञानम् ४९ । पुष्पशकटिकानिमित्तज्ञानम् ५० । अत्र निमित्तज्ञानमिति पृथक् केचित् पठन्ति ॥ यन्त्रमातृका ५१ । धारणमातृका ५२ । सम्पाठ्यम् ५३ । मानसीकाव्यक्रिया ५४ । क्रिया विकल्पाः ५५ । छलितकयोगाः ५६ । अभिधानकोषच्छन्दोज्ञानम् ५७ । वस्त्रगोपनानि ५८ । द्यूतविशेषः ५९ । आकर्षक्रीडा ६० । बालक्रीडनकानि ६१ । वैनायिकीनां विद्यानां ज्ञानम् ६२ । वैजयिकीनां विद्यानां ज्ञानम् ६३ । वैतालिकीनां विद्यानां ज्ञानम् ६४ ॥ इतिश्रीभागवतटीकायां श्रीधरस्वामिनः ॥ क्वचित् पुस्तके सूचीवापकर्मसूत्रक्रीडेत्ये कंपदम् । तदुत्तरं वीणाडमरुकवाद्यानि । वैतालिकीनामित्यत्र वैयासिकीनामितिच पाठो दृश्यते ॥ कलति कलयति कलते वा । कलशब्दस्य ख्यानयेः । पचाद्यच् ॥ कल्यते वा पुंसीतिघः ॥ यद्वा कंलाति । आनोनुपे तिकः ॥

कलाकूजम् । न । विषे ॥ इति राजनिर्घण्टः ॥

कलाप

कलाकेलिः । पुं । कामदेवे ॥ कलासु केलिर्यस्य ॥

कलाङ्कुरः । पुं । सारसे पक्षिणि ॥ कंसासुरे । मूलदेवे ॥

कलाचिका । स्त्री । प्रकोष्ठे । कफोणेरधोमणिबन्धपर्यन्ते । कलाई इति भाषे तिकश्चित् ॥ इति हेमचन्द्रः ॥ हारावल्यौ ॥

कलाजाजी । स्त्री । सुषव्याम् । कारव्याम् । कलौंजी मंगरैला इतिच ख्यातद्रव्ये ॥

कलादः । पुं । स्वर्णकारे ॥ कलामाद से । डुदाञ्० । मू० कः ॥

कलादकः । पुं । स्वर्णकारे ॥

कलानिधिः । पुं । चन्द्रे ॥ कला निधौ ॥ यन्तेऽत्र । डुधाञ्० । कर्मण्यधिकरणे चेति किः ॥

कलानुनादी । पुं । रोलम्बे । भ्रमरे ॥

कलविङ्कः ॥ कपिञ्जले ॥

कलान्तरम् । न । वृद्धौ । लाभे । खद इतिभाषा ॥

कलापः । पुं । संहतौ । समूहे ॥ मयूरपिच्छे । बर्हे ॥ काञ्च्याम् ॥ भूषणसामान्ये ॥ तूणे ॥ चन्द्रे ॥ विदग्धे ॥ कातन्त्रव्याकरणे ॥ ग्रामविशेषे ॥ यथा ॥ देवापि र्यौगमाख्या

कलायः

य कलापग्राममाश्रितः । सोमवंशे कलौनष्टे कृतादौ स्थापयिष्यति ॥ कलामाप्नोति । आप्नु॰ । कर्मण्यण् ॥ कलाश्राप्यतेऽनेन वा । हलश्चेति घञ् ।

कलापकः । पुं । हस्तिकण्ठबन्धे ॥ कलापार्थे ॥ स्वार्थेकः ॥ न । ऋणविशेषे ॥ यस्मिन् काले मयूरा कलापिनो भवन्ति सउपचारात् कलापी कलापिनि ङेयस्तृणम् । कलाप्यश्व त्थयवबुसादनः ॥

कलापी । पुं । प्रचटके ॥ वह्निशिखि । मयूरे ॥ कोकिले ॥ कलापोऽस्यास्ति । इनिः ॥

कलापिनी । स्त्री । रात्रौ ॥ नागरमुस्तायाम् ॥

कलापूर्णः । पुं । चन्द्रमसि ॥ कलाभिः पूर्णः ॥

कलाभृत् । पुं । चन्द्रे ॥

कलामकः । पुं । व्रीहिविशेषे । कलमधान्ये ॥

कलाम्बिका । स्त्री । अर्थानाम्प्रयोगे । ऋणदाने ॥ इतिचिकाण्डशेषः ॥

कलायः । पुं । सतीनके । हरेणौ । मटर इतिभाषा ॥ कलायखिकटः प्रोक्तः । कलायोमधुरः स्वादुः पाकेरुचश्शीतलः । कफपित्तहरो लघुः ॥ कलमयते । अय॰ । कर्मण्यण् ॥

कलायनः । पुं । नर्त्तकभाषे ॥

कलायशाकम् । न । कैराडशाक इति ख्याते ॥ कलायशाकं मेदि ख्यात्लघु तिक्तं त्रिदोषजित् ॥

कलाया । स्त्री । गण्डदूर्वायाम् ॥

कलालापः । पुं । भ्रमरे । चञ्चरीके ॥

कलावान् । पुं । विधौ । चन्द्रे ॥ त्रि । कलाविशिष्टे ॥

कलावती । स्त्री । तुम्बुरोर्गन्धर्वविशेषस्य वीणायाम् ॥ श्रीराधामातरि । हर्यभानुपत्न्याम् ॥ अप्सरोविशेषे ॥ आगमोक्तदीक्षाविशेषे ॥

कलाविकः । पुं । कुक्कुटे ॥

कलाविकलः । पुं । चटके ॥

कलाहकः । पुं । वाद्यविशेषे । काहलायाम् ॥

कलि । पुं । शूरे ॥ आजौयुधि ॥ कलहे ॥ विभीतकवृक्षे ॥ अन्त्ययुगे । तिष्ये । कलियुगे ॥ यत्र कान्तागिरो वेदा यत्र धर्मोर्थसाधनम् । यत्र स्वप्रतिभामानं तस्मै श्रीकलयेनमइति कलिविडम्बनम् ॥ अवयव्यौनाह्न । । देवरेणसुतोत्पत्तिर्वानप्रस्थाश्रमग्रहः । दत्ताचतायाः कन्यायाःपुनर्दानं परस्य च ॥ समुद्रयानस्वीकारः

कमण्डलुविधारणम् । महाप्रस्थान गमनं गोपशुश्च सुराग्रहः ॥ अग्नि होत्रहवन्याश्चले हो लीढापरिग्रहः । असवर्णासु कन्यासु विवाहश्च द्वि जातिषु ॥ वृत्तस्त्राध्यायसापेक्ष मघ सङ्कोचनंतथा । अस्थिसञ्चयनादूर्द्ध मङ्गस्पर्शनमेवच ॥ प्रायश्चित्तविधा नञ्च विप्राणां मरणान्तिकम् । संस र्गदोषः पापेषु मधुपर्के पशोर्वधः ॥ दत्तोरसेतरेषाञ्च पुत्रत्वेनपरिग्र हः । श्राभिचं चैवविप्राणां सोमवि क्रयणं तथा ॥ दीर्घकालं ब्रह्मच र्यं नरमेधाश्वमेधकौ । कलौयुगे त्विमान् धर्मान्वर्ज्यानाहुर्मनीषि णः ॥ * ॥ तेषुगधर्मो यथा । क लौतुधर्मपादानां तुर्योंशोऽधर्महे तुभिः ॥ एधमानैः क्षीयमाणोऽच न्ते सोपिविनङ्क्ष्यति ॥ तस्मिन् क्षुद्रादुराचारानिर्दयाः । शुल्कवैरि णः । दुर्भगा भूरितर्षाश्चशूद्रदासो त्तराः प्रजाः ॥ यदा नायान्ति तंतन्द्रा निद्राहिंसाविषादनम् । शोकमो हौभयंदैन्यंसकक्षिस्तामसः स्मृतः ॥ यस्मात् क्षुद्रशीलत्वाः क्षुद्रभा ग्यामकाशनाः । कामिनोवित्तहीनाश्चवैरिण्यश्च स्त्रियोऽसतीः ॥ द स्यूत्कृष्टा जनपदा वेदाः पाषण्डदूषि

ताः । राजानश्च प्रजाभक्ष्याः शिश्नो दरपराद्विजाः ॥ अव्रतावटवोऽशौ चाभिचवश्चकुटुम्बिनः । तपस्विनो ग्रामवासा न्यासिनोऽर्थलोलुपाः॥ ह्रस्वकाया महाहारा बह्वपत्याल्पयोग तद्विषः । शश्वत् कटुकभाषिण्यश्चौ र्यमायोरसाहसाः ॥ पणयिष्यन्ति वैचुक्राः किराटाः कूटकारिणः । अनापद्यपिमंस्यन्ते वार्त्तांसाधु जुगु प्सिताम् ॥ प्रतिग्रक्ष्यन्ति निर्द्रव्यं भृ त्याअप्यखिलोत्तमम् । भृत्यंविप क्षंपतयः कौलं गाश्चापयस्विनीः ॥ पितॄन् भ्रातॄन् सुहृज्ज्ञातीन् हि त्वासौरतसौहृदाः ॥ ननान्दृश्यांस संवादा दीनाः स्त्रैणाः कलौनराः ॥ शूद्राः प्रतिग्रहीष्यन्ति तपोवेशोपजी विनः । धर्मंवक्ष्यन्त्यधर्मज्ञा अधि रुह्योत्तमासनम् ॥ नित्यमुद्विग्नम नसो दुर्भिक्षकर कर्षिताः । निरन्ने भूतले राजन्नना वृष्टि भयातुराः॥ वासोन्नपानशयनव्यायक्षाभूषणैः । हीनाः पिशाचसन्दर्शा भविष्यन्ति कलौप्रजाः॥ कलौकाकिणके प्यर्थे विगृह्य त्यक्तसौहृदाः। त्यक्ष्यंति हि प्रियान् प्राणान् हनिष्यन्ति स्वकान पि॥ नरक्ष्यन्ति मनुजाः स्थविरौ पितरावपि । पुत्रान्भार्याश्चकुलजां

कलिः

चुद्राःशिश्नोदरम्भराः ॥ कलौनरा जन् जगतांपरं गुरुं त्रिलोकनाथा नतपादपङ्कजम् । प्रायेणमर्त्या भगवन्तमच्युतं यजन्त्यपाषण्डविभिन्नचेतसः ॥ * ॥ कलिकृतदोषवि नाशोपायो यथा ॥ यन्नामधेयंम्रि यमाण आतुरः पतन्स्खलन्वा विव शोगृणन् पुमान् । विमुक्तकर्मार्ग ल उत्तमांगतिं प्राप्नोति यज्ञन्तिन तं कलौजनाः ॥ पुंसांकलिकृतान् दोषान् द्रव्यदेशात्मसम्भवान् । सर्वा न्हरति चित्तस्थो भगवान् पुरुषो त्तमः ॥ श्रुतःसङ्कीर्त्तितो ध्यातःपू जितश्चादृतोपिवा । नृणांचिणो ति भगवान् हृत्स्थो जन्मायुतो ऽशु भम् ॥ यथा हेम्निस्थितो वह्निर्दुर्वं र्णंहन्ति धातुजम् । एवमात्मगतो विष्णुर्योगिना मशुभाशयम् ॥ विद्या तपः प्राणनिरोधमैत्रीतीर्थाभिषे कव्रतदानजप्यैः । नात्यन्तशुद्धिंल भतेयथात्मा यथा हृदिस्थे भगवत्य नन्ते ॥ तस्मात् सर्वात्मनाराजन् हृ दिस्थं कुरुवेशयम् । म्रियमाणोय वस्थित स्तेो याहि परांगतिम् ॥ कलेर्दोषनिधेराजन्नस्तिह्येकोम हान्गुणः । कीर्त्तनादेवकृष्णस्य मु क्तसङ्गः परं व्रजेत् ॥ कृते यद्ध्याय

कलिः

तोविष्णुंत्रेतायां यजतोमखैः । द्वाप रे परिचर्यायां कलौतद्धरिकीर्त्तना त् ॥ * ॥ तद्युगप्रेषधर्माः ॥ चौरा प्लवन्त्याभीराश्च शूरा अर्बुदमाल वाः । ब्राह्म्याद्विजाभविष्यन्ति शूद्र प्राया जनाधिपाः ॥ सिन्धोस्तटं च न्द्रभागां कान्तीं काश्मीरमण्डलम् । भोक्ष्यन्ति शूद्रा ब्राह्म्याया म्लेच्छा ब्रह्मवर्चसः ॥ तुल्यकालाइमेरा जन्म्लेच्छ प्रायाश्च भूभृतः । एतेऽध र्मान्व्रतपराः फल्गुदास्त्रीबमन्यवः ॥ स्त्रीबालगोद्विजघ्नाश्च परदारधना दृताः । उदितास्तमितप्रायाअल्प सत्त्वाऽल्पकायुषः ॥ असंस्कृताः क्रि याहीनारजसातमसावृताः । प्रजा म्लेच्छीभविष्यन्ति म्लेच्छराजन्यदु र्विणः ॥ जनतदाधास्तेपदा म्लेच्छी म्लेच्छाचारविदिनः । अन्योन्यतोराज भिश्चक्षयंयास्यन्ति पीडिताः ॥ तत श्चानुदिनं धर्मः सत्यंशौचंक्षमादा यां । कालेन बलिना राजन्नङ् क्षत्त्यायुर्बलं स्मृतिः ॥ वित्तमेवक लौनृणां जन्माचारगुणोदयः । धर्म न्याय व्यवस्थायां कारणं बलमेवहि ॥ दाम्पत्येभिरुचिर्हेतुर्मायैव व्या वहारिके । स्त्रीत्वे पुंस्त्वे च हिरति विप्रत्वे सूत्रमेवहि ॥ लिङ्गमेवा

अमख्यातावन्योन्यापत्तिकारणम्। अदत्त्वान्याय दौर्बल्यं पाखिड्यचेचापलंवचः ॥ अनाद्यतैवासाधुत्वे सा धुत्वेदम्भएवहि। स्वीकार एवचोद्दाहे स्नानमेव प्रसाधनम् ॥ दूरेवार्य यनंतीर्थं लावण्ये केशधारणम्। उदरम्भरता स्वार्थः सत्यत्वे धाष्टर्यमेवहि ॥ दाक्ष्ये कुटुम्बभरणं यशोर्थे धर्मसेवनम्। सर्वप्रजाभिर्दुष्टाभि राकीर्णेक्षितिमण्डले ॥ ब्रह्मविट्क्षत्रशूद्राणांयो वर्णो भविता खपः। प्राजापत्यैराजन्यैर्निघृणैर्दस्युधर्मिभिः ॥ आच्छिन्नदारद्रविणायास्यन्ति गिरिकाननम्। शाकमूलामिषक्षौद्र फलपुष्पाष्टि भोजनाः ॥ अनावृष्ट्याविनङ्क्ष्यन्ति दुर्भिक्षकरपीडिताः। शीतवाता तपप्रावृट्हिमैरन्योन्यतःप्रजाः ॥ क्षुत्तृड्भ्यांव्याधिभिश्चैव सन्तप्स्यन्ते चचिन्तया। विंशद्विंशतिवर्षाणि परमायुःकलौनृणाम् ॥ क्षीयमाणेषुदेहेषुदेहिनां कलिदोषतः। वर्णाश्रमवतां धर्मे नष्टेवेदपथे नृणाम् ॥ पाषण्ड प्रचुरे धर्मे दस्युप्रायेषुराजसु। चौर्यानृतवृथाहिंसानाना वृत्तिषुवैनृषु ॥ शूद्रप्रायेषुवर्णेषु छागप्रायासु धेनुषु। गृहप्रायेष्वाश्रमेषु यौन

प्रायेषुबन्धुषु ॥ अनुमायास्वोषधीषु शमीप्रायेषुस्थास्नुषु। विद्युत्प्रायेषुमेघेषुशून्यप्रायेषुसद्मसु। इत्थंकलौ गतप्राये जनेषुखरधर्मिषु। धर्मत्राणाय सत्त्वेन भगवानवतरिष्यति ॥ इतिश्रीभागवतम् ॥ * ॥ अत्र विशेषस्तु श्रीमहानिर्वाणतन्त्रे। तत्रश्रीमदाद्या प्रश्नः। आयाते पापिनिकलौ सर्वधर्मविलोपिनि। दुराचारे दुष्पूपच्चेदुष्टकर्मप्रवर्त्तके ॥ न वेदाः प्रभवन्तञ्च स्मृतीनां स्मरणं कुतः। नानेतिहासयुक्तानां नानामार्गप्रदर्शिनाम् ॥ बहुलानाम्पुराणानां विनाशोभविता विभो। तदालोकाभविष्यन्ति धर्मकर्मबहिर्मुखाः ॥ उच्छृङ्खलामदोन्मत्ताः पापकर्मरताः सदा। कामुकालोलुपाः क्रूरा निष्ठुरादुर्म्मुखाः शठाः ॥ स्वल्पायुर्मन्दमतयोरोगशोकसमाकुलाः। निःस्वाका निर्बलानीचा नीचाचारपरायणाः ॥ नीचसंसर्गनिरताः परवित्तापहारकाः। परनिन्दापरद्रोहपरोवादपराः खलाः ॥ परस्त्रीहरणे पापषण्डकाभयविवर्जिताः। निर्धनामखिनादीना दरिद्राश्चिररोगिणः ॥ विप्राः शूद्रसमाचाराः सन्ध्यावन्दनवर्जिताः।

कलिः

अयाज्ययाजकाः लुब्धा दुर्वृत्ताः पाप
कारिणः ॥ असत्यभाषिणो मूर्खा
दाम्भिका दुष्टपक्षकाः । कन्याविक्र
यिणो ब्राह्म्या स्तेयव्रतपराङ्मुखाः
॥ लोकप्रतारणार्थाय जपपूजापरा य
णाः । पाषण्डाः पण्डितम्मन्याः
शम्भुभक्तिविवर्जिताः ॥ कदाहाराः
कदाचाराः धूर्तकाः शूद्रसेवकाः । शू
द्रान्नभोजिनः क्रूराः शूद्रपत्नीरतिका-
मुकाः ॥ दास्यन्ति धनलोभेन स्वदा
रान्नीचजातिषु । ब्राह्मण्यचिह्नमे
तावत् केवलं सूत्रधारणम् ॥ नैव
पानादिनियमो भक्ष्याभक्ष्यविवेच
नम् । धर्मशास्त्रेसदा निन्दा साधुद्रो
हो निरन्तरम् ॥ सत्यशौचदयाक्षमा न्व
न तेषांमनसि क्वचित् । त्वयाकृता
नि तन्त्राणि जीवोद्धारणहेतवे ॥ नि
गमागमजातानि मुक्तिमुक्तिकरा-
णिच देवीनां यत्र देवानामन्त्रयन्त्रा
दिसाधनम् ॥ कथितानि च तेभ्यस्ता:
सृष्टिस्थित्यादिलक्षणाः । यद्यपद्मास
नादीनि गदितान्यपि भूरिशः ॥ पशु
वीरदिव्यभावा देवतामन्त्रसिद्धिदाः
। शवासनं चितारोहो मुण्डसाध
नमेव च ॥ सतासाधनकर्माणित्वयो
क्तानिसहस्रशः । पशुभावदिव्यभा
वोभयमेवनिवारितौ ॥ कलौ न प

कलिः

शुभावेस्ति दिव्यभावः कुतोभवेत्
तापिचांपुण्यं फलंतोयं स्वयमेवाचरेत
पशुः ॥ न शूद्रदर्शनं कुर्यान्मनसान
स्त्रियं स्मरेत् । दिव्यदेवताप्रायः
शुद्धान्तःकरणः सदा ॥ द्वन्द्वातीतो
वीतरागः सर्वभूतसमः शमी । क
लिकल्मषयुक्तानांसदा स्थिरचे
तसाम् । निद्रोलस्यप्रसक्तानां भाव
शुद्धिः कथंभवेत् ॥ वीरसाधनकर्मा
णि पञ्चतत्त्वोदितानिच । मद्यं मांसं
तथामत्स्यमुद्रामैथुनमेवच । एता
नि पञ्चतत्त्वानि त्वयाप्रोक्तानि शङ्क
र ॥ कलिजा मानवा लुब्धाः शिश्नो
दरपरायणाः । लोभात् तत्र प्रवर्तिष्य
न्ति न करिष्यन्ति साधनम् ॥ इन्द्रिया
णां सुखार्थाय पीत्वाचषडुरसम्बुधाः
भविष्यन्ति मदोन्मत्ता हिताहितवि
वर्जिताः ॥ परस्त्रीधर्षकाःकेचिद् द
स्यवो वधवो भुवि । न करिष्यन्ति ते
मन्त्राः पापयोनिविचारणम् ॥ अ
तिपानादिदोषेण रोगिणो वधवः
क्षितौ । शक्तिहीना बुद्धिहीना भूत्वा
चधिकलेन्द्रियाः ॥ द्वादशेवत्सरान्तरे
च प्रासादात् पर्वताटपि पतिष्यन्ति
मरिष्यन्ति मनुजामदविह्वलाः ॥
केचिद्विवादयिष्यन्ति गुरुभिः स्वज
नैरपि केचिन्मौनाश्रयाः परेव

कल्किः

हुजल्पकाः ॥ अकार्यकारिणः क्रूराधर्ममार्गविलोपकाः ॥ हिताय यानिकर्माणि कथितानि त्वयाप्रभो। मन्येतानि महादेवविपरीतानिमानवे ॥ केषायोगंकरिष्यन्ति न्यासजातानि केपिवा। स्तोत्रपाठंयन्त्रविधिंपुरश्चर्यां जगत्पते ॥ युगधर्मप्रभावेण स्वभावेन कलौनराः। भविष्यन्त्यतिदुर्वृत्ताः सर्वथापापकारिणः ॥ तेषामुपायं दीनेशकृपयाकथयप्रभो। आयुरारोग्यवर्द्धंबलवीर्यविवर्द्धनम् ॥ विद्याबुद्धिप्रदंनृणामप्रयत्नशुभंकरम्। येनलोकाभविष्यन्तिमहाबल पराक्रमाः ॥ शुद्धचित्ताः परहिता मातापितृप्रियङ्कराः। स्वदारनिष्ठाः पुरुषाः परस्त्रीपुरराङ्मुखाः ॥ देवतागुरुभक्ताश्च पुत्रस्वजनपोषकाः। ब्रह्मण्याब्रह्मविद्याश्च ब्रह्मचिन्तनमानसाः ॥ सिद्ध्यैलोकयात्रायाः कथयस्वहितायतत्। कर्त्तव्यंयदकर्त्तव्यंवर्णाश्रमविभेदतः ॥ विनात्वांसर्वलोकानांकस्त्राताभुवनत्रये ॥ इतिश्रीमहानिर्वाणतन्त्रे प्रथमोल्लासेजीवनिस्तारोपायप्रश्नः ॥ श्रुतिदेव्यावचः श्रुत्वागद्गदोलोकशङ्करः। कथयामास तत्त्वेनमहोकारुण्यवारिधिः ॥ श्रीसदाशिवउवाच ॥ साधुपृष्टंमहाभागे

कल्किः

जगतांहितकारिणि। एतादृशः शुभः प्रश्नोनकेनापिकृतःपुरा ॥ धन्यासि सुकृतज्ञासि हितासि कलिजन्मनाम्। यद्यदुर्त्तेत्वयाभद्रे सत्यंसत्यं यथार्थतः ॥ सर्वज्ञात्वंत्रिकालज्ञाधर्मज्ञापरमेश्वरि। भूतम्भवद्भविष्यञ्च धर्मसूक्ष्मत्वयाप्रिये ॥ यथातत्त्वंयथान्यायंयथायोग्यं न संशयः। कलिकल्मषदीनानां द्विजादीनांसुरेश्वरि ॥ मेध्यामेध्यविचाराणां न शुद्धिः श्रौतकर्मणा। न संहिताद्यैः स्मृतिभिरिष्टसिद्धिर्नृणांभवेत् ॥ सत्यं सत्यंपुनःसत्यं सत्यंसत्यंमयोच्यते। विनाह्यागममार्गेण कलौनास्ति गतिःप्रिये ॥ श्रुतिस्मृतिपुराणादौमयैवोक्तंपुराशिवे। आगमोक्तविधानेन कलौदेवान्यजेत्सुधीः ॥ कल्पागमसमुल्लङ्घ्यान्योन्यमार्गंप्रवर्त्तते। नतस्यगतिरस्तीतिसत्यंसत्यं नसंशयः ॥ सर्वैर्वेदैःपुराणैश्च स्मृतिभिः संहितादिभिः। प्रतिपाद्योस्मि नान्योस्ति प्रभुर्जगति मां विना ॥ आगमन्तिचते सर्वंमत्पदंलोकपावनम्। सन्मार्गविमुखांलोकाः पाषण्डा ब्रह्मघातिनः ॥ अतोमन्मतमुत्सृज्यये यत्कर्मसमाचरेत्। निष्फलंतद्भवेद्देवि बीजंविनाकृषी-

कलिः

भवेत् । मूढो मन्मतमुत्सृज्यान्यान्
न्मतमुपाश्रयेत् । ब्रह्महापितृहा
स्त्रीघ्नः सभवेन्नात्रसंशयः ॥ कलौ
तन्त्रोदितामन्त्राः सिद्धा स्तूर्णफल
प्रदाः। शस्ताःकर्म्मसुसर्वेषु जपय
ज्ञक्रियादिषु ॥ निर्वीर्याः श्रौतजा
तीयाविषहीनोरगादव । सत्या
देा सफला आसन् कलौतेमृतका
इव ॥ पञ्चालिका यथाभित्तौ सर्वे
न्द्रियसमन्विताः । अमूरशक्ताः का
र्य्येषुतथान्ये मन्त्रराशयः ॥ अन्यम
न्त्रैः कृतङ्कर्मधन्याखीसङ्गमो यथा
। नतत्फलसिद्धि स्याच्छ्रमएवहिके
वलम् ॥ कलौतन्त्रोदितैर्मार्गैःसिद्धि
मिच्छतियोनरः । तृषितोजाह्नवी
तीरेकूपंखनतिदुर्मतिः ॥ मद्वक्त्रादु
दितं धर्मंहित्वान्यद्धर्ममीहते । अ
मृतं स्वगृहेत्यक्त्वा क्षीरमार्कंसवा
ञ्छति ॥ नान्यःपन्था मुक्तिहेतुरि
हामुत्रसुखायये । यथा तन्त्रोदितो
मार्गोमोक्षायच सुखायच ॥ तन्त्रा
णिबहुधोक्तानिनानाख्यानान्विता
निच । सिद्धानां साधकानाञ्च
विधानानिचभूरिशः ॥ अधिकारिवि
भेदेनपशुवाहुख्यतः प्रिये । क्वा
चारोदितंधर्मंगुह्यंयंकथितंक्वचित्
॥ जीवप्रवृत्तिकारीणिकानिचित्क

कलिः

थितान्यपि। देवानानाविधाः प्रोक्ता
देव्योपिवहुधाः प्रिये ॥ भैरवाश्चैव
वेताला षट्का नायिकागणाः । शा
क्ताः शैवा वैष्णवाश्चसौरागाणपता
दयः ॥ नानामन्त्राश्चयन्त्राणि सिद्धोपा
यान्यनेकशः । भूरिप्रयाससाध्यानि
यथोक्त फलदानिच ॥ यथायथाकृ
ताः प्रश्ना येनयेन यदायदा। तदात
स्योपकारायतथैवोक्तमयाप्रिये ॥
सर्वलोकोपकारायसर्वप्राणिहिताय
च । युगधर्मानुसारेणयोधातव्येन
पार्वति ॥ त्वयायोट्कृतं प्रश्नोन
केनापिपुराकृत. । तेनक्लेशेनवच्या
मिसाराद्सारंपरात् परम् ॥ वेदा
नामागमानाञ्च तन्त्राणाञ्चविशेष
तः । सारमुद्धृत्यदेवेशितयाप्येकथ्य
तेमया ॥ यथानदीषुतन्त्राः सरि
तांजाह्नवीयथा । यथाहंविदिवेशा
नामागमानामिदंतथा ॥ किंवेदैः
किंपुराणैश्चकिंशास्त्रैर्वहुभिः शिवे ।
विज्ञातेस्मिन्महातन्त्रेसर्वसिद्धीश्व
रोभवेत् ॥ येतेजगन्मङ्गलायत्त्वया
हंविनियोजिता । अतस्तेकथयि
ष्यामियद्धितंकुरुतेवत ॥ कृते
विश्वहितेदेवि विश्वेश. परमेश्वर
। प्रीतोभवतिविश्वात्मायतोविश्वंत
दाश्रितम् ॥ सएकएवसद्रूपः सत्त्यो

कलिः

ऽद्वैतः परात्परः । स्वप्रकाशः सदा पूर्णः सच्चिदानन्दलक्षणः ॥ निर्विकारोनिराधारोनिर्विशेषो निराकुलः । गुणातीतः सर्वसाक्षीसर्वात्मा सर्वदृग्विभुः ॥ गूढः सर्वेषुभूतेषु सर्वव्यापीसनातनः । सर्वेन्द्रियगुणाभास. सर्वेन्द्रियविवर्जितः ॥ लोकातीतो लोकहेतु रवाङ्मनसगोचरः । सर्वेत्तिविश्वंसर्वज्ञस्तं नजानातिकश्चन ॥ तदधीनंजगत्सर्वं चैलोक्यं सचराचरम् । तदालम्बनतस्त्रिषेदंवितर्क्यमिदंजगत् ॥ तत्तत्त्वतामुपाश्रित्यसद्भावितृथक् पृथक् । तेनैवहेतुभूतेनवयंजातामहेश्वरि ॥ कारणं सर्वभूतानां सएकः परमेश्वरः । लोकेषु सृष्टिकरणात् स्रष्टाब्रह्मेतिगीयते ॥ विष्णुः पालयितादेविसंहर्ताऽन्तदिच्छया । इन्द्रादयोलोकपालाः सर्वेतद्वशवर्त्तिनः ॥ स्वेस्वेधिकारेनिरता स्तेशासंतितदाज्ञया । त्वम्पराप्रकृतिस्तस्यपूज्यासि भुवनत्रये ॥ तेनान्तर्यामिरूपेणतत्तद्विषययोजिताः । स्वस्वकर्मप्रकुर्वन्तिन स्वतन्त्रा. कदाचन ॥ यद्यद्याति यातोपिसूर्यस्तत्पतियद्यद्यात् । वर्धन्ति तेयदा कालेपुष्पन्तिरजोवने ॥ कालङ्कालयते का

कलिः

लेनैत्योर्मृत्युर्भियोभयम् । वेदानवेद्योभगवान् यज्ञेच्छव्दोपलक्षितः ॥ सर्वेदेवासदेव्यश्चतन्मायासुरवन्दिते । आब्रह्मस्तम्बपर्यन्तं जन्मयं सकलं जगत् ॥ तस्मिंस्तुष्टे जगत्तुष्टं प्रीणिते प्रीणितं जगत् । तदाराधनतोदेवि सर्वेषांप्रीणनं भवेत् ॥ तरोर्मूलाभिषेकेणयथातद्भुजपल्लवाः । तृप्यन्तितदनुष्ठानात्तथा सर्वे ऽमरादय. ॥ यथातत्पूजनाज्ज्ञानात् पूजनाज्जपनात्प्रिये । भवन्तितुष्टा. सुन्दर्यस्तथाजानीहिसुव्रते ॥ यथा गच्छन्तिसरितो ऽवशेनापिसरित्पतिम् । तथार्चादीनिकर्माणितदुद्देश्यानियान्ति ॥ योयोयान्यान्यदेवान्श्रद्धयायदादासये । तत्तद्दातिसोधत्तस्तैर्देवगणैःप्रिये ॥ बहुनात्रकिमुक्तेनतवाग्रेकथ्यतेप्रिये । ध्येयः पूज्यः सुखाराध्यस्तंविनानास्तिमुक्तये ॥ नायासेनोपवासस्य कायक्लेशोनविद्यते । नैवाचारादिनियमोनो मन्त्राश्च भूरिश. ॥ नदिक्कालविचारोस्ति न मुद्रान्यास संहति. । यस्साधनेकुलेशानितंविनाकोन्यमाश्रयेत ॥ ॥ इतिश्री महानिर्वाणतन्त्रे सर्वतन्त्रोत्तमोत्तमेसर्वधर्मनिर्णयसारे श्रीमदाद्या

कौलिः

सदाशिवसंवादेजीवन्निस्तारोपाय
प्रश्नोत्तरेपरब्रह्मोपासनेप्रक्रमोना
मद्वितीयोल्लासः॥ २॥ * ॥ हरौ
योल्लासेब्रह्मोपदेशकथनम्॥ कलौ
पापपङ्के घोरे तपोहीनेति दुस्तरे
निस्तारबीजमेतावद्ब्रह्मसन्ध्यसा
धनम्॥ साधनानिवक्ष्यन्ते नाना
तन्त्रागमादिषु॥ कलौद्विषज्जीवा
नांमसाध्यानिमहेश्वरि॥ अल्पायुषः
स्वल्पसत्ता अन्नाधीनासवःप्रिये॥ ल
घ्वीधनार्जनेऽशक्ताः सदाचञ्चलमान
साः॥ समाधावस्थिरधियोयोगक्लेशा
सहिष्णवः। तेषांहिताय मोक्षायब्र
ह्ममार्गोऽयमीरितः॥ कलौनास्त्येव
नास्त्येव सत्यंसत्यंमयोच्यते। ब्रह्मदी
क्षांविनादेवि कैवल्यंनसुखायचेति
॥ * ॥ श्रुत्वासम्यक् परब्रह्मोपासनं
परमेश्वरी। परमानन्दसन्दोहशङ्करं
परिपृच्छति॥ श्रीदेव्युवाच॥ कथि
तंत्वयानाथब्रह्मोपासनमुत्तमम्
सर्वलोकप्रियकरं साक्षाद्ब्रह्मपदप्रद
म्॥ तेजोबुद्धिबलैश्वर्यदायकंसुख
साधनम्। दृष्टास्मिजगदीशानत
ववाक्यामृतप्लुता॥ यदुक्तंकरुणासि
न्धोयथा ब्रह्मनिवेदनात्। गच्छन्ति
ब्रह्मसायुज्यंतथैवममसाधनात्॥ य
द्यहंदातुमिच्छामि मदीयंसाधनंपर

कौलिः

म्। ब्रह्मसायुज्यजननंत्वयाकथि
तंमम॥ विधानंकीदृशंतस्यसाध
नंकेनवर्त्मना। मन्त्रःकोवाऽविधि
स्तोऽथनपूजादिकश्चकिम्॥ सविशे
षंसावशेषमामूलाद्वक्तुमर्हसि। म
मप्रीतिकरंदेवलोकानांहितकार
कम्॥ कोऽन्योऽस्त्वामृतेशम्भोभव
व्याधिभिषग्गुरुः॥ इतिदेव्यावचः
श्रुत्वादेवदेवोमहेश्वरः। उवाच
परयाप्रीत्यापार्वतींपार्वतीपतिः
॥ श्रीसदाशिवउवाच॥ शृणुदेवि
महाभागेतवाराधनकारणम्। त
वसाधनतो येनब्रह्मसायुज्यमश्नु
ते॥ त्वंपराप्रकृतिःसाक्षाद्ब्रह्मणः
परमात्मनः। त्वत्तोजातंजगत्सर्वं
त्वंजगज्जननीशिवे॥ मत्कीटाद्यणु
पर्यन्तंयदेतत् सचराचरम्। त्वयै
वोत्पादितं भद्रेत्वदधीनमिदंजगत्
॥ त्वमाद्या सर्वविद्यानां सम्भावना
पि जन्मभूः। त्वंजानासिजगत्सर्वं
नत्वांजानातिकश्चन॥ त्वंकाली तारि
णी दुर्गा षोडशी भुवनेश्वरी। धू
मावतीत्वंबगलाभैरवी छिन्नमस्त
का॥ त्वं मातङ्गी वाग्देवीत्वंदेवि
कमलालया। सर्वशक्तिस्वरूपात्वंस
र्वदेवनमीतनूः॥ त्वमेवसूक्ष्मास्थू
लात्वंव्यक्ताव्यक्तस्वरूपिणी। नि

कलिः

राकारापि साकारा कस्त्वां वेदितुमर्हति॥ उपासकानां कार्यार्थं श्रेयसे जगतामपि॥ दानवानां विनाशाय धत्सेनानाविधास्तनूः॥ चतुर्भुजा त्वंद्विभुजाषड्भुजाष्टभुजातथा। त्वमेवविश्वरक्षार्थं नानाशस्त्रास्त्रधारिणी॥ तत्तद्रूपविभेदेन मन्त्रयन्त्रादिसाधनम्॥ कथितंसर्वतन्त्रेषु-भावाश्चकथितास्त्वयैः॥ पशुभावः कलौनास्ति दिव्यभावोपि दुर्लभः। वीरसाधनकर्म्माणिप्रत्यक्षाणि कलौयुगे॥ कुलाचारं विनादेवि कलौसिद्धिर्नजायते। तस्मात्सर्वप्रयत्नेनसाधयेत् कुलसाधनम्॥ कुलाचारेणदेवेशि ब्रह्मज्ञानं प्रजायते। ब्रह्मज्ञानयुतो मर्त्योजीवन्मुक्तोन संशयः॥ ज्ञानेनमेध्यमखिलममेध्यंज्ञानतोभवेत्। ब्रह्मज्ञानेसमुत्पन्नेमेध्यामेध्यंनविद्यते॥ योजानातिपरंब्रह्म सर्वव्यापिसनातनम्। किमस्यमेध्यं तस्याग्रेसर्वं ब्रह्मेति जानतः॥ त्वंसर्वरूपिणीदेविसर्वेषां जननीपरा। तुष्टायांत्वयिदेवेशि सर्वेषांतोषणम्भवेत्॥ हृष्टेरादौत्वमेकासीत् तमोरूपमगोचरम्। त्वत्तोजातंच गत्सर्वम्परब्रह्मस्वरूपया॥ महत्तत्त्वादिभूतान्तंत्वयाहृष्टमिदंजगत्। निमित्तमात्रंतद्ब्रह्म सर्वकारणकारणम्॥ सद्रूपंसर्वतोव्याप्यसर्वमावृत्यतिष्ठति। सदैकरूपंचिन्मात्रंनिर्लिप्तंसर्ववस्तुषु॥ नकरोतिनचाश्नातिन गच्छतिनतिष्ठति। सत्यं ज्ञानमनाद्यन्तमवाङ्मनसगोचरम्॥ तस्येच्छामात्रमात्रेण त्वंमहायोगिनीपरा॥ करोषिपासिहंस्यन्तेजगदेतच्चराचरम्॥ तवरूपंमहाकालोजगत्संहारकारकः। महासंहारसमयेकालः सर्वंग्रसिष्यति॥ कलनात्सर्वभूतानांमहाकालः प्रकीर्तितः। महाकालस्य कलनात्त्वमाद्याकालिकापरा॥ कालसंग्रसनात् कालीसर्वेषामादिरूपिणी। कालत्वादादिभूतत्वादाद्याकालीतिगीयते॥ पुनःस्वरूपमासाद्यतमोरूपंनिराकृतिः। वाचातीतंमनोगम्यंत्वमेकैवावशिष्यसे॥ साकारापि निराकारा मायया बहुरूपिणी। त्वंसर्वादिरनादिस्त्वंकर्त्रीहर्त्रीचपालिका॥ अतस्तेकथितंभद्रेब्रह्ममन्त्रेणदीक्षितः। यत्फलंसमवाप्नोतितत्फलंतवसाधनात्॥ नानाचारेणभावेन देशकालाधिकारिणाम्। विभेदात्कथितं भद्रेकुत्रचित्तुससाधनम्॥ येयजन्तिमहाकालीं कृतामर्त्यास्तेतत्फलभागिनः। म

कलिः

विष्यन्ति तरिष्यन्ति मानुषा गतकिल्बिषाः ॥ बहुजन्मार्जितैः पुण्यैः कुलाचारेमतिर्भवेत् । कुलाचारेणपूतात्मासाचाच्छिवसमोभवेत् ॥ यथा क्तिभोगबाहुल्यं तत्रयोगस्यकाकथा । योगेपिभोगविरहः कौलस्तूभयमश्नुते ॥ एकश्चेत्कुलतत्त्वज्ञः पूजितोयेनसुव्रते । सर्वेदेवास्तदेवेशपूजितानात्रसंशयः ॥ पृथिवीहेमसंपूर्णादत्त्वायत्फलमाप्नुयात् । तत्फलात्कोटिगुणंपुण्यंलभते कौलिकार्चनात् ॥ श्वपचोपिकुलज्ञानीब्राह्मणादतिरिच्यते । कुलाचारविहीनस्तुब्राह्मणःश्वपचाधमः ॥ कौलधर्मात्परोधर्मोनास्तिज्ञानेतुमामके । यस्यानुष्ठानमात्रेण ब्रह्मज्ञानीनरोभवेत् ॥ सत्यंब्रवीमि ते देवि हृदिकृत्वावधारय । सर्वधर्मोत्तमात्कौलात्परोधर्मोनविद्यते ॥ अयन्तुपरमोधर्मोगोपुसोस्तिपशुसङ्कटे । व्यक्तीभविष्यत्यचिरात् संप्राप्ते प्रवलेकलौ ॥ कलिकालेप्रवृद्धेतु सत्यंसत्यंमयोच्यते । नस्यास्यन्तिविनाकौलान्नप्रभवोमानवाभुवि ॥ यदातुवैदिकीदीक्षादीक्षापैराणिकीतथा । नस्यास्यतिवरारोहे तदैवप्रबलः कलिः ॥ यदातुपुण्यपापानांपरीक्षावेदसम्भवा

कलिः

नस्यास्यतिशिवे शान्ते तदैवप्रबलः कलिः ॥ क्वचिच्छिन्ना क्वचिद्भिन्ना यदासुरतरङ्गिणी । भविष्यति कुले ज्ञानिते तदैवप्रबलः कलिः ॥ यदातुम्लेच्छजातीया राजानोधनलोलुपाः । भविष्यन्ति महाप्राज्ञे तदैवप्रबलः कलिः ॥ यदास्त्रियोतिदुर्दान्ताः कर्कशाः कलहेरताः । गर्हिष्यन्ति स्वभर्तारं तदैवप्रबलः कलिः ॥ यदातुमानवा भूमौ स्त्रीजिताः कामकिङ्कराः । हनिष्यन्तिगुरुंशिवादीन् तदैव० ॥ यदाचौर्यीस्वल्पफलातेयदास्तोकंवर्षिणः । असम्यक्फलिनोष्टचाऽऽतर तदैव० ॥ भ्रातरः स्वजनामाप्यायदार्थनकाङ्क्षया । मिथः सम्प्रहरिष्यन्तितदैव० ॥ प्रकटैमद्यमांसादौ निन्दादण्डविवर्जिते । गूढपानंचरिष्यन्तितदैव० ॥ सत्यत्रेतादापरेषु यथामद्यादिसेवनम् । कलावपितथाकुर्यात्कुलधर्मानुसारतः ॥ येकुर्वन्तिकुलाचारंसत्यपूताजितेन्द्रियाः । व्यक्ताचारादयाशीलानहितानबाधते कलिः ॥ गुरुशुश्रूषयेयुक्ता भक्ता मातृपदाम्बुजे । अनुरक्ताः स्वदारेषु नहि० ॥ सत्यव्रताःसत्यनिष्ठाः सत्यधर्मपरायणाः । कुलसाधनसत्यायेनहि० ॥ कुलमा

गेणतत्त्वोनिशेधितेनिच योगिने।
येदद्युः सत्यवचसेनहि० ॥ हिंसा
मात्सर्यरहिता दम्भद्वेषविवर्जिताः।
कुलधर्मेषुनिष्ठायेनहि० ॥ कौलिकैः
सहसंसर्गंवसतिं कुर्वसाधुषु। कुर्व
न्ति कौलसेवांयेनहि० ॥ नानावे
षधराः कौलाः कुलाचारेषु निश्चलाः
सेवन्तेत्वां कुलाचारैर्नहि० ॥ जीव
सेकादिसंस्काराः पित्र्याद्वादिकाः
क्रियाः। येकुर्वन्तिकुलाचारैर्नहि०
॥ स्नानंदानंतपस्तीर्थंव्रतं तर्पण-
मेवच। येकुर्वन्तिकुलाचारैर्नहि०
॥ कुलतत्त्वं कुलद्रव्यं कुलयोगिन
मेवच। नमस्कुर्वन्तियेभक्त्यानहि०॥
कौटिल्यान्नतहीनानां स्वच्छाना-
मकुलमार्गिणाम्। परोपकारयुक्तानां
साधूनां किङ्करः कलिः॥ कले
र्दोषसमूहस्य महानेकोगुणः प्रिये
सत्त्वप्रतिष्ठकौलानांज्ञेयः सङ्क
ल्पमात्रतः॥ अपरेतुयुगे देविपु
ण्यं पापत्वमानसम्। न्यूनमासी
त्कलौपुण्यं केवलं नतुदुष्कृतम्॥
कुलाचारैर्विहीनाये सततासत्य-
भाषिणः। परद्रोहपरायेचतेनराः
कलिकिङ्कराः॥ कुलवर्त्मस्वभक्ताये
यन्येपिस्युः कालुकाः। द्वेष्टारःकुल
निष्ठानां ज्ञेयाः कलिकिङ्कराः॥

युगाचारप्रसङ्गेन कलेः प्राबल्य-
लक्षणम्॥ सङ्क्षेपात् कथितम्म
हेप्रीतयेतव पार्वति॥ प्रकटेचकलौ
देविसर्वेधर्माश्चदुर्बलाः। स्यात्सत्ये
कंसत्यमात्रंतस्मात् सत्यमयोभ
वेत्॥ सत्यधर्मं समाश्रित्ययत्कर्म
क्रियतेनरैः। तद्देवसकलं कर्मसत्य
ज्ञानीहिसुव्रते॥ नहि सत्यात् प
रोधर्मो नचपापमनृतात्परम्। त
स्मात् सर्वात्मनासत्यं सत्यमेकंस
माश्रयेत्॥ सत्यहीनावृथापूजा
सत्यहीनेहिया जपः। सत्यहीनं
तपोव्यर्थंमूषरेवपनं यथा॥ सत्य
मेकंपरंब्रह्म सत्यंहि परमंतपः।
सत्यमूलाः क्रियाः सर्वाः सत्यात्
परतरंनहि॥ अतएवमयाप्रोक्तं
कृतेप्रथमे कलौ। कौलाचारोपि
सत्येनकर्त्तव्योव्यक्तभावतः॥ गोप
नाद्धीयते सत्यं नगुप्तिरनृतंविना
तस्मात्प्रकाशतः कुर्यात्कौलिकः
कुलसाधनम्॥ कुलधर्मसगुप्त्यर्थं
मान्तंस्याज्जुगुप्सितम्। यदुक्तं कु
लतन्त्रेषु नश्यन्तिप्रबलेकलौ॥ कृते
धर्मश्चतुष्पादस्तेतायांपादहीनकः।
द्विपादोद्वापरेदेविपादंसाधंकलौ
युगे॥ तत्रापिसत्यंबलवत्तपः स-
न्ध्यादयापिच। सत्यपादेकृतेलोपे

कलिः

धर्मलोपः प्रजायते ॥ तस्मात् सत्त्वं समाश्रित्य सर्वकर्माणिसाधयेत् ॥ कुलाचारं विनायत्र नास्त्युपायः कुलेश्वरि । तत्राऽऽगतमवेक्षश्चेत् कुतो निःश्रेयसंभवेत् ॥ सर्वथा सत्त्वपूतात्मामन्मुखेरितवर्त्मनी । सर्वकर्म नरः कुर्यात् स्वस्ववर्णाश्रमोदितम् ॥ दीक्षांपूजांजपंहोमंपुरश्चरणतर्पणम् । व्रतोद्वाहौ पुंसवनंसीमन्तोजातकर्म तथा ॥ नामचूडाकरणमेवच । व्रतक्रियांपित्र्याद्धं कुर्यादागमसम्मतम् ॥ तीर्थयात्राद्यंपोत्सर्गंशरदोत्सवमेवच । यात्राग्रहप्रवेशश्च नक्षत्रोदिधारणम् ॥ वापीकूपतडागानांसंस्कारं तिथिकर्म्मच । गृहारम्भप्रतिष्ठाश्च देवानां स्थापनन्तथा । दिग्बाकृत्यं निशाकृत्य पर्वकृत्यन्तथैवच । चतुर्मास्यंकृत्यं । नित्यनैमित्तिकं व्रतम् ॥ कर्त्तव्यंयत्कर्त्तव्यन्नाऽऽज्ञांग्राह्यञ्चयद्भवेत् । मयोक्तेनविधानेन ततसर्वंसाधयेन्नरः ॥ नकुर्याद्यदिमोहेनदुर्मत्त्वाऽयद्यदापिवा । विनष्टःसर्वकर्म्मेभ्योविद्यायांसभवेत् कुमिः ॥ यदिमन्नतमुत्सृज्यमहेशि प्रयतेकलौ । यदायत्र क्रियतेकर्म विपरीतायतद्भवेत् ॥ मन्नतास्य

कलि'

तादीचा साधकप्राणघातिनी । पूजापिपिफलादिविकृतंकर्म्मार्पणंमया ॥ देवता कुपितातस्य विमुखं तस्यपदेयदे ॥ कलिकाले प्रवहेत् चात्त्वामच्छासुमन्विके । योन्यमार्गं क्रियाकुर्यात् समश्नापातकी भवेत् ॥ व्रतोद्वाहौ प्रकुर्याणोयो न्यमार्गेणमानव. । सयातिनरकंघोरं यावच्चन्द्रदिवाकरौ ॥ व्रतेप्रच्छयमः प्रोक्तोव्रत्योमार्गयको भवेत् । केवलं सूत्रयाहोसौचण्डालादप्रमोपिसः ॥ उद्वाहितापियानारीजानीयात्सातुगर्हिता । उद्वोढापिभवेत्पापीसंसर्गात्कुलनायिके ॥ देव्यागमनजंपापंतत्पुंसोदिनेदिने । तद्दत्तादत्तोयादिनैपगृह्णन्तिदेवता. ॥ पितरोपिनघात्रन्तियतस्तन्नाशमूयवत् । तयोरप्यंकानीनः सर्वधर्मबहिष्कृतः ॥ देवेपित्र्येकृताचरिनाधिकारोस्यजायते ॥ अगाधभवेनमार्गेण देवतास्थापनंचरेत् । नसान्निध्यंभवेत्तत्रदेवतायाः कथञ्चन ॥ इहामुत्रफलंनऽस्तिकायक्लेशोपनश्चय. ॥ आगमोक्तविधिं हित्वायः स्वाद्धंकुरुतेनरः ॥ स्वाद्धंतद्धिक्रसंसोपिपितृभिर्निरयंव्रजेत् ॥ तस्मोयंयोक्तितसमं पिण्डोमद्धमयो

कलिः

भवेत् । तस्मान्मर्त्यः प्रयत्नेनगङ्गा
रंमतमाश्रयेत् ॥ बहुनात्रकिमुक्तेन
सत्यं सत्यंमयोच्यते । अगाम्भवंकृ
तंकर्मसर्वंदेविनिरर्थकम् ॥ अस्तुता
वत् परोधर्मःपूर्वधर्मोपिनश्यति । आ
म्भवाचारहीनस्यं नरकान्नैवनिष्कृ-
तिः॥ मदुदीरितमार्गेणनित्यनैमि
त्तिकर्मणाम् । साधनंयन्महेशानि
तदेवतवसाधनम् ॥ विशेषाराध
नंतत्रमन्त्रयन्त्रादिसंयुतम् । भेष
जंकलिरोगाणां शृणुतागदतोममा॥
॥ ॐ ॥ इतिश्रीमहानिर्वाणतन्त्रे
सर्वतन्त्रोत्तमोत्तमे सर्वधर्मनिर्णय
सारेश्रीमदाद्यासदाशिवसंवादेज्ञी
वनिस्तारोपायप्रस्तावे परांप्रकृतिसाध
नोपक्रमोनामचतुर्थोल्लासः ॥ ४ ॥
* ॥ यावद्ब्रह्मणपूजास्ति यावद्गङ्गाध
रीतले । यावद्वेदमयोघोषस्तावन्नो
विद्यतेकलि ॥ हरेर्नामैवनामैवना
मैवममजीवनम् । कलौनास्त्येवना
स्त्येवनास्त्येवगतिरन्यथा ॥ एकाये ।
द्यूतक्रीडासाधनीभूताचस्यांयस्मिन्
भागेएकोङ्कस्तस्मिन्॥ कलनम् । क
लशब्दादौ । इन् ॥ कलयतिकल्य
तेवा॥ कलगतौसंख्यानेच । अदन्तः
। अच इः॥

कलिः स्त्री । स्नोरके । कलिकाया

कलिका

म् ॥ कलते । कलशब्दसंख्यानयोः ।
सर्वधातुभ्यइन् ॥

कलिकः । पुं । कोषवक इतिगौडभा
षाप्रसिद्धे पक्षिणि । क्रौञ्चे ॥

कलिका । स्त्री । अविकसितपुष्पे । को
रके ॥ वीणामूले ॥ पदसन्ततियुक्त
रचनाविशेषे ॥ लघवन्तु । कला
नामभवेत्तासनियता पदसन्ततिः
॥ कलाभिः कलिकाप्रोक्ता तद्भेदाः
षट् समीरिताः इत्यादिरूपगोस्वा
मिकृतगीतगोविन्दविवृतावस्मीभाष्येऽव
लोकनीयम् ॥ कलयति । कलग
तौसंख्यानेच । चुरादिः । अच इः ।
स्वार्थेकन् ॥

कलिकापूर्वम् । न । अङ्गप्रधानान्यतर
बहुकर्मसाध्यस्वर्गादिफलजनकापू
र्वोत्पत्तौतत्तत् प्रत्येककर्मजन्येअ
दृष्टे ॥ इतिस्मृतिः ॥

कलिकारः । पुं । धूम्राटपक्षिणि ॥
पीतमस्तकपक्षिणि ॥ पूतिकरञ्जे ॥
कलिंकरोति । कृञ् । कर्मण्यण् ॥

कलिकारकः । पुं । नारदे ॥ पूतिकर
ञ्जे । लट्वाकरञ्जे ॥ स्वार्थेकन् ॥

कलिकारी । स्त्री । उपविषप्रभेदे । सा
ङ्गिन्याम् । गर्भपातन्योम् । अग्निम
न्थायाम् । विषलाङ्गलीयाइतिगौड
भाषा ॥

कलिदो

कलिङ्गः । पुं । पूतिकरञ्जे ॥ धूम्याटे ॥ कुटजवृक्षे ॥ गिरीषवृक्षे ॥ प्रचटवृक्षे ॥ कलिङ्गाः । देशविशेषे ॥ यथा । जगन्नाथात् पूर्वभागेकृष्णाती रान्तर्गतिदेशः । कलिङ्गदेशः सम्प्रोक्तोवाममार्गपरायण इति ॥ कलिङ्गाश्चत्रियाः तेषांनिवासोजनपदः कलिङ्गाः । निवासेऽणोजनपदेचलुप् । लुपियुक्तवद्वाक्यवचने ॥ ना कौट जफले । इन्द्रयवे ॥ कलिङ्गच्छदिति । अन्तर्भावितण्यर्थाद्गमेर्डः । पृ० ॥ खचडिश्चेतिमुकुटः । कलिंगायतीति स्वामी ॥ कं मूर्द्धनिलिङ्गचूडास्येति वा ॥

कलिङ्गकः । पुं । कलिङ्गार्थे ॥ इन्द्रयवे ॥

कलिङ्गा । स्त्री । नितम्बिन्याम् । योषितिति ॥ स्त्रियुतायाम् ॥ इन्द्रयवे ॥

कलिञ्जः । पुं । कटे । चटाई सेफ इतिभाषा ॥

कलितः । त्रि । विदिते ॥ आसे ॥ भेदिते ॥ गणिते ॥ उक्ते ॥ बद्धे ॥ धृते ॥ यथा । करकलितकपालः कुण्डलीदण्डपाणिरिति भैरवध्यानम् ॥ सङ्क्रान्ते ॥ यथा । कदाकालेमातः कथयकलितालक्तकरसमिति ॥ विचारिते ॥

कलिदोषमः । पुं । कुलधर्मे ॥ कलि

कलिमा

मलापहे परमात्मनि वासुदेवे ॥ यथा । कलावर्त्तति दोषाढ्येविषयासक्तमानसः । कृत्वातुसकलंपापंगो विन्दिस्मरणाच्छुचिः ॥ अतियापप्रसक्तोपिध्यायन्निमिष मच्युतम् । भूयस्तपस्वीभवति पङ्क्तिपावनपावनः ॥ आद्येनापिनमस्कारः प्रयुक्तश्चक्रपाणये । संसारस्थूलबन्धानांमुद्देजनकरोहिसः ॥ पूर्त्यादिपुरोगवचनम् ॥ कलेर्दोषाः विहितोऽकरणप्रतिषिद्धानुष्ठानलक्षणाः । तान्स्मरणमात्रेणहन्तिनाशयतीतिव्युत्पत्तिः ॥

कलिद्रुमः । पुं । विभीतके । बहेड़ा इतिभाषा ॥

कलिन्दः । पुं । अद्रिविशेषे ॥ सूर्य्ये ॥ विभीतकद्रुमे ॥

कलिन्दकन्या । स्त्री । यमुनायाम् ॥

कलिन्दजा । स्त्री । यमुनायाम् ॥ कलिन्दाज्जाता । जनी० डः । टाप् ॥

कलिन्दनन्दिनी । स्त्री । कालिन्द्याम् ॥

कलिन्दशैलजा । स्त्री । यमुनायाम् ॥

कलिप्रियः । पुं । नारदमुनौ ॥ वानरे ॥ कलेः प्रियः । कलिप्रियोयस्मात् ॥

कलिमलापहः । पुं । संसारदुःखोपशमने ॥

कलिमारकः । पुं । पूतिकरञ्जे । करंट कपतिकरञ्जे ॥ कलिंमारयति ॥

कलिहा

कलिमाल्यः । पुं । पूतिकरजे ॥

कलियुगम् । न । कलौ । अन्त्ययुगे ॥ अस्योत्पत्त्यादियथा । माघीपूर्णिमायां शुक्रवारेकलियुगोत्पत्तिः अस्यावतारः कल्किः ॥ पुण्यमेकपादम् । पापंत्रिपादम् । गङ्गातीर्थम् । ब्राह्मणोनिरस्तिः । अन्नगताः प्राणाः । सार्द्धत्रिहस्तपरिमितोमनुष्यदेहः । अष्टाधिकशतवर्षं परमायुः । भोजनेपात्रवस्त्रनियमोनास्ति इत्यस्यलक्षणम् ॥ अस्माब्दाः ४३२००० ॥ अस्य षट्शकक्रमेणयुधिष्ठिरोविक्रमशालिवाहनोनृपाधिनाथोविजयाभिनन्दनः । द्रमेनुनागार्जुनभोदिनीविभुर्वेणिः क्रमात्षट्शकमकारकाःकलाविति धर्मः सङ्कचितस्त्रयोविरहितंसत्यञ्चदूरंगतंलोकाधर्महताद्विलाश्चलुभितानारीषशूद्राःमानवाद्रव्यञ्च माहात्म्यम् ॥ अनिस्तारायलोकेऽस्मिन्कलौब्रह्मोपासनंकेवलदाग्निवेनोक्तम् ॥

कलियुगार्लयः । पुं । विभीतके ॥

कलिलम् । त्रि । गहने ॥ मिश्रे ॥ कलते कल्यते वा । कलशब्दसङ्ख्यानयोः । सलिकलीतीलच् ॥

कलिष्टचः । पुं । विभीतके ॥

कलिहारी । स्त्री । लाङ्गल्याम् ॥ कलि

कल्कः

हारीसराकुष्ठशोफार्शोव्रणशूलजित् । सचारश्लेष्मजित्तिक्तोकटुकातुवरापिच ॥ तीक्ष्णोष्णाकृमिहृल्लघ्वीपित्तलागर्भपातनी ॥

कली । स्त्री । कलिकायाम् ॥

कलुषः । पुं । स्त्री । मदिरे । न । पापे ॥ त्रि । आविले ॥ लुषति । लुष हिंसायाम् । इगुपधेतिकः । कलुज लस्यलुषोघातकः ॥ कलयति वशी करोति वा । कलसङ्ख्याने । पुनस्किकलिभ्यउषच् ॥

कलेवरम् । न । शरीरे ॥ कलेशुक्रेमधुराव्यक्तध्वनौ वा वरश्रेष्ठम् । कलद्लादित्यलुक् ॥

कलोपजीवी । त्रि । वार्द्धुषौ ॥

कल्कः । पुं । न । घृततैलादिशोधे ॥ दंशे ॥ विभीतकादौ ॥ विष्ठायाम् ॥ किट्टे ॥ तुल्यनामगन्धद्रव्यो घृते नतैलेन वा त्रिफलादिद्रव्यसमवेते नसाध्ये पिष्टौषधविशेषे ॥ घृत तैलादिपाके देयौषधद्रव्ये । तच्च पञ्चकषायान्तर्गतद्रव्यपरिमेपितम् । यथा । द्रव्यमार्द्रशिलापिष्टं शुष्कं वा जलमिश्रितम् । तदेवद्रव्यिभिःपूर्वैः कल्कइत्यभिधीयते इति ॥ अस्यपूर्वापरीयैयामभेकं तिष्ठति ॥ आद्ये ॥ पाके । यथा । तमेनंकल्कोऽध्ययनेन

कल्पः

कल्काद्यादि॥ न। छन्नानि॥ वि। पापाग्नये। पापात्मनि॥ कल्यते। कल्प॰। कृदाधारार्चिकलिभ्यः कः इतिकः॥ कल्कनम्। न। दम्भे॥ शौचे॥ कथने॥ कलहे॥ कल्कफलः॥ पुं। दाडिमवृक्षे॥ कल्किः। पुं। विष्णोर्भविष्यति दशमावतारे। विष्णुयशःपुत्रे॥ सतु कलिशेषे पापात्मनां विनाशाय सम्भलग्रामे भविष्यति। यथा। सम्भलग्राममुख्यस्य ब्राह्मणस्य महात्मनः। भवने विष्णुयशसः कल्किः प्रादुर्भविष्यति॥ तस्य कर्मतया॥ अश्वमाशुगमारुह्य देवदत्तं जगत्पतिः। असिनाऽसाधुदमनमष्टैश्वर्यगुणान्वितः॥ विचरन्नाशु नाचौर्व्यां हयेनाप्रतिमद्युतिः। नृपलिङ्गच्छदोद्भूतान् कोटिशोनिहनिष्यति॥ इतिश्रीभागवतम्॥ विशेषः कालिकपुराणादिषु द्रष्टव्यः॥ कल्की। पुं। कल्क्यवतारे॥ यथा। मत्स्यः कूर्मोवराहश्चनरसिंहोथवामनः। रामोरामश्चरामश्चबुद्धः कल्कीचतेदशेति॥

कल्पः। पुं। शास्त्रे। त्यागक्रियाणामुपदेशके वेदाङ्गविशेषे॥ यज्ञविद्यायाम्। वोधायनादिकर्मपद्धतिग्रन्थे।

कल्पः

सूत्रग्रन्थे॥ अनुष्ठेयक्रमः कल्पः॥ विधौ॥ कल्पतेऽनेनवा। कृपूसामर्थ्ये। अच्। घञ्वा॥ प्रलये। संवर्त्ते॥ कल्पते समर्थो भवति। पुंसी। तिघः॥ ब्रह्मणोदिने॥ ब्रह्मणोदिनमेकः कल्पः॥ ब्रह्मणोरात्रिश्चापरः कल्पः॥ कल्पयति स्थितिं प्रलयञ्च। कृपू। ण्यन्तात् पचाद्यच्॥ क्रमसन्दर्भेतु। चित्रकल्पैर्ब्रह्मणः कोमासो भवति॥ तेषां क्रमतो नामानि॥ यथा॥ श्वेतवाराहः१ नीललोहितः२ वामदेवः३ गायन्तः४ रौरवः५ प्राणः६ वृहत्कल्पः७ कन्दर्पः८ सद्यः९ ईशानः१० ध्यानः११ सारस्वतः१२ उदानः१३ गरुड१४ कौर्मः१५ नरसिंहः१६ समाधिः१७ आग्नेयः१८ विष्णुजः१९ सौरः२० सोमकल्पः२१ भावनः२२ सुप्तमाली२३ त्रैकुण्ठः२४ आर्चिषः२५ वल्मीकल्पः२६ वैराजः२७ गौरीकल्पः२८ माहेश्वरः२९ पितृकल्पः३० अयमब्रह्मणो भावाख्या। इति क्रमसन्दर्भे प्रभासखण्डम्॥ एताद्दशैर्दादशमासैर्ब्रह्मणः संवत्सरोभवति। एवंवर्षशतमस्य ब्रह्मणआयुः। तत्र पञ्चाशदर्धातीतो

कल्पना

ता: । एकपञ्चाशदारभ्य अधुनाब्दे तवाराह: कल्प: । इति महाभारत- म् ॥ विकल्पे ॥ कल्पवृक्षे ॥ न्याये ॥ ए पोऽत्र कल्प: उचित इत्यर्थ: ॥ व्याक रणस्य प्रत्ययविशेषे । सचसुबन्त तिङन्तपदाभ्यामीषदूनार्थे भवति । तद्बोध्यलिङ्ग: । यथा ईषदूनोवि द्वान् विद्वत्कल्प: । ईषदूनं पचति पचतिकल्पम् ॥ वि उत्तरपदस्य: स्वसदृशे । यथा पितृकल्प: ॥ कल्प यितुं मनोरथम् । अच् ॥ । कल्पन म् । घञ् ॥ कल्पक: । पुं । नापिते ॥ कंचुके ॥ क ल्पकारके ॥ कल्पते । कृपू० । ण्वुल् ॥ कल्पक्षय: । पुं । प्रलये ॥ कल्पतरु: । पुं । कल्पवृक्षे ॥ कल्पस्यस ङ्कल्पितार्थस्यतरु: । जन्यजनकभावे ऽचष्ठी ॥ कल्पनम् । न । कृतौ ॥ छेदे । कर्मणे ॥ कल्पते । नन्द्यादित्युः ॥ कल्पना । स्त्री । करिसज्ञानायाम् । ना यकस्यारोहणार्थं पल्याणाद्यारोप णेन करिण: सज्जीकरणे ॥ अनुमि तौ ॥ रचनायाम् ॥ यथा प्रबन्धक ल्पनाकथा ॥ सम्पादनायाम् ॥ कल्प नम् । कृपू० । ल्युट् ॥ ल्योरस्त्र्यां तियुच् । टाप् ॥

कल्मष:

कल्पनाकाल: । वि ॥ विद्युदादावस्थि रे कल्पनाकालभाविनिर्मनस्कत्वे र्त्तमाने ॥ कल्पनी । स्त्री । कर्त्तर्याम् । कैंची इति भाषा ॥ इति हेमचन्द्र: ॥ कल्पपादप: । पुं । देवतरौ ॥ कल्पस्य सङ्कल्पितार्थस्यपादप: ॥ अन्नदान नानिधिर्दानसागरे इष्टव्य: ॥ कल्पपालक: । पुं । गौण्डिके ॥ कल्पलतादानम् । न । महादानवि शेषे ॥ कल्पवृक्ष: । पुं । सुरद्रुमे । कल्प: सङ्क ल्पितोर्थ: तस्य वृक्ष: । जन्यजनक- भावेषष्ठी ॥ कल्पान्त: । पुं । प्रलये ॥ कल्पस्य ब्राह्म दिनस्य अन्तोऽवधि: ॥ कल्पित: । पुं । सञ्जितगणे ॥ वि । र चिते ॥ अर्पिते ॥ आरोपिते ॥ क ल्पितंनिखिलं विश्वमिति वेदान्तडिण्डिम: । ब्रह्मणि जगत: कल्पितत्व म् । आत्मनिचाहङ्कारादे: कल्पितत्व न्तत्त्ववित्सुप्रसिद्धम् ॥ कल्पितस्यचा धिष्ठानादनतिरेक: ॥ यथोक्तंसंक्षेप शारीरके । अधिष्ठानावशेषोहिना न्यत्र: कल्पितवस्तुनइति ॥ कल्य: । वि । कल्पितुंयोग्ये ॥ कल्मष: । पुं । नरकविशेषे ॥ न । पा

कल्यज

पे ॥ हस्तपुच्छे ॥ त्रि ॥ मलिने ॥ शुभंकर्म स्थिति समाप्तिंकरोति । पो न्तेकर्मणि । आतोनुपेतिकः । पृ० ॥ कल्यपत्ते ॥

कल्माषः । पुं । राक्षसे ॥ चित्रवर्णे ॥ कृष्णवर्णे ॥ कृष्णपाण्डुरवर्णे । ग न्धगालौ ॥ त्रि । चित्रवर्णवति ॥ क लयति । कल ॥ क्विप् । कल् । मा षयति । अभिभवति वर्णान् मांषः । मषहिंसायाम् । हिंस्यर्थाश्चेति चु रादौ पाठा ञिच् । कल्चासौमा षश्चेति कल्माषः ॥

कल्माषकण्ठः । पुं । शिवे ॥ इतिहा राबली ॥ पृ० ॥

कल्माषपादः । पुं । सौदासभूपे ॥

कल्माषी । स्त्री । शुक्लायाम् ॥ अन्य तो ङीषिति ङीष् ॥

कल्यम् । नि । प्रत्यूषे । प्रभाते ॥ मधुनि ॥ स्वप्ने ॥ त्रि । वाक्स्फुतिवर्जिते ॥ उपा न्यवचने ॥ सद्ये ॥ नीरोगे ॥ दक्षे ॥ कल्याणवचने ॥ कलयति चेष्टाम् । अघन्यादयश्चेतिकलेर्यक् ॥ यद्वा कल्यते । कलगतौ सङ्ख्यानेच । चुरादिरदन्तः । अचोयत ॥ कलासु साधुर्वा । तत्र साधुरितियत् ॥

कल्यजग्धिः । स्त्री । प्रातराशेऽप्रात र्भोजने । कल्येऽह्नि कल्येवा इतिभाषा ॥

कल्याण

कल्यपालः । पुं । } शौण्डिके ॥
कल्यपालकः । पुं । }
कल्यवर्त्ती । पुं । प्रातराशे ॥ इतित्रिका ण्डशेषः ॥ । त्रि । । कल्या । स्त्री । मद्ये ॥ हरीतक्याम् ॥ ष्टाद् ॥ शुभाक्रियायां वाचि ॥ कल्याणम् । न । अक्षयस्वर्गे ॥ मङ्गले शिवे । भद्रे । शुभे ॥ हेत्रि ॥ त्रि । शुभयुक्ते ॥ कल्येप्रातः काले अण्य तेऽर्थशब्दे । अकर्त्तरिचेतिघञ् ॥ स्त्री । वृद्धादित्यश्चेति ङीषि क ल्याणी ॥

कल्याणकृत् । त्रि । शास्त्रविहितकारि णि ॥ कल्याणं करोति ॥ कृञ्कृञ् क्विप् । तुक् ॥

कल्याणगुणम् । न । अहावैराग्यादौ ॥

कल्याणघृतम् । न । औषधविशेषे ॥

कल्याणतमः । त्रि । अतिशोभने ॥

कल्याणबुद्धिः । त्रि । सुधियि ॥

कल्याणयोगः । पुं । यात्रायोगान्तरे ॥ यथा । गुरौकेन्द्रेत्रिकोणेवारविर्ला भेचकर्मणि । कल्याणयोगोभूपस्य यातुः कल्याणकृद्भवेदिति ॥ पुनश्च त्रिकोणगे शुभेखेटे सबले वाद्रिती यगे । कल्याणसंज्ञोयोगोयं यायिनां मङ्गलप्रदइति ॥

कल्याणबीजः । पुं । मरुवे । इतिरा

कवचः
जनिर्घरेष्टः ॥ [illegible]
कल्याणिका । स्त्री । मृन्मिश्रलायाम् ॥
कल्याणी । त्रि । कल्याणविशिष्टे ॥
कल्याणिनी । स्त्री । वलायाम् ॥
कल्याणी । स्त्री । मांसपर्ण्याम् ॥ वि
॥ मङ्गलमूर्त्याम् ॥ यङ्गादिभ्यश्चे
तिङीषे ॥ [illegible]
कल्यापाल । पुं । शौण्डिके ॥ इतिवि
काण्डशेषः ॥ [illegible]
कल्लः । त्रि । बधिरे । श्रवणेन्द्रियहीने
। बहरा इतिभाषा ॥ इतिविकाण्ड
शेषः ॥ [illegible]
कल्लत्वम् । न । स्वरभेदे ॥ आधिर्ये ॥
कल्लोलः । पुं । क्लीवे ॥ उल्लोले । महोत
रङ्गे । बडीलहर इतिभाषा । वैड
ङेऊ इतिगौडभाषा ॥ त्रि । वैरिणि ।
सपत्नें ॥ कंलक्लम् तस्यलोलः उन्मादः
। वर्षादन्तिस्येत्यनुस्वारस्यलकारः ॥
कल्लोलेनेन मधः । कल्लअव्यक्तेशब्दे
। याहुलकादोलच्वा ॥ [illegible]
कवकः । पुं । कंवले । ग्रासे ॥ न । छत्रा
के ॥ औभानि कवकानि चेतिमनुः ॥
कवचः । पुं । गर्दभाण्डे । नन्दिवृक्षे ॥ प
टशयादे ॥ पुं । न । तनुत्राणे । य-
र्मणि । सन्नाहे ॥ मन्त्रविशेषे । नी
लाद्यिमंत्रयद्वादिसंरक्षणार्थं देवता
मन्त्रविग्रहे ॥ तनुपुलायांपञ्च-

कवरा
॥ मं भूर्जेविलिखकण्ठादैर्धार्यं ॥
किंवातंवञ्चंति॥वञ्चुगतौ। अस्मा
॥ वितगण्यर्थोवा॥मू० क्त॥ कौंति ।
कुशब्दे। कृतन्यङ्क्वादिना कौते
॥ रेचइत्येके ॥ [illegible]
कवचपत्रम् । न । भूर्जपत्रे ॥ [illegible]
कवटी । स्त्री । कपाटे ॥ [illegible]
कवयिः । स्त्री । कवव्याम् ॥ [illegible]
कवयी । स्त्री । कयीशब्दे इतिगौडभा
षायांप्रसिद्धे शब्दे ॥ कवई इतिभाषा
॥ ककचपृषोदरादित्वात्साधुः ॥ कवयी मधुरा
स्निग्धाकषायारुचिकारिणी । विष्टि
स्तम्भिप्तकरीवातग्रहनीवस्तवर्द्धिनी ॥
कवरः । पुं । पाठके ॥ पुं । नपुं । अग्रके
॥ अग्रेण क्लेशपाशे ॥ त्रि । अग्रके
॥ खचितेन सम्पृक्ते ॥ कौंति कृयते
वा । कुशब्दे । कोररन् ॥ कवरंलव
णेऽग्रेस्त्रीपृथ्वीमुखीकचान्तरे। कवर्यु
॥ मायांनारसः पूगपयोर्भेषजान्तरे ॥
। इतिमेदिनी ॥ कवरः कर्बुरः सारङ्ग
। तिश्चलायुधः ॥ [illegible]
कवरकी । स्त्री । वन्द्याम् ॥ इतिशारा
वली ॥ [illegible]
कवरा । स्त्री । वर्बरायाम् । स्वरपुष्पा
याम् । यावुरं इतिभाषा ॥ अजाद्य
तष्टाप् ॥ [illegible]
कवरी । स्त्री । केशविन्यासे । केशवेशे

कवाट

॥ पृषोदरादित्वात्साधुः ॥ कवरी केशानां सन्निवेशविशेषः सा रूपं ॥ शा कर्मभेदे ॥ वृणोतीति ॥ इन् वरेण अ च्चि गौरादित्वात्ङीष् ॥ कल्यशिरसोवरी ॥ उपधा० ॥ वूयते कुशब्देन कोरन् । जानपदेतिङीष् ॥ कंशिरो वृणो तीति आच्छादयतीति कंकृष्णवर्णं वृणो तीति वा पूर्ववदिच्ङीषौ ॥ तुड्या कवरीयोगम् ॥ कवर्ग पुं । कादिमध्यमे कवर्गीयः । पुं । कवर्गभवेवर्णे वा भवार्थे वर्गान्ताच्चेति छः ॥ कवसः । पुं । आर्से । चिलिचिमे । वे लेमाचं इतिगौडभाषाप्रसिद्धे मत्स्ये । केन वलते । वल अच् ॥ कवलित । वि । भुक्ते । व्याप्ते ॥ कवसः । पुं । उरश्छदे । कवचे ॥ कौ तिकुं० । ऋतन्यञ्जीत्यादिना कौ तेरसः ॥

कवाटम् । नं । कपाटे । कं वातम् वे टति वटवेष्टने । कर्मण्यण् ॥ कुट् शब्दे । कुटेरप् । कर्वशब्दमटतिवा अटगतौ । पचाद्यच् । कवच्चोष्ण ऊष्मयोगविभागात् कोः कवादेशो वा ॥

कवाटवत्कम् । न । कवाटवेष्टु इति गौ डभाषाप्रसिद्धे वृक्षविशेषे । वल्का-

कविता

लिन्ये । कमेतवत्के ॥ [illegible]

कवाटी । स्त्री । क्षुद्रकपाट्याम् ॥ टिड्ढे ॥ ति ङीष् ॥ [illegible]

कवारम् । न । पद्मे ॥ इतिहिकाण्ड ॥ शेषः ॥ [illegible]

कविः । पुं । वाल्मीकिमुनौ ॥ शुक्रे । दैत्यगुरौ ॥ सूरौ ॥ भास्करे ॥ का व्यस्यकर्मणि ॥ सर्वधर्मीणा कवयः ॥ ॥ ब्रह्मणि ॥ [illegible] तीतिनिगतत्वेशेषवस्तुदर्शिनि स- र्वज्ञे । सर्वदर्शि ॥ सूक्ष्मार्थविवेकि नि । मेधाविनि । पण्डिते ॥ स्त्री । खलीने ॥ कौति । कुं० अत्र इः ॥

कविकम् । नं । खलीने ॥ इति हेमा युधः ॥ [illegible]

कविका । स्त्री । खलीने । कडि आली इति लगाम इतिचख्याते ॥ कैविका पुष्पे ॥ कवयोमत्स्ये ॥ यथा । कविका मेधुरा स्निग्धा कषायो रुचिकारिणी । किञ्चित् पित्तकरी वातश्लेष्मनी वल वर्द्धनी ॥ कवते कौतिवा । कुङ्शब्दे । कुशब्देवा । अच इः । कविः । स्वा र्थेकन् । कृवृदिभ्याइन् वा । टाप् ॥

कविज्येष्ठः । पुं । वाल्मीकिमुनौ ॥

कविता । स्त्री । कवित्वे । काव्ये ॥ क वेः कर्मभावोवा । तल् ॥ कविता व नितावापि आर्यातासुखदायिनी ॥

कोशा

कवियः । पुं । न । अश्वास्यबन्धनरज्जौ । खलीने ॥ । ज । । ।

कशेरुः । पुं । नी । पृष्ठकीकसे । पृष्ठास्थिनि ॥ डाकजोड्डले । मूलविशेषे ॥ कशेरु द्विविधं तत्तु महद्भेदाज्जकशेरु कम् । मुस्ताकृति लघु स्याद्यत्तच्चिवेटमिति स्मृतम् ॥ कशेरुकद्वयं शीतं मधुरं तुवरं गुरु । पित्तशोणितदाहघ्नं नयनामयनाशनम् ॥ श्वाहिश्लुका निलश्लेष्मरुचिस्तन्यकरम्परम् ॥ पुं । भारतवर्षान्तःपातिद्वीपविशेषे ॥ कं शृणाति । शृहिंसायाम् । बाहुलका दुप्रत्यये । प्रकृतेरेरडादेशः ॥ शजातौ ॥

कशेरुकम् । नी । तृणकन्दे । कशेरुणि ॥

कशेरुका । स्त्री । पृष्ठास्थि । पृष्ठवंशे ॥ कंवायुंशृणाति । शृ° । केनग्रीर्यते । वा । केश्यरड्चास्येच्यूः । संज्ञायां कन् । केशरडतिह्रस्वः ॥ यद्वा । कश्यते कशतिवा । कंशब्दे । बाहुलकादेरुः । स्वार्थेकन् ॥

कशेरुः । स्त्री । तृणकन्दे ॥ पृष्ठकीकसे ॥ शजातौ ॥ कंशृणाति । शृ° । केश्यरड्चास्येच्यूः ॥

कश्चन । अ । कश्चिद् ॥

कश्चित् । अ । कश्चन । अविषये । कोऽपि इतिभाषा ॥ अर्थान्तरभूते ॥

कश्मलम् । न । मूर्च्छने ॥ पापे ॥ मोहे ॥ चि । मलिने ॥ कश्मनम् । क

कषः

शगतौ । कुटिकशिकौतिभ्यः प्रत्यय । स्यमुडिति कलः ॥ [illegible]

कश्मीरः । पुं । काश्मीराख्यदेशे ॥

कश्मीरजम् । न । कुङ्कुमे ॥ कश्मीरे जायतेऽसृग्भोजनेर्डः ॥

कश्मीरजन्म । न । कुङ्कुमे ॥ कश्मीरे जनेर्मान्यः ॥ [illegible]

कश्यम् । न । अश्वमध्ये । मेधे ॥ कश्यतेऽनेनवा । कशण । बाहुलका ॥ ष्यः ॥ चि । कशार्हे ॥ कशाचमयष्टिः । तद्घातःउपचारात् कशा । तामर्हति । दण्डादित्वात्यत् ॥

कश्यपः । पुं । मुनिविशेषे । कालागम जे मरीचिमुनेरौरसे पुत्रे ॥ यथा । ब्रह्मणस्तनयो योऽभूत् मरीचिरिति विश्रुतः । कश्यपस्तस्य पुत्रोऽभूत् कश्यपोनात् स कश्यपः ॥ इतिमा कंण्डेयपुराणे । विश्वकर्मकृतसूर्यस्तवाधिकारः ॥ कश्यं मद्यं पिबति पाति वा । पा° सुपीति कः ॥ मीनभेदे ॥ मृगान्तरे ॥

कश्यपनन्दनः । पुं । गरुडे ॥ इतिहलायुधः ॥ कश्यपस्यनन्दनः ॥

कषः । पुं । पाषाणविशेषे । निकषे । सुवर्णपरीक्षणपाषाणे । कसौटी इतिभाषा ॥ संज्ञादितीक्ष्णीकरणयन्त्रे ॥ कषति । कषहिंसायाम् । प

कषाय

कषणः । पुं । अपक्कः । अलाटौ । गाजने ।
वर्षणे । लोकाघे । कण्डूयने ॥ त्रि ।
कर्षमाणः । त्रि । कण्डूयमाने ॥ त्रि ।
कषाकुः । पुं । अग्नौ । सूर्य्ये ॥
कषायः । पुं । श्लेष्मणि । अट्टचे । रागे । अ
न्तःकरणदोषे । कामक्रोधादिमले
च ॥ क्रियविशेषाभिव्याप्तिचित्तवृत्तेरा
गादिवासनया स्त्रीभावादखण्ड
स्वनवलम्बने । रक्तपीतवर्णयोगे ॥
धवट्टचे । त्रि । तुवररसवति ॥ सु
रभौ । लोहिते । रक्तपीतमिश्रित
वर्णे ॥ पुं । न । क्रोधे । तृतीयांशे ।
क्वाथरसे ॥ यथा त्रिफलाकषयः ।
सप्तच्छदविशेषः । यथा । स्वरसश्च तथा
कल्कः क्वाथश्च हिमफाण्टकौ ज्ञेयाः
कषायाः पञ्चैतेलघवःसूर्य्योत्तरम् ।
अङ्गरागे ॥ विलेपने ॥ कषैला
इतिप्रसिद्धे रसविशेषे । पृथिव्यनिल
गुणबहुत्वात्तस्योत्पत्तिरित्याह-
शिवदासः । तुवरे ॥ कषायोरोप
योग्यादीक्षम्मनःशोधनोऽग्निः क
फमेदोऽसृक्पित्तघ्नो जिह्वालाघ्यकरो
लघुः ॥ कषायिकाख्यम् । कषा० । या
हुस्कादाये ॥
कषायकृत् । पुं । रक्तलोध्रे ॥
कषायजम् । न । संस्कारोपयोगि-

कसनो-

दनि पञ्चवीरद्रुमक्वथिततोये । प्रच्छा
स्यैर्योदुम्बरशिरीषवटसम्भवैः क-
षायजलैरित्युक्ते ॥
कषायितावनाद्धः । पुं । तुवरयावनाल
धान्ये । इतिराजनिर्घण्टः ॥
कषायी । स्त्री । क्षुद्रदुरालभायाम् ॥
कषायी । पुं । सस्तुआ० इति प्रसिद्धे
सालवृक्षे ॥ लकुचवृक्षे ॥ खर्জ্জুरी
वृक्षे । विषये पुं । सरागे ॥
कषिः । त्रि । हिंसके । हिंस्रे । कषति
कष्यते वा । कष° । खनिकषी० क्या
दिना इः ॥
कषी का । स्त्री । पक्षिजातौ ॥ कषति
। कष° । कषिदृषिभ्यामीकन् ।
खनिषे ॥ कषकृष्णयोः पूर्ववद्दीकन् ॥
कष्टम् । न । पीडामात्रे । कृच्छ्रे । व्य
थायाम् ॥ त्रि । गर्हिते ॥ पीडायु
क्ते ॥ जुगुप्सिते ॥ दोषविशेषे ॥ क
ष्टंतदर्थावगमो दुरायत्तो भवेदिति
लक्षणम् ॥ कषतिस्म कष्यतेस्म वा
। कष° । क्त । कृच्छ्रगर्हनयोः क-
षतेर्नेट् ॥
कष्टकारकः । पुं । संसारे ॥ त्रि । पीडा
करे ॥ कष्टस्य कारकः ॥
कष्टस्थानम् । न । पीडाकृत्स्थले । दुः
खजनकस्थाने ॥ कष्टस्य स्थानम् ॥
कसनोत्पाटनः । पुं । वासकवृक्षे ॥ त्रि

कह्लार

। कासग्ने ॥

कसेरुः । पुं । कशेरौ । गुण्डकन्दे । सु कन्दे । भूकरेष्टे ॥

कसेरुकः । पुं । } कशेरुणि ॥
कसेरुका । स्त्री । }

कस्तीरम् । न । रङ्गे । मिश्रटे । वङ्गे ॥

कस्तुरिका । स्त्री । } मृगमदे । कस्तू
कस्तूरिका । स्त्री । } र्याम् ॥

कस्तूरी । स्त्री । मृगमदे । मृगनाभौ । गन्धकोशिकायाम् । लेघमुख्याया म् ॥ कस्तूरिका कटु स्निग्धा क्षारोष्णा शुक्रला गुरुः । कफवातविषच्छर्दिग्रहान्मन्यशोषहृत् ॥ साचत्रिविधा । कामरूपोद्भवा कृष्णा नैपाली नीलवर्णयुक् । काश्मीरीकपिलच्छाया कस्तूरी त्रिविधा मता ॥ कामरूपोद्भवा श्रेष्ठा नैपाली मध्यमा भवेत् । काश्मीरदेशसम्भूता कस्तूरी चाधमा स्मृता ॥ कसति गन्धोऽस्याः । कसगतौ । ख० ङरः । पृषोदरादिः ॥

कस्तूरीमल्लिका । स्त्री । मृगमदवासा याम् ॥

कह्लारम् । न । श्वेतोत्पले । सौगन्धिके ॥ कस्य जलस्यह्लारइव । के ह्लादते वा । ह्लादो० । यथाच्च । पृषोदरादिः ॥

कांस्यम्

कह्लः । पुं । वकपक्षिणि ॥ क इतिशब्दे न के जले वा । ह्लयति । ह्लेञ्स्य ह्रीयां शब्देच । मू० । कः ॥

कांसीयम् । न । कांस्ये ॥ इतिराजनिघण्टः ॥

कांस्यम् । न । वाद्यविशेषे ॥ मानपात्रे ॥ मानभेदे ॥ ताम्ररङ्गमिश्रितधातौ । । ताम्रार्द्धे । वीराटके । वह्निलोहके ॥ ताम्रं त्रपुज माख्यातं कांस्यं घोषञ्च कांसकम् । उपधातुर्भवेत् कांस्यंदग्धो ऽसरणिरङ्गयोः ॥ कांस्यस्तु गुणा ज्ञेया: स्वयोनिसदृशाजनैः । संयोग जप्रभावेण तस्मान्येपिगुणाः स्मृताः ॥ कांस्यं कषायं तिक्तोष्णं लेखनं विशदं सरम् । गुरु नेत्रहितं रूक्षं कफपित्त हरं परम् ॥ * ॥ अथशोधनम् । पत्र स्त्रीकृत्य यत्रानि कांस्यपात्राणी मतापयेत् । निषिञ्चेत्तप्ततप्तानि तैले तक्रेच काञ्जिके ॥ गोमूत्रेच कुलत्थानां कथायेच त्रिधात्रिधा । एवं कांस्यपरी तेष्वविशुद्धिः सम्प्रजायते ॥ * ॥ मारणविधिस्तु । अर्कक्षीरेणसम्मिश्टोगन्धक स्तेनलेपयेत् । समेन कांस्यपत्राणिगुटान्यग्नदग्धे मुंहुः ॥ स तोमूषापुटे धृत्वापचे द्गजपुटेनच । एवंपुटशतात् कांस्यंरीतिस्त्रियतेधुवम् ॥ इतिभावप्रकाशः ॥ कंमोयस्य

काकचि

विकारः कांसीयपरसव्ययेति यञ्। छस्यचलुक्॥
कांस्यकम्। न। कांस्यशब्दार्थे॥
कांस्यकारः। पुं। कंसकारे। कंसेराइति ख्याते जातिविशेषे। शौल्विके। ताम्रकुट्टके॥ कांस्यं करोति। ङुकञ्॰ कर्मण्यण्॥
कांस्यनीखः। पुं। अञ्जनविशेषे। मृदुपाकत्वे। हैमतारे॥
काकः। पुं। आत्मघोषे। वायसे। कर्कटे॥ पीठसर्पिणि। पक्षे॥ वृक्षविशेषे। शिरोऽवचालने॥ परिमाणविशेषे॥ द्वीपविशेषे॥ अतिधृष्टे॥ तिलके॥ न। सुश्रुतग्रन्थे॥ काकानांसमूहः। तस्यसमूह इत्यण्॥ कायति। कै शब्दे। दृगोकापोशल्यतिमर्चिभ्यः कन्॥
काकजङ्घः। पुं। चीनके। चीणा इति प्रसिद्धे धान्ये॥ इतिहेमचन्द्रः॥
काककर्कटी। स्त्री। खर्जूर्याम्॥
काककला। स्त्री। काकजङ्घायाम्॥
काककुष्ठम्। न। कुष्ठे॥
काकमी। स्त्री। मदाकरञ्जे॥
काकचिञ्चा। स्त्री। काकचिञ्चिः। स्त्री। काकचिञ्ची। स्त्री। गुञ्जायाम्॥ काकयति चिञ्चा। गौरादिः॥

काकता

काकच्छदः। पुं। काकच्छदिः। पुं। खञ्जनपक्षिणि॥
काकजङ्घा। स्त्री। स्वनामाख्याते वृक्षविशेषे। काकनासिकायाम्। नदीकान्तौषधौ॥ काकजङ्घा हिमातिक्षा कषाया कफपित्तजित्। निहन्ति ज्वरपित्तास्रज्वरकण्डुविषक्रिमीन्॥ काकलजङ्घायाम्॥
काकजम्बुः। स्त्री। भूमिजम्बाम्॥
काकजम्बूः। स्त्री। काकफलायाम्। काकनीलायाम्॥
काकणम्। न। कुष्ठविशेषे॥ तल्लक्षणं यथा॥ यत्काकणन्तिकावर्णं मर्मार्कतीव्रवेदनम्। विद्रधिलिङ्गं तत्कुष्ठं काकणं नैवसिध्यतीति॥
काकणन्तिका। स्त्री। गुञ्जायाम्॥
काकतालीयम्। न। अवितर्कितसमवे॥ यादृच्छिकन्याये॥ समासाश्रयदृष्टिपर्यादितिछः। अस्मादेवन्यायकादिवार्थेसमासः। सप्तम्युपेतिवा। द्वावि वार्थौ। काकागमनमिव तालपतनमिव। काकतालम्। काकतालमिव काकतालीयम्। उक्तिविषये काकतालशब्दो काकतालसमवेतक्रियावाचिनौ। तत्रकाकागमनं देवदत्तागमनस्योपमानम्। तालपतनं दैवदत्तस्योपनिपातस्य। तालेनतु यःकाक

स्यवध.स देवदत्तस्य दन्तेना वप्रस्योप मानम्। इति वधादिःकाकतालीया दि शब्दवाच्यः सम्पद्यते ॥। काकता लसमागमसदृश श्चोरसमागम इ- ति समासार्थः। तत्प्रयुक्तः काकम रणसदृशस्तु प्रत्ययार्थः ॥

काकतिक्ता। स्त्री। काकचिञ्चायाम्॥

काकतिन्दुकः। पुं। काकेन्दौ। काकपी लुके। माकडाकेन्दु माकडागाव् काकतेदु इतिच गौडभाषा॥ का- कानाम् काकवर्णो वा तिन्दुकः॥

काकतुण्डः। पुं। कालागुरुणि॥

काकतुण्डफला। स्त्री। काकनासाया म्॥

काकतुण्डिका। स्त्री। काकचिञ्चाया म्।

काकतुण्डी। स्त्री। राजरीत्याम्। राजपीतल इति भाषा॥ कौआडो डी इति भाषाप्रसिद्धे वृक्षविशेषे। काकादन्याम्॥

काकध्वजः। पुं। वाडवाग्नौ॥

काकध्वजा। स्त्री। धूमावत्याम्॥

काकनामा। पुं। वकवृक्षे॥ इति रत्न माला॥

काकनासः। पुं। विकङ्कतवृक्षे॥

काकनासा। स्त्री। काकजङ्घावृक्षे॥ काकस्यनीमेव फलमस्या। काक

नासा कषायोष्णा कटुकारस पाक येाः। कफघ्नी वामनी तिक्ता शोथा र्शश्चित्रकुष्ठनुत्॥

काकनासिका। स्त्री। काकजङ्घायाम्। कौवाठोंठी तिख्यातौषधौ॥ रक्तनि वृति॥

काकपक्षः। पुं। शिखण्डके। मस्तकपा र्श्वद्वये केशरचनाविशेषे। पट्टे इति भषा॥ यथा। बालानान्तु शिखा प्रोक्ता काकपक्षःशिखण्डकः इतिच स्रायुधः। काकस्यगरुति॥

काकपदः। पुं। रतिबन्धविशेषे॥ यथा। पादौ द्वौस्कन्धयुग्मस्थौचिबुकाश्लिष्टं भगेखघु। कामयेत् कामुकीं कामी बन्धःकाकपदोमत इति॥

काकपर्णी। स्त्री। मुद्गपर्ण्याम्॥

काकपीलुः। पुं। काकतिन्दुके। कुच ला इति भाषा॥ श्वेतगुञ्जायाम्॥ काकतुण्ड्याम्॥ काकैःपील्यते। पीलुप्रतिष्टम्भे। बाहुलकादु॥

काकपीलुकः। पुं। काकपीलौ॥ का कानाम् पीलुरिव। दूवेप्रतिकृता वितिकन्॥

काकपुच्छः। पुं। पिक्के॥

काकपुष्टः। पुं। कोकिले॥ काकेन पुष्टः॥

काकपुष्पम्। न। ग्रन्थिपर्णे॥

काकमु

काकफलः । पुं । निम्बवृक्षे ॥ इतिराजनिर्घण्टः ॥

काकबलिः । पुं । काकसम्मुदानकान्नादौ ॥

काकभाण्डी । स्त्री । महाकरञ्जे ॥

काकभीरुः । पुं । पेचके ॥

काकमद्गुः । पुं । दात्यूहे ॥

काकमर्दः । पुं । महाकाललतायाम् ॥

काकमर्दकः । पुं । किम्पाके ॥

काकमाचिका । स्त्री । वायस्याम् ॥

काकमाची । स्त्री । वायस्याम् । बहुफलायाम् । सर्वतिक्तायाम् । मकोय इतिभाषा ॥ काकमाची त्रिदोषघ्नी स्निग्धोष्णा स्वरशुक्रदा । तिक्तारसायनी शोथकुष्ठार्शोव्वरमेहजित् । कटुनेवहिता हिक्काछर्द्दिहृद्रोगनाशिनी ॥ काकमाचिजनितं सदु शाकं वेसवारमिश्रितेनसुवासम् । तप्ततैलतलनेन सुपाकं कारयान्न कृतं सुखवासम् ॥ काकान्मञ्चते । सचिधारणोच्चायपूजनेषु । 'कर्मण्यण् । आगमशासनस्यानित्यत्वाच्चनुम् ॥

काकमाता । स्त्री । काकमाच्याम् ॥

काकमुद्गा । स्त्री । मुद्गपर्य्याम् । मुगानी इतिगौडभाषा ॥ ईषत् कम् ईषदर्थेचेतिकोः कादेशः । काकेन ईषज्जलेन मुदं गच्छति । गमश्चेति डः ॥ यद्वा । काकाः मुद्गाः हर्षं प्रापयन्त्याम् ॥

काकयवः । पुं । आगडा इतिगौडभाषा प्रसिद्धे तण्डुलशून्यधान्ये ॥ इतिमहाभारतम् ॥

काकरिपुः । पुं । उलूके ॥

काकरुहा । स्त्री । वन्द्यायाम् ॥

काकरूकः । पुं । स्त्रीजिते ॥ उलूके ॥ दम्भे ॥ क्लिं । नम्रे ॥ भीरुके ॥ निर्दये ॥

काकलम् । न । कण्ठमणौ ॥ पुं । द्रोणकाके ॥

काकलकः । पुं । कण्ठमणौ । ग्रीवाया मुन्नतप्रदेशे ॥

काकलिः । स्त्री । काकल्याम् ॥

काकली । स्त्री । सूक्ष्ममधुरास्फुटध्वनौ ॥ ईषत्कलः काकली । ईषदर्थेचेतिकोः कादेशः । गौरादित्वान्ङीष् ॥

काकलीद्राक्षा । स्त्री । निर्बीजायाम् । रसाधिकायाम् । सुदृक्षायाम् । किसमिस इतिभाषा ॥ इति राजनिर्घण्टः ॥

काकलीरवः । पुं । कोकिले ॥

काकवल्लरी । स्त्री । म्यर्णवल्ल्याम् ॥

काकविष्ठा । स्त्री । काकमले ॥ कर्म

काकवि

काकारः

ण्यनुपादेयत्वेन वैराग्यास्पदे ॥
काकणीर्षः पुं । पक्षिभेदे ॥
काकस्फूर्ज्जः पुं । काकतिन्दुके ॥
काका । स्त्री । काकनासायाम् ॥ काको
ल्याम् ॥ काकजङ्घायाम् ॥ रक्तिका
यामू ॥ काकमाच्याम् ॥ कोकोदु
म्बरिकायाम् ॥ टाप् ॥
काकाक्षिगोलकन्यायः पुं । एकमेव
चक्षुर्गोलक मुभयचक्षुःसम्बन्धिस-
दुभयचक्षुःकार्यकारकमित्यर्थनिष्ठे
दृष्टान्ते ॥
काकोड्डी डी । स्त्री । काकजङ्घायाम् ॥
काकक्षे वाङ्गे नासारुपं फलमस्याः ।
जातेरिति गौरादित्वाङ्ङीष् ॥
काकाण्डः पुं । महानिम्बे ॥ काक
तिन्दुके ॥
काकाण्डा । स्त्री । कोलशिंब्याम् ॥
काकाण्डी । स्त्री । महाज्योतिष्मत्या
म् ॥
काकाण्डोला । स्त्री । कोलशिंब्याम् ॥
काकादनी । स्त्री । गुञ्जायाम् ॥ श्वे
तगुञ्जायाम् ॥ वृक्षविशेषे ॥ छिंच्चा
र्यामू ॥ गृध्रनख्याम् ॥ गौरादित्वा
न्ङीष् ॥
काकायुः । पुं । स्वर्णवल्ल्याम् ॥
काकारः । त्रि । जलस्रावित्वे ॥ कंज
लम् आकिरति हिंसति आङ् पूर्वः ।

काकुत्स्थः

-कर्मणण् ॥
काकारिः । पुं । मेचके ।
काकास्तः । पुं । द्रोणकाके ॥ काको द
तिरेवं जातिः । स्त्री । कः ॥
काकिणी । स्त्री । पणस्य तुर्यांशे । वरा
टकानां दशकद्वये ॥ काठा इति गौड
भाषाप्रसिद्धे मानद्रव्यस्य तुरीयांशे ॥
इति हेमचन्द्रः ॥ कृष्णलतायाम् । रक्ति
कायाम् ॥ एकवरट्याम् । एककौडी
इतिभाषा ॥ उन्मानांशे ॥ उदुम
बरचतुर्थभागे ॥ ककनम् । ककलो
ल्ये । घञ् । कार्कमणति । अण्ग्र
न्थे । अण् ॥ पृषो ॥
काकिनी । स्त्री । पणपादे ॥ पञ्चगण्ड
के ॥ मानपादे ॥ वराटके । उदुम
बरतुर्यांशे ॥ ककनम् । कक० । घ
ञ् । काकमणति । अनप्राणने । अ
। ण्यन्पृषो ॥
काको । स्त्री । वायस्याम् ॥ काकोल्या
म् ॥
काकुः । स्त्री । शोकमीत्यादिभिः का
रकोपादिभिर्वाक्यनेर्विकारे ॥ जि
ह्वायाम् ॥ ककयते । ककलोल्योप
तापयोः ॥ बाहुलकादुण् ॥
काकुत्स्थः । पुं । सूर्यवंशजे पुरञ्जयाख्ये
राजनि ॥ पुरा किल पुरञ्जयो नाम
साक्षाद्भगवतोविष्णोरंशावतारः

काकेक्षुः

कश्चिदैक्ष्वाकोराजा देवैः सह समयबन्धेन देवासुरयुद्धे महोच्चरूपधारिणो महेन्द्रस्य ककुदि स्थित्वापिनाकिलीलया निखिलमसुरकुलं निहत्य ककुत्स्थसंज्ञालेभे इतिपौराणिकी कथाऽनुसन्धेया॥ यथाह रघुवंशे कालिदासः। महेन्द्रमास्थायमहोच्चरूपं यः संयतिप्राप्तपिनाकिलीलः। चकार बाणैरसुराङ्गनानां गण्डस्थलीः प्रोषितपत्रलेखाः इति॥ श्रीरामचन्द्रे॥ ककुत्स्थस्य गोत्रापत्यम्॥ शिवादिभ्योऽ॥ काकुदम्। न। तालुनि॥ जिह्वेन्द्रियाधिष्ठाने। तालुआ इतिभाषा॥ काकुर्जिह्वा सा उद्यतेऽस्मिन्। अनेकार्थत्वाद्दिकृत्वेपणेवर्त्तते। घञर्थे कः। पृषोदरादित्वादेकस्योकारस्यलोपः। शकन्धुवत् परूपंवा। नुदेर्वाऽधिकरणे का॥ पृषोदरादित्वान्नुलोपः॥ ईषत् कवते वा। कुङ् शब्दे। अन्दादित्वात् साधु॥ यद्वा। निश्चेष्टं ककुदंशिरः। ककुदे भवम्। अण्॥ काकुरुतम्। न। विकृतशब्दे॥ काकुस्थतद्भवे॥ काकेक्षुः। पुं। खड्गवृक्षे। इक्षुगन्धास्यवेष्टणे। खांगडा इतिगौडभाषा॥

काकोलः

काश्ये॥ काकेन्दुः। पुं। काकतिन्दुके। कटुतिन्दुके। कुचेला इतिभाषा॥ काकानां काकवर्णो वा तिन्दुः। पृषो॥ काकेष्टः। पुं। निम्बवृक्षे॥ काकोलिका। पुं। काडची इतिगौडभाषाप्रसिद्धे मत्स्यविशेषे। काकोल्याम्॥ काकोची। स्त्री। काकोलिके। मत्स्ये॥ काकोदरः। पुं। सर्पे। नकुलेऽपि॥ काकोकस्येवोदरमस्य॥ ईषदर्थे॥ ईषन्न्यूनं कति। अक०। ईषदर्थे चेतिकोः॥ काहेयः। काकमीपेकुटिलंगतिमत्। उदरमस्य॥ काकोदुम्बरः। पुं। मलयवीम्। अघनेफलार्थाम्। काकडुमुर इतिगौडभाषा। फेगडा फेगुडा इतिपर्वतीयभाषा॥ काकोदुम्बरिका। स्त्री। काकोदुम्बरे। कडम्बरी काष्ठोडुम्बर इतिचरन्ति॥ काकप्रिया उदुम्बरी संज्ञायांकन्॥ काकोलः। पुं। कुलाले॥ द्रोणकाकेऽपि॥ काकयति। कलीलाल्ये। स्वार्थेणयन्तः। याहुलकादौलच्॥ सर्पे॥ शूकरविशेषे॥ काकोली। नामख्यातौषधिविशेषे॥ न। नरकविशेषे॥ पुं। न। कृष्णवर्णेस्थावरविषविशेषे॥

काचसे

काकोलमुग्रतेजःस्यात् कृष्णच्छविमहाविषम् ॥ ईषत् कोलति कुत्सि
तीसंस्त्याने अच् । ईषदर्थे चेतिकोः
कादेशः ॥ स्त्री काकोली । स्त्री अष्टवर्गीयौषधिवि
शेषे । वायसेत्यिताम् । स्वादुमांस्या
दिम् ॥ जायते चीरकाकोली मद्यानेन
॥ दोङ्गवस्थले । यत्स्यात् चीरकाको
ल्यौ काकोलीतत्र जायते ॥ मीवरी
सदृशः कन्दः सचीरः प्रियगन्धवान्
सा प्रोक्ता चीरकाकोली काकोली
लिङ्गमुच्यते ॥ यथास्यात् चीरका
कोली काकोल्यपि तथाभवेत् ए
षाकिञ्चिद्भवेत् कृष्णा भेदोयमुभ
योरपि ॥ काकोलीयुगलं शीतं गुरु
स्वं मधुरं गुरु । हंति वातदाहास्रपि
त्तशोषज्वरार्पहम् ॥ काकोलश्चोल
एडयति । ओलडिउत्क्षेपणे । अन्ये
भ्योपीतिडः । शकंध्वादिः । अस्या
स्थाने अश्वगन्धामूलम् ॥ ।
काकोलूकिका । स्त्री । काकोलूकयोर्वै
रिभावे ॥
काच्चः । पुं । कटाचे । कुत्सितोऽचः
। कुत्सितोचोस्य वा । कापथ्यचयोरि
ति कादेशः ॥
काच्चसेनिः । पुं । अभिप्रतारिनामनि
नृपविशेषे ॥ काच्चसेनस्यापत्यम् ।

काच

अतइञ् ॥ । स्त्री । तुवरिकायाम् । अरह
र इति भाषा ॥ सौराष्ट्रमृत्तिकायां
। इञ् ॥ कच्चिभवा ॥ तत्रभवइत्यण् ।
काच्ची ॥ ।
काच्चीवः । पुं । । शोभाञ्जनवृक्षे ॥
काच्चीवकः । पुं । ।
काणः । पुं । काकेन इति जटाधरः ॥
काणादः । पुं । ने ॥ काणभट्टित्यादयो
भाषाप्रसिद्धे शब्दपचे ॥ यथोक्तं म
न्वकल्पद्रुमोक्तं हनुमल्लक्षणं । भू
जैवाक्षसने रक्ते चौमेषीतिखपचके
। काणदेवाष्टगन्धेन । अक्षगन्धेनवा
पुनः ॥ विगन्धेनाथ वैकेन विलिख्य
धारयेन्नरइति ॥
काण्डचा । स्त्री । इक्षायाम् । काचिद
च्छायाम् । गुरोश्चेत्यकाटाप् ॥
काण्डा । स्त्री । वीणायाम् ॥ इतिशब्दच
न्द्रिका ॥
काचः । पुं । शिक्वो । छींका इतिभाषा
॥ मणौ ॥ नेत्ररोगविशेषे ॥ तस्यल
क्षणम् । अस्मिन्नपित्तमोभूतेनाति
रूढेमहागदे । चंद्रादित्यौ नसूच
यावन्नरीचेचविद्युतः ॥ निर्मलानि
च तेजांसिस्राजिष्णूनीव पश्यति ।
सएषलिङ्गनाशस्तुनीलिका काचसं
ज्ञित इति ॥ चारे । मक्षिकाविशे

काचल

ये । काच इतिभाषा ॥ न । सिक्थ
के । सीथा मैण मोम इतिख्य
भाषा ॥ काचलवणे ॥ कचते कच्यते
ऽनेनाऽ वा ॥ कचबन्धने दीप्तौच ।
घञ् । नकादेरितिकुत्त्वंन ॥ णिज
न्तात् पचाद्यच्वा ॥ कंचते । अच् ।
प्रज्ञादिण् वा ॥

काचकः । पुं । कोचयष्ट्यादौ ॥

काचकूपी । स्त्री । सीसी इति ख्याते
। काचपात्रे ॥

काचकोषः । पुं । खाजटेनाख्ये अपर
एकविशेषे ॥

काचनम् । न । पत्रनिबन्धने ॥ इतित्रि
काण्डशेषः ॥

काचनकम् । न । पत्रनिबन्धने ॥ लेखो
निबध्यते येन तत्र काचनकाभिधे
तिहारावली ॥

काचनकी । पुं । तालिके । लेखे । त्रि
पौ इतिजटाधरः ॥

काचनी । स्त्री । लिखितस्य निबन्धने
। तालिके ॥

काचभाजनम् । न । काचपात्रे । त्रि
काण्डे ॥ काचस्यभाजनम् ॥

काचमलम् । न । काचलवणे ॥

काचलवणम् । न । काचाभ्रमृत्ता इति प्र
सिद्धे लवणविशेषे । नीले । काचे ।
कृष्णलवणे ॥

काचन:

काचसम्भवम् । न । काचलवणे ॥

काचसौवर्चलम् । न । काचलवणे ॥

काचस्त्री । स्त्री । पाटलगाछ इति
गौडभाषा प्रसिद्धे वृक्षे । पाटलाया
म् । फलेवृक्षायाम् ॥ काचपात्रे । का
चस्य चारस्य स्त्री पात्रम् ॥

काचाढ्यः । पुं । कपर्दके काचे । दुरुदके ॥

काजिकः । पुं । काञ्जिके । शीतकुम्भे ॥
छिमडा इति गौडभाषा प्रसिद्धे छे
लवणे । सूचिकें ॥

काञ्चित् । अ । काञ्चन । कांपिल्लीर
ल्यर्थे ॥

काञ्चित: । त्रि । शिक्थारोपिते पदार्थे
। गिर्खिते ॥ काञ्चेघृतम् । प्रोतिप
दिकाद्वात्स्वर्थे इति णिच् । क: ॥

काञ्चिमः । पुं । देवकुलोद्भववृक्षे । भ
ल्लातरो इतिविकाण्डशेषः ॥

काञ्चुः । त्रि । कञ्चुदेशोद्भवे ॥ कञ्चु
देशभवः । अण् ॥

काञ्चनः । पुं । कचनार इति प्रसिद्धे
रक्तश्वेतभेदेन द्विविधे वृक्षविशेषे
। तस्यायस्य पर्यायाः । रक्तपुष्पः । को
विदारः । युग्मपत्रः । कुद्दालः ॥
द्वितीयस्य । काञ्चनारः । कर्णिकारः ।
पाकारि रिति ॥ चम्पके । नागके
अरे ॥ उदुम्बरे ॥ धुस्तूरे ॥ न । स्व
र्णे । हेम्नि ॥ लिङ्गस्त्रे । अकारेकारे

काञ्चनी

॥ धने ॥ नागकेशरपुष्पे ॥ काञ्चति
॥ काचिदीयौ । नन्द्यादित्युः ॥
काञ्चनकः । पुं । शालेर्जातिविशेषे ॥
। कोविदारवृक्षे ॥ न । हरितालै ॥
काञ्चनकदली । स्त्री । स्वर्णकदल्याम्
॥ चाँपाकेला इति गौडभाषा ॥
काञ्चनकारिणी । स्त्री । अतमूल्याम् ॥
काञ्चनचीरी । स्त्री ॥ चीरिणीलता
यां ॥
काञ्चनगिरिः । पुं । सुमेरुपर्वते ॥
काञ्चनपुष्पकम् । नी । आहुल्यवृक्षे ।
हलराख्ये । सुपुष्पे ॥
काञ्चनपुष्पी । स्त्री । गणिकारीवृक्षे ॥
काञ्चनारः । पुं । कोविदारे । युगप
त्के ॥ काञ्चनारो हिमोग्राही तुव
रश्लेष्मपित्तनुत् । कृमिकुष्ठगुदभ्रंस
गण्डमालाव्रणापहः ॥ कोविदारो
पि तद्वत्स्यात् तस्य पुष्पं लघु स्मृतम् ।
रूक्षं सङ्ग्राहिपित्तास्रप्रदरक्षयकास
जित् ॥
काञ्चनाह्वः । पुं । कोविदारे ॥
काञ्चनाह्वयः । पुं । चाम्पेये । नाग
केशरे ॥ काञ्चनाह्वया आह्वयो
यस्य ॥
काञ्चनी । स्त्री । हरिद्रायाम् ॥ गोरो
चनायाम् ॥ स्वर्णचीरीवृक्षे ॥ काञ्
च्यतेऽनया । काचिदीयादौ । क

काञ्चिक

रणेतिल्युट्ङीष् ॥
काञ्चनीया । स्त्री । गोरोचनायाम् ॥
काञ्चिः । स्त्री । काञ्च्याम् ॥ काञ्चते ।
। काचिदीप्तिबन्धनयोः ॥ संबंधात्तु
भ्यइन् ॥
काञ्चिकम् । न । काञ्जिके । आरनाले
॥ इवन्तात्संज्ञायांकन् ॥
काञ्ची । स्त्री । सप्तपुर्यन्तर्गतपुरीविशे
षे ॥ यथा । शिवकाञ्चीविष्णुकाञ्ची
काञ्चीयुग्मञ्चसम्मतम् । एतासुपृथि
वीमध्ये न गण्यन्तेकदाचन ॥ एताः
सप्तपुर्यः ॥ काशीशिवविष्णुलक्ष्मिका
ञ्ची हरिहरोत्तमिका । वामदेविगाह
स्तीभ्यांदधार द्विजपुङ्गवाइतिभूत
गुद्दितन्त्रम् ॥ चन्द्रहार गोटि इति
गौडभाषाप्रसिद्धे स्त्रीकट्याभरणे ।
मेखलायाम् । तत् पर्यायाः । सप्त
की । रसना । सारसनमिति ॥ के
चित्तु एकयष्टिर्भवेत् काञ्ची मेखला
त्वेष्टयष्टिका । रसनाषोडशश्रेणी क
लाप. पञ्चविंशकः ॥ इति भेदंपठन्ति
। इयत्तभेदात् पर्यायता ॥ गुञ्जाया
म् ॥ कृदिकारादितिवाङीष् ॥
काञ्चीपदम् । न । जघने ॥ इतिहला
युधकोषः ॥
काञ्जिकम् । न । आरनाले । अम्लि
सोमे । धान्याम्ले । काँजी इतिभा-

षा ॥ काञ्जिकं रोचनं रुच्यं पाचनं वह्निदीपनम् । शूलाजीर्णविबन्धघ्नं कोष्ठशुद्धिकरं परम् ॥ नभवेत्काञ्जिकं यत्र तत्र भाक्तिः प्रदीयते ॥ संहितं धान्यमण्डादिकाञ्जिकं कथ्यते बुधैः ॥ काञ्जिकं भेदि तीक्ष्णोष्णं रोचनं पाचनं लघु । दाहज्वरहरं स्पर्शात्पानाद्वातकफापहम् ॥ माषादिवटकैर्यत्तु क्रियते तद्गुणाधिकम् । लघुवातहरं तत्तु रोचनं पाचनं परम् ॥ शूलाजीर्णविबन्धामनाशनं बस्तिशोधनम् ॥ धान्योल्वमच्छतरयाम निशारिष्टारिशुण्ठीरजोलवणजीरकसंस्कृतंयत् । आवासितं सुरभिहिङ्गुकणेनयत्नात्तेनाशुशुक्तिकणो धिकतांप्रयाति ॥ एलामहौषधविभावितमौषिमन्थं संसिद्धमामकरमदकाञ्जिकंयत् । मन्दं विवर्द्धयति जाठरपीतिहोर्चनिर्वाणदीपमिवगन्धकचूर्णयोगः ॥ काञ्जिकं रुचिदं हृद्यं स्वल्पमग्निकरंपरम् । वातहृद्बल्यमेध्यं गुर्वाहारस्यपाचकम् ॥ अपिच । काञ्जिकं दधितैलन्तुवल्लीपलितनाशनम् । दाहकं गात्रशैथिल्यंवर्ण्यंसन्तर्पणंपरम् ॥ मद्यनाशनभक्षणात् ॥ अपिचः कुल्माषधान्यमण्डेन-चाभृतंकाञ्जिकम्भवेत् ॥ यन्मस्दा-

दिशुक्तैर्भाण्डेसगुडंचोद्रकाञ्जिकम् । धान्यरोगविरावस्थंशुक्तंचुक्रंतदुच्यते ॥ अम्लूयक्षादौ । संज्ञायामितिभावेक्वुन् । यात्क्लिर्यनिर्देशे वा । काञ्जिकाअस्य ॥ काञ्जिकवटकः । पुंसि काँजीवरा इति लोके ॥ तस्यपाकप्रकारोयथा । माषान्यनीनूतेनाधार्य्य कटुतैलेनलेपिता । निर्मलेनांबुना पूर्य तत्रां चूर्णंविनिःक्षिपेत् ॥ राजिकाजीरकवणहिङ्गुशुण्ठीनिशाकृतम् । निःक्षिपेद्वटकांस्तत्र भाण्डस्यास्यंमुद्रयेत् ॥ ततोदिनत्रयादूर्द्धमम्लाःस्युर्वटकाध्रुवम् ॥ काञ्जिकवटकोरुच्यो वातहरःश्लेष्मकारकःपीतः । दाहं शूलमजीर्णं हरतेनेवामयेप्वहितः ॥ इति ॥

काञ्जिका । स्त्री । जोवन्तीलतायाम् ॥ पलाशीलतायाम् ॥ सार्षपदण्डैः कृतेव्यञ्जनान्तरे ॥ सार्षपीकन्दली सूक्ष्मास्वण्डितास्निग्धभाजने । स्थापितामण्डसहितात्वथवातण्डुलोदके ॥ सप्तरात्रात् परन्तुक्तांततः सम्यक् प्रजायते । तस्मादेवसमाकृष्य तत्खेद्वाप्रलेहयेत् ॥ काञ्जिकेतिसमाख्याताशूद्रधर्मोपजीवकैः । सार्षपस्य गुणाःपित्तेचाक्षाअपिकीर्त्तिः

काण्डः

तोः ॥ [illegible] ॥

काञ्जी । स्त्री । महाद्रोणावृक्षे ॥

काठः । पुं । पाषाणे । अश्मनि ॥

काठकम् । न । कठानान्धर्मे आम्नाये समूहे । चरणेभ्योधर्मवदिति गोच । चरणाद्युञ् ॥

काठिन्यम् । न । कठिनतायाम् । यथा । वाच्यतां समयेतीतः स्पष्टमग्रे भविष्यति । इतिपीठयतांग्रन्थे काठिन्यंकुवर्त्तत इतिकलिविडम्बनम् ॥

काठिन्यफलः । पुं । कपित्थवृक्षे ॥

काणः । पुं । काके । वायसे ॥ त्रि । एकचक्षुषि । काणा इति भाषा ॥ यो गविशेषे । यथा । रवौज्येष्ठे सोमेऽभिजित् भौमे पूर्वाभाद्रपदा बुधेऽश्विनी भरणीच गुरावार्द्रा शुक्रेऽघा शनौचित्राचेत् काणयोगोभवति ॥ कणनिमीलने । अस्मात् घञ् ॥

काणूकः । पुं । करटे । वायसे ॥ कणति । कण° । सकणिभ्यामूकोकणादित्यूकण् ॥

काण्डः । पुं । न । स्तम्बे । तृणादिगुच्छे ॥ तरुस्कन्धे । गुड्डा इतिभाषा ॥ वाणे । शरे ॥ अवसरे । प्रस्तावे । प्रकरणे ॥ कुत्सिते ॥ वृक्षविशेषे । अङ्कोठे ॥ नाडीवन्दे । नाले ॥ वर्गे । परिच्छेदे ॥ वृन्दे । समूहे ॥ रक्षसि । निर्जनस्थाने ॥ क्रोडशरुक्तप्रमाणे दण्डे ॥ आधायाम् ॥ प्रापीयसि ॥ कनति । कनीदीप्तौ । । ञमन्ताट्टः । क्रादिभ्यःकित् । अनुनासिकस्येतिदीर्घः ॥ कणति कण्यते वा कणशब्दे । डः । बाहुलकादीर्घः ॥ न । सन्धिविच्छिन्नैकखण्डास्थनि ॥

काण्डकटुकः । पुं । कारवेल्ले ॥

काण्डकाण्डकः । पुं । काशतृणे ॥

काण्डकीलकः । पुं । लोहे ॥

काण्डगुण्डः । पुं । दीर्घकाण्डे । कशे । कट्टणे ॥ गुण्डनामतृणे ॥

काण्डगोचरः । पुं । नाराचे । लौहमयेबाणे ॥

काण्डतिक्तः । पुं । भूनिम्बे । चिरायता इतिभाषा ॥

काण्डनीलः । पुं । लोभे ॥

काण्डपटः । पुं । तिरस्करिण्याम् ॥ दृष्यादोलम्बिनि वायुसञ्चारार्थे पटविशेषे । चिक् सिर्की इतिचभाषा ॥ कनात इतिच ॥

काण्डपुङ्खा । स्त्री । शरपुङ्खायाम् ॥

काण्डपुष्पम् । न । दौना इति भाषा प्रसिद्धे क्षुद्रसुगन्धिपुष्पविशेषे ॥

काण्डपृष्ठः । पुं । वैश्यापतौ । । सुनान्तरे ॥ व्यकुलं पृष्ठतः कृत्वा योवैप

काण्डीरः

रकुलंत्रनेत्रे तेनेदुश्चरितेनासौ । काण्डपृष्ठ इतिस्मृतः॥ न । कर्णधनु र्यि॥ काण्डानि शस्त्राणि पृष्ठे यस्य ॥ त्रि । शस्त्राजीवे॥

काण्डकृष्ठा । स्त्री । कटुकायाम् ॥

काण्डर्षिः । पुं । वेदकाण्डविशेषाध्यापके जैमिन्यादौमुनिविशेषे ॥ इति विकाण्डशेषः ॥

काण्डवान् । त्रि । काण्डीरे । बाणधारके ॥ तीरन्दाज इतीतरभाषा ॥ काण्डोबाणोऽस्यास्ति । मतुप् ॥

काण्डवारिणी । स्त्री । दुर्गायाम् ॥ यथा । मत्तगजघटाटोपसंयुगे नरवाजिनाम् । स्मरणाद् वारते बाधान् तेनसा काण्डवारिणीति देवीपुराणे देवीनिरुक्ति नामा ४५ ऽध्यायः ॥

काण्डसन्धिः । पुं । ग्रन्थौ ॥

काण्डस्पृष्ट । पुं । काण्डपृष्ठे । शस्त्राजीवे ॥ स्पृष्टं गृहीत काण्ड शस्त्रंयेन । वाहिताग्न्यादित्वादिति परनिपातः ॥

काण्डहीनम् । न । भद्रमुस्तके ॥

काण्डका । स्त्री । लङ्घायाम् । करालविपुटायाम् ॥ वालुकीनामकर्कव्याम् ॥

काण्डीर । त्रि । काण्डवति ॥ काण्डो बाणोऽस्यास्ति । काण्डाण्डादीरन्नी

कातर्य्य

रचौ ॥ पुं । अमामार्गे ॥ काण्डवेल इति गौडभाषाप्रसिद्धेखिताग्रभेदे । कारवल्याम् ॥

काण्डीरा । स्त्री । भक्षिप्तायाम् ॥

काण्डीरी । स्त्री

काण्डेचुः । पुं । कोकिलाक्षे । तालमखाणा इतिभाषा ॥ काशतृणेऽपि । काण्डेक्षुरिव ॥

काण्डोलः । पुं । पिटे । कण्डोलेऽपि ॥ स्वार्थिकः प्रत्ययः ॥

काण्व । पुं । यजुर्वेदीयशाखाविशेषे ॥ कण्वस्य गोत्रापत्यम् । काण्व्यः । गर्गादियञ् ॥ काण्व्यस्य छात्राः । कण्वादिभ्योगोत्रेऽण् । कण्वोदेवतास्य ॥

कातरः । त्रि । अधीरे । व्यसनाकुले । रोगादिनाऽऽकुलमनसि ॥ भीते ॥ विषण्णे ॥ ईषत्करति । पचाद्यच् । ईषदर्थेचेति कोः कादेशः ॥ पुं । कातलामाख इतिगौडभाषाप्रसिद्धे मत्स्ये ॥

कातराक्षी । स्त्री । चकितनेत्रायाम् । मृगलोचनायाम् ॥

कातर्य्यम् । न । अधीरतायाम । केवलायांनीता ॥ यथा । कातर्यं केवलानीति. शौर्यं स्वापदचेष्टितम् । अत. सिद्धिंसमेताभ्यामुभाभ्यामन्विये

ष सः ॥ भावेष्यञ् ॥

कातलः । पुं । मत्स्यविशेषे । कातला इ
तिभाषा ॥ कातलोमधुरश्लेष्मा
गुरुपाकीत्रिदोषकृत् ॥

कात्तृणम् । न । रोहिषतृणे ॥

काप्यः । पुं । काप्यायनमुनौ ॥ कप
स्यापत्यम् । गर्गादित्वात् यञ् ॥

काप्यायनः । पुं । धर्मशास्त्रकर्तृमुनि
विशेषे ॥ व्याकरणवार्त्तिककारे । व
रुचौ ॥ कप्यस्यापत्यम् । फक् ॥

काप्यायनी । स्त्री । उमायाम् । दुर्गा
याम् ॥ कापायवस्त्रार्हवृद्धविधवाया
म् ॥ काप्यायन्यर्हवृद्धायाकापायव
सनाऽधवेत्युक्तेः ॥ कतस्यऋषेरपत्यम् ।
गo यञ् । सर्वत्रलोहितादिकतन्तेभ्य
इतिष्फः । यित्त्वान्ङीष् ॥

काप्यश्चिकः । त्रि । कथञ्चिदर्थे ॥ वि
नयादित्वात्स्वार्थेठक् ॥

काथिकः । पुं । कथायांसाधौ ॥ कथा
दिभ्यष्ठक् ॥

कादम्बः । पुं । यालिहांस इतिगौड
प्रसिद्धे कलहंसपक्षिणि । नीलकं
ठेऽयमितिरघुव्याख्यानेमल्लिनाथः ॥
बाणे । इषौ ॥ कदति । कदिः सौत्रः
। कदेर्णित्पक्षिणीत्यम्बच् ॥ कद
म्बेसमूहेभवः । अण् ॥

कादम्बकः । पुं । बाणे । सायके ॥

कादम्बरः । पुं । दध्नेर्दधिसरे ॥
न । कदम्बपुष्पोद्भवेमद्ये ॥ कादम्बं
कदम्बजातंरसंरातिरा० । आत
इतिकः ॥ मल्लिनाथस्तु दधिसरमि
तस्तटावितिमाघश्लोकव्याख्यावसरे
कादम्बइत्युः । कादम्बः कलहंसे
ष्वोरितिविश्वः । 'कादम्बं रातिर
त्नयोरभेदाल्लातिप्रकृतित्वेनादत्ते
इतिकादम्बरमेवम् । पानसद्राक्ष
माधूकं खार्जूरन्तालमेवम् इति
स्मरणात् । आत इतिकः इत्याह ॥

कादम्बरी । स्त्री । कोकिलायाम् ॥ भा
रत्याम् । सरस्वत्याम् ॥ शारिका
पक्षिणि ॥ मदिरायाम् । हस्तिप्रिया
याम् ॥ कुत्सितमम्बरम् । कुगति
तिसमासः । कोःकन्तत्पुरुषेचि ।
कदम्बरंनीलाम्बरमस्यास्ति । अर्
श्आद्यच् । तस्येयम् । तस्येदमित्यण् ।
ङीप् ॥ यद्वा । कदम्बेजातोरसःकाद
म्बः । तद्जातइत्यण् । कादम्बंग
तिं । रादाने । आतोनुपेतिकः ।
गौरादित्वान् ङीष् ॥

कादम्बर्यः । पुं । कदम्बद्रुमे ॥

कादम्बा । स्त्री । मुण्डीतिख्यातायाम्
दम्बपुष्पायाम् ॥

कादम्बिनी । स्त्री । मेघमालायाम् ॥
कादम्बाः कलहंसाः बलाकावन्मेघ

कानीनः

मनुष्यन्ति ते सन्त्यस्याः । इनिः ॥ कदम्बस्यविकारः कादम्बः। सोऽस्य स्याः कार्य्यत्वेनेतिवा ॥

कादाचित्कम्। त्रि। कदाचिद्भवे ॥

कादृवेयः। पुं। नागे। नराकारे फणा स्वादूदकवति सर्पेभ्योऽन्यस्मिन् देव योनौ॥ कद्रूः अपत्यम्। स्त्रीभ्योढक्। ढेलोपोऽकद्रूः ॥ युवादित्वा द्वाढक्॥

कानकम्। नं। जयपालबीजे ॥

काननम्। न। वने ॥ गृहे ॥ ब्रह्मणो मुखे ॥ कानयति। कनीदीप्त्यादौ। युच्ल्युट्वा ॥ कञ्चलम् अननं जीव नमस्येतिवा ॥

काननारिः। पुं। अग्नौ ॥ इतिशब्द चं० ॥

कानीनः। पुं। पाराशर्ये। वेदव्यासे ॥ कर्णे। कुन्तीज्येष्ठपुत्रे ॥ त्रि। कन्य काजाते ॥ कन्यायद्यूढा तदाजोढुरे वपुचः। यथाह मनुः। पितृवेश्मनि कन्यातुयं पुत्रं जनयेद्रहः। तंकानी नं वदेन्नाम्नाजोढुः कन्यासमुद्भवमिति ॥ कन्यायद्यनूढापितृगृहएवति ष्ठति तदा ततपुत्रो मातामहस्यैव । यथाह याज्ञवल्क्यः। कानीनः कन्यकाजातो मातामहसुतोमत इति ॥ कन्यायाअपत्यम्। कन्या

कान्तः

यांकनीनचेत्यण् ॥

कानीयसः। त्रि। कनीयसि ॥ स्वार्थे ऽण् ॥

कान्तः। पुं ॥ पत्यौ ॥ लोहे ॥ चन्द्रसू र्य्ययोः पर्य्यायान्तः कान्तः शिलायाम्। यथा। चन्द्रकान्तः सूर्य्यकान्तः म यस्कान्त इति ॥ वसन्तर्त्तौ ॥ विष्णु सवृक्षे ॥ कदाचिदाधोलक्षितापुं रूपाकृष्णविग्रहा। वंशीनादविनो देन करोति विवशं जगदित्यादि पुराणवाक्यात् त्रिपुरसुन्दर्यवतार त्वेनातिसुन्दरे श्रीकृष्णचन्द्रे वा सुदेवे॥ अभिरूपतमदेहधारित्वा त् त्रिपरार्द्धान्ते कस्यब्रह्मणोऽन्तोय स्मादितिवा। त्रिपरार्द्धावसानेकंब्रह्माणमन्तयतिनाशयतिवा ॥ न। कुङ्कुमे ॥ लौहविशेषे ॥ तस्यल०। यथा। स्वादुर्यत्र भवेन्निम्बकल्को रा त्रिन्दिवोषितः। कान्तंतदुत्तमं य च्छल्येणावर्त्तितं मिलेत्। तस्यप रीक्षा यथा। पात्रेयस्मिन् नसरति जलेतैलबिन्दुर्निपिक्तोविद्रं गन्धंवि सृजतिनिर्जं रुपितं निम्बकल्कैः। पाकेदुग्धं भजतिशिखराकारतांनै तिभूमौ कान्तंलोहं तदिदमुदितं ल क्षणोक्तं नचान्यदिति सुश्रुतोयः ॥ त्रि। मनोरमे। शोभने ॥ अभीष्टे

कान्तलो

॥ गृहविशेषे ॥ काम्यतेस्म । कमु कान्तौ । क्तः । यस्यविभाषेतिनेट् । अनुनासिकस्येतिदीर्घः ॥ कनति स्म वा । कनीदीप्तिकान्तिगतिषु । गत्यर्थेति क्तः ॥

कान्तपची । पुं । मयूरे ॥

कान्तपुष्पः । पुं । कोविदारवृक्षे ॥

कान्तलकः । पुं । नन्दीवृक्षे । ओंद इति गौडभाषा प्रसिद्धे । तुन्ने ॥ काम्यते । कमु० । मतिबुद्धि पूजार्थेभ्यश्चेतिक्तः । लकति । लकआस्वादने । अच् । कान्तश्चासौलकश्च ॥

कान्तलोहः । पुं । न । अयस्कान्ते । कान्तीसार इति प्रसिद्धे लौहे ॥ अस्य परीक्षा । यत्पात्रे नप्रसरतिजले तैलबिन्दुः प्रतप्ते क्षिप्तुर्गन्धंत्यजतिच निजांतिक्ततां निम्बकल्कः । रात्रंदुग्धं भवति शिखराकारकं नैतिभूमिं कृष्णाङ्गःस्यात् सजलचषकः कान्तलोहंतदुक्तमिति ॥ अस्यगुणाः । गुल्मोदरार्शः शूलाममामवातभगन्दरम् । कामलाशोथकुष्ठानि चयं कान्तमयोहरेत् ॥ प्लीहानमम्लपित्तञ्चयकृच्छ्रापिशिरोरुजम् । सर्वान् रोगान् विजयते कान्तलोहंनसंशयः ॥ बल वीर्यबपुःपुष्टिंकुरुते ऽग्निंविवर्द्धये दिति ॥

कान्ति:

कांन्ता । स्त्री । नार्य्याम् ॥ स्त्रीविशेषे । सर्वाङ्गसुन्दर्याम् ॥ भोगेवीर्यंधनं पूर्वंमनः कुटिलभाषणैः । कान्ता हरति सर्वस्वं कः स्तेनस्ताद्दशोऽपरः ॥ प्रियङ्गुवृक्षे । फलिन्याम् ॥ नागरमुस्तायाम् ॥ रेणुकायाम् ॥ वृक्षदेलायाम् ॥ काम्यतेस्म । कमु० । णि ङ् । भावेक्तः । टाप् ॥

कान्ताङ्घ्रिदोहदः । पुं । कान्ताचरणदोहदे । अशोकवृक्षे ॥

कान्तायसम् । न । अयस्कान्ते ॥

कान्तारः । पुं । कोविदारवृक्षे ॥ इचु विशेषे । कतारा इतिभाषा ॥ कान्तारेचुगुरुर्दंद्यः श्लेष्मलोवृंहणःसरः ॥ न । उपसर्गादेः ॥ कानने ॥ अजाविशेषे ॥ पुं । न । महारण्ये ॥ दुर्गमवर्त्मनि ॥ विले ॥ कान्ताश्चरायस्य ॥ यद्वा । कस्य जलस्य सुखस्य वा । अन्तः । कान्तं मनोज्ञम् गच्छति इयर्त्ति वा । कर्मण्यण् ॥

कान्तारकः । पुं । काजलि आङ्ग इति गौड भाषा प्रसिद्धे इचु विशेषे ॥ कान्तारंसमश्नुते । पचाद्यच् । कर्मण्यण् ॥ स्वार्थे कन् वुञ्वा ॥

कान्तारी । स्त्री । कान्तारके ॥

कान्तिः स्त्री । शोभायाम् । दीप्तौ ॥ अभिलाषे । इच्छायाम् ॥ स्त्रीणांगृहार

लेगुणविशेषे । सौन्दर्ये ॥ काम्यते अनया वा । कामनंवा । कमु° । क्तिन् । अनुनासिकेति दीर्घइति केनचि दुक्तंतन्न । काम्यतीति तेनविग्रही तत्वात् । तत्राङ्क्त्वाखिड्निमित्त इडुः सम्भवात् । आयादयइतिखिड भावेवावेाध्यम् ॥

कान्तिदन् । न । पित्ते ॥ त्रि । कान्यु त्पादके । शोभादायके ॥

कान्तिदा । स्त्री । वाकुच्याम् । सोमरा ज्याम् ॥

कान्तिदायकम् । न । कालीयकवृक्षे ॥ त्रि । कान्तिप्रदे ॥

कान्यिकः । त्रि । कन्यायाम्भवे ॥ यैषि कः कन्यायाष्टक् ॥

कान्दर्पिकम् । न । वाजीकरणे ॥ यथा रक्ते ऽधिके स्त्री पुरुषस्तु शुक्ले न पुंसकंशोणितशुक्रसाम्ये । यस्मादतः शुक्रविवृद्धिदानि निषेवितव्यानिरसायनानि ॥ धर्म्यपृष्ठ मृदुनाथरश्मयः सेात्यलंमधुमदालसाप्रिया । यक्षकीस्मरकथारतः स्वजोवर्गएष मदनस्य वागुरा ॥ माषीकधातुमधुपारदलोहचूर्णैपथ्याशिलाजतुविडङ्गएतानियेा ऽधात् । सै कानि विंशतिरयानि जरान्वितोपिसाग्री निकोपिरम्यस्यवयस्तांयुनेय ॥ क्षीरं

श्रितंयः कपिकच्छुमूलैः पिबेत्पचयं स्त्रीषुनसेाभ्यु पैति । माषान् पयः सर्पिषिवाविपक्वान्षड्ग्रसिमात्रांश्च पयेानुपानात् ॥ विदारिकायाः स्वरसेन चूर्णंमुहुर्मुहुर्भावितशेषितञ्च । एतेनदुग्धेनसशर्करेणपिबेत् सयस्य प्रमदाः प्रभूताः ॥ धात्रीफलानां स्वरसेन चूर्णं सुभावितं चौद्रसिताज्ययुक्तम् । लीढ्वानुपीत्वाच पयेा ऽनिशञ्चाकामाग्निकामः पुरुषोनिषेवेत् ॥ क्षीरेण वत्सादण्डयुजाश्रितेन सम्ग्राह्यकामी बहुश स्तिलान्यः । सुशेोपितानत्तिपिबेत् पयश्चतस्याग्रतः किंचटकः करोति ॥ माषस्यूपसहितेनसर्पिषा षष्टिकौदनमद्नन्तियेनराः । क्षीरमप्यनुपिबन्तितासुते शर्वरीषुमदनेनशेरते ॥ तिलाश्वगन्धाकपिकच्छुमूलैर्विदारिकाषष्टिकपिष्टयेागाः । आजेनपिष्टाः पयसाप्तेनपक्वा भवेच्छुक्लिकान्तिहृद्या ॥ क्षीरेणवागेाचुरकोपयेागं विदारिकाकन्दकभक्षणं वा । कुर्वन्नसीदेद्यदिजीर्यतेस्म मदानिनाचेदिदमत्रचूर्णम् ॥ साजमेादलषण्डशर्करीतकीगृध्रनेरसष्टिताच पिप्पली । मधुतक्तरलेाष्णधारिभिश्चूर्णपानमुदराग्निदीपनम् ॥

कापटि

अत्यम्लतिक्तलवणानि कटूनि वर्जयेत् यः चारशाकयवकुलत्थनिषभोजनानि द्विदलगुर्वीर्यरहितः स करोत्यनेकव्याजान् जरन्निव युवाप्यवलाम्बाप्येति॥

कान्दवम् । न । मिठाई पकवान इति प्रसिद्धे भक्ष्ये ॥ कन्दौ संस्कृतम् । संस्कृतभक्ष्याद्यर्थे अण् ॥

कान्दविकः । त्रि । आपूपिके । पूपविक्रयकर्त्तरि । भक्ष्यकारे ॥ कान्दवं पण्यमस्य । तदस्य पण्यमितिठक् ॥

कान्दिग्भूतः । त्रि । कान्दिशीके ॥

कान्दिशीकः । त्रि । भयद्रुते । भीत्या पलायिते । कान्दिशंयामीत्याद्य । तदाद्येतिमात्रशब्दादिभ्यउपसङ्ख्यानमितिठक् । पृ० ॥

कान्यकुब्जम् । न । पुरविशेषे । गाधिपुरे । कुशस्थले । महोदये । कनौज इति भाषा ॥

कान्यजा । स्त्री । नलीनामगन्धद्रव्ये ॥

कापटिकः । त्रि । शठे ॥ पुं । छात्रे ॥ परमर्म्मज्ञे । पञ्चवर्गेषु प्रथमे ॥ न परमर्म्मज्ञः प्रगल्भश्छात्रः कपटव्यवहारित्वात् कापटिकः । संदृश्यधिनमर्घमानाय्या मुपगूह्य रहसि राजा ब्यात् यद्यदुष्टंपश्यसि तत् तदानीमेव मयि वक्तव्यमिति ॥ कपटे

कापिलः

नचरति । ठक् ॥

कापट्यम् । न । कपटभावे ॥

कापथम् । न । उशीरे ॥ पुं । व्यर्थे निन्द्यवर्त्मनि । कुत्सितः पन्थाः । कुगतीतिसमासः । ईषदर्थेचेति कोः कादेशः । कुमार्गोपीयन्मार्गो भवति । इत्यमरेणपथशब्देन समासेन पुंस्त्वंनिर्वाह्य पथिन्शब्देन समासे कापथ्यचयोरितिकादेशेपथः सङ्ख्याव्ययादेरितिक्लीबत्वंभवति॥

कापालः । पुं । कपालियाकडा इतिगौडभाषा प्रसिद्धेकर्कटाख्ये ॥ न । अष्टादशकुष्ठान्तर्गतवातिककुष्ठे । पश्यकपालम् ॥

कापालिकः । पुं । कपालि इतिगौडभाषाप्रसिद्धेवर्णसङ्करजातौ । अन्त्यजविशेषोयम् ॥ सिद्धान्तोचारिविशेषे ॥ यथा । अथतीर्थकराग्र्याणांप्रतस्रे कापालिकजालकंविजेतुमितिशङ्करविजयः ॥ अस्यस्वरूपं यथा । नरास्थिमालाकृतभूरिभूषणः श्मशानवासी नकपालभोजनः । पश्यामि योगांजनशुद्धदर्शनो जगन्निषेधोभिन्नमभिन्नमीश्वरादिति ॥ अस्यधर्मोयथा । मन्त्रिपुत्रकृतवस्तुभिचारितमहामांसाहुती शुंभतांवन्हौ ब्रह्मकपाल कल्पितसुरामाने

न नः पारणा । सदः कृत्तिकठोरक
ण्ठ विगलल्लोहितधारोच्चये रक्तो
नः पुरुषो महारवखिभिर्देवो महा
भैरवः इति प्रबोधचन्द्रोदयः ॥ कपा
लिकेव । शर्करादिभ्योऽण् ॥
कापाली । स्त्री । विडङ्गायाम् ॥
कापित्थम् । न । दाधित्थे ॥ कपित्थस्या
वयवोविकारोवा । अनुदात्तादेरञ् ॥
कापित्थः । पुं । सोड्डुम्बशाखायाम् ॥ पि
ङ्गलवर्णे ॥ त्रि । पिङ्गलवर्णवति ॥
न । उपपुराणविशेषे ॥
कापिशम् । न । मद्ये ॥
कापिशायनम् । न । मद्ये । मधुनि ॥
देवतायाम् ॥ कापिश्यांजातादि ।
कापिश्यायक् ॥
कापिशायनी । स्त्री । द्राक्षायाम् ॥ पि
शाच् ङीष् ॥
कापिशेयः । पुं । पिशाचे ॥
कापुरुषः । पुं । कुपुरुषे ॥ कुत्सितः पु
रुषः । विभाषापुरुषहृतिकादेशः ॥
ईषत् पुरुषोवा ॥
कापेयः । पुं । गौनकर्यौ । कपिगोवो
त्पन्ने ॥ इतन्वानिञ् इतिढक् ॥ त्रि ।
कपिसम्बन्धिनि ॥ न । कपित्वे ॥ क
र्मे. कर्मभावोवा । कपिष्ठाद्यो ढक् ॥
कापोतम् । न । कपोतसमूहे ॥ कपो

तानांसमूहः ॥ अनुदात्तादेरञ् ॥
सौवीराञ्जने ॥ कपोतस्येदम् । क
पोतवर्णत्वात् । तस्येदमित्यण् ॥ पुं
रुचके ॥ कपोताभवर्णे ॥ सर्जिका
क्षारे ॥ कपोतवर्णोऽस्यास्ति । ज्यो°
त्रादि ॥ त्रि । कपोताभवर्णवति ॥ क
पोतस्यावयवोविकारोवा । प्राणिर
जतादिभ्योऽञ् ॥
कापोताञ्जनम् । न । सौवीराञ्जने ।
स्रोतोञ्जने ॥ कापोतञ्च तदञ्जन
ञ्च ॥
काप्यकरः । पुं । काप्यकारे ॥
काप्यकारः । पुं । स्वयंकृतं पापं चित्ते
आधायैव कथयति तस्मिन् । स्वपा
पवक्तरि ॥
काफलः । पुं । कट्फले ॥
काम । अ । अभ्युच्चायाम् ॥
कामम् । न । रेतसि ॥ इष्टानतिक्रमे
। निकामे ॥ काम्ये ॥ वाढे ॥ अनुम
तौ ॥ पुं । इच्छायाम् ॥ अनुरागे ॥
फलदृष्णायाम् ॥ तत्तदृष्टेष्टविष
याभिलाषे ॥ पुंसोयाविषयामेच्छा
कामइतिभण्यते । पुमांसादोकाम
मयश्वभूत्वाश्वकर्मकृत् । यतोयंकर्म
णोहेतुः कामोतोग्रप्रधानता ॥ अका
मस्यक्रियाकाचिद्दृश्यते नेष्टकर्हि
चित् । यद्यद्धिकुरुतेकिञ्चित्तत्तत्का

कामम्

मस्यवेष्टितम्॥ बाह्यादिभेदात् का
मस्त्रिविधः। बाह्योगृहचेष्टादिः १
आन्तरोमनोराज्यरूपः २ वासना
मात्ररूपस्तृतीयः ३ ॥ इन्द्रियाधिष्ठा
ने ॥ अत्रैः काम्यमानैश्चाब्दादि
विषयेषु॥ विषयभोगे ॥ स्त्रीपुंस
योः परस्परव्यतिकरामिलाषेच्छ-
त्यन्तनिरूढः कामशब्दः॥ स्त्रीसङ्गे
॥ अस्मात् सङ्कल्पादिदंमेस्यादित्येव
रूपे॥ आप्तेप्सितविषयः प्रीप्तिका
रणामानेपि प्रार्थितामित्याकारेचि
त्तवृत्तिविशेषे ॥ रतिमात्रहेतुः का
मः॥ शास्त्रानुमतजायापुत्रवित्तादि
विषयेऽभिलाषः॥ मोहनस्तम्भना
कर्षणवशीकरणमारणोच्चाटनादिः
॥ दिव्यमानुषभेदात् द्विविधः कामः
॥ कर्म्मफले ॥ कामयितव्ये॥ दिरंसा
याम्॥ रतौ॥ त्रयोदशाङ्गे॥ कामस्तु
ब्रह्मणोहृदयाज्जातः॥ यथा। हृदि
कामोभ्रुवोःक्रोधोलोभश्चाधरदच्छ
दादिति श्रीभागवतम्॥ मन्मथराज
चूते॥ कामदेवे। स्मरे॥ अस्त्रयाना
नि यथा। पादाङ्गुष्ठेप्रतिपदि तिती
यायाञ्चगुल्फके। ऊरुदेशे तृतीया
यां चतुर्थ्यां भगदेशतः॥ नाभिस्था
नेचपञ्चम्यां षष्ठ्यान्तुकुचमण्डले। स
प्तम्यांहृदयेचैव चाष्टम्यां कण्ठदेशतः

कामकृ

॥ नवम्यांकर्णदेशेचदशम्यांचौष्ठदेश
तः॥ एकादश्यांगण्डदेशे द्वादश्यांन
यनेतथा॥ त्रयोदश्यांचतुर्दश्यां
श्यांललाटके॥ पौर्णमास्यांशिखाया
श्च ज्ञातव्यंच इतिक्रमात्॥ दक्षेपुं
सांस्त्रियावामेशुक्ले कृष्णेविपर्ययः॥
यत्रस्थाने वसेत् कामस्तत्रैव लक्षयेत्
क्षणम्। मन्त्रेणानेनकर्त्तव्यं ज्ञातव्यं
रतिकोविदैः॥ क्रान्यतेऽनेन। क
मु०। पुंसिसंज्ञायामिति घः॥ यद्वा
कामयते। अचादच्॥ किमनम्।
कामेर्घञर्थे॥ क्रियांगा॥
कामकला। स्त्री। रतौ। कामदेवप
त्न्याम्॥ मुखंविन्दुंकुचेति ख्या
नोक्तगतिप्रभेदे॥ चन्द्रस्यषोड
शकलास्तिस्रएव कामस्यकलाः॥
कामकामी। चि। अत्रे। काम्यान्विषया
न् कामयितुं शीले॥
कामकारः। पुं। कामतःप्रवृत्तौ। स्वे
च्छायाम्॥ कामंकरोति। कृञ्०
कर्म्मण्यण्॥
कामकारतः। अ। स्वेच्छामात्रेणेत्यर्थे
॥
कामकूटः। पुं। वेश्याप्रिये॥ वेश्यायां
विश्रमे॥
कामकृत्। चि। कामकारके॥ कामा
न्करोति। कृञ्०। क्विप्॥

कामकेलिः । पुं । सुरते ॥ त्रि । पिङ्गे ॥
कामक्रोधपरायणः । त्रि । कामक्रोधाभ्यां सदापरिगृहीते ॥ कामक्रोधौ परमयेन आश्रयोयस्य ॥
कामखड्गदत्ता । स्त्री । स्वर्णकेतक्याम् ॥
कामगामी । त्रि । कामङ्गामिनि ॥
कामगिरिः । पुं । भारतवर्षस्थपर्वतविशेषे ॥ सतुकामरूपदेशे वर्त्तते ॥
कामगुणः । पुं । रागेः ॥ विषयेषु । आभोगे ॥
कामङ्गामी ॥ त्रि । कामचरे । अनुकामीने ॥ कामंयथेच्छं गमनशीलः ।
कामजित्यव्ययम् । सुपीतिणिनिः ॥
कामचारः । पुं । कामाचारे ॥ स्वतन्त्रतायाम् ॥
कामचारी । त्रि । कामुके ॥ स्वच्छन्दे । स्वेच्छाचारिणि ॥ कलविङ्के ॥ पुं । गरुडे ॥
कामचारिपुरम् । न । देवपुरविशेषे ॥
कामजानः । पुं । कोकिले । पिके ॥
कामतालः । पुं । कोकिले । वनप्रिये ॥
कामतिथिः । स्त्री । त्रयोदश्याम् ॥
कामदः । त्रि । कामिके । अभीष्टदे ॥ न । दक्षिणस्यां दिशिविख्याते वनविशेषे ॥ कामान्ददाति । दुदाञ्० आत इतिकः ॥
कामदा । स्त्री । कामधेनौ । टाप् ॥

कामदुघा । स्त्री । कामधेनौ ॥ कामान् दुग्धे दोग्धिवा । दुहःकर्मण्यण् । तिदुहेःकप् प्रत्ययोर्घश्चान्तादेशः ॥
कामधरः । पुं । कामरूपस्थमत्स्यध्वजपर्वतस्थे सरोवरे ॥
कामधुक् । स्त्री । समुद्रमथनोद्भवायां वसिष्ठमुनेः कामधेनौ ॥ धेनूनांमध्येसा भगवतो विभूतिः कामान् दोग्धि । दुहः क्विप् ॥ त्रि । कामप्रदे ॥ यथा । एकः शब्दः सुप्रयुक्तः स्वर्गलोकेकामधुग् भवतीत्यृतिः ॥
कामदूतिः । पुं । कामदूतिकायाम् ॥
कामदूतिका । स्त्री । नागदन्त्याम् ॥ पाटलायाम् ॥
कामदूती । स्त्री । पाटलावृक्षे ॥ कामदूतिकार्थे ॥
कामधेनुः । स्त्री । कामदुघि । स्वर्गवि ॥ वशिष्ठधेनौ ॥
कामध्वंसी । पुं । शिवे ॥ कामं ध्वंसयति । ध्वंसुं० सुपीतिणिनिः ॥
कामनः । त्रि । कामुके ॥ अनुदात्तादेश्चेतिणिउन्नाल्कमेर्युच् ॥
कामना । स्त्री । इच्छायाम् ॥ टाप् ॥
कामन्यमी । पुं । कांस्यकारे ॥
कामपत्नी । स्त्री । रतौ ॥ कामस्यपत्नी ॥

कामपरीतः । त्रि । कामातुरतया विपरीतबुद्धौ ॥

कामपालः । पुं । वसुदेवे ॥ कामान् पालयति । पालरक्षणे । कर्मण्यण् ॥

कामप्रदः । पुं । भगवति । वासुदेवे ॥ कामानां पुरुषार्थानांप्रदः ॥ रतिबन्धविशेषे । यथा । द्वौ पादौ स्कन्धसंलग्नौ चिह्नाच्छिद्रभगे तथा । कामयेत् कामुकः प्रीत्यावन्धःकामप्रदोहिसः इति ॥

कामप्रवेदनम् । न । स्वाभिप्रायाविष्करणे ॥

कामफलः । पुं । महाराजाम्रवृक्षे ॥

कामभाक् । त्रि । कामार्हे ॥

कामम् । अ । अनुमतौ ॥ प्रकामे ॥ पर्य्याप्ते ॥ असूयायाम् ॥ अनुगमने ॥ अकामानुमतौ । स्वच्छन्दार्थे । आदावनिच्छायां पश्चादङ्गीकारे ॥ कामयते । कर्मणिण्ड्यन्तादम् ॥

काममहः । पुं । चैत्र्याम्पूर्णिमायाम् ॥

कामयमानः । त्रि । उशति । याच्यति ॥

कामयानः । त्रि । अर्थिनि ॥ कामुके ॥

कामयाना । स्त्री । गर्भिण्याम् ॥

कामयिता । त्रि । कामुके ॥ कामयते । कमु° । णिजन्तात् तृच् ॥

कामरूपः । पुं । काँवरु इतिप्रसिद्धे देशे । प्राग्ज्योतिषे ॥ कालेश्वरं श्रेष्ठं गिरिं चैपुरं नीलपर्वतम् । कामरूपाभिधो देशो गणेशगिरिमूर्द्धनि ॥ तत्र कामगिरौ योनिपीठे कामाख्या देव्यस्ति । यथा । योनिपीठं कामगिरौ कामाख्या तत्र देवते च्युपक्रम्य सर्वत्र विरजा चाहं कामरूपे गृहे गृहे इतितन्त्रचूडामणौ पीठमाला ॥ त्रि । मनोज्ञरूपे ॥ स्वेच्छारूपे ॥

कामरूपिणी । स्त्री । अश्वगन्धावृक्षे ॥

कामरूपी । पुं । विद्याधरे ॥ जाङ्गलकणौ ॥ त्रि । मनोज्ञरूपिणि ॥ स्वेच्छारूपिणि ॥ सर्वं भागुं विचेतव्यं हरिभिःकामरूपिभिरितिरामायणम् ॥ कामतोरूपाण्यस्य । इनिः ॥

कामरेखा । स्त्री । वेश्यायाम् ॥

कामलः । पुं । वसन्तकाले ॥ मरुभूमौ ॥ त्रि । कामुके ॥ पुं । स्त्री । रोगविशेषे ॥ तस्यनिदानसम्प्राप्तिलक्षणानियथा । पाण्डुरोगीच योऽत्यर्थं पित्तलानि निषेवते । तस्य पित्तमसृङ्मांसंदग्ध्वारोगाय कल्पते ॥ । हारिद्रनेत्रः स भृशंहारिद्रत्वङ्नखाननः । रक्तपीतशकृन्मूत्रोभेकवर्णोहतेन्द्रियः ॥ दाहाविपाकदौर्बल्यसदनारुचिकर्षितः । कामलाबहुपित्तेपाकोष्ठशाखान्त्रयामता ॥

अस्यौषधंयथा । फाल्गुनिकामदतावा सातिक्ताभूनिम्बनिम्बजः । क्वाथः क्षौद्रयुतोहन्यात् पाण्डुरोगंसकामलमिति । कालान्तरात् खरीभूता कृच्छ्रात्साध्यकुम्भकामला ॥ तस्या रिष्टलक्षणम् । छर्दिरोचकहल्लास ज्वरक्लमनिपीडितः । नश्यति श्वास कासार्त्तो विड्भेदी कुम्भकामली ॥ कृष्णपीतशकृन्मूत्रो भृशंशूनेक्षणमानवः । सरक्तासितमुखच्छर्दिर्विण्मूत्रो यश्चताम्यति ॥ दाहारुचितृडानाहतन्द्रामोहसमन्वितः । नष्टाग्निसंज्ञःक्षिप्रंहि कामलावान् विपद्यते इति ॥ मरीचतिलपुष्पाभ्यामञ्जन कामलापहमिति गारुडे १८७ अध्यायः ॥

कामलता । स्त्री । शिग्रे ॥ इतिहेम चन्द्रः ॥

कामला । स्त्री । कामले रोगे ॥

कामलायनः । पुं । उपकोसलाख्यमुनौ ॥ कमलस्यापत्यम् । नडादित्वात् फक् ॥

कामलिका । स्त्री । कद्रुधान्ये ॥

कामवती । स्त्री । दाक्षदरिद्रायाम् ॥

कामवल्लभः । पुं । आम्रे ॥

कामवल्लभा । स्त्री । ज्योत्स्नायाम् ॥

कामवृक्षः । पुं । मन्दारे ॥

कामवृद्धिः । पुं । कामज इतिकर्षाट देशप्रसिद्धे क्षुपविशेषे । मदनायुधे । कान्दर्पजीवे ॥

कामवल्ली । स्त्री । पाटलायाम् ॥

कामशरः । पुं । आम्रे ॥

कामसखः । पुं । वसन्तकाले ॥

कामसुतः । पुं । अनिरुद्धे ॥

कामसूत्रम् । न । वात्स्यायनादिकाम सम्बन्धप्रतिपादकशास्त्रे ॥

कामहैतुकम् । न । कामातिरिक्तका रणशून्ये ॥

कामाख्या । स्त्री । कामरूपदेशे देवी स्थाने ॥ सतीदेहेनावतीर्णाया म हादेव्या यत्रयोनिमण्डलं पतितम् कालिकापुराणेच यत्रमहदर्शनंतत् त्रिपुरभैरव्याःस्थानम् । यथोक्तंदे वीगीतायाम् । श्रीमत्त्रिपुरभैर व्याः कामाख्यायोनिमण्डलम् । भू मण्डलेचेन्नरत्नंमहामायाधिवासित म् ॥ नातः परतरं स्थानं क्वचिदस्ति धरातले । प्रतिमासं भवेद्देवी यत्र साचाद्रजस्वला ॥ तत्रत्यादेवताः सर्वाः पर्वतात्मकतां गताः । पर्वतेषु वसन्त्येव महत्त्योदेवताअपि ॥ तत्र त्यापृथिवीसर्वादेवीरूपामृतायुधैः । नातः परतरंस्थानं । कामाख्यायो निमण्डलादिति ॥ नामकारणं

यथा । श्रीभगवानुवाच । कामार्थं मागता यस्मान् मया सार्द्धं महागिरौ । कामाख्या प्रोच्यते देवी नीलकूटे रहोगता ॥ कामदा कामिनी कामा कान्ता कामाङ्गदायिनी ॥ कामाङ्गनाशिनी यस्मात्कामाख्या तेनचोच्यतइति कालिकापुराणम् ॥

कामाङ्गजः । पुं । नखे ॥ शिग्रे ॥ व्या । घनखद्वययुक्ते वा स्त्रीणामाभूषणे ॥

कामाङ्गः । पुं । आम्रवृक्षे ॥

कामातुरः । त्रि । कामार्त्ते ॥

कामात्मजः । पुं । अनिरुद्धे ॥

कामात्मता । स्त्री । फलाभिलाषशीलत्वे ॥ कामात्मनो भावः । तल् ॥

कामात्मा । पुं । कामस्वभावे । कामाकुलचित्ते ॥ काम्यमानविषयप्रतताकुलचित्तत्वेन काममये ॥ कामेफलतृष्णाया आत्मा यस्यसः ॥

कामाधिष्ठानम् । न । इन्द्रियमनोबुद्धिषु ॥ इन्द्रियाणि मनोबुद्धि रस्याधिष्ठान मुच्यते ॥

कामानशनम् । न । अनाशकेतपसि ॥ तपोनानशनात् परम् । कामानासनशनम् । रागद्वेषरहितैरिन्द्रियैर्विषयाणां सेवनं यदृच्छालाभसन्तुष्टत्वमितियावत् ॥

कामान्धः । पुं । कोकिले ॥ त्रि । कामेनविवेकहीने ॥

कामान्धा । स्त्री । कस्तूर्य्याम् ॥

कामायुधः । पुं । महाराजभृत्ते ॥ न । कामदेवास्त्रे ॥

कामायुष्टः । पुं । गरुडे ॥

कामारिः । पुं । विटमोचिकधातौ ॥ श्री सदाशिवे । महादेवे ॥

कामार्त्तः । त्रि । कामपीडिते । कामातुरे ॥

कामालुः । पुं । रक्तकोविदवृक्षे ॥

कामावशायिता । स्त्री । शिवस्यैश्वर्यान्तर्गते ऐश्वर्यविशेषे । सत्यसङ्कल्पतायाम् ॥ कामान् अवशेते । श्रीङोणिनिः । कामावशायिनो भावः । तल् प्रत्ययः ॥

कामावसायिता । स्त्री । कामावशायितायाम् ॥ कामान् अवस्यति तिष्ठतीत्यर्थे स्यतेर्णिनिः । भावेतल् ॥

कामावसायित्वम् । न । अष्टैश्वर्यान्तर्गतैश्वर्यविशेषे । सत्यसङ्कल्पतायाम् ॥ यथास्यसङ्कल्पो भवति भूतेषु तथैवभूतानि भवन्ति । अन्येषां निश्चयानिश्चेतव्यमनुविधीयन्ते योगिनस्तु निश्चेतव्याः पदार्था निश्चयेमिति । कामान् स्वेच्छया अवसाययितुं निश्चेतुं शीलमस्य । स्यतेर्णिनिः

कामिनी

। भावे त्वः ॥

कामाख्यः । पुं । राजभे

कामिः । पुं । कामुके ॥ स्त्री । रत्याम् ॥

कामिकः । पुं । कारण्डवेखगे ॥ न । काम्ये । काम्यमानभोगमोक्षप्रयोजने विधिपूर्वके कर्मणि ॥ त्रि । कामदे । अभीष्टफलप्रदे ॥

कामित. । त्रि । इच्छिते । वाञ्छिते ॥ कामः सञ्जातोऽस्य । तारा० इतच् ॥

कामी । पुं । परमात्मनि ॥ पूर्णकामत्वात् कामोऽस्यास्ति । इनिः ॥ कामुके ॥ चक्रवाके ॥ पारावते ॥ चटके ॥ संसारिणि ॥ चन्द्रे ॥ रूपभेषधौ ॥ सारसखगे ॥ अवश्यङ् काम्यते । कामुकान्तो । आवश्यकेति ग्रन्थादि त्वाद्धाणिनिः ॥

कामिनी । स्त्री । अतिशयकामयुक्तायांनार्याम् । सवर्णासवर्णयोरतायाम् ॥ भीरुस्त्रियाम् ॥ स्त्रीसामान्ये ॥ चन्द्रायाम् ॥ दारुहरिद्रायाम् ॥ मदिरायाम् ॥ अवश्यं काम्यते । कामेः पूर्ववत्सिनिः ॥ भूयान् कामोऽस्यस्या. । अतइनिर्वा ॥

कामिनीपुष्पः । पुं । वृक्षविशेषे । न । आर्द्रके ॥ कामिन्याः पुष्पम् ॥

कामिनीशः । पुं । शोभाञ्जनवृक्षे ॥ विदग्धनायके ॥

काम्पिल्यः

कामिसहः । पुं । स्मरोत्सवे ॥

कामीनः । पुं । रामपूगे । सुरेवटे ॥ त्रि । कामानुरूपिणि ॥

कामुकः । पुं । अशोकपादपे ॥ अतिमुक्तके । माधवीलतायाम् ॥ चटके ॥ त्रि । कामने । कामयितरि । कामिनि । स्त्रीसुखासक्ते ॥ कामयते तच्छीलः । ण्वुलतृचौ इत्यादिनाकमेरुकञ् प्रत्ययः ॥

कामुककान्ता । स्त्री । अतिमुक्तकलतायाम् ॥

कामुका । स्त्री । इच्छावत्त्याम् । धनादीच्छायुक्तायाम् ॥ कामयते तच्छीला । उकञन्ताट्टाप् ॥

कामुकी । स्त्री । मैथुनेच्छायुक्तायाम् । वृषस्त्रियाम् ॥ जानपदकुण्डगोणीत्यादिनाङीप् ॥

कामेषुः । पुं । फलकामे । सकामे ॥ काममात्मनिच्छतीति तथा ॥

कामेश्वरी । स्त्री । कामाख्यापञ्चमूर्त्यन्तर्गतमूर्त्तिविशेषे ॥

कामोदकम् । न । स्नेहाद्येनम्वेच्छयादत्तोदके ॥

कामोदा । स्त्री । रागिणी विशेषे ॥

काम्पिल्य. । पुं । गुण्डारोचनिकायाम् । कंपीला इति भाषा ॥ उत्तरदेशविशेषे ॥ कम्पिलाया अदूरभवः ।

काम्बोजः

सङ्काशादित्वात् यञः ॥

काम्पिल्लः । पुं । काम्पिल्यार्थे ॥ काम्पिल्लः कफपित्तास्रकृमिगुल्मोदरव्रणान् । हन्तिरेची कदुष्णश्च मेहानाहविषाश्मजित् ॥

काम्पिल्लकः । पुं । } काम्पिल्यार्थे ॥
काम्पिल्लका । स्त्री । } उत्तरजनपदविशेषे ॥

काम्पीलः । पुं । } काम्पिल्यार्थे ॥
काम्पीलकः । पुं । }

काम्बलः । पुं । कम्बलावृतरथे ॥ कम्बलेन परिवृतो रथः । परिवृतो रथ इत्यण् ॥

काम्बविकः । पुं । शङ्खवलयादि कर्त्तरि । शाङ्खिके । शङ्खकारे ॥ कम्बुशिल्पमस्य । शिल्पमितिठक् । शाम्बूतिक भूतिनिर्देशात् कादेशोऽनित्यः ॥ काम्बोर्विकारो ऽस्यास्तीतिठन्वा ॥

काम्बुका । स्त्री । अश्वगन्धायाम् ॥

काम्बोजः । पुं । कम्बोजदेशजेऽश्वे ॥ सोमवल्के ॥ पुन्नागवृक्षे ॥ कम्बोजदेशोद्भवे प्रथमतःक्षत्रिये पश्चाद्वितक्रियालोपादिना शूद्रत्वमापन्ने दस्युपदवाच्ये । सतुयवनतुल्योक्षे च्छजातिविशेषः । अस्यसगररानेन सर्वे शिरोमुण्डनङ्कृतम् । यथा । अहं शकानां शिरसोमुण्डयित्वा व्यसर्ज

काम्यदा

यत् । यवनानांशिरः सर्वं काम्बोजानां तथैवचेति हः ॥ पुं । न । वल्ल चखदिरे । पपरियाखैर इतिभाषा ॥ काम्बोजेषु देशेषुभवः । तत्रभवश्चार्थे । कच्छादित्वात् । काम्बोजोऽभिजनोऽस्यवा । सिंध्वादित्वात् ॥

काम्बोजी । स्त्री । माषपर्ण्याम् । हयपुच्छाम् ॥ दुष्पदिरे ॥ गुञ्जायाम् ॥ वाकुच्याम् ॥ काम्बोजेषुभवा । अण् । ङीप् ॥

काम्यम् । न । अन्तःकरणशुद्धावनुपयोगिनि कर्मविशेषे । फलकामनयाचोदिते ॥ यथा । यत्किञ्चित्फलमुद्दिश्य यत्तदानजपादिकम् । क्रियते कायिकंयच्च तत्काम्यंपरिकीर्त्तितमिति ॥ वि । कमनीये । सुन्दरे ॥ कामनाविषयेस्वर्गादौ ॥ कामोस्त्रियन्न । अन्यत्रापीति यप् ॥ यद्वा । काम्यते । कमु० । ऋचोयत् ॥

काम्यकर्म । न । स्वर्गादीष्ट साधने ज्योतिष्टोमादौ । फलोद्देशेनविधीयमाने कर्मणि ॥ काम्यञ्च तत्कर्म चेतिविग्रहः ॥

काम्यदानम् । न । प्रवारणे ॥ फलकामनयादाने ॥ यथा । अपत्यविजयैश्वर्यस्वर्गार्थं यत् प्रदीयते । दानंतत्काम्यमाख्यात मृषिभिर्धर्मचिन्तकैरि

कायचि

ति गरुडपुराणम् ॥ काम्येनेच्छया काम्यस्य सुहृदादेष्टस्य वरस्त्रीहस्त्य स्वादे र्वादानम् ॥

काम्यफलम् । न । आर्थिक्यांशुद्धौ ॥ प्राधान्येन फलं शुद्धिरार्थकी काम्य कर्मणः । आर्थिकी शुद्धिः काम्यकर्मणः प्राधान्येन फलम् ॥

किमूत। अ। वितर्के ॥ किम्च ऊतच अनयोः समाहारः ॥

किम्पचः। वि। किम्पचाने ॥ किम्पचति। पचाद्यच्। किंक्षेपइतिसमासः ॥

किम्पचानः। वि। कृपणे ॥ किञ्चित् पचति। आणादिकआनजितिस्त्रीमी ॥ किम्पचति। ताच्छील्येचानशानच्वा। अनित्यमागमशासनमितिनमुक्। किंक्षेपइतिसमासः ॥

किम्पाकः। पुं। आकान्त इतिगौरादिभाषाप्रसिद्धमहाकालखतायाम् ॥ तत्फले ॥ वि। अन्ने ॥ माहशासिते ॥

किम्पुरुषः। पुं। किन्नरे ॥ किञ्चित् पुरुषसितो वा पुरुषः। किंक्षेपइतिसमा

किंयाहः

स्तः । कुत्साचकिंशब्देऽलोक नीया ॥ लोकभेदे । जम्बूद्वीपखण्ड वखण्डान्तर्गते हिमाचल हेमकूटयो मैध्यवर्त्तिनि वर्ष ॥

किंपुरुषार्यता । स्त्री । कुत्सितपुरुषा र्थत्वे ॥ प्रपञ्चस्यपुरुषार्थत्वेन सत्य स्वप्रतिपादने भयनिवृत्त्यभावात्कु त्सितत्वम् ॥

किंपुरुषेशः । पुं । कुवेरे ॥ किंपुरु किंपुरुषेश्वरः । पुं । षाणामीशः ईश्व रोवा ॥

किंपूरुषः । पुं । किन्नरे ॥ न । वर्षभे दे ॥

किंप्रभुः । पुं । कुत्सितेप्रभौ । आस जनादिताड्यवणकारिणि ॥ कुत्सि त प्रभुः । किंचेपइति समासः ॥

किंभरा । स्त्री । नलीनामगन्धद्रव्ये ॥

कियान् । त्रि । किंपरिमाणविशिष्टे ॥ किंपरिमाणमस्य । किमिदंभ्यांवा घडति वतुप् । यस्यचघः । इदङि भोरीश्कौ । यस्येतिलोपः ॥ कास ङ्खा परिमाणमस्यवा । किमः स ङ्ख्यापरिमाणे डतिचेतिवतुप् वा । वस्यघः ॥ स्त्री । कियती ॥ न । कियत् ॥

कियदेतिका स्त्री । उत्साहे । उद्योगे ॥

कियाहः । पुं । रक्तवर्णलोध्रे ॥ इतिहेम

किरात

चन्द्र[illegible]

किरः । पुं । वराहे । शूकरे ॥ किरति । क्विचेभे । इगुपधज्ञाकीरिकः ॥

किरकः । पुं । लेखके ॥ बालशूकरे ॥

किरणः । पुं । सूर्ये ॥ अर्केन्दुदीधितौ ॥ कीर्यते । क्विचेभे । किपूर्वाज्जि न्दिनिधाञ्भ्यः क्युरितिक्युः ॥

किरणमाली । पुं । सूर्ये ॥ किरणानां माला सास्त्यस्य । व्री० इनिः ॥

किराटिका । स्त्री । किराटो इतिख्या ते सारिकाखगे ॥

किरातः । पुं । अरण्यचरेम्लेच्छजाति प्रभेदे । किरातदेशोद्भवे पूर्वङ्कचि ये पश्चाद्विहितक्रियालोपाद्ब्राह्मणा दर्शनेनच शूद्रतामापन्नेदस्युपदवा च्ये ॥ देशविशेषे ॥ तत्तुकुण्डंसमार भ्य रामचेद्रान्तकं शिवे । किरातदे शो देवेशि विन्ध्यशैलेऽवतिष्ठति ॥ घोटकरचके ॥ अल्पतनौ ॥ भूनि म्बे ॥ यथा । किरातः सारकोरुचः शीतलस्तिक्तकोलघुः । सन्निपातव रश्वासकफपित्तास्रदाहनुत् ॥ कास शोपहृपाकुष्ठव्रणकृमिप्रणुदिति ॥ किरति । क्विव० । इगुपधेतिकः । चेतति । अतसा० । अच् । किरस्या सावतस्य ॥

किरातक । पु । भूनिम्बे ॥ किरातको

किर्म्मी

न्योनेयाश्च: सोऽर्हति कौक्वरोलूकः ॥ किरातस्य स्वार्थेकः ॥

किरातिका: । पुं । चिरायता इति प्र सिद्धे वृक्षे । भूनिम्बे । अनार्यतिक्ते ॥ किरातदेशे अस्ति जन्मस्थान म स्य । अर्शआद्यच् । किरातस्यैवेति तस्य च ॥

किराताधी । पुं । गरुडे ॥

किराति: । स्त्री । गङ्गायाम् ॥ इतिज टाधर: ॥

किरातिनी । स्त्री । जटामांस्याम् ॥

किराती । स्त्री । दुर्गायाम् ॥ गङ्गाया म् ॥ कुट्टन्याम् ॥ चामरधारि-ण्याम् ॥

किरि: । पुं । भूदारे । शूकरे ॥ किर ति । ह्वविक्षेपे । ह्वगृशृपृकृटिभिदि च्छिदिभ्यइति इप्रत्यय: ॥ ऋकृ प्यादिभ्य: इति भावे कुत्वा ॥

किरिटि । न । किञ्जल्कफले ॥

किरीट: । पुं । न । मुकुटे ॥ किरति कीर्यतेऽनेनवा । ह्वृ° । ह्वाहृकृ गिर्भ्य: कीटन् । शिरोवेष्टने ॥

किरीटी । पुं । अर्जुनपाण्डवे ॥ वि । किरीटवति ॥ किरीटोऽस्त्यस्य । इ नि: ॥

किर्म्मी । स्त्री । पक्षाग्रे ॥ शाखायाम् ॥

किल्बिषि

हेमपुत्त्याम् । स्वर्णपुत्तलिकायाम् ॥ सोऽपुत्तलिकायाम् ॥

किर्म्मीर: । पुं । नागरङ्गवृक्षे ॥ राक्षस विशेषे ॥ कर्बुरे ॥ वि ॥ कर्बुरवर्णव ति ॥ कीर्यते । ह्वृ° । ह्वाहृकृ बहुल काद्ह्वृगृपृकटिपटिशौटिभ्यईरन्नि तिईरन्मुडागमश्च ॥

किर्म्मीरजित् । पुं । भीमसेने ॥

किर्म्मीरत्विष् । स्त्री । नागरङ्गवृक्षे ॥

किर्म्मीरभित् । पुं । भीमसेने ॥ कि र्म्मीरम् भिनत्ति । भिदिर° । क्विप् ॥

किर्म्मीरसूदन: । पुं । भीमसेने ॥ कि र्म्मीरं सूदयति सूदितवान् वा । सूदृ क्षरणे । नन्द्यादिभ्यात् ल्यु: ॥

किल । अ । वार्त्तायाम् ॥ सम्भाव्ये ॥ अनुनयार्थे ॥ निश्चये ॥ प्रसिद्धाप माणद्योतके ॥ सत्ये ॥ हेतौ ॥ ऋचौ ॥ अलीके ॥ व्यङ्गरणे ॥ किलति । किलश्वैत्ये । ह्वगुएधेतिक: ॥

किलकिञ्चितम् । न । स्त्रीणांविला सविशेषे । इष्टजनदर्शनस्पर्शनाद् गुप्तरुदितहसितत्रसितक्रोधश्रमा भिलाषाणां सङ्करकरणरूपे भावे । गृह्णारभावजायांक्रियायाम् । तल्लक्ष णं यथा । अमरुदितगीतादिष्वामि श्यंकिलकिञ्चितमिति ॥ बोधायुद्ध-

किलासी

र्भोद्भेदः सङ्करः किलकिञ्चित-मितिच ॥ अपिच । गर्वाभिलाषरुदित-स्मितासूयाभयक्रुधाम् । सङ्करीक-रणमेतत् स्मादुच्यते किलकिञ्चितमि-त्यलङ्कारकौस्तुभः ॥

किलकिला । स्त्री । हर्षस्वने । सिंह-नादे ॥ वानराणांशब्दानुकरणे ॥

किलाटः । पुं । क्षीरविकृतौ ॥ नष्टदु-ग्धस्य पक्वस्य पिण्डः प्रोक्तः किलाट-विधिः ॥ दधिकूर्चिकातक्रकूर्चिकयोः पिण्डे ॥

किलाटी । पुं । वंशे । बाँस इति भाषा ॥ इतिहारावली ॥

किलाटी । स्त्री । क्षीरविकृतौ । कूर्चि-कायाम् ॥

किलासम् । न । श्वेतकुष्ठे इति ख्याते सिध्मरोगे । त्वक्पुष्पे ॥ किलति । किलश्वैत्यक्रीडनयोः । इगुपधे-तिकः । असति । असुचे० । अच् । किलश्च तदसच्च ॥ यद्वा । केलन-म् । भि० अड । किलमस्यति । अण् । किलेनश्वैत्येन असति वा । अस-दीसौ । अच् ॥

किलासमः । पुं । कांकरोल इतिगौड-भाषा प्रसिद्धे वृक्षविशेषे । कर्कोट-के । तिक्तपत्रे । सुगन्धके ॥

किलासी । वि । सिध्मले । किलासरो-

किल्ली

गवति ॥ किलासमस्यास्ति । इन्दो-पतापेति । इनि प्रत्ययः ॥

किलि । अव्य । कण्ठकूजिते ॥

किलिकिला । स्त्री । सिंहनादे । जित-शत्रुवधदर्पस्य प्रीतेश्च पूरणीकृतेः । वी-रस्यगर्जितंसिंहनादः किलि किला-तथे तिविश्वः ॥

किलिकिलितम् । न । औत्सुक्यगर्जिते ॥

किलिञ्जः । पुं । किलिञ्जके । वीरणादिकटे ॥ किल्यतेनेन । किल० । इगुपधादि-तिरिन् । वेत्रवीरणादेः किलेर्जातः । जनी० । पञ्चम्यासजातौ विनिडः । पृ० ॥ वृक्षादनणि ॥

किलिञ्जकः । पुं । वीरणादिकटे ॥ कि-लिञ्जात् स्वार्थे । कन् ॥

किलिमम् । न । देवदालिणि ॥ इतिरा-जनिर्घण्टः शब्दरत्नावल्यौच ॥ केकि-लिमम् किलिमम् । भीमसेनो भी-म इतिवत् ॥

किल्बिषम् । न । अपराधे ॥ पापे ॥ रोगे ॥ धर्मोधर्मफलभूते अनिष्टे संसारे ॥ पापवत् पुण्यस्याप्यं निष्टफ-लत्वेन किल्बिषत्वमेव । औष्ट्रमे-ध्यमदः ॥ केलनम् । किल्यतेवा । किलश्वैत्ये । किलेर्बुक्चेतिटिषच् प्रत्ययः ॥

किल्ली । पुं । घोटके ॥ किल्कीतिपाठा-

किष्कन्धा

। नरम् ॥ । [illegible]
किशलः । पुं । नि । पल्लवे ॥
किशलयः । पुं । नि । पल्लवे ॥ किञ्चि
त् शलति । शल चलने । वा० कयन्
[illegible]
किशोरिका पुं । कन्थाभिशौ ॥ तैलपर्णी
वधौ ॥ सूर्ये ॥ तरुणावस्थे । द
शवर्षादूर्द्धमापञ्चदशवर्षके ॥ यथा ।
किञ्चिच्छूरः किशोरःस्यादतो हि
दशमात् परम् । शूरश्चदृश्यते कि
ञ्चिदनुद्भूतदिने दिने इति ॥ त्रि । कि
शोरावस्थायुक्ते ॥ कश्यति । कश शब्दे
। किञ्चित् शवतिवा शुगतौ शवने
तीवा किञ्चित् शृणातिवा । शृहिं
सायाम् । किशोरादयश्चेति साधुः ॥
किशोरी । स्त्री ॥ किशोरावस्था युक्तायो
षम् ॥ तरुण्याम् ॥ किशोरात् वयसिप्र
थम इतिडीप् ॥
किष्कन्दः । पुं । ओड्रदेशस्थेशैलविशेषे
। स्त्री । तत्रत्यगुहायाम् ॥
किष्किन्धा । स्त्री । गन्धमादनगुहा
याम् ॥ पुरीविशेषे ॥ सापूर्वं वालि
वानरस्य राजधान्यासीत् । श्रीरा
मो वालिनं हत्वा तां सुग्रीवायदत्त
वान् ॥ किष्किन्धति । धुधाञ्°
आत इति कः । पारस्करादित्वात् पू
र्वस्य किमो मलोपः सुट्पक्षे च नि

कीकटः

पात्यते ॥ [illegible]
किष्कन्धाधिपः । पुं । वालिवानरे ॥
किष्कुः । पुं । स्त्री । वितस्तौ । हस्तो
च्छ्रयपरिमाणे । प्रकोष्ठे । कर्मोत्तर
धोमणिबन्धपर्यन्तेलोकाकरे । इक्षते ॥
चतुर्विंशत्यङ्गुलमाने ॥ त्रि । कुत्सि
ते ॥ कायतेऽनेन । कैशब्दे । सृग
ल्वादित्वात् कुः । पारस्करादित्वात्
साधुः ॥
किष्कुपर्वा । पुं । दूर्वा ॥ वंशे ॥ पेटगन्धे ॥
किसरम् । न । सुगन्धिद्रव्यविशेषे ॥
किंसरिका । स्त्री । वर्णिविशेषे । किंस
रवर्णिजी ॥ किंसरंपर्णमस्य । किंस
रादिभ्यश्छन् । पिच्छान्ङीप् ।
किसरिकी ॥ [illegible]
किसलयः । पुं । न । पल्लवे । नवीन
पत्रे ॥ नवपत्रादियुक्तशाखाग्रपर्वणि
नवपत्रस्तवके ॥ किञ्चित्सलति ।
पत्रगतौ । वा° कयन् । पृ° ॥
की । अं । कुत्सायाम् ॥
कीकटः । पुं । अन्त्ये । घोटके ॥ की
कटाः । मगधप्रदेशे ॥ यथा । च
रणाद्रिं समारभ्य गृध्रकूटान्तकं गि
रे । तावत्कीकटदेशःस्यात् तदन्त
र्मागधोभवेत् ॥ मगधमगधम् । वि
हारनाम्नि प्रसिद्धे देशे इति केचि
त् ॥ त्रि । कृपणे ॥ निर्धने । निःस्वे ॥

कीटकः

कीकशः । पुं । चण्डाले ॥ कीं इति कं शतिं कशशब्दे ॥ पचाद्यच् ॥ कीकसः । पुं । कृमिजातौ ॥ न । अस्थिनि ॥ त्रि । कर्कशे ॥ कीतिकसति कंसगतौ ॥ पचाद्यच् ॥ कीकसास्यः । पुं । पक्षिणि ॥ कीतिहारा वृक्षौ ॥ कीचकः । पुं । दैत्यविशेषे ॥ राक्षसविशेषे ॥ हुमेदे ॥ नले ॥ केकयनृपात्मजे । विराटराजश्यालके ॥ विपुलोदरा वर्गभेदेनाणुजातौ ॥ अनिखयोगात् शब्दायमानवंशे ॥ चीकति शब्दायते । चीकमर्षणे । घञ् । चीकयते रान्तविपर्ययश्चेति बुन् ॥ यद्वा । की ह्यव्यक्तं शब्दं चकति । अंकटप्यादौ अंच ॥ कीचेत्यव्यक्तं कायति वा । मू० कः । अन्येभ्योपीति डोवा ॥ कीचकजित् । पुं । भीमसेने ॥ कीचकमजैषीत् । जी० । क्विप् । तुक् । कीचकभित् । पुं । वृकोदरे । भीमसेने ॥ कीचकम् भिनत्ति । भिदिर् । सर्व्वधातुभ्य इति क्विप् । तुक् ॥ कीटः । पुं । कृमिभेदे । क्वचित्स्थूलेचुद्रे । वन्तुमात्रे ॥ कीटति । कीट० । अच् ॥ कीटकः । पुं । कृमिजातौ । मागधजातौ ॥ त्रि । मिश्रुरे ॥ स्वा० कः कन्वा ॥

कीनाशः

कीटजः । पुं । गन्धके ॥ कीटं हन्ति । हन् । अमनुष्यकर्तृकेचेति टक् ॥ कीटजा । स्त्री । जतुनि । लाक्षायाम् ॥ कीटेभ्योजातः । जनी० । ड० ॥ कीटपादिका । स्त्री । हंसपदीवृक्षे ॥ कीटमणिः । पुं । खद्योते ॥ कीटेषुमणिरिव ॥ कीटमाता । स्त्री । हंसपदीवृक्षे ॥ कीटमारी । स्त्री । हंसपदीवृक्षे ॥ कीटमेषः । पुं । मृगशिरा इतिप्रसिद्धे कीटे । अयंनदीतीरेसिकतासु धेतिष्ठति ॥ कीटसंज्ञकः । पुं । राशिविशेषस्य संज्ञायाम् । मकरान्तेकर्कटमीनवृश्चिकेषु कीटाख्याः ॥ कीडेरः । पुं । तण्डुलीयशाके ॥ कीडक । त्रि । } किम्यकारे ॥ कीडजः । त्रि । } कीनाशः । पुं । यमे । कृतान्ते ॥ यथा । किङ्कीनाशपाशधर गर्जसि मामु । पगम्यहासभर मर्जसि । हरिचरणं शरणं न हि पश्यसि यन्नामस्मरणादपि नश्यसीति ॥ वानरविशेषे ॥ त्रि । सर्षपे ॥ घुडे ॥ पशुघातिनि ॥ की ह्यव्ययड् क्लान्तायाम् । की क्लान्तं नाशयति । पचाद्यच् ॥ यद्वा । क्लिम्यति क्लिश्यतेवा । क्लिशूविबाधने क्लि

कीर्त्तिः

शवधेवा । क्लिशेरीङोपधायाः कन् लोपश्चलोपानामागमश्च ॥

कीरः । पुं । शुके । मेधाविनि । फलाशने ॥ कीराः । पुंभूमि । कश्मीरदेशे ॥ न । मांसे ॥ कीर्त्ति ईरयति । ईर० । णिजन्तः । अच् ॥

कीरकः । पुं । हचन्निशेषे ॥ चषणके ॥ प्रापणे ॥ शुकशावके ॥

कीरवर्णकम् । न । स्त्रीणेयकनामनि सुगन्धिद्रव्ये ॥

कीरेष्टः । पुं । अचोट हचे ॥ आम्रहुमे ॥ जलमधूकवृक्षे ॥ कीराणामिष्टः ॥

कीर्णः । वि । दत्ते ॥ आच्छन्ने ॥ विक्षिप्ते ॥ हते । हिंसिते ॥ कीर्यतेस्मे । क्त० । क्तः । नत्वणत्वे ॥

कीर्त्तनम् । न । उकौ । कथने ॥ कालापास्तुचमपीच्छन्तीति ऊतियूतीत्यत्रप्रसादकारः ॥

कीर्त्तना । स्त्री । यशसि ॥

कीर्त्तयन् । वि । कथयति ॥ हृतेर्णटः शत्रादेशः ॥

कीर्त्तिः । स्त्री । प्रसादे ॥ विस्तारे ॥ कर्दमे ॥ शब्दे ॥ दीप्तौ ॥ मातृकाविशेषे ॥ यशसि । समज्ञायाम् ॥ धार्मिकत्वनिमित्तायां प्रशस्तत्वेन नानादिग्देशीयलोकज्ञानविषय-

कीलः

तारूपायांख्यातौ ॥ परोक्षख्यातौ । स्मृतख्यातौ ॥ यस्य कीर्त्तिर्हता लोके धिक् तस्यैव कुजीवितम् । दानादिप्रभवा कीर्त्तिः शौर्यादि प्रभवं यशः ॥ कीर्त्तिं स्वर्गफलामाहुरासंसारं विपश्चितः । अकीर्त्तिन्तु निरालोकनरकोद्देशदूतिकाम् ॥ तस्मात्कीर्त्तिमुपादद्याद्कीर्त्तिञ्च व्यपोहयेत् ॥ सुकर्मपत्नी संसिद्धा कीर्त्तिर्धन्यैश्चपूजिता । यया विना जगत्सर्वंयशोहीनंमृतंयथा ॥ कीर्त्यते । हृतसंशब्दने । ऊतियूतीतिनियातनात् साधुः । कीर्त्तनम् । कीर्त्तिः सौत्रः । हृपिशिरुहीत्यादिनेनिः ॥

कीर्त्तितः । वि । कथिते ॥

कीर्त्तिभाक् । पुं । द्रोणाचार्ये ॥ वि । कीर्त्तियुक्ते ॥

कीर्त्तिमान् । पुं । वसुदेवस्य ज्येष्ठपुत्रे ॥ वि । कीर्त्तिसंयुक्ते ॥

कीर्त्तिशेष । पुं । मृते ॥ यशसैव शेषे ॥

कीलः । पुं । स्त्री । अग्निशिखायाम् । ज्वालायाम् ॥ शङ्कौ ॥ शस्त्रे ॥ कफोशै ॥ कफोणिकाघाते ॥ स्तम्भे ॥ लेशे ॥ कीलति बध्नाति । कील बन्धने । इगुपधेतिकः ॥ कील्यते

कीलाल

अज्ञानेन वा । कर्मणिघञ् पुंसीति घोवा ॥

कीलकः । पुं । शिवके । गवांस्तम्भे । यत्रबद्धागौर्दुह्यते तस्मिन् । खूंटा इति भाषा ॥ गवा गात्रकण्डूयनार्थं गोष्ठे निखातस्तम्भे ॥ कीलशब्दार्थे ॥ वत्सरविशेषे । यथा । जायन्तेसर्वसस्यानि सुभिक्षं निरुपद्रवम् । सौम्यदृष्टिर्भवेद्राजा कीलकेच शुभं वदेदिति ॥ कील्यते । कील० । इ संज्ञेति घञ् । स्वा० कन् ॥

कीलसंस्थः । पुं । गाव इति गौड भाषा प्रसिद्धे वृक्षविशेषे ॥

कीला । स्त्री । पुं । कीले ॥ स्त्री । रतद्वैतौ । रतौ प्रतिहतिविशेषे ॥ यदाहवात्स्यायनः । कीला उरसि कर्त्तरी शिरसि विद्याकपोलयोरिति ॥ कीलति । कील० । इगुपधेतिकः । टाप् ॥

कीलालम् । न । रुधिरे ॥ जले ॥ अमृते ॥ मधुनि ॥ कीलं षड्भिर्व्वाला मलति वारयति । अलभूषणादौ । कर्मण्यण् ॥ औरार्व्वाग्नि. कीलं लाति वा । कीलेन प्रतिबन्धेन अल्यते वार्य्यते । अल० । घञ् । कीलम् प्रतिबन्धम् अलति वा । कर्मण्यण् ॥ पुं । पशौ ॥ कीलंबन्धनम् अर्लयोगम

कुकः

स्येति ॥

कीलाब्धिः । पुं । समुद्रे ॥ कीलाबा निधीयन्तेऽस्मिन् । डुधाञ्० ॥ अधिकरणेकिः ॥

कीलालपः । पुं । राक्षसे ॥ कीलालं पिबति । पा० । आतोनुपसर्गं इति कः ॥

कीलितः । त्रि । बद्धे ॥ निखातकीले ॥ कील्यतेस्म । कील० । क्तः ॥

कीशः । पुं । कपौ । वानरे ॥ सूर्य्ये ॥ पक्षिणि ॥ त्रि । दिगम्बरे । नग्ने ॥ की इति शब्दमीष्टे । ईश० । मू० कः ॥ यद्वा । कस्यवायोरपत्यम् । अतइञ् । किः हनूमान् ईशो यस्यसः॥

कीशपर्णः । पुं । अपामार्गे ॥

कीशपर्णी । स्त्री । अपामार्गे ॥ कपिलोमतुल्यानि लोमशानि पर्णान्यस्याः । पाकर्णेतिङीष् ॥

कीशफलम् । न । कक्कोले । गन्धद्रव्यविशेषे ॥

कु । अ । पापे ॥ कुत्सायाम् ॥ ईषदर्थे ॥ निवारणे ॥ कवते । कूयते वा । कुङ् शब्दे । मित० डुः ॥

कुः । स्त्री । अचलायाम् । धरायाम् । भूम्नौ ॥ प्रथमाङ्के १ ॥ कवते । कुङ० । मित०डुः ॥

कुकः । त्रि । समर्थे ॥ कोकते आदत्ते

कुकुराः

। कुक° । इगुपधेतिकः ॥

कुकभम् । न । मद्ये ॥ इति शब्दचन्द्रिका ॥

कुकरः । त्रि । रोगकुत्सितकरे । कुणौ ॥

कुकीलः । पुं । पर्वते । शिलोच्चये ॥

कुकुटः । पुं । स्वस्तिके । सितावरे । सुनिषण्णशाके ॥

कुकुदः । पुं । कूकुदे । सत्कृत्यकन्यादातरि ॥

कुकुन्दरः । पुं । कुक्कुरदुमे ॥ न । कूपके । नितम्बस्थकूपकदये । स्त्रियाः पृष्ठवंशादधोगर्त्ते ॥ कुम्भूमिं दरयति । दृभये । गुप्तः । कर्मगुपण् । णिलोपस्यस्थानिवच्चान्नदृद्धिः । तत्पुरुषेकृतीति वाहुलकादसुक् । कुत्सितं कुन्दरम् ईषत्कुन्दरमचेतिवा ॥ यद्वा । स्कुन्द्यते कामिना । स्कुदिस्राम्रवणे । मन्दुरादयश्चेति साधुः ॥

कुकुभा । स्त्री । रागिणीविशेषे ॥

कुकुरः । पुं । यदुवंशीयान्धकराजस्य तनये ॥ कुक्कुरे ॥ न । ग्रन्थिपर्णीवृक्षे ॥ कोकते । कुकआदाने । कोकतेर्वाकुगित्यु रच् ॥

कुकुराः । पुंभूमि । देशविशेषे । यदुपु । दाशार्हेषु । साम्बतेषु ॥ नित्यंबहुवचनान्तः ॥

कुकुटः

कुकूटी । पुं । शाल्मलीवादमे ॥

कुकूलः । पुं । तुषानले ॥ गिरीषा दपिम्बङ्गी क्षेय मायतलोचना । अयं क च कुकूलाग्निकणो मदनानिलः ॥ न । भङ्गुभिःसङ्कीर्णे विले ॥ तनुचे । दंशने ॥ कोर्भूमेःकूलम् । कुत्सितंवा कूलम् ॥ यद्वा । कयते । कुड्शब्दे । पिञ्जादित्वादूलच् । धातोःकुगागमः ॥

कुकोलम् । न । कोलिवृक्षे ॥

कुक्कुटः । पुं । कालचे । ताम्रचूडे । चरणायुधे । कुकुडा इतिभाषा ॥ अस्यमांसगुणायथा । कुक्कुटो दंहणः स्निग्धो वीर्य्योष्णो ऽनिलहृद्गुरुः । चक्षुष्यः शुक्रकफकृ दल्यो रुच्यः कषायकदसि ॥ कुक्कुटस्वगंयथा । कुक्कुटस्वृत्तनूरुहाङ्गुलि स्ताम्रवक्त्रनखचूलिक सितः । रौति सुस्वर मुषाच्यये च यो वृद्धिः स नृपराट् वाजिनाम् ॥ यवग्रीवो यो वा बदरसदृशो वा पि विरुजो वृषन्मूर्द्धा यः सौ भंयति बहुभिर्यश्चचिरः । स गस्त. सङ्ग्रामे मधुमधुपर्णं एव च यकृद्व श्रस्तो योनो ऽन्यःकृशतरवः खञ्जचरणः ॥ इति वाराहीसंहिता ॥ निषादपुत्रे ॥ भूतपुत्रे ॥ वृगोन्कायाम् ॥ कुकुभपक्षिणि ॥ य

कुक्कट

ङ्किणे । स्फुलिङ्गे ॥ वनकुक्कटे ॥ यथा । सुरासमण्डापानाय भोजने चरणायुधाः । तित्तिरावित्किराः प ाप्याः कुक्कुटाविषमज्चरे इत्यश्विवै द्यः ॥ अत्र चरणायुधेगृहकुक्कटः । कुक्कुटोवनकुक्कुटइतिव्याख्यानात् ॥ कोकनम् । कुकआ० । सं० क्विप् । कुटति [कुटकौ० । इगुपधेतिकः । कुकाकुटः । कर्त्तृकरणयोरितिसमा सः ॥ कुत्सितः कुटः कोः पृथिव्याः कुटो वा । पुं० ॥

कुक्कटमण्डपः । पुं । काश्यांप्रसिद्धे मुक्ति मण्डपे ॥

कुक्कुटकः । पुं । कुक्कटार्थे ॥ शूद्राज्जा तोनिषाद्यान्तुसवैकुक्कुटकःस्मृतः । इतिमनुः ॥

कुक्कुटमस्तकम् । न । चव्ये । चेंदइति गौडभाष ॥

कुक्कटव्रतम् । न । सन्तानार्थंस्त्रीकर्त्त व्ये व्रतविशेषे । खलितासप्तमीव्रते ॥ भाद्रेमासि सिते पक्षे सप्तम्यां नियमेनया । स्नात्वा शिवं लेखयि त्वा मण्डलेचसहाम्बिकम् । पूजये च्च तदातस्याः दुष्प्रापंनैव विद्यते ॥

कुक्कटशिखः । पुं । कुसुम्भवृक्षे ॥

कुक्कटाभः । पुं । } कुक्कुटतुल्यवर्णे सर्प
कुक्कुटाहिः । पुं । } विशेषे ॥

कुक्कुर

कुक्कुटिः । स्त्री । दम्भचर्यायाम् ॥

कुक्कुटी । स्त्री । अन्नतत्चर्यायाम् ॥ ज्ये ष्ठराम् । छिपकली इति भाषा ॥ शाल्मलीवृक्षे ॥ कुक्कुटयोषिति ॥ अस्यालं० कुक्कुटी च । मृदुचारुभा षिणीस्निग्धमूर्त्तिं रुचिराननेक्षणा । सा ददातिसुचिरं महीक्षितां श्री यशोविजयवीर्यसम्पदः ॥ जातेरस्त्री विषयादिति ङीष् ॥

कुक्कुटीव्रतम् । न । भाद्रशुक्लासप्तम्यां कर्त्तव्ये नियमविशेषे । खलितां स प्तम्याम् ॥

कुक्कुभः । पुं । पात्कुकां इतिगौडभा षाप्रसिद्धे पक्षिणि ॥ वनकुक्कुटे ॥ कुगित्यव्यक्तं शब्दं कौति । वाकुख कात्मक ॥ कुक्कुशब्दंभाषते वा । भाषव्य० । अन्येभ्योपीतिडः ॥

कुक्कुरः । पुं । कूकर इतिभाषाप्रसिद्धे कौलेयके । सारमेये ॥ कोकते । कुकआदाने । क्विप् । कुरति । कुरश ब्दे । इगुपधेतिकः । कुकचासौ कुर श्च ॥ न । व्रन्थिपर्णे । कुकुरौंदा इति ख्यातौषधौ ॥ कुक्कुरोख्यास्ति । कुक्कु रशब्दस्तत्रन्थे ख्याचष्टिकः । अर्शआद्य च् । यद्वा । कोयते । कुक० । कोवा तेर्वाकुत्सितंकुरच् । कुगागमश्च ॥

कुक्कुरद्रुः । पुं । मृदुवृक्षे । रत्नमाले

कुङ्कुम

कुङ्कुरवन्दो कुकुरेदा इतिचभाषा ॥ कुङ्कुरः कटुस्निग्धो ज्वररक्तकफापहः । तन्मूलमार्द्रनिशिचिञ्चवदने मुखशोषहृत् ॥ कुक्कुरी । स्त्री । शुन्याम् । सारमेय्याम् । कूकरी कुत्ती इतिचभाषा ॥ जातेरिति ङीष् ॥ कुक्कुवाक् । पुं । सारङ्गशब्दे ॥ कुक्षः । पुं । कुक्षौ । जठरे ॥ गर्भे ॥ कुष्णाति । कुषनिष्कर्षे । उदिदुधि कुषिभ्यश्चेति सः कित् ॥ कुक्षिः । पुं । उदरे ॥ कुष्यते निष्काश्यते मलोऽस्मात् । कुष + इषिकुषिगार्तिभ्यः क्सि ॥ केतुमालवर्षस्थदेशविशेषे । समुद्रमध्यप्रदेशे ॥ कुक्षिपार्श्वोदरकटीपृष्ठरुक् पर्वभेदनम् । नित्यञ्चकुक्षिशुद्ध्युदरस्य यामदक्षिणभागोऽवयवोऽर्थात्तिभावप्रकाशः । कूख इतिभाषा ॥ कुक्षिम्भरि । वि । आत्मम्भरौ । स्वोदरमात्रपूरके ॥ कुक्षियिभर्त्तीति विग्रहे कुक्षेर्मुमागमो भृञश्चान्तस्य यञ्चनिपातसिद्धः ॥ कुक्षिरन्ध्रः । पुं । नले ॥ कुङ्कुमम् । न । कुम्कुम् केसर इतिभाषायाम् । विषे गन्धद्रव्ये । काश्मीरजन्मनि ॥ काश्मीरदेशजे पुष्पे कुङ्कुमं

कुङ्कुरः

॥ यङ्गप्रेङ्गितत्वे सूक्ष्मकेशर मारक्तं पिङ्गगन्धि तदुत्तमम् ॥ वाह्लीकदेशसंजातं कुङ्कुमं पाण्डुरं भवेत् । केतकीगन्धयुक्तं तन्नाध्यमं सूक्ष्मकेशरम् ॥ कुङ्कुमं पारसीके यन्मधुगन्धितदीरितम् । ईषत्पाण्डुरवर्णंतद्यमं स्थूलकेशरम् ॥ कुङ्कुमं कटुकं स्निग्धं शिरोरुग्व्रणजन्तुजित् ॥ तिक्तं वमिप्रदं वर्ण्यं व्यङ्गदोषत्रयापहम् ॥ कुम्कुम् इतिशब्दोऽपि वाचकत्वेनास्य । अर्शआद्यच् ॥ यद्वा । कुक्यते । कुक° । वा° उमङ्कुमङ्क्षयः । आच्छीत्यच नुमितियोगविभागात्कुम् ॥

कुङ्कुमाद्रि । पुं । पर्वतविशेषे ॥

कुङ्कुमी । स्त्री । महाज्योतिष्मत्याम् ॥

कुच । पुं । स्तने ॥ कुचति । कुचसङ्कोचे । इगुपधेतिकः ॥

कुचकिक्का । स्त्री । मूर्वायाम् ॥

कुचण्डी । स्त्री । मूर्वायाम् ॥

कुचन्दनम् । न । रक्तचन्दने ॥ वकम् इति भाषाप्रसिद्धे पर्णाङ्गे ॥ द्रुमविशेषे ॥ निर्गन्धत्वात् कुत्सितं चन्दनम् । कोचन्दनमिव वा । कुत्सितान्यचन्दनान्यस्मादा ॥

कुचफलः । पुं । दाडिमवृक्षे ॥

कुचरः । वि । कुवादे । परदोषकथने

कुजा

शीले ॥ कुत्सितंचरति । पचाद्यच् ॥
कुत्राग्रम् । न । क्षुद्रुके । स्तनाग्रभागे ॥
कुचस्याग्रम् ॥
कुचाङ्गेरी । स्त्री । चुक्रिकायाम् । चू
कानिकाशाक इतिभाषा ॥
कुचिकः । पुं । कुंचिया इति गौ
कुचिका । स्त्री । डभाषा प्रसिद्धे
मत्स्ये ॥
कुचित । वि । परिमिते ॥ कुचति ।
कुचसङ्कोचे । कचिवचिकुचोति कि
तच् ॥
कुचेल । वि । कुवाससि ॥ कुत्सितं चे
लमस्य ॥
कुचेला । स्त्री विदलकण्याम् ॥
कुचेली । स्त्री । अम्बष्ठायाम् । आकना
दि इतिगौडभाषा ॥
कुच्छम् । न । कुमुदे ॥ इतिशब्दच
न्द्रिका ॥
कुजः । पुं । आरे । भौमग्रहे ॥ नरका
सुरे ॥ द्रुमे ॥ कोः पृथिव्याःजातः ।
पञ्चम्याम्तिडः ॥
कुजम्भलः । वि । सन्धिचोरे ॥ इति-
हारावली ॥
कुजम्मिलः । वि । कुजम्भले ॥ इतिशब्दा
रत्नावली ॥
कुजा । स्त्री । कात्यायनीदेव्याम् ॥
सीतादेव्याम् ॥

कुञ्चित

कुजाष्टमः । पुं । दोषविशेषे ॥ सर्वान्
गुणान्विहन्त्यंगु विलम्बादष्टमः कुजः
। अंशायवाद् । अलगे नीचगे भौ
मे शशुचेवगतेपिवा । कुजाष्टमोद्भ
वोदोषोन किञ्चिदपिविद्यतेइति ॥
कुञ्जिशः । पुं । मत्स्यविशेषे ॥
कुञ्झटिः । स्त्री । धूमसच्यिाम् । कु
हेलिकायाम् ॥
कुञ्झटिका । स्त्री । रतीन्द्रियाम् । नभो
रेखा ॥
कुञ्झटी । स्त्री । कुहेलिकायाम् ॥
कुष्ठनम् । न । नेत्ररोगविशेषे ॥ तस्ल
क्षणम् । वातादयो वर्त्मसङ्कोचंजन
यन्ति यदा मर्त्या । तदा द्रष्टुं न शक्नो
ति कुष्ठनं नाम तद्विदुरिति ॥
कुष्ठफला । स्त्री । कुम्भाण्ड्याम् ॥
कुष्टिः । पुं । अष्टमुष्टिमिते धान्यमान
भेदे ॥ यथा । अष्टमुष्टिर्भवेत् कुष्टिः
कुष्टयोष्टौचपुष्कलमिति ॥
कुष्ठिका । स्त्री । कृष्णजीरके ॥ कुंचे
इति गौड प्रसिद्धे मत्स्यविशेषे ॥ य
था । कुष्ठिकयैनं विस्रावयति भा
वयति ॥ कम्ची इतिभाषा प्रसि
द्धायां वंशशलाकायाम् ॥ कुञ्जी लोखी
इतिचभाषा प्रसिद्धायां कुर्चिकाया
म् ॥ लेखिकायाम् ॥
कुष्ठितम् । न । सिंगरफे ॥ वि । व

कुञ्जर।

के ॥ सङ्कोचिते । कुञ्चतिअ । कि
ञ्च कौटिल्ये । क्त । बाहुलकात् सं
ज्ञापूर्वकेत्वाभा नलोपाभाव ॥ कुञ्
कुञ्जः । पुं । न । हस्तिहनौ ॥ हस्तिद
न्ते ॥ निकुञ्जे ॥ समन्तात्लतादिभि
राच्छादिते स्थानविशेषे ॥ कौजा
यते । कावजनि यो जनीप्रा० । स
म्यञ्जनेऽङ्गः । पृषो० ॥
कुञ्जरः । पुं । अनेकपे । हस्तिनि ॥ अ
तिशयित कुञ्जोऽनुरस्योस्य रप्र
करणेवमुखकुञ्जेभ्य उपसंख्यान
मितिर ॥ देशविशेषे ॥ केशे ॥ उ
त्तरपदस्थित्वे श्रेष्ठार्थे ॥ पञ्चमाव
स्थाप्रथमे । ऽऽ प्रभेदे ॥
कुञ्जरचोरमूलम् । न । मूलके । इति
राजनिघण्टः ॥
कुञ्जरच्छाया । स्त्री । गजच्छायायाम्
॥ यथा । योगो मघात्रयोदश्याः
कुञ्जरच्छायसंज्ञकः । भवेन्मघायां
संस्थे च अग्न्यर्के करस्थिते इति ॥
कुञ्जरपर्य्याय । पुं । पञ्चमावस्थाप्रथम
। ऽऽ पर्य्याये ॥
कुञ्जरपिप्पली । स्त्री । गजपिप्पल्याम् ॥
कुञ्जरी । स्त्री । धातकीवृक्षे ॥ पाटला
वृक्षे ॥ हस्तिन्याम् ॥
कुञ्जरारातिः । पुं । शरभे ॥ सिंहे ॥
कुञ्जरस्य अरातिः ॥

कुटजः

कुञ्जरालुकम् । न । हस्त्यालुनि ॥ इति
शब्दचन्द्रिका ॥
कुञ्जराशनः । पुं । अश्वत्थे । पिप्पले ॥
कुञ्जरेणाश्यते । अश्भोजने । कर्म
णि ल्युट् ॥
कुञ्जरी । स्त्री । करेणौ । हस्तिन्याम् ॥
कुञ्जलम् । न । कौञ्चिके ॥ कुत्सितंज
लम् । पृषोदरादिः ॥
कुञ्जवल्लरी । स्त्री । निकुञ्जिकाल्लो
ध्रवृक्षे ॥
कुञ्जिका । स्त्री । कृष्णजीरके ॥ निकु
ञ्जिकाल्लोध्रवृक्षे । कुञ्जवल्लर्याम् ॥
कुटः । पुं । कोटे । गढ इति भाषा ॥
शिलाकुट्टे । पत्थर फोड़नेका हथौ
ड़ा इतिभाषा ॥ पर्वते ॥ वृक्षे । अ
मरटीकाकृद्वे ॥ वर्गप्रथमोषध इति प्रा
माणिकाः ॥ पुं । न । कलशे । घटे
॥ पुं । स्त्री । गृहे । वेश्मनि ॥ कुट
ति । कुटिलो भवति । कुटकौटिल्ये
। इगुपधेति कः ॥
कुटकम् । न । काले ॥ कुटति । कुट०
। कुन् ॥
कुटकाचलः । पुं । पर्वतविशेषे ॥
कुटच्छदः । पुं । गृहाच्छादने । छप्पर
छान इतिच भाषा ॥
कुटज । पुं । कुटजवृक्षे ॥
कुटजः । पुं । कौटिल्यं कौरव्यां इतिप्र

कुटज

सिद्धे वृक्षविशेषे । गिरिमल्लिकायाम् । वत्सके ॥ अस्यफलमिन्द्रयवः ॥ कुटजः कटुको रूक्षो दीपनस्तुवरो हिमः । अर्शोतीसारपित्तास्रकफतृष्णाकुष्ठनुत् ॥ अगस्त्यमुनौ ॥ द्रोणाचार्य्ये ॥ कूटे शृङ्गे जायते ॥ सप्तम्यांजनेर्डः । पृषोदरादिः ॥ कुटजबीजम् । न । इन्द्रयवे ॥ कुटजा । स्त्री । कलहंसच्छन्दसि ॥ सप्तसा भवेदिहसगौकुटजाख्यमिति लक्षणात् ॥ कुटन्नटः । पुं । भ्रष्टानाकवृक्षे । शोणके ॥ न । कैवर्त्तीमुस्तके । भोया इति भाषा ॥ कुटन् वक्रीभवन् नटति । नटस्यन्दनेपचाद्यच् ॥ कुटपः । पुं । मुनौ ॥ निष्कुटे । गृहसमीपोपवने ॥ कुडवपरिमाणे मानभाण्डे ॥ न । कमले ॥ कुटति । कुट० । उषिकुटिदलीत्यादिना कुटेः कपन् प्रत्ययः ॥ कुटरः । पुं । न । कुठरे । मन्थानदण्डवन्धनस्तम्भे ॥ वा० कुटेः करन् ॥ कुटरः । पुं । अंशुकगुल्मे । छोटातम्बूतच्चूटीइतिभाषा ॥ कुटति । कुट० । कुटः किच्चेत्करः ॥ कुटरुणा । स्त्री । त्रिवृतायाम् ॥ कुटलम् । न । पटले । छान्न छप्पर इति भाषा ॥

कुटी

तिब्भाषा ॥ इतिहारावली ॥ कुटहारिका । स्त्री । दासीभेदे ॥ कुटिः । पुं । भट्टीकृते ॥ शरीरे ॥ स्त्री । स्वल्पगृहे ॥ शोलायाम् ॥ कुटति । कुट० । इगुपधात् किदिति इन्प्रत्ययः ॥ यद्वा । हागृशृभ्यः कुटिभिदिच्छिदिभ्यश्चेति इः सचकित् ॥ कुटिचरः । पुं । वारियूकरे । सूंस इति भाषा ॥ कुटितम् । त्रि ॥ कुटिले ॥ कुटति । कुटः । रुचिषचिकुचिकुटिभ्यः कितच् ॥ कुटिलः । त्रि । अन्तर्जौ । अराले ॥ भङ्गुरे ॥ न । तगरपुष्पे ॥ कुटिङ्कौटिल्यं याति । खा० । आतोनुपेतिकः ॥ कुटति वा । कुट० । मिथिलादिस्वादाकुलकादा इलच् ॥ कुटिलकः । पुं । नागविशेषे ॥ कुटिलगः । पुं । सर्पे ॥ कुटिलगा । स्त्री । नद्याम् ॥ कुटिला । स्त्री । नदीविशेषे ॥ राधिकासखीविशेषे ॥ तगरपर्णाम् ॥ स्फूकानामगन्धद्रव्ये ॥ कुटिलिका । स्त्री । व्याधीनाकृतिविशेषे ॥ पुं । कर्म्मारोपकरणभूते लौहे ॥ काशालोहयष्टिर्वा प्रोक्ताकुटिलिकाहिसेच्युक्तेः ॥ कुटी । स्त्री । कुम्भदासाम् । कुटनी

कुटुम्बी

इतिभाषा। सुरानामगन्धद्रव्ये। चि। वगुच्छे॥ स्वल्पनिलये॥ कुटिकोरा इतिख्यातेनरतिक्रीपे॥ कुटीचक्रः। पुं। पुंवान्नादिःपुंवान्नेनी विनिवितेः। कुटीचरः। पुं। यतिविशेषे॥ कुट्यां कुटीचरकः। पुं। चरति। अच्। स्वार्थे कः॥ कुटीरः। पुं। क्षुद्रगृहे। स्त्री। पडीभाषा॥ कुटिया इतिख्यातभाषा॥ ह्रस्वः कुटी। कुटीशमीगुण्डास्योरान्। केवलेऽरते॥ इतिहेमचन्द्रः॥

कुटति। कुट॰। घा॰ईरन्। कुटुक्कः। पुं। वृक्षवल्लीगुल्मे॥ दिसि॥

कुटुम्बः। पुं। न। प्रेष्यवर्गे। बान्धवे॥ सन्ततौ॥ इतौर्यग्गेहे॥

कुटुम्बव्याधृतः। वि। अभ्यागारिके। इत्यधौ। पुत्रदारादिपोषणाध्येय

कुटुम्बे कुटुम्बमेषणो व्याप्रियतेस्म। पृषो॰ आयामे। स्वकर्मकत्वात्कः। त्तरिक्तः॥

कुटुम्बहारकः। पुं। याचायोगविशेषे॥ सप्तमे चन्द्रमास्त्रिस्थात्ससमे नीचखेचरः। कुटुम्बहारको योगो नीयात्प्रियुतसोदरैः॥

कुटुम्बी। पुं। गृहमेधिनि। गृहस्थे।

कुट्टित

गार्हस्थ्याश्रमविशिष्टे॥ वि। कुष कोगे। कुटुम्बंविशिष्टे। कुटुम्बःपो ष्यवर्गोऽस्यास्य। अतइनिः॥

कुटुम्बिनी। स्त्री। पतिपुत्रदुहित्रादि युतायांप्रतिष्ठितायां। स्त्रियाम्। पु प्रारन्भ्रीम्॥ इन्नन्तात्ङीप्॥ कुटु म्बोनांसमूहे॥ खिलादिभ्यइनिर्वक्त व्यइतिइनिः। क्षुद्रक्षुपविशेषे। अम रस्त्रियाम्। ब्रह्मगल्यायाम्। भूमा कुटुम्बीकर्द्दिनौ। कुटुम्बवासुस्थाने॥

कुट्टकः। पुं। गणकोनां अङ्कविशेषे॥

कुट्टनम्। न। छेदने। कुटना इतिभा षा॥

कुट्टनी। स्त्री। नार्यासंहान्यपतिसंयो गकारिण्याम्। ग्रामाख्यायाम्। कुटनी इतिभाषा॥ कुट्टयति। कुट्टच्छेदन भर्त्सनयोः। ल्युट्। ङीप्॥

कुट्टाकः। वि। कुट्टनशीले॥ कुट्टयति च्छीलः कुट्ट। जल्पभिक्षकुट्ट लुण्टवृङः षाकन्। इतिषाकन्प्रत्य यः॥ स्त्री। कुट्टाकी॥

कुट्टारः। पुं। पर्वते॥ न। केवले॥ रते कुट्टारकेवलेरतेइतिमेदिनी॥

कुट्टितमांसम्। न। सांसत्यशूनप्रभेदे॥ मांसमज्जायुसङ्घृष्टं सूक्ष्मं कृत्वा सुकुट्टितम्। वेसवारःसुगन्धाढ्यःस्वेदि तः। स्याच्चित्तम्प्रेत्॥ कुट्टितंपाचि

कुट्टिमि

तं मांसं सुस्वादु लघु दीपनम्। तचापि जाङ्गलं श्रेष्ठं जाङ्गलेष्वपि पक्षिणाम्॥

कुट्टिमः। पुं। न। स्वल्पगृहे। कुटी रे॥ गर्भागारे॥ अक्षिभूमौ॥ रत्न खचनौ॥ सुधाघटितभूतले॥ बद्ध भूमौ। नीव इति कुरसी इतिच भाषा॥ दाडिमवृक्षे॥

कुट्टिमितम्। न। हावभेदे। स्त्रीणां दशधाशृङ्गारचेष्टान्तर्गतचेष्टाविशेषे। स्त्रीणां स्वाभाविकदशालङ्कारान्तर्गते विलासभेदे॥ तल्लक्षणं यथा। केशस्तनाधरादीनां यत्तु हर्षोऽपि रुक्षणात्। प्राहुः कुट्टिमितंनामभ्रि करविधूनभम्॥ अपिच। केशाधरादिग्रहणे भेदमानेऽभिमानसे। दुःखितेव वहिः कृत्येशच्चकुट्टिमितं स्मृतमिति॥ स्त्रीणामेषस्वभावो यदिष्टमप्यनिष्टतया निवारयन्त्य एव सुरतसुखमुपभुञ्जते इति॥ अपिच। दुःखोपचारः सौख्येपि हर्षात्कुट्टिमितं मतम्॥ सुरतेपि गाढपरिपीडने केशस्तनादिग्रहणेच हर्षात् सुखेपि दुःखाभिक्रिया दुःखेपिसुखाभिक्रियाकुट्टिमितम्। कुट्टनम्। कुट्ट° घञ्। कुट्टेन निर्वृत्तम्। भावप्रत्य यान्तादिमप्यवक्ष्य स्त्रीमप्। ततो

कुठारी

स्यन्नाङ्गावेक्षः। नारकादित्वादि तत्वा॥

कुट्टिहारिका। स्त्री। दात्राम्। इति हलायुधः॥

कुट्टीरः। पुं। क्षुद्रपर्वते॥ इतिहारावली॥

कुट्मलः। पुं। मुकुले। विकासेन्मुखप्रौढकलिकायाम्॥ न। नरकान्तरे॥ यवरज्जुभिः पीडनम्॥ कुट इति। कुटकौटिल्ये। वृषादित्वात् कलच् तस्यमुट्च॥ यदा। कुट्यते कुटतिवा। कुट° कुटिकुषिभ्यां कलच्।

कुठः। पुं। दृमे। शाले॥ कुठति। कुठ°। पचाद्यच्॥

कुठरः। पुं। दण्डविक्षेपे॥ मन्यानाकर्षरज्जुभिर्युक्ते स्तम्भे॥ कुंठति कुठ र्गतिप्रतिघाते। बाहुलकात् करन्॥

कुठाकुः। पुं। खुटकुयढ़ेया इति भाषा प्रसिद्धे पक्षिविशेषे॥

कुठाटङ्कः। पुं। स्त्री। कुठारे॥

कुठारः। पुं। दृमे॥

कुठार। पुं। स्त्री। शुधिनौ। परशौ। कुहाड़ा इति भाषा। फर्सा इतिच॥

कुठारी। स्त्री। कुठारे। कुहाड़ी इति भाषा॥ जातित्वान् ङीष्॥

कुठिः

कुठारः । पुं । छिदौ । कोशे । वामरे ॥ मृत्पात्राकारे ॥

कुठिः । पुं । क्ष्माभृति । महीधरे ॥

कुठिकः । पुं । कुठोषधौ । कूठ इति भिषा ॥

कुठेरः । पुं । वृक्षौ । तुलस्याम् । अर्क्ष केरो । वाबुइ इति बर्बरी इतिच । असि हेमपर्णासे । कुण्ठति । गुठप्रतिघाते कुठिच । प्रतिकठिकुठीत्येरक् । आ । गमश्चोक्षस्यानित्यत्वात्ननुम् ॥

कुठेरकः । पुं । मर्णासे । तुलस्याम् ॥ खेततुलस्याम् । बसुइ तुलसी इति गौडभाषा ॥ कृष्णार्जके । नन्दीवृक्षे ॥

कुठेरजः । पुं । खेततुलस्याम् । कुठेरके । बर्बरायाम् ॥

कुठेरः । पुं । चामरवाते । चौरकीपवन इतिभाषा । मन्थरे ॥

कुण्डः । पुं । धान्यमानभेदे । मुष्टिचतुष्टये । प्रस्थचतुर्थांशे । वैद्यक्रमतेदिप्रस्थनपरिमाणे । द्वात्रिंशत्तोलके । अञ्जलौ ॥ कुण्डते कुण्डतेवा । कुडिदाहे । या० कर्म प्र० । आगमश्चानित्यत्वात्ननुम् ॥

कुण्डः । पुं । देहे । शरीरे ॥ कुण्डते । कुडि० । कुण्डिकण्योर्नलोपश्चेति डः कित् ॥

कुण्डपः

कुण्डिशः । पुं । कुण्डपि मांस इतिगौड भाषाप्रसिद्धे मत्स्यविशेषे ॥

कुण्डुङ्कुची । स्त्री । चुङ्कारवेल्लाम् ॥

कुण्डलः । पुं । कुट्मले ॥ न । नरकविशेषे ॥ कुण्डते । कुटतिवा । कुटच्छेदने कौटिल्येवा । कुटिकुण्डिभ्यां कलन् । पृ० । कुण्डति । कुडबाल्ये । वाकुण्डलात् कुण्डेरपिकलन्वा ॥

कुण्डम् । न । भित्तौ । भीत कन्यइतिभाषा ॥ विलेपने ॥ कुण्डांसाधु । तत्सांधुरितियत् । पृ० ॥ कुण्डतेवा । कुडुकार्कश्ये । यत् ॥ कौतेरधन्यादिभ्यातेयकप्रत्ययेडागमश्च इष्टव्यवहृतादयः ॥ कौतूहले ॥

कुण्डकम् । न । कुण्डार्थे ॥

कुण्डच्छेदी । पुं । सन्धिचौरे ॥ छेदनंछेदः । कुण्डस्यछेदः । सोस्यास्तिइनि ॥

कुण्डच्छेद्यम् । न । खानिके । भीतिकागढा इतिभाषा ॥

कुण्डमत्सी । स्त्री । गर्भगोधिकायाम् ॥

कुण्डमत्स्यः । पुं । म । शिपकसौ ॥

कुण्डकः । पुं । यासके ॥

कुण्डलः । पुं । अरण्यवासिकोल ।

कुण्डलरः । पुं । नयघुषा यरघुयाइतिचभाषा ॥

कुण्डला । स्त्री । कुण्डले ॥

कुण्डपः । पुं । न । न्यक्षमाणे । भये ॥

कुण्ठीकृ

रंहो प्रतिप्रसिद्धे अस्त्रविशेषे ॥ मूर्ति गन्धे ॥ वि० मूर्तिगन्धौ ॥ कुणति । क्वणशब्दे ॥ कणेः । सम्मसरिण्च्चेति कमन् ॥ ॥ टिड्ढा० ङीप् ॥ कुणपी । स्त्री । विट्सादिकायाम् ॥ कुणालः । पुं । देशविशेषे । कुणति । कुण क्वणे । पीयूक्षणिभ्यां कालन् । वाहु लकात् सम्मसरिणम् ॥ ॥ कुणिः । पुं । तूणी इतिख्याते तूनरन्ध्रे । तूंद्र इति गौडभाषा ॥ त्रि० । कुक रे ॥ कुणति । कुण्यते वा । कुणशब्दो पकरणयोः । इगुपधात्किदितीन् ॥ कुणिन्दः । पुं । शब्दे । कुणति । कुण० । कुणिपुल्यो किन्दच् ॥ कुण्टकः । त्रि । स्थूले । मोटा इतिभा षा ॥ । । । । कुण्ठः । त्रि । क्षिप्रासुमन्दे । अकर्मण्ये ॥ ॥ कुण्ठोमन्दः क्षिप्रासुयः ॥ मूर्खे ॥ कुण्ठति । कुठि प्रतिघाते आलस्ये च ॥ पचाद्यच् ॥ कुण्ठक । त्रि । कुण्ठे । स्वार्थेकः ॥ कुण्ठा । स्त्री । गतिप्रतिहतौ ॥ कुण्ठन् । म् । कुठिप्रतीघाते । पिड्डिदादि भ्योऽङ् । टाप् ॥ कुण्ठत । त्रि । कुण्ठीकृते । सङ्कुचिते ॥ कुण्ठीकृत । त्रि । विकुण्ठिते ॥

कुण्ड

कुण्डः । पुं । ऋषितेभ्यः कुण्डारच् । ब्रा रात्पतिवत्नीसुते ॥ कुण्ड्यते कुक्षम नेन । कुडिदाहे । घञ् ॥ ह्रद । जो नसेदे ॥ देवब्राह्मणार्थये चावस्था ति प्रसिद्धेअन्नाधारविशेषे ॥ होमी ऽग्न्यारण्यालये । न स्त्री । पिठर ॥ कुण्डयति । कुडिरच् ॥ अश्व । कुण्डति वा । कुड कुण्ड० । कादिभ्यः किदितिडः ॥ कुण्डकीटः । पुं । पतितब्राह्मणीसुते । ॥ जारतोब्राह्मणीपुत्रे । दासीकामुके ॥ चार्वाकवचनाभिज्ञपुरुषे । धूर्त के ॥ अतिविचारदे ॥ कुण्डगोलकम् । न । काञ्जिके ॥ कुण्डघ्नः । पुं । कुण्डे वृद्धाच्छादित स्थाने ॥ इतिहेमचन्द्रः ॥ कुण्डपायः । पुं । क्रतौ । कुण्डेन पी यते ऽस्मिन् सोम इति । क्रतौकुण्ड पीथसञ्ज्ञायामिति पिबतेरधिकरणे घञ् पित्त्वयो र्युगागमश्चनिपात्यते ॥ कुण्डलम् । न । स्वनामख्यातकर्णभू षणे । कर्णवेष्टने ॥ मध्ये ॥ वलये ॥ गुर्वक्षरे । कुण्डते कुण्ड्यतेवा । कुडिदाहे कुडिरचार्यायां वृधा दिच्चात् कलच् ॥ कुण्डं कुण्डला कारं लाति वा । आतोनुपेतिकः ॥ सिध्मादित्वाल्लत्वं वा ॥

कुण्डलि

कुण्डलिका । स्त्री । मात्रावृत्तभेदे ॥ यथा । कुण्डलिका सा कथ्यते प्रथमं दोहा यत्र । दोलाचरणचतुष्टयं प्रभवति विमलं तत्र ॥ प्रभवति विमलं तत्र पदमिति सुललितयमकम् अष्टपदी सा भवति विमलैकविकौशलगमकम् । अष्टपदी सा भवति सुखितपण्डितमण्डलिका कुण्डलिनायकभणितविबुधकर्णे कुण्डलिकेति ॥ जलेबी इतिप्रसिद्धे पक्वान्ने ॥

कुण्डली । पुं । फणिनि । सर्पे ॥ वलये ॥ मयूरे ॥ चित्रसरे । चित्तल इति भाषा ॥ त्रि । कुण्डलयुक्ते ॥ कुण्डलवत् कुण्डलाकारोवा सोऽस्यास्ति । अत इनिः ॥

कुण्डलिनायकः । पुं । पिङ्गलसर्पे ॥

कुण्डलिनी । स्त्री । मूलाधारनिवासिन्यां कुलकुण्डलिनीभक्तौ ॥ उरोरुहायाम् ॥ गुडूच्याम् ॥ कुण्डलानांसमूहे ॥ खलादित्वादिनिः ॥ जलेबीतिख्यातेपक्वान्नविशेषे ॥ तस्याःपाकप्रकारो यथा । नूतनंघटमानीय तस्यान्तः कुशलोजनः । प्रस्थार्द्धपरिमाणेन दध्नाऽम्लेन प्रलेपयेत् ॥ द्विप्रस्थांससमितां तप्तदध्यम्लप्रस्थसम्मितम् । घृतमर्द्धशरावञ्च क्षेपयित्वा घटे क्षिपेत् ॥ आतपे स्थापयेत्सा

कुण्डिन

व यावं. याति; तद्भक्तताम् । ततस्त ते प्रक्षिपेत्तु पाके सच्छिद्रे भाजनञ्च तत् ॥ परिभ्राम्य परिभ्राम्य तप्तसप्ते घृते क्षिपेत् । पुनःपुनस्तदावृत्त्या विदधा मण्डलाकृतिम् ॥ तां सुपक्वां घृता न्नीत्वा सितापाके तनुद्रवे । कर्पूरादिसुगन्धे च क्षपयित्वो द्धरेत्ततः ॥ एषाकुण्डलिनी नाम्ना पुष्टिकान्तिबलप्रदा । यातुवृद्धिकरी दृष्टा कथ्या चेन्द्रियतर्पणीति ॥ कुण्डलिनो ङीप् ॥

कुण्डली । स्त्री । गुडूच्याम् ॥ काञ्चनद्रुमे ॥ कपिकच्छाम् ॥ सर्पिणीवृक्षे ॥ जलेबीति प्रसिद्धे मिष्टान्नविशेषे । कुण्डलिन्याम् ॥ इतिमाकरानेश्वरः ॥ कुलकुण्डलिन्यांशक्तौ ॥

कुण्डाशी । त्रि । कुण्डान्नसङ्करविशेषान्नभोजिनि ॥ अस्ते जारजः कुण्डो मृते भर्त्तरि गोलकः । यस्तयोरन्न मश्नाति स कुण्डाशीति कथ्यते ॥ इति देवलः ॥ कुट्टना इति प्रसिद्धे भगभक्षके ॥ सदामारते दानधर्मे तथा दर्शनात् ॥

कुण्डिका । स्त्री । कमण्डलौ ॥ पिठरे । स्थाल्याम् ॥ कुंडा कुंडा इतिच प्रसिद्धे पात्रविशेषे ॥ स्या० कः ॥

कुण्डिनः । पुं । ऋषिविशेषे ॥ भ । विदे

कुतप

यमेदण्डपर्यन्ते काले । अथ यमेको दिष्टश्राद्धारम्भकालः । यथा । आर भ्यकुतपे आद्धं कुर्यादारिष्टबंधः । विधिनो विधिमास्थाय रौहिण न्तु नीलकुर्वेदिति ॥ दिवसस्या ष्टमे भागे मन्दीभवति भास्करः । स कालः कुतपो ज्ञेयः पितृणां दत्त मक्षयम् ॥ अपिच । अष्टौ मुहूर्त्ता विख्याता दशपञ्च सर्वदा । तयोष्ट मो मुहूर्त्तोयः सकालः कुतपः स्मृत इतिमत्स्यपुराणम् ॥ प्राजापत्ये कुतपास्तु मध्याह्नः खड्गपात्रकम् । तथा नेपालकम्बलः । रौप्यं दर्भास्तिलाः गावो दौहित्रश्चाष्टमः स्मृतः ॥ आप कुतसित मित्याहु स्तस्य सन्तापका रिणः । अष्टौ वेलेयत स्तस्मात् कुत पा इतिविश्रुताः ॥ इतिमिताक्षरा याम आचाराध्यायः ॥ कुतसितं तप तीति तपः । संज्ञायामृदृदृजीति खच् । अनव्ययस्येति न मुम् । यद्वा । कुम्बर्तपति । आगमशास्त्रस्यानि त्यत्वान्न मुम् ॥

कुत8 । अ । मत्ये ॥ पञ्चम्यर्थे । कस्मा दर्थे ॥ निश्चये ॥ कस्मात् किमस्त्रीलिङ्गात् । कुतिहोः ॥

कुतुकम् । न । कौतुके । फल्गुनिरूपे चंतया चिकीर्षिते ॥ कुतूचर्म नि

कुतुक

र्मितेभवे । यथा । अथ भीमसुता वलोकने सफलं कर्तुमेव स्तदेव तस्य । चिंतितमण्डलमण्डनायितं न भरं कुण्डिन मण्डलीयया धिति पूर्व नेपथ्ये ऽसर्गः ॥ कुण्डते । कुंडिदा हे । वहुलमन्यत्रापीति डनच् प्र० ॥ कुण्डी । स्त्री । भ्रमवविशेषे ॥ कमण्डलौ ॥ कुण्डी कम्बुकपालानि मधु पूर्णानि विभ्रतः । किं न पश्यसि लोकार्थं ब्रह्मविष्णुमहेश्वरान् ॥ जान पदकुण्डेत्यादिना ङीष् ॥ भक्तैर्यमेतेजारजातायाम् ॥ अभम नुष्यजातिख्यात् जातिलक्षणोडी प् ॥ कुण्डतिधा । कुण्डशब्दोपकरण योः । अमन्ताड्डुः ॥

कुण्डीरः । पुं । मनुष्ये ॥ क्षिप्रवलव तिः ॥ इतिभरणी ॥

कुतनुः । पुं । कुवेरे ॥ त्रि । कुत्सित शरीरे ॥

कुतपः । पुं । सूर्ये ॥ वैश्वानरे ॥ द्विज न्मनि ॥ अतिथौ ॥ गवि ॥ भागिने यि ॥ पुं । न । दौहित्रे ॥ वाच्ये ॥ छाग लकम्बले । नेपालकम्बले । खोर्च इति पर्वतीय भाषा ॥ कुत्सितेन दिनस्याष्टमांशे । कुत्सोऽष्टमोमुहू र्त्तः । त्रिंशद्दण्डदिनमाने द्वितीय प्रहरशेषदण्डादधिष्ठतीयप्रहरप्र

कुतुकम्

थमेदण्डपर्यन्ते काले । अथ यमेको दिष्टश्राद्धारम्भकालः । यथा । आर भ्यकुतपे आद्धं कुर्यादारिष्टबंधः । विधिनो विधिमास्थाय रौहिण न्तु नीलकुर्वेदिति ॥ दिवसस्या ष्टमे भागे मन्दीभवति भास्करः । स कालः कुतपो ज्ञेयः पितृणां दत्त मक्षयम् ॥ अपिच । अष्टौ मुहूर्त्ता विख्याता दशपञ्च सर्वदा । तयोष्ट मो मुहूर्त्तोयः सकालः कुतपः स्मृत इतिमत्स्यपुराणम् ॥ प्राजापत्ये कुतपास्तु मध्याह्नः खड्गपात्रकम् । तथा नेपालकम्बलः । रौप्यं दर्भास्तिलाः गावो दौहित्रश्चाष्टमः स्मृतः ॥ आप कुतसित मित्याहु स्तस्य सन्तापका रिणः । अष्टौ वेलेयत स्तस्मात् कुत पा इतिविश्रुताः ॥ इतिमिताक्षरा याम आचाराध्यायः ॥ कुतसितं तप तीति तपः । संज्ञायामृदृदृजीति खच् । अनव्ययस्येति न मुम् । यद्वा । कुम्बर्तपति । आगमशास्त्रस्यानि त्यत्वान्न मुम् ॥

कुत8 । अ । मत्ये ॥ पञ्चम्यर्थे । कस्मा दर्थे ॥ निश्चये ॥ कस्मात् किमस्त्रीलिङ्गात् । कुतिहोः ॥

कुतुकम् । न । कौतुके । फल्गुनिरूपे चंतया चिकीर्षिते ॥ कुतूचर्म नि

कुतूह

र्मितस्नेहपाचं कायति । कै० । आ-
तोनुपेतिकः । उपपदसमासः । ह्र-
स्वोऽस्योऽपोगालवस्येतिह्रस्वः ॥ य
द्वा । कुत्स्नाम्भवम् । अश्वा० ठक् । ह्र
स्वमुमुगितिकः । कोण इति ह्रस्वः । सं
ज्ञापूर्वकत्वात्पक्षेवृद्ध्यभावः ॥
कुतुपः । पुं । चर्मसञ्ये ऽल्पे स्नेहपात्रे ।
कुप्पी इतिभाषा ॥ ह्रस्वः कुतुः ।
कुत्वाडुप्रत्ये ॥
कुतुम्बुरी । न । कुत्सितंतिन्दुकीफले ॥
कुतूः । स्त्री । चर्मनिर्मितेस्नेहपात्रे ।
कुप्पा इतिभाषा ॥ कुत्सितं तन्यते
। तनु० । वा० कू. टिलोपश्च ॥ कौ
तिप्रा । कुशब्दे । वा० कूस्तुकुंच
कुच्चाडुपजितिनिर्देशाद्वा ॥
कुतूणकः । पुं । कतुया इति गौड भा
षाप्रसिद्धे पात्राणां नेचरोगे ॥ तस्य
ल० । यथा । कुतूणकः क्षीरदोषा
च्छिशूना मेव वर्त्मनि । जायते तेन
तन्त्रेण कण्डूरत्व स्रवेन् मुहुः ॥
शिशुः कुर्यात्ललाटादि कूटना
साव । घर्षणम् । शक्नोनार्कप्र
भां द्रष्टुं न वर्त्मान्मीलनक्षमः
इति ॥
कुतूहलम् । न । अपूर्ववस्तुदिदृक्षाद्य
तिशये चेष्टाविशेषे । कौतुके । कौ
तूहले ॥ कुतूहलं रत्नदृष्टौ चाप-

कुथः

ल्यं परिकोर्त्तितम् ॥ फलनिरपेक्ष
चिकीर्षिते ॥ त्रि । प्रशस्ते ॥ अङ्गते
॥ कुतूहलति । हलविलेखने । मू०
कः ॥ यद्वा । हलति । पचाद्यच् ।
कुत्वाः हलम् ॥
कुतूहली । त्रि । विनोदार्थिति ॥
कुट्टणम् । न । कुस्मिकायाम् । वारिप
र्ण्याम् । जलपक्षी काई इतिक्ष भाषा
। पाना इति गौड़भाषा ॥
कुच । अ । देशप्रश्ने ॥ कस्मिन् । सप्त
म्यास्तसिल् ॥
कुवचित् । अ । कुच । किसीठिकाने
इति भाषा ॥
कुत्सनम् । न । निन्दने । कुत्स० । ल्युट् ॥
कुत्सला । स्त्री । नीलीवृक्षे ॥
कुत्सा । स्त्री । निन्दायाम् । कुत्सन
अ । कुत्स अवक्षेपणे । गुरोश्चहलइति
स्त्रियाम् । टाप् ॥
कुत्सितम् । न । कुष्ठनामौषधे ॥ त्रि ।
निन्दिते । निकृष्टे । प्रतिकृष्टे । रोगे
॥ कुत्सा सञ्जातास्य । ता० इतच् ॥
कुथः । पुं । वर्हिषि । दर्भे ॥ पुं । स्त्री ।
आस्तरणकम्बले । गजपृष्ठस्थितचि
त्रकम्बले । प्रवेणयाम् । वर्षे । हा
थीकीझूल इति भाषा ॥ कुथ्नाति
। कुथसंश्लेषणे । अच् । हलादेरिति
निर्देशात् क्वचिदकित्त्वपि नलोपः ॥

कुधान्य

वदा । कुन्यत्त्यशोभौ । कुथिहिंसा संक्लेशनयोः । आगमशास्त्रस्यानित्यत्वात्तुमुन् । इगुपधेतिकपि अन्वा॥ कुथ्यति वा । कुथपूतीभावे । इगुपधेतिकः ॥ कुथा कन्था समाख्याता कुथः स्या त्करिकम्बलम् । कुथः कुशः कुथः कीटः प्रातःस्नायीद्विजः कुथदृत्त्याहकश्चित् ॥

कुथा । स्त्री । आस्तरणे ॥ टाप् ॥

कुथोदरी । स्त्री । कल्किपुराणेप्रसिद्धायां कुम्भकर्णपौत्र्यां निकुम्भदुहितरि ॥ सांकल्किनाहतेति पुराणे प्रसिद्धिः ॥

कुदृष्टिः । स्त्री । वेदबाह्यतार्किककल्पनायाम् ॥ यावेदबाह्याः स्मृतयो याश्च काश्च कुदृष्टयः । इतिमनुः ॥

कुद्दालः । पुं । कोविदारे । काष्ठनारे ॥ भूमिदारणास्त्रे । कुदाल इतिभाषा ॥ कुम् भूमिं सुद्दालयति । दलविदारणे । कर्मण्यण । अकंष्वादि. ॥

कुद्वङ्गः । पुं । गृहविशेषे । मञ्चोपरिमण्डपे । उद्घाटे । पिठरे ॥ इतिमेदिनीकाण्डशेषः ॥

कुद्वारः । पुं । पिठरे । कुद्वङ्गे ॥

कुद्रुवः । पुं । कोद्रवे ॥

कुद्रुवन. । पुं । कोद्रवे ॥

कुधान्यम् । न । क्षुद्रधान्ये ॥

कुन्तः

कुधीः । त्रि । विपरीतबुद्धिमति ॥

कुभ्रः । पुं । पर्वते ॥ कुंधरति । धृञ् । मूलविभुजादित्वात्कः ॥

कुनखः । पुं । क्षुद्ररोगविशेषे ॥ तल्ल० यथा । नखमांसं समाश्रित्य वातः पित्तञ्च देहिनाम् । कुर्वीत दारुणा कौचं तं व्याधिंविद्यादादिशेत् ॥ तदेवाल्पतरैर्दोषैः पक्षपं कुनखं वदेदिति ॥ त्रि । कुत्सितनखयुक्ते ॥

कुनखी । त्रि । कुनखरोगयुक्ते ॥ सङ्कुचितनखे ॥

कुनटः । पुं । म्लेच्छजातिभेदे ॥ कुत्सितनटे ॥

कुनटी । स्त्री । नैपाल्याम् । मनोज्ञायाम ॥ धन्याके ॥ कौनटति । नट अवस्यन्दने । अच् । गौरादित्वात् ङीष् ॥ कुत्सिता नटी इव वा ॥

कुनदी । पुं । वकवृक्षे ॥

कुनाभिः । पुं । निधौ ॥ वातमण्डल्याम् । वघूला ववण्डर इतिचभाषा ॥

कुनाशकः । पुं । दुरालभायाम् । यवासे ॥ कुनाशयति । शश० । ण्यन्तः । अच् । स्वा० कन् ॥

कुन्तः । पुं । गवेधुकायाम् ॥ प्रासायुधे । भल्ले । भाला इति भाषा ॥ आयोहस्तक्षेप्यशस्त्रे इति स्वामी ॥ कुं शरीरं नुत्ति । उन्दी० । बाहुलका

कुन्तीपु

तः । शकंध्वादिः ॥

कुन्तलः । पुं । केशे । चिकुरे । वाले ॥ ह्रीवेरे ॥ चपके ॥ जवे ॥ हले ॥ कुन्तं कुन्ताग्राकारं लाति । ला० आतोनुपेतिकः ॥ कुन्तलाः । पुंबहु० । जनपदविशेषे ॥ यथा । कांभिगिरिं समारभ्य द्वारकान्तं महेश्वरि । श्रीकुन्तलाभिधो देशो वर्णितः शक्तिसङ्गमे इति ॥

कुन्तलवर्हनः । पुं । भृङ्गराजे । भंगरा इतिभाषा ॥

कुन्तलिका । स्त्री । दधादिच्छेदन्यान् । पाल्लिकायाम् । दही काटनेकी छुरी वाकटोरी इतिभाषा ॥

कुन्तलोशीरम् । न । वालके । पाखा इति भाषा ॥

कुन्तिः । स्त्री । युधिष्ठिरादिपाण्डवानां मातरि ॥ वा० कमेर्भिच् । प्रत्ययादिलोपे कुशब्दादेशः ॥ देशविशेषे ॥

कुन्ती । स्त्री । युधिष्ठिरादीनां जनन्याम् । शूरसेनसुतायाम् । पृथायाम् ॥ गुग्गुलुवृक्षे ॥ शल्लक्याम् ॥ इतो मनुष्यजातेरिति ङीष् ॥

कुन्तीपुत्रः । पुं । युधिष्ठिरादिषु ॥ कुन्तीच शूरसेनराजस्य कन्या पृथानाम्नाख्याता । तत्पिता तां कुन्तिभोजराजायदत्तवान् । अतः कुन्तीति

कुन्दः

विश्रुता । सा च संगीभूतस्य मुनेः श्रीपान्सेथुनरहितस्य स्वामिन आत्मीयाधर्मात् युधिष्ठिरं पवनाङ्नीम मिन्द्रात् दर्जुन मश्विनीकुमाराभ्यां नकुलसहदेवौ जनयामास ॥ सा च कन्यावस्थाया मादित्यात् कर्णञ्च जनयामास । अतः । कर्णोपि कुन्त्याः पुत्रः ॥ कुन्दुः । पुं । वौद्धविशेषे ॥ जिनचक्रवर्त्तिविशेषे ॥

कुन्दः । पुं । अच्युते । मुकुन्देन सर्वपापविनाशाय वाजिमेधेन चेष्टवान् । तस्मिन् यज्ञे महादाने दक्षिणां भृगुनन्दनः । मारीचाय ददौ प्रीतः कश्यपाय वसुन्धरामितिहरिवंशोक्तेः ॥ कुंधरां कश्यपायददातीति । डुदांङ् । आतोऽनुपसर्ग इतिकः । पृषोदरादित्वादेर्णत्वम् । कुंद इति गौड भाषाप्रसिद्धे भ्रमियन्त्रे । चक्रबन्धौ ॥ कुबेरस्य निधिविशेषे ॥ कुन्दुरुनामगन्धद्रव्ये ॥ कारवीरवृक्षे ॥ पाखंडक्षुपाके ॥ पुं । न । पुष्पविशेषे । माध्ये ॥ कुन्दं शीतं लघु श्लेष्मशिरोरुग्विषपित्तहृत् ॥ कुन्भु बंदायति यति वा । दैप्शोधने दो अवखण्डने वा । आत इतिकः । तत्पुरुषे इतिद्वितीयायामलुक् ॥ य-

कुन्दुरु

दा । कुम् भूमिम् उनत्ति । उन्दी° । कर्मण्यण् । अ° ॥ यद्वा । कौति । कुशब्दे । अब्दादित्वात् कौतेर्नुमि तिदन् ॥

कुन्दकः । पुं । कुन्दुरुके ॥

कुन्दमः । पुं । मार्जारे ॥ इति त्रिकाण्ड शेषः ॥

कुन्दरः । पुं । कुन्दरा इति क्लिङ्गेषु ख्याते तृणविशेषे दीर्घपत्रे । खर च्छदे ॥ कुन्दरातिः । रा० । आतो मु पसर्गे इतिकः ॥

कुन्दिनी । स्त्री । पद्मसमूहे । पद्मिन्या म् ॥

कुन्दुः । पुं । मूषिके ॥ स्त्री । कुन्दुरुना मगन्धद्रव्ये ॥

कुन्दुरुः । पुं । स्त्री । स्वनाम्नाख्यातेसुग न्धिद्रव्ये । यस्य निर्यासे कुन्दुरुखोटि इतिगौडानांख्यातिः । पालङ्क्यायाम् । शैवाटे । बहुगन्धे ॥ कुन्दुरुर्मधुर स्निग्धस्त्रीचक्षुष्यः कटुर्हरेत् । ज्वरस्वेदग्रहालक्ष्मीमुखरोगकफानिलान् ॥ कुम्भूमि मुनत्ति उदयति वा । जक्षवादयश्चेति साधुः ॥ पालङ्क्यायाकेपीतिकेचित् ॥

कुन्दुरुकः । पुं । कुन्दुरुनामि सुगन्धिद्रव्ये ॥

कुन्दुरुकी । स्त्री । शल्लकीवृक्षे ॥ कुन्दु

कुप्यम्

रुरिवप्रतिकृतिः ॥ इवेप्रतिकृताविति कन् । गौरादित्वात् ङीष् ॥

कुपथः । पुं । कदध्वनि । कापथे ॥

कुपाणिः । त्रि । कुकरे । वक्रहस्ते । टुखडा इतिभाषा ॥

कुपितः । त्रि । रुषिते । रुष्टे ॥

कुपिनी । पुं । कैवर्त्ते । जालिया मछुवा इतिचभाषा ॥

कुपिनी । स्त्री । खालुइ इतिगौडभाषाप्रसिद्धायां स्वल्पमत्स्यधान्याम् ॥

कुपिन्दः । पुं । तन्तुवाये ॥ कुप्यति । कुप० । कुमेर्वाधचेतिकिन्दच ॥

कुपीलुः । पुं । कारस्करवृक्षे । काकेन्दौ ॥ कुचलां इतिभाषा ॥ कुपीलुः शीतलस्तिक्तो वातलो मदकृल्लघुः । परं व्यथाहरो ग्राही कफपित्तास्रनाशनः ॥

कुपुरुषः । पुं । कुत्सितनरे ॥ कुत्सितःपुरुषः । कुगतीति समासः ॥

कुपूयः । त्रि । कुत्सिते । आक्ष्यात्तारादिनिन्दिते ॥ कुत्सितं पूयते । पूयी विसरणे । पचाद्यच् ॥

कुप्यम् । न । स्वर्णरूप्याभ्या मन्यस्मिन् तैजसे ताम्रादिधातौ ॥ अष्टधातुमध्येदस्ता इतिख्याते धातौ ॥ गुप्यते । गुपूरक्षणे । राजसूयसूर्य्यमृषोद्य रुच्यकुप्यकृष्टपच्याऽव्यथ्या इतिक्यप्

कुजः

स्रोनिपातितःकुप्यशब्दः ॥ तत्रगुप्ते राद्देः कत्त्वसंज्ञायाम् ॥

कुप्यंमाला । स्त्री । स्वर्णरजतभिन्नतैज सपात्रादिनिर्माणयोग्यहेमे । सन्ध्यान्या म् । ठेरच्छट्टा इतिभाषा ॥

कुप्रियः । त्रि । अघन्ये ॥

कुप्लवः । पुं । तृणादिनिर्मिते कुत्सि तो डुपादौ ॥

कुबेरः । पुं । धनदे । यक्षराजि ॥ न स्त्रीहस्वे ॥ अर्द्धदुर्वासकविशेषे ॥ त्रि । कुदेहे ॥ मन्दे ॥ कुत्सितं बेरं शरीरं मस्य कुत्सितत्वात् । यथोक्तः । कुत्साया क्षितिशब्दोयं शरीरंबेर मुच्यते । कुबेरः कुशरीरत्वात्मा तेनैवसोङ्कितः ॥ इतिवायु पुराणम् ॥ यद्वा । कुत्सितं धनम् । कुत्सि च्छादने । कुत्सेर्नलोपश्चेत्त्वेरक् । ओणद्यमध्यः ॥

कुबेरकः । पुं । नन्दिवृक्षे ॥ कुबेरे ॥ स्वार्थेकः ॥

कुबेराक्षी । स्त्री । पाटलावृक्षे ॥ खना करञ्जे । सितपाटलिकावृक्षे ॥ कुबे रस्येवाक्षियस्याः । अक्ष्णोदर्शनादि षच् । गौरादित्वान् ङीष् ॥

कुबेराचलः । पुं । कैलासपर्वते ॥

कुबेराद्रिः । पुं ।

कुब्जः । पुं । खड्गे ॥ अपामार्गे ॥ त्रि । ग

कुमारः

डुले । कुब्जा इतिभाषा ॥ अस्यलक्ष णं यथा । हृदयं यदि वा पृष्ठ मुन्न तं क्रमशः सर्वक । कुद्धो वायु र्यदा कुर्यात्तदा तं कुब्जमादिशेत् । इति ॥ कुंरीषत् उब्जमार्जवमस्य । ब० ॥

कुब्जकः । पुं । पुष्पविशेषे । भद्रपुष्पे ॥ महासहे । कण्टकाख्ये । कुब्ज कूजा कूजे इतिचुभाषाप्रसिद्धे सेवतीप्रभे दे । यथा । चम्पकात् पुष्पतः का दशोकपुष्पं मुत्तमम् । अशोकात् पुष्पसाहस्रात् सेवतीपुष्प मुत्तमम् ॥ सेवतीपुष्पसाहस्रात् कुब्जकं पु ष्पमुत्तममितिनारसिंहपुराणम् ॥ अस्यगुणा यथा ॥ कुब्जकः सुरभिः स्वादुः कषायानुरसः सरः । त्रिदोष शमनो हृद्यः शीतवर्च्चोबलप्रदः ति ॥ कौ उब्जति । उब्जआर्जवे । अच् । यद्वा । कुरीषत् उब्जमार्जव मस्य । ब० । स्वार्थेकः ॥

कुब्जकण्टकः । पुं । श्वेतखदिरे ॥

कुब्जम् । न । वने ॥ कुम्बति । कुविआ च्छादने । चञ्जेन्द्रेतिरन् ॥

कुभट्टेखिकः । पुं । सभ्यशलाकभक्षके ॥

कुमनीषः । त्रि । कुत्सितबुद्धिमति ॥ कुत्सिता मनीषाऽस्य ॥

कुमारः । पुं । शुके ॥ कार्त्तिकेये । स्क न्दे ॥ नाट्योक्तायुवराजे ॥ अश्ववार

कुमारि ।
के ॥ पञ्चवर्षीयबालके ॥ वरुणद्रुमे
॥ अर्हदुपासकविशेषे ॥ सिन्धुनदे
न । जात्यकाञ्चने । उत्तमस्वर्णे
की ॥ कुमारयति क्रीडति । कुमारक्री
डायाम् । पचाद्यच् ॥ कुत्सितोमा
रोऽस्येतिवा ॥ कौमारयति दुष्टान्
। अच् ॥ संज्ञायांकन्यादावकुमारः ॥
रियङ्वा । कौमर्यते । कमु० । कमेःकि
दुश्चोपधायाइत्यारन प्रत्ययः ॥
कुमारकः । पुं । वरुणद्रुमे ॥ कुमारश्चि
रतरुणत्वात् ॥ कुमारयति । पचा
द्यच् । कुमारइव । इवेप्रतिकृतावि
तिकन् ॥ बालके ॥ जात. कुं पृथि
वीं प्रज्ञां मारयेत् तत् कुमारकः ॥
कुमारपालः । पुं । श्रालिशाचलन्तृपे ॥
इतिहेमचन्द्रः ॥
कुमारभृत्या । स्त्री । गर्भिण्याःपरिच
र्यायाम् । बालतन्त्रे ॥
कुमारयुः । पुं । युवराजे ॥
कुमारवां । त्रि । कुमार यति ॥ कुमा
रोऽस्त्यस्य । अन्येभ्योपिदृश्यतेइति
वः ॥
कुमारवाटी । पुं । मयूरे ॥
कुमारसू । स्त्री । गङ्गायाम् ॥ दुर्गाया
म् ॥ कुमारंसूते । सूङ् । क्विप् ॥
कुमारघ्ना । त्रि । बालघातिनि ॥
कुमारिकः । त्रि । कुमारीमति ॥ कु

कुमारी
मार्य्यस्त्रियाम्रोठक् ॥ स्त्री ।
कुमारिका । स्त्री । कुमार्यर्षे ॥ नवम
ल्लिकायाम् ॥ भारतवर्षखण्डविशे
षे । भरतखण्डे ॥ यथा । वर्षे अव
स्थितिरिहैव कुमारिकाख्ये शेषेषु
चान्त्यजजनानिषसन्ति सर्वेइति ॥
स्थूलैलायाम् ॥ पुं । स्त्री ।
कुमारिणी । स्त्री । चण्ड्याम् ॥ कुत्सि
तान् दैत्यान् मारयति तच्छीला ॥
कुमारी । स्त्री । शैलतनयायाम् । पा
र्वत्याम् ॥ नवमल्लिकायाम् ॥ नदी
प्रभेदे । शुक्तिमत्पादोद्भवायांस
रिति ॥ सखीयाम् । धृतकुमार्याम् ॥
यथा । कुमारी भेदिनी शीता ति
क्ता नेत्र्या रसायनी । मधुरा बृंह
णी बल्या दृष्ट्या वातविषप्रणुत् ॥
गुल्मप्लीहयकृद्दृद्विकफज्वरहरी हरे
त् । ग्रन्थग्निदग्धविस्फोटपित्तरक्त
त्वगामयानिति ॥ अपराजितायां
म् ॥ जम्बुद्वीपविभागे ॥ रोमतरु
ण्याम् ॥ वन्याकर्कोटक्याम् ॥ स्थू
लैलायाम् । भेदिनीपुष्पे ॥ तरुणी
पुष्पे ॥ श्यामापक्षिणि ॥ कन्याया
म् ॥ षड्वर्षीयायांकन्यायाम् ॥ य
था । अष्टवर्षा भवेद्गौरी दशवर्षा
च कन्यका । सम्प्राप्तेद्वादशेवर्षेकुमा
रीत्यभिधीयते । स्मृतौभेदः ।

कुमुद

कन्याकुमारीत्यमरे नूपचारादभेदः॥ आगमेतु कुमारीपूजने अजातपुष्पाचेत् तदा षोडशवर्षपर्यन्तं वयस्कापि कुमारीत्युच्यते। तस्याः वयोभेदेन नामभेदाः। यथा॥ एकवर्षा भवेत् सन्ध्या द्विवर्षाच सरस्वती। त्रिवर्षातु त्रिधामूर्त्तिश्चतुर्वर्षातुकालिका॥ सुभगा पञ्चवर्षा च षड्वर्षाचउमाभवेत्। सप्तभिर्मालिनी साचात् अष्टवर्षाच कुब्जिका॥ नवभिः कालसङ्कर्षा दशभिश्चापराजिता। एकादशेतु रुद्राणी द्वादशाब्देतुभैरवी॥ त्रयोदशेमहालक्ष्मी र्दिसप्तापीठनायिका॥ चेत्रे आषष्ठदशभिः षोडशेचान्नदामता॥ एवङ्क्रमेण सम्पूज्या यावत् पुष्पंन जायते। पुष्पितापिचसम्पूज्या तत्पुष्पादानकर्म्मणीति॥ कुमारयति कुमारक्रीडायाम्। अच्। गौरादिः॥ यद्वा। कामयते। कमु०। कमेर्ठकिदुपधायाश्चेत्यारन्। वयसिप्रथम इतिङीप्॥ काम्यतेवा॥ कान्तितोमारोऽस्यास्या वा॥

कुमालकः। पुं। सौवीरदेशे॥

कुमुत। न। कैरवे। कुमुदे॥ रक्तोत्पले॥ चि। कृपणे॥ अप्रीते॥

कुमुदम्। ने। कुमुदि। कैरवे। क

कुमुदा

ह्लादे। इन्दुकमले। कोद्र इतिभाषा॥ कुमुदं पिच्छिलं स्निग्धं मधुरं ह्लादि शीतलम्॥ रूप्ये॥ रक्तपद्मे॥ पुं। नैर्ऋतकोणस्थदिग्वस्तिनि॥ रक्तोत्पलतुल्यवर्णत्वात्॥ नागविशेषे। तच्चकर्कोटपद्मेपुंवे॥ यस्य वासो बहुद्यामा दीर्घलाङ्गलमाश्रिताः। ताम्राः पीताः श्रिताश्चैव प्रकीर्णाघोरकर्मणइतिरामायणम्॥ दैत्यविशेषे॥ सितोत्पले॥ कर्पूरे॥ कौमोदते। मुद्हर्षे। इगुपधेतिकः॥ पर्वतविशेषे॥ मुक्तकविशेषे॥

कुमुदखण्डम्। न। कुमुदानां समूहे॥ कमलादिभ्यः खण्डः॥

कुमुदबान्धवः। पुं। चन्द्रे। अश्विनि॥ कुमुदानां बान्धवः॥ कर्पूरे॥

कुमुदवती। स्त्री। कुमुदत्यां॥

कुमुदबीजम्। न। कुमुदतीबीजे।

कुमुदा। स्त्री। कुम्भिकायाम्। वारिपर्ण्याम्। कइ इति भाषा। पानीइति गौडभाषा॥ गम्भारीवृक्षे॥ शालपर्णीवृक्षे॥ धातकीवृक्षे॥ कटफले॥ अजादनटापे॥

कुमुदाभिख्यम्। न। रूप्ये॥ कुमुदमिव अभिख्या शोभायस्य॥

कुमुदावासः। पुं। कुमुदप्रायदेशे॥ कु

कुमोद

मुदानां भावासौ यस्मिन् ॥ कुमुदिका । स्त्री । कटफले ॥ कौमोदते । मुदीहर्षे । इत्युपधेतिकः । स्वार्थे कन् ॥ कुमुदिनी । स्त्री । कुमुदयुक्तपुष्करिण्यादौ ॥ कुमुदसंतानयुक्तायाम् ॥ छत्रातिच्छत्रन्यायेन । छोटी कोंची इतिभाषा ॥ कुमुदान्यवदेशे सन्ति । पु० इनिः ॥ कुमुदखण्डे ॥ कुमुदानांसमूहः । खण्डा० इनिः ॥ पद्मिन्यां ये गुणाः प्रोक्ताः कुमुदिन्याश्चते स्मृताः । सारतामूलादिसर्वैस्तै रक्तासमुदितावुधैः ॥ कुमुदिनीनायकः । पुं । चन्द्रमसि ॥ कुमुदिनीपतिः । पुं ॥ कुमुदी । स्त्री । कटफले ॥ कुमुदेशः । पुं । चन्द्रे इन्दौ ॥ कुमुदान् । त्रि । कुमुदप्रायदेशे ॥ कुमुदानि प्रायाण्यस्य । कुमुदनडवेतसेभ्योऽतुप् । मयट् वः ॥ कुमुद्वती । स्त्री । कुमुदिन्याम् ॥ उगितश्चेतिङीप् ॥ रामपुत्रस्य कुशस्य पत्न्याम् ॥ कुमुदनागस्य कनिष्ठायाम् ॥ कुमुद्वतीबीजम् । न । वेरा इतिप्रसिद्धे फैरविणीफले ॥ भवेत् कुमुद्वतीबीजं स्वादुरुष्णं त्रिदोषगुरु ॥ कुमोदकः । पुं । विष्णौ ॥ इतिहेमच-

कुम्भः

न्द्रः ॥ कोः पृथिव्यामोदकः प्राशकत्वात् ॥ कुम्भः । त्रि । बाहुकुण्डे । दोगंडा । टुण्डा । इतिभाषा ॥ कुम्भा । स्त्री । सुगन्धनायकाद्दर्तृ । निबिडवेष्टने । अस्पृश्यादिदर्शनवारणायवेष्टने ॥ कुम्भति अनयाधा । कुभि आच्छादने । चितिपूञ्जिकथिकुम्बिचर्चेत्यङ् । टाप् ॥ कुम्भः । पुं । एकादशे राशौ । कुंडोगे ॥ जन्मकालिकचन्द्रान्वितैतद्राशिफलम् । यथा । अलसतासहितोऽन्यशुभप्रियः कुशलतां कलितोऽतिविचक्षणः । कलयगामिनि गीतकरेनरः सदसि सज्जनमान सुरो भवेत् इति ॥ तल्लग्नेजातस्यफलन्तु । कुम्भलग्नेसमुद्भूतश्चलचित्तोतिवाचालः । परदारतोनित्यंसत्त्वकायेमहामुखी ॥ इलिमूर्द्धांसे ॥ गलशिरसपिकदेशे ॥ यथा ॥ तोयक्रियाकुण्डलिनो युवानः परस्परंसाय कलिचताङ्गाः । कुम्भेषु लग्नाः सुपुष्टगंडानां कुचेषु लग्ना इवकामिनीनामिति ॥ राघवपाण्डवीये । कुम्भकर्णस्य पुत्रे ॥ वेण्यायतौ ॥ प्राणायामात्रकुम्भके ॥ परिमाणान्तरे ॥ सच द्विपलप्रस्थं द्रोणो विंशतिसेरक

कुम्भकः

शकुम्भः इति धान्यं दृश्यते। कुम्भेभ्य इत्यत्रापि कुम्भूकमिति। अन्यत्रे। द्रोणोऽस्त्रियां भवेत् खारी कुम्भ स्तुद्रोण विंशतिरिति प्रायश्चित्ततत्त्वैकवाक्यतया वाक्यम्॥ वैद्यक परिभाषयातु द्रोणद्वयपरिमाणे। ६४ सेर इति भाषा॥ कलशे। घटे॥ अस्य परिमाणं यथा। षट्चिंशद्दङ्गुलायामं षोडशाङ्गुलमुच्छ्रितं। चतुरङ्गुलकण्ठं मुखं तस्य षडङ्गुलम्॥ पञ्चाङ्गुलमितं मूलविधानं घटनिर्मितावितिः॥ कलशवर्तीद्रोणोक्तमानं यथा। पञ्चाशद्दङ्गुलव्याम उत्सेधः षोडशाङ्गुलः। कलसानां प्रमाणन्तु मुखमष्टाङ्गुलं स्मृतम्॥ घटचिंशद्दङ्गुलं कुम्भं विस्तारोन्नतिभाजिनम्। षोडशं द्वादशं चापि तेनोनं न कारयेदिति॥ न। गुग्गुलौ॥ चिवृतिः॥ कुम्भूमिं कुत्सितां षो उम्भति। उम्भपूरणे। कर्मण्यण्। पिचादच्वा। अकंष्वादिः॥

कुम्भक। पुं। दक्षिणहस्तेन नासापुटद्वयंधृत्वा प्राणायामाङ्गे वायुस्तम्भने। पूरकेण पूरितस्यवायोरन्तरेव निरोधे॥ कुम्भको निश्चलश्वास इति याज्ञवल्क्यः॥ सद्वृत्तिनैश्चल्ये॥ आत्मानुसन्धानदार्ढ्ये॥ त्यागसङ्ग्रहणे

कुम्भक

क्षित्वा निरोधः कुम्भकः स्मृतः। रेचपूरशक्ति सदभ्यासाद्वीक्ष्यते मरुतां गतिः॥

कुम्भकर्णः। पुं। रावणानुजे॥

कुम्भकार। पुं। शूद्रागर्भे विश्वकर्मोरसजातौ जातिविशेषे। कुलाले च। स्त्रियां॥ कुम्भं करोति। कृकुम्भ। कर्मण्यण्। उपपदसमासे॥ कुकुभपचित्रिभ॥

कुम्भकारिका। स्त्री। कुलत्थायाम्॥

कुम्भकारी। स्त्री। कुलत्थिकायाम्॥ मनशिलायाम्॥ कुलित्थाख्ये॥ कुम्भकारस्य यौषितिः॥ अर्शआदित्वात् टिट्ढेति ङीप्॥

कुम्भतुम्बी। स्त्री। अलाबूप्रभेदे। रेचतुम्ब्याम्। गोरखतुंबी गोखतूंबी इतिभाषा॥

कुम्भदासी। स्त्री। कुट्न्याम्॥

कुम्भयोनिः। पुं। अगस्त्यमुनौ॥ वशिष्ठमुनौ॥ द्रोणाचार्ये॥ कुम्भेयोनिरस्य॥ द्रोण पुष्पीम्॥

कुम्भला। स्त्री। मुण्डितिकायाम्। मुण्डी इति भाषा॥

कुम्भबीजक। पुं। रीठाकरञ्जे॥

कुम्भशाला। स्त्री। कुम्भनिर्माणादिगेहे। पाकपुण्याम्॥ इति हेमचन्द्रः॥

कुम्भसन्धि। पुं। आरचौ हस्तिकुम्भ

कुक्षिम

-द्वयमध्यस्थाने॥ कुम्भसम्भवः। पुं। अगस्त्यमुनौ॥ कुम्भात् कलशात् सम्भव उत्पत्तिर्यस्य सः॥ कुम्भा। स्त्री। वेश्मायाम्॥ नागदन्त्याम्॥ कुम्भाण्डः। पुं। बाणासुरस्य मन्त्रिविशेषे॥ कुष्माण्डे॥ कुम्भाण्डी। स्त्री। कुष्माण्ड्याम्॥ कुम्भाधिपः। पुं। शनिग्रहे॥ कुम्भालावुः। स्त्री। कुम्भतुम्ब्याम्॥ कुम्भिका। स्त्री। पानाइति-गौड भाषा-प्रसिद्धे जलजन्तुविशेषे। काष्ठादिदेशेषु कुम्भीति-ख्याते पानीयपृष्ठजे। वारिपर्ण्याम्॥ वारिपर्णी वृन्तत्यक्ता कुम्भिकेति प्रकीर्त्तिता॥ पाटलावृक्षे॥ द्रोणपुष्पयाम्॥ नेचरोगवि॰॥ यथा। यस्मान्ते पिडका धाता भिद्यन्ते च स्रवन्ति च। कुम्भीबीजसदृशा कुम्भिकाः सन्निपातजाः इतिमाधवः॥ कुम्भोस्यस्याः। अतइनिठनाविति ठन्॥ कुम्भी। पुं। हस्तिनि॥ कुम्भीरे॥ गुग्गुलौ॥ कुम्भिनीबीजम्। न। जयपाले॥ कुम्भिपाकी। स्त्री। कट्फले॥ कुम्भिमदः। पुं। हस्तिमदे॥

कुम्भीपा

कुम्भिलः। पुं। चोरे॥ शालमत्स्ये॥ स्तोकार्थचोरे॥ श्याले॥ इतिहेमचन्द्रः॥ कुम्भी। स्त्री। उखायाम्॥ पाटलावृक्षे॥ वारिपर्ण्याम्॥ कट्फले॥ कुम्भीपुष्पं इति कोंकणदेशप्रसिद्धे वृक्षविशेषे। रोमालुविटपिनि॥ घृष्टिकायाम्॥ गर्गर्याम्॥ कुम्भीव कुम्भीरसाधारत्वात्॥ कुम्भीकः। पुं। देववृक्षभे। पुन्नागवृक्षे॥ कुम्भिकायाम्॥ नपुंसकभेदे॥ तस्यलक्षणं यथा। स्त्रेगुदेऽब्रह्मचर्याधः स्त्रीषु पुंवत् प्रवर्त्तते। सकुम्भीकइति ज्ञेयो गुदयोनिस्तुसस्मृत इति॥ कुम्भीका। स्त्री। कच्छदेशे दाडिमाकारफलायां लतायाम्॥ कुम्भीधान्यः। पुं। वर्षनिर्वाहार्थिनि॥ कुम्भीधान्यकः। पुं। तत्-धान्यादिधने गृहस्थब्राह्मणे॥ कुम्भीनसः। पुं। क्रूरसर्पे॥ कुम्भीनसी। स्त्री। रावणभगिन्याम्॥ कुम्भीपाकः। पुं। नरकविशेषे। स्मर्य्यतापने॥ यइह पशून् मचिणोवा प्राणतो रुन्धयति तंपरत्र यमानुचरा जलतैले यत्नो पन्थयन्तिसकु-

कुरङ्गः
। श्रीपाकृतिति त्रीभागवतम् ॥
कुम्भीरः । पुं । कुम्भीर इति नाँका
तिच भाषा प्रसिद्धे भारके जलज
न्तुविशेषे । गिलग्राहे ॥ कुम्भि
नं हन्ति न भीरयति । कर्मण्यण् ।
उपपदसमासः ॥
कुम्भीरमक्षिका । स्त्री । कुम्भीरापोका
इति गौड भाषा प्रसिद्धे मक्षिका
विशेषे । कर्णायाम् ॥ इतिहारावली ॥
कुम्भीवीजम् । पुं । जियपोते ॥
कुम्भोलुः । नपुं । गुग्गुलौ ॥
कुम्भोलूखलकम् । नपुं । गुग्गुलौ ॥
कुम्भोलूखलकाकारादृक्षकोशाच्चि
त्यीतम् ॥
कुरका । स्त्री । सल्लकीवृक्षे ॥
कुरङ्करः । पुं । सारसपक्षिणि । पु
कुरङ्करः । पुं । पक्षराक्षे ॥
कुरङ्गः । पुं । हरिणविशेषे ॥ कुरङ्ग
दूपसताम्रः साद्धरिणाकृतिको मधा
न् ॥ कुरङ्गोदंहणे बल्यः प्रीतलः पि
त्तह हुरुः । मधुरो वातहद्ग्राही
किञ्चित् कफकरो मतः इति । हरि
णसगुणैस्तुल्यः कुरङ्गः कथितोबुधै
रितिचभावप्रकाशः ॥ स्त्रियां । घातायां
॥ कौ रङ्गति । रगि० अच् ॥ कौरङ्गो
स्त्रियां वा सर्वत्रीयच् ॥ यद्वा । किर
ति । क्विप् । विडादिभ्यः किदिच्च

कुरी
। ङीष् प्र० । बाहुलकात् उत्वम् । कु
रशब्देवाऽस्तु ॥
कुरङ्गनयना । स्त्री ॥ मृगनयनायांना
यांम् । कुरङ्गाक्ष्याम् ॥
कुरङ्गनाभिः । पुं । कस्तूर्याम् ॥
कुरङ्गमः । पुं । एणे । ऋक्ष्ये ॥ हरिणवि
शेषोयम् ॥
कुरङ्गाक्षी । स्त्री । एणीलियनायाम् ॥
कुरङ्गिका । स्त्री । मृगप्रख्याम् ॥
कुरङ्गी । स्त्री । कुरङ्गयोषायाम् । भ
ग्याम् ॥
कुरचिल्लः । पुं । कर्कटे ॥
कुरटः । पुं । चर्मकारे ॥
कुरण्टः । पुं । पीतायां झिण्ट्याम्
कुरण्टकः । पुं । पीतास्थाने ॥ कुर्य
ते । कुरशब्दे । बाहुलकात् अण्टः ।
स्वार्थे कन् ॥
कुरण्डः । पुं । मुष्कवृद्धिरोगे । अण्डव
र्द्धने ॥ साकुरण्डवृद्धे ॥
कुरण्डकः । पुं । त्रिसन्ध्यादेश्याःस्थाने ॥
कुररः । पुं । उत्क्रोशखगे ॥ कवते ।
कुङ्शब्दे । कुयःकरन् ॥
कुरराङ्घ्रिः । पुं । देवसर्षपे । रक्तमूल
के ॥ क्षुद्रमदले ॥
कुररी । स्त्री । मेघ्यां ॥ कुररस्त्रिया
म् ॥
कुररीरुता । स्त्री । छन्दोविशेषे ॥ कुर

कुरीरः

रीरता नजभजैर्लगयुक्। यथा। अ
नतिचिरोज्झितस्य जलदेन चिर
स्थितबहुबुद्बुदस्य पयसोनुकृतिम्।
विरलविकीर्णवज्रशकलासकला मि
ह विदधाति धौतकलधौतमहीति॥
कुरलः। पुं। उत्क्रोशे। कुररे॥ चूर्णे
कुन्तले॥ इतिधरणी॥
कुरवः। पुं। पीतझिण्ट्याम्॥ कुरवके
। रक्तझिण्ट्याम्॥ सितमन्दारे॥ कु
त्सितशब्दे॥ त्रि। कुत्सितशब्दयु
क्ते॥
कुरवकः। पुं। रक्तझिण्टे। रक्तसंज्ञा
याम्। रक्तझिण्ट्याम्॥ पीतझि
ण्ट्याम्॥ त्रि। कुत्सितरवे॥ कुत्सि
तः ईषदा। अल्पीना मध्यमकरन्दु
त्वात्। रवोऽच। बहुव्रीहिरन्नका
देशः॥
कुरसः। पुं। मेषभेदे॥ कुत्सितरसे
॥ त्रि। कुत्सितरसयुक्ते॥ कुत्सितो
रसोऽच॥
कुरसा। स्त्री। गोजिह्वालतायाम्॥
कुराटः। पुं। कुलाहे। ईषत्पाण्डौ क्व
णच्छे घोटके॥ इतिहेमचन्द्रः॥
कुरी। स्त्री। तृणधान्यप्रभेदे॥
कुरीरः। पुं। कम्बले॥ न। मैथुने॥
कियते। डुकृञ्०। कृञउच्चेति ईर
न्प्रत्ययः। उदन्तादेशश्च॥

कुरुचे

कुरुः। पुं। आग्नीध्रराजपुत्रे। प्रियव्रत
स्य पौत्रे॥ चन्द्रवंशीयराजविशेष
। सम्वरणराजभार्यायां सूर्यकन्या
यां तपत्यां जाते॥ ओदने। भक्ते
॥ श्रीकण्ठजाङ्गले॥ करटकारिका
याम्॥ कर्त्तरि॥ करोति। डुकृञ्०
। कृमोरुच्चेतिकुः॥ जम्बूद्वीपस्यनव
वर्षान्तर्गते वर्षविशेषे॥ कुरवः च
त्रियाः। तेषां निवासो जनपदः कुर
वः। निवासेऽणो जनपदेषु। यु
पियुक्तवद्यक्तिवचने॥ पुंभू। नीवृद्भि
देशे॥ हस्तिनापुरमारभ्य कुरुक्षे
त्रादक्षिणे। पश्चात्पूर्वभागेतत्कु
रुदेशः प्रकीर्त्तितः॥
कुरुकन्दकम्। न। मूलके॥
कुरुक्षेत्रम्। न। देवयजने। देशविशे
षे। धर्मक्षेत्रे। कुरुपाण्डवानां युद्ध
भूमौ॥ तरन्तुकारन्तुकयोर्यदन्तरं
ह्रदानाञ्च मचक्रुकस्य च। एतत्
कुरुक्षेत्रसमन्तपञ्चकं प्रजापतेरुत्तर
वेदिरुच्यते॥ त्रयाणामपिलोकानां
कुरुक्षेत्रं विशिष्यते। अर्द्धतस्तुकुरु
क्षेत्रमर्द्धतस्तुपृथूदकम्॥ कुत्सितंरौ
तीति कुरु पापंकर्म तस्यक्षेपणात्
गमनकारणत्वात् क्षेत्रम्॥ यद्वा।
कुः पृथिवी तस्यांरौतिशब्दंकरोति
यः प्राणस्तस्यनिवासभूतम्॥ स्थाणु

कुरुरा
प्रियादेव्याःस्थानमेतत्॥
कुरुक्षेत्रीयोगः। पुं॥ एकस्मिन् सावन दिने तिथित्रयनक्षत्रत्रययोगत्रयाणां स्पर्शे। कुरुक्षेत्रे मरणयोगे॥ ॥॥ यथा। पञ्चग्रहयुते मेषौ लग्नसंस्थे बृहस्पतौ। सौम्यक्षेत्रगते लग्ने कुरुक्षेत्रे मृतिर्भवेदिति जातकामृतसङ्ग्रहे योगाध्यायः॥
कुरुटः॥ पुं॥ सितार्वरशाके॥
कुरुण्टः। पुं। पीतझिण्ट्याम्॥ पीतासाने॥
कुरुण्टकः। पुं। पीतपुष्पाख्याने॥ पीतझिण्ट्याम्। सेहचर्याम्॥ कुण्टति वटिस्तेयकरणे। कुण्ट् कुन्वा। कुत्सितः कौवा कुण्टकः। कुगतीति समासः॥
कुरुण्टी। स्त्री। दासपुत्तलिकायाम्॥
कुरुपतिः। पुं। युधिष्ठिरे॥
कुरुम्बम्। न। कुलपालके। क्रमखानेवू इति गौडभाषाप्रसिद्धे। नारङ्गविशेषे॥
कुरुमा। स्त्री। द्रोणपुष्प्याम्॥
कुरुम्बिका। स्त्री।
कुरुम्बिका। स्त्री। सैरेयीद्रव्ये॥
कुरुराट्। न। दुर्योधने॥
कुरुराजः। पुं। दुर्योधने॥ कुरुणां देशविशेषाणां राजा। टच्॥

कुरुरः
कुरुरः। पुं। भ्रूसंस्थितचूर्णकुन्तले। भ्रमरके। भ्रमरालके॥
कुरुवकः। पुं। रोगाख्याने। रक्तस्थाने। रक्तझिण्ट्याम्॥ पीतझिण्ट्याम्॥ ईषद्रौतीति। रुशब्दे। संज्ञायांकन्। उवङ्॥
कुरुवर्षः। पुं। कुरुसंज्ञके वर्षे॥
कुरुविन्दः। पुं। मेघनामनि। मुस्तायाम्॥ कुलत्थे॥ द्वीपिमभेदे॥ मुकुरे॥ हिङ्गुले॥ न। पद्मरागमणौ। माणक इति भाषा॥ काचलवणे॥ कुरून् विन्दति। विद्लृ लाभे। अनुपसर्गाल्लिम्पविन्दधारिपारि वेत्युदेजिवेतिसातिसाहिभ्यश्चेति नः॥
कुरुविल्वः। पुं॥ पद्मरागमणौ॥
कुरुविल्वः। पुं। स्वर्णपत्रे। सोना इतिभाषा॥ कुरुषु विल्वः॥
कुरुवृद्धः। पुं। भीष्मपितामहे॥ कुरुषु कुरुवंशजेषु वृद्धः॥
कुरुवृद्धः। पुं। युधिष्ठिरे॥
कुरुष्यम्। न। रक्ते॥
कुर्जः। पुं। कुलञ्जनवृक्षे। गन्धमूले॥
कुर्परः। पुं। कफोणौ॥ जानुनि॥ कुरति। कुरशब्दे। किप्॥ कोरणम्। संपदादिर्या। पिपर्त्ति। पॄ॰ अच्। कुरचासौपरश्च॥ कुरा शब्देन पूरो या॥

कुलम्

कुर्पासः । पुं । अर्द्धचोलके ॥ ।
कुर्पासकः । पुं । कञ्चुलिकायाम् ।
आँगी काँचुली चोली इतिचभा
षा ॥
कुर्व्वत् । त्रि । कर्मकारी । भृत्ये ॥ क
रोति । डुकृञ् । शतृ ॥ तनादि
कृञ्भ्यउः । अनउत्सार्वधातुके ।
यण् ॥
कुर्व्वाणः । त्रि । भृत्ये ॥ कारके ॥ कु
रुते । डुकृञ् । शानच् ॥
कुलम् । न । जनपदे ॥ मध्यमहलद
येनयावती भूमिर्वाह्यते तावत्यां
भूमौ ॥ दयौ कुलन्तु भुञ्जीतेतिम
नुः ॥ गोत्रे ॥ सजातीयगणे ॥ यथा
। विप्रकुलम् ॥ आचारो विनयो वि
द्या प्रतिष्ठा तीर्थदर्शनम् । निष्ठा
वृत्तिस्तपो दानं नवधा कुलल
क्षणम् ॥ भवने ॥ तनौ । देहे ॥ सव
इति भाषा । प्रसिद्धेषु । जीवादिषु
यथा । जीवः प्रकृतितत्त्वञ्च दिक्
कालाकाशमेवच । चित्त्यपतेजो वा
यवस्त्र कुलमित्त्य भिधीयतेइति ॥
पुं । कुक्षिके । श्लिष्टिकुलप्रधाने । को
ऽति । कुलसंख्यानेबन्धुषुच । इगु
पधेतिकः ॥ यद्वा । कूयते । कुङ्श
ब्दे । वा० लक् ॥ कुल् भूमिबन्धनिषा
कौलीयते वा । लीङ् श्लेषणे । अ

कुलटा

न्येभ्योपीतिडः ॥ ।
कुलकः । पुं । वल्मीके ॥ काकतिन्दु
के ॥ कुलश्रेष्ठे ॥ मरुवकवृक्षे ॥ ह
रितसर्पे ॥ न । पटोले ॥ पञ्चादि
सम्बन्धसो कसमूहे ॥ त्रि । श्लिष्टि
कुलप्रधाने । कुलस्येष्ठिनि ॥ कुलस्य
गृहस्य प्रतिकृतिरिव । इवेप्रतिकृतौ
वितिकन् ॥ यद्वा कोऽस्ति । कुल-
संख्याने । इगुपधेतिकः । स्वार्थेकन्
कुन् वा ॥
कुलकर्कटी । स्त्री । चीनाककर्कट्याम् ॥
कुलकुण्डलिनी । स्त्री । मूलाधारपद्म
स्थितशिवशक्तिविशेषे ॥
कुलक्कः । पुं । करतालाख्ये । तालभेद
ले ॥ इतिहारावली ॥ ।
कुलक्षया । स्त्री । शूकशिम्बिम् ॥
कुलजः । पुं । कुलीने । सत्कुलप्रसूते
॥ कुले जातः । सप्तम्यांजनेर्डः ॥
कुलजा । स्त्री । कुलपालिकायाम् ॥
डाप्टाप् ॥
कुलञ्जः । पुं । कुलञ्जनवृक्षे ॥
कुलञ्जनः । पुं । स्वनामाख्याते कुलञ्जे
। गन्धमूले ॥ कुलञ्जनस्य स्वरकुन्
दुलक्षणगुणशोधनः । अर्क इति-
शेषः ॥
कुलटा । स्त्री । असत्यां । पुंश्चल्या

कुलट्या

म्। वन्धक्याम्॥ अभिचाराथँ कु
लानि अटति। अट॰। पचाद्यच्।
अर्कंण्वादिः॥ भिक्षुक्याम्। स्त्रि
याम्। भिक्षार्थं कुलानि अटति।
पूर्ववत् प्रक्रिया॥ परकीयान्तर्गतना
यिकाविशेषे॥

कुलतिथिः। पुं। स्त्री। चतुर्थ्यष्टमीदा
दशीचतुर्दशीषु॥ यथा। द्वितीया
दशमी षष्ठी कुलाकुल मुदाहृतम्।
विपरीता कुलाः प्रोक्ता वर्जनीयाः प्रयत्नतः
इति तन्त्रशास्त्रम्।

कुलत्थः। पुं। स्वनामख्याते धान्यविशे
षे। तामबीजे। कुलथ कुलत्थी इति
भाषा॥ कुलत्थः कटुकः पाके कषा
यः पित्तरक्तकृत्। वातघ्नो दाहकृ
च्छ्रार्शःकासश्वासकफानिलान्॥ कृ
मिहिक्काश्मरीशुक्रदोषानाहान् स
पीनसान्। स्वेदसङ्घातकोमेदःक
फज्वरकृमीन्हरेत्॥

कुलत्था। स्त्री। कुलत्थिकायाम्। दुर्ग
प्रसादायाम्। वनकुलत्थे॥ अस्या गु
णा यथा। कटुत्वम्। तिक्तत्वम्।
अर्शःशूलनाशित्वम्। विबन्धाध्मा
नशमनत्वम्। वह्निहितत्वम्। वण
रोपणत्वञ्चेति॥ कुलत्याक्षने॥

कुलत्याक्षनम्। न। कुक्कुटायाम्। प्र
लापहायाम्॥

कुलना

कुलत्थिका। स्त्री। कुलत्थाकारान्नप्र
स्तरविशेषे। चक्षुष्यायाम्। खापरि
या इति भाषा॥ वनकुलत्थे॥ कुल
त्थप्रतिकृतिः। कुलत्थप्रतिकृतावितिक
न्॥ यद्वा। कुलेतिष्ठति। ष्ठा॰। सु
प्रीतिका। स्वार्थे कन्। पृ॰॥

कुलधर्मः। पुं। असाधारणकुलोचित
धर्मे। स्वजातीयधर्मे। कुलाचारे॥
यथा। एतत्सन्नकुलधर्माणां मनुष्या
णांजनार्दन। नरकेनियतं वासोभ
वतीत्यनुशुश्रुमेति भगवद्गीता॥
दिव्यवीरपशुभावान्तर्गतदिव्यधर्मे।
यथा। कुलधर्मात् परो धर्मो ना
स्ति चाने ऽन्यमार्गके। यस्मानु
ष्ठानमात्रेण ब्रह्मज्ञानी नरोभवेदि
ति॥ कुलस्य धर्मः॥

कुलधारकः। पुं। औरसात्मजे। पुत्रे॥
कुलसम्बन्धधारकः॥

कुलनक्षत्रम्। न। भरणीरोहिणीपु
ष्यमघोत्तरफल्गुनीचित्राविशाखा
ज्येष्ठायवणोत्तरभाद्रपत्सु॥ यथा।
वारुणार्द्राभिजिन्मूलं कुलाकुल मु
दाहृतम्। कुलानि समधिष्ण्यानि
ग्रेषाणि चाकुलानिचेतितन्त्रशास्त्र
म्॥

कुलनाथः। पुं। कुलपतौ॥

कुलनाशः। पुं। वंशे॥ कुलध्वंसे॥

कुलपा

स्कारणंयथा। कूर्मोपरिभागे १५ ऽध्याये। अन्नतात् पारदार्याच्च तथा ऽभक्ष्यस्य भक्षणात्। अश्रौतधर्माचरणात् क्षिप्रंनश्यतिवैकुलम्॥ अश्रोत्रियेवेददानात् वृषलेपुतथैव च। विहिताचारहीनेषु क्षिप्रंनश्यतिवैकुलमिति॥ तद्भावस्य कारणन्तु। यावच्च वेदधर्माःस्यु र्यावत्स्याच्छूद्रार्चनम्। यावत्स्याच्छुचिकूर्चंच तावन्नाशोभवेन्नहीति॥

कुलपतिः। पुं। मुनिविशेषे॥ यथा। मुनीनां दशसाहस्रं योन्नदानादि योषणात्। अध्यापयति विप्रर्षिर सौ कुलपतिः स्मृतः। इतिपुराणो क्तलक्षणलक्षिते॥ गणमुखे। जमादार हौलदार इत्यादि यवनभाषा प्रसिद्धे॥ यथा। शिविकावाहानां कुलपतिः॥ कुलस्यपतिः॥

कुलपत्रः। पुं। दमनकवृक्षे॥

कुलपर्वतः। पुं। महेन्द्रादिसप्तशैलेषु॥ यथा। महेन्द्रो मलयः। सह्यः शुक्तिमानृक्षपर्वतः। विन्ध्य श्चपारिपात्र श्चसप्तैते कुलपर्वताः इति। अत्र भारतेवर्षे। इतिविष्णुपुराणम्॥

कुलपालकम्। न। कुसुम्भे। कंमलो नेयु इति गौड भाषा प्रसिद्धे जार

कुलप्रे

ङ्गविशेषे॥ त्रि। वंशप्रतिपालके॥

कुलपालि। स्त्री। कुलवत्त्याम्॥

कुलपालिका। स्त्री। कुलस्त्रियाम्। साध्व्याम्। अभिचारवारणेन कृत कुलरक्षायाम्॥ यथा। एकत्र कौलव्रतभङ्गशङ्का विदग्धता भङ्गभयं परत्र। इत्याकुलानां कुलपालिका नां गतागतैरेव गतंदिवा मेति॥ अपिच। सुखयतितरां नरंचति परिचयलेशंगणाङ्गने व श्रीः। कुलकामिनीव नोज्झति वाग्देवी जन्मजन्मापीति॥ कुलम् पालयतिरक्षति। पालरक्षणे। कर्मण्यण्। स्वा० कन्॥

कुलम्भरः। पुं। कुजम्भले। सन्धिचौरे॥

कुलवान्। त्रि। कुलिनि॥ कुलमस्त्यस्य। यस्तदित्वात्° मत्वे मतुप्॥

कुलवर्णा। स्त्री। रक्तचित्रतिः॥

कुलवारः। पुं। भौमशुक्रयोः॥ यथा। रविश्चन्द्रो गुरुः सौरि श्चारस्या कुलावृधे। भौमशुक्रौ कुलाख्यौहि बुधवारः कुलाकुलः॥ इति तन्त्रसारे॥

कुलविप्रः। पुं। कुलपुरोहिते॥

कुलश्रेष्ठी। त्रि। शिल्पिकुलप्रधाने। कुलिके॥ कुलश्रेष्ठत्वमस्यास्ति। इनिः॥

कुलाकु

कुलसंज्ञकः । पुं । तिथिवारनक्षत्र वि
शेषे ॥ यथा । अर्काष्टेन्द्रवेदतिथि
षु । कुजशुक्रयोः । पूर्वाभोज्यमघे
न्दुकर्णद्दनदीशेन्द्रचित्रासु ॥
कुलसत्तमः । त्रि । कुलश्रेष्ठिनि ॥
कुलसम्भवः । पुं । बीजे ॥ कुलेसम्भव
ति । अच् । कुलेसम्भवोस्य वा ॥ य
न्दा । सम्भवत्यस्मात् । अण्देरप् ।
कुलस्य सम्भवः ॥
कुलसौरभम् । न । मरुवकवृक्षे ॥
कुलस्त्री । स्त्री । कुलपालिकायाम् ।
नान्यगामिन्यां कुलरक्षिकायाम् ॥
कुलस्य पालिका स्त्री । आ० ॥
कुलहण्डकः । पुं । आरग्वधे । आवर्त्ते ॥
कुलाकुलतिथिः । पुं स्त्री । द्वितीयाष
ष्ठी दशमीषु ॥ यथा । द्वितीयादश
मीषष्ठी कुलाकुल मुदाहृतमिति
तन्त्रशास्त्रम् ॥
कुलाकुलनक्षत्रम् । न । आर्द्रामूलाऽ
भिजिच्छतभिषासु ॥ यथा । वारुणा
द्रार्भिजिन्मूलं कुलाकुल मुदाहृत
मिति ॥
कुलाकुलवारः । पुं । बुधवारे ॥ यथा
। सौमशुक्रौकुलाख्यौ हि बुधवारः
कुलाकुल इति ॥
कुलाकुलसंज्ञकः । त्रि । तिथिवारनक्ष
त्रविशेषे ॥ यथा । द्वितीयाषष्टीद

कुलायि

शमीषु । बुधे । मूलाश्वतभिषा
र्द्रार्भिजित्सु ॥
कुलाचलः । पुं । कुलपर्वते ॥
कुलाचारः । पुं । कुलधर्मे ॥ धर्मका
र्य्यमोक्षपदे आगमोक्ताचारवि
शेषे ॥ यथा । जीवः प्रकृतितत्त्वञ्च
दिक्कालाकाशमेवच । चित्त्वप्
तेनोवायवश्चकुलमित्यभिधीयते ॥
ब्रह्मबुद्ध्यानिर्विकल्पमेतेष्वाचरणञ्च
यत् । कुलाचारः सएवोक्तो धर्मका
र्य्यमोक्षद इति ॥ त्रि । कुलाचा
रविशिष्टे ॥ कुलेआचारः ॥ कुलाचा
रोस्ति अस्य । अर्श० अच् ॥
कुलाचार्य्यः । पुं । कुलाचाराभिज्ञे ॥
कुलाटः । पुं । क्षुद्रमत्स्यभेदे ॥
कुलाद्रिः । पुं । कुलाचले । कुलपर्वते ॥
कुलाधारकः । पुं । पुत्रे ॥ कुलस्य आस
मन्तात् धारकः ॥
कुलायः । पुं । यत्रविश्रमेपे ॥ स्थानमात्रे
॥ नीडे । पक्षिनिलये । घोंसला
कोल इतिभाषा ॥ न । शरीरे ॥
कुलः पक्षिसङ्घातोऽयते ऽच । अ
यगतौ । कुलश्चेतिघञ् ॥ यद्वा ।
कौ खायोगति रस्मात् ॥
कुलायस्थः । पुं । पक्षिणि ॥ कुलाये
तिष्ठति ष्ठा० । सुप्यस्य इतिकः ॥
कुलायिका । स्त्री । पक्षिशालायाम् ॥

कुलाल

कुलालः । पुं । कुकुभेखगे ॥ घूकेपक्षिणि ॥ कुम्हार इति भाषा प्रसिद्धे कुम्भकारे ॥ अस्योत्पत्तिर्यथा । माला कारात् कर्मकार्यांऽ कुम्भकारोऽभिजायत इति प० सं० ॥ पट्टिकारा मतैलिक्यां कुम्भकारोऽभवद्वृ । इति वै० प० ॥ कुंभूमिं लाडयति । लंडविलासे । कर्मण्यण् । ततो वैक्यम् । कुलमालयति वा । आतोनुपेतिकः । कुलमलति वा । अल० । अण् ॥ कुलंलुनाति वा । लू अ छेदने । डः ॥ कोलति वा । कुल संस्त्याने । तस्मिन्निशिविडिभ्यणि ॥ कुलिकाग्निपक्षिभ्यः कालन् । इति कालन् प्रत्ययः ॥

कुलाची । स्त्री । नीलोत्पलभेदे । अमरः । चक्षुर्व्यायामे । कुलस्याकाराञ्जनमक्षरविशेषे ॥ अरण्यकुक्कुटिकायाम् ॥ कुलालभार्यायाम् ॥ कुलमलति । अल० । अण् । ङीप् ॥

कुलाहः । पुं । ईषत् पीतवर्णो कृष्णश्चेति घोटके ॥ इति हेमचन्द्रः ॥

कुलाहकः । पुं । कुकलासे ॥ राङ्गा कुले खाडा इतिगौडभाषाप्रसिद्धे वृक्षविशेषे ॥

कुलउलः । पुं । कोकसीमा इतिगौडभाषाप्रसिद्धे क्षुद्रवृक्षविशेषे । भू

कुमारि

कदम्बे ॥

कुलिः । पुं । इक्षौ । भुजादले ॥ स्त्री । कण्टकार्याम् ॥

कुलिकः । पुं । अष्टमग्रहानागान्तर्गतनागविशेषे ॥ काल्याकडा इतिगौडप्रसिद्धे द्रुमविशेषे ॥ वेलाविशेषे ॥ यथा । शक्राकं दिग्वसुरसाब्ध्यश्विन्यः कुलिकारवेः । रात्रौनिरेकास्त्यंशाः शनौचान्योपिनिन्दितइति ॥ त्रि । कुलश्रेष्ठे । कुलसत्तमे । शिल्पिकुलप्रधाने ॥ कुलेमणीनच्चेनास्ति । अतइनिठनाविति ठन् ॥

कुलिङ्गः । पुं । झिङ्गा इतिगौडभाषाप्रसिद्धे पक्षिविशेषे । धूम्राटे । झिङ्गके ॥ भूम्न्यासङ्गमनचारिणि धान्यश्रीविनिखगे । चटके । गौरय्या चिड़ी इतिभाषा ॥ कुलिङ्गः शीतलः स्निग्धः स्वादुः शुक्रकफप्रदः । सन्निपातहरोवेश्म चटकस्त्वतिशुक्रलः ॥ त्रि । कुचिङ्गचारिणि ॥ कुत्सितंलिङ्गमस्य ॥

कुलिङ्गकः । पुं । कलविङ्के । चटके ॥

कुलिङ्गाची । स्त्री । मेटारी इतिगौडभाषाप्रसिद्धे मेटिकावृक्षे ॥

कुलिङ्गी । स्त्री । कर्कटशृङ्ग्यां वृक्षे ॥

कुली । त्रि । कुलवति ॥ कुलमस्त्यस्य । वेलादित्वात् पचे इनिः ॥

कुलीनः

कुलिरः । पुं । कुलीरे । कर्कटे ॥
कुलिश । पुं । न । हिम्मीरौ । वज्रे ॥
कुलौ हस्तेशेते अन्येभ्योपीतिडः ॥
कुलिनःपर्वतान् श्यति वा । शो॰त॰
॥ आतोनुमेतिकः ॥ कुत्सितम् ईष
द्वा लिश्यति । लिशअल्पीभावे । इ
गुपधेतिकः ॥ अस्थिसञ्चारवृक्षे ॥ पुं
। मत्स्यविशेषे । कण्टकाष्ठोलें ॥
कुलिशद्रुमः । पुं । स्नुहीवृक्षे । थूहर इ
तिभाषा ॥
कुलिशनायकः । पुं । गृष्टारवन्ध्यविशेषे
॥ यथा । स्त्रीपादद्वय साकृष्य त्रिमु
र्मुचितलिङ्गकः । योनिञ्च पीडये
त् कामी वन्ध्यः कुलिशनायकइति ।
कुलिशपाणिः । पुं । इन्द्रे ॥
कुलिशाङ्गया । स्त्री । वैद्यानांविद्यादे
वीविशेषे ॥
कुलिशासनः । पुं । शाक्यमुनौ ॥
कुली । स्त्री । कण्टकार्याम् ॥ पत्न्याः
ज्येष्ठभगिन्याम् ॥ गौ॰ ङीष् ॥
कुलीन । पुं । आजानेये । श्रेष्ठवंश्ये ॥
वि । कुलाचारस्थिते । कौले ॥ धी
रे ॥ कुलोद्भवे । महाकुले । आर्ये
॥ कुलस्यापत्यम् । कुलाख॰ ॥ उ
त्कर्षविशेषविशिष्टवंश्यजकुलीनइति
गौडाः ॥ सचयञ्जकुलाचार्यग्रन्थे
कुलदीपिकायामाधुनिककुलीनत्वे

कुलेश्व

न वर्णितो द्रष्टव्यः ॥
कुलीनकः । पुं । वनमुद्गे ॥
कुलीनसम् । न । जले ॥ इतिहेमः ॥
कुलीरः । पुं । कांकडा इतिप्रसिद्धे न
क्षत्रिये । कर्कटे ॥ कर्कटराशौ ॥ को
लति । कुलसं॰ । गम्भीरादयश्चे
ति ईरन् ॥ कौलीयते । क्लीङ् श्लेष
णे । वा॰रक् ॥ यद्वा । कुलमश्नाति
अतइनिः । तमीरयति । कर्मण्य
ण् । जनकभक्षकत्वात् ॥ क्षयनंशीः
॥ सं॰ क्विप् । कुत्सितास्त्रीः । तां रा
तिदा ॥ कुरीरशब्दस्य कपिलकादि
त्वाल्लत्वेपि कुलीरः ॥
कुलीरविषाणी । स्त्री । गृष्ट्याम् ॥
कुलीरशृङ्गी । स्त्री । कर्कटशृङ्गीवृक्षे ॥
कुलीरान् । पुं । कर्कटशियौ । स्त्रेगवौ
॥ इतिविकाण्डशेषः ॥
कुलुकम् । न । जिह्वामले ॥ इतिहेम
चन्द्रः ॥
कुलुङ्गुञ्जा । स्त्री । उल्कायाम् ॥
कुलेशः । पुं । सदाशिवे ॥ कुलपतौ ॥
कुलेशानी । स्त्री । उमायाम् । पार्व
त्याम् ॥
कुलेश्वरः । पुं । सदाशिवे ॥ कुलस्य भ
मैविशेषस्य ईश्वरः ॥ गोत्रपतौ ॥
कुलेश्वरी । स्त्री । पार्वत्याम् । शिवा
याम् ॥ कुलस्य ईश्वरी ॥

कुल्माषः

कुलोत्कटः । पुं । कुलीनार्थे ॥ कुलोद्गतः । त्रि । कुलाङ्गुलीयमिते ॥ कुलोद्भवा । स्त्री । कुलीने ॥ कुलोद्वह । पुं । कुलं उद्वहति बोधयतीति । कुलोद्वहः । पुं । कुलफः । पुं । रोगे । शरीरावयवे । गुल्फे । कुलशब्दसंख्यानं यथा । कुलिगलिभ्यां स्फगस्फोस्फाः ॥ कुल्मलम् । न । पापे ॥ कुल्यति । कुल्यनिष्कर्षे । कुटिकुषिभ्यां कलन् । किषेर्लश्च ॥ कुल्माषः । पुं । यवके ॥ अर्द्धस्विन्नधान्ये । घुघुनो कौलरी इति भाषायाम् ॥ अर्द्धस्विन्नास्तु गोधूमाश्चान्येपि च चणकादयः । कुल्माषा इति कथ्यन्ते शब्दशास्त्रविशारदैः ॥ कुल्माषी गुरवो रूक्षा वातला भिन्नवर्चसः ॥ रुग्भेदे ॥ चण्डांशोः पारिभाषिके ॥ कौटदृष्टमाषे ॥ कुल्मितमाषे ॥ शूकशून्येयवादौ ॥ न । काञ्जिके ॥ कुल्मलस्यस्ति मसीपरिणामे । कुल्मलीयण । पृ० । यदा । कौलति । कुल० । क्विप् । कुल् अर्द्धस्विन्नोमाषोस्मिन् ॥ कुल बन्धुर्माषोस्त्रा ॥ कुल्माषाभिषुतम् । न । काञ्जिके ॥ कुल्माषैर्यवादिभिरर्द्धस्विन्नैरभिषूयतेस्म । पुंस्त्वम् ॥ पेक्षम् ॥ कुल्मासः । पुं । कुल्माषार्थेषु ।

कुवल

कुल्यम् । न । अस्थि । कीकसे ॥ अष्टद्रोण्याम् ॥ हर्म्ये ॥ आमिषे ॥ साधुनि । त्रि । कुलजे । कुलोद्भवे ॥ कुलर्चिते ॥ कुलस्यापत्यम् । अपूर्वपदादन्यतरस्यामितियत् ॥ कुलेभवम् । साधुवा । दिगादिखाद्यत् । तत्र साधुरिति वा ॥ यदा । कौलति कुल्यते वा । कुलसं० । अधि० क ॥ कुल्या । स्त्री । सरिन्मात्रे ॥ कूलवर्हा इतिभाषाप्रसिद्धायां पयःप्रणाल्याम् । सारणौ ॥ कुल्याऽल्पाकृतिमासरित् ॥ जीवन्तिकौषधौ ॥ कुलस्त्रियाम् ॥ अष्टद्रोणमितेमाने ॥ कुले प्राणिगणे कुटुम्बेदाम्पत्ये वा साधुः । तत्रसाधुरितियत् ॥ कुवम् । न । उत्पले । जलजपुष्पमात्रे ॥ कौवलते । वल० संवरणे । अन्येभ्योपीतिडः ॥ यदा । कुवते । कुङ् शब्दे कुटादिः । पचाद्यच् च ॥ कुवकालुका । स्त्री । द्रोलीशाके ॥ कुवङ्गम् । न । सीसके ॥ कुवञ्चकम् । न । वैकान्तमणौ ॥ कुवलम् । न । उत्पले ॥ मुक्ताफले ॥ वदरीफले ॥ चित्रे । संवरणाच्छादने ॥ कौवलते । वल० । पचाद्यच् ॥ कुवल्याफलम् । अण् लुक् । लुप्तादितद्धितलुकीतिङीपीलुक् ॥

कुविन्दः

कुवलयम् । न । उत्पले । चन्द्रविकासिनि । कर्मादिनी कोशी इतिभाषा । श्वेतं कुवलयमोक्तं कुमुदङ्कैरवन्तथा ॥ नीलोत्पले ॥ इतिरत्ननिघण्टुः ॥ यथा । कुवलयदलनीलसंवर्वरीस्निग्धकेशमिति ॥ कमलकुमुदादिसामान्ये जलज पुष्पे । कोवलयमिव शोभाकरत्वात् ॥ भूमण्डले । भूमिवलये ॥ ।

कुवलयापीडः । पुं । कंसस्य हस्तिरूपे दैत्यविशेषे ॥

कुवलयिनी । स्त्री । उत्पलिन्याम् ॥

कुवलाश्वः । पुं । धुन्धुमारनृपे ॥

कुवली । स्त्री । कोलिवृक्षे ॥ कौवलतिवल प्राणने । पचाद्यच् । गौ० ङीष् ॥

कुवेलेशयः । पुं । विष्णौ ॥ कुभूमिंवलते संश्लेषतीतिकुवलं तोयम् । वेल संवरणे । पचाद्यच् । कुवले जलेशेते । शीङो ऽधिकरणेशेतेरित्यच् । शयवासेत्यलुक् ॥

कुवादः । पुं । कुत्सितवादे ॥ वि । कुचरे । परदोषकथनशीले ॥ कुत्सितो वादो ऽस्य । अर० अच् ॥

कुवित् । अ । भूयर्थे ॥ प्रश्नसायाम् ॥

कुविन्दः । पुं । शूद्रागर्भे विश्वकर्मणोजाते । तन्तुवाये ॥ कुम्भुवंविन्दति कु

कुशः

नूसितंवाविन्दति । विट्लब्धलाभे । गवादिषुविन्देःसंज्ञायामितिभः ॥ यद्वा कुप्यति कुपकोधे । कुपेर्वावचेति किन्दच् ॥

कुवृत्तिकृत् । पुं । काँटाकरञ्ज इतिगौडभाषाप्रसिद्धे करञ्जभेदे । पूतिकेपि ॥ वि । कुवृत्तिकर्त्तरि ॥

कुवेणिः । स्त्री । मत्स्याधान्याम् ॥

कुवेणी । स्त्री । खदिर इतिगौडभाषाप्रसिद्धे मत्स्यस्थापनपात्रे । मत्स्याधान्याम् ॥ कुत्सितंवेणन्ते मत्स्याअस्याम् । वेणृगतौ । ह्रस्वश्चेति घञ् । गौरादित्वान्ङीष् ॥

कुवेलम् । न । कुवलये ॥ इतिहेमचन्द्रः ॥

कुशः । पुं । रामसुते ॥ कुशेनोत्पृष्टः कुशः । वाल्मीकिना कुशेनोत्पृष्टो गर्भोक्केदो ऽस्य ॥ योक्षे ॥ एतत्समुद्रेणावृतेद्वीपविशेषे ॥ कुशोभूत्का ञ्जनः कौशेस्वप्नम्बिभियच्चति । अयमेवास्यकुशसंज्ञायां कारणम् ॥ नि । जले ॥ पुं । न । कुशाइतिभाषा प्रसिद्धेतृणे । दर्भे ॥ अस्योत्पत्तिर्यथा । बर्हिष्मतीनामपुरी सर्वसम्पत्समन्विता । न्यमतन् यत्र रोमाणि यज्ञस्याङ्गं विधुन्वतः ॥ कुशेकाशास्त एवासन् यच्चदुरितबर्हिसः ।

कुशल

ऋषयो यैः पराभाव्य यज्ञमानि य
च्च मीनिरे॥ इतिश्रीविष्णुभागवत
म्॥ अस्यगुणा यथा। ह्रस्वदीर्घप्लु
भेदात् कुशस्तु त्रिविधो मतः। दर्भ
द्वयं त्रिदोषघ्नं मधुरंतुवरं हिमम्।
मूत्रकृच्छ्राश्मरीतृष्णावस्तिरुक्प्रद
रास्नजिदिति॥ अथ कुशधारणवि
धिस्तत्प्रतिनिधिश्च। पूजाकाले सर्व
दैवकुशैस्तोभवेच्छुचिः। तर्जन्या
रजतं धार्यं स्वर्णं धार्यमनामयी॥ कु
शकार्यकरं यस्मान्ननुतन्या: कुशाः
कुशाः। कुशेन रहितापूजा विफला
कथिता मया॥ नान्यस्य रजतंस्व
र्णं धार्यं हि निजमङ्गले। इतिवरदा
तन्त्रे १ पटल.॥ नस्पृशेत् तिलदर्भां
श्च सधवातुकथञ्चनेति ब्राह्मण सव
स्वम्॥ चि। यापिष्ठे॥ मत्ते॥ कौ
शेते तिष्ठति। अन्येभ्योपीतिडः॥
कुश्यतिवा। कुशश्लेषणे। इगुपधेति
कः॥ कुपापंश्यति वा। शोअन्त
सुपीति योगविभागात् कः
कुशध्वज. पुं। राज्ञोजनकस्यानुजे॥
कुशपः। पुं। घासपाचे॥
कुशपुष्पम्। न। ग्रन्थिपर्णे। गांठिया
सा इतिभाषा॥
कुशलम्। न। कल्याणे। क्षेमे॥ पुण्ये
। सुकृते॥ पर्याप्तौ॥ त्रि॥ शि

कुशली

क्षिते॥ नहि कुशलो वृथा कालंयाप
यति॥ मोक्षे॥ कुत्सितम् अशुभ
रूपंशलतेऽनेन। शूलच्छेने। प्र-
षोदरा॥ कुशानि लातिवा। खादा
ने। आतइति कः॥ यद्वा। कौपृथि
व्यां शलति। शलचलने। अच्। णि
जर्थेलच्छवा। कौशलति चालय
ति राजकार्याणि॥ यद्वा। कु प्रापेप
दर्थयोः। पापति शलति बुद्धिवैभ
वात्॥ यद्वा। कुशयति। कुशसंश्लेष
णे। सौत्रो धातुर्वा। दृषा० कर्त्तः॥
मत्वर्थे सिध्मादित्वात् लच्छा॥
कुशलप्रश्न. पुं। कौशल्याम्। कुशल
जिज्ञासायाम्॥ कुशलस्यप्रश्नः॥
कुशलवौ॥ पुं। द्विवचनान्तः। एकैक
स्या रामपुत्रयोः॥
कुशलानुशिष्टः। त्रि। निपुणाचार्यशि
क्षिते॥ कुशलेन अनुशिष्टः॥
कुशली। त्रि। कुशलयुक्ते॥ इनिः॥
कुशली। स्त्री। अप्रसन्नकवृक्षे॥ क्षुद्रा
ख्यिकायाम्॥
कुशस्थलम्। न। कान्यकुब्जदेशे॥
कुशस्थली। स्त्री। द्वारकायाम्॥
कुशा। स्त्री। रज्ज्वाम्। वल्लायाम्॥
मधुकर्कट्याम्॥ छन्दोगाःस्रोचीयाग
यानार्थं नीदुम्बरान् शङ्कून् कुशा
इति अवहरन्ति॥

कुशीलव

कुशाकरः । पुं । वह्नौ ॥
कुशाग्रीयः । त्रि । कुशाग्रसदृशे ॥ कुशाग्रमिव । कुशाग्राच्छः ॥
कुशाग्रीयमतिः । त्रि । तीक्ष्णबुद्धौ । प्रत्युत्पन्नमतौ । सूक्ष्मदर्शिनि ॥ स्त्री । सूक्ष्मायांबुद्धौ ॥ कुशाग्रीयामतिर्यस्य ॥ कर्मधारयेऽन्यच् ॥
कुशाग्रीया । स्त्री । तीक्ष्णायां बुद्धौ ॥
कुशार्णिः । पुं । दुर्वासोमुनौ ॥
कुशाल्मलिः । पुं । रोहितकवृक्षे ॥
कुशावती । स्त्री । रामात्मजस्य कुशस्य राजधान्याम् ॥ अस्त्यर्थेमतुप् ॥
कुशिंशपा । स्त्री । कपिलशिंशपायाम् ॥
कुशिकः । पुं । मुनिविशेषे । जमदग्नेः पितरि ॥ फाले ॥ सर्जवृक्षे ॥ विभीतकवृ० ॥ अश्वकर्णवृ० ॥ तैलबीजे ॥ त्रि । केकरे ॥ विश्वामित्रस्य पितरि ॥
कुशितः । त्रि । जलमिश्रिते ॥
कुशी । पुं । वाल्मीकिमुनौ ॥
कुशी । स्त्री । फाले । लौहविकारे ॥ कुशशब्दाद्येविकारेर्थेजानपदेतिङीष् ॥
कुशीदम् । न । रक्तचन्दने ॥ वृद्धिजीविकायाम् । वृद्धौ धनप्रयोगे ॥
कुशीलवः । पुं । वाल्मीकौ । प्राचेतसे ॥ कीर्त्तिसञ्चारकनटे । चारणे ॥ याचके ॥ कुत्सितं शीलमस्यस्य । कुगतीतिसमासः । अन्यत्रापिदृश्य

कुष्ठः

तेऽतिवः ॥ कुशीलं वाति वा । वागन्त्यादौ । कः ॥ नर्त्तनटयौ ॥
कुशीलवौ । पुं । एकयोक्त्यारामात्मजयोः ॥
कुशीवशः । पुं । वाल्मीकिमुनौ ॥
कुशूलः । पुं । तुषाग्नौ ॥ अन्नकोष्ठके इष्टकादिनिर्मिते धान्यस्थापनार्हे स्थाने । श्रीखण्डगारे ॥ इतिविकाण्डशेषः ॥
कुशूलधान्यकः । पुं । ब्राह्मणविशेषे । नित्यनैमित्तिकधर्मकृत्यमात्रयुक्तसहितस्य गृहिणो यावता धान्यादिधनेन वर्षत्रयं समधिकंवा निर्वाहो भवति तावद्धने विभे ॥ कुशूलं कुशूलपरिमितं धान्यं यस्यसः ॥
कुशेशयः । पुं । कर्णिकारवृक्षे ॥ न । पद्मे ॥ सारसपक्षिणि ॥ कुशेजलेशेते । अधिकरणेशेतेरित्यच् । शयवासेत्यादिनाऽलुक् ॥
कुशेशयकरः । पुं । रवौ ॥ त्रि । अन्यच ॥ कुशेशयंकरे यस्य ॥
कुषाकुः । पुं । वानरे ॥ वह्नौ ॥ सूर्य्ये ॥ त्रि । परोक्षाभिज्ञे ॥ कुष्णाति । कुषनिष्कर्षे । कठि कुषिभ्याङ्काकुः ॥
कुषितः । त्रि । जलमिश्रिते ॥
कुषीदम् । न । कुसीदे ॥
कुष्ठः । पुं । न । पुष्करभेषजे । कूट

कुष्ठारिः

इति भैषज्यरत्नावल्यां भाषा ॥ पारिभाष्ये ॥ कुष्ठमुण्ड, कटुस्वादुशुक्लं तिक्तकंखपु । हन्तिवातास्रवीसर्पकासकुष्ठमरुत्कफान् ॥ कोढ इतिप्रसिद्धे पापरोगे । स्त्रिये ॥ म्रियतेयदि कुष्ठेन पुनर्जातस्य तद्भवेत् । नातो निन्द्यतरो रोगो यथा कुष्ठं प्रकीर्त्तितम् ॥ विषभेदे ॥ कुष्णाति रोगम् । कुष° । हनिकुषिनीरमिकाशिभ्यः कथन् ॥

कुष्ठकेतुः । पुं । भूम्याहुल्ये । मार्कण्डिकायाम् । भुञ्जिखस्सा इतिभाषा ॥

कुष्ठगन्धि । न । एलवालुके ॥

कुष्ठगन्धिनी । स्त्री । अश्वगन्धायाम् ॥

कुष्ठघ्नः । पुं । हितावल्याम् ॥

कुष्ठघ्नी । स्त्री । काकोदुम्बरिकायाम् ॥ वाकुच्याम् ॥

कुष्ठनाशनः । पुं । वाराहीकन्दे ॥ गौरसर्षपे ॥ चीरीवृक्षे ॥

कुष्ठनाशिनी । स्त्री । वाकुच्याम् । सेमराज्याम् ॥

कुष्ठघ्नम् । न । लुतस्फोटघ्ने ॥

कुष्ठसूदनः । पुं । आरग्वधे ॥

कुष्ठहन्ता । पुं । हस्तिकन्दे ॥

कुष्ठघ्नी । स्त्री । वाकुच्याम् ॥

कुष्ठहन् । पुं । खदिरे ॥

कुष्ठारिः । पुं । विट्खदिरे ॥ पटोले ॥

कुष्मण्डः

आदित्यपर्णे ॥ खदिरे ॥ गन्धके ॥

कुष्ठितः । त्रि । कुष्ठरोगवति ॥ कुष्ठं सञ्जातमस्य । ता° इतच् ॥

कुष्ठी । त्रि । कुष्ठरोगयुक्ते ॥ इन्द्रोपतापेति इनिः ॥

कुष्मलम् । न । छेदने ॥ छादने ॥ विकसिते ॥ कुष्णाति । कुष° । कुटिकुषिभ्याङ्कलन् ॥

कुष्माण्डः । पुं । कुंहडा इतिप्रसिद्धे फलशाके । कर्कारौ ॥ कुष्माण्डं वृंहणं वृष्यं गुरु पित्तास्रवातनुत् । बालं पित्तास्रदाहघ्नं शीतं मध्यं कफाग्निकम् ॥ वृद्धं नातिहिमं स्वादु सच्चारं दीपनं लघु । बस्तिशुद्धिकरं चेतोरोगहृत् सर्वदोषजित् ॥ अस्य प्रकाराः । यथा । घृते तप्तेषिनिःक्षिप्य खण्डान् कुष्माण्डसंभवान् । वार्त्ताकविधिना कुर्यात् प्रलेहहलनादिकम् ॥ सुस्वादुसुन्दरम् ॥ यथा । वेसवारा खलक्षेत्र घृतेतलन पूर्वकम् । कुष्माण्डक फलं सिद्धं विदुः सुस्वादुसुन्दरम् ॥ गुलिका । घृतेन गुडयुक्तेन गोखकुष्माण्डखण्डकान् । रन्धितान् क्षीरमरिचै रिमान् सुगुलिकां विदुः ॥ * ॥ खण्डकुष्माण्डकम् । चतुरस्रायतान् स्थूलान् स्थिरान् घीरेण घोदितान् । सुपाच्यान् ख

कुसिदा

एडसर्षिभ्यो मरिचैलादिवासितान् ॥ * ॥ भर्जितान्लकुष्माण्डेम् । कुष्माण्डखण्डानि ससैन्धवानि तनूनि सम्मर्दितपिण्डितानि । जम्बीरनीराश्रितशृङ्गवेरै र्भक्षन्निषङ्गैरपितो यताय ॥ * ॥ क्षोलिका । कुष्माण्ड समभवाः खण्डाः सुस्विन्ना खण्डान्विताः । तैलघृतयुतैस्तैले तलये दाप्रलेहयेत् ॥ * ॥ राजिकास्तूरी । खण्डं कनिष्ठिकाकारं कौष्माण्डं स्वेद्यपिण्डितम् । राजिकादधिसिन्धूत्थे र्मिश्रित कास्तुरीयकम् ॥ एवं बहुविधाः कार्याः कौष्माण्डादिविचक्षणैः । प्रलेहतलनस्वादुचारसन्धानराजिकाः ॥ दृघत पित्तजत्वात्क ष्मा ण्डेषु बीजेषु यस्य । पृ० ॥ शिव स्वेगणदेवताविशेषे ॥ भूषणविशेषे ॥

कुष्माण्डक । पु । कुष्माण्डे ॥

कुष्माण्डी । स्त्री । उमायाम् । अग्निकायाम् ॥ ओषधौ ॥ कर्षारौ ॥ यागक्रियाविशेषे ॥

कुसित । पुं । जनपदे ॥ कुत्सिति । कु ससंश्लेषणे । कुसेरुकोमेदेता इति इत प्रत्यय ॥

कुसितायी । स्त्री । कुसिदायाम् ।

कुसिदायी । स्त्री । वृद्धिजीविन्याम् ॥ कुसितस्य कुसिदस्य वा

कुसीद

स्त्रीत्वार्थं दृषाकप्यग्नि कुसितकुसिदानामुदात्तइति प्रकृतेरैकारादेशोऽन्त्यस्य च प्रत्ययः ॥

कुसिन्धी । स्त्री । स्त्रिन्थ्याम् ॥

कुसीदम् । न । अर्थप्रयोगे । वृद्धिजीविकायाम् । वृद्धाजीवने । सूदकी जीविका इति भाषा ॥ पुनर्देयत्वेन स्वीकृत्य गृहीते ऋणविशेषे ॥ ॥ यथा । स्थानलाभनिमित्तं यदा नग्रहणमिष्यते । तत् कुसीदमित्तियं तेनवृद्धि. कुसीदिनम् ॥ इतिनारद । अस्यार्थः । स्थानं-मूलधनावस्थानम् । लाभोवृद्धि-। दानग्रहणपदे कर्मणिल्युटा साध्ये तेन मूलधनाऽवस्थानेसत्येव योलाभ स्तदर्थंयदानं धनिकेन दीयमानं मूलधनम् अधमर्णेनच ग्रहणं तथास्वीकृत्यगृह्यमाणं यत् तदृणमिति ॥ कलाशून्ये तु अवश्यापाकरणीयत्वरूपगुणयोगाद् गौण प्रयोग ॥ अतएव वाणिज्यार्थमयुक्तस्य नऋणत्वम् इति मिश्राः ॥ अपिच । कुत्सितात् सीदतश्चैव निर्विशङ्कै प्रगृह्यते । चतुर्गुणंवाष्टगुणं कुसीदाख्य मृणं नृतः । इति दक्षस्मृतिः । अस्यार्थः । कुत्सितात् सीदतश्चाधमर्णात सकलधनं यत

गच्छते निर्विशङ्के रुत्तमर्णैः चतुर्गुणं वेतिवाकारोऽनास्यायाम् तेनदैगुण्यादिलाभः इति ॥ कुसीदे विशेषो गारुडे २१५ अध्याये उक्तः सयथा। कुसीदकृषिवाणिज्यं प्रकुर्वीता स्वयंकृतम्। आपत्कालेस्वयं कुर्वन् नैनसा युज्यते द्विजः ॥ षड्वेव स्तेनोपाया ऋषिभिः परिकीर्त्तिताः। सर्वेषा मपि चैवैषां कुसीद मधिकं विदुः ॥ अनावृष्ट्याराजभयान्मूसिकाद्यैरुपद्रवैः। कृष्यादिके भवेद्बाधा साकुसीदे न विद्यते ॥ शुक्लपक्षे यथा कृष्णे रजन्यांदिवसेपिवा। उष्णेवर्षतिशीते वा वर्द्धनं न निवर्त्तते ॥ देशंगतानां या वृद्धिर्नाप्तव्योपजीविनाम्। कुसीदंसर्वतः सम्यक् संस्थितस्यैवजायते ॥ लब्धलाभः पितॄन् देवान् ब्राह्मणांश्चैव पूजयेत्। तेतृप्तास्तस्य तद्रोधं शमयन्ति न संशयः ॥ वणिक्कुसीदीद्धात्तुवस्त्रंगां काञ्चनादिकम्। कृषीवलोऽन्नपानानि यानशय्यास नानिच ॥ पशुभ्योविंशतिंदत्त्वा पशुस्वर्णादिकंशतम्। पादेनायस्यपार्घंकुर्यात् सञ्चय मात्मवान् ॥ अदैनचात्मभरणं नित्यनैमित्तिका न्वितम्। पादश्च प्रार्थ्यमानस्य मूल

कुसीदिकः। त्रि। वार्द्धुषिके। इद्याज्ञी वे॥ कुसीदंवृद्धिस्तदर्थं, द्रव्यं कुसीदम्। तत् प्रयच्छति। कुसीददशैकादशात् ठन् ठचाविति ठन्॥ स्त्रियां। पिच्चान् ङीपि कुसीदिकी॥

कुसुमम्। न। स्त्रीरजसि ॥ नेत्ररोगविशेषे ॥ फले ॥ पुष्पे ॥ मात्रामाने पञ्चमाधिकस्य। ऽ॥ षष्ठभेदे ॥ कुस्यति कुस°। कुसेरुन्मोमेदेतादृत्युमः ॥ ऋक्कुसुमसंख्याध्यायो यथा। फलकुसुमसम्पद्दृष्ट्वा वनस्पतीनां विलोक्य विचक्षणम्। सुलभत्वं द्रव्याणां निष्पत्तिः, सर्वसस्यानाम् ॥ केनकस्यद्दृष्ट्वैयातदाह। शाले न कसमशाखीरक्ता गोकेनरक्तगा खिन्य ॥ पाण्डूकः चीरिकयो नीखा गोकेनशूकरकः ॥ न्यग्रोधेनचयव

क सिन्दुकवृक्षाच्चषष्टिको भवति । अश्वत्थेन त्रेया निष्पत्तिः सर्वशस्या नाम् ॥ जम्बूभिस्तिलमाषाः शिरीषदृक्षाच्चकङ्गु निष्पत्तिः । गोधूमाश्चमधूकै र्यवबृहिः सप्तपर्णेन ॥ अतिमुक्तककुन्दाभ्यां कर्पासं सर्षपान् वदे दाडिमैः । वदरीभिश्चकुलत्थाँ श्चिरविल्वेनादिशेन्मुद्गान् ॥ अतसी वेतसपुष्पैः पलाशकुसुमैश्चकोद्रवा त्रेयाः । तिलकेनशङखमौक्तिकरजतान्यश्वत्थचेक्षुदेन शराः ॥ करिणश्च हस्तिकर्णैरादेश्या वाजिनोश्वकर्णेन । गावश्चपाटलाभिः कदली भिरजाविकंभवति ॥ चम्पककुसुमैः कनकं विद्रुमसम्पद्यबन्धुजीवेन । कुरुवकदृक्षाद्रजतंवैदूर्यंनन्दिकावर्त्तैः ॥ विश्वाश्च सिन्दुवारेण मौक्तिकंकाशकाशकुसुमेन । रक्तोत्पलेनराजा मन्त्री नीलोत्पलेनोक्तः ॥ श्रेष्ठीसुवर्णपुष्पान् पद्मैर्विप्रा पुरोहिता कुमुदैः । सौगन्धिकेनवलपतिरर्केण क्षत्रिया परिदद्यः ॥ आम्रैः क्षेमं भल्लातकैर्भयं पीलुभिस्तथारोग्यम् । खदिरश्मीभ्यादुर्भिक्षं मञ्जुनैः शोभनावृष्टिः ॥ पिचुमन्दनागकुसुमैः सुभिक्षं मधुमालत कपित्थेन । निचुलेनावृष्टिभयं व्याधिभयं भवति कुटजकुसुमेन ॥ दूर्वाकुशकुसुमाभ्यामिक्षुवैक्षिश्चकोविदारेण । श्यामालता भिरद्भा वन्धकयो वृद्धिमायान्ति ॥ अथैताभिर्वृष्टिं लक्षणमाह । यस्मिन्काले स्निग्धनिच्छिद्रपत्राः संदृश्यन्ते वृक्षगुल्मालताश्च । तस्मिन् वृष्टिः शोभना सम्यग्दिष्टाश्चच्छिद्रैरल्पसंभः प्रदिष्टम् ॥ इतिवाराह्यां २७ अध्यायः ॥

कुसुमकार्म्मुकः । पुं । कामदेवे ॥
कुसुमपुरम् । न । पटना इति प्रसिद्धेपुरे । पाटलिपुत्रे ॥
कुसुममध्यम् । न । चालितागाछइति गौडभाषा प्रसिद्धे वृक्षविशेषे । भ । व्यटत्वे ॥
कुसुमशरः । पुं । कामदेवे ॥
कुसुमाकरः । पुं । वसन्तर्त्तौ ॥
कुसुमाढ्यः । त्रि । पुष्पयुक्तेनेवेति ॥
कुसुमागमः । पुं । वसन्ते ॥
कुसुमाञ्जनम् । न । पुष्पाकारकीतिमञ्जनसम्भवेऽञ्जने । शौण्यके । गीतिपुष्पे ॥
कुसुमाञ्जलिः । पुं । पुष्पाञ्जलौ ॥ उदयनाचार्यकृतेऽन्यविशेषे ॥
कुसुमात्मकम् । न । कुङ्कुमे । घुष्टपे ॥

कुसुमः

कुसुमाधिपः । पुं ॥ चम्पकवृक्षे
कुसुमाधिराट् । पुं ॥ हेमपुष्पके ॥
कुसुमायुधः । पुं । कामदेवे ॥
कुसुमास्त्रः । पुं । चौरे । तस्करे ॥
कुसुमासवम् । न । मधुनि ॥
कुसुमेषुः । पुं । मुख्यबाणे । कामदेवे
॥ कुसुमानि इषवोयस्य ॥
कुसुमोच्चयः । पुं । गुच्छे । स्तवके ॥
कुसुम्भः । पुं । कमण्डलौ ॥ महारजु
नवृक्षे ॥ न । शातकुम्भे । स्वर्णे
॥ कसुंभा इति । प्रसिद्धे ॥ महा
रजनपुष्पे । कमलोत्तरे । वह्निशि
खे ॥ अस्यगुणा यथा । कुसुम्भं वात
लं कृच्छ्ररक्तपित्तकफापहमिति ॥
कुसुम्भ्यत्र्यनेन वा ॥ कुसुम्भचेपे । क
एडादिः । पचाद्यच् । हलश्चेति घ-
ञ्वा । पुं ॥ कुसुम्भतिवा । कुसं ।
कुसेरुमोमेदेता इति उम्भप्रत्ययः
। वा हुलकाद्यगुणः ॥
कुसुम्भतैलम् । न । कुसुम्भस्नेहे ॥ स्नेहे
तैलच् ॥ कुसुम्भतैलमम्लं स्यादुष्णं
गुरु विदाहि च । चक्षुर्भ्यामहितं
बल्यं रक्तपित्त कफप्रदम् ॥
कुसुम्भबीजम् । न । वरटायाम् । वरड
। करड इतिच भाभाषा ॥
कुसूः । पुं । किञ्चुलके । गण्डूपदे ॥

कुहना

कुहतिः । स्त्री । माद्ये ॥ इन्द्रजाले ॥
कुत्सिता हृतिः । हरणं । क्तिन् ।
कुगतीति समासः ॥
कुक्षुम्भः । पुं । समुद्रे ॥ कुः ईषत् कुम्भवं
वा । स्तुम्भोति । स्तुम्भुः सौत्रः । मू०
कः । अत्रि नले । पोनस्यात् ॥ विष्णौ ॥
कुक्षुम्भरी । स्त्री । धन्याके ॥ इत्यम
रटीकायांभरतः ॥
कुक्षुम्भुरः । न । धन्याके ॥ कुत्सितं तु
म्भति । तुंभि हिंसने । बाहुलकात् कु
क्षुम्भुरुणिजातिरितिनिर्देशादा उ
कमप्रत्ययः सुट्च ॥
कुच । आ । कुत्सायें । कुचः इच ॥
कुचः । पुं । कुबेरे । यक्षराजि ॥
कुचक्रम् । न । इन्द्रजाले । मायायाम्
॥ त्रि । दाण्डाजिनिके । षण्ढके ।
मायिनि । धूर्त्ते ॥ कुचयते । कुच
विक्षेपणे । वीकुन् ॥
कुचकाचीवी । त्रि । मायाजीविनि । वा
। जीगर इतिभाषा ॥
कुचकस्वनः । पुं ।
कुचकस्वरः । पुं । कुक्कुटे । ताम्रचूडे ॥
कुचक्रः । पुं । तालप्रभेदे ॥ यथा । द्रुतद
न्तं लघुश्चन्तं तालं कुचक्रसंज्ञकेइति ॥
कुचनः । पुं । मूषिके ॥ सर्पे ॥ न । लड्डा
खडवि ॥ काचभाजने ॥ त्रि । ईर्ष्यालौ ॥
कुचमा । स्त्री । दम्भचर्यायाम् । दम्भे

कुहूक

नकृतस्थानमौनादौ ॥ अर्थशिष्ट यामिन्यामधर्मान्नयशे ॥ कुहवि० चु० अदन्तः । गद्यासन्नयोर्युच ॥

कुहनिका । स्त्री । कुहनायाम् ॥

कुहरः । पु । नागविशेषे ॥ न । गह्वरे ॥ शुषिरे ॥ छिद्रे ॥ कर्णे ॥ कण्ठे ॥ कण्ठशब्दे ॥ समीपे ॥ कुंहरति । हरतेरनुद्यमनेऽच् ॥ यद्वा । कुहविस्मापने । इगुपधज्ञात्कः । कुहंरा ति । रा० । आतश्चेतिकः ॥

कुहरितम् । न । पिकालापे ॥ रतच्चैौ ॥ रटिते ॥ वि । कृतच्छिद्रे ॥

कुहलिः । पुं । पूगपुष्पिकायाम् । पान इतिभाषा ॥

कुहा । स्त्री । कुज्झटिकायाम् ॥ कट्वाम् ॥

कुहुः । स्त्री । कुह्वाम् ॥ कुहयति । कुहविस्मापने । ह० कुः ॥

कुहूः । स्त्री । नष्टेन्दुकलायाममायाम् । उदयेऽमायोगाच्चष्टचन्द्रकलाऽमा कुहूपदवाच्या ॥ अर्द्धादुहितरि ॥ कुहयति । कुहवि० ॥ क्वतिगृध्योः कूरितिकूप्रत्ययो बाहुलकादिहापि ॥

कुहूकण्ठः । पुं । कुहूमुखः । पुं । कुहूरवः । पु । } कोकिले । पिके ॥ कोयल इतिभाषा ।

कुहूलम् । न । सशल्योर्धीरन्ध्रे ॥

कूट

कुहेडिका । स्त्री । कुहेडी । स्त्री ॥ } कुज्झटिकायाम् ॥

कुहेलिका । स्त्री । कुज्झटिकायाम् । धूमिकायाम् । नभोरेणौ ॥

कुह्वानः । पु । कुतसितशब्दे ॥

कूः । स्त्री । पित्र्याम् ॥

कूकुदः । त्रि । सत्कृत्यालङ्कृतकन्या प्रदातरि ॥ सत्कृत्यालङ्कृताङ्कन्यां यो ददाति स कूकुदः ॥ कोकति । कुकआदाने । इगुपधेतिकः । पृ० ॥ यद्वा । कवनं कूः । कूङ्शब्दे । तु० । सं० । कुत्र शब्दस्य कुः भूः कीर्त्तिभूमिरितियावत् । कूकुददाति । आतोनुपेति सुपीति योगविभागादाकः ॥

कूच । पुं । कुचे । स्तने ॥ कवते । कुङ् । कुवश्चट्दीर्घश्च ॥

कूचिका । स्त्री । कूची । स्त्री । } तूलिकायाम । चित्रलेखनिकायाम् ॥ टित्त्वानङीप् ॥

कूजनम् । न । कूज्यते ॥

कूजितम् । न । कृते । पक्षिध्वनौ ।

कूट । पु । अगस्त्यमुनौ ॥ पु । स्त्री । गृहे ॥ पुं । न । निश्चले ॥ राशौ । धान्यादिपुञ्जे ॥ अयोघने ॥ लोहमुद्गरे ॥ दम्भे ॥ मायायाम् । विपरीतदर्शने । यथार्थवस्त्वाच्छादनेना ऽ

कूटम

ऽयथार्थवस्तुप्रकाशने ॥ अद्रिशृङ्गे ॥ तुच्छे ॥ सीरायुधे । फालाधारे ॥ यन्त्रे । मृगबन्धनवि° ॥ अन्तर्ते ॥ भग्नशृङ्गषण्डे ॥ पुंदारि । कूटयते । कूटआप्रदाने । पचाद्यच् ॥ कूटयति वा । कूटदाहे । अच् ॥ कूट्यतेवा । घञ् ॥

कूटक: । पुं । गन्धकुट्याम् । मुरानाम गन्धद्रव्ये ॥ कवर्याम् । पर्वत विशेषे ॥ न । फाले ॥ कूटयति । कूटच्छेदने । पचाद्यच् । स्वा° कन् ॥

कूटकारक: । पुं । साक्षिवादे मृषावादस्यकर्त्तरि ॥

कूटकार्षापण : पुं । मिथ्याभूतरौप्यादि मुद्रायाम् । कृत्रिमरौप्यादौ ॥

कूटकृत् । पुं । शिल्पे ॥ कायस्थे ॥ त्रि । कितवे ॥

कूटज: । पुं । कुटजवृक्षे ॥

कूटपालक: । पुं । पित्तज्वरे ॥ कुलालस्यपवने ॥

कूटपूरी । स्त्री । करायिकायाम् ॥

कूटपूर्व: । पुं । हस्तिनस्त्रिदोषजेज्वरे ॥ मायिनि ॥

कूटयन्त्रम् । न । उन्माथे । आमिषबन्धनार्थंछलपातितयन्त्रे । फन्दाफाँद इतिजाल इतिच भाषा ॥ कूटस्वरूपं यन्त्रम् ।

कूटस्थ:

कूटशाल्मलि: । पुं । शाल्मलि विशेषे । कृष्णशाल्मल्याम् । रोचने ॥ कूट शाल्मलिकस्तिक्त: कटुक: कफवातनुत् । भेद्युष्णग्राहिजठरयकृत्प्लीह विषापह: ॥ भूतनाह विबन्धास्रमेद:शूलकफापह: ॥ कूटस्थसौशाल्मलिश्च ॥

कूटसङ्क्रान्ति: । स्त्री । अर्द्धरात्रातीते सूर्यस्यराश्यन्तरगमने ॥ यथा । अर्द्धरात्रेव्यतीतेतु यदासङ्क्रमते रवि: । साज्ञेया कूटसंक्रान्ति मुनिभि: परिकीर्त्तिता इति ॥

कूटसाक्षी । त्रि । मिथ्यासाक्षिणि । साक्ष्ये मिथ्याभिधायिनि ॥

कूटस्थ: । त्रि । कालत्रयेप्यविचलिते । एकरूपतयाकालव्यापिनि । एके नैव स्वभावेननिरवधिकालस्थ:व्यापके आकाशादौ ॥ अज्ञानतत्कार्य्याधिष्ठाने ॥ विषयस्तन्निधावपि विकारशून्ये ॥ अधिष्ठानतयादेहद्वयावच्छिन्नचेतन: कूटवन्निर्विकारेणस्थित: कूटस्थउच्यते ॥ न । ब्रह्मणि । परमात्मरहिते ॥ कूटोनिश्चलस्तिष्ठति । यदा । कूटमयोघनस्तद्वत्तिष्ठति । संसर्गिनाशेपिस्वयमनष्ट इत्यर्थ: ॥ ष° त° ॥ सुप्रिय इति क: ॥ व्याघ्रनखाख्यगन्धद्रव्ये ॥

कूपः

कूटागारम् । न । चन्द्रशालिकायाम् । वङ्गभाषाम् ॥ सपागारे ॥ स्त्री ङीष् । स्त्रीणां क्रीडागृहे ॥

कूटायुधम् । न । बाह्यः काष्ठादिमये ऽभ्यन्तरे सुनिशितशस्त्रे ॥ अधर्मप्रधानैः प्राणिभिः कृतव्यवहारत्वेन तानिव क्षुद्रकाणि सन्ति ॥

कूटार्थभाषिता । स्त्री । प्रबन्धकल्पनायाम् । कथायाम् । रूपकथा इति गौडभाषा ॥ प्रहेलिकायाम् ॥

कूणिः । त्रि । रोगादिनाकुञ्चितकरे । कुकरे ॥

कूणिका । स्त्री । शूके ॥ कलिकायाम् । बीजमूलस्थबद्धशाखाकायाम् ॥

कूणितः । त्रि । मुद्रिते । संकुचिते ॥

कूदरः । पुं । जातिविशेषे ॥ यथा ब्राह्मण्यां सपिण्डीयेन क्षत्रेः प्रथमसरे । कुत्सिते चोदरे जातः कूदरः स्मृतकीर्त्तितः ॥ तदपत्यं विप्रतुल्यं पतितो द्यूतदोषतः । संधः कोटक संसर्गादधमोजगतीतले ॥ इति ब्रह्मवैवर्त्तपुराणम् ॥

कूपः । पुं । स्वनाम्नाख्याते जलाधारे । उदपाने ॥ अस्यलक्षणम् । यथा । भूमौ खातोत्तविस्तारो गम्भीरो मण्डलाकृतिः । वृत्तोऽवटः स कूपः स्यात् तदम्भः कौपमुच्यते ॥ गर्त्ते ॥ गुणवृत्ते ॥ मन्माने ॥ कूपके । कुप्पी इति भाषा ॥ कुवल्लिमण्डूकाऽस्मिन् कुशब्दे । कुपुभ्यां चेतिभेदीर्घत्वे ॥ कुत्सिताः पादा अस्येति ॥ कुकुपूरित्यादिना दीर्घनिर्देशादन्यत्रापि दीर्घः ॥

कूपकः । पुं । गुणवृत्ते । नामख्यातस्थूलबन्धनकाष्ठे । गुणधरा मालूरवृक्षे इतिभाषा ॥ कुप्पा इतिभाषा प्रसिद्धे तैलादिपात्रे ॥ कुकुन्दरे ॥ उदपाने ॥ नेत्रादेः स्रोतोविधकारिणि तन्त्रिलादौ ॥ विदारके । गुल्मनाशदोषाधर्थं कृतगर्त्ते ॥ कुत्सितः कूपः । कुत्सिते इतिक । कूपस्य प्रतिकृतिरितिवा । कुत्सिते प्रतिकृतावितिक न् ॥ कूपे कोयतिवा । कै० । सुपो ऽसि कै० ॥

कूपखानकः । पुं । कूपस्य खननकर्त्तरि ॥

कूपत् । अ । प्रश्ने ॥ प्रशंसायाम् ॥

कूपाङ्गः । पुं । रोमाञ्चे ।

कूपाङ्गः । पु ।]

कूपारः । पु । चक्रभारे ॥

कूपिका । स्त्री । अम्भोगतेऽल्पे । जलसंस्थितेऽल्पपर्वतादौ ॥

कूपी । स्त्री । पात्रविशेषे ॥

कूर्मम् । न । सरोवरे ॥

कूर्चिका

कूरः । पुं । न । अन्ने । भक्ते ॥
कूर्चः । पुं । न । भ्रुवोर्मध्ये ॥ कत्थने ॥ श्म-
श्रुणि । कैतवे । दम्भे ॥ मयूरपुच्छमु-
ष्टौ । मुट्ठाइति भाषा ॥ कुशमुष्ट्याम् ॥
अङ्गुष्ठाङ्गुलिमध्यस्योपरिभागे ॥ पुं
। शीर्षे ॥ आसनविशेषे ॥ न । मलापक-
र्षणाद्यर्थं मुशीरादिनिर्मिते मुष्टि
माने ॥ तथाच नरसिंहपुराणम् ।
ततः समर्पयेत् कूर्चं मुशीरादिवि-
निर्मितम् । मलापकर्षणार्थं श्री
मन्मूर्त्यङ्गसन्धितः इति ॥ विष्णुध-
र्मोत्तरेपि । उशीरकूर्चकंदत्वासर्व
पापैः प्रमुच्यते । दत्त्वा गोविलग्नं कू
र्चं सर्वांस्तापान् व्यपोहति ॥ दत्त्वा
चामरजं कूर्चं श्रियमाप्नोत्यनुत्तमा
मिति हरिभक्तिविलासस्य ६ विला
से ४८ श्लोकः ॥ कुरति । कूर्वते वा
। कुरशब्दे वा । क्विप् प्रत्ययः ॥
कूर्चशिरः । न । अङ्घ्रिस्कन्धे । गुडमु
डा इतिगौड भाषा ॥
कूर्चशीर्षः । पुं । अष्टवर्गमध्यपठिते जी
वकौषधौ । मधुरके ॥ नालिकेरे ॥
कूर्चशेखरः । पुं । नालिकेरे ॥
कूर्चिका । स्त्री । क्षीरविकृतौ । क्षीर
सा इति गौडभाषा ॥ सा द्विधा । य

कूर्म्मः

या । दध्नासह च यत् पक्वं क्षीरं सा
दधिकूर्चिका । तक्रेण यत् पक्वं क्षीरं
सा भवेत्तक्रकूर्चिका ॥ रूचिकाया
म् ॥ तूलिकायाम् । आलेख्यकूर्चिका
याम् । तुली इति गौड भाषा ॥ कुड्म
ले ॥ कुच्चिकायाम् । कपाटोद्घाटने
॥ द्रव्यमार्जनसाधने ॥ तृणगुच्छे ॥
कूर्चति । कूर्च विकारे स्वादेरकृति
गुणत्वाद्बोध्यः । संज्ञायांखुल् ॥ कू
र्चः शस्त्रादिरस्यास्ति । अतइनि
ठनाविति ठन् ॥
कूर्दनम् । न । क्रीडायाम् । खेलायाम्
॥ कुर्दक्रीडायाम् । ल्युट् । वैकप
धायादीर्घः इक्रः ॥
कूर्दनी । स्त्री । नैत्राबल्याम् । मधूत्सवे ॥
कूर्प्पम् । न । भ्रुवोर्मध्ये ॥ इति हेम ॥
कूर्प्परः । पुं । कुपरे ॥
कूर्प्पासः । पुं । अर्द्धचोलके ॥ । कूर्परः
कफोणि ज स्यते च कूर्प
रे आस्ते वा । असुचेपणे आसउप-
वेशने वा । घञ् । पृषो ॥
कूर्प्पासकः । पुं । चोले । स्त्रीणामाप्र
पदीनकञ्चुके । स्त्रीणां कञ्चुलिका
याम् ॥ स्वार्थे कन् ॥
कूर्म्म । पुं न उन्मीलननिमीलनकरे श
रीरस्थवायु विशेषे ॥ उन्मीलने स्मृ
तः कूर्मो भिन्नाञ्जनसमप्रभः इत्यु

कूर्मः

क्तः। कच्छु वा इति प्रसिद्धे जलजन्तु
विशेषे। कच्छपे। पञ्चगुप्ते किमठे॥
अस्यलक्षणं यथा। स्फटिकरजतवर्णो
नीखराजीविचित्र कलशसदृशमू
र्त्ति स्वावयवैश्च कूर्मः। अरुणसमय
पुर्वो सर्वपाकारचिह्नः सकलन्यपम
इत्त्व मन्दिरस्य करोति॥ अञ्जन
भृङ्गश्यामतनुर्यो विन्दुविचित्रो ऽव्य
क्तशरीरः। सर्वशिरो वा स्थूलगलो
न्नयः। सोपिन्दपाणांराष्ट्रविवृद्धौ वै
दूर्यच्चित्रः स्थूलकण्ठ स्त्रिकोणो गूढ
श्चिह्नस्वावयवैश्च ग्रस्तः। क्रीडा वा
प्यां तोयपूर्णे मणीवा कार्यः कूर्मो
मङ्गलार्थं नरेन्द्रैरिति॥ पंञ्चः पृष्ठा
स्थि। मणिः कूपाधोभागः॥ विष्णो
रवतारवि॰॥ सत्ययुगे समुद्रमन्थ
नकाले मन्दराचलधारणार्थं कच्छ
पहपे भगवदवतारे॥ यथा॥ वि
लोक्य विघ्नेशविधिं तदेश्वरो दुरन्त
वीर्यो ऽवितथाभिसन्धिः। कृत्वा व
पुः काच्छप सङ्गतं मथत्प्रविश्य तो
यं गिरिमुज्जहार॥ सुरासुरेन्द्रै
र्भुजवीर्यवेपितं परिभ्रमन्तं गिरिम
क्र पृष्ठतः। विभ्रत्तटा वर्त्तन मादि
कच्छपोमेनेऽक्रकण्डूयन मप्रमेय
इति॥ कुः कुत्सितः कौ भुविपा
ऊर्मिवेगो ऽस्य। अच्प्रत्ययन्वेदेय

कूर्मच

ञ्जितियोगविभागादच् समासा
न्तः॥ मुद्राविशेषे॥
कूर्मचक्रम्। न ज्योतिषप्रसिद्धे कृषि
कर्मोक्ते कच्छपाकारचक्रे॥ तस्या
कारो यथा। प्राङ्मुखेभगवान् दे
वः कूर्मरूपी व्यवस्थितः। आकल्प
भारतं वर्षं नवभेदं यथाक्रमम्॥*
॥ तत्र नवन्यासक्रमः॥ मध्यप्राग
ग्नियाम्यादिवृत्तिकादिवयवयैः।
कूर्वेधयुतैस्सैस्सुपीड्यन्ते तन्निवासि
नः॥*॥ तद्वेधो यथा। पूर्वापरे
भवेद्वेधो वेधश्चोत्तरदक्षिणे। ईशा
नेराचसेवेधो वेधआग्नेयमारुते।
तारावयान्वित तत्र सौरियन्त्रेण चि
न्तयेत्॥*॥ तद्वेधादिजन्यदोषाः
। अतिवृष्टिरनावृष्टि शलभामूषि
का खगाः। स्वचक्रपरचक्रभयसं
ते सम्भवन्तिच॥*॥ एवं देशगृह
ग्रामवेधनामर्क्षतो वदेत्। तत्राच
यवनवचेटि व्यपार्घ्यनामसाः॥ द
ग्धकेसुमहोत्पाता स्त्रीटिग्नतवपी
डयेत्। सोरिर्बलाधिकोदुष्टग्रन्थ
धीर्यः शुभावहः॥ एकदापीडयेद्य
मभानुजः कूर्मचक्रके। तत्रग्रामेन
रायिग्रोजायतेनात्रसंशयः॥ दुष्ट
स्थाने गते चन्द्रे कर्त्तव्यंशान्तिपाटि
कम्॥*॥ तद्वक्रमध्यस्थादेभाः।

कूर्मः

मध्येसारस्वता मत्स्याः हरसेनाः समाथुराः । पञ्चालसालवमाण्डव्य कुरुचेदिगजाह्वयाः । मरुनैमिषधर्मारण्याद्रिपार्श्वधोषाः सयामुनाः । काम्पिल्ययोध्याप्रयागश्वगया वेदकोदयः ॥ * ॥ तत्पूर्वस्थदेशाः । प्राच्यां मागधशोणोच्चवारेन्द्री गौडराढकाः । वर्द्धमानतमोलिप्तपार्ज्योतिषोदयाद्रयः ॥ * ॥ तत्राग्निकोणस्थदेशाः । आग्नेय्या मद्रवङ्गोपवङ्गचेपुरकोसलाः । कलिङ्गौड्रान्ध्रकिष्किन्धाविदर्भशबरादयः ॥ * ॥ तद्दक्षिणस्थदेशाः । दक्षिणे ऽवन्तिर्माहेन्द्रमलयाः कूप्यमूलकाः । चित्रकूटमहाराष्ट्रकाश्मीरसिंहलकोङ्कणाः किष्किन्धाविदर्भताम्रपर्णीकलिङ्गाविकूटकादयः ॥ * ॥ तन्नैर्ऋत्यकोणस्थदेशाः । नैर्ऋते द्रविडानर्त्तमहाराष्ट्राश्वरैवताः । यवनः पल्लवः सिन्धुः पारसीकादयोमताः ॥ * ॥ तत्पश्चिमस्थदेशाः । पश्चिमे हैहयास्तादृक्लेच्छवासप्रकादयः ॥ * ॥ तद्वायुकोणस्थदेशाः । वायव्ये गुर्जराट्यनाटजालन्धरादयः ॥ * ॥ तदुत्तरस्थदेशाः । उत्तरे चीननेपालहूणकैकेयमन्दराः । गान्धारहिमवत्क्रौञ्चगन्धमादनमालवाः ॥ कैलासमन्द्र

कूर्मम्

काश्मीरसैन्धवदेशाः खसादयः ॥ * ॥ तच्चेशानकोणस्थदेशाः । ईशाने स्वर्णभौमस्वर्गद्वारशैलङ्कवाह्लीकवत्सपुरकीकिरातादरदादयः । इति ज्योतिस्तत्त्वम् ॥ * ॥ अथ कर्मोक्ते कमठोद्धारचक्रे । कूर्मचक्रे मविन्नायेयः कार्योज्जयपत्रकम् । तस्योपरिफलं नास्तिसर्वानर्थांश्च कल्पते ॥ इतितन्त्रशास्त्रम् ॥ * ॥ कूर्मपुराणम् । तत्र कौर्म्मे षसदश सहस्रश्लोकात्मके महापुराणे ॥ यथा । षसदशसहस्रंचपुराणं कूर्मभाषितमिति ॥ * ॥ कूर्मपृष्ठः । पुंसि अश्वानवृक्षे ॥ कमठपृष्ठदेशो नाभिरादेयः ॥ * ॥ कूर्मपृष्ठकर्षणं । अग्रावेगे सक्रोगइति भाषा ॥ * ॥ कूर्मराजः । पुंसि कच्छपराजे । अकूपारे । आदिकच्छपेविष्णोरवतारे ॥ यथा । पृथ्वि स्थिरा भव भुजङ्गमधारवैनां त्वं कूर्मराज तदिदं दितियं दधीथाः । दिक्कुञ्जराः कुरुत तन्त्रितये दिधीर्षा मार्यः करोतु हरकार्मुक मातनज्यमिति स्मरान्टकम् ॥

कूलम् । नदीरोधसि तीरे । तटे । नद्यादिजलसमीपस्थाने ॥ कूलं मे मै

कूवरी

न्यपृष्ठे ॥ तडागे ॥ कूलयति । कूल आवरणे । घञ्चञ् ॥

कूलकः । पुं । कृमिभेदे । पुं । न० । सानुभेदे ॥ तीरे ॥

कूलङ्कषः । पुं । समुद्रे ॥ कूलङ्कषति । कर्षहिंसायाम् । सर्वकूलाभ्रकरीषेषु कषः इतिखच् । अव्ययीभावः ॥

कूलङ्कषा । स्त्री । नद्याम् ॥

कूलभूः । स्त्री । तीरभूमौ ॥

कूलवती । स्त्री । नद्याम् ॥

कूलहण्डकः । पुं । जलावर्त्ते ॥ कूल भङ्गे ॥

कूलेचरः । पुं । सुसारादिपशुषु ॥ यथा । सुसारगण्डकाराघ्यमरीवारगादेयाः । एते कूलेचराः प्रोक्ता यतः कूलेचरन्त्यपाम् ॥ कूलेचरा मेदुविसहरा हृद्या वसावहाः । मधुराः शीतलाः स्निग्धा मूत्रलाः श्लेष्मवर्द्धनाइति ॥

कूवरः । पुं । कुत्सिते । कूजा इतिभाषा प्रसिद्धे पुष्पे ॥ पुं । न० । युगन्धरे । यत्तदेतद्युगकाष्ठनासञ्जते तत्र ॥ वि । रम्ये । चारौ ॥ वायते । कूङ् शब्दे । कुटादिः । वा० अरच् ॥

कूवरी । पुं । रथे ॥ कूवरोयुगन्धरोऽस्या स्यास्ति । इनिः ।

कूवरी । स्त्री । कम्बलाच्छादितरथे ॥ इतिशब्दरत्नावलिः ॥

कूष्माण्डः । पुं । ककारोरौ ॥ गणदेवता । विशेषे ॥ दाक्षिणात्यविरोधिपुंसौ ॥

कूष्माण्डकः । पुं । कुष्माण्डे ॥

कूष्माण्डवटिका । स्त्री । कुष्माण्डीरीतिख्याते वटीविशेषे ॥ कूष्माण्डवटिकाज्ञेया पूर्वोक्तवटिकागुणा । विशेषात् पित्तरक्तघ्नी लघ्वी च कथिता बुधैः ॥ पूर्वोक्तवटिका भाषायाम् ॥

कूष्माण्डी । स्त्री । अम्बिकायाम् ॥ ओषधौ ॥ ककारीभेदे ॥ कूष्माण्डी तु भृशं लघ्वी ककारुरपिकीर्त्तिता ॥

कूहा । स्त्री । कुजझटिकायाम् । कुहासा इतिभाषा ॥

कूकः । पुं । शैले ॥ इति हेमचन्द्रः ॥

कूकणः । पुं । कर्णार इति भाषाप्रसिद्धे शब्दकरपक्षिणि । कीटविशेषे ॥ कूइति कणति । कण शब्दे अच् ॥ कूकेणकण्ठे नश्यति वा । कण शब्दे । अच् । णत्वं ॥

कूकरः । पुं । शिवे ॥ देहानिलविशेषे । शुष्करेचायौ ॥ कूकरस्तुपुनैचैव जवाकुसुमसन्निभः ॥ करवीरश्चये ॥ चये ॥

कूकलः । पुं । शुष्कदेहस्थेवायुविशेषे ॥

कूकला । स्त्री । पिप्पल्याम् ॥

कूकलासः । पुं । सरटे । ककचपादि ।

कृच्छ्रसा

प्रतिरूपे । द्रुमाश्रये ॥ कृकंशिरोग्रीवा कण्डूञ्च लासयति । लसश्लिष्यो योगे । चु० । कर्मण्यण् ॥

कृकव कुः । पुं । कुक्कुटे ॥ मयूरे ॥ सरटे ॥ कृकेन गलेनवक्ति । वच परिभाषणे । कृकेवचः कण्ठेतिकृञ्च ॥

कृकवाकुध्वजः । पुं । कार्त्तिकेये । स्कन्दे ॥ कृकवाकुर्ध्वजो ऽस्य ॥

कृकाटिका । स्त्री । घाटायाम् । ग्रीवायामुन्नतभागे ॥ ग्रीवापश्चाद्भागे ॥ कृकङ् कण्ठम् अटति । अटगतौ । इन् । स्वा० कन् ॥ ।

कृच्छ्रम् । न । आभीले । कष्टे । दुःखत्कारयोः ॥ अंहसि । पापे ॥ सान्तपनादिव्रते ॥ मूत्रकृच्छ्ररोगे ॥ वि । तदति ॥ स्मृतौ व्रतेपुल्लिङ्गोप्ययम् ॥ कृन्तन्ति अनेनवा । कृती छेदने । कृतेश्चकृचेतिरक् प्रत्ययः छस्यान्त्यस्यादेशः ॥

कृच्छ्रसान्तपनम् । न । व्रतविशेषे ॥ यथा गोमूत्रं गोमयं क्षीरं दधि सर्पिःकुशोदकम् । एकरात्रोपवासश्च कृच्छ्रं सान्तपनं स्मृतमिति ॥ गोमूत्रादीन्येकीकृत्य एकस्मिन् दिने भक्षयेत् तद्दिनेनान्यत्किञ्चिद्दद्यात् । अपरदिने चोपवास इत्यर्थः ॥ सम्यक् तपनमत्र । प्रज्ञादयः यदा । सन्तप

कृतम्

ति । स्युः । तस्येदङ् कर्म । अण् । कृच्छ्रञ्चतत्सान्तपनञ्च ॥

कृच्छ्रातिकृच्छ्रः । पुं । व्रतविशेषे ॥ यथाह वशिष्ठः । अब्भक्षस्तृतीयः कृच्छ्रातिकृच्छ्रोयावत् सकृदादीत । यावदेकवारमुदकं हस्तेन ग्रहीतुंशक्नोति तावन्नवसुदिवसेषुभक्षयित्वा व्यहमुपवासः कृच्छ्रातिकृच्छ्रः ॥ मनुर्यथा । द्वादशरात्रंनिराहारःस कृच्छ्रातिकृच्छ्रः । एतत् कृच्छ्रातिकृच्छ्रद्वयं द्वादशाहसाध्यमशक्तविषयम् ॥ ब्रह्मपुराणम् । चरेत् कृच्छ्रातिकृच्छ्रञ्च पिबेत्तोयञ्चशीतलम् । एकविंशतिरात्रन्तुकाले पेतेषु संयतः ॥ कालेषु प्रातःसायंमध्याह्नेष्वित्यर्थः । इति प्रायश्चित्तविवेकः ॥

कृच्छ्रारिः । पुं । विष्णोरष्टमे ॥

कृच्छ्रार्द्धः । पुं । दिनषट्कसाध्येव्रतविशेषे ॥ यथाङ्गिरसस्मृतौ । सायम्प्रातरुपैकैकंदिनद्वयमयाचितम् । दिनद्वयञ्चनाश्नीयात् कृच्छ्रार्द्धःसोभिधीयते ॥ इति प्रायश्चित्तविवेकः ॥

कृणुः । पुं । चिपकरजातौ । चिरोटाइतिभाषा ॥ इति चिकाएकशेषः ॥

कृतम् । न । सत्ययुगे ॥ यथा । दिव्यैर्वर्षसहस्रैस्तु कृतमेतादिसंख्यितमिति । मनुष्य । चत्वार्यायुष्ट.सहस्राणि

कृतकृ

वर्षाणान्तु कृतं युगम् । तस्य तावच्छ
ती सन्ध्यासन्ध्यांशयोरन्तर्यं कालोमुनि
सत्तम । युगाख्यः सतु विज्ञेय.कृतत्रे
तादिसंज्ञकइति ॥ पर्याप्ते । अलम
र्थे ॥ फले ॥ त्रि । विहिते ॥ हिंसिते ॥
अकारि । डुकृञ्° । क्तः ॥ निष्पा
दिते ॥ पुं । कृताये ॥

कृतकम्न । विडूलवणे ॥ त्रि । कृ
त्रिमे ॥ कृन्तति । कृती छेदने । कृ
णत्तिका । कृती वेष्टने । वा° कुन् ॥

कृतकर्म्मा । त्रि । निपुणे । प्रवीणे । शि
क्षिते ॥ पुण्यवति ॥ कृतकर्म, तत्त
दर्णाश्रमाभिमाननिमित्त मन्तःकर
णशोधकं येन ॥

कृतकृत्यः । त्रि । कृतार्थे । निष्पन्नक
र्मणि । समाप्तकार्ये ॥ धन्ये ॥ विदुषि ॥
कृत कृत्यंवर्णाश्रमोचितमन्तःकर
णशोधकं कर्त्तव्यं येन नपुन. कृत्या
न्तरंयस्यास्ति स. कृतकृत्य स्तु सन्य
स्य स्वात्ममात्ररति र्भवेत् ॥ ऋणत्र
यादिमुक्त ॥ ज्ञानामृतेन तृप्तस्य कृ
तकृत्यस्य योगिनः । नैवास्ति किं
श्चिन्नकर्त्तव्यमस्तिचेन्नसतत्त्ववित् ॥
अकृत कृत्योहिमृत्योर्बिभेति । य
थाहुः ॥ प्रायेणाकृतकृत्यत्वान् मृ
त्योरुद्विजतेजन इति ॥

कृतक्र.

कृतकोटिः । पुं । काश्यपमुनौ ॥ उपव
र्षमुनौ ॥ इतिविकाण्डशेषः ॥

कृतक्रियः । त्रि । कृतकार्ये ॥

कृतक्षणः । त्रि । लब्धावकाशे ॥

कृतघ्नः । त्रि । कृतहन्तरि । कृतोपकार
स्यापकारे प्रवर्त्तमाने ॥ कृतमुपका
र मपकाराचरणेन यो विनाशयति
सकृतघ्नइत्यर्थः । सचानेकविध प्रो
क्तः पुराणे स्कन्दसंज्ञके । यथा । भ-
र्त्तृपिण्डापहर्त्ताच पितृपिण्डापहा
रकः । यस्माद् गृहीत्वा विद्याञ्च द
क्षिणां न प्रयच्छति ॥ पुत्रान् स्त्रिय श्च
योद्वेष्टि यश्चतानुघातयेत्तरं । कृतस्य
दोषंवदति सकामान् नकरोतिय
॥ नस्मरेच्च कृतं यस्तु आश्रमान् य
स्तु दूषयेत् । सर्वांस्तानृषिभिः सा
र्द्धं कृतघ्नानब्रवीन्मनु रिति ॥ तस्य
प्रायश्चित्तमपिनास्ति । यथा । ब्रह्मघ्ने
चसुरापेच चौरेच गुरुतल्पगे । नि
ष्कृतिर्विहिता सद्भि. कृतघ्नेनास्तिनि
ष्कृतिरिति ॥

कृतच्छिद्रा । स्त्री । कोषातकीलता
याम् ॥

कृतज्ञ. । पु । हरौ ॥ कृतं कार्यंजगद्रूप
म्, जानातीतिज्ञः आत्मा । कृतंचा
सौज्ञश्चेतितथा । यद्वा । कृतंजगत्
ज्ञः क्षेत्रायस्य । प्राणिनांपुण्यपाप

कृतम्

रूपंकृतंकर्म्मजानाति फलदोनायेति वा॥ मुनिः। कुक्कुरे॥ त्रि॥ मर्य्यादिनि। प्रत्युपकारेसत्यत्र॥ येन केनचित् स्वस्मैकिञ्चिदपि कृतमुपकारंवेत्तुतयाजानाति। ज्ञाअवबोधने। आतश्चेतिकः॥

कृतज्ञता। स्त्री। उपकारित्वे॥ भावे तल्। तंजन्तस्त्रियाम्॥

कृतत्वा। स्त्री। वायमाणायांवृत्तायाम्॥

कृतदासः। पुं। नारदोक्तपञ्चदशदासा न्तर्गते दासविशेषे। सतुकेनचिन्नि मित्तेन एतावत्कालपर्य्यन्तं तवाहंदासइतिकृतसमयः॥ इतिक्रमसंदर्भः॥

कृतधीः। त्रि॥ पक्वबोधत्वे। निर्मलान्तःकरणे। अभ्याससंस्कृतान्तःकरणे॥

कृतनाशः। पुं। दोषविशेषे॥ कृतयोः पुण्यपापयोर्भोगमन्तरेण नाशः॥

कृतपुञ्जः। त्रि। सम्यक्कृतैराभ्यासे। सुप्रयोगेविधिज्ञे॥ कृतोऽभ्यस्तःपुञ्जयुक्तःशरोयेन॥

कृतपूर्वी। त्रि। पूर्वंनिष्पन्नकर्मणि॥ कृतंपूर्वमनेनेत्यर्थे इष्टादिभ्यश्चेतिकर्त्तरिइनिः॥

कृतफलम्। ना। आक्षोडे॥

कृतफला। स्त्री। क्षोडशिरिण्याम्॥

कृतम्। अ। अलमर्थे। निषेधेऽव्य

कृतवे

कृतमालः। पुं। ज्वारम्बधे। न्वपरत्वे॥ कर्द्दिकारे। लम्बारम्बधे॥ कृतामालाऽस्य॥

कृतमाला। स्त्री। सरिदन्तरे॥ कृतमाला नाम नदी यस्यां मत्स्योऽभूद्धरिः॥

कृतमुखः। त्रि। प्रवीणे। विज्ञे॥ कृतंमुखमस्य। सर्वंस्यकृतमुखत्वात् अचकृतयत्वस्यसंस्कृतपरत्वम्॥

कृतयुगम्। ने। तिष्ये। सत्ययुगेस न्यासन्न्यांश्रयुक्तेषुचतुर्षु दिव्येसहस्रवर्षेषु॥

कृतरुचिः। त्रि। अलङ्कृते॥

कृतलक्षणः। त्रि। गुणैः प्रतीते। शौर्य्यादिगुणैर्विख्याते॥ कृतमुद्धारितं लक्षणंनामास्य॥ श्रीहरौ॥ कृतानिलक्षणानि शास्त्राध्ययनेन। वेदाः शास्त्राणि विज्ञानमेतत्सर्वंजनार्द्दनादितिस्मृतेः॥

कृतवर्म्मा। पुं। हृदीकसुतेयादवभेदे॥

कृतविद्यः। त्रि। अभ्यस्तविद्ये॥

कृतवीर्य्यः। पुं। एकवीरनृपात्मजे॥ कृतेवंशीयकार्त्तवीर्य्येवलवति॥

कृतवेतनः। त्रि। वेतनेन नियुक्तो दासादौ॥

कृतवेदी। त्रि। कृतज्ञे॥

कृताञ्ज

कृतवेधः । पुं । श्वेतघोषाह्वतिगौ
कृतवेधकः । पुं । ङ भाषाप्रसिद्धायां
कोद्यातक्याम् ॥
कृतवेधना । स्त्री । राजकोद्यातक्याम् ॥
कृतश्रमः । त्रि । महोद्यमे । महोद्यो-
साहे ॥ श्रान्ते ॥ कृतः श्रमोयेन ॥
कृतसापत्निका । स्त्री । अधिविद्यायाम्
। अभूढायाम् । अनेकभार्य्यस्य प्रथ
मोढायाम् ॥ सपत्न्याः भावः । ष्यञ्
स्त्रीपुंवत्कोमा: । स्वार्थे कन् । ह्रस्वः ।
कृता सापत्निका यस्याः ॥
कृतस्वरः । पुं । आकरविशेषे । चमी-
करे ॥
कृतहस्तः । त्रि । सुशिक्षितशरमोक्षे ।
कृतमुद्रखे ॥ कृतोऽभ्यस्तोहस्तोय
स्य ॥
कृताकृतम् । न । कार्यकारणयोः ॥ कृ
तञ्च अकृतञ्च अनयोः समाहारः ॥
घटिताघटिते ॥ कृतञ्च तदकृतञ्च
। तेननञ्विशिष्टे नानञ्जिति समा
सः ॥ पुं । परमेश्वरे ॥ कृतः कार्या
त्मकः अकृतः कारणात्मकः । कृत
श्चासावकृतश्च पूर्वपत् समासः ॥
कृतागमः । पुं । विष्णौ ॥ कृतआगमः
श्रुतिस्मृत्यादिसञ्चयो येन सः ॥
कृताञ्जलिः । पुं । सञ्जास्त्रोपधौ ॥ त्रि ।
सम्पुटीकृतहस्ते ॥ कृताञ्जलिर्येन ॥

कृतात्म

कृतात्मा । त्रि । कृतकृत्ये ॥ विशिष्टा
न्तःकरणे ॥ योगिनि ॥
कृतात्ययः । पुं । कर्मनाशे ॥ कृतस्य अ
त्ययः ॥
कृतान्तः । पुं । यमे ॥ सिद्धान्ते ॥ दैवे
॥ अकृतसकर्मणि । अवश्यंकर्मणि
॥ कृतः अन्तोविनाशोयेन ॥ कृतः
अन्तः निश्चयोयेन यस्य वा ॥ वेदा
न्तशास्त्रे ॥ कृतङ् कर्म तस्यान्तःपरि
समाप्तिरस्यज्ञानोत्पत्त्यायत्र ॥ ब
हौ ॥
कृतान्तजनकः । पुं । हर्षे ॥ इतिहेम
चन्द्रः ॥
कृतान्ता । स्त्री । रेणुकानामगन्धद्रव्ये ॥
कृतान्नम् । न । खड्डुकादौ ॥ कृतञ्चत
त् अन्नञ्च ॥
कृताय: । पुं । द्यूतक्रीडासु धनीभूताऽ
क्षश्चिह्नितश्चतुरङ्कभागे ॥
कृतार्थः । त्रि । कृतप्रयोजने । कृतका
र्य्ये ॥ कृतः अर्थः प्रयोजनं येन ॥
कृतार्थता । स्त्री । साफल्ये ॥ भावेत
ल् ॥
कृतालयः । पुं । भेके । मण्डूके ॥ त्रि
। कृतवासे ॥ कृतः आलयोयेन ॥
कृतावदानः । त्रि । कृतकर्मणि ॥ कृत
अवदानं गुणकर्मयेन ॥
कृतावसथिकः । त्रि । वस्त्रादिनाकृत

कृत्तिका

पृष्ठजानुजङ्घादिषण्डे ॥ कृतास्यः । त्रि । शिक्षितोऽस्त्रे ॥ कृतिः । स्त्री । करणे ॥ पुरुषप्रयत्ने ॥ हिंसायाम् ॥ विंशत्यक्षरायां वृत्तौ ॥ क्रियायाम् ॥ कृतिरिन्द्रियसंयम श्चित्तैकाग्रताकरणञ्चेति छान्दोग्य भाष्यम् ॥ करणम् । डुकृञ् । खि यां क्तिन् । क्रियतेऽनया वा ॥ कृतिकरः । पुं । रावणे । दशवदने ॥ कृतिशब्दमात्रा कृती । त्रि । पण्डिते । बुधे ॥ योग्ये । अभिज्ञे ॥ पुण्यवति ॥ साधौ ॥ कृतार्थे ॥ कृतङ् कर्म प्रशस्तमस्या स्ति । अतइनिः । कृतमनेन वा । दृष्टादिलादिनिः ॥ कृत्तः । त्रि । छिन्ने । चेष्टिते ॥ कृत्त्वा तेऽस्य । कृतीछेदने क्तः ॥ कृत्तिः । स्त्री । कृणुसारादिचर्मणि ॥ त्वचि ॥ भूर्जे ॥ कृत्तिकानक्षत्रे ॥ कृत्यते । कृती । स्त्रियां क्तिन् ॥ कृत्तिका । स्त्री । तृतीयनक्षत्रे बहुला याम् ॥ तत्रजातस्य फलम् । चुधा धिकः सत्त्वधने विद्वीनो दयाटनो त्यर्जमतिः कृतघ्नः । कठोरवाक् चा हितकर्मकृन्नृशात्तचेत् कृत्तिका या समुदः प्रसंतदति ॥ कृन्तति । कृती० । कृतिभिदिलतिभ्य. क्तिदि

कृत्यधि

तिति तिकन् ॥ कृत्तिकाभवः । पुं । चन्द्रसूर्यौ ॥ कृत्तिकायाः भवोऽस्य ॥ कृत्तिकासुतः । पुं । स्कन्दे ॥ कार्त्तिकेये ॥ कृत्तिकायाः सुतः ॥ कृत्तिवासः । पुं । शिवे ॥ इति त्रिरू० ॥ कृत्तिवासाः । पुं । शिवे ॥ कृत्तिश्चर्म वासोऽस्य ॥ कृत्नुः । त्रि । कारौ । शिल्पिनि ॥ कर्त्तरि ॥ करोति कृणोति वा । डुकृञ् कृञ् । हिंसायां वा । कृहनिभ्या डुकृत्नुः ॥ कृत्यम् । न । कर्त्तव्ये । कार्य्ये । प्रयोजने ॥ पुं । तव्यादिप्रत्ययेषु ॥ यथा कृत्याः षट् तेसमाख्याताः क्यप्ण्यौ तौभावकर्मणोः । तव्यानीयावनक्तादयत्केलिमः कर्मकर्त्तरि इति सुपः प्रसम्मताकारिका ॥ कर्त्तरि कर्मणि चार्थे विहिताः कृत्याः याच्यालिङ्गा भवन्ति ॥ त्रि । विदिष्टे ॥ कार्य्ये ॥ क्रियते । डुकृञ् । विभाषाकृदृषोरित्यप् ॥ कृत्यते वा । कृतीछेदने । ऋदुपधाज्ञाकृपिकृतेरित्यप् ॥ धनादिभिर्भेदे शब्दौ ॥ क्षुद्रलुब्धमी तावमानिनः परेकृत्या इति नीतिः ॥ कृत्यवित्, त्रि । कार्यज्ञे ॥ विधिज्ञे

कृत्स

कृत्या । स्त्री । क्रियायाम् ॥ वृथा
कृत्या मकार्षीः ॥ अभिचारदेव
ते ॥ यज्ञदेवताधि० ॥ ॥ अभिचार
क्रियायाम् ॥ करणम् । कृञ् । अचे
॥ तिचातक्यप् । तुक् । टाप् ॥ कृत्य
ते वा । कृती० । ऋदुपधादितिक्यप् ॥
कृत्रिम । पुं । स्त्रि । कृके । तुरुष्कनाभि
गन्धद्रव्ये ॥ द्वादशपुत्रान्तर्गतपुत्रभि० ॥
। वृथा । सदृशे तु प्रकृत्यै यं गुणदो
ष्यविचक्षणम् । पुंस्त्वगुणैर्युक्तं
स्त्रीत्वेयस्त्रकृत्रिम इतिमनुः ॥ न ।
बिडलवणे ॥ कांचलवणे ॥ जवादि
नामगन्धद्रव्ये ॥ रसाञ्जने ॥ त्रि । कृ
तिसम्भवे । रचिते ॥ डुकृञ्० । भावे
ड्डितः क्तिः । कृत्या क्रियया निर्वृत्त
म् । धर्म्यम्नित्यम् इति मप् ॥
कृत्रिमकः । पुं । तुरुष्कनामनि गन्धद्र
व्यविशेषे ॥
कृत्रिमधूपः । पुं । } एकधूपे ।
कृत्रिमधूपकः । पुं । } नाना सुग
न्धिद्रव्यकृतदशाङ्गादिधूपे ॥ कृत्रिम
स्वार्थे कन् ॥
कृत्रिमपुत्रकः । पुं । कृत्रिमेपुत्रे ॥ त्रि ।
पुत्तलिकायाम् । गुडिया इति भाषा ॥
कृत्रिमसिद्ध । पुं । रचितबन्धे ॥
कृत्वा । अ । विधायेत्यर्थे ॥
कृत्स्नम् । न । एडके । जले । समुदा

कृपण

ये ॥ पुं । पापे ॥ कृन्तति कृणत्ति वा
। कृती छेदने वेष्टने वा । स्नुक्रुश्च
कृकृत्यृभ्यः किदितिसः ॥ ॥
कृत्स्नम् । नि । जले । सर्वस्मिन् ॥ कृत्स्नो
॥ त्रि । पूर्णे । समग्रे । सोपकरणे ।
सफले ॥ कृत्यते । कृती० । कृत्य
भूभ्यांकसः ॥
कृत्स्नधर्म्मः । पुं । निष्कामकर्मानुष्ठाने ॥
कृत्स्नवित् । त्रि । परिपूर्णात्मविदि ॥
कृदरः । पुं । कुरुते । अन्नकोष्ठे । या
न्यादिगर्ते । गञ्ज गोला इतिचभाषा
। कुर्वन्ति । तस्मिन् । डुकृञ्० । कृद
। दारयत्येतिसाधुः ॥ ॥
कृन्तनम् । न । खाङ्गले । कृन्तति । कृ
तौ० । कृतेर्नुम्चेतिकक्त्यप्त्ययः ॥ कृ
न्तवद्वर्त्तनीयमिति वेदभाष्यम् ॥
कृन्तनम् । न । छेदने । यथा । कृन्तनं
नखकेशानां छेदनञ्चनश्यतेः ।
गावाशौचे न कर्त्तव्यं पाठनं पठनं
तथा ॥ इति नारदः ॥
कृपः । पुं । द्रोणाचार्यस्य श्यालके । अ
श्वत्थाममातुले । कृपाचार्य ॥ व्यासे ॥
कृपणः । पुं । कृपौ ॥ त्रि । मन्दे । तुच्छे ।
क्लिम्पचाने ॥ कुत्सिते ॥ महाव्यसन
प्राप्ते । दीने ॥ यथा । महद्व्यसनं
प्राप्तो दीनः कृपणउच्यते । कुलेयकू
पके रामसम्भूते । सर्वकामदे ॥ इति

कृपाहै

रामायणम् ॥ अत्यन्तदीने । किञ्च हेतौ । तत्कामे ॥ यो ऽस्यस्वत्वभाव दिविक्तवर्तिनेच्छमते सकृपणः त दिधत्वादखिलो ऽनात्मवित् अप्रा सिपुरुषार्थतया कृपणो भवति ॥ क ल्यते अल्पंदातुम् । कृपू सामर्थ्ये । बाहुलकात् क्युन् । अतएवनञ् त्वम् ॥

कृपा स्त्री । दयायाम् । अनुकम्पायाम् । प्रत्युपकारनिरपेक्षतया दीनजना नुजिघृक्षायाम् ॥ ममैते इतिव्यामो हनिमित्तेस्नेहविशेषे ॥ कृपणम् । कृपकृपायाम् । कृपेः सम्मसारणञ्चे तिमिदादिपाठादङ् । टाप् ॥

कृपाणः । पुं । खड्गे ॥ कृपाणधारागम नाद्व्याघ्रकर्णावलम्बनात् । भुज ङ्गप्रयाता ख्यान मशक्यं कुलवर्त्तनम् ॥ कृपांनुदति । नुदप्रेरणे । अन्येभ्यो पीतिडः । पूर्वपदादितिणत्वम् ॥

कृपाणकः । पुं । खड्गे । निस्त्रिंशे ॥ स्वार्थे । कन् ॥

कृपाणिका । स्त्री । कृपाणयाम् ॥ स्वा० कः । प्रत्ययस्थादितीत्वम् ॥

कृपाणी । स्त्री । कर्त्तर्याम् ॥ छुरिका याम् ॥ असिलतायाम् ॥ कृपाणय तीति । अयामन्दे । कर्त्तर्ययण् । ङीप् ॥

कृपादैतः । पुं । युद्धभेदे ॥

कृमिः

कृपालुः । त्रि । कृपायुक्ते । दयालौ ॥ कृपांलाति । खोदादाने । मित्रः कुः ॥

कृपावान् । त्रि । कृपायुक्ते ॥ कृपा अस्ति अस्यास्मिन्वा मतुप् ॥

कृपी । स्त्री । द्रोणाचार्यस्यपत्न्याम् ॥

कृपीटम् । न । उदरे ॥ तोये ॥ कल्प ते । कृपू० । ह्रस्वकृपिभ्यःकीटन् ॥ विपिने ॥ इन्धने ॥

कृपीटपायः । पुं । कैनिपाते ॥ समुद्रे ॥

कृपीटयोनिः । पुं । अगौ ॥ कृपीटस्य । अगस्त्य योनिः भूमजन्यत्वात्तेषाम् । अगेरापद्रतिश्रुतेश्च ॥ कृपीटं ज लं योनि रुत्पत्तिस्थान मस्येतिवा । अग्नौ ऽग्नि र्ह्यतः सर्वमिति मनु स्मृतेः ॥

कृपीपतिः । पुं । द्रोणाचार्ये ॥

कृपीसुतः । पुं । अश्वत्थाग्नि ॥

कृमिः । पुं । कीटात्क्षुद्रे । नीचात् गौ ॥ खाद्यायाम् ॥ कृमिले ॥ खरे ॥ उदरजातकीटरोगे ॥ तद्दौषधं यथा । वदरीकारवीमूलंगुडाक्येन समन्वितम् । अग्निनासाधितं जग्ध्वा कृमीन् सर्वान् हरेच्छ्वेति गारुडे १९४ अध्यायः ॥ क्रामति । क्रमु० । क्रमितमिश्रतिसम्भ्याम तश्चेतिइनिःसम्मसारणञ्च । अमेः

कृमिला

सम्मसारणमित्यत्र सम्मसारणानुवृत्तेः ॥

कृमिकण्टकम् । न ॥ चित्राङ्गे ॥ विडङ्गे ॥ उदुम्बरे ॥ चित्रायाम् ॥

कृमिकोशोत्थम् । त्रि । कौशेये । रेशमि कपडा इतिभाषा ॥

कृमिघ्नः । पुं । पलाण्डौ ॥ कोलकन्दे ॥ पारिभद्रे ॥ भल्लातके ॥ विडङ्गे ॥ कृमीन् हन्ति । अमनुष्यकर्तृकेऽपि तिटक् । अत्यूर्ध्वस्येतिनियमान्नञ् ॥

कृमिघ्ना । स्त्री । हरिद्रायाम् ॥

कृमिघ्नी । स्त्री । धूमपत्रायाम् ॥ विडङ्गे ॥

कृमिजम् । न । अगुरुणि ॥ त्रि । कृमिजातेः कृमिभिर्जन्यते । जनी० । ० । अन्येभ्योपीतिडः ॥

कृमिजग्धम् । न । अगुरुणि । लोहजके ॥

कृमिजा । स्त्री । लाक्षायाम् ॥

कृमिदन्तकः । पुं । दन्तरोगविशेषे ॥

कृष्णच्छिद्रश्चलः स्रावी ससंरम्भो महारुजः । अनिमित्तरुजोवातात् सज्ञेयः कृमिदन्तकः ॥

कृमिफलः । पुं । उदुम्बरे ॥ कृमयःफलेऽस्य ॥

कृमिरिपुः । पुं । विडङ्गे ॥ कृमीणांरिपुः ॥

कृमिला । स्त्री । अनेकप्रस्वाम् । बहुसन्तानप्रसवायाम् ॥ त्रि । कृमियुक्ते ॥ कृमीन् लाति । ला० । क ॥

कृमिवृक्षः । पुं । कोविदारे ॥

कृमिशत्रुः । पुं । न । कृमिजलजे । जौ । वगह्वे ॥

कृमिशत्रुः । पुं । विडङ्गे ॥

कृमिशुक्तिः । स्त्री । जलशुक्तौ ॥

कृमिशैलः । पुं । वल्मीके । चोंवी

कृमिशैलक । पुं । इतिभाषा ॥

कृमीलकः । पुं । वनमुद्गे ॥

कृविः । पुं । तन्तुवायद्रव्ये । घामयत्वे । तांतइतिभाषा ॥ करोति क्रियतेऽनेनवा । डुकृञ् । कृविदृधि च्छविस्थविकिक्कीदिविरितिसाधुः ॥

कृशः । त्रि । अल्पे । रूक्षे ॥ कृश्यते स्म । कृशतनूकरणे । अनुपसर्गात् फुल्लक्षीनेतिसाधुः ॥ कृशधने ॥

कृशर । पुं । कृसरेन । कृशंरोति । रा दाने । आतइतिकः ॥

कृशरा । स्त्री । कृसरायाम् । टाप् ॥

कृशशाखः । पुं । पर्पटे ॥

कृशाङ्गः । त्रि । रूक्षाङ्गविशिष्टे ॥

कृशाङ्गी । स्त्री । प्रियङ्गुवृक्षे ॥ तन्वङ्ग्याम् ॥ कृशान्यङ्गान्यस्याः ॥

कृशानुः । पुं । पावके । अनले ॥ त्रिवेकटच्चे ॥ कृश्यतितनूकरोति । कृशतनूकरणे । ऋतन्यञ्जीतिकृशे

कृशानु

कृषीवः

रोनुक् ॥ ॥ कृशानुरेताः । पुं । सर्व्वत्रे । घूर्जटौ । शिवे ॥ कृशानोरेतोऽस्य देव्या सोढुमशक्त्या दग्धे प्रक्षिप्तरेतः । इति पुराणम् । अतोऽग्निभूः कुमारः ॥ ॥ कृशाश्वी । पुं । नटे ॥ कृशाश्वेन प्रोक्तं नटसूत्रमधीते । कर्म्मन्दकृशाश्वादिनिः ॥ कृषिका । स्त्री । आखुकर्णीलतायाम् ॥ कृषकः । पुं । फाले । वृषे ॥ त्रि । कर्षके ॥ कृषति । कृषविलेखने । कृषेर्दृक्षिरोदीचामितिकुन् ॥ कृषिः । स्त्री । वैश्यवृत्तिविशेषः । अन्नादौ । खेती इति भाषा ॥ अन्नोत्पत्त्यर्थं भूमेर्विलेखनं कृषिः ॥ कर्षणम् । कृषेः । कृक् कृच्यादिभ्यः । इगुपधात् किदितीन् वा ॥ ॥ कृषिकः । पुं । फाले ॥ त्रि । कर्षके ॥ कृषति । कृषः । वृञ्शिकृषोः किकन् ॥ कृषिका । स्त्री । फाले । टाप् ॥ कृषिजीवी । पुं । कृषिवृत्तौ ॥ स्वयङ्कृतया ऽस्वयङ्कृतया वा । कृष्या जीवति । इति तथा ॥ कृषीवलः । त्रि । कर्षके । कृषिजीविनि ॥ कृषिरस्यास्ति । रज्ञः कृष्या

कृष्णः

सुतिपरिषदोवलच् । वले । इति दीर्घः ॥ कृष्करः । पुं । शिवे ॥ इति त्रिकाण्डशेषः ॥ ॥ कृष्टम् । त्रि । कृष्टिमत् क्षेत्रे । सीत्ये । जोता खेत इति भाषा ॥ कृष्यते स्म । कृषः । क्तः । आकृष्टे ॥ कृष्टपच्यः । त्रि । धान्ये । शालिषु ॥ कृष्टे स्वयमेव पच्यन्ते इत्यर्थे राजसूयसूर्य्यमृषोद्यरुच्यकुप्य कृष्टपच्या व्यथ्याः इति क्यबन्तो निपातितः ॥ कृष्टेन पच्यते वा । त्रि । कृष्टपाक्यः । त्रि । कृष्टपच्ये । गुडे । कर्मणि ण्यत् ॥ ॥ कृष्टिः । पुं । पण्डितेऽवुधे । स्त्री । आकर्षे । कर्षणे । कर्षति । कृषः । क्तिच् ॥ वा० तिर्वा । संज्ञापूर्वकत्वान्नगुणः ॥ ॥ कृष्णः । पुं । भगवतोऽवतारविशेषे । केशवे । वासुदेवे । देवकीनन्दने । भक्तदुःखकर्षणे ॥ भक्तानां पापादिदोषान् सर्व्वथा निवारयितुं मशक्यानपि कृषतिनिवारयति तेषामेवसर्व्वथा प्राप्तुं मशक्यानपि पुरुषार्थान् आकर्षति प्रापयतीति वा ॥ यथा । स्मरणादेवकृष्णस्य सिद्ध्यन्ति सर्वसिद्धयः । स्मृते

कृष्णः

॥ सकलकल्याणभाजनंयज्जायते । पु
रुषंतमजंनित्यं व्रजामिशरणंहरि
म् । स्मरणादेव कृष्णस्य मोक्षसङ्घा
तप्रदम् । शतधाभेदमाप्नोति गि
रिर्वज्रहतो यथेतिकृष्णस्मरण मा
हात्म्यम् ॥ अस्यजन्मसमय उक्तोख
माणिक्यनामनि ज्योतिर्ग्रन्थे । उच्च
स्थाः शशिभौमचान्द्रिशनयो लग्नं
वृषो लाभगो जीवः सिंहतुलासि
थ कर्मवशात् पूषोशनोराहवः । नै
शीथः समयोऽष्टमी बुधदिनं ब्रह्म
र्क्षमत्र क्षणे श्रीकृष्णाभिधमम्बु जे
क्षण मभू दाकि परब्रह्मतदिति ॥
जनं जनेन जनिता जनं पाति ज
नेन यः । जनं जनेन हरति तं कृ
ष्णं भजसाम्मतम् ॥ परब्रह्मणि ॥ य
था । कृषि र्भूवाचकः शब्दो ण श्च
निर्वृतिवाचकः । तयो रैक्यं परब्र
ह्म कृष्ण इत्यभिधीयते ॥ पाराशर्य
। वेदव्यासे ॥ अर्जुनपाण्डवे ॥ वाय
से । काके ॥ कोकिले ॥ करसईके
॥ वर्णविशेषे । नीले । श्यामे । मे
चके ॥ न । मरिचे ॥ लोहे ॥ नी
लाञ्जने ॥ कालागुरुणि ॥ अशुभक
र्मणि ॥ त्रि । भेचकवर्णवति ॥ क
र्षतिमनः । कृष० । कृषेर्वर्णइतिन
क् ॥ यद्वा । कर्षत्यरीन् । बाहुल

कृष्णचू

कात्वर्णं विनापिनक् ॥ कृष्णोवर्णोऽ
स्यास्ति वा कृष्णः । नगन्तात् गुणवच
नेभ्यो मर्तुप्रोलुगितिलुक् ॥
कृष्णकन्दम् । न । कैरवे । निशाढसे ॥
इतिशब्दरत्नावलिः ॥ कृष्णःकन्दोस्य ॥
कृष्णकर्म्मा । त्रि । दुराचारे । पापाचा
रयुक्ते ॥ कृष्णकर्मास्य ॥ कृष्णार्पि
तकर्मणि ॥
कृष्णकलिः । स्त्री । गुलालफूल इति
प्रसिद्धे कृष्णकेलौ । इति गौडाः ॥
कृष्णकायः । पुं । महिषे ॥ त्रि । श्याम
तनौ ॥ कृष्णः कायोस्य ॥
कृष्णकाष्ठम् । न । कालागुरुणि ॥
कृष्णकोकिलः । पुं । द्यूतकृति । अचरे
विनि ॥ कृष्णोऽशुभः कोकिलोस्य ॥
कृष्णगन्धा । स्त्री । शोभाञ्जने ॥
कृष्णगर्भः । पुं । कटफले ॥
कृष्णचन्दश्चुकः । पुं । चणके ॥
कृष्णचतुर्दशी । स्त्री । कृष्णपक्षीयच
तुर्दश्याम् । भूते ॥ कृष्णाचासौचतु
र्दशीच ॥
कृष्णचन्दनम् । न । हरिचन्दने । पीत
चन्दने ॥ कृष्णश्चन्दनम् ॥
कृष्णचरः । त्रि । कृष्णश्चभूतपूर्वगवादौ
भूतपूर्वेचरट् ॥
कृष्णचूडा । स्त्री । स्वनामख्यातगौडेषुप्र
सिद्धे पुष्पवृक्षे । गुजतुरा इतियव

कृषीवल

रीनुक् ॥ कृषानुरेताः । पुं । सर्वज्ञे । धूर्जटौ । शिवे ॥ कृशानोरेतो ऽस्य देव्या सोढुं मशक्त्वा दग्धो ऽग्निरेतः । इति पुराणम् । अतो ऽग्निभूः कुमारः ॥ कृशाश्वी । पुं । नटे ॥ कृशाश्वेन प्रोक्तं नटसूत्रमधीते । कर्मन्दकृशा० । स्वादिनिः ॥ कृशिका । स्त्री । आखुकर्णीलतायाम् ॥ कृषकः । पुं । फाले । कृषे ॥ वि । कर्षके ॥ कृषति । कृषविलेखने । कृषे ष्टिट्टिसिदीचामिति कुन् ॥ कृषिः । स्त्री । वैश्यवृत्तिवि० । अन्नते । खेती इति भाषा ॥ अन्नोत्पत्त्यर्थं भूमेर्विलेखनं कृषिः ॥ कर्षणम् । कृष० । भुक् कृष्यादिभ्यः । इगुपधात् किदितीन् वा ॥ कृषिकः । पुं । फाले ॥ वि । कर्षके ॥ कृषति । कृष० । वृञ्शिकृषोः किकान् ॥ कृषिका । स्त्री । फाले । टाप् ॥ कृषिजीवी । पुं । कृषिवृत्तौ । स्वयङ्कृतया ऽस्वयङ्कृतया वा कृष्या जीवति इति तथा ॥ कृषीवलः । वि । कर्षके । कृषिजीविनि ॥ कृषिरक्षास्ति । रजः कृष्या

कृष्ण

स्तुतिपरिषदोवलच् । वले । इति दीर्घः ॥ कृष्करः । पुं । शिवे । इति विकाण्डशेषः ॥ कृष्टम् । वि । कृष्टिमत् खेचे । सीत्ये । चोता खेत इति भाषा ॥ कृष्यते स्म । कृष० । क्तः । आकृष्टे ॥ कृष्टपच्यः । वि । धान्ये । शालिषु ॥ कृष्टे स्वयमेव पच्यन्ते इत्यर्थे राजसूयसूर्यमृषोद्यरुच्यकुप्य कृष्टपच्याव्यथ्याः इति क्यबन्तो निपातितः ॥ कृष्टेन पच्यतेवा । कृष्टपाक्यः । वि । कृष्टपच्ये । शुद्धे कर्मणि खेत् ॥ कृष्टिः । पुं । पण्डितेतरे । युधे । स्त्री । आकर्षे । कर्मणे । कर्षति । कृष० । क्तिच् ॥ वा० तिर्वा । संग्रामपूर्वकत्वान्नगुणः ॥ कृष्णः । पुं । भगवतो ऽवतारविशेषे । केशवे । वासुदेवे । देवकीनन्दने । भक्तदुःखकर्षणे ॥ भक्तानां पापादिदोषान् सर्वथा निवारयितुं मशक्यानपि कृपतिनिवारयति तेषां मेघसर्वया मासु मशक्यानपि पुरुषार्थान् आकर्षति प्रापयतीति वा ॥ यथा । स्मरणादेवकृष्णस्य सिद्ध्यन्ति सर्वसिद्धयः । स्मृते

कृष्णः

सकलकल्याणभाजनंयत्रजायते । पु
रुषंतमजंनित्यं व्रजामिशरणंहरि
म् । स्मरणादेव कृष्णस्य पापसङ्घा
तपञ्जरम् । शतधाभेदमाप्नोति गि
रिंवज्रहतोयथेतिकृष्णस्मरण मा
हात्म्यम् ॥ अस्यजन्मसमय उल्लेख
आग्निकथनामनि ज्योतिर्ग्रन्थे । उच्च
स्थाः शशिभौमचान्द्रिशनयो लग्नं
हिबुको लाभगो जीवः सिंहतुलास्थि
तौ क्रमवशात् पूषोशनोराहवः । नै
शीथः समयोऽष्टमी बुधदिनं ब्रह्म
क्षमऋक्षे श्रीकृष्णाभिधमम्बुजे
क्षण मभू दाविः परब्रह्मतदिति ॥
जनं जनेन जनिता जनं पाति ज
नेन यः । जनं जनेन हरति तं कृ
ष्णं भजसात्मतम् ॥ परब्रह्मणि ॥ य

कृष्णभेदा । स्त्री । कटुकायाम् ॥ कृष्णो
वर्णेन भेद स्त्रेदोऽस्याः ॥

कृष्णभेदी । स्त्री । कटुक्याम् । कटुरो
हिण्याम् ॥ कृष्णं मलमिनक्ति । क
र्मण्यण् । ङीप् ॥

कृष्णमन्दी । पुं । पवनव्याधौ । उन्मे ॥

कृष्णमल्ली । स्त्री । कृष्णमल्लिकायाम् ।
वनवर्बरे । वर्षायाम् । काली तुल
सी इतिभाषा ॥

कृष्णमुखः । पुं । काला मूंग इतिप्रसि
द्धे मुद्गे । वासन्ते । सुराभृङ्गे ॥

कृष्णचू

कात्वर्णं विनापिनक् ॥ कृष्णोवर्णोऽ
स्यास्ति वा कृष्णः । नगलात् गुणव च
नेभ्यो मतुपोलुगितिलुक् ॥

कृष्णकन्दम् । न । कैरवे । निशाकरे ॥
इतिचिकाण्डशेषः ॥ कृष्णःकन्दोऽस्य ॥

कृष्णकर्म्मा । वि । दुराचारे । पापाचा
रयुक्ते ॥ कृष्णकर्म्मास्य ॥ कृष्णार्पि
तकर्मणि ॥

कृष्णकलिः । स्त्री । गुलाबफूल इति
प्रसिद्धे कृष्णकेलौ इति गौडाः ॥

कृष्णकामः । पुं । महिषे ॥ त्रि । श्याम
तनौ ॥ कृष्णः कामोऽस्य ॥

कृष्णकाष्ठम् । न । कालागुरुणि ॥

कृष्णकोकिलः । पुं । धूतकृति । अच्छदे
विनि ॥ कृष्णोऽशुभःकोकिलोऽस्य ॥

कृष्णगन्धा । स्त्री । शोभाञ्जने ॥

कृष्णगर्भः । पुं । कट्फले ॥
शातानुमेतिकः ॥
वर्णोऽस्यास्याः । सिद्धत्वम् ॥

कृष्णलोहम् । न । अयस्कान्ते ॥

कृष्णलोहितः । पुं । धूम्रवर्णे । कृष्णा
क्तमिश्रवर्णे ॥ त्रि । धूम्रवर्णवति ॥
कृष्णमिश्रोलोहितः । कर्म० ॥

कृष्णवक्त्रः । पुं । वानरे ॥ इति भरत
धृतः ॥ त्रि । श्याममुखे ॥

कृष्णवर्णः । पुं । मुद्गे ॥ विष्णुदेवे ॥ कृ
ष्णोवर्णोऽस्य ॥

कृषीवः

रोनुक् ॥ [illegible]
कृशानुरेताः । पुं । सर्वज्ञे । धूर्जटौ ।
शिवे ॥ कृशानोरेतोऽस्य देव्यो
सोढुमशक्त्या दग्धो ग्निसंरेतः
। इति पुराणम् । अतो ऽग्निभूः कु
मारः ॥ [illegible]
कृशाश्वी । पुं । नटे ॥ कृशाश्वेनाग्नो
क्तं नटसूत्रमधीते । कर्मन्दकृशा
श्वादिनिः ॥ [illegible]
कृशिका । स्त्री । आखुकर्णीलतायाम् ॥
कृषकः । पुं । फाले । वृषे ॥ त्रि । कर्षे
के ॥ कृषति । कृषविलेखने । कृषे
र्ण्वुल् ॥ [illegible]
कृषिः । स्त्री । वैश्यवृत्तिवि० । अन्नादे
। खेती इति भाषा ॥ अन्नोत्पत्त्य
र्थं भूमेर्विलेखनं कृषिः ॥ कर्मणम्
। कृष० ॥ इक् कृष्यादिभ्यः । कृष्ण
धातु किदिनी
॥ कृष्णोरेहोऽस्य ॥
कृष्णद्वैपायनः । पुं । वेदव्यासे ॥ यथा ।
कृष्णद्वैपायनं व्यासं विद्धि नारायणं
विभुम् । को ह्यन्यः । पुण्डरीकाद्धा
न्महाभारत कृद्भवेदिति विष्णुपुरा
णम् ॥ द्वीपमयनं जन्मभूमिर्यस्यसः
। द्वीपायनश्चासौ व्यासश्च । प्रधाने । द्वीपंयमु
नाद्वीप मित्यर्थः ॥ कृष्णः कृष्णव
र्णत्वात् कृष्णश्चासौ द्वैपायनश्च ॥
कृष्णधत्तूरकः । पुं । काले धतूरे इति

कृष्णः

स्तुतिपरिषदोवलच् । वले । इति
दीर्घः ॥ [illegible]
कृष्णकरः । पुं । शिवे ॥ इति त्रिकाण्ड
शेषः ॥ [illegible]
कृष्टम् । त्रि । कृष्टिमत् क्षेत्रे । सीत्ये
। जोता खेत इति भाषा ॥ कृष्यते
स्म । कृष० । क्तः ॥ आकृष्टे ॥
कृष्टपच्यः । त्रि । धान्ये ॥ शालिषु ॥ कृ
ष्टे स्वयमेव पच्यन्ते इत्यर्थे राज
सूयसूर्यमृषोद्यरुच्यकुप्य कृष्टपच्या
द्यथाः इति क्यबन्तो निपातितः ॥
कृष्टेन पच्यतेवा ॥ [illegible]
कृष्टपाक्यः । त्रि । कृष्टपच्ये ॥ शुद्धे कर्म
णि ण्यत् ॥ [illegible]
कृष्टिः । पुं । पण्डितेऽग्नौ । स्त्री ।
आकर्षे । कर्मणो ॥ कर्षति । कृष० ।
कृष्णपाकः । पुं । कर्मदे के ॥ कृष्णःपा
कोऽस्य ॥ [illegible]
कृष्णपाकफलः । पुं । करमर्दे ॥ कृष्ण
पाकंफलमस्य ॥ [illegible]
कृष्णपिङ्गला । स्त्री । चण्डीम् । दुर्गा
याम् ॥ [illegible]
कृष्णपिण्डीतकः । पुं । कृष्णपिण्डीरवृ
क्षे । वराहे ॥ [illegible]
कृष्णपिण्डीरः । पुं । कृष्णपिण्डीतके ॥
कृष्णपिपीलिः । स्त्री । कृष्णवर्णायाम्पि
पीलिकायाम् । इक्षुरुग्रायाम् । स्थू

कृष्णावर्त्मा

मादिगतौ । ज्ञानहीनत्वेन तमो मयत्वात् दक्षिणमार्गत्वेन तन्वप्र सिद्धे पितृयाणमार्गे ॥ कृष्णवर्णोया ङ्गत्वि । अनुदात्तत्वाभावाच्छङीष् ॥ कृष्णवर्णोऽस्यास्याः । अर्शआद्यच् ॥ कृष्णागुरु । न । । अगुरुणि । कालागु रुणि कृष्णकाष्ठे । धूपार्हे ॥ कृष्णाङ्गु लाधिकतत्तु लोहव द्दारिमज्जति ॥ अगुरुप्रभेदः स्नेहः कृष्णागुरुसमः स्मृतः ॥ कृष्णाचलः । पुं । रैवताद्रौ ॥ कृष्णश्चा सावचलश्च ॥ कृष्णाजिनम् । न । कृष्णसारचर्मणि ॥ कृष्णाञ्जनी । स्त्री । कालाञ्जनीवृक्षे ॥ कृष्णानदी । स्त्री । कृष्णसमुद्रयायाम् । कृष्णगङ्गायाम् ॥ स्वच्छसलिलत्वं च ॥ यं पाचनंदीपनंमतम् ॥ कृष्णाभा । स्त्री । कालाञ्जन्याम् ॥ कृष्णायसम् । न । कृष्णवर्णलौहे ॥ इ० हे० ॥ कृष्णायसम् । न । कृष्णवर्णलौहे । काल लौहे ॥ कृष्णार्चिः । पुं । अग्नौ ॥ कृष्णार्जकः । पुं । काशीतुलसी इति भाषा प्रसिद्धे । गरम्रे । वनबर्बरे ॥ कृष्णालुः । पुं । नीलालौ ॥ कृष्णावासः । पुं । अश्वत्थवृक्षे ॥ कृष्णश्च आवासोऽस्मिन् ॥

केकयः

कृष्णिका । स्त्री । राजिकायाम् । राइ इति भाषा ॥ कृष्णेव । संज्ञायां । कन् ॥ कृष्णेचुः । नी । कालेखी इक्षु इति प्रसिद्धे कोकिलेचे । श्यामेचौ ॥ कृष्णेतरः । पुं । शुक्लपक्षे ॥ कृष्णोदुम्बरिका । स्त्री । काकोदुम्ब रिकायाम् ॥ कृष्या । स्त्री । कार्पासवायाम् ॥ कृसरः । पुं । तुल्यतिलान्ने ॥ तिलतण्डु लसम्पक्वः कृसरः सोऽभिधीयते ॥ कृसियते ऽतुकृस् । कृधूमदिभ्यः किदितिसरः । वा० नपुंसकम् ॥ कृसरा । स्त्री । खिचरीति लोकप्रसि द्धे विदलमिश्रितौदने ॥ तण्डुला दालिसम्मिश्रावल्पवाद्रकृतिक्तुभिः । संयुक्ताः सलिले सिद्धाः कृसराकथिता बुधैः ॥ कृसराशुक्रबलवीर्यगुरुः पित्तकफप्रदा । दुर्जरापुष्टिविष्टम्भ मलमूत्रकरी स्मृता ॥ कृसः । वि । रचिते । कृतकर्मणि ॥ नियते ॥ कृसकोशी । स्त्री । पट्टोलिकायाम् । । व्यवस्थापने ॥ इति चिकित्सकशब्दः ॥ कृसपूपः । पुं । सिद्धके ॥ कृसिकः । वि । क्रीते ॥ इतिहेमायुधः ॥ केकयः । पुं । सूर्यसंभीयरोजविशेषे ॥

कृष्णाग्नि

कृष्णवर्त्मा । पुं । अग्निः । आश्रयाग्नौ ॥ कृष्णोधूमोवर्त्मास्य ॥ दुराचारे ॥ विधुन्तुदे ॥ चित्रकवृक्षे ॥

कृष्णवर्वरकः । पुं । वर्वरवृक्षे ॥

कृष्णवल्लिका । स्त्री । जनुकालतायाम् ॥

कृष्णवल्ली । स्त्री । कृष्णार्जके ॥ सारिवा विशेषे ॥

कृष्णवानरः । पुं । कपौ । गोलाङ्गूले ॥

कृष्णवीजः । पुं । कृष्णशिग्रौ ॥ न । कार्पासबीजे । क्षुद्रौदनः इति भाषा प्रसिद्धे धान्ये ॥

कृष्णवृन्ता । स्त्री । पाटलावृक्षे ॥ माषपर्ण्याम् ॥ कृष्णं वृन्तमस्याः ॥

कृष्णवृन्तिका । स्त्री । गम्भार्याम् ॥ कृष्णवृन्तायाम् ॥

कृष्णवेणा । स्त्री । सारिवाविशेषे ॥

कृष्णशारः । पुं । कालसारमृगे । कृष्णसारे ॥ कृष्णश्चासौ शारःशबलश्च । वर्णावर्णेनेतिसमासः ॥

कृष्णशालिः । पुं । कालधान इति गौड भाषा प्रसिद्धे धान्यविशेषे । श्यामशालौ ॥ कृष्णशालिस्त्रिदोषघ्नोमधुरः पुष्टिकृद्धितः । पुष्टिवीर्यबृंहणश्च वर्णकान्तिबलप्रद इत्यस्यगुणाः ॥

कृष्णशिंशिका । स्त्री । काकाण्ड्याम् ॥ कृष्णवर्णा शिम्बिका ॥

कृष्णशिम्बुः । पुं । शोभाञ्जने ॥

कृष्णा

कृष्णशृङ्गः । पुं । महिषे । खड्गपशौ ॥

कृष्णसखः । पुं । अर्जुनवृक्षे ॥ अर्जुने ॥ कृष्णस्य सखा । टच् ॥

कृष्णसखी । स्त्री । जीरके ॥ इति शब्दचन्द्रिका ॥

कृष्णसर्षपः । पुं । राजसर्षपे । राजिकायाम् ॥

कृष्णसारः । पुं । मृगाम् ॥ मृगविशेषे । कालसारे ॥ कृष्णसारस्तु चरति मृगैश्चस्वभावतः । खदिरे ॥ कृष्णेनसारःश्रबलः । इतायेतियोगविभागात् समासः ॥

कृष्णसारथिः । पुं । पार्थे । धनञ्जये । अर्जुनवृक्षे ॥

कृष्णसारी । स्त्री । शिंशपावृक्षे ॥ कृष्णसारो ऽस्त्र्यां ॥

कृष्णस्कन्धः । पुं । कालस्कन्धे । तमालवृक्षे ॥

कृष्णा । स्त्री । द्रौपद्याम् । नीलीवृक्षे ॥ कणायाम् ॥ द्राक्षायाम् ॥ नीलपुनर्नवायाम् ॥ कृष्णजीरके ॥ गम्भार्याम् ॥ कटुकायाम् ॥ सारिवाविशेषे ॥ राजसर्षपे ॥ पर्ण्याम् ॥ काकोल्याम् ॥ सोमराज्याम् ॥ नदीविशेषे ॥ निर्ऋतेःपुर्याम् ॥ कृष्णा दैत्यपतेर्मद्यंचोर्ध्वमथद्दैत्यसेविता । नीलरत्नप्रभाजालवितीर्णवरभूषणा । धू

केतुः

नाऽरुपप्रभेरिव्यक्तो रविप्रान्तरत श्च
यः । नोत्पत्तिर्ज्ञायते तस्मान्नादेयःप
ण्डितैरपि ॥ एकचूडो द्विचूडश्च
त्रिशिखः पञ्चचूडकः । सहस्रशिख
रूपश्च इन्द्रकेतुरिवस्थितः ॥ सूर्य
पुत्रोऽग्निपुत्रश्च ब्रह्मविष्णुशिवात्मजः
। अनेकशिखरः केतुर्ग्रहपीडां व्य
पोहतु ॥ अत्रकेतुरित्येकवचनंजा
त्यभिप्रायम् । धूम्रा दिवाकराः सर्वे
जादिनो विकृताननाः । गृध्रासनग
ता नित्यंकेतवःस्युर्वरप्रदाः ॥ सर्वेकि
रीटिनःकार्या ग्रहालोकहिताग्रहाः
स्वाङ्गुलेनोच्छ्रिताः सर्वे शतमष्टोत्त
रंसदा ॥ दृश्यादिषु बहुत्वदर्शनात्
॥ अत्र केतुचारोवाराद्दीतो वि
ख्यते।सयथा। तत्राद्यावगमप्रदर्शना
र्थमाह । गार्गीयं शिखिचारं पारा
शर मसितदेवलकृतञ्च । अन्यांश्च
बहून् दृष्ट्वा क्रियतेऽयमनाकुलश्चारः
॥ अथोदयास्तमयलक्षणमाह। दृग
नस्तमयो वा न गणितविधिना
प्रसाध्यते ज्ञातुम् । दिव्यान्तरिक्ष
भौमास्त्रिविधाःस्युः केतवोयस्मात् ॥
अथकेतूनां दिव्यत्वादिज्ञानाय अन्येषां
स्वरूपमाह ॥ अद्भुताग्रेऽ नलरू
पंयस्मिन् स्तम् केतुरूपमेवोक्तम् ।
स्वद्योतपिशाचाभ्रयमगिरित्वादीन्

केतुः

परित्यज्य ॥ दिव्यान्तरीच भौमा
नां केतूनां स्व ध्वजगृहभवनतरु
तुरगकुञ्जराद्येष्वथान्तरीक्षास्ते ।
दिव्या नक्षत्रस्था भौमाः स्युरतोन्य
थाशिखिनः ॥ केतूनां संख्यां मता
न्तरेणाह । अत एकाधिक मेके
सहस्रमपरे वदन्ति केतूनाम् ।
बहुरूपमेकमेव प्राह मुनिर्नारदः
केतुम् ॥ मतान्तरमयुक्तत्वसिद्धा
न्तमाह । यद्येको यदिबहवः किम
नेन फलन्तु सर्वथा वाच्यम् । उद
यास्तमयैः स्थानैः स्वर्भैरा धूपनै ।
र्वक्रैः ॥ तेषां फलपाकनियमार्थ
माह ॥ यावन्त्यहानि दृश्यो मासा
वन्त एवफलपाकाः । मासैरब्दा
श्च वदेत् प्रत्रमांत् पक्षत्रयात् पर
तः ॥ शुभस्य केतोर्लक्ष्म ह्रस्व
स्तनुः प्रसन्नः स्निग्धचक्षु रुचिरसं
स्थितः शुक्लः । उदितोवा प्यभिदृष्टः
सुभिक्षसौख्यायवः केतुः ॥ अशुभ
स्य केतो र्लक्ष्म उक्तविपरीतरूपो
न शुभकरो धूमकेतुरत्यर्थः । इन्द्रा
युधानुकारी विशेषतो दिव्यकेतुर्
या ॥ अधुना केतुसहस्रस्य लक्षणं
सफलं विषयञ्च तत्राद्यानेव दर्शयति
पञ्चविंशतिः केतवो भवन्ति तेषां
लक्षणमाह ॥ धूम्रशिखिहरिकपि

केतः

कावल इति ख्याते देशविशेषे ॥ केकयी । स्त्री । भरतमातरि । दशरथरामजत्न्याम् ॥ केकयस्य दुहिता । सङ्कोचेमानाभावा ज्ञन्यजनकभावेपि पुंयोग इति पुंयोगादाख्यायामितिङीष् ॥ केकरः । त्रि । वक्रिरे । ऐंचातानादृतिभाषा प्रसिद्धे निम्नोन्नतात्क्षिणपुक्षे । टेरके ॥ केकृभ्रिकर्त्तुं शीलमस्य । कृञोहेतुताच्छील्यानुलोम्येष्वितिटः ॥ इलदन्तादित्यलुक् ॥ केका । स्त्री । मयूरस्ववाख्याम् ॥ केकृभ्रिकायते । कैशब्दे । अन्येभ्योपीतिडः । इलदन्तात् । सप्तम्याः संज्ञायामित्यलुक् ॥ केकाकुलः । पुं । मयूरे ॥ केकिकः । पुं । केकावति । मयूरे ॥ ग्रीष्मादिभ्यश्चेति ठन् ॥ केकी । पुं । मयूरे ॥ केकऽस्त्यस्य । ग्रीष्मादिभ्यश्चेति । पक्षे इनिः ॥ केचन । अ । केचिदित्यर्थे ॥ केचित् । अ । केचनेत्यर्थे ॥ केचुकम् । न । शाकविशेषे । नाडीचेविशूरोचने ॥ केशिका । स्त्री । षट्कुक्याम् । संघटीइतिभाषा ॥ केतः । पुं । अभिनवमन्दिरे ॥ केतनम्

केतुः

॥ कित° । घञ् ॥ केतकः । पुं । केवडा इतिख्याते केतकीवृक्षे ॥ केतकः । सूचिकापुष्पो जन्तुकः ककचच्छदः । सुवर्णकेतकीस्वन्यालघुपुष्पासुगन्धिनी ॥ केतकः कटुकः स्वादुर्मधु स्निग्धः कफापहः ॥ न । केतक्याः पुष्पे ॥ केतक्याः पुष्पम् केतकम् । पुष्पमूलेषुबहुलमिच्यणोलुक् । नादिदृद्भ्यः । लुक्तद्धितलुकीतिस्त्रीप्रत्ययस्यलुक् ॥ केतकी । स्त्री । वृक्षगुल्मान्तरे । सूचीपुष्पे । धूलिपुष्पिकायाम् ॥ केतयति । कितनिवासादौ । कुत्सा । खुत्सा । गौरादिभ्यो ङीष् ॥ केतनम् । न । सदने । गृहे । निमन्त्रणे ॥ केतौ । ध्वजे । चिह्ने ॥ कृत्ये ॥ केत्यतेज्ञायतेऽनेन । कित° । भावकर्मकरणाधिकरणेषुल्युट् ॥ स्थाने ॥ केतितः । त्रि । निमन्त्रिते । केतितस्तु यथान्यायं हव्यकव्येष्वनन्वितः । कंचिदप्यतिक्रामन्नुपायः शुक्रसंमतः ॥ केतुः । पुं । रजि । धूतौ । पताकायाम् ॥ लक्ष्मणि । चिह्ने ॥ रिपौ ॥ नवग्रहे । राहोः शरीरे । शिखिनि ॥ सचेत्याकारः ॥ यथा । ना

केतुः

नाहुपमरीच्यत्रो रविश्चानरत श्च
यः। नोत्पत्तिर्ज्ञायते तस्य नादेयः प
ञ्चभिस्तैरपि ॥ एकचूडो द्विचूडश्च
त्रिशिखः पञ्चचूडकः। सहस्रशिख
रूपश्च इन्द्रकेतुरियस्थितः॥ सूर्य
पुत्रोऽग्निपुत्रश्च ब्रह्मविष्णुशिवात्मजः
। अनेकशिखरः केतुर्ग्रहमीडां व्य-
धोऽहतु॥ अथकेतुरित्येकवचननिर्दे
श्यभिप्रायम्। धूम्रा दिवाकराः सर्वे
गृध्रादिनेत्रविकृताननाः। गृध्रासनगा
ना नित्यंकेतवस्सुखप्रदाः॥ सर्वेकि
रीटिनःकायो ग्रहालोकस्थितावहाः
स्वाङ्गुलेनोच्छ्रिताः सर्वे शतमष्टोत्त
रंसदा ॥ इत्यादिषु बहुत्वदर्शनात्
॥*॥ अत्र केतुचारोवाराधीतो वि
ख्यतेऽतयथा। तत्राद्यागमप्रदर्शना
र्थमाह। गार्गीय शिखिचार पारा
शर मसितदेवलकृतश्च। अन्यांश्च
बहून् दृष्ट्वा क्रियतेऽयमनाकुलश्चारः
॥ अथोदयास्तमयलक्षणमाह। दर्श
न मस्तमयो वा न गणितविधिना
ऽस्य शक्यते ज्ञातुम्। दिव्यान्तरिक्ष
भौमास्त्रिविधास्सुः केतवोयस्मात्॥
अयकेतूनां दिव्यवर्जितानामन्येषां
त्वरूपमाह ॥ अहुतागेऽनलरू
पंयस्मिं स्तत् केतुरूपमेवोक्तम्।
खद्योतपिशाचाख्यमशिरस्कादीन्

केतु.

परित्यज्य ॥ दिव्यान्तरीच भौमा
नां केतूनां खण्ड्यध्वजग्रहभवनतरु
तुरगकुञ्जरादेष्वयान्तरीक्षास्ते ।
दिव्या नक्षत्रस्था भौमा. स्युरेतेन्य
थाशिखिनः ॥ केतूनां संख्यां मता
न्तरेणाह । अत एकाधिक मेके
सहस्रमपरे वदन्ति केतूनाम्।
बहुरूपमेकमेव प्राह मुनिर्नारदः
केतुम् ॥ मतान्तराण्युक्त्वास्विदा
नीमाह । यदेको यदिवहवः किम
नेन फलन्तु सर्वदा वाच्यम्। उद-
यास्तमयैः स्थानैः स्वर्क्षैरा धूपनै ।
र्वंशः ॥ तेषां फलपाकनियमार्थ
माह ॥ यावन्त्यहानि दृश्यो मासा
वावन्त एवफलपाकः ।मासैरब्दं
श्च वदेत् प्रमाणात् पञ्चत्रयात् पर
तः ॥ शुभस्य केतो र्वर्ण प्रभ्य
स्तनुः प्रसन्नः स्निग्ध ऋजु रुचिरसं
स्थितः शुक्लः । उदितोवाप्यभिदृष्टः
सुभिक्षसौख्यावहः केतुः॥ अशुभ
स्य केतो र्वर्ण उक्तविपरीतरूपो
न शुभकरो धूम्रकेतुरत्यन्तः। इन्द्रा
युधानुकारी विशेषतो विद्रिचूलो
वा ॥ अधुना केतुसहस्रस्य अधस
फलं विपक्षु स्वस्वादेव रविला
पञ्चविंशतिः केतवो भवन्ति तेषां
स्वरूपमाह ॥ धूम्रस्त्रिशिखस्फुल-

केतुः

किरणाख्याः पञ्चविंशतिः सशिखाः ।
प्राग्वद्दिशो दृश्यान्तेषां विरोधा
दक्षा रविजाः ॥ अग्निपुत्रास्तावन्त
स्तथाह । शुक्रदहनबन्धुजीवकेतू
नाचार्यतनेषां हुताशसुताः । आ
नेया दृश्यन्ते तावन्त स्तेपि शि
खिभयदाः । मृत्युसुता स्तावन्त आ
हुर्वक्रशिखा मृत्युसुता रूक्षाः कृ
ष्णास्तेपि तावन्तो दृश्यन्ते याम्या
याम्याः जनभरकाले दिनं स्तेच ॥ भूमि
पुत्रा द्वाविंशतिरेवाहुः । दर्पणवृत्ता
कारा विशिखाः किरणान्विता धरा
तनयाः । क्षुद्रभयदा द्वाविंशति रैशा
न्या मन्वतैस्तुल्यनामानः । चंद्रसुता स्व
यं । अग्निकिरणरजतहिमकुमुद
कुन्दकुसुमोपमाः सुताः शशिनः ।
उत्तरतो दृश्यन्ते भयसुभिक्षावहाः
शिखिनः ॥ ब्रह्मदण्डख्यस्य ॥
ब्रह्मसुत एकोपि शिखी वर्ण
स्तिमिरयुगान्तकरः । अनियतदिक्
सम्भवो विज्ञेयो ब्रह्मदण्डाख्यः ॥
एकाधिकं शतं किल मन्यानि नय
शतान्येकोनानि कथनीयानीत्याह
शतमभिहित मेतावधिकमेकेन
विरहितं न्यूनात् । कथयिष्ये
केतूनां शतानि नवसंख्यैः स्व
ष्टैः ॥ शुक्रपुत्रा शतुरशीतिरुद्

केतुः

ग्रा स्नानाह । सौम्येशान्यो हृदयं
शुक्रसुता यानि चतुरशीत्याख्याः ।
विपुलसितताराका स्ते स्निग्धाश्चेभ
वन्तितोयफलाः ॥ षष्टिः शनैश्चर
पुत्राः स्निग्धाः प्रभासमेता दिग्वि
भागाः षष्टिः शनैश्चराङ्गारुहाः । अति
कष्टफलाः दृश्याः सर्वे चैते कनकसं
ज्ञाः । गुरुपुत्राः पञ्चषष्टिः विक
चाख्या नाम गुरुसुताः । सितैकतारा
शिखापरित्यक्ताः । षष्टिः पञ्चभिर
धिका स्निग्धा धान्याश्रिताः पापाः ॥
एकपञ्चाशद्बुधपुत्राः । नातिव्यक्ताः
रूक्षा दीर्घाः शुक्लाः यथेष्टदिक्प्र
भवाः । बुधजाः सत्कारसंज्ञाः पापफ
लास्त्वेकपञ्चाशत् । भौमपुत्राः ष
ष्टिः । चतजानखानुरूपा शिखूल
ताराः कुजात्मजाः षष्टिः । नाम्ना च
कौङ्कुमास्ते सौम्यांशसंस्थिताः पा
पाः प्रथमस्निग्धाः सुपुत्राः । विंशत्
व्याधिका राहोस्तेतामसकीलकाह
तिस्त्याताः । रविशशिगा दृश्यन्ते
तेषां फलमुक्तप्रकारेण ॥ अर्कजा
रौक्षतामसकीलकसंज्ञाः सुताः
केतवश्चत्वारिंशत्यर्थाः । विंशत्यधि
कं शतमाग्नेयपुत्राणाम् । विंशत्य
धिकं शतमन्यच्छतमग्नेविश्वरूपस्य
पुत्राणाम् । तीव्रानलभयदानां व्या

केतुः

लामालाभिरा कुक्षतनूनाम् ॥ सप्त
सप्ततिर्वायुयुग्राः । श्यामाकृष्णा वि
तारास्यामरूपा विकीर्णदीधित
यः ॥ अरुणाख्या स्तेजोवायोः सप्त च
सप्ततिः कपोदाःपरुषाः । प्रजापति
सुतान् ब्रह्मणःपुत्रांश्चाह । तांरापु
ष्पनिकाशा गणका नाम प्रजापते
रेष्टा । द्वे चार्यतेश्चतुरधिके चतुर
स्रो ब्रह्मसन्तानाः ॥ तान्निर्ऋतिरुपपु
त्रो नाम्नाह्वाकर्कश नाम वरुणजा दा
रिद्र्यशब्दबंधगुल्मसंस्थानाः । अग्निवत्
प्रभा समेता नीलफलाः केतवः प्रो
क्ताः ॥ यक्षवतिःकालपुत्रा । यक्ष
वृतिः कालपुत्राः कुबन्धसंज्ञाः कब
न्धसंस्थानाः ॥ पुरुषा भयमदाः स्यु
र्विरूपनारा श्वेतेऽग्निवत् ॥ नव
विदिक्पुत्राः सर्वेषां च संख्या मन्ये
षाञ्च विशेषं वक्ष्यामीत्याह । गु
रुर्विपुलैकतारा नवविदिशां केत
व संभूत्यन्ता । एवं केतुसहस्रं विशे
षमेषा मतो वक्ष्ये ॥ तत्र ये दृश्य
स्ते तेषां लक्षणं वक्तुकाम स्तावदा
दैवियसाकेतेर्लक्षणमाह । उद
गायतोमहान्स्निग्धमूर्त्तिरपरोद
यो वसाकेतु उच्यते करोति मर
णंकं सुभिक्षमुत्तमं कुरुते ॥ अ
ग्निकेतोर्ध्वसंस्थाख्यस्य ह० । तच्च

केतुः

गणोऽग्निकेतुः सतु रूक्षःक्षुद्भयाव
हःप्रोक्तः । स्निग्धे स्तादक्प्राच्यां
मस्त्वाख्यो डमरमरकाय ॥ कपाल
केतो र्लक्षणं दृश्यो ऽमावास्यायां क
पालकेतुः स धूमरश्मिशिखः । प्राङ्
नभसोऽर्द्धविचारी क्षुन्मरकोर्दृष्टि
रोगकरः ॥ रौद्रकेतोर्लक्षणं प्राग् वै
श्वानरमार्गमूर्ध्वाग्र्यास्त्रिरूक्षताम्रा
शीर्षः । उर्ध्वस्त्रिभागगामी रौद्र इ
ति कपालसंज्ञोफलं ॥ चलकेतो र्ल०
प्राग् अपरस्यां चलकेतुःशिखया । या
म्याग्रयाङ्गुलोच्छ्रितयाऽग्रच्छेद्य
शीर्षाय्योदक्तथातथा दैर्घ्ये माया
मिति ॥ सप्त मुनीन् संसृज्य ध्रुव म
भिजित मेवचप्रतिनिहत्य । नभसो
ऽर्द्धभाग मित्वा याम्येनाक्षं समुप्रया
ति ॥ चन्यात्प्रयागकूलाद्यावदेव
ह्नीञ्च पुष्करारण्यम् । उदगपि
च देविकामपि भूयिष्ठं मध्यदेशास्य
र्म् ॥ अन्यानपिचैसदेशानुक्त्वा
क्वचित्क्वचिद्वृत्तिरोगदुर्भिक्षैः ॥ दृश्य मा
नानुफलपाकोऽस्यकेश्चिददृष्टादृग
प्रोक्तश्वेतकेतो र्ल० । प्राग्वर्ष
राद्दृश्यो याम्यायश्वेतकेतुरन्यस्व
क्रवृत्तिं युगाकृतिरपरे युगपत्तौ
संसदिनदृश्यौ । स्निग्धौतुभिक्षदौ
र्गदौ तथाधिकं दृश्यते कनामाय ।

केतुः

दग्धवर्षाण्युपतापं जनयति शस्त्रप्रकोपकृतम्॥ श्वेतस्य सचक्षुष्मः श्वेत इति जटाकारो रूक्षः श्यावो विपत्तिभागगतः॥ विनिवर्त्तते ऽपसव्यं विभागशेषाः प्रजाः कुरुते॥ रश्मिकेतोर्ल०॥ आधूम्रयाऽति गिखया दर्शन मायाति कृत्तिकासंस्थः॥ श्वेतः सरश्मिकेतुः श्वेतसमानं फलं धत्ते॥ धूमकेतोर्ल०॥ धूमकेतु रनियति गतिप्रमाणवर्णाकृति र्भवति विष्वक्॥ दिग्व्यन्तरीचमैत्रेभ भवत्यसौ स्निग्धदृष्टफलः॥ सेनाङ्गेषु च दाहा गृहतरुगजेषु चापि देशानाम्॥ दृष्टि र्वा मुपस्करेषु च विनाशिनां दर्शनं याति॥ कुमुदकेतोर्ल०॥ कुमुदकृति कुमुदकान्तिर्वर्षण्या प्राक्शिखो निशा मेकाम्॥ दृष्टः सुभिक्षमतुलं दद्यात् किल वर्षाणि सप्त करोति॥ मणिकेतोर्ल०॥ सङ्घदेकयामदृश्यः सुसूक्ष्मतारो मरेण मणिकेतुः॥ पद्मो शिखाऽस्य शुक्ला क्षत्रोद्गता चोरपारे च॥ उदयस्त्रेष सुभिक्षं चतुरोमसान् करोत्यसौ साधून्॥ मादुर्भावं प्रायः करोति च शुद्रम्लेच्छानाम्॥ अश्वकेतोर्ल०॥ चयमर्क॥ अश्वकेतु रपिचपश्चात् स्निग्धः शिखा परेक्षवो ज्ञतया॥ नव मासान् स

केतुः

सुभिक्षं करोत शान्तिश्च लोकस्य॥ भवकेतोर्ल०॥ भवकेतु रेकरात्रं दृश्यः प्राक् सूक्ष्मतारकः स्निग्धः॥ रिष्टाङ्गलोपमया प्रदक्षिणा वर्तया शिखया॥ यावत एव मुहूर्तान् दर्शन मायाति निर्दहेन्मासान्॥ तावदसौ सुभिक्षं रूक्षः प्राणान्तिकान् रोगान्॥ पद्मकेतोर्ल०॥ अपरेण पद्मकेतु र्ज्ञेयो लक्षणगौरवो भवेत्तिग्मा मेकाम्॥ सन्न करोति सुभिक्षं वर्षा स्वतिदर्शं युक्तानि॥ आवर्त्तकेतोर्ल०॥ आवर्त्त इति निशार्द्धं लम्बशिखोऽञ्जननिभोऽपरे स्निग्धः॥ यावत् यामान् स दृश्य स्तावन्मासान् सुभिक्षकरः॥ संवर्त्तकेतोर्ल०॥ पश्चात् सन्ध्याकाले संवर्त्तो नाम धूम्रतामशिखः॥ आक्रम्य नियतव्यं शं मूलाग्रावस्थितो रौद्रः॥ यावत एव मुहूर्तान् दृश्यो वर्षाणि सन्ति तावन्ति भूपान् शस्त्रनिपाते वदत्यर्घ्यापि पीडयति॥ कथशुभान् केतून् वर्जयित्वा ऽशुभानां नक्षत्रस्य नाना धूमनाद् दुष्टफलं वक्ष्यामीत्या ह। ये शस्ता स्तान् स्निग्धा केतुभिरा धूमितोऽथवा स्पृष्टे। नक्षत्रे भवति घो येषां राज्ञां प्रवक्ष्ये तान्॥ अग्नि ज्या मग्नकपं मरुत्सु किरातपा

केतुः

र्थिवं हन्यात् । वेणुलासु कश्चिद्रे
शं रोहिण्यां शूरसेनपतिम् ॥ मृ
गोदरमपि सौम्ये जलजाजीवाधि
पंतथार्द्रासु । आदित्ये ऽश्मकनाथं
पुष्ये मगधाधिपं हन्ति ॥ अग्निकेशं
भोजाश्लेषिण्यां पाण्ड्यनाथमपि
भाग्ये । सौज्जयनिकं मार्यमणे सा
विषे दण्डकाधिपतिम् ॥ चित्रासु
कुरुक्षेत्राधिपस्य मरणं समादिशे
त्सूरः । काश्मीरककाम्बोजौ स्व
र्यातौ प्रभञ्जने नृपतिः ॥ इक्ष्वाकुर
मकनाथ इव हन्यते यदि भवे दि
शाखासु । मैत्रे पुण्ड्राधिपति र्ज्येष्ठा
सु च सार्वभौम वधः ॥ मूले त्वमद्र
कपतौ जल दैवे काशिपो मरणमे
ति । वैश्वेयकार्जुनायनगणिपिचै
त्यान् वैश्वदेवे च ॥ हन्यात् कैकय
नाथं पाञ्चनदं सिंहलाधिपं वारुम्
नैर्ऋतपत्तनं किरातं श्रवणादिषु
षट्सिमान् क्रमशः ॥ केतो र्वि
शेष माह । उल्काभिताडितशिखः
शिखी शिवः शिवतरो ऽभिदृष्टो यः
अशुभः स एव चोक्तातत्प्रशमित
दूषणश्चेनानाम् ॥ विशेषान्तरमाह
नयायतः शिखिशिखाभिरहते य
तोधा चर्चंच यत् स्पृशति तत्क्षि
तींश्च देशान् दिव्यप्रभावनिहता

केदार

न् स यथांगरक्षान् भुङ्क्ते गतो न
रयतिः परभोगिभोगान् ॥ इतिवा
राहीसंहितायां केतुचारनामाष्टा
दशैकादशः ॥ चाष्यते ऽनेनवा ।
चायृपूजादौ । चायः किरितितुः ॥
केतुगृहम् । न । मीनराशौ ॥
केतुग्रहवल्लभम् । न । वैदूर्यमणौ ॥
केतुभः । पुं । मेघे ॥
केतुमालम् । न । जम्बुद्वीपस्य नवख
ण्डान्तर्गते खण्डविशेषे ॥ सुकेतनं
केतुमालं प्रतीच्यां गन्धमादनात् ॥
केतुरत्नम् । न । वैदूर्यमणौ ॥
केदरः । पुं । दृब्विशेषे ॥ वि । टेरके ॥
केदारः । पुं । अद्रिविशेषे ॥ बदर्याः स
मीपेचैत्रविशेषे ॥ यथा । केदारा
ख्ये महाक्षेत्रे देवी सामागदाब्रवी
तिदेवीगीता ॥ शिवे ॥ भूमिप्रभे
दे ॥ आलवाले ॥ खेत इति प्रसिद्धे
क्षेत्रे । क्यार इति भाषा ॥ केदा
रं वारि मधुरं विपाके गुरु दोषघ्न
म् । तदेव बहुमूत्रत्वं विशेषाद्दोषदं
भवेत् ॥ के जले शिरसिवा दारोऽ
स्य । कृदभ्रादित्वात्कुक् ॥ केन ज
लेन दीर्यते वा । दृविदारणे । क
र्मणि घञ् । केदाराख्येतिनिर्द्दा
देशम् ॥
केदारकटुका । स्त्री । कटुकाख्याम् ॥

केन्द्रम्

केदारचर्म्म । न । पशुकाष्टे ॥
केदारेशः । पुं । केदारेश्वरे । काशि-
स्थेशशिवविशेषे ॥
केनती । स्त्री । स्वरदारेषु । रतौ ॥
केनारः । पुं । कृमिनरके । शिरः क
पोलसन्धिषु ॥
केनिपातः । पुं । अरिष्टे । कर्णे । नौ
काधृष्टस्यचालनकाष्ठे । हाणि इति
गौडभाषा । पतवार इति देशभा
षा ॥ केवलं निपातोऽयं । इलदन्ता
दिप्रत्ययचुक् ॥
केनिपातकः । पुं । केनिपाते ॥ शेषादि
तिकप् । संज्ञायामितिकन्वा ॥
केन्दुः । पुं । तिन्दुकवृक्षे ॥
केन्दुकः । पुं । गाव इति गौडभाषा
प्रसिद्धे । गालव इत्यपि । तालविशे
षे ॥ यथा । लघुद्वयं विरामान्तं
तालं केन्दुकसंज्ञकं इति दामोदरः ॥
केन्द्रम् । न । कण्टके । लग्नचतुर्थसप्त
मदशमस्थानेषु ॥ यथा । लग्नाम्बु
यूनकर्माणि केन्द्रमुक्तानि कण्टक
म् । चतुष्टय चाप खेटो वली स
ब्बे विगेषवदिति ॥ स्पष्टग्रहानयना
र्थं गीष्मन्दसंज्ञकाब्दादये ॥ गोच
रे मध्यस्थाने ॥ यथा । एतस्य मध्यं
किल केन्द्र मुक्तं केन्द्र ग्रहोच्चान्तर
मुच्यते ऽन्तः ॥ यतो ऽन्तरे तावति

केयूर

तुङ्गदेशा द्वीचोच्चवृत्तस्य संदैवके
न्द्रमिति ॥ यात्रा योगविशेषे ॥ य-
था ॥ आपोक्लिमगते चन्द्रे केन्द्रस्थे
सुरपूजिते । योगः केन्द्रं इति ख्या
तोयात्रारिष्टार्थं सिद्धिदइति ॥
केन्द्रभवनम् । न । लग्नचतुर्थसप्तसद्
शमभवनेषु ॥
केमद्रुमः । पुं । जन्मकालिके योगविशे
षे ॥ यथा । रविवर्जं दादशगै रन
फा चन्द्रात् द्वितीयगैः सुनफा ।
उभयस्थिते दुरधरा केमद्रुमसंज्ञि
तोतो ऽन्यइति ॥ भूतकं दुःखिनम
धर्मजातं केमद्रुमे विषादितिचफ
लम् ॥
केमुकः । पुं । केउ इतिगौडभाषा
प्रसिद्धे वृक्षविशेषे । मेघुके । दन्त
सारिण्याम् ॥ न । कन्दर्पाकवि० ॥
केमुकंकटुकंपाके तिक्तं वातकफापहं
लघु । दीपनं पाचनं वृष्यं कफपित्त
ज्वरापहम् ॥ कुठकासप्रमेहास्रना
शनंबातलं लघु ॥ इति ॥
केयूरम् । न । प्रगण्डभूषणे । अङ्गदे ।
बालबन्द इतिभाषा ॥ केदारुशिर
सियेति । युग्मग्रहे । खर्जूरिका
दिम्लेच्छदेशोद्भवायित्र्यः । चन्द्र
लादित्यचुक् ॥ पुं । रतिबन्धवि०
॥ यथा । खोऽङ्के चैव सम्पीड्य दो

केरली

र्थो माखिड्य सुन्दरीम्। कारये त् स्थापनं कामी वन्यः केयूरसंज्ञ क इति॥ अपिच। स्त्रीणां जङ्घा न्तरांविष्टो गोढ माखिड्य सुन्दरी म् कामये द्विपुलंकामी वन्यः के यूरसंज्ञक इति॥

केरलः। पुं। मल्लेवीर इति प्रसिद्धे दे शवि०॥ यथा। उग्राः केरलपर्याया इति हेमचन्द्रः॥ सुब्रह्मण्यं समारभ्य यावद्देवो जनार्दनः। तावत् के रलदेशः स्यात् तन्मध्ये सिद्धकेरल॥ रामेश्वरात् व्यङ्कटेशा दुसकेरल मामकः। अनन्तशैल मारभ्य याव त् सा दक्षयंपरे॥ तावत् सर्वंग्रना मातु केरलैः परिकीर्त्तितइति॥ वेद यागानधिकारिश्रुभारिन्छेच्छवि० ग। पुरैते क्षत्रिया आसन् सगरेण पा धर्मानाश्रितैः वेदान्यज्ञंच कृतम्। यतो निः स्वाध्यायवषट्काराः कृता स्तेन महात्मना। शका यवन काम्बोजाः पारदाः पञ्चधा स्मृता॥ कोलिसर्पा माहिषिका दर्वा श्चोलाः सकेरलाः। सर्वे ते क्षत्रिया स्तात धर्मे स्तेषां निराकृतः॥ इतिहरिवंशः॥ समादाय विशेषे॥ प्रश्नग्रन्थवि शेषे॥

केरवी। स्त्री। ज्योतिष्मत्यविशेषे॥

केलिट

हीरायाम्॥

केलकः। पुं। खड्गधारादिनर्त्तके। प्र वके॥

केलासः। पुं। स्फटिके॥

केलिः। पुं। स्त्री। परीहासे। द्वे। क्रीडायाम्॥ केलनम्। किलक्रीडा यीम्। केलृचलनेवा। इन्। स्त्री। पृथिव्याम्॥

केलिकः। पुं। अशोकवृक्षे॥

केलिकला। स्त्री। सरस्वत्यादीनायाम्॥

केलिकालः। पुं। क्रीडासमये॥

केलिकिलः। पुं। कूष्माण्डकसंज्ञकेऽपि वस्यानुचरे॥ नाट्ये नायकवयस्ये। विदूषके। वैहासिके॥

केलिकिला। स्त्री। कामदेवपत्न्याम्। रत्यै॥

केलिकिलावती। स्त्री। सरभार्या याम्॥

केलिकीर्षुः। पुं। उष्ट्रे॥

केलिकुक्षिका। स्त्री। पत्नीभगिन्याम्। श्यालिकायाम्। साली इति भाषा॥

केलिकोपः। पुं। नटे॥

केलिनागरः। पुं। बहुभोगिनि। स भोगवति॥

केलिमुखः। पुं। परीहासे॥

केलिवृक्षः। पुं। केलिवद्वृक्ष इतिगौ।

केन्द्रम्

केदारजम्। न। पद्मकाष्ठे ॥

केदारेशः। पुं। केदारेश्वरे। काम्बि-
स्वेश्वरविशेषे ॥

केनती। स्त्री। स्वरदारेषु। रतौ ॥

केनारः। पुं। कृमिनरके ॥ शिरः क
पोलसन्धिषु ॥

केनिपातः। पुं। करिषे। कर्षे। नौ
कापृष्ठस्थचालनकाष्ठे। हाल्लि इति
गौडभाषा। पतवार इति देशभा
षा॥ केनलें निपातोऽस्य। इखदन्ता
दित्यलुक् ॥

केनिपातकः। पुं। केनिपाते॥ अर्धादि
तिकम्। संज्ञायामितिकन्वा ॥

केन्दुः। पुं। तिन्दुकवृक्षे ॥

केन्दुकः। पुं। गाब इति गौडभाषा
प्रसिद्धे गालव इत्ये॥ तालविशे
षे॥ यथा। लघुद्वयं विरामान्तं
ताले केन्दुकसंज्ञकं इति दामोदरः॥

केन्द्रम्। न। कण्टके। खयचतुर्थसप्त
मदशमस्थानेषु ॥ यथा ॥ खस्तोम्बु
चूनकर्मोणि केन्द्र मुक्तञ्च कण्टक
म्। चतुष्टय स्थाच खेटो। वशी स
र्वे विशेषतइति ॥ स्पष्टग्रहानयना
र्थं भौममन्दसंज्ञकाङ्कये ॥ गोल
स्य मध्यस्थाने ॥ यथा ॥ एतस्य मध्यं
किल केन्द्र मुक्त केन्द्र ग्रहोज्झान्तर
मुच्यते ऽन्तः॥ यतो ऽन्तरे तावति

केयूर

तुङ्गदेशा स्त्रीचोद्यवृत्तस्य संदैवके
न्द्रमिति॥ यात्रा योगविशेषे ॥ य-
था॥ आमोक्षिमगते चन्द्रे केन्द्रस्थे
सुरपूजिते। योगः केन्द्र इति ख्या
तोयात्युरिष्टार्थं सिद्धिदइति ॥

केन्द्रभवनम्। न। खस्मचतुर्थसप्तमद
शमसंभवनेषु ॥

केमद्रुमः। पुं। जन्मकालिके योगविशे
षे॥ यथा। रविवर्जं दृष्टयोगे रन
फा चन्द्रात् द्वितीयगैः सुनफा।
उभयस्थिते दुरधरा केमद्रुमसंज्ञि
तोतो ऽन्यइति ॥ भृतकं दुःखिनम
धमंजातं केमद्रुमे विद्यादितिचफ
खम्॥

केमुकः। पुं। केउ इतिगौडभाषा
प्रसिद्धे वृक्षविशेषे। मेषुके। दल
सारिण्याम्॥ न। कन्दर्पाकवि०॥
केमुकंकटुकंपाके तिक्तं ग्राहि हिमं
खघु। दीपनं पाचनं हृद्यं कफपित्त
ज्वरापहम्॥ कुठकासप्रमेहास्त्रना
शनंवातलं खघु॥ इति॥

केयूरम्। न। प्रगण्डभूषणे। अङ्गदे।
बाजूबन्द इतिभाषा॥ केदारकुशिर
सियातिः युमिश्रये। खर्जापिञ्जा
दिभ्यकरोलचापित्थूर०। इखद
न्तादित्यलुक्॥ पुं। रतिबन्धवि०
॥ यथा। खीऊर्द्धे चैव सम्मीख्य दो

केरली

थो माखिड्ग्य सुन्दरीम् । कारये त् स्थापनं कामी वन्धः केयूरसंज्ञ क इति ॥ अपिच । स्त्रीणां जङ्घा न्तराविष्टो गोढ माखिड्ग्य सुन्दरी म् । कामये दिपुलंकामी वन्धः के यूरसंज्ञक इति ॥

केरलः । पुं । मल्लेवीर इति प्रसिद्धे देशवि० ॥ यथा । उग्राः केरलपर्याया इति हेमचन्द्रः ॥ सुब्रह्मण्यं समारभ्य यावद्वेणी जनार्दनः । तावत् केरलदेशः स्यात् तन्मध्ये सिद्धकेरल ॥ रामेश्वरात् व्यङ्कटेशाद्वुसकेरल मामकाः । अनन्तशैल मारभ्य यावत् सह्य दक्षयंपरे ॥ तावत् सर्वेजना मारु केरलः परिकीर्त्तितइति ॥ वेद यागानधिकारिप्रभृतिभिरिच्छवि० । पुरैते चविया आसन् सगरेणैव पा धर्मोनाशितः वेदान्यत्वंच कृतम् । यवो । निः स्वाध्यायवषट्काराः कृता तेन महात्मना । शका यवन काम्बोजाः पारदाः पह्लवा खशा ॥ कोलिसर्पा माहिषिका दर्वा चोलाः सकेरलाः । सर्वे ते चविया ज्ञात धर्म स्तेषां निराकृतः ॥ इतिहरिवंशः ॥ सम्प्रदाय विशेषे ॥ ग्रन्थभेदे ॥

केरली । स्त्री । ज्योतिष्मत्यविशेषे ॥

कोलिट

हीरायाम् ॥

केलकः । पुं । खड्गधारादिनर्त्तके । प्रवके ॥

केलासः । पुं । स्फटिके ॥

केलिः । पुं । स्त्री । परीहासे । द्वेषे । क्रीडायाम् ॥ केलनम् । किलक्रीडायाम् । केलृचलनेवा । इन् ॥ स्त्री । पृथिव्याम् ॥

कोलिकः । पुं । अशोकवृक्षे ॥

केलिकला । स्त्री । सरस्वत्यावीणायाम् ॥

केलिकालः । पुं । क्रीडासमये ॥

केलिकिंङ्करः । पुं । कूपीयडकसंज्ञकेऽधिवस्यानुचरे ॥ नाट्ये नायकवयस्ये । विदूषके । वैहासिके ॥

केलिकिला । स्त्री । कामदेवपत्न्याम् । रतौ ॥

केलिकिलावती । स्त्री । भारभार्यायाम् ॥

केलिकीर्यः । पुं । उष्ट्रे ॥

केलिकुञ्चिका । स्त्री । पत्नीमणिन्याम् । श्यालिकायाम् । साली इति भाषा ॥

केलिकोपः । पुं । नटे ॥

केलिनागरः । पुं । बहुभोगिनि । सभोगवति ॥

केलिमुखः । पुं । परीहासे ॥

केलिवृक्षः । पुं । केलिकदम्ब इतिगौ

केवला
डभाषाप्रसिद्धे कदम्बविशेषे ॥
केलिशुधिः । स्त्री । धरित्र्याम् ॥
केलिसचिवः । पुं । क्रीडाविषयकम
न्त्रिणि । नर्मदे । नर्मसचिवे ॥
केवर्त्तः । पुं । कैवर्त्तजातौ ॥ इतिविरू० ॥
केवलः । पुं । कुष्ठने ॥ न । ज्ञानभेदे ॥
शुद्धे ॥ निर्णीते ॥ त्रि । अद्वितीये ।
एकस्मिन् । असहाये ॥ कृत्स्ने ॥ के
वते । केवसेवने । इषा । कलः ॥ कं
शिरसि वलयति वा । वलप्राणने ।
घञर्थे क ॥
केवलज्ञानी । पुं । भूतार्थदिग्विशेषे ॥
केवलद्रव्यम् । न । मरिचे ॥
केवलव्यतिरेकि । न । व्यतिरेकमात्र
व्याप्तिकानुमाने ॥ यथा । पृथिवी
तरेभ्योभिद्यते गन्धवत्त्वात् । यदि
तरेभ्यो न भिद्यते न तद्गन्धवत् य
था जलम् नचेयं तथा तस्मात् त
थेति । अत्र यद्गन्धवत् तदितरभि
न्नमित्यन्वयदृष्टान्तो नास्ति पृथि
व्यामेवास्य पक्षत्वात् ॥
केवला । स्त्री । एकस्याम् । कृत्स्नायां
म् ॥ केवलात् टाप् ॥
केवलान्वयि । न । अन्वयमात्रव्याप्तिका
नुमाने ॥ यथा । घटोऽभिधेयः प्र
मेयत्वात् पटवत् इत्यत्र प्रमेयत्वा
भिधेयत्वयोर्व्यतिरेकव्याप्तिर्नास्ति

केशका
सर्वस्याप्यभिधेयत्वात् प्रमेयत्वाच्च ॥
केवली । पुं । जैनविशेषे ॥
केवली । स्त्री । ज्ञानविशेषे ॥ ग्रन्थवि
शेषे ॥ केवलमा मकेति संज्ञायाङ्ग
षोङीप् ॥
केविका । स्त्री । केवेर इतिकोकनभा
षाप्रसिद्धे पुष्पविशेषे । भृङ्गारौ । न
डागन्यायाम् ॥
केशः । पुं । वरुणे ॥ क्लीवेरे ॥ दैत्यवि०
॥ विष्णौ ॥ चिकुरे । कुन्तले । वा
लें ॥ मज्जजातोपधातुविशेषोयम् ।
केशसमूहार्थवाचकाः शब्दाः यथा ।
वाला: स्यु स्तत्परा: पाशोरचना
भार उच्चयः । हस्तः यथा ऋक्षाम्ब
केशभूयस्त्ववाचका इतिहेमचन्द्रः ॥
क्लिश्यते । क्लिश वन्धे क्लिशु उपता
पे वा । क्लिश्नातिवा । क्लिशूविबाधा
याम् । क्लिशेरन्लोलोपश्च ॥ के
शेते । शीङ० ॥ अन्येभ्योपीतिडः ।
वलदन्तादित्वलुक्वा ॥ अस्यशिर
सः ईशोवा ॥
केशकः । पुं । केशेषु प्रसिते ॥ स्वाङ्गेभ्यः
प्रसिते इतिकन् ॥
केशकषायः । पुं । केशपाशे । केशस
मूहे ॥
केशकारः । पुं । कारिया कुशियारइति
भाषाप्रसिद्धे वृक्षभेदे ॥ केशकारो

केशरः

गुरुः शीतोरक्तपित्तक्षयापहः ॥
केशकीटः पुं स्त्रियां कीटायाम् ॥
केशगर्भः । पुं । कवव्यामे ॥
केशगर्भकः । पुं ।
केशग्रहः । न । इन्द्रलुप्तके ॥
केशटः । पुं । हरौ । विष्णौ ॥ अजे ।
छागे ॥ शिलटेऽप्यस्त्रियाम् ॥ शोधे
नाख्ये मदनस्य बाणे । शोणकवृक्षे ॥
केशधृत् । पुं । भूतकेशे ॥
केशनाम । न । बाले । ह्रीबेरे । वाला
इतिभाषा ॥
केशपक्षः । पुं । कचौघे । केशकलापे ॥
केशपर्णी । स्त्री । अश्वमारके ॥
केशपाशः । पुं । केशयष्टौ । यत्र केशः
स्वच्छस्य कलापार्थाः कचात् परे ॥
केशपाशी । स्त्री । शिखायाम् । शिरोभूषणस्य चूडायाम् ॥ केशप्रसाधनी । स्त्री । गौरादिः ॥
केशभूः । पुं । शिरसि ॥
केशमयनी । स्त्री । यमीवृक्षे ॥
केशमार्जकम् । न । कङ्कतिकायाम् ।
कङ्गु कङ्घो इतिचभाषा ॥
केशमार्जनम् । न । कङ्कतिकायाम् ॥
केशमुष्टिः । पुं । विषमुष्टिवृक्षे ॥ महा
निम्बे ॥
केसरः । पुं । सिंहस्कन्धजटायाम् ॥ तु
रङ्गस्कन्धकेशेषु ॥ पुन्नागवृक्षे ॥ व

केशवः

कुलवृक्षे ॥ नागकेशरवृक्षे ॥ भृङ्गरा
जगन्धे ॥ न । हिङ्गुनि ॥ पुं । न । कि
ञ्जल्के ॥ के जले शीर्यते । शृहिंसा
यम् । क्विप् दीर्घः । इलदन्तात्त्यस्य
लुक् ॥
केशरञ्जनः । पुं । भृङ्गराजवृक्षे ॥
केशराजः । पुं । नागकेसरे । भृङ्गराजे
भृंगरा इतिभाषा ॥
केशरोलः । पुं । मातुलुङ्गवृक्षे ॥
केशरी । पुं । सिंहे ॥ तुरगे ॥ केश
रिस्कन्धवालाः सन्त्यस्य । इनिः ॥
बीजपूरकवृक्षे ॥ पुन्नागे ॥ नाग
केसरे ॥
केशरुहा । स्त्री । भद्रदन्तिकावृक्षे ॥
केशरूपा । स्त्री । वन्दाकवृक्षे ॥
केशवः । पुं । पुन्नागवृक्षे ॥ वासुदेवे ।
विष्णौ ॥ केशो ब्रह्मरुद्रौ सर्वेश्वरा
वपि अनुकम्पयतया वाप्नोति गच्छ
तीति व्युत्पत्तिमाश्रित्य निरतिश
यैश्वर्यप्रतिपादनात् सर्वेश्वरे ॥ कथ
मुच्यते केशो युधमोर्वा स्त्रीऽस्त्री के
शाद इतिवः । केशोवातिवा । वा
गतौ । आतश्चेतिकः । शस्त्रोः
पितामहो ब्रह्मपिता शंकाधीश्व
रश्चेति पत्नीकेशः ॥ यद्वा । केशिनं
दैत्यविशेषं हाति गच्छति मारणा
र्थं यातेर्गमनार्थादन्येभ्योऽपि दृश्यते

केशवः

इति डः। पृषोदरादित्वात् इकारस्याकारः। यस्मात् त्वयैष दुष्टात्मा केतः केशी जनार्दन। तस्मात् केशवनामवान् त्वं लोके ख्यातो भविष्यसीति हरिवंशोक्तेः॥ यद्वा। केशं संचिन्वन्ति सूर्यादिसंक्रान्ता अंशवः तत्तत्तया केशवः। अंशवो ये प्रकाशन्ते मम ते केशसंज्ञिताः। सर्वज्ञाः केशवंतस्मात् प्राहुर्मां द्विजसत्तमाः॥ इति भारतम्॥ ब्रह्मविष्णुशिवाख्याः मूर्तयः केशसंज्ञिताः तत्तत्तया वा। तयः केशिन् इति श्रुतेः॥ क्व, अस्व ईशश्च केशाः ब्रह्मविष्णुरुद्राः ते अस्य वश्यतया सन्तीति केशवः। केशशब्दात् मत्वर्थीय, केशादोन्यतरस्यामिति वप्रत्ययः॥ यद्वा। केशान् ब्रह्मविष्णुरुद्रान् वष्टि इच्छति सर्गादिकार्यायेति। वश कान्तौ। अन्येभ्योपिदृश्यतइतिडप्रत्ययः॥ यद्वा। केशान् ब्रह्मविष्णुरुद्रान् वाति गच्छति नियामकत्वेनेति केशवः। वागतिगन्धनयोः। आतोऽनुपसर्गइतिकः॥ को ब्रह्मेति समाख्यातः ईशोहं सर्वदेहिनाम्। आवां तवांशसम्भूतौ तस्मात् केशवनामयान्॥ इति हरिवंशे॥ वि। प्रशस्तकेशवति॥ प्रशस्ताः केशाः सन्त्यस्य। प्रशंसा

केशान्तः

यां केशादोन्यतरस्यामितिवः॥ केशवान्। वि। केशिके। केशा.सन्त्यस्य। मतुप्॥ केशवर्द्धिनी। स्त्री। सप्तदेवीवसाधारा॥ केशवायुधः। पुं। अश्वत्थवृक्षे॥ न। विष्णोः। रक्षे॥ केशवालयः। पुं। अश्वत्थवृक्षे॥ विष्णोः मन्दिरे॥ केशवस्य आलयः॥ केशवावासः। पुं। अश्वत्थवृक्षे॥ केशवेशः। पुं। कवर्ध्याम्॥ केशानां वेश, मार्जनाबन्धनादिनाकृतशोभा विशेषः॥ केशवन्तृफला। स्त्री। अमीवृक्षे॥ केशवन्ती। स्त्री। सतुफलायाम्। अमीवृक्षे॥ केशवल्लः। पुं। केशसमूहे॥ केशाकेशि। अ। केशेषु केशेषु गृहीत्वा प्रवृत्ते युद्धे॥ तत्रतेनेदमिति सप्तम्यां इति कर्मण्यधिकारे सप्तमीहिः। अन्येषामपिदृश्यते, इति पूर्वपदात्संहितायां दीर्घः। दृक्कर्मण्यतिहारे इति दृक्समासान्तः। तिष्ठद्गुप्रभृतिषु दृक्प्रत्ययस्य पाठाद्ध्रस्वीभावश्च मध्ययस्य च॥

केशान्त। पुं। गृह्योक्ते संस्कारविशेषे॥ ब्राह्मणादीनां षोडशादिवर्षेषु कर्त्तव्ये गोदानाख्येव्रतविशेषे॥ यथाच

केश्यम्

मनुः । केशान्तः षोडशे वर्षे ब्राह्मणस्य विधीयते । राजन्यवैश्ययोर्द्वयोरिति वैद्यकधर्म्मप्रदीपः ॥

केशार्द्धा । स्त्री । सङ्देव्याम् ॥

केशार्द्री । स्त्री । मञ्जरीलतायाम् ॥

केशिकः । त्रि । प्रशस्तकेशविशिष्टे । केशिनि ॥ प्रशस्ताः केशाः सन्त्यस्य । केशाद्दोषतरसामितिपत्वे ठन् ।

केशिका । स्त्री । लतायाम् ॥

केशी । पुं । विष्णौ ॥ दैत्यविशेषे ॥ सिंहे ॥ त्रि । केशिके ॥ ठनोऽभावपक्षे इनिः ॥

केशिनिसूदनः । पुं । श्रीकृष्णे ॥

केशिनी । स्त्री । सीताद्वयी इति ख्यातायां वीरपुष्यां ॥ रामणकमाता ॥ जटामांस्यां ॥ प्रशस्तकेशवत्यां ॥ इनन्तात् ङीप् ॥

केशिसूदनः । पुं । श्रीकृष्णे ॥ केशिनामानमसुरं सूदितवान् सूद यति वा सूदधरणे । नंन्युः ॥

केशिहा । पुं । केशवे । श्रीकृष्णे ॥ केशिनामानमसुरं हन्ति हतवान्वा । हन° क्विप् ॥

केशी । स्त्री । नीलयाम् ॥ भूतकेश्याम् ॥ अजलोमा घृते ॥

केशोच्चयः । पुं । केशपाशे ॥

केश्यम् । न । कुष्ठागुरुणि ॥ भूतरासे ॥

कैकेयी

केसरः । पुं । सिंहस्कन्धवटायाम् । सिंहच्छटायाम् ॥ तुरगस्कन्धकेशेषु ॥ पुन्नागतरौ ॥ बकुलवृक्षे ॥ नागकेसरद्रुमे ॥ न । शिखनि ॥ नागकेसरपुष्पे ॥ कासीसे ॥ स्वर्णे ॥ पुं । न । किञ्जल्के ॥ रसस्तु शिखनि द्वारिण्याम् ॥ केवले सरति । सृगतौ । पचाद्यच् । इवदन्तादिष्वपि क् । प्रशस्ताः केसराः अस्य । अर्शआद्यच् ॥

केसरवरम् । न । कुङ्कुमे ॥

केसराम्बुः । पुं । बीजपूरे ॥

केसरिका । स्त्री । सङ्देवीलतायाम् ॥

केसरी । पुं । तुरगे ॥ सिंहे ॥ पुन्नागे ॥ नागकेसरे ॥ रक्तभिन्नौ ॥ बीजपूरे ॥ वानरार्य्यां यूथपतौ विशेषे । हनूमतः पितरि ॥ केसराः स्कन्धधाराः सन्त्यस्य । अतइनिः ॥

केसरिसुतः । पुं । हनूमति ॥ इतिहे मचन्द्रः ॥

कैकयः । पुं । देशविशेषे । अश्वपुत्रास्यामरूपा न्मध्यमागे तु कैकयः ॥

कैकेयः । पुं । अश्वपतिन्तमे ॥ कैकयस्यापत्यम् । जनपदशब्दात् क्षत्रियादञ् । कैकयमित्रयुप्रकयानां यादेरिय इति इयादेशः । वृद्धिः ॥

कैकेयी । स्त्री । भरतमातरि ॥ केक

कैटर्य्यः

। यस्यापत्यं स्त्री । जनपदशब्दादिभ्यो [illegible] प्रत्ययः । ङीप्रत्ययश्च । तद्राजस्य स्त्रीकारस्य लुक्तत्र ॥ निमाद्यभर्गादि [illegible] यौधेयादिभ्यइति प्रतिषेधात् पूर्वं । तृत्यादेरिञादेशः । अणन्तत्वान् [illegible]

कैङ्कर्य्यम् । न । किङ्करत्वे । दासत्वे ॥

कैटजः । पुं । कुटजवृक्षे ।

कैटभः । पुं । दैत्यविशेषे ।

कैटभजित् । पुं । विष्णौ ॥ कैटभमसुरविशेषं मजैषीत् ॥ जिजये । सर्त्ति । सूदिपद्रुहदुहयुजविदभिदच्छिदजिनीराजामुपसर्गेक्विप् । इति क्विप् ॥

कैटभेज्यः । पुं । विष्णौ ।

कैटभी । स्त्री । दुर्गायाम् ॥

कैटभारिः । पुं । विष्णौ ॥

कैटभी । स्त्री । काव्यायन्याम् ॥

कैटभेश्वरी । स्त्री । दुर्गायाम् ॥ तथा च देवीपुराणम् । कैटभन्तु वधं कृत्वारक्षोतो तत पुरीयथा । तेन सा गीयते देवी पुराणे कैटभेश्वरीति ॥

कैटर्य्यः । पुं । कट्फले । पूतिकरञ्जे । त्यायफल इतिभाषा ॥ मदनवृक्षे ॥

कैटर्यम् । किटपासे । यप् । कैटरीति ख्यातितिलवात् । रा० । आ

कैरवः

तद्वतिकः । चतुरश्रम् ॥ त्रिभुजे ॥ महानिम्बे ॥

कैटर्य्यः । पुं । कट्फले ॥ कटभीवृक्षे ॥

कैतकम् । न । केतकीपुष्पे ॥ केवडाभिधेगन्धजले ॥ वि । केतकी सम्बन्धिनि ।

कैतवम् । न । क्रपटे ॥ द्यूते ॥ वैदूर्यमणौ ॥ धत्तूरफलपुष्पादौ ॥ खलतायाम् ॥ कितवस्यकर्म्म । यु० अण् ॥

कैदारः । पुं । शालिधान्ये । न । क्षेत्रसमूहे ॥ केदारजले ॥ केदारं क्षेत्र मुद्दिष्टं कैदारं तज्जलं स्मृतम् । कैदारं वार्य्यभिष्यन्दि मधुरं गुरुदोषकृत् ॥ केदारस्येदम् । अण् ॥

कैदारकम् । न । केदारसमूहे । चये ॥ केदाराणांसमूहः । केदाराद्यच्चेति वुञ् ॥

कैदारिकम् । न । कैदारके । केदाराणांसमूहः । ठञ्कर्षचिनस्यचेति केदाराद्वा ॥

कैदार्यम् । न । चये । कैदारिके ॥ केदाराणां समूहः । केदाराद्यच्चेति यप् ॥

कैरवः । पुं । स्थितवे । रिपौ ॥ न । कुमुदे । शुक्लोत्पले ॥ कैरवले रीति । रगब्दे । पचाद्यच् । तत्पुरुषेतीत्यलुक् । कैरवस्य हंसस्येदंप्रिय

कैलासः
म् । तस्येदमित्यण् ॥
कैरविणी । स्त्री । कुमुदिन्याम् । कुमुदयुक्तपुष्करिण्यादौ ॥ कैरवाणिस न्त्यस्याम् । पु० इनिः ॥
कैरविणीखण्डम् । न । कैरविणीनां समूहे ॥ कमलादिभ्यः खण्ड. ॥
कैरविणीफलम् । न । वेरा इतिप्रसिद्धे कुमुदबीजे ॥
कैरवी । पुं । चन्द्रे ॥
कैरवी । स्त्री । चन्द्रिकायाम् ॥ मेथिकायाम् ॥
कैराटः । पुं । } स्थावरविषविशेषे ॥
कैराटकः । पुं । }
कैवतः । पुं । वत्सवेत्पुरुषे । दीर्घहे ॥ न । अम्बरचन्दने ॥ पुं । नग भूनिम्बे ॥
कैरालम् । न । विडङ्गे ॥
कैराली । स्त्री । विडङ्गायाम् ॥
कैलास' । पुं । शिवकुबेरयोः स्थाने । कुबेराचले । गणपर्वते ॥ केवलेशो लसन नस्य केलासः स्फटिर्व । घञदन्तादित्यलुक् । तस्यायम् । कैलास । अण् ॥ यद्वा । केलीनां समूह. कैलम् । तस्यसमूहइत्यण् । तेनास्यतेऽत्र । आसउपवेशने । घञ्वेतिघञ् ॥ आद्याचक्रादूर्दे ॥ कैलासाख्यंतदूर्वेतु वोधिनीन्तुतदूर्दैत

कैवल्ये
इत्युक्तौ ॥
कैलासनिकेतनः । पुं । शिवे । पार्वतीपतौ ॥
कैलासौकाः । पुं । कुबेरे ॥ शिवे ॥
कैवर्तः । पुं । धीवर इतिप्रसिद्धे वैश्यागर्भे चर्चियोरसजाते । धीवरे । दासे । जालिके ॥ वो नलेवर्त्तन्ते । वृत्तु० । पचाद्यच् । कैवर्तानां मत्स्यानामयं घातकः । तस्येदमित्यण् ॥
कैवर्तमुस्तम् । न । } कैवर्तीमुस्तके
कैवर्तमुस्तकम् । न । } । कुटजवटे ॥
कैवर्तिका । स्त्री । मालवप्रसिद्धेजनपदविशेषे । वस्त्ररञ्जायाम् । सुरङ्गायाम् । सुभगायाम् ॥
गल्लानिकः । पुं । चिंचिडिमाच्छे इति गौडप्रसिद्धे मत्स्ये । गङ्गाटेये ॥ गल्लानिकः गल्लामिकः इतिपाठान्तरम् ॥ गल्लिः । पुं । दुष्टवृषे । अल्पोप्यधुर्वहो दक्षो गल्लिरित्युच्यते । गल्लियावैल इति भाषा ॥ गुणानामेव दौरात्म्या दुरिधुर्यो नियुज्यते । असञ्जातकि-णस्कन्धः सुखंस्वपिति गौर्गल्लिः ॥ गलितः । चि । च्युते । पतिते । स्रस्ते । हस्तादितोभ्रष्टे ॥ गल्यतेस्म । गल + क्तः ॥ गत्यर्थाकर्मकेतिक र्त्तरि वा क्तः ॥ रिक्ते ॥ गलेगण्डः । पुं । पक्षिविशेषे । सर्कटे । अस्थिगिला हाडगिला इतिचभाषा ॥ गलेरज्जुनी । स्त्री । छाग्याम् ॥ गलेहेयः । पुं । निर्गारे ॥ गलेहेयः समीपभागः ॥ गल्या । स्त्री । गलसमूहे ॥ गलानांस-मूहः । प्राग्वा यः । गलेादृष्टकाद्यः ॥ गल्लः । पुं । गण्डे । गाल इति भाषा ॥ गल्लकः । पुं । चषके । मद्यपानपात्रे ॥ गल्लर्कः । पुं । चषके ॥ इन्द्रनीलमणौ ॥ गवयः । पुं । रोझ इति भाषाप्रसिद्धे गवकम्बलङ्गीने । गोसदृशगवये । गवाजुके । वल्लभद्रे । महागन्ध ॥ अस्य मांसपाकविधिर्यथा । तैले स

गवाच्यः

म्याचिते तसे सिन्धुसैन्धवसंयुते । मांसं गवयसम्भूतं सुस्निग्धं भूरिवीर्यदं ॥ गवयो मधुरो वृष्यः स्निग्धो ष्णःकफपित्तलः। विदाही गुरुविष्टम्भी विपाके विरसः सदेत्यस्य मांसगुणाः ॥ वैवस्वतपुत्रेवानरविशेषे । यथा । रामायणे । पुत्रावैवस्वतस्यास्य पञ्चकाञ्चनकोपमा । गयो गवाक्षो गवयः शरभो गन्धमादनः इति ॥ गवते । गुङ्शब्दे । घा० अयः ॥ यद्वा । गवनम् । ऋदोरप् । गवं गवेनवा याति । या० । मू० क. ॥

गवयी । स्त्री । गवयस्येवायाम् । वनधेनौ । भिल्लगव्याम् ॥ गोपधप्रतिषेधे गवयचयमृकयमनुष्यमत्स्यानां प्रतिषेधइति जातिलक्षणोङीप् ॥

गवराजः । महोक्षे । वृषे ॥ इति शब्दचन्द्रिका ॥

गवलः । पुं । वनमहिषे ॥ न । महिषशृङ्गे ॥ अलति । अलभूषणादौ । अच् । गवामलम् ॥ यद्वा । गवनम् । गुङ्० । ऋदोरप् । गवंलाति । क ॥

गवाक्षः । पुं । जालीझरोखा इतिच भाषाप्रसिद्धे वातायने । वधूदृग्गवने । जालके ॥ वैवस्वतपुत्रे कपिविशेषे ॥ गवांकिरणा नामचीव । अक्षिशब्दो घरन्ध्रवाची । अक्षोदर्शनादित्यच्

गवाक्ष

॥ गोबीजलानि किरणानि वा । अक्षन्ति व्याप्नुवन्ति एतमनेन वा । अक्षूव्याप्तौ । अकर्त्तर्यर्थेघञ् ॥

गवाची । स्त्री । इन्द्रवारुण्याम् ॥ गोडुम्बायाम् । गोमुक् इति गौडभाषा ॥ झाखोटे । शेउडा इति भाषा ॥ अपराजितायाम् ॥ गां भूमिमञ्चति । अचु० । कर्मण्यण् । ङीप् ॥

गवांची । स्त्री । गाँकालमाच् इति गौडभाषाप्रसिद्धे मत्स्ये ॥

गवादनम् । न । घासे ॥ गोभिरद्यते । अद० । ल्युट् ॥

गवादनी । स्त्री । इन्द्रवारुण्याम् ॥ गवादनीद्वयं तिक्तं पाके कटुरसं लघु । वीर्योष्णं कामलापित्तकफप्लीहोदरापहम् ॥ श्वासकासापहं कुष्ठगुल्मग्रन्थिव्रणप्रणुत् । प्रमेहमूढगर्भामगण्डमेयविषापहम् ॥ गवांघासादना अर्थे । नांदुखडावनीइतिच भाषा ॥ नीलापराजितायाम् ॥ गौ० ङीष् ॥

गवाक्षुकः । पुं । गवये । गोसदृशे जन्तुभेदे ॥

गवाशनः । पुं । गोभक्षके । मोची इति भाषा ॥ यथा । माताप्येका पिताप्येको ममतस्य च पचिका । अहं मुनिभि रानीतः सघनीतो गवाशनैरित्युञ्छट. ॥

गवेडुः

गवापिका। स्त्री। लाक्षायाम्। जतुनि॥ गविनी। स्त्री। गवांसमूहे॥ खत्वादिभ्यइनिर्वक्तव्यः॥ गविष्ठः॥ त्रि। भूमिस्थे॥ स्वर्गस्थे॥ गविष्ठिरः। त्रि। गविस्थिरे॥ इलदन्तादित्थलुक्। गवियुधिभ्यांस्थिरः इतिमत्वम्॥ गवीश्वरः॥ पुं। गवांस्वामिनि। गोमति। गोमिनि॥ गवामीश्वरः॥ गवेङ्गितम्। न। शुभाशुभाय गवामाकारे॥ यथा। गावो दीनाः पार्थिवस्याऽशिवाय पादैर्भूमिं कुट्टयन्त्यश्रुवरोगान्। मृत्युं कुर्वन्त्यस्तुपूर्णाय लाक्ष्यः पश्यु भीता संस्करानाकुवन्त्यः॥ अकारणं क्रोशति चेदनर्घो भयाय राज्ञो वृषभः शिवाय। भृशं निरुद्धा यदि भक्षिकाभि स्तदाशुदृष्टिंसरमात्मजै र्वा॥ आगच्छन्त्यो वेश्म चम्पारवेण संत्रेवन्त्यो गोष्ठदघ्नौ गवां गाः। आर्द्रोद्ग्यो वा हृष्टरोमण्य प्रहृष्टा धन्या गाव स्यु र्ग्रहिण्योपिचैवम्॥ इतिवाराहामेघोनानवतिः॥

गवेडुः। स्त्री। आरण्यगोधूमाख्ये मुन्यन्ने। गड्गड् इतिगौडभाषा॥ गवे गवार्थंदीयते। दीङ्रक्षणे। सगव्यादित्वात् कु। नैरुक्तोदकार

गव्यम्

स्वडः। तत्पुरुषेकृतीत्यलुक्॥ गवेधुः। स्त्री। गवेडौ॥ गवेधुः कटुका स्वादी कार्श्यकृत् कफनाशिनी॥ गवेधुकम्। न। गैरिके॥ इतिराज निर्घण्टः॥ गवेधुका। स्त्री। तृणधान्यविशेषे। गड्गड्इति देधानइतिचगौडभाषा। गवेडौ॥ नागबलायाम्॥ गविभूमौ एधते। एध०। बाहुलकादुः। संज्ञायांकन्॥ गवेरुकम्। न। गैरिके॥ गवेश्रका। स्त्री। गोरक्षचाउलिया इतिगौडप्रसिद्धे वृक्षविशेषे॥ गवेषणा। स्त्री। अन्वेषणायाम्। पर्यालोचनायाम्। मार्गणे॥ धर्मान्वेषणे॥ गवेषमार्गणे। चु०। ल्युट्॥ गवेषितम्। त्रि। अन्वेषिते। मार्गिते॥ गवेष्यतेस्म। गवेष०। क्तः॥

गव्यम्। न। ज्यायाम्॥ रागद्रव्ये॥ त्रि। गोदुग्धादौ। गोसम्बन्धिनि सर्वस्मिन्॥ गव्य त्रिषु गवां सर्वम्। सर्वम् भवविकारावयवादि गवां गव्यम्॥ गविभवम् गौर्देवतास्य वा। गोरजादिप्रसङ्गे यत्॥ गोचिते॥ गवेक्षितम्। उगवादिभ्यो यत्॥ गोर्निमित्तं संयोग उत्पातो वा। गोद्यूनो ऽसंख्यापरिमाणाश्वादेर्यत

गह्वरः

॥ गोरिदम् । गोपयसोर्यत् । वान्तो यि प्रत्ययेऽ॥

गव्या । स्त्री । गोवायाम् । गोदन्दे ॥ गवांसमूहः । खञ्गोरथात् इतियः ॥ गव्यूतौ ॥ गोरोचनायाम् ॥

गव्यूतम् । न । क्रोशे ॥ गव्यूतौ ॥

गव्यूतिः । स्त्री । क्रोशयुगे । द्विसहस्र धनुषि । गोरुते ॥ धन्वन्तरसहस्रन्तु क्रोशः क्रोशद्वयं पुनः । गव्यूतं स्यात् गव्यूति र्गोरुतं गोमतञ्च तत् ॥ गोर्यूतौ छन्दस्युपसंख्यानम् । अध्वपरिमाणेचेत्यवादेशः ॥

गहनम् । न । घना इति भाषा प्रसिद्धे कानने । वने ॥ गह्वरे ॥ दुःखे ॥ वि । कलिले । दुर्गमे । दुष्प्रवेशे ॥ पुं । परमात्मनि ॥ दुष्प्रवेशत्वात् अवख्याव्ययभावाभावसाचिव्यात् वा गहनः परमात्मा । अग्रस्वरूपं सामर्थ्यं चेष्टितं वाचातुंनशक्यते ऽतो गहनः ॥ गाहते गाहृविलोडने । बहुलमन्यत्रापीति युच् । ग्रहेरादिदित्वात् ह्रस्वः । कृच्छ्रगहनयोरिति निपातनात् ह्रस्वः ॥

गहना । स्त्री । अलङ्कारे ॥ इति देवी पुराणम् ॥

गह्वरः । पुं । निकुञ्जे ॥ न । गुहायाम् ॥ दम्भे ॥ वने ॥ विषमस्थाने । अनेका ऽनर्थसङ्कटे ॥ गाह्यते । गाहू° । छित्वर छत्वरेतिसाधुः ॥

गह्वरी । स्त्री । गुहायाम् ॥

गा । स्त्री । गायायाम् ॥

गाङ्ग । पुं । भीष्मपितामहे ॥ कार्त्तिकेये । गुहे ॥ गङ्गाया अपत्यम् । शिवादिभ्योऽण् ॥ त्रि । गङ्गासम्भूते ॥ न । गङ्गाजले ॥ धाराजले ॥ यदा स्वादाश्विने मासिसूर्यः स्वाति विभास्वरेः । तदा स्यु जलदैर्मुक्तं गाङ्गमुक्तं मनीषिभिः ॥ आकाशगङ्गासम्बन्धि जलं मादाय दिग्गजाः । मेघैरुत्क्षिप्ता वृष्टिं कुर्वन्तीतिवचः सताम् ॥ गाङ्गं माश्वयुजे मासि प्रायेण वर्षति वारिदः । सर्वथा तज्जलं देयं तथैवचरकेवचः ॥ स्यादिते हेमजेपात्रे राजते मृन्मये ऽपिवा । शाल्यन्नं येन संसिक्तं भवेद्दक्षोद वर्णवत् । तद् गाङ्गं सर्वदोषघ्नं चोक्तं सामुद्र मन्यथा ॥ सामुद्रं चाश्विने मासि गुणै र्गाङ्गवदादिशेत् । शरेऽगस्त्य दिव्यर्षेरुदयात् सकलं जलम् । निर्मलं निर्विषं स्वादु गुरुपथ्यं सदोषघ्नम् ॥ यत आह । मूत्कारविषवातेन नागानां शोणचारिणाम् । यथासु सविष तोयं दिव्य मध्याश्विनं विनेति ॥

गाढम्

गाङ्गट. । पुं । गाङ्गटक: । पुं । गाङ्गटेय: । पुं । चिङ्गडिमाच् इति गौडभाषाप्रसिद्धे-मत्स्ये ॥ इतिशब्दर त्नावली ॥

गाङ्गायनि: । पुं । भीष्मे । गाङ्गनवे ॥ गुहे ॥ गङ्गाया अपत्यम् । तिकादि भ्य: फिञ् ॥

गाङ्गेय: । पुं । भीष्मे ॥ स्कन्दे ॥ इङ्गु दीभेदे ॥ भद्रमुस्तायाम् ॥ न । क शेरुणि ॥ मुक्ते ॥ स्वर्णे ॥ यं गर्भं सु षुवे गङ्गा पावकादीप्ततेजसम् । तदुक्तं पर्वते न्यस्तं हिरण्यंसमप्रभ त ॥ गङ्गाया अपत्यम् । शुभ्रादि भ्य श्चेति ढक् ॥

गाङ्गेरुकी । स्त्री । गौरश्वेतशङ्खलायाम् । नागबलायाम् ॥ गाङ्गंजलमीर यति । ईरगतौ । चेपणेच । सगव्वाद यश्चेति कु । स्वार्थेकन् । गौरादि ङीष् ॥

गाङ्गेष्टी । स्त्री । कटभर्कराखतायाम् । न टा इतिगौडभाषाइति धारावली ॥

गाजरम् । न । मञ्जने । नारङ्गवर्णके ॥ गाजरं मधुरं तीक्ष्णं तिक्तोष्णं दीपनं लघु । सङ्ग्राहि रक्तपित्तार्शो मरुगोकफवातजित् ॥

गाञ्जिकाय. पुं । वर्त्तिकपक्षिणि ॥

गाढम् । न । दृढे ॥ तीव्र ॥ वि । तथु

गाणेय:

ते ॥ अवगाढे ॥ सेविते ॥ तंपस्वि गाढांतमसां प्रापेतिरघु: ॥ गाहते स्म । गाहू विलोडने । क्त: ॥

गाढमुष्टि । पुं । खड्गे ॥ वि । कृपणे ॥ गाढामुष्टिर्यस्य ॥

गाढावटी । स्त्री । चतुरङ्गक्रीडामध्ये क्रीडाविशेषे ॥ यथा । नौकैका वटि का यस्य विद्यते खेलने यदि । गाढा वटीति विख्याता पदं तस्य न दुष्य तीति ॥

गाणपत: । वि । गणपतिदेवताके ॥ गणेशोपासके ॥ गणपतिर्देवता ऽस्य । अश्वपत्यादिभ्यश्चेतिण्यापवा दो ऽण् । गाणपत्योमन्त्रइतितु प्रागादि कमेव । गणपतिश्चेन्नपत्यादीनाम श्वपत्यादिषुपाठात् ॥ गणपतिसम्ब न्धिनि ॥

गणपत्यम् । न । गणपतित्वे ॥ गणप ते कर्मभावो वा । गुणवचनब्राह्म णादिभ्य: कर्मणिचेतिष्यञ् । गण पत्यधिपतिशब्दयोर्ब्राह्मणादिषुपा ठात् ॥

गाणिक्यम् । न । वेश्याष्टन्दे ॥ गणिका नां समूह. । गणिकाया यञिति य ञ्यमिति यञ् ॥

गाणेय. । वि । गणनीये । गणयितुं यो ग्ये ॥ गणयते । गणसङ्ख्याने । अ

गवम्

चोयत् । संज्ञापूर्वकत्वान्न क्ङिती यः । चिक्लिपूङीत्यङ्वि धानाद्गुणाभावार्थोऽङा ॥ अन्यथा अप्रत्ययादित्यनन्तरं पठित्वा अकारमेव विदध्यात् ॥

गाण्डिवः । पुं । न । अर्जुनस्यधनुषि ॥ कार्मुकभाचे ॥ गाण्डि ग्रन्थि रस्यास्ति । गाण्ड्यजगात्सत्तायामितिवः॥

गाण्डीवः । पुं । न । गाण्डिने ॥ गाण्डा ग्रन्थिरस्यास्ति । कृदिकारादितिङीषन्तात् गाण्ड्यजगादितिव ॥

गाण्डीवभृद्वयः । पुं । अर्जुने ॥ धानुष्के ॥ धनुष्मति ॥ गाण्डीवं भृणमस्य ॥

गाण्डीवी । पुं । अर्जुने । कौन्तेये ॥ चापिनि । धानुष्के ॥ अर्जुनवृक्षे ॥ गाण्डीवोस्त्यस्य । इनिः ॥

गातुः । पुं । पुंस्कोकिले ॥ भृङ्गे ॥ गर्वे ॥ त्रि । रोगघ्ने ॥ गायति । गै॰ऽदे-। गातेवा । गाङ्गतौ । कसिमनिजनिगाभ्यायिभ्यश्चेतितुः ॥ गायने ॥

गाता । पुं । गायके ॥ गायति । गै॰॥ तृच् ॥

गात्रम् । न । गजाग्रजङ्घादौ । गजाग्रभागे ॥ अङ्गे ॥ कलेवरे । इन्द्रियायतने । शिरःपाण्याद्यवयव नांसमुदये । गात इति भाषा ॥ गातेऽने

गाधः

न वा । गाङ्गतौ । घञ् ॥ इति वा । बहुलंतनीति ङोगा ॥ यद्वा । गच्छति । गम्लृ॰। गमेरगाचेति धन् । आचान्तादेशः ॥

गात्रभङ्गा । स्त्री । शूकशिम्ब्याम् ॥

गात्रशय्यः । पुं । तापसविशेषे ॥ केवलं गात्रैरेव यः शेते सः ॥

गात्रसङ्कोची । पुं । जाङ्गलजन्तौ ॥

गात्रसम्भवः । पुं । स्वेदपक्षिणि ॥

गात्रानुलेपनी । स्त्री । अनुलेपनवर्त्म । म् । वर्णके । विलेपने । गात्रानुलेपयेाग्ये पिष्टघृष्टसुगन्धिद्रव्ये ॥ गात्रमनुलिप्यतेऽनया । करणेति-ल्युट् । ङीप् ॥

गात्रिका । स्त्री । गाती इति लोकप्रसिद्धे ॥

गायकः । पुं । गायके । गानोपजीविनि ॥ गायति । गै॰ण्वुल् ॥

गाथा । स्त्री । श्लोके ॥ संस्कृतान्यभाषायाम् । प्राकृतभाषायाम् ॥ नेये ॥ वृत्ते । अक्षरसङ्ख्यातपद्ये ॥ यथा । पादे द्वादश विषमे मात्रा अष्टादश द्वितीयेऽपि । पञ्चदश चेत् तुरीये कथिता गाथा तयैवार्येति ॥ गीयतेऽसौ । गाङ्॰। घञि कुत्वे घिगार्शिभ्यश्चन् ॥

गाधः । पुं । तलस्पर्शे । स्थाने ॥ सुप्रत

रे । गाहन इति पाँज्इतिचभाषा ॥ लिप्सायाम् ॥

गाधिः । पुं । कान्यकुब्जदेशाधिपेचन्द्रवंशीयकुशिकराजस्यपुत्रे विश्वामित्रमुनेःपितरि ॥

गाधिजः । पुं । विश्वामित्रमुनौ ॥ गाधेर्जातः । जनी० ड ॥

गाधिपुरम् । न । कान्यकुब्जे कनौज इतिख्याते महोदयपुरे ॥

गाधिभूः । पुं । गाधिसुतः । पुं । गाधेयः । पुं । विश्वामित्रे ॥

गानम् । न । गीतौ । गेये ॥ ल्युनौ ॥ गैशब्दे । ल्युट् ॥ मार्गो देशी च गानस्य प्रकारौ द्वावुदीरितौ ॥

गानिनी । स्त्री । यचायाम् ॥

गान्तु । वि । गन्तरि ॥ गच्छति । गम्लृ० । क्रमिगमिधमिभ्यस्तुन्नुटिश्च ॥

गान्त्रम् । न । शकटे ॥ गम्यतेऽनेन । गम्लृ० । भस्त्रजिगमिनमिहनिविष्यश्चंडटिश्चेतिष्ट्रन् ॥

गान्दिनी । स्त्री । योगङ्गायाम् । ज्ञाप्याम् ॥ ऋकूरादित्वमागि ॥

गान्दिनीसुतः । पुं । भीषणपितरि ।

गान्धर्वः । पु । गन्धर्वे ॥ विवाहविशेषे यथा । इच्छयाऽन्योन्यसंयोगः कन्यायाश्च वरस्य च । गान्धर्वः स तु विज्ञेयो मैथुन्यः कामसंभवः इति ॥ गान्धर्वः समयान्मिथइतिच । यत्र कन्यावरयोरन्योन्यानुरागात् त्वं मे भार्य्या त्वं मेपतिरितिनिश्चयःस इत्यर्थः ॥ अष्टविधदैवसर्गान्तरे ॥ भारतवर्षीयोपद्वीपविशेषे ॥ न । गाने ॥ सामवेदस्योपवेदे । पदाक्षरस्थिततानपरिच्छेदप्रयुक्तावधानेन पृथक्षड्जादिस्वरसमुदाये ॥ तदाहदत्तिलः । षड्जस्वरसङ्घातस्तालेनसमितस्तथा । प्रयुक्तश्चावधानेन गान्धर्वमभिधीयते ॥ इति ॥ गन्धं सौरभम् अर्वति । अर्वगतौ । कर्मण्यण् । शकंध्वादिः । ततः प्रज्ञाद्यण् ॥ वि । गन्धर्वसम्बन्धिनि ॥

गान्धारः । पुं । सिन्दूरे ॥ रागभेदे ॥ तत्स्वरूपं यथा । जटां दधानः कृतभूतिभूषणः कषायवासा स्तनुदेहयष्टिः । सयोगपट्टः कृतनेत्रमुद्रोगान्धाररागः कथितस्तपस्वीति ॥ अयंभैरवरागस्यपुत्रः । प्रथमप्रहरगानसमयः ॥ कन्धार इति भाषाप्रसिद्धे देशे ॥ गन्धारदेशे भवः । कच्छादिभ्यश्चेत्यण् । गान्धारोऽभिजनोऽस्यवा सिन्ध्वादयः ॥ स्वरान्तरे ॥ गान्धारः स्वरश्चयम् । साल्वेयगान्धारि-

गान्धिकः
भ्याञ्चेत्यम्। तस्य राजन्यप्येवम्॥ तन्त्रीकण्ठोत्थिते सप्तस्वरान्तर्गते ततीयस्वरे॥ अजाविकौचं गान्धारं नदतः। तस्योत्पत्त्यादि यथा। वायुः समुद्गतो नाभेः कण्ठशीर्षसमाहतः। नानागन्धवहः पुंसोगान्धारस्तेन हेतुनेति॥ अपिच। नाभेः समुद्गतो वायुर्गन्धयोनिं च चालयन्। सशब्दस्तेन निर्याति गान्धारस्तेन कथ्यते॥ चतसृः पञ्चमे षड्जे मध्यमे श्रुतयो मताः। ऋषभे धैवते तिस्रो दे गान्धारनिषादकेइति॥ न। गन्धरसे॥

गान्धारराज। पुं। महाभारतप्रसिद्धे शकुनिनामख्याते दुर्योधनस्य मातुले॥

गान्धारी। स्त्री। धृतराष्ट्रस्य पत्न्याम्॥ जिनानां शासनदेवताविशेषे॥ यवासे॥ दुरालभायाम्॥ नाडीविशेषे॥ यथा। इडापृष्ठेतु गान्धारी मयूरगलसन्निभा। सव्यपादादिनेत्रान्तागान्धारीपरिकीर्त्तितेति॥ गाँधा इतिप्रसिद्धे मादक द्रव्यविशेषे॥ इति विष्णुसिद्धान्तसारावली वैद्यक ग्रन्थः॥

गान्धारेय। पुं। दुर्योधनरूपे॥ गान्धार्या अपत्यम्। स्त्रीभ्योढक्॥

गान्धिकः। पुं। लेखके॥ सुगन्धिद्रव्य

गांधेवी
व्यापारिणि। गन्धवणिजि॥ सेतु अम्ब ष्ठात् राजपुत्र्यांजातः सङ्करजातिः। अर्थकर्मलिखनं गन्धदानञ्चेति परा शरः॥ गाँधिपोका इति गौडभाषा प्रसिद्धे कीटविशेषे॥

गामुकः। त्रि। गमनशीले। गन्तरि॥ गच्छति तच्छीलः। गम्लृ° खषप तपदस्थाभूवृषहनकमगमशम्यडक जिदृक्षुकन्॥

गाम्भीर्य्यम्। न। अचोभ्यत्वे॥ गम्भीरेभवम्। गम्भीराज्ज्यः॥ गम्भीरत्वे। अगाधत्वे॥ पीत्वा गर्जन्त्यमस्ते दिग्भि दिग्भिजलदा सर्वशरण्यो गरीणां स्वच्छामाचासभाजां ममरवि टपिनां जन्मभूमि स्त्वमेव। गाम्भीर्यं किञ्च तादृक् त्वयि सखिलनिधे किञ्च विज्ञापयामः सर्वोपायेन सैवावरुणिमुनिकृपादृष्टयः काङ्क्षणीयाः॥

गायकः। त्रि। गातरि। गायने॥ गन्धर्वे॥ गायति। गै°। ण्वुल्॥

गायत्रम्। न। सामविशेषे॥ त्रि। गायत्रीसम्बन्धिनि॥

गायत्री। पुं। खदिरवृक्षे॥ षड्भिगायत्रिणांतयेति वैद्योक्तेः। ङीप्° इनिः॥ गायत्रस्तोत्रवत्युद्गातरि॥

गायत्री। स्त्री। त्रिपदादिच्छन्दसि। वेद

गायनः

सातरि ॥ गायन्तं त्रायते । चैङ्प्रा-
क्रने । आतोनुपसर्गे इतिकः । गौ०
ङीष् ॥ यद्यद्व्यासः । प्रतिगृह्यान्न
दोषान्नं पातका दुपपातकान् । गा-
यत्री मोक्षतेत्तस्माज्जायन्तंत्रायतेय
त इति ॥ अपिच । न भिन्नां प्रतिप-
द्येत गायत्रीं ब्रह्मणा सह । सोऽहम
मीत्युपासीत विधिनायेनकेनचि-
दिति ॥ चक्षाःस्नानं पुष्करे ॥ उपल
भ्यसाविर्वा नेपतिष्ठेत्तयो द्विज
। कालेविकाले सस्नात्सप्तेत्वा-
ऽसंशयः ॥ गायत्रीमन्त्रतोयाव्यं
दत्तंयेनाक्षयंभवेत् । कालेसाविचि-
केण स्नात्तेनेदं जगत्पवित्रमि-
तिपद्मपुराणम् ॥ दुर्गायां देव्याम्
। भवान्याम् ॥ यद्वा । गायन्नाद्गम
नाद्वागायत्रीत्विद्यार्पितेतिदेवी
निरुक्ताध्यायः ॥ यद्वा । गानङ्गायः
। भावे घञ् । युक् । गायेन गानेन
त्रायते । चैङ् । सुपीतियोगविभा
गात् कः ॥ खदिरवृक्षे ॥ षड्जरूढ छ
न्दोवि । तस्यावृत्तिस्त्रिविधा । यथा
। सनुमध्या १ शशिवदना २ सोम
राजीति । उदाहरन्तु तत्तत्स्था
ने द्रष्टव्यम् ॥

गायनः । त्रि । गायके । गाय्यके ॥ गा-
यति । गै० । ल्युट्चेति शित्त्वेन्नि

गार्गीय

कर्त्तरि ल्युट् । अतोयुक् ॥ ज-
ल्पाके ॥

गायत्री । स्त्री । गानकर्त्र्याम् ॥ ट्टिच्वा
न्ङीप् ॥

गायिका । स्त्री । गायन्यास् ॥ ण्वुलृता
न् गायकात् स्त्रियां टाप् । अत्यय
स्वादितीत्वम् ॥

गारिष्म । न । श्वेडमन्त्रे ॥ मरकतम
णौ ॥ विश्वगाख्ये ॥ गरुडपुराणे ॥
अस्यश्लोकसंख्यां देवीभागवते -
यथा । एकोनविंशत्साहस्रं गारुडं
इति भाषितमिति ॥ स्वर्ण ॥

गारुडिक । पुं । विषवैद्ये ॥

गारुडी । स्त्री । पातालगरुडीलताया
म् ॥ विद्याभिभेदे ॥

गारुत्मतम् । न । मरकते । इन्मणौ ।
। पन्ना इति भाषा ॥ गरुत्मतो जात
म् । तस्येदमित्यण् ॥

गारुत्मतपत्रिका । स्त्री । पाचीलता-
याम् ॥

गार्गी । स्त्री । बृहदारण्यकोपनिषत्प्र
सिद्धायां ब्रह्मवादिन्यां वचक्नुनन्या
याम् । वाचक्नव्याम् ॥ गर्गस्यापत्यं ङ्यां
स्त्री । गर्गाद्यञ् । यञञोश्चेतिङीप् ।

गार्हस्थ्य

हलस्तद्धितस्येतियलोपः ॥

गार्गीयम् । त्रि । गर्गमोक्ते ॥

गार्ग्यः । पुं । मुनिविशेषे ॥ गर्गस्यगो ॥ चापत्यम् । गर्गादियञ् । बहुत्वेगर्गाः॥

गार्द्धम् । न । लिप्सायाम् । आकाङ्क्षा यान् । तृष्णाभरे ॥ गृद्धएव । चतुर्वर्णादित्वात् स्वार्थे ष्यञ् ॥

गार्भपवः । पुं । गृध्रपक्षयुक्ते बाणे ॥

गार्भः । पुं । गर्भशुद्ध्यर्थं क्रियमाणे कर्मविशेषे ॥ त्रि । गर्भसम्बन्धिनि ॥ तस्येदमित्यण् ॥ गर्भाधानादौ ॥

गार्भिकम् । त्रि । गर्भसम्बन्धिनि ॥

गार्भिणम् । न । गर्भिणीनां समूहे ॥ तस्यसमूह इत्यधिकारे भिक्षादिभ्योण् इत्यणि भस्याढ इति पुंवद्भावेचकृते इनण्यनपत्य इति प्रकृतिभाव. ॥

गार्ष्टेयः । पुं । गृष्टिवृत्ते ॥ गृष्ट्यादिरूपम् । गृष्ट्यादिभ्यश्चेतिढक् ॥

गार्हपत्यः । पुं । यज्ञाग्निविशेषे ॥ गृहपतिर्यजमानस्तेन संयुक्तोऽग्निः । अचसंज्ञायामित्यनुवृत्ते राष्ट्रवनीयादीनामिति प्रसङ्गः ॥

गार्हस्थः । पुं । गृहस्थे यागपुत्रादिकारणे द्वितीयाश्रमे ॥ स्वार्थेकाण् ॥

गार्हस्थ्यम् । न । गृहस्थत्वे ॥ गृहस्थस्य कर्म भावोवा ष्यञ् ॥

गालनम् । न । क्षारणे । चुवावना । पसावना इति गलावना इतिच भाषा ॥

गालवः । पुं । मुनिविशेषे ॥ लोभे ॥ केन्दुके ॥ गालवस्यापत्यम् । ऋश्यन्धकोत्यण् ॥

गालिः । पुं । शापे ॥ इतिविकाण्डशेषः ॥ यथा । ददतु ददतु गालिंगालिमन्तो भवन्तोवयमिह तदभावाद्गालिदानेप्यशक्ताः । जगति विदितमेतद्दीयते विद्यमानं नहि शशकविषाणं दीयतेय दन्यैरित्युद्भटः ॥

गालितः । त्रि । कृतगालने । चुवायाहुवा इतिच भाषा ॥ यथा । गालितं दधि सुस्निग्धं भिक्षादिः ॥ द्रवीकृते ॥ यथा । गालितस्य सुवर्णस्य षोडशांशेन सीसकम् इति । गला या इति भाषा ॥

गालिनी । स्त्री । मुद्राविशेषे ॥

गालोड्यम् । न । पद्मबीजे । कमल गट्टा इति भाषा ॥

गावल्गणिः । पुं । सञ्जये ॥ गवल्गणस्यापत्यम् । अतइञ् ॥

गावेधुक । त्रि । गवेधुकायाअयमवे । तद्विकारेच ॥ विल्वादिगण् ॥

गाहनम् । न । प्रवेशने ॥ गाहनमाहति

गिरिक
खाते बिलोडने ॥
गीः । स्त्री । भाषायाम् । वाचि । सरस्वत्याम् ॥ गृणन्त्येताम् । गृशब्दे । । सं० क्विप् । कृतद्वातोः ॥
गिरा । स्त्री । भणितौ । वचने ॥
गिरि । पुं । गोत्रे । पर्वते ॥ मेरुमन्दरकैलासमलया गन्धमादनः । अहेन्द्रः श्रीपर्वतश्च हेमकूटस्तथैव च ॥ अष्टविंते तु सम्पूज्या गिरयः पूर्वादिक्रमात् ॥ गिरियके ॥ नेत्ररुक्प्रभेदे ॥ पारदस्य दोषविशेषे ॥ संन्यासिनां नामविशेषे ॥ यथा । तदेहैवाहुर्यो वीरो मुक्तकेशो दिगम्बरः सर्वत्र समभावेन भाववेद्यो नरोत्तमः ॥ इष्टदेवीधिया नारीं सेवते गिरिः परिकीर्त्तितइति ॥ स्त्री । गीर्यौ । गिलनादिति भाषा ॥ वाक्यमूषिकायाम् ॥ त्रि । पूज्ये ॥ गिलनम् । गॄ० । इक् कृत्यादिभ्यः ॥ यद्वृषकात् किर्वा । ऋतइत् ॥ गिरतिवा । हागृशॄकुटीतिः कित् ॥
गिरिकदम्बकः । पुं । वृक्षे ॥
गिरिकदम्बः । पुं । धाराकदम्बे । नीपे ॥
गिरिकदली । स्त्री । वन्यकदलीवृक्षे । वनकदम्बायाम् ॥
गिरिकर्णिका । स्त्री । पृथिव्याम् ॥ श्वेताकिंशिलीवृक्षे ॥ अपराजितायाम् ॥

गिरिजा
याम् ॥
गिरिकर्णी । स्त्री । अपराजितायाम् ॥ विवासे ॥ गिरि वोलमूषिका कर्णोस्था तत्कर्णतुल्यपत्त्वात् ङीष् ॥
गिरिका । स्त्री । वोलमूषिकायाम् ॥ गिरेः संज्ञायांकन् ॥
गिरिकाणः । त्रि । गिरिरोगेणैककचक्षुर्हीने ॥
गिरिगुडः । पुं । गोगडुके ॥
गिरिजः । पुं । मधूकवृक्षविशेषे । गोरक्षाके ॥ न । अभ्रके ॥ शिलाजतुनि ॥ शैलजे गोलोहे ॥ गैरिके ॥ त्रि । गिरिसम्भूते ॥ गिरेर्जातम् । जनेर्ड० । पञ्चम्यामितिडः ॥ गिरौ जातं वा । सप्तम्यांजनेर्डः ॥
गिरिजा । स्त्री । गौर्याम् । पार्वत्याम् ॥ मातुलुङ्ग्याम् ॥ श्वेतयुङ्गायाम् ॥ चुद्रपाषाणभेदायाम् ॥ वायसमाषलतायाम् ॥ कारीवृक्षे ॥ भल्लिकायाम् ॥ गिरिकदल्याम् ॥ गिरेर्जाता । जनी० । पञ्चम्यामजातावितिङः ॥
गिरिजासुतम् । न । अभ्रके ॥ गिरौजातं गिरिज । क्रमंत । क्रमगतौ । इषादित्वात् कः । न मसुतमस्येतिवा । गिरिजश्चतदसुतश्च ॥ गिरिजायाः सुतं वा ॥

गिरिभू

गिरिज्वरः पुं न० पर्वते ॥
गिरिजः पुं शिवे ॥
गिरिदुर्गम् न० पर्वतपृष्ठे ऽतिदुरारोहे सङ्कटे कर्मणोपेते ऽन्ननेदीप्रस्रवणायुदकयुते बहुसंस्थोत्पन्नवृक्षान्विते राज्ञां निवासस्थाने ॥ स चैवं तु प्रयत्नेन गिरिदुर्गं समाश्रयेत् । एषां हि बहुगुणेन गिरिदुर्गं विशिष्यते ॥ एषां धन्वदुर्गादीनाम् । गिरिदुर्गं अतिदुरारोहत्वं मतङ्गजप्रहरणादत्यप्रयत्नप्रेरितशिलादिनावहुविपक्षसैन्यव्यापादनसमर्थादयो बहवो गुणा विद्यन्ते तस्मात् प्रयत्नेनातदाश्रयेत् ॥
गिरिधातुः पुं गैरिके ॥
गिरिनदी स्त्री गैलोपगायाम् ॥ गिरेः प्रसूता नदी । गिरिनद्यादीनां वेतिपाक्षिकोणत्वाभावः । तेन पक्षे गिरिणदीत्यपि वेोध्यम् ॥
गिरिनिम्बः पुं मध्यारिष्टवृक्षे ॥
गिरिपीलुः पुं पक्षपर्णवृक्षे । फालसा इति भाषा ॥ इति राजनिर्घण्टः ॥
गिरिपुष्पकम् न० गैलेये ॥
गिरिप्रिया स्त्री चमर्याम् ॥
गिरिभिद् पुं पाषाणभेदवृक्षे ॥
गिरिभूः स्त्री पार्वत्याम् ॥ क्षुद्रपाषाणभेदे ॥

गिरिसु

गिरिमल्लिका स्त्री कुरैया इतिभाषाप्रसिद्धे कुटजवृक्षे ॥ गिरिमल्ली वेति दीर्घार्थकन् ॥
गिरिमल्ली स्त्री गिरिमल्लिकायाम् ॥
गिरिमृद् स्त्री गैरिके ॥
गिरिमृद्भवम् न० गैरिके ॥
गिरिमेदः पुं शिट्खदिरे ॥ इति मेदिनीधृतधन्वन्तरिपाठः ॥
गिरियकः । पुं । कन्दुके । गेण्डुके ॥ इति हेमचन्द्रः ॥
गिरिवासी । पुं । हस्तिकन्दे ॥
गिरिशः पुं सदाशिवे । शङ्करे ॥ गिरि राश्रमत्वेना ऽस्त्यस्मीति विग्रहे लोमादित्वात् शः ॥ गिरौशेते गिरिं श्यति उपभोगेन तनूकरोति वा । गिरौ ऽस्त्यस्मिन्निति वा । गिरौ ऽस्त्यस्मिन्निति वा । गिरौ ऽस्त्यस्मिन्नि

गीतम्

यतमा । विश्वतुवो हृदि सदा भग
वतीपदयुगमिति ॥

गिरीशः । पुं । स्थाणौ । रुद्रे । शिवे ॥
अद्रिपतौ । हिमाचले ॥ दृढस्यतौ
॥ गिरेः कैलासस्य ईशः ॥

गिलः । पुं । जम्भीरे ॥ गिलति । गृ॰
मृ॰ कः । अचिविभाषेतिलत्वम् ॥

गिलयालुः । पुं । कुम्भीरे । नाकाइति
भाषा ॥

गिलनम् । न । गिरणे । भक्षणे ॥

गिलिः । स्त्री । गिलने ॥ गरणम् ।
गृ॰ । इक् कृष्यादिभ्यः । अचिविभा
षेतिलत्वम् ॥

गिलितः । त्रि । भक्षितेत्रा गिलिर्जीता
ऽस्य । तारकादित्वादितच् ॥

गिष्णुः । पुं । सामवेदविदि ॥ गायके ॥

गीतम् । न । गाने ॥ तल्ल॰ यथा ।
धातुमातुसमायुक्तं गीत मित्युच्य
ते बुधैः । तच्च नादात्मको धातुर्भा
तु रञ्जरसन्यय इति ॥ तद्द्विधं च
तुर्धा । गीतञ्च द्विविधं प्रोक्तं यन्त्रगा
त्रविभागतः । यन्त्रं स्याद्वेणुवीणादि
गात्रन्तु मुखसंभवम् ॥ अथिच । नि
बद्धमनिबद्धञ्च गीतं विविध मुच्य
ते । अनिबद्धं भवेद्गीतं वर्णादिनि
यमं विना ॥ वर्णागमकधातुभ्यां नि
यमं विना कृतम् । निबद्धं तद्भवे

गीतम्

द्गीतं तालमानरसान्वितम् ॥ छ
न्दोगमकधातुभ्यां वर्णादिनियमैः कृ
तम् ॥ ॥ ॥ कमिमः पार्श्वसंभू तीतं
॥ सम्यक् समपद्यत । यद्यर्थो ऽभि
नया जाता रसाश्चाऽवर्ण्यकाः स्मृताः
॥ ॥ ॥ अङ्गैराक्षिप्यते गीतं दर्शनाभि
र्यैः प्रदर्श्यते दृष्टिभ्यां, भावयेद्भावं
पादाभ्यां ताल निर्णयः ॥ गीतं पी
नपयोधरा समदृशा नारी विचित्रा
कथा रम्यं हर्म्यतलं सुधांशुकिरण
प्रोद्दीपिता यामिनी । चित्तज्ञाः सु
हृदः सुताः सुमनसो भक्ताः पुनः
सेवकाः शुद्धं गीतफलं कवित्व मतु
लं संसारसारामताः ॥ सङ्गीतकेन
रम्येण मुखं यस्य न चेतसि । मनु
ष्यवृषभो लोके विधिनैव सवञ्चितः
॥ संसारदुःखदग्धानामुत्तमाना म
नुष्यहान् । प्रभुणा शङ्करेणात्र गीतं
वाद्यं प्रकाशितम् ॥ गीतज्ञो यदि
गीतेन प्राप्नोति परमं पदम् । यद्र
क्षानुचरो भूत्वा तेनैव सह मोदते
॥ गीतेन हरिणा रङ्गं प्राप्नुवन्त्यपि प
क्षिणः । वना दायान्ति फणिनः गि
रयो न वदन्ति च ॥ कृतिश्चमतकृत
यें किमतः परं फणियेरो ऽथतरो
यत पञ्चमः । अपिमतौ यदपाय न
दान्तसां मधुरगीतवशीकृतशङ्करः ॥

गीतिः परमानन्दविवर्द्धनं अभिमतफलं व शोकरणम्। सकल जनचित्तहरणं विमुक्तिबीजं परंगीतमिति प्रशंसा ॥ त्रि। गीयते ॥ गै॰ क्तः ॥

गीतप्रियः । पुं । किन्नरे ॥ त्रि । गानानुरागिणि ॥

गीता । स्त्री । कृष्णार्जुनसंवादात्मकेगास्त्रविशेषे ॥ यथा । भारते सर्ववेदार्थो भारतार्थश्च कृत्स्नशः । गीतायामस्ति तेनेयं सर्वशास्त्रमयी मता ॥ इयं मष्टादशाध्यायी क्रमात् षट्कत्रयेण हि । कर्मोपासितज्ञानकाण्डत्रितयात्मा निगद्यते इतिनीलकण्ठचतुर्धरः ॥ गीतासुगीताकर्त्तव्या किमन्यैः शास्त्रविस्तरैः । या स्वयं पद्मनाभस्य मुखपद्माद्विनिःसृता ॥ एतदन्याः । आश्वमेधिकपर्वोक्ते ब्राह्मणगीतानुगीते । देवीभागवतोक्ता भगवतीगीता । अध्यात्मरामायणोक्ता रामगीता । श्रीविष्णुभागवतोक्ता गोपीगीता । शिवगीतादयश्चत्वारश्चतुरो ऽध्यात्मविद्यानिरूपणपराः स्मृताः ॥

गीतासार । पुं श्रीकृष्णार्जुनसंवादात्मकेमुक्त्यर्थं ऽष्टादशाध्यायात्मके ग्रन्थे ग्रन्थपरिमाणोक्तौ ॥

गीतिः । स्त्री । गाने ॥ आर्याछन्दोविशेषे ॥ यथा । आर्यापथमार्द्धसमदि

गीप्यतिः

तीय मपि चार्द्धं गीयते यस्याम् । सागीतिः कविपतिना निर्मलमतिना निवेदिता नूनमिति ॥

गीतिका । स्त्री । कृतिसंज्ञकेविंशत्यक्षरावृत्तिविशेषे ॥ यथा । सनजा भरौ सलगा यदा कथिता तदा खलु गीतिका ॥ वरपाणिशोभिसुवर्णकङ्कणरत्नरञ्जुविभूषिता सुपयोधरापदसन्निनूपुरहृद्यकुण्डलमण्डिता । फणिराजपिङ्गलवर्णिता कविसार्थमानसचारिका वरकामिनीव मनोहिता नहि कस्यसा किल गीतिकेति ॥

गीरथः । न । जीवे । दृष्टस्यतौ ॥

गीर्णः । त्रि । वर्णिते । स्तुते ॥ गिर्णितेऽर्थे । गॄनिगरणे क्ते ऽन्येषा० । फः ॥

गीर्णिः । स्त्री । गिरौ । गिलने ॥ गिलनम् । गॄ० । क्तिन् । ऋत्व्यादिभ्यः क्तिन्निष्ठावत् । तेनसत्त्वम् ॥

गीर्देवी । स्त्री । सरस्वत्याम् ॥

गीर्ज्वलता । स्त्री । महाज्योतिष्मत्याम् ॥

गीर्वाणः । पुं । देवे । सुरे ॥ गीरेव निग्रहानुग्रहसमर्था वाणो ऽस्त्रं यस्य सः ॥ दृग्लोट्व्यधाटे गिरंवनुते याचते स्तुतिप्रियत्वात् । वनुयाचने । उर्मण्यण् । पूर्वपदादितिरुत्वम् ॥

गीर्व्याकुसुमम् । न । खदिरे ॥

गीष्पतिः । पुं । विबुधे । गुरौ । बृह

गुग्गुलुः

स्यतौ ॥ गिरामप्रतिः॥ अङ्गरादी नामितिरेफाभावपक्षे इदुदुपधस्ये-ति षः । अङ्गरादीनामिति रेफपक्षे गीर्यतिः । रेफाभावपक्षे गीःपतिः गीःपतिः ॥ पण्डिते ॥

गीष्पतीष्टिः । स्त्री । बृहस्पतिसवनाम यागे ॥

गुग्गुलः । पुं । स्वनामप्रसिद्धे वृक्षवि शेषस्यनिर्यासे । गुग्गुलौ ॥ रक्त शिग्रौ ॥

गुग्गुलुः । पुं । कुम्भे । उलूखलके । मुरे ॥ अस्यगुणादयः । महिषाक्षो महानीलः कुमुदः पद्म इत्यपि । हिरण्यः पञ्चभेदोक्तेवो गुग्गुलोः पञ्च जातयः॥ भृङ्गाञ्जनसवर्णस्तु महिषा क्षइतिस्मृतः । महानीलस्तु विज्ञेयः स्वनामसमलक्षणः॥ कुमुदः कुमुदा भ.स्यात् पद्मोमाणिक्यसन्निभः । हि रण्याख्यस्तु हेमाभ पञ्चानां लि-ङ्गमीरितम्॥ महिषाक्षमहानीलौ गजेन्द्राणां हिता वुभौ । हयानां कुमुद. पद्मः स्यात्सारोग्यकरौपरौ ॥ विज्ञेयेय मनुष्याणां कनक परि कीर्त्तित. । कदाचि न्महिषाक्षस्तु मत: कैश्चित्कृता मपि ॥ गुग्गुलु र्विगट स्निग्धो वीर्योष्ण. पित्तल सर. । कषाय: कटुक: पाके कटु

गुग्गुलुः

रूक्षो लघु: परः ॥ भग्नसन्धानकृ दृष्य: सूक्ष्म: स्वर्यो रसायन: । दी पन: पिच्छिलोवल्य: कफवातव्रणापचि । मेदोमेहाश्मवातांश्च क्लेद कुष्ठाग्निमान्दनुत्॥ पिडकाग्रन्थिशो फार्शोगण्डमालाकृमीन् जयेत् ॥ माधुर्यो च्छमये द्वातं कषायत्वा च्च पित्तहा । तिक्तत्वात् कफजित्तेन गुग्गुलु: सर्वदोषहा ॥ स त्रवो वृंह णोवृष्य: पुराण स्वतिलेखन: । वि ग्ध: काञ्चनसङ्काश: पक्वजम्बूफलो पम: ॥ नूतनो गुग्गुलु: प्रोक्त: सुग न्धि र्यस्तु पिच्छिल: । शुष्को दुर्गन्ध क श्चैव त्यक्तप्रकृतवर्णक: ॥ पुराण: स तु विज्ञेयो गुग्गुलु र्वीर्यवर्जित: ॥ अम्लं तीक्ष्ण मजीर्णञ्च व्यवायं श्रम मातपम् । मद्यं रोषं त्यजेत् सम्यग् गुणार्थी गुरुसेवक: ॥ अस्य स्था नविशेषे जन्मादिकथनं यथा । जा यन्ते पुरपादपा.मरुभुवि ग्रीष्मे ऽर्क सन्तापिता: शीतार्त्ता: शिशिरे ऽपि गुग्गुलुरसं मुञ्चन्ति ते पञ्चधा । हे माभं महिषाक्षतुल्य मपरं सत्प द्मरागोपमं भृङ्गाभं कुमुदद्युतिञ्च विधिना ज्ञात्वा परीक्षा तत:॥ यद्वै ज्यन्ति तपने विगलं प्रयान्ति कि ञ्चिन्न कोष्णसलिले पयस: समाना

गुच्छक

। ग्राह्याः शुभाः परिहरे स्थिरकाल जातान् अङ्गारवर्णसमपूयविगन्धव र्णानितिप्रयोगामृतम् ॥ पक्वस्याम्र पूर्णद्वीर्यत्वं मासत्रयपर्यन्तं तिष्ठती तिवैद्यकपरिभाषा ॥ गोजति । गु अल्पे । क्विप् । गुजो व्याधेः गुडति । गुडरक्षणे । बाहुलकात् कः । ड लयोरैक्यम् ॥

गुच्छः । पुं । स्तवके । कलिकादिकद म्बे । बहुभिः पुष्पैः फलैर्वा सम्बा धः पल्लवग्रन्थिर्गुच्छः । गुच्छा इति भाषा ॥ स्तम्बे । भूलत एव यत्र ब हुसमूहो भवति नच प्रकाण्डानि ते गुच्छा मल्लिकादयः । झुण्ड इति भाषा ॥ हारविशेषे । द्वात्रिंशद्यष्टि केहारे ॥ कलापे । मोरपङ्ख इति भाषा ॥ गुध्यते । गुधपरिवेष्टने । स्यादिभ्यक्कुत्रिति श्रीभोजः ॥ गूय ते । गुङ् शब्दे । बाहुलकात् छगुवा ॥ यद्वा । गवनम् । गुङ् । सं०कि प् । सुक् । गुतंछति । छोछेदने । आतोनुपेतिकः ॥

गुच्छकः । पुं । स्तवके । पुष्पसङ्घाते ॥ स्तम्बे ॥ द्वात्रिंशद्यष्टिकेहारे ॥ कला पे ॥ रीठाकरञ्जे ॥ न । ग्रन्थिपर्णे ॥ गुच्छात्स्वार्थे कन् ॥

गुच्छकपिप्पः । पुं । रागौषधभेदे । तृणधा न्यविशेषोयम् ॥

गुच्छकरञ्जः । पुं । सानन्दे । स्निग्ध दले ॥

गुच्छदन्तिका । स्त्री । कदल्याम् ॥

गुच्छपत्रः । पुं । नागदन्ते ॥

गुच्छपुष्पः । पुं । सप्तच्छदवृक्षे ॥

गुच्छपुष्पकः । पुं । गुच्छकरञ्जे ॥ री ठाकरञ्जे ॥

गुच्छपुष्पी । स्त्री । धातक्याम् ॥ शिग्रु डीवृक्षे ॥

गुच्छफलः । पुं । रीठाकरञ्जे ॥ राजा दन्याम् ॥ कतके ॥

गुच्छफला । स्त्री । अग्निदमन्याम् ॥ काकमाच्याम् ॥ निम्बाख्याम् ॥ द्रा क्षायाम् ॥ कदल्याम् ॥

गुच्छवल्ली । स्त्री । गुडाख्यवल्ल्याम् ॥

गुच्छमूलिका । स्त्री । गुडाख्यिनी वृक्षे ॥

गुच्छार्द्धः । पुं । चतुर्विंशतियष्टिके हारे ॥ न । अर्द्धगुच्छे ॥ गुच्छस्यार्द्धं । ग्रामार्द्धवत् समासः ॥

गुच्छालः । पुं । भृङ्गे । गन्धखेड ॥

गुच्छाह्वकन्दः । पुं । गुलञ्चवल्ल्याम् । नि घण्टुकायाम् । कुली इति गौड भाषा ॥

गुच्छी । स्त्री । गुच्छकरञ्जे ॥

गुज्जरी । स्त्री । रागिणी विशेषे ॥ अ

गुञ्जा

स्वारूप्यं यथा । श्यामा सुकेशी म
खयदुमाणां मदूक्षसत्पल्लवतल्यया
ता । मुतेः स्वराणां दधती विभा
गं तन्त्रीमुखाद् दक्षिणगुञ्जरीयम्
॥ अस्याः कालनियमो यथा । नाटो
गौडो वराडीच गुञ्जरी देशि रेव
च । पूर्वाह्णे गान मेतेषां निषिद्ध
मिति तद्विद. ॥ मतभेदेन पूर्वाह्णे
ऽपिगीयते ॥

गुञ्ज. । पुं । गुच्छे । पुष्पस्तवके ॥
गुञ्जकृत् । पुं । भ्रमरे ॥ गुञ्जं ध्वनिवि
शेषं करोति । डुकृञ् । किंसुकौ ॥
गुञ्जनम् । न । भ्रमरादीनां गुणगुण-
ध्वनौ । गुञ्जिते ॥
गुञ्जा । स्त्री । लताविशेषे । काकचि
ञ्च्याम् । रक्तिकायाम् । घुंघची
चिरमठी रत्ती इत्यादिभाषाप्रसि
द्धायाम् भिल्लभूषणायाम् ॥ श्वेत
रक्त प्रभेदेन ज्ञेयं गुञ्जाद्वयं बुधैः ।
गुञ्जाद यत्तु कैरव्यं स्वा दातपित्तज्व
रापहम् । मुखशोथभ्रमश्वासतृष्णा
मदविनाशनम् ॥ नेत्रामयहरं हृद्यं
पत्यं कण्डूत्रणं हरेत् । कृमीन्कुष्ठ
कुष्ठानि रक्तावदुषणानिच ॥ मान
विशेषे ॥ तुल्या यवाभ्यां कथिताव
गुञ्जेति लीलावती ॥ विषयपरिमा
णे । इति वैद्या: ॥ चतुर्दान्यपरिमा

गुडः

णे ॥ गोधूमद्रव्यमाने ॥ पटहे ॥ म
धुरध्वनौ ॥ मंदिरागृहे ॥ चर्चायां
म् ॥ गुञ्जति । गुजिअव्यक्तेशब्दे । प
। घञ्च् ॥
गुञ्जिका । स्त्री । गुञ्जार्थे ॥ स्वार्थेक: ॥
गुञ्जितम् । न । गुञ्जने ॥ न गुञ्जितं त
न्नजहार यन्मनः इतिभट्टिः ॥
गुटिः । स्त्री । गोले । जपसङ्
गुटिका । स्त्री । ख्यानसाधने । व
गुटी । स्त्री । टिकायाम् । गो
ली वडी इतिचभाषा ॥
गुडः । पुं । गोलके ॥ हस्तिसन्नाहे ॥
ग्रासे ॥ कार्पास्याम् ॥ इक्षोर्विकारे
। इक्षुसारे । त्रिशुप्रिये ॥ इक्षो र
सो य: सम्यक्पाको जायते लोष्टवद्दृढः
। स गुडो गौडदेशेतु मत्स्यण्डोव
गुडो मतः ॥ गुडो हृद्यो गुरुः स्नि-
ग्धो बातघ्नो मृदुशोधनः । नाऽति-
पित्तहरो मेद. कफकृमिबलप्रदः ॥
गुडो जीर्णो लघुः पथ्यो ऽनभिष्य-
न्द्यग्निपुष्टिकृत् । पित्तघ्नो मधुरो हृ
द्यो बातघ्नो ऽवृक् प्रसादनः ॥ गुडो
नव. कफश्वासकासकृमिकरोऽहित
त् ॥ श्लेष्माण मा शु विनिहन्ति स-
दाऽकेण पित्तं निहन्तिच सपथ्य ए
वोत्तकोभि. । गुड्या समं शर्करा
यां तत्समेषमित्यं दोषत्रयघातक ।

गुडफ

ये नमो गुडाय ॥ गुडति । गुड्वेष्टने । इगुपधेतिकः ॥ यद्वा । गवते । गुड् अव्यक्तेशब्दे । कादिभ्यःकिदितिडः ॥ सिता चतुर्गुणा देया वटीषु द्विगुणो गुडः ॥

गुडकी । पुं । गुडद्वारापक्वौषधविशेषे ॥ अस्य पूर्णं तेजः षण्मासपर्यन्तं तिष्ठतीतिपरिभाषा ॥

गुडकरी । स्त्री । रागिणीविशेषे ॥

गुडत्वक् । न । त्वचे । चोचे ॥ दारुचीनी इतिभाषाप्रसिद्धे गन्धद्रव्ये ॥

गुडत्वचम् । न । त्वक्पत्रे । गुडत्वचि ॥

गुडदारु । न । द्रुचौ । रसाले ॥

गुडधानाः । स्त्री । गुडमिश्रितधानासु । गुडधानी इतिभाषा ॥ गुडेन धानाः गुडधानाः । भक्ष्येणमिश्रीकरणमिति समासः । मिश्रणक्रियाद्वारासामर्थ्यम् । तांविना मिश्रीकरणाच्चायोगात् । बहुवचनान्तोयं धानाभक्ष्यवेक्षिय इतिबहुवचननिर्देशात् ॥

गुडधेनुः । स्त्री । दानार्थंगुडादिनिर्मितायांधेनौ ॥

गुडपुष्प । पु । मधूकवृक्षे । महुवाइतिभाषा ॥ गुडइवपुष्पमस्य ॥

गुडफलः । पुं । पीलुवृक्षे ॥

गुडुची

गुडेभा । स्त्री । यावनीलशर्करायाम् ॥

गुडेभमूलः । पुं । अल्पमारिषशाके ॥

गुडलम् । न । । गौडीमदिरायाम् ॥

। वि । गुडयुक्त । गुडला गुडली इतिभाषा ॥

गुडवीजः । पुं । मसूरे ॥

गुडशर्करा । स्त्री । पिण्डतायाम् ॥ इतित्रिकाण्डशेषः ॥

गुडशिग्रुः । पुं । रक्तशोभाञ्जने ॥

गुडा । स्त्री । क्षुद्रोम् ॥ गुडिकायाम् ॥ उणीर्यांम् । लघुकाशे ॥ गुडात् । टाप् ॥

गुडाकी । स्त्री । निद्रायाम् इतिश्रीधरस्वामिनः ॥

गुडाकेशः । पु । सदाशिवे ॥ गुडाकेशवत् केशा अस्य जटाधारित्वात् ॥ अर्जुने ॥ गुडाकायाईशः ॥ वि । । जितनिद्रे ॥ सर्वत्र सावधाने ॥

गुडालक । पु । न । केशचक्रे ॥ मुखं मुकुन्दस्य गुडालकावृतम् ॥

गुडाशय । पु । आखोटे ॥ वि । गुडेच्छौ ॥

गुडिका । स्त्री । दृढवटिकायाम् ॥ वटिका गुडिका चेति संज्ञाऽन्तरभेदत । इतिवैद्यकपरिभाषा ॥

गुडुची । स्त्री । गुडूच्याम् । अमृतायाम् ॥

गुडूची

गुडूची । स्त्री । गिलोय इतिभाषाप्रसिद्धायां लतायाम् । वत्सादन्याम् । छिन्नरुहायाम् । अमृतायाम् ॥ अस्या उत्पत्त्यादिकं यथा । अथ लङ्केश्वरो मानी रावणो राक्षसाधिपः ॥ राम पत्नीं वना च्छीतां जहार मदनातुरः ॥ तत स्तं बलवान् रामो रिपुं जायापहारिणम् । हतो वानरसैन्ये न लघानरणमूर्द्धनि ॥ हते तस्मिन्सुरारातौ रावणे बलगर्विते । देवराजः सहस्राक्षः परितुष्टो ऽतिराघवे ॥ तत्र ये वानराः केचि द्राक्षसै र्निहता रणे । तान्निन्दो जीवया मास संसिच्या ऽमृतवृष्टिभिः ॥ ततो येषु प्रदेशेषु क्षपिगात्रान् परिच्युताः । पीयूषबिन्दवः पेतु स्तेभ्यो जाता गुडूचिका ॥ गुडूची कटुका तिक्ता स्यादुपाकरसायनी । सङ्ग्राहिणी कषायोष्णा लघ्वी वल्याग्नि दीपनी ॥ दोषत्रयामवड्डाहमेह कासांश्च पाण्डुताम् । कामलाकुष्ठ वातास्रज्वरकृमिवमी र्हरेत् ॥ गुडति । गुडरक्षणे । बाहुलकादूच ट् । ङीष् ॥

गुडूचीकल्कः । पुं । कल्कविशेषे ॥ सच या । अमृतायाः शतं चूर्णं वाससा परिगोधितम् । पृथक् षोडशभागाः

गुण

स्युर्गुडमाक्षिकसर्पिषाम् ॥ यथाग्नि । मेत्रये देतन्नरो नित्यमिताशनः । नीरुक् कश्चिद्भवेद्व्याधि र्जराप्रकृतं नच ॥ न ज्वरा विषमा नैव मेहना निजरक्तकम् । न च नेत्रगता रोगाः परमेतद्रसायनम् ॥ मेधाकरं त्रिदोषघ्नं प्रयोगा दस्य बुद्धिमान् । जीवे दर्षशतं सार्द्धं यथैवादितिर्ज्ञ ऽत्रयेति ॥

गुडूचीपत्रम् । नं । अमृतापत्रे ॥ गुडूचीपत्रं माग्नेयं सर्व्वज्वरहरं लघु । कषायं कटु तिक्तञ्च स्वादुपाकं रसायनम् ॥ वल्यं मुखाक्ष्णां सङ्ग्राहि दीपनं दोषवर्च्चसाम् । दाह भ्रमे हवातास्रकामलाकुष्ठपाण्डुताः ॥

गुडेरः । पुं । गुडके ॥ आसे ॥ गुडति गुडण् पर्त्तिकठिकुठिगडिगुडिदंशिभ्यरक् ॥

गुडेरकः । पुं । आसे ॥

गुडोद्भवा । स्त्री । शर्करायाम् ॥

गुणः । पुं ॥ सौर्य्याम् । ज्यायाम् । धनुराकर्षणरज्जौ । चिल्ला इति भाषा ॥ प्रधाने । शौर्य्यादौ रसगन्धादौ च ॥ तल्लक्षणं यथा । सच्चे निविशते ऽपैति पृथक्जातिषु दृश्यते । आधेयस्य क्रियाजस्य सो ऽसत्त्वप्रकृति र्गुणः ॥ सच्चंद्रव्यम् । सत्त्वस्य

निविशतेऽतिसावधारणंव्याख्येयम्। एतेनसत्ताव्यावर्त्तते। साहिनकेवलं द्रव्येवर्त्तते किंतुद्रव्यगुणकर्मसु। ननुद्रव्यएवद्रव्यत्वंवर्त्ततेऽतितत्राति व्याप्तिरतआह। अपैतीतिता अपगच्छतीत्यर्थः। अर्थात्सत्ताादेव। यआपीततायां जातायां फलादेर्नीलतापैति नैवंद्रव्यत्वं द्रव्यादपैति। एवमपि गोत्वंगोषुवर्त्तते, अश्वादेश्चापैति तत्रातिव्याप्तिरतआह। पृथग्जातिषुदृश्यतेइति। गोत्वंहिद्रव्यत्वावान्तरजातिषु नदृश्यते गुणस्तुदृश्यते। यथा कम्बेर्दृष्टा नीलतादिष्वपिदृश्यते। एतेनपूर्वार्द्धेनसकलजातेर्व्यवच्छेदः। एवंतर्हिकर्मद्रव्येवर्त्ततेततोऽपैति पृथग्जातिषुदृश्यतेचेतितत्रातिव्याप्तिरतआह। आधेयश्चाक्रियाजश्चेति। उत्पाद्योत्पादयद्यर्थः। उत्पाद्योयथा। घटादेः,पाकजोरूपादिः। अक्रियाजः, अनुत्पाद्यः। सयथा। आकाशादेर्भवत्यादिः। क्रियातु सर्वाप्युत्पाद्यैव नित्येति तस्या द्वैविध्याभावाद्गुणत्वाभाव। एवमपि द्रव्यत्वगुणत्वंप्राप्नोति अवयविद्रव्यंहि अवयवद्रव्येषुनिविशते। असमवायिकारणसंयोगनिवृत्तौ विनाशात्ततोपैति भिन्नजातौ

येषु च तेस्तत्रादिषुदृश्यते। द्विविधंचभवति नित्यानित्यभेदेन। निरवयवत्वात्परमाण्वादेर्नित्यत्वाद्द्रव्यविद्रव्यत्वतुघटादेर नित्यत्वादुत आह। असत्त्वप्रकृतिरिति। अद्रव्यस्वभावइत्यर्थः॥ ॥ उपैत्यन्यं त्यजत्यन्यद्दृष्टो द्रव्यान्तरेष्वपि। वाचकः सर्वलिङ्गानां द्रव्यादन्यो गुणः स्मृतः॥ इति पारिभाषिकोगुणो ऽप्रधानएवान्तर्भवति॥ तेजोबलवीर्यैश्च यैर्वैराग्यशक्तयश्चपराश्रितत्वा देव गुणाः॥ शुक्लादयो॥ सचशुक्लादिश्चद्रव्यानां पटादौ प्रवृत्तिनिमित्तंभवति॥ विशेषाधानहेतौ सिद्धे वस्तुधर्मे। शुक्लाद्योहि गवादिकं स्वजातीयेभ्यःकृष्णगवादिभ्यो व्यावर्त्तयन्ति॥ अपिच। द्रव्यत्वव्यापकतावच्छेदकसत्तान्यजातिमत्त्वंतदर्थं॥ यथा। रूपरसगन्धस्पर्शसङ्ख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वस्नेहशब्दबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्काराश्चतुर्विंशतिगुणाइति॥ कर्मव्यतिरिक्तत्वेसतिजातिमत्त्वाभ्यये॥ विवेकवैराग्योपरतितितिक्षासमाधनेषु॥ आकाशादौ। सांसिद्धिकवैनयिकप्राकृतिकभेदभिन्ने॥ द्रव्याश्रिते। फलादेर

गुणः

सगन्धादौ॥ स्पर्शे॥ इन्द्रिये॥ त्यागे॥ शौर्यादौ॥ सत्त्वरजस्तमसु॥ गुणानाम् परमं रूपं न दृष्टिपथमृच्छति। यत्तु दृष्टिपथं प्राप्तं तन्मायैव सुतुच्छकमिति भगवान्वार्षगण्यः। गुणानांसत्त्वादीनाम् परमंरूपम् अधिष्ठानमात्रेत्यर्थः॥ राज्ञः सन्धिविग्रहादौ॥ यथा। सन्धिविग्रहयानानि संश्रयो द्वैधमासनम्। द्वैधीभावश्च विज्ञेया षड्गुणा नीतिवेदिनामिति॥ देशकालज्ञतादिच तुर्दशसु॥ तेच। देशकालज्ञतादार्ढ्यं सर्वक्लेशसहिष्णुता। सर्वविज्ञानता दाक्ष्यं मूर्जः संहतमन्त्रता॥ अविसंवादिता शौर्यभक्तित्वं कृतज्ञता। शरणागतवात्सल्यं समर्षित्वमचापलम्॥ एतेचतुर्दश गुणाः प्रोक्ताः शास्त्रेषुसूरिभिः॥ गौतमोक्तागुणा यथा। दयासर्वभूतेषु क्षान्तिरनसूया शौचम् अनायासःमङ्गलम् अकार्पण्यम् अस्पृहेति॥ काव्यगुणास्तु। यथा। ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः। उत्कर्षहेतवस्तेषु रचलस्थितयो गुणाइति॥ तद्भेदा यथा। श्लेषः प्रसादः समता माधुर्यं सुकुमारता। अर्थव्यक्तिरुदारत्वं ओजःकान्तिस

गावेषु

माधयः॥ इतिवैदर्भमार्गस्य प्राणा दशगुणाः स्मृताः। माधुर्यौजःप्रसादाख्यास्त्रयस्तेनपुनर्दश॥ तत्र दशसङ्ख्याभावे हेतुर्यथा। केचिदन्यभेदान्वेषु दोषत्यागात्परेस्थिताः। अन्येभजन्ति दोषत्वं कुत्रचिन्नततोदश॥ आदृतौ॥ रज्जौ॥ तन्त्रौ॥ भीमसेने॥ उत्कर्षे। दैर्घ्यान्यस्मिन्विशेषणे॥ समानभागे॥ यथा। सङ्ख्यागुणस्यनिमानेमयडित्यच्॥ संज्ञाजातिक्रियाशब्दान्हित्वाऽन्येगुणवाचिन। चतुष्टयी शब्दानांप्रवृत्तिरित्याकरग्रन्थनिष्कर्षः॥ गुण्यते। गुणअभिधाने। घञ्॥ गुणाः कुर्वन्ति दूतत्वं दूरेपि वसतां सताम्। केतकीगन्धमाघ्राय स्वयं गच्छन्तिषट्पदाः॥

गुणकः। पुं। पूरकाङ्गे॥ यथा। गुणालम्भङ्गुणकेनहन्यादिति॥

गुणकारः। पुं। भीमसेने॥ त्रि। गुणकारके॥

गुणग्राहि। त्रि। गुणपक्षपातिनि॥ गुणानांग्राहः। पदान्यैरिवाख्यापक्षे पचेनिग्रहे क्विप्॥

गुणज्ञ। त्रि। गुणवेत्तरि॥ यथा। गुणिनि गुणज्ञो रमते नाऽगुणशीलस्य गुणिनि परितोषः। अलि रेति

गुणभे।

वनात् कमलं नहि भेक स्त्वेकया सोपि ॥

गुणत्रयविनिर्म्मितः। पुं। मायाकल्पिते संसारवृक्षे ॥

गुणधर्म्म। पुं। गुणाश्रितधर्म्मे ॥ यथा। यो गुणेन प्रवर्त्तते गुणधर्मः सउच्यते। यथा मूर्द्धाभिषिक्तस्य प्रजानां परिपालनमिति ॥

गुणनिका। स्त्री। नृत्ये ॥ शून्याङ्के ॥ पाठनिश्चये ॥ मालायाम् ॥ आभरणे ॥ गुणआग्रेडने। चु०। गण्यास अन्योद्युजितियुच्। कात्यैवैस्त्रेकारः ॥ शास्त्रादीनांशीलने ॥

गुणनी। स्त्री। पाठनिश्चये। शीलने ॥

गुणनीयः। पुं। शास्त्राद्यभ्यासे ॥ इति हारावली ॥

गुणप्रबन्धः। पुं। चेतनाचेतनात्मके प्रपञ्चे ॥

गुणप्रवृद्धः। पुं। संसारवृक्षे ॥ तच्छाखायाम् ॥ गुणे सत्त्वरजस्तमोभिर्देहेन्द्रियविषयाकारपरिणतैर्जलसेचनैरिव स्थूलीभूतत्वात् ॥ गुणैःप्रवृद्धः ॥

गुणभोक्तृ। न। चेतनब्रह्मणि ॥ सत्त्वरजस्तमसां शब्दादिद्वारा सुखदुःखमोहाकारेण परिणतानामुपलब्धृत्वात् ॥

गुणभ्रंशः। पुं। गुणनाशे। वर्त्यन्तिकायाम् ॥

गुणवयनिका। स्त्री। वस्त्रनिर्मितगृहे केणिकायाम् ॥ इति हेमचन्द्रः ॥

गुणवयनी। स्त्री। गुणवयनिकायाम्। पटकुट्याम् ॥ इतिहलायुधः ॥

गुणवान्। त्रि। गुणविशिष्टे। मदधीना एते गुणा इत्यभिमानवति ॥ गुणवन्तं नियुञ्जीत गुणहीनन्तु वर्জ্জयेत्। पण्डितस्यगुणाः सर्वे मूर्खे दोषाहिकेवलमितिगारुडेनीतिसारः ॥ गुणोस्त्यस्य। मतुप् ॥ सम्बन्धिनि ॥

गुणवादः। पुं। प्रमाणान्तरविरोधेस्त्यर्थवादे ॥ यथा। आदित्योयूपः इत्यादिषु यूपे आदित्यभेदस्यप्रत्यक्षबाधितत्वात् आदित्यवदुज्ज्वलरूपोगुणोऽनेनलक्षणया प्रतिपाद्यते। इति ॥

गुणवित्। त्रि। साङ्ख्यज्ञे ॥ 'सच्च सत्त्वरजस्तमांसि त्रयोगुणाः साम्येनावस्थिताः जगतोमहदादिलक्षणस्य कारणमिति कल्पयति ॥ गुणज्ञे ॥

गुणवृक्षः। पुं। कूपके। नौकामध्यस्थे रज्जुबन्धनस्तम्भे। गुणधरा मस्ततूला इति भाषा ॥ गुणानां रज्जूनां वृक्षः ॥

गुणवृक्षकः। पुं। कूपके ॥ संज्ञायां-

गुणितः
कर्म्म॥
गुणसङ्गः। पुं। शब्दादिषु सुखदुःखमोहात्मकेष्वभिष्वङ्गे॥ गुणेषुसङ्गः॥
गुणसङ्ख्यानम्। न। साङ्ख्ये कापिलशास्त्रे॥ गुणाः सत्त्वरजस्तमांसि सम्यक् कार्यभेदेन ख्यायन्ते प्रतिपाद्यन्ते ऽस्मिन्निति व्युत्पत्तेः॥
गुणसम्मूढः। त्रि। गुणैः कार्यतयाधर्म्मैर्देहादिभिर्विकारैः सम्यङ्मूढे। स्वरूपास्फुरणेन तानेवात्मत्वेन मन्यमाने॥
गुणसागरः। पुं। ब्रह्मणि। विधातरि॥ बुद्धविशेषे॥ त्रि। सकलगुणाधारे॥ गुणानां सागरः॥
गुणा। स्त्री। दूर्व्वायाम्॥ मांसरोहिण्याम्॥
गुणाकरः। पुं। बुद्धे॥ त्रि। गुणान्विते॥ गुणानामाकरः॥
गुणातीतः। त्रि। परमेश्वरे॥ गुणाः शीतोष्णसुखदुःखादयः सत्त्वादयो वा तान् अतीतो ऽतिक्रान्तः॥ स्थितप्रज्ञे॥
गुणान्वितः। त्रि। विवेकवैराग्योपरतितितिक्षासमाधानयुक्ते॥ सुखदुःखमोहात्मकगुणैर्युक्ते॥ गुणयुक्ते॥
गुणितः। त्रि। आहते। पूरिते॥ यथा। पञ्चधा गुणिता पञ्चसङ्ख्या पञ्चविंशतिर्भवतीत्यादिः॥ घिण्डिते॥ आवर्त्तिते। अभ्यस्ते॥ गुणयते स्म। गुण आमन्त्रणे। क्तः॥
गुणी। पुं। धनुषि। शरावापे। चापे॥ त्रि। गुणविशिष्टे॥ गुणोऽस्यास्ति। इनिः॥
गुणीभूतः। त्रि। अप्रधानीभूते॥
गुणीभूतव्यङ्ग्यः। पुं। काव्यविशेषे॥ यथा। असादृश्ये गुणीभूतव्यङ्ग्यं व्यङ्ग्येतु मध्यमम्॥
गुणेशः। त्रि। सत्त्वादिगुणानां नियामके। ईश्वरे॥
गुणेश्वरः। पुं। चित्रकूटाचले॥ त्रि। गुणाढ्ये॥ गुणानाम् ईश्वरः॥
गुणोत्कर्षः। पुं। अतिशये। गुणप्राधान्ये। परभागे॥
गुणोत्कीर्त्तनम्। न। गुणकथने॥ विरुदकालिकमित्रादिविषयकप्रशंसाप्रतिपादने॥
गुण्ठितः। त्रि। वेष्टिते॥ गुण्ठिते। रुषिते॥ गुण्ठ्यते स्म। गुठिवेष्टने। क्तः॥
गुण्ड। पुं। अतिपङ्के। नीलपङ्के। दृणविशेषे॥ यस्यकन्दः कशेरुः॥
गुण्डक। पुं। मलिने॥ धूलौ॥ कलौ॥ क्लीबे॥

गुण्डिकः
या॥

गुत्सः

गुण्डकन्दः । पुं । कन्देरुषि ॥

गुण्डारोचनिका । स्त्री । काम्पिल्ले । कं वीला इति भाषा ॥

गुण्डाला । स्त्री । चुद्रचुपविशेषे । जलेाङ्गतायाम् । गुच्छवप्रायाम् ॥

गुण्डासिनी । स्त्री । तृणविशेषे । गुच्छमूलिकायाम् । चिपिटायाम् ॥

गुण्डिकः । पुं । स्त्री । गुण्डके । तण्डुलादिचूर्णे ॥ गुण्डिकैः सिनपीतैश्च मण्डयन्ती मुखाङ्गनम् ॥

गुण्डिचा । स्त्री । श्रीपुरुषोत्तमदेवस्य रथारोहणानन्तरं वासार्थं मण्डपविशेषे । गुलीचीवाडी इतिभाषा ॥ सप्तर्क्षं ये प्रपश्यन्ति गुण्डिचामण्डपस्थितम् । मार्कण्डेयं सुभद्राञ्च नमस्यामुपुरित्युक्त्वा लभन्ते मण्डम् ॥

गुण्डितः । त्रि । रजसाकीर्णे । लुण्ठिते ॥ गुण्ड्यतेस्म । गुडिवेष्टने । क्तः ॥

गुण्ड्यः । त्रि । गुण्डयति । प्रशस्तगुणयुक्ते ॥ अन्येभ्योपिदृश्यतइतियप् ॥

गुत्या । पुं । गवेधुकायाम् ॥

गुत्यकम् । न । ग्रन्थिपर्णे ॥

गुत्सः । पुं । स्तबके । विकासोन्मुखकलिकायाम् ॥ कलिकादिकदम्बे ॥ गुथ्यते गुथपरिवेष्टने । उन्दिगुधिकुषिभ्यश्चेतिसः कित् ॥ स्तमे ॥ दार्चि यष्टिकेदारे ॥ ग्रन्थिपर्णि ॥

गुदयो

गुत्सकः । पुं । स्तबके । गुच्छा इतिभा षा ॥ ग्रन्थपरिच्छेदे ॥

गुत्सकपुष्पः । पुं । सप्तपर्णे ॥

गुत्सार्द्धः । पुं । गुच्छार्द्धे । चतुर्विंशतियष्टिकाभिर्निर्मितेहारे । गुत्सस्य अर्द्धः ॥

गुदम् । न । अपाने ॥ गुदस्य मानं सर्वसमासार्द्धाङ्गुलतुरङ्गुलम् । तस्य मूर्ध्वत्रयस्त्रिंशः षड्वावर्त्तनिभा लताः ॥ प्रवाहिनीभवेत् पूर्वा सा सार्द्धाङ्गुलमिता मता । उत्सर्जनीच तद्वच सा सार्द्धाङ्गुलसम्मिता ॥ तस्या अधःसंवरणी स्या देकाङ्गुलसम्मिता । अर्द्धाङ्गुलप्रमाणन्तु बुधै र्गुदमुखं मतम् ॥ मज्जोत्सर्गस्य मार्गोयं वायुर्देहे विनिर्मितः ॥ गोदन्ते । गुदक्रीडायाम् । इगुपधेतिकः ॥ यद्वा । गूयते ऽनेन । गुपूरीषोत्सर्गे । गवते वा । गुड्यब्दे । अच्वादयश्चितिसाधु ॥

गुदकीजः । पुं । }
गुदकीलकः । पुं । } अर्शोरोगे ॥

गुदभ्रंशः । पुं । उदावर्त्तरोगे ॥

गुदभ्रंशः । पुं । रोगविशेषे ॥ तस्य लक्षणं यथा । प्रवाहणातिसारार्त्या । निर्गच्छति गुदं दृष्टिः । रूक्षदुर्बलदेहस्य गुदभ्रंशं तमादिशेदिति ॥

गुदयोनिः । पुं । कुम्भीके ॥

गुरुः

ग्रन्थे । यन्त्रः । क्तः ॥

गुरणम् । न । उद्यमे । भारादौ धिमने ॥ गुरौउद्यमे । कुटादिः । ल्युट् ॥

गुरुः । पुं ॥ निषेकादिक्रति ॥ निषेकोगर्भाधानम् आदिना सीमन्तोन्नयनादेः मन्त्रविवाहादिनादेश्च ग्रहणम् । तत्कर्त्ता पित्रादिर्गुरुरुच्यते । यथा । निषेकादीनि कर्माणि यः करोति यथाविधि । सम्भावयतिचान्नेन स विप्रोगुरुरुच्यते इतिमनुः ॥ सगुरुर्यः क्रियां कृत्वा वेदमस्मै प्रयच्छति ॥ पितृव्याचार्यादौ ॥ शास्त्रोपदेष्टरि । शास्त्रवेदबोधके ॥ उपदेष्टरि । सम्प्रदायप्रवर्त्तके ॥ शान्तोदान्तः कुलीनश्च विनीतः शुद्धवेशवान् । शुद्धाचारः सुप्रतिष्ठः शुचिर्दक्षः सुबुद्धिमान् ॥ आश्रमी ध्याननिष्ठश्च मन्त्रतन्त्रविशारदः । निग्रहानुग्रहेशक्तो गुरुरित्यभिधीयते ॥ उद्धर्तुञ्चैव संहर्तुं समर्थो ब्रह्मशोत्तमः । तपस्वी सत्यवादीच गृहस्थो गुरुरुच्यते ॥ तस्य देशभेदेनविशेषो यथा । मध्यदेशकुरुक्षेत्रपञ्चाटकोद्भवसम्भवाः । अन्तर्वेदीप्रतिष्ठाना आवन्त्याश्चगुरूत्तमाः ॥ गौडाः साल्वोड्रवाः सौरा मागधाः केरलास्तथा । कोसलाश्च दशार्णाश्च गुरवः सप्तमध्यमाः ॥ कर्णाटनर्मदारेवाकच्छातीरोड्रवा स्त्रियः । काञ्चिद्राश्च कलिङ्गाश्च काम्बोजाश्चाधमा मताः ॥ मध्यदेशसमुद्भूतः शान्तः सर्वगुणैर्युतः । पुत्रदारैश्च संयुक्तोगुरुरागमसम्मतः ॥ मध्यदेशसमुद्भूतइतिश्रेष्ठत्वदर्शनार्थम् ॥ गौडे शाक्तो गुरुः शस्तः शैवे शैवो गुरुर्मतः । वैष्णवे वैष्णवः सौरे सौरो गुरुरुदाहृतः ॥ गाणपत्ये गाणपत्यः कौलः सर्वत्र सद्गुरुः ॥ इति श्रीमहानिर्वाणतन्त्रम् ॥ रोगग्रस्तो यथा वैद्यः परीक्ष्यचिकित्सकः । तथा गुरुं मुमुक्षोर्मे गृहस्थो यं विदुष्वनेति श्रीदेवीभागवतम् ॥ विशेषस्तन्त्रसाराद् ज्ञेयः ॥ शिष्येण सद्गुरोर्निन्दादिकं न श्रोतव्यं तत्प्रमाणमाह । गुरोर्यत्र परीवादो निन्दावापि प्रवर्त्तते । कर्णौ तत्र पिधातव्यौ गन्तव्यं वा ततोन्यत इति ॥ अथनिन्दापरीवादयोः सदसद्दोषविषयकत्वेन भेदोवोध्यः ॥ द्विमात्रे । दीर्घे ॥ दीर्घस्वरो बिन्दुयुतो विसर्गी संयुक्तपूर्वश्च गुरुर्द्विमात्रः । पादान्तगामीतु गुरुर्लघुर्वा वर्णो विसर्गेण गुरुर्नियुक्तः ॥ दशम्यौ । सुराचार्य्ये ॥ द्रोणाचार्य्ये ॥ कपिकच्छू

गुरुत्व

भ्र॥ त्रि। गम्भीरार्थे॥ बहुवचति॥ पूज्ये॥ महति॥ दुर्ज्जरे॥ अलघौ॥ गृणाति उपदिशतिधर्म्मादि॥ गृ शब्दे॥ गिरत्यज्ञानं वा॥ गृनिगर णे॥ कुग्रोरुच्चेतिकुः॥ उपत्वात्तादेशः॥

गुरुक्रमः। पुं॥ दृतिष्ठ॥ पारम्पर्योपदेशे॥ दृतिष्ठलायुधः॥

गुरुगृहम्॥ न॥ आचार्यवेश्मनि॥ घनुर्मौनिराश्योः॥

गुरुघ्नः। पुं॥ गौरसर्षपे॥ त्रि। गुरुहन्तरि॥

गुरुघण्टकः। पुं॥ तिलमबूरे॥ इतित्रि काण्डशेषः॥

गुरुतरः। त्रि॥ गरीयसि॥ सारवत्तरे॥

गुरुतल्पगः। पुं॥ विमाठगन्तरि॥

गुरुता॥ स्त्री॥ गुरुत्वे॥ भावेतल्॥

गुरुतालः। पुं॥ तालविशेषे॥ यथा। एकस्यगुरुर्यत्रगुरुतालः सकथ्यते। अपरं नियमंविनेति॥

गुरुत्वम्। न॥ महत्त्वे॥ पतनप्रतियोगिनिगुणे। आद्यपतनासमवायिकारणे। अलघुतायाम्॥ यथा। अतीन्द्रियंगुरुत्वं स्यात् पृथिव्यादिद्वयेतु तत्। अनित्ये तदनित्यंस्या न्नित्येनित्यमुदाहृतम्॥ तद्वेवा समवायिस्यात् पतनाख्येतु कर्मणि॥ इतिभाषा परिच्छेदः॥ गुरोर्भावः।

गुर्व्वरः

तस्यभावस्त्वतलौवितिल्वः। त्वान्तं क्लीबम्॥ पिण्डपुष्टौ॥

गुरुदैवतम्। न। पुष्यनक्षत्रे॥ त्रि। गुरुदैवतत्परे॥ गुरुर्दैवतं यस्य॥

गुरुधर्म्मा। त्रि॥ गुरुकर्म्मणि रते॥

गुरुपत्नी। स्त्री॥ अस्त्रिकायाम्॥ तिस्त्रिडीदूचे॥

गुरुभारिकम्। न॥ लघुपाके॥

गुरुमर्दलः। पुं॥ डिण्डिमशब्दे॥

गुरुरत्नम्। न॥ पुष्परागभेदे॥

गुरुवर्त्तोन्नः। पुं॥ खिम्पके॥ काग्दी नींबू इतिभाषा॥

गुरुवर्त्ती। त्रि॥ गुरुशुश्रूषके॥

गुरुवासी। पुं॥ नैष्ठिकब्रह्मचारिणि॥ अष्टाशीतिसहस्राणां यतीनां मूर्द्ध रेतसाम्। स्मृतं स्थानन्तु यत्तेषां तद्देवगुरुवासिनाम्॥

गुरुशिंशपा। स्त्री॥ शिंशपाद्रुमे॥

गुरुशुश्रूषा। पुं॥ विद्यादातुःसेवायाम्॥ यथाहभगवान्। नाधीतविद्याप्रजातिभ्यां तपसोपशमेनवा। तुष्येयं सर्वभूतात्मागुरुशुश्रूषयायथेति॥

गुरुसारा। पुं॥ शिंशपायाम्॥

गुरुस्कन्धः। पुं॥ शेफालावृक्षे॥

गुरुहा। पुं॥ गुरुघ्ने। नरकीलके॥

गुरूपदिष्टः। त्रि॥ आचार्य्योक्ते॥

गुर्व्वरः। पुं॥ देवविशेषे॥ तद्देवमन्त्रे

गुञ्जिका

गुम्मूचि॥

गुर्ज्जरी । स्त्री॥ रागिणीविशेषे ॥ रीतिभेदे ॥ गुर्जरदेशवनितायाम् ॥ वसति रतिपतिर्गुर्जरीणां कुचेषु॥

गुर्व्वादित्यः । पुं । रोगविशेषे । सूर्य्य जीवयोरेकराशिस्थितौ ॥

गुर्व्विणी । स्त्री । गर्भिण्याम्॥ गुरु र्दुर्जरो लघुर्वा गर्भोऽस्यस्तीति इनिः ङीप्छा बादित्वात् इनिः ङीपूर्वकत्वे त्वगुरुः ॥ यद्वा । गर्वति । गर्व गतौ । गर्वेरतउच्चेतीनन् । गौरादित्वात्ङीष्॥

गुर्व्वी ॥ स्त्री । गुर्विण्याम् । गर्भवत्याम् ॥ नहि वन्ध्या विजानाति गुर्वीप्रसवेदनाम् ॥ गुरुपत्न्याम् ॥ गुरुत्व युक्तायाम् ॥

गुलः । पुं । रोचके । गुडे ॥

गुलच्चकन्दः । पुं । गुच्छालुकन्दे । निघण्टिकायाम् । कुछी इति गौड-भाषा ॥

गुला । स्त्री । खुरीकृते । खुरर इति भाषा ॥

गुलिका । स्त्री । गुटिकायाम् ॥ गोली इतिभाषाप्रसिद्धे आम्रेयास्रमधेय-वस्तुनि ॥ गुडयुक्तकुल्माषटङ्कणक्षार-विशेषे ॥ एतेन गुडयुक्तेन गोलकुल्माषटङ्कणखण्डकान् । रन्ध्रितान् जीरमरिचे लिप्तान् सुगुलिका विदुः ॥

गुल्मः

रोगविशेषे ॥

गुली । स्त्री । गुटिकायाम् ॥ सोतला इति भाषा प्रसिद्धे रोगे ॥

गुलुञ्छः । पुं । गुच्छे । स्तवके ॥ गुजङ्घायाम् । गुलुछु इति पर्व्वतीय भाषा ॥ गुच्छशब्दार्थेषु । गुल्सेो गुच्छे । गुलुञ्छवदितिविरूपकोषात् ॥

गुलुञ्छः । पुं । गुच्छे ॥

गुल्फः । पुं । घुटिकायाम् । पादग्रन्थौ । टकुना इति भाषा ॥ गल्फति गल्फते वा । गल्फ शब्दने । कल्गिगर्भिभ्यां फगल्फेत्यौणादिकः फक् प्रत्ययः । अतउत्वञ्च ॥

गुल्मः । पुं । सत्यप्रधानपुरुषाधिष्ठितेऽचित्तपुरुषसमूहे ॥ विष्णुसेनामुखेषु ॥ तत्रभाः ९ रथाः ९ अश्वाः २७ पदातयः ४५ । समुदायेन ९० । एतत्परिमाणविशिष्टासेना गुल्म इत्यर्थः । सैन्यरचने ॥ व्यूहभेदे ॥ रक्षार्थं सैन्यस्थाने ॥ अग्न्यागारादौ । स्तम्बे । वृक्षादीनां । वृक्षसमूहे । एकमूलाः सङ्घातजाताः शरेक्षुप्रभृतयो गुल्माः ॥ प्लीहरोगे ॥ वायुगोला इति ॥ सिद्धरोगे ॥ यथा । दुष्टा वातादयो दोषाः स्वार्थं मिथ्याहारविहारतः । कुर्वन्ति पञ्चधा गुल्मं कोष्ठाश्रयमधिकृविकम् ॥

गुवाकः
तस्य पञ्चविधं स्थानं पार्श्वहृन्नाभिवृषणः ॥ हृन्नाभ्योरन्तरे ग्रन्थिः सञ्चारी यदिवा चलः । वृत्तः क्षयापचयवान् स गुल्मइतिकीर्त्तितः ॥ सर्व्वैर्जायते दोषैः समस्तैरपिचोच्छ्रितैः । पुरुषाणां तथा स्त्रीणां क्षेयो रक्तेन चापरइति ॥ गुह्यतेऽस्मात् । भीमादयोपादाने इतिसाधुः ॥ यद्वा । गुह्यते गुडतिवा । गुडवेष्टने रक्षणे वा । बाहुलकात् मक् । डलयोरेकत्वञ्च ॥

गुल्मकेतुः । पुं । अम्लवेतसे ॥

गुल्ममूलम् । न । आर्द्रके ॥

गुल्मवल्ली । स्त्री । सोमलतायाम् ॥

गुल्मी । त्रि । गुल्मयति । गुल्मविशिष्टे ॥

गुल्मिनी । स्त्री । वृषपर्णीशाकतातम्बूल्यादिरूपायां प्रतानिन्यां लतायाम् । सप्तशखतायाम् । उलपे ॥ गुल्मः प्रतानोऽस्त्यस्याः । अतइनिठनाविति नित्वात् । ङीप् ॥

गुल्मी । स्त्री । आमलक्याम् ॥ खवल्याम् ॥ एलायाम् ॥ वल्लवेशे । पटौकसि ॥ वन्यायाम् ॥ गृध्रनखीवृक्षे । गुडकाख्यौषधौ इतिगौडमाधवप्रसिद्धे ॥

गुल्यः । पुं । मधुरे । स्वादौ ॥

गुवाकः । पुं । सुपारीइतिप्रसिद्धे वृक्षे

गुह्यम्
। घोणटायाम् । पूगे । क्रमुके ॥ गुवर्त्यनेनेति । गुपुरीषोत्सर्गे । पिनाकादयश्चेति साधुः ॥

गुहः । पुं । कार्त्तिकेये । स्कन्दे ॥ अन्ये । घेटिके ॥ गृङ्गवेरपुरवासिनि निषादाधिपतौ श्रीरामसखे ॥ गूहति रचति सेनाम् । गुहसंवरणे । इगुपधेतिकः ॥ विष्णौ ॥ गूहते संवृणोति स्वरूपादीनिमाययेतियोगात् ॥

गुहपष्ठी । स्त्री । मार्गशीर्षशुक्लषष्ठ्याम् ॥

गुहा । स्त्री । सिंहपुच्छीलतायाम् ॥ गर्त्ते ॥ अकृत्रिमेऽद्रिविवरे । पर्वतान्तरावकाशे । देवखाते । बिले । गुफा द्वार इतिचभाषा ॥ क्षमत्त्वयास्मात् टाप् ॥ भिदादिषड् वा ॥ गूढा अस्यां ज्ञानज्ञेयज्ञातृपदार्थाः इतिव्याख्यानात् विदुषांबुद्धौ ॥ हृदये हृदाकाशे ॥ अज्ञाने ॥

गुहाचरः । त्रि । गुहावुपलभ्यमाने ॥ गुहायांचरति । चरेष्टः ॥

गुहाशयः । पुं । मूषिके ॥ सिंहादिषु ॥ सिंहव्याघ्रवृका ऋक्षतरक्षुद्विपिनस्तथा । वन्यभुजम्बुकमार्जारा इत्याद्याः स्युर्गुहाशयाः ॥ गुहाशयाघातपाग गुरुणा मधुराश्ने । स्निग्धावल्या हिता नित्यं नेत्रगुह्यविकारिणि

गुह्यक:

धाम् ॥ विष्णो । परमात्मनि । प्रत्यु
क्रमप्रत्ययणाभिवादनं विधीयते सो
धु सिध सुमध्यमे । प्राचैः परस्मै
पुरुषाय चेतसा गुहाशयायैव नदे
हमानिने ॥ गुहायां शेते । शीङ्०।
अधिकरणे शेतेरिच्यच् ॥

गुहाहितः । त्रि । वुद्धिस्थे । गुहायामा
हितः ॥

गुहिलम् । न । धने । वने ॥ गूहति
गूहते वा गुहु० । गुपादिभ्यः किदि
तिदुलच् ॥

गुहेरः । पुं । गोसरि ॥ लोहिकारे ॥

गूहति गूहते वा गुहु० । मूलेरादि
यश्चेत्येरक् ॥

गुह्यः । पुं । कामठे ॥ दम्भे ॥ परमात्म
नि । विष्णौ ॥ रहस्यो पनिषद्वेद्यत्वा
त् गुहायां बुद्धौ हृदयाकाशे वा नि
हितः इति वा गुह्यः । गुह्यमर्हति
। दण्डादिभ्यइतियत् ॥ न । रहसि ॥
उपस्थे । भगलिङ्गयोः ॥ गुदे ॥ त्रि ।
रहस्ये । गोप्ये । यस्मै कस्मै चिदक
थनार्हे ॥ निर्जने ॥ गुहानिवासिनि ॥
गूहनम् गुप्तते वा गुहु० । शंसिदु
हीसिकयप् ॥

गुह्यकः । पुं । देवयोनिविशेषे । कुबे
रनिधिरक्षके मणिभद्रादौ ॥ गूह
ति निधंरक्षति । गुहू० । खुल् ।

गुह्यप्

ऋषेर्दरादित्वाद्यगागमः ॥ निधिरक्ष
न्ति ये यक्षास्ते खुगुह्यकसंज्ञका इति
व्याडिः ॥ यद्वा । गुह्यं कुत्सितं कायति
। कैगन्दे० आतइति कः ॥ गुह्यगोपनो
यं कं सुखं यस्येति वा । अनेयो पक्ष
येोः शंसिदुहि गुह्यिभ्योवेतिकाग्निको
क्तेःक्यप् ॥ गूभ्रा इति प्रसिद्धे पक्षान्ने ।
तत्प्रकारः । समितां सर्पिषा भृष्टां
सितद्राक्षादिसम्भृताम् । एलालवङ्ग
कर्पूरमरीचपरिवासिताम् ॥ क्षिप्
त्वान्यसमितालम्पुटे वेष्टयेत्ते प
चेत् । ततः खण्डे न्यसेत् पक्वं गुह्य
कोऽयं मुदाहृतः ॥ गुह्यको वृंहणो
हृद्यो दृष्यः पित्तानिलापहः । मधु
रोऽतिगुरुः पाके किञ्चित् सन्धान
कृत्सरः ॥

गुह्यकलोकः । पुं । पिशाचलोकादुप
रि गन्धर्वलोकादधो वर्त्तमाने भुवने ॥

गुह्यकाली । स्त्री । देवीविशेषे ॥ नै
पालस्येतत्स्थाने ॥

गुह्यकेश्वरः । पुं । मनुष्यधर्मणि । कुबे
रे ॥ गुह्यकायन्तीतिगुह्यकाः । तेषा
मीश्वरः ॥

गुह्यगुरुः । पुं । शिवे ॥

गुह्यदीपकः । पुं । खद्योते ॥

गुह्यनिष्यन्दः । पुं । मूत्रे ॥

गुह्यपुष्पः । पुं । अश्वत्थवृक्षे ॥

गूढपु

गुह्यभाषितम् । न । सन्धे ॥ गुप्तवाक्ये ॥ गुह्यञ्चतत् भाषितञ्च ॥ गुह्यधीः । पुं । मूढधे ॥ गुह्याष्टकम् । न । भास्भूच्यादिषु ॥ तेच यथा । भास्भूच्यापिडिण्डिखाकल्यमरपुष्कराः । प्रभासनैमि षैचेतिगुह्याष्टकमिदं जगे ॥ इति स्म रोद्रसंहिता ॥ गूः । स्त्री । मले । विष्ठायाम् ॥ गच्छति । गम्लृ० । किप् । ऊङ्गमादीनामिति वार्त्तिकेन मस्योमेऽकार स्य ऊङादेशः ॥ गूढम् । न । रहसि ॥ गुप्ते ॥ त्रि । कपटे । गुप्ते । संवृते ॥ गहने । दुर्विज्ञेये ॥ गुह्यते स्म । गुहू० । क्तः । यस्यविभाषेतीडभावः ॥ गूढज । पुं । गूढोत्पन्नपुत्रे ॥ गूढनीड । पुं । खञ्जनखगे ॥ गूढपद् । पुं । करीरे ॥ अङ्कोठे ॥ गूढपद । पुं । अजाकरणे ॥ गुप्तेवर्त्मनि ॥ गूढपात् । पुं । सर्पे ॥ गूढाः पादा अस्य । पृषोदरादिः ॥ यद्वा । गूढं पादयति । पद्गतौ । ण्यन्तात् किप् ॥ गूढपादः । पुं । सर्पे ॥ गूढाः संवृताः पादाश्च । पादाना मपि विच्छेये देशते दे च विंशती इत्यागमः ॥ गूढपुरुष । पुं । अधिधी । राज्ञांचरे

गूढच

॥ गूढस्यासौ पुरुषश्च ॥ गूढपुष्पकः । पुं । वकुलवादमे ॥ गूढफलः । पुं । वदरे ॥ गूढमार्गः । पुं । भ्रूमध्यमार्गे । सुरङ्गायाम् । सुरङ्ग इति भाषा ॥ गूढश्चासौमार्गश्च ॥ गूढमैथुनः । पुं । काके ॥ गूढं मैथुनमस्य ॥ गूढवर्च्चाः । पुं । दर्दुरे ॥ गूढं वर्च्चोऽस्य ॥ गूढवल्लिका । स्त्री । अङ्कोठवृक्षे ॥ गूढसाक्षी । त्रि । योऽर्थिना गूढतया प्रत्यर्थिवचनं श्रावितः सः ॥ तथाच नारदः । अर्थिना स्वार्थसिद्ध्यर्थं प्रत्यर्थिवचनं स्फुटम् । यः श्रावयते तदा गूढो गूढसाक्षी स उच्यते । इति ॥ गूढाङ्गः । पुं । कच्छपे ॥ गूढाङ्घ्रिः । पुं । सर्पे ॥ गूढोत्पन्नः । पुं । पुत्रविशेषे ॥ यथा । उत्पद्यते गृहे यस्य नयज्ञायेत कस्य सः । सगृहे गूढउत्पन्नस्तस्यैवा यस्यतल्पजः ॥ गूथ । पुं । न । मले । अक्तिन् ॥ गूथते । गुङ्शब्दे गुपुरीषोत्सर्गेवा । तिथपृष्ठगूथेतिसाधुः ॥ गूथकक्कः । पुं । अरमल्ले । क्षुद्रचूडे । गूथे साधिक इति गौड़भाषाप्रसि

गृधिः

क्षे खगे ॥ [illegible]

गूनः । वि । कृतपुरीषोत्सर्गे । घञ्जे ॥ गूयते स्म । गु० । क्तः । दुग्वोर्दीर्घश्चेति मध्यम् ॥

गूरमम् । न । उदमे ॥

गूवाकः । पुं । क्रमुके । गुवाके ॥ गु वनयनेन । गु० । विना० साधुः ॥

गूषणा । स्त्री । मेचके । मयूरपिच्छ चक्रे ॥

गृञ्जनः । पुं । खस्सन इति प्रसिद्धे रोहिषके ॥ रक्षाखशुने ॥ इतिराजनिर्घण्टः ॥ न । विषदिग्धपशोर्मांसे ॥ साक्षगम इति प्रसिद्धे कन्दे । शिखिमूले । वर्षुले । यवन्नेष्टे ॥ गृञ्जनः पित्तजो ग्राही शीतवेष्णो रोगनाशनः । गन्धाकृतिरसै स्तुल्यः सूक्ष्मनालः पलाण्डुना ॥ गृञ्ज्यते भक्ष्यत्वेन कथ्यते रोगेषु । गृञ्जिगन्धे । कर्मणिल्युट् ॥

गृञ्जीवः । पुं । लोपाके । पृथुमृणाले । बडा मोटा सिंघाड़ा इतिभाषा ॥ इतिहेमचन्द्रः ॥

गृत्सः । पुं । कन्दर्पे ॥ गृध्यति । गृधु अभिकाङ्क्षायाम् । गृधिपथ्योदेर्दीर्घश्चेति सः । पातोर्दीर्घादेशः ॥

गृत्समदः । पुं । ऋषिविशेषे ॥

गृधिः । स्त्री । मदभिलाषे ॥

गृध्रसी

गृधुः । पुं । कामदेवे ॥ गृध्यति । गृधु० । सृभिदिभ्यधिगृधिधृषिभ्यदन्तिकुः ॥

गृधुः । वि । लुब्धे ॥ गर्हनशीलः । गृधु० । वसिगृधयधृषीत्यादिकुः । नेडुगिकृतीतीडनिषेधः ॥

गृधुना । स्त्री । लुब्धत्वे । रागे । सङ्गे ॥

गृध्रः । पुं । दाक्षाय्ये । वक्रतुण्डे । परमांसभक्षणाभिकाङ्क्षिणिखगे । गीध इति भाषा ॥ आसन्नमरणे । निर्घरन्ति गृध्रादयो मूर्द्धि गृहोर्ध्वभागे ॥ वि । लुब्धके ॥ गृध्यति । गृधु० । सुसूधागृधिभ्यः क्रन् ॥

गृध्रकूटः । पुं । मगधदेशस्थसीमशैले ॥

गृध्रनखी । स्त्री । कोकिलाक्षे । वृद्धदारुणि ॥ काकिलाक्षेति गौडभाषाप्रसिद्धे कुलिकवृक्षे ॥ हिंसायाम् । चीस इति भाषाप्रसिद्धे वृक्षे ॥

गृध्रपदा । स्त्री । भूम्यपपाठ्ये ॥

गृध्रराजः । पुं । जटायुपक्षिणि ॥

गृध्रसी । स्त्री । ऊरुसन्धौ वातरोगविशेषे ॥ स० यथा । स्फिक्पायूरुकटिपृष्ठजानुजङ्घापदं क्रमात् । गृध्रवत् सञ्चरत्येति गृध्रसीति निगद्यते ॥ वाता वातकफा सान्द्रागौरवाऽरोचकान्विता । इति ॥ गृध्रमिवसरति । गृधु० । ङीष् । वातरोगविशेषे ॥

गृहम्

दित्वान् ङीष्॥
गृष्टिः। स्त्री। सकृत्प्रसूतायां गवि॥
वराहकान्तायाम्॥ वदरायांमोप-
धौ॥ कामुर्यां॥ गृह्णाति। ग्रह
उपादाने क्तिच्। पृषोदरादि॥ स
कृत्प्रसूतायाम्॥ अतएव गृष्ट्यास्तु
तुप्याच्चेपिगृष्ट्यादिभ्यश्चेत्यत्र मु-
नर्गृहणंकृतम्॥
गृहम्। न। इष्टकादिरचिते वासस्था
ने। गेहे। उदवसिते। वेश्मनि।
घर इतिभाषा॥ गृह्णाति धान्यादि
कम्। ग्रह। गेहेकः॥ यद्वा। गुह
ग्रहणे। गृह्यते। इगुपधेतिकः॥ क
लत्रे। भार्यायाम्। दारपरिग्रहस्त
च्चणे श्रौतस्मार्त्तयोरन्यतराग्निनि-
षेविते सर्वकर्मसम्पादके त्रिवर्गका
रणे॥ न गृहं गृहमित्याहु र्गृहिणी गृहमुच्यते। तया हि सहितः स
र्वान् पुरुषार्थान् समश्नुते॥ नाम
नि॥ भवने। राशौ॥ चतुर्थभवने॥
गृह्णाति पुरुषं यस्माद्गृहं तेन प्र
कीर्त्तितम्॥ अवाहव्यासः। न गृहं
गृहमित्याहु र्गृहं भार्यागृहं स्मृतम्।
मनसा योविनिर्मुक्तो गृहस्थोपि
मुच्यते इति॥ नहि जडं गृहंपुरु
षं बध्नाति नचान्यद्बन्धने कारणम
स्ति किन्तु मनस आसक्तिमात्रं का

गृहगो

रणं तां विहाय संसारं कुर्वोवे मुच्य
तएवेत्यर्थः॥
गृहाः। पुंभूमि। क्लत्रे। दारेषु॥
तात्स्थ्यात्। भवतिहि तात्स्थ्या
त्तच्छब्दत्वम्। मत्वा। कोशन्तीस्त्री
दारे मत्वशब्देन पुरुषोपिव्यपदि
श्यते। एवञ्चे गृहशब्दो वेश्मनि मु
ख्यो दारेषुत्वौपचारिकः। अवेदम
वधेयम्। गृहशब्दोयमर्हादित्वा
दुभयलिङ्गः। तत्र नपुंसकलिङ्गोऽ
भिप्रेयवचनः। पुंलिङ्गस्तुबहुवचना
न्तएवेति॥
गृहकच्छपः। पुं। मेषशृङ्गिकायाम्॥
गृहकन्या। स्त्री। एतत्कुमार्याम्॥
गृहकपोतः। पुं। प्रासादकुक्कुटे। भि
क्षीकण्ठे। पारावते॥
गृहकर्त्ता। पुं। धूसरेऽतिरुक्षेचट
के। धान्यभक्षके॥
गृहकारकः। पुं। घरामी राज इतिख
यसिद्धे वर्णसङ्करजातिविशेषे॥ यथा
। प्रतिमाघटकादेव कन्यायां नापि
तस्यच। सूत्रकारस्य सम्भूतः सोपा
नगृहकारकः इति पराशरपद्धतिः॥
गृहकारी। पुं। कुम्हारी इतिभाषाम
सिद्धेकोटे॥
गृहकृत्यकः। पुं। चिचिण्डावृक्षेगाछे॥
गृहगोधा। स्त्री। विश्वम्भरायाम्। पि-

गृहगो-

लिकायाम्। छिपकली विस्तुआदति भाषा ॥

गृहगोधिका। स्त्री। सुघल्याम्। गृहगोधायाम् ॥ अल्पगोधा। अल्पार्थे कन्। गृहस्थगोधिका ॥

गृहगोलिका। स्त्री। पल्याम् ॥

गृहजातः। पुं। दास्यामुत्पन्ने दासविशेषे ॥

गृहणी। स्त्री। काञ्जिके ॥

गृहतटी। स्त्री। वीथ्याम् ॥ इतिहारावली ॥

गृहद्रुमः। पुं। मेषशृङ्गीवृक्षे ॥

गृहधूपः। पुं। गेहधूपे ॥

गृहनाशनः। पुं। वनकपोते। चिचकण्ठे। घुघुती पिण्डुकिया इतिचभाषा ॥

गृहनीडः। पुं। चटके ॥

गृहपङ्क्तिः। स्त्री। रचकजनावासपङ्क्तौ। जिसे अवधारिक कहते ॥

गृहपतिः। पुं। गृहस्थे ॥ सद्विणि। सदान्वदानकर्त्तरि गृहस्थे ॥ मन्त्रविशेषे ॥ धर्मे ॥ गृहस्थपतिः ॥ स्त्री। गृहपत्न्याम् ॥ विभाषासपूर्वस्येतिमाचि क्रोनत्त्वाभावः ॥

गृहपालः। पुं। शुनि ॥ गृहंपालयति। पालैरचि। कर्मण्यण् ॥

गृहपोतकः। पुं। धास्तौ। हवेली घर इतिचभाषा ॥ इतिशब्दरत्ना-

गृहया-

वली ॥

गृहप्रवेशः। पुं। गृहान्तर्गमने ॥

गृहबभुः। पुं। गेहनकुले ॥

गृहबलिप्रियः। पुं। वकपक्षिणि ॥

गृहबलिभुक्। पुं। चटके ॥ काके ॥ वके ॥

गृहभूमिः। स्त्री। धास्तौ। वेश्मभुवि ॥

गृहमणिः। पुं। दीपे ॥

गृहमाचिका। स्त्री। चर्मचट्याम्। अजिनपचायाम्। चाम्चिरय्या इतिभाषा ॥

गृहमृगः। पुं। कुक्कुरे ॥

गृहमेधी। पुं। कृतदारपरिग्रहे। गृहस्थे ॥ गृहैर्दारैर्मेधते सङ्गच्छते। मेधृसङ्गमेच। सुप्यजातावितिणिनिः ॥

गृहमेधिनी। स्त्री। साध्विक्वांवुत्तौ ॥ गृहस्थपत्न्याम् ॥

गृहमेधीयम्। न। गृहमेधे ॥ गृहमेधो देवतास्य। द्यावापृथिवीतिछः ॥

गृहमेधीय। पु। गृहाश्रमविधितेकर्मादौ ॥

गृहमेध्यम्। न। गृहमेधीये ॥ गृहमेधो देवतास्य। द्यावापृथिवीतियत् ॥

गृहयाय्यः। पुं। गृहस्वामिनि ॥ गृह्यते। गृहगृहणे। गृदचिस्पृहिगृधिभ्यण्याय्यः ॥

गृहयालुः । पुं । ग्रहीतरि । ग्रहणशीले ॥ गृहयते तच्छीलः । गृह०चु० । स्पृहिगृहिपतीत्यालुच् । अयामन्तेतिणेरयादेशः ॥

गृहवाटिका । स्त्री । गृहान्तिककृतारामे ॥

गृहसंवेशकः । पुं । गृहसन्निवेशोपदेशके । वास्तुविद्योपजीविनि ॥

गृहस्थः । पुं । गृहिणि । गृहपतौ । ज्येष्ठाश्रमिणि । द्वितीयाश्रमिणि ॥ न्यायार्जितधन स्तदत् ज्ञाननिष्ठोऽतिथिप्रियः । आढ्यकृत् सत्यवादीच गृहस्थोऽपिप्रशस्यते ॥ गृहशब्दस्य दारवचनत्वात् कृतदारपरिग्रहोगृहस्थः । गृहेतिष्ठति । ष्ठा० । सुपि स्थदृतिकः ॥

गृहस्तूणम् । न । गृहस्तम्भे ॥ गृहस्य स्तूणा ॥

गृहाच । पुं । वातायने ॥

गृहागतः । पुं । अतिथौ ॥ त्रि । गेहमायाते ॥

गृहाधिपः । पुं । गृहस्थे ॥

गृहाङ्गम् । न । काञ्जिके ॥

गृहायनिकः । पुं । गृहिणि ॥

गृहारामः । पुं । निष्कुटे । गृहोपवने ॥ गृहस्यारामः ॥

गृहालिका । स्त्री । शकुनतायाम् ।

गृहगोधिकायाम् ॥

गृहावग्रहणी । स्त्री । देहल्याम् ॥ गृह मवगृह्यते ऽनया । ग्रहउपादाने । करणे ल्युट् ॥

गृहाशया । स्त्री । ताम्बूल्याम् । नागवल्याम् । पानकी वेल इतिभाषा ॥

गृहाश्मा । पुं । पेषणशिलायाम् । सिल इतिभाषा ॥

गृहासक्तः । पुं । गृहके ॥ त्रि । गृहे आसक्तिविशिष्टे ॥

गृहिणी । स्त्री । भार्यायाम् ॥ इनिर्मत्वर्थीयः । ङीप् । गेहकर्मकुशलायाम् ॥

गृही । पुं । गृहस्थे ॥ गृहा. दाराः सन्त्यस्य । इनिः ॥

गृहीतः । त्रि । स्वीकृते ॥ ज्ञाते ॥ प्राप्ते ॥ धृते ॥ गृहीत इव केशेषुमृत्युना धर्म माचरेत् ॥

गृहीतदिक् । त्रि । पलायिते । तिरोहिते ॥

गृहीतिः । स्त्री । ग्रहणे ॥

गृहीती । स्त्री । गृहीतवति ॥ गृही तमनेन । इष्टादिभ्यश्चेति कर्त्तरि इनिः ॥

गृहेनर्दी । पुं । गेहेशूरे ॥

गृहेशः । पुं । गृहपतौ ॥

गृहोलिका । स्त्री । पल्याम् ॥

गेहम्

ग्रहः । पुं । गृहासक्तसगोत्रजयोः ॥ गृह्यते । गृहू० । पदास्वैरीतिक्यप् ॥ न । मलवर्त्मनि । गुदे ॥ ग्रन्थप्रभेदे । गृह्यसूत्रे ॥ त्रि । अस्वैरिणि ॥ पचे ॥ गृहू० । ऋदुपधाच्चाकृपिचृतेरितिक्यप् ॥ गृहेभवो वा ॥ यत् ॥ गृह्यकः ॥ पुं । छेके । गृहासक्तपक्षिभेदयोः ॥ त्रि । निपुणे । आयस्ते ॥ क्यवक्तात् स्वार्थेऽनुकम्पायां वाकन् ॥ गृह्या । स्त्री । शाखापुरे ॥ इतिमेदिनी । टाप् ॥

गेन्दुः । पुं । कन्दुके । गेंद इतिभा षा ॥

गेन्दुकः । पुं । गे गाने इन्दुरिव ॥ गे इन्दुरिव प्रतिकृतिर्वा । इवेप्रतिकृतावितिकन् ॥ पृषोदरादित्वादीर्घः ॥

गेयम् । न । गीते ॥ यथा । गेयंगीतानामसहस्रम् ॥ त्रि । गातव्ये ॥ गायने ॥ अर्हकृत्यतृचश्चेति योग्यतायामेयत् । ईयति । गुणः ॥ गायति । गैशब्दे । भव्यगेयेति कर्त्तरिवायत् । गीयते इतिवा ॥

गेष्णः । पुं । पर्वतभि ॥

गेष्णुः । पुं । गायने ॥ नटे ॥ गायति । गै० । गादाभ्यांणिष्णुच् ॥ सामगानकर्त्तरि ॥

गेहम् । न । उदवसिते । गृहे ॥ गेन

गैरेयं

गणेशेन ईक्ष्यते काम्यते । ईक्ष० । कर्मणि घञ् ॥ गेगणेशो गन्धर्वो वा ईक्षः ईक्षितोयस्मिन् वा ॥

गेहधूपः । पुं । अपराजितधूपे ॥ यथा । मयूरपिच्छं निम्बखदिरवाणि वृहती फलम् । सरिचं हिङ्गु मांसी च वीजं कर्पाससम्भवम् ॥ छागरोमाऽहि निर्मोको विष्ठा वैडालिकी तथा । गजदन्तश्च तत्चूर्णं किञ्चिद्घृतविमिश्रितम् ॥ गेहेषु धूपनं दत्तं सर्वान् बालग्रहान् जयेत् । पिशाचान् राक्षसान् हत्वा सर्वेश्वरश्चरं भवेदिति ॥

गेही । पुं । गृहिणि ॥

गेहेनर्दी । पुं । कापुरुषे । पिण्डीशूरे ॥

गेहेशूरः । पुं । गेहेनर्दिनि ॥ इतिहेमचन्द्रः ॥

गैरिकम् । न । रक्तधातौ । गेरु इतिभाषा ॥ गैरिकं रक्तधातु श्च गैरेयं गिरिजन्तथा । सुवर्णगैरिकं च्चन्यत् ततो रक्ततरं हि तत् ॥ गैरिकद्वितयं स्निग्धं मधुरं नुवरं हिमम् । चक्षुष्यं दाहपित्तास्रकफहिक्कावि षापहम् ॥ स्वर्णे ॥ गिरौ भवम् ॥ अध्यात्मादित्वाट्ठक् ॥

गैरिकाद्यः । पुं । जपमधूकवृक्षे ॥

गैरी । स्त्री । खाङ्गिकीवृक्षे ॥

गैरेयम् । न । शिलाजतुनि ॥ गिरौभ

गोकर्णः

त्रम् । नद्यादिभ्यश्चेतिढक् ॥
गौः । पुं । वलीवर्दे । अनड्वाहि ॥ स्वर्गे । रश्मौ ॥ कुलिशे । वज्रे ॥ चन्द्रे ॥ सूर्ये ॥ गोमेधयज्ञे ॥ ऋषभनामौषधे ॥ स्त्री । सौरभेय्याम् । अर्जुन्याम् । उक्षायाम् ॥ गोमांसं गुरु स्निग्धं पित्तश्लेष्मविवर्द्धनम् । दृंहणं वातहृद्वल्यं मधुरं पीनसप्रणुत् ॥ चक्षुषि ॥ बाणे ॥ दिशि ॥ मातरि ॥ वाचि ॥ भूम्नि ॥ वृषराशौ ॥ नवाङ्के ॥ गच्छति गम्यते वा ऽनेन वा । गम्लृ° । गमेर्डोः ॥
गावः । पुंभूम्नि । उदके । जले ॥
गोकण्टकः । पुं । गोचुरके ॥ स्वपुटे । विषमोचने ॥ गोखुरैः स्वपुटीकृते इति हेमचन्द्रः ॥ गवां खुरे ॥ विकण्टकवृक्षे ॥ गोर्धेनोः पृथिव्याश्च कण्टकः ॥
गोकर्णः । पुं । अश्वतरे ॥ सर्पे ॥ गौः कर्णोयस्य । गोशब्दस्य चक्षुःपरत्वान्न गोकर्णःसर्पः ॥ सारङ्गे । मृगविशेषे ॥ गोरिवकर्णोयस्य । गणदेवताविशेषे ॥ अङ्गुष्ठानामिकोन्नामे । अनामिकायुक्तायिकृताङ्गुष्ठे ॥ गोः कर्णइव ॥ शैवे सिद्धक्षेत्रविशेषे ॥ यथा । मध्यदक्षगोकर्णे गिरिभद्रायचंडकेश्वरागमः । गोकर्णे भद्रकर्णीये दि

गोचुर

तिदेवीगीतः ॥
गोकर्णी । स्त्री । भूम्यालतायाम् ॥ गोः कर्णइव । गौः कर्णोयस्या वा । पाक कर्णेतिङीष् ॥
गोकिराटिका । स्त्री । चिट्सारिकायाम् ॥
गोकिराटी । स्त्री । सारिकास्यखगे ॥
गोकिलः । पुं । मुसले ॥ हले ॥
गोकीलः । पुं । मुषले ॥ खाङ्गले ॥
गोकुलम् । न । गोसमूहे । गोधने ॥ गोस्थाने ॥ यथा । गोकुले कन्दुशालायां तैखयन्त्रेषुयन्त्रयोः । अग्नौ मांसानि शौचानि स्त्रीषुवाससातुरे घृते ॥ व्रजेप्रसूतेनन्दावासे ॥ गवां कुलम् ॥
गोकुलिकः । पुं । केकरे । वलिरे ॥ पङ्गुस्खगव्युभेचके ॥
गोकृतम् । न । गोमये ॥ त्रि । गोभिरा चरिते ॥
गोचुरः । पुं । गोचुरके ॥ गोचुरः शीतलः स्वादुर्बलकृद्बस्तिशोधनः । मधुरो दीपनो हृद्य. पुष्टिद श्वाश्मरीहर. ॥ प्रमेहश्वासकाशार्श. कृच्छ्ररोगवातनुत् ॥ चुरति । चुर विलेखने । दृगुपधलक्षणकः कः । गोर्गोर्धोचुरः ॥
गोचुरकः । पुं । गोचुर इतिभाषाप्र

गोचर

सिद्धार्थांपक्षच्छषायाम् । स्वादुकण्ट
के ॥ गौर्गोर्वा चुरः ॥ स्वार्थेकन् ॥
गोखुरः । पुं । गोचुरे ॥ न । गवांशफे ॥
गोगोयुगम् । न । गोद्वये ॥ द्वैगावौ
। द्वित्वेगोयुगच् ॥
गोगोष्ठम् । न । गवांस्थाने ॥ गोष्ठजा
दयः स्थानादिषु पशुनामभ्यः ॥
गोग्रन्थिः । पुं । करीषे ॥ गोष्ठे ॥ गो
जिह्विकौषधौ ॥
गोघ्नम् । न । गवेघ्नते ॥ वधेगौ ॥
गोघ्नः । पुं । अतिथौ ॥ त्रि । गोघ्नं
तके ॥
गोचरः । पुं । इन्द्रियार्थे । रूपशब्दग
न्धरसस्पर्शस्वरूपे ॥ प्रयुञ्जतेहि । उ
पादानगोचरंज्ञानमिति ॥ देशे ।
गवांजिघ्यस्थाने । वने ॥ तथाचभार
विः । उपारताः पश्चिमरात्रिगोच
रादिति ॥ जन्मराश्यवधिग्रहचक्रा
न्तरारात्रिषु ॥ गावइन्द्रियाणि चर
न्त्यस्मिन् । गोचरसञ्चरेतिनिपाति
तः ॥ त्रि । गोगामिनि ॥
गोचरफलम् । न । जन्मराशेः सकाशा
त् ग्रहाणां सञ्चारवशेन शुभाशुभफ
ले ॥ गोचरशुद्धिर्यथा । केतूपप्लवभौ
मसन्दगतयः षडविसंख्याः शुभा एव
न्द्रार्कावपि तेचतौच दशमौ चन्द्रः
पुनः सप्तमः । जीवः सप्तनवद्विप-

गोजागर

ष्वगतो युग्मेषु सोमात्मजः शुक्रः
षड्दशसप्तवर्जमितरे सर्वेषुपापा स्त्रे
शुभा इति ॥
गोचर्म्म । न । गोस्त्वचि ॥ परिमाण
विशेषे ॥ सप्तहस्तेन दण्डेन त्रिंशद्द
ण्डैर्निवर्त्तनम् । दशतान्येव गोचर्म
दत्त्वा स्वर्गे महीयतइति बृहस्पतिः
॥ यत् किञ्चित् कुरुते पापं ज्ञानतो
ऽज्ञानतो ऽपिवा । अपि गोचर्ममा
त्रेण भूमिदानेन शुद्ध्यतीत्याचारे
मिताक्षरा ॥
गोची । स्त्री । हिमालयपर्व्वतस्थायाम् ॥
गावः स्तुतिरूपाः श्रुतिस्मृतीतिहा
सपुराणादिसम्बन्धिनी संज्ञादेवि
यस्यिणी वाचः अञ्चति पूजयति य-
द्वा गच्छति प्राप्नोति तात्पर्यरूपेण
शृणोति । अञ्चु० । क्विप् । ङीप् ॥
गोछागः । पुं । मूकदम्बे । कोकणिमा
इति गौडभाषा ॥
गोजरः । पुं । घृतकुमार्य्यां ॥
गोजलम् । न । गोमूत्रे ॥
गोजा । स्त्री । गोलोमिकायाम् ॥ पृ
थिव्यां श्रीक्रियादिरूपेणोत्पन्नया
म् ॥ गोषु जायते । जनो० । जनने
ति विट् । विड्वनोरित्यात्वम् ॥
गोजागरिकः । पुं । भस्मकारके ॥ न
। मद्यपे ॥

गोजी

गोजापर्णी । स्त्री । क्षुद्रक्षुपविशेषे । दुग्धफेनीवृक्षे । व्रणकेतुघ्न्याम् ॥ गोजिह्वा । स्त्री । दार्विकायाम् । गोजिह्वियालता । दारियोशाक इतिचगौडभाषा ॥ गोजिह्वा, वातघ्नी शीता ग्राहिणी कफपित्तनुत् । हृद्या भ्रमे दाहकासास्रव्रणज्वरहरी लघुः ॥ कोमला तुवरा तिक्ता स्वादुपाकरसामृता ॥ पत्रशाकस्य तु गुणाः । गोजिह्वाकुष्ठमेहास्रकृच्छ्रज्वरहरी लघुः ॥ गोजिह्वेव ॥

गोजिह्विका । स्त्री । गोजिह्वालतायाम् ॥ गोजिह्वेव । कन् ॥

गोडिम्बः । पुं । मृगगोलजम्बाम् ॥

गोडुम्बः । पुं । शीर्णदन्ते । तरमूजे इति भाषा ॥

गोडुम्बा । स्त्री । गवादन्याम् । चित्रास्वकर्कोट्याम् । गोमुक इतिगौडभाषा ॥ गोंभुवं तुम्बति । तुबिअर्दने । मू० कः । षृषोदरादिः ॥

गोडुम्बिका । स्त्री । गोडुम्बायाम् ॥

गोणी । स्त्री । धान्याधारे गुणे इतिभावप्रसिद्धे आवपने ॥ गोणशब्दादावपनेर्थे ज्ञानदकुण्डगोणेति ङीष् ॥ छिद्रवस्त्रे । गाण्याम् ॥ धान्यमानभेदे ॥ विष्णुर्गोणयुदाहृता तामेव भारंवानीयादित्युक्तेः ॥ द्रोणीपरि

गोत

माणमिति वैद्यकपरिभाषा ॥

गोणोतरी । स्त्री । ह्रस्वगोण्याम् ॥ ह्रस्वागोणी । कोद्रवगोणीभ्यांष्टरच् ॥ पिच्चान् ङीष् ॥

गोण्डः । पुं । पामरजातौ ॥ वृद्धनाभौ ॥ नाभिगुण्डके ॥ वि । दृढनाभिवति ॥ गोः अण्डद्वय ॥

गोतमः । पुं । ब्रह्मणः पुत्रे गौतममुनौ ॥

गोतमान्वयः । पुं । शार्ङ्गमुनौ ॥

गोतीर्थम् । न । गोष्ठे ॥

गोत्रः । पुं । अद्रौ । पर्वते ॥ न । आख्यायाम् । नामनि ॥ सम्भाषणोपयोगेच ॥ कानने ॥ क्षेत्रे ॥ वर्त्मनि ॥ क्षत्रे ॥ सन्ततौ यगणे ॥ पूर्वाचार्यासंमतेनाऽपत्ये ॥ कुले ॥ अभिजाने । ऋषिशब्दवाच्ये, आदिपुरुषेस्वसन्तानसंज्ञाकारिणि ब्राह्मणरूपे ॥ क्षत्रियवैश्ययोरुपदिष्टातिदिष्टगोत्रम् । शूद्रस्यातिदिष्टातिदिष्टगोत्रम् । यथा । न समानगोत्रां भार्यां विन्देतेत्यनेन शूद्रस्यापि सगोत्रा कथं न निषिध्यते इतिचेत् अत्रोपदिष्टातिदिष्टगोत्रस्यैवनिषेधो नत्वतिदिष्टातिदिष्टशूद्रगोत्रादेरितिनिर्णयः ॥ क्षत्रियवैश्यशूद्राणां मतिदिष्टातिदिष्टगोत्रप्रवरम् अतएवैतेषांपुरोधितगोत्रप्रवरमित्यर्थः । तथाचाग्निपुराणे

गोत्र

वर्णसङ्करोपाख्याने॥ क्षत्रियवैश्यशू
द्राणां गोत्रञ्च प्रवरादिकम्। तथा
न्यवर्णसङ्कराणां येषां विप्राश्च याज
काद्यर्ति॥ गोत्राणि तु चतुर्विंशतिः।
तथाचमनुः। भार्गवाङ्गिरसाः काश्यप श्च
व वात्सः सावर्णक स्तथा। भरद्वाजो
गौतमश्च सौकालीन स्तथापरः॥
कल्किर्घ श्चाग्निवेश्यश्च कृष्णात्रेयव
शिष्ठकौ। विश्वामित्रः कुशिकश्च कौ
शिक श्चैतथापरः॥ एतकौशिकसौ
ङ्गल्यौ आलम्यानः पराशरः। सौपा
यन स्तथाऽविश्व वासुकी रोहितस्त
था॥ वैयाघ्रपद्यकश्चैव जामदग्न्य
स्तथापरः। चतुर्विंशति गोत्राणीक
थितानि पूर्वपण्डितैः॥ अपिचमनुः। ज
मदग्नि भरद्वाजो विश्वामित्रोऽथगौ
तमः। वशिष्ठकाश्यपागस्त्या मु
नयो गोत्रकारिणः॥ एतेषां या
व्यपत्यानि तानिगोत्राणिमन्वते-
। एतदुपलक्षणं मन्वेषामपिदर्शना
त्। तथाच। सौकालीनकमौद्गल्यौ पराशरबृहस्पती। काश्यनोवि
ष्णुकौशिकौ काश्यायनवत्सकाख
कौ॥ कृष्णात्रेयः साङ्कृतिश्च कौ
ण्डिन्यो गर्गसंज्ञकः। आङ्गिरसइति
ख्यातः अनाढ्यकाख्यसंज्ञितः॥ अथ
जैमिनिदृष्टाख्याः शाण्डिल्यो वात्स्य

गोत्र

एवच। सावर्णकौलम्यानवैयाघ्रपद्या-
श्च एतकौशिकः॥ शक्तिः काश्यायन
श्चैव वासुकी गौतम स्तथा। मुनकः
सौपायनश्च मुनयो गोत्रकारिणः॥
एतेषां यान्यपत्यानि तानि गोत्रा-
णि मन्वते। सर्वेद्विचत्वारिंशद्गोत्राः
॥ इतिधनञ्जयकृतधर्मप्रदीपः॥ गुप्य
ते शब्द्यते स्वसन्तानप्रभवोऽनेन
गुङ्शब्दे। ष्ट्रन्। गुधृवीपचीत्या
दिनावो वा॥ गां त्रायते वा। चैङ्पा
लने। आतोनुपसर्गे इति कः॥
गोचजः। पि। गोभोत्पन्ने॥ सेतुजन्म
नामस्मृतिपर्यन्तसमानोदकभावात्
पश्चाद्भवति॥
गोत्रभिद्। पुं। इन्द्रे। शब्दरत्ने॥ गोत्रा
न्गिरीन्भिनत्ति। भिदिर्। क्विप्। स
त्। सूदिवेति भिदेः क्विप्॥
गोत्रवृक्षः। पुं। धन्वनवृक्षे॥
गोत्रसंप्लवः। पुं। पक्षिविशेषे॥
गोत्रस्खलनम्। न। अन्यस्त्रीनामग्रहणे
॥ यथा। गोत्रस्खलने भ्रान्तिं भानि
निजानीहि केवलां मे ऽध। व्याख्या
नतो विशेषप्रतिपत्तिः पाणिनीय-
दृष्टेति॥
गोत्रा। स्त्री। कौ। पृथिव्याम्॥ गोत्राः
शैलाःसन्त्यस्याम्। अर्शआद्यच्॥ गाः
जलानि त्रायते वा। चैङ्। कः।

गोदुग्ध

टाप्॥ गव्यायाम्। गवांगणे॥ गवां समूहः। इनिठकञ्चवपदेति वा॥ गोदः। पुं। मस्तिष्के॥ त्रि। गोप्रदे॥ गां ददाति। दुदाञ्°। आतश्चेतिकः॥ गोदन्तम्। न। नटभण्डने। हरिताले॥ पुं। गोदन्ते॥ गोदा। स्त्री। गोदावर्यां नद्याम्॥ गोदानम्। न। व्रतविशेषे। केशान्ते॥ गावः केशाः दीयन्तेखण्ड्यन्तेऽस्मिन्। कुदाञ्°। कर्मणि ल्युट्॥ गोदारणम्। न। हले॥ कुदाले॥ गां भूमिं दारयति। दृविदारणे। ल्युट्॥ गौ भूमिर्दार्यतेऽनेन। करणेल्युट्वा॥ गोदावरी। स्त्री। नदीविशेषे। गौतमसप्तमधायाम्। ब्रह्महत्याताय्याम्॥ गोदुग्धम्। न। गोः क्षीरे॥ अस्यगुणाः। गव्यं दुग्धं विशेषेण मधुरं रसपाकयोः। शीतलं स्नग्यकृत्स्निग्धं वातपित्तास्रनाशनम्॥ दोषधातुमलस्रोतःक्लिन्नत्क्लेदकरं गुरु। जरासप्तसगेगाणां शान्तिकृत्सेवितं सदा॥ * ॥ कृष्णाया गोर्भवं दुग्धं वातहारिगुणाधिकम्। पीतायाश्चरते पित्तं तथा वातं हरेन्नरः॥ श्लेष्मलं गुरु शुक्लायाः रक्ताश्चिरात्र वातघ्नम्। बालवत्सवियत्सा

गोधुक्

नां गवां दुग्धं त्रिदोषवृत्॥ वक्तव्ये गव्या स्त्रिदोषघ्नं सर्पणं बलकृत् पयः। जाङ्गलानूपदेशेषु चरन्तीनां पयो वरम्। पयो गुरुतरं स्नेहो यस्याहारं प्रवर्त्तते॥ स्वल्पक्षमक्षयाक्रान्तं क्षीरं गुरु कफप्रदम्। तत्तु बल्यं परं वृष्यं स्वस्थानां गुणदायकम्॥ पक्वाम्लतृणकार्पासबीजजं रोगिणे हितम्॥ * ॥ अपिधाङ्गजनिर्घण्टः। गवां प्रत्यूषसि क्षीरं गुरुविष्टम्भि दुर्जरम्। तस्मादभ्युदिते सूर्ये यामं यामार्द्धमेववा॥ समुत्सार्य पयो ग्राह्यं तत् पथ्यं दीपनं लघु। विवत्सावालवत्सानां पयो दोषसमीरितम्॥ अस्तं यत्सैकवर्णायाश्च बल्लीकृष्णायोरपि। श्वेताद्या गोपर्यादा ऊर्द्धशृङ्गी च या भवेत्॥ तासां गवां त्रिसं क्षीरं शृतं वा ऽथ घृतमेव वा। गवां सितानां वातघ्नं कृष्णानां पित्तनाशनम्॥ श्लेष्मघ्नं रक्तवर्णानां क्षीरं हन्ति कपिलापयः॥ इति॥

गोदुग्धदा। स्त्री। चक्षिकाटङ्गे। मुनीलतायाम्॥

गोधुक्। पुं। गोपे। गोदोग्धरि॥ गां दोग्धि। दुह प्रपूरणे। सत्सूद्विषेति क्विप्॥

गोधा

गोदुहः । पुं । गोदुहि । गोपे ॥ गां दोग्धि । दुह° । मू० कः ॥

गोदोहनम् । न । गवां दोहनस्थाने ॥ गावोदुह्यन्ते ऽस्मिन् । ल्युट् ॥ कालविशेषे । मुहूर्त्तोऽष्टमभागे ॥ यथा आचम्य च ततः कुर्यात् प्राज्ञो दारावलोकनम् । मुहूर्त्तेऽष्टमे भागे दी च्योद्यतिथिर्भवेत् इति ॥

गोदोहनी । स्त्री । गोदोहनपात्रे । पार्य्याम् ॥ गौर्दुह्यते यस्याम् । दुहेः करणाधिकरणयोश्चेतिल्युट् । ङीप् ॥

गोद्रवः । पुं । गोमूत्रे ॥

गोधनः । पुं । स्थूलाग्रबाणे । तुक्का इति भाषा ॥ इतिशब्दरत्नावलिः ॥ न । गोसमूहे । गोकुले ॥ गवांधनं समूहः ॥

गोधा । स्त्री । तक्षायाम् । व्याघातवारणाय । धनुर्गुणाघातवारणाय प्रकोष्ठत्राणद्वारां चर्म्मपट्टाम् ॥ निष्ठायाम् । गोधिकायाम् । गोध इति भाषा ॥ अस्या मांसपाकविधिः । गोधा क्वोष्णजलैर्भूयः क्षालितां खण्डशः कृताम् । स्निग्धाम्ल तक्रतोयाभ्यां क्षालितां सूक्ष्मखण्डिताम् ॥ तक्रये दूदेसवारार्द्रैः प्रलेपो वा विधानतः ॥ विपाके मधुरा गोधा वातपित्तप्रणाशिनी । कषाया कटुका प्रोक्ता बलकृन्नी बलप्रदा ॥ सा तु जलज-

गोधूमः

जलजभेदाद्विधेति व्याख्यातारः ॥ गुध्यते वाहुर्यया । गुधपरिवेष्टने । घञ्खञ्चेतिघञ् ॥

गोधापदिका । स्त्री । गोधापदीलतायाम् । गोयालिया इति गौड भाषा ॥

गोधापदी । स्त्री । सुवल्लायाम् । गोधापदिकायाम् ॥ गोधा इवपादोमूलमस्याः । कुम्भपदीपुचेति साधुः ॥

गोधास्कन्धः । पुं । विट्खदिरे ॥

गोधिः । पुं । ललाटे ॥ गोधिकायम् ॥ गुध्यते । गुध° । इन् ॥ गात्रे नेत्रेधीयते यस्मिन् । कर्मण्यधिकरणेचेति किंवा ॥

गोधिका । स्त्री । गोधायाम् । निष्ठायाम् ॥ गोहीति प्रसिद्धेजलचरे ॥ गुध्यति । गुध° । ण्वुल् ॥

गोधिकापुत्रः । पुं । गोधाशावके । गौः धेये । सर्पाद्गोधायामुत्पन्ने चन्दनगोह इति प्रसिद्धे जन्तुविशेषे ॥ गुध्यति । गुध° । ण्वुल् । गोधिकायाः पुत्रः ॥

गोधिनी । स्त्री । गृहतीभेदे । चविकायाम् ॥

गोधूमः । पुं । गोधूमे ॥ इति शब्दचन्द्रिका ॥

गोधूमः । पुं । नागरङ्गे ॥ ओषधीविशेषे ॥ गोहूं इति प्रसिद्धे औषधिभेदे

गोधूम

षे । रसाले । सुमने ॥ गोधूमः सुमनोऽभिख्यात् त्रिविधः सच्चकीर्त्तितः । महागोधूम इत्याख्यः पश्चाद्देशात् समागतः ॥ मधूलीतु ततः किञ्चिद्दल्पा सामध्यदेशजा । निष्पूको दीर्घगोधूमः क्वचिन्नन्दी सुखाभिधः ॥ गोधूमो मधुरः शीतो वातपित्तहरो गुरुः । कफशुक्रप्रदो वल्यः स्निग्धः सन्धानकृत् सरः ॥ जीवनो बृंहणो वर्ण्यो रुच्यो वीर्यस्थिरत्वकृत् । कफप्रदो नवीनो नवपुराणः । पुराणयवगोधूमचैदलोद्भवशूल्यभुगिति वाग्भटेनवसन्ते गृहीतत्वात् ॥ मधूली शीतला स्निग्धा पित्तघ्नी मधुरा लघुः । शुक्रला बृंहणी पथ्या तद्वन्नन्दीमुखा स्मृता ॥ गुध्यति गुध्यते वा । गुधेरूम ॥

गोधूमसम्भवम् । न । काञ्जिकप्रभेदे । सौवीरे ॥

गोधूमसारः । पुं । सुमनसि सारांशे । सीरा इति सत्प्रतिपाद्यते ॥ तद्विधिर्यथा । निस्तुषान् गोधूमान् नुदुखले कण्डयित्वा साधुक्काले स्रुक्तिकादिपाचे जले सम्यङ् मारयित्वा परदिने प्रभातसमये उपरिस्थजलंक्रमेण दूरीकृत्वा ऽधस्थसारं मातपे शुष्कं कृत्वा पाषान्तरे स्थापयेदिति पाक

गोधूलिः

राजेश्वरः ॥

गोधूमी । स्त्री । गोलोमिकायाम् । गोधूमा इति पाश्चरी इतिचगौडभाषा प्रसिद्धे क्षुद्रक्षुपविशेषे ॥

गोधूलिः । पुं । स्त्री । समयविशेषे ॥ यथा । सन्ध्यातपाङ्कितपश्चिमदिग्विभागे व्योम्नि स्फुरद्विरलतारकसन्निवेशे । यद्वेगवीखुरपुटोद्धसितैरजोभिर्गोधूलिरेष कथितो मृगुजेन योगः ॥ अपिच ॥ यावत्तसिन्दूरवर्णं गगनतलगतं भानुबिम्बं च नास्तं याव न्नो दिशु शान्तिं व्रजति खुरपुटैरुद्धतो रेणुसङ्घः । तावद्दोषास्तिदोषः प्रभवतिनच सा क्रूरदृष्टिर्ग्रहाणां यात्रोद्वाहे सकलशुभकरी सर्वकार्येषु सिद्धिः ॥ सात्रिविधेति दीपिका । यथा । गोधूलिं त्रिविधां वदन्ति मुनयो नारीविवाहादिके हेमन्ते शिशिरे प्रयाति मृदुतां पिण्डीकृते भास्करे । ग्रीष्मे ऽहोऽस्तमिते वसन्तसमये भानौगते दृश्यतां सूर्येचास्तमुपागते च नियतं वर्षागरत्काश्रयोः ॥ हेमन्तशिशिरयो र्मृदुता मासपिण्डीकृतदिवाकरः । ग्रीष्मे ऽहोऽस्तमिते ऽस्तगतरविकाल इ. । वर्षागरत्सन्ध्ये ऽस्तगतरविकाल इत्यर्थः ॥

गोपः

गोनन्दी । स्त्री । सारसखगस्त्रियाम् ॥
गोनर्दः । पुं । सारसखगे ॥ पर्वतविशे
षे । नञ् । कैवर्त्तीमुस्तके ॥ गांजिलं
निर्दयति । नर्दशब्दे । कर्मण्यण् ॥
गोनर्दीयः । पुं । पतञ्जलिमुनौ । गौन
र्दे ॥ गोनर्दभवः । इञ्छाच्छः ॥
गोनसः । पुं । सर्पविशेषे । तिलितुंडे
। मण्डली वोडे ॥ गोरिव नासिका
अस्य । अच् नोसिकाया इत्यच् नसा
देशश्च ॥ वैकान्तमणौ ॥
गोनाथः । पुं । अनड्वाहि ॥
गोनायः । पुं । गोपाले ॥ गांनयति ।
नीञ् प्रापणे । कर्मण्यण् ॥
गोनासः । पुं । गोनसे ॥ गोरिव नासा
अस्य । नि । वैकान्तमणौ ॥
गोनिष्यन्दः । पुं । गोमूत्रे ॥
गोपः । पुं । गुवाल इति भाषाप्रसिद्धे
सङ्करजातिविशेषे । आभीरे । वल्ल
वे ॥ मणिबन्ध्यां तन्त्रवायात् गोपजा
ते ग्रच समावः इति पराशरपद्धतिः
॥ गोष्ठाध्यक्षे ॥ भूपतौ ॥ ग्रामौघा
धिकृते ॥ वोले ॥ चि । रक्षके । उ
पकारके ॥ गोपायति । गुपूरक्षणे ।
आयादय आर्द्धधातुकेवा । अच् ॥
गोपातिवा । पारक्षणे । आतोनुपे
तिकः ॥ गोर्जस्वात् पातिवा । पा०
। सुपीतिकः ॥

गोपकः । पुं । गोपशब्दार्थे ॥ स्वार्थेकन् ॥
गोपकन्या । स्त्री । आभीरसुतायाम् ॥
गोपकोपला । स्त्री । [illegible] ॥
गोपघोषा । स्त्री । वंशिकोलौ । वद
रीवृक्षद्वयाम् ॥ वदरीसदृशाकारो
वृक्षः सूक्ष्मफलो भवेत् । अटव्या
मेवसा घोषा गोपघोषेतिचोच्यते
॥ विकङ्कतवृक्षे ॥
गोपतिः । पुं । शिवे । अग्नौ ॥ पण्डे
। साँड इति भाषाप्रसिद्धे वृषे ॥ व
ज्रिणे ॥ भास्करे ॥ चिद्दशाधिपे ॥ क्ष
पभनामौषधौ ॥ गवांपतिः ॥ श्री-
कृष्णे ॥ गवांपालनात् । गौर्मदोत्त
स्याः प्रतिवा ॥
गोपदक्षः ॥ पुं ॥ गुवाके ॥
गोपनम् । न । अपह्नवे ॥ गोपनार्हो
यते सत्यंनगुप्तिरन्यतंविना ॥ रचा
याम् ॥ तेजपात इति भाषाप्रसिद्धे
तमालपत्रे ॥
गोपनीयः । त्रि । गोपितव्ये । गोप्ये ॥
गोपभद्रम् । न । शालूके ॥
गोपभद्रा । स्त्री । काश्मर्य्याम् ॥
गोपमहिका । स्त्री । गन्धार्याम् ॥
गोपयधूः । स्त्री । शारिवायाम् ॥ गोपा
ङ्गनायाम् ॥ गोपीएवधूः । स्त्रियाः
पुंवदित्यादिनापुंवद्भावः ॥
गोपरसः । पुं । वोले । गन्धरसे ॥ गो

गोपाल

मे उत्पत्तौ रसोक्त ॥

गोपवल्ली । स्त्री । भूम्यायाम् ॥ शारिवा याम् ॥ श्यामालतिकायाम् ॥

गोपा । स्त्री । गोपालिकायाम् ॥ श्यामालतायाम् ॥ गोप्रायति । गुपू० । पचाद्यजन्तात् अजादित्वाट्टाप् इति केचित् ॥ गोःपाति । पारक्षणे । आतोनुपसर्गे इति कः । यास्कमुन्यादयेन आतोमनिन् क्वनिब्वनिपश्चेति चेन्न विचि अदन्तत्वाभावादाव्विधेरभावे गोपाः विश्वपावदिति नोपाध्यम् ॥

गोपानसी । स्त्री । छादनार्थवृदारुणि । वलभ्याम् । कुड्येषु छादनार्थं दत्ते वक्रकाष्ठे ॥ छादनाधारे । पटलाधारवंशपञ्जरे ॥ गोपायति । गुपू० । घा कुसकान् नसट् मत्वय. । अल्लोपयलोपौ ॥ गवां गोभिर्वा पानम् किरणानां ग्रहणम् किरणैर्वा शोषणम् । तत् स्नाति निवर्त्तयति । पोन्तकर्मणि । आतोनुपेतिक. । गौ० ङी ॥ष्

गोपायितः । त्रि । रक्षिते ॥ गोपाय्यते स्म । गुपू० । क्तः । आयादयआदेशा नुकेषा ॥

गोपालः । पु । नृपे । भूपे ॥ गोपे । गवां पालके ॥ हंसे ॥ श्रीकृष्णे ॥ तद्यथा । यथाद्यायोपनीयाम्बु-

गोपाष्ट

जरुचि रुरुणाम्भोजनेत्रो ऽम्बुजस्रो वालो जङ्घाकटीरस्थलकलितरणत् किङ्किणीको मुकुन्दः । दोर्भ्यां हैय ङ्गवीनं दधद् ऽतिविमलं पायसं वि श्वबन्द्यो गोगोपीगोपवीतो हरिनख विलसत्कण्ठभूष श्चिरंव वृतितन्वसा रः ॥ सर्वस्य जगतः पालनात् । विष्णौ ॥ गां भूमिं वेदं तन्मूलं यज्ञादिकंवा । पालयति । गोःपालयतिवा । पालरक्षणे । कर्मण्यण् ॥ ङगणे । मध्यगुरौ ।ऽ। ॥

गोपालकः । पुं । शिवे ॥ श्रीकृष्णे ॥ गवांपालके ॥ गोपालएव । स्वार्थेकन् ॥

गोपालकर्कटी । स्त्री । ग्वालकाकडी इति प्रसिद्धे कर्कटी प्रभेदे । क्षुद्रेर्वारौ । क्षुद्रचिर्भिटायाम् ॥

गोपालिका । स्त्री । गोपालकस्त्रियाम् ॥ अथपुंयोगलक्षणोङीप्प्राप्तः पालकान्तात्रेति निषिध्यते ॥ कीटविशेषे । मद्याभीरौ ॥ शारिवायामोषधौ ॥

गोपाली । स्त्री । गोपालकर्क्यम् ॥ गोरक्ष्याम् ॥ गोप्याम् ॥ गोपाली करतालीनर्त्तनशाली पुनातुवनमाली ॥

गोपाष्टमी । स्त्री । गोष्टाष्टम्याम् ॥ यथा । शुक्लाष्टीकार्त्तिकेतु स्मृता गोपाष्ट

मी वुचैः । तद्दिने वासुदेवोऽभू
द्गोपः पूर्वन्तु वत्सपः ॥ तत्र कुर्या
द्गवां पूजां गोयानं गोप्रदक्षिणम्
। गवानुगमनं कार्यं सर्वान् कामान
ऽभीप्सता ॥

गोपिका । स्त्री । गोपव्याम् ॥ गोपाय
ति । गुपू० । ण्वुल् ॥ गोप्याम् ॥

गोपित्तम् । न । गोरोचनायाम् ॥

गोपिनी । स्त्री । श्यामालतायाम् ॥

गोपी । स्त्री । गोपस्त्रियाम् ॥ गोप-
स्य स्त्रीत्यर्थे पुंयोगादाख्यायामिति
ङीप् ॥ आरिवायाम् ॥ रक्तिकायां
म् ॥ रक्तिकायाम् । मूलप्रकृतौ ॥
गोपायति । गुपू० । आयाभावे । प
चाद्यच् । गौरादिङीप् ॥

गोपीथः । पुं । न । रक्षणे ॥ न । तीर्थे
॥ जलद्रोण्याम् ॥ गावःपिबन्त्यस्मि
न् । या० । निधीयगोपीयावगयाद
तिथक् ॥ गोपीथःसोमपानमिति-
वेदभाष्यम् ॥

गोपुच्छः । पुं । द्वारविशेषे ॥ गोवालू
ले ॥ गोवालूवदनरे ॥

गोपुटा । स्त्री । स्थूलैलायाम् ॥

गोपुटिकम् । न । शिवलिङ्गस्यमण्डपे ॥

गोपुरम् । न । पुरद्वारे ॥ द्वारमात्रे ॥
कैवर्त्तीमुस्तके ॥ गो जलं विपर्त्ति ।
पुपालनपूरणयोः । मू० क० ॥ गौर्जे

लं पुरमस्येतिवा ॥ यद्वा । पुरति
। पुरअग्रगमने । इगुपधेति कः । ग
वांपुरम् ॥ गोपायतिवा । गुपू० । वाहु
लकादुरच् ॥ यद्वा । पोर्यते । पुरुमह
त्वे । इगुपधत्वात् कः । रत्नयोरभेदः
गोभिःपुरम् ॥ गा.पुरतिवा । पुर० ।
मू० कोवा ॥

गोपुरकः । पुं । कुन्दुरुके । वहुगन्धे ॥
गोपुरीषम् । न । गोमये ॥

गोपेन्द्रः । पुं । विष्णौ ॥ गोपराजे ॥

गोपेशः । पुं । शाक्यमुनौ ॥ गोपिराजे
॥ नन्दघोषे ॥

गोप्ता । त्रि । रक्षके ॥ गोपायति ।
गुपू० । तृच् ॥ श्रीकृष्णे ॥ सहिस्वमा
यया स्वात्मानं संवृणोति ॥

गोप्त्री । स्त्री । गोपिकायाम् ॥ रक्षि
कायाम् ॥

गोप्यः । पुं । दासीपुत्रे ॥ त्रि । रक्षणी
ये ॥ गुप्ते ॥ सङ्गोपनीये ॥ यथा ।
आयुर्वित्तं गृहच्छिद्रं मन्त्रमैथुन
भेषजम् । अपमानं तपोदानं नव
गोप्यानि यत्नतः इति ॥ गुप्यते । गुपू० ।
ऋहलोर्ण्यत् ॥

गोप्यकः । पुं । दासे ॥ गोप्यात् स्वार्थेकः
॥ गोप्यंकायतिवा । कै० । प्रातरितिकः

गोप्याधिः । पुं । वन्यकविशेषे ॥ तथा
च नारदः । अधिक्रियत इत्याधिः

गोमय

स विज्ञेयो द्विजच्चणः । कृतकालोऽपनेयश्च यावद्देयोद्यत स्तथा ॥ स पुनर्द्विविधः प्रोक्तो गोप्यो भोग्य स्तथैवच । गोप्योरक्षणीयः ॥

गोपाली । स्त्री । ओषधिविशेषे ॥ पाकर्क्कोतिङीप् ॥

गोभण्डीरः । पुं । जलकुक्कुभखगे ॥

गोमक्षिका । स्त्री । मक्षिकाविशेषे । दंशे । डाँस इतिभाषा ॥

गोमान् । त्रि । गवीश्वरे । गोमिनि ॥ बहवोगावोऽस्य । भूम्नि तदस्त्यर्थीतिमतुप् ॥

गोमतम् । न । गव्यूतौ ॥

गोमतल्लिका । स्त्री । प्रशस्तायांगवि ॥ प्रशंसावचनैश्चेति नित्यसमासः ॥

गोमती । स्त्री । स्वनामख्यातायांनद्याम् । षाण्णिषव्याम् ॥ वैदिकमन्त्रविशेषे ॥ उगितश्चेतिङीप् ॥

गोमन्तः । पुं । विन्ध्यप्रत्यन्तपर्व्वते ॥

गोमयः । पुं । न । गोविष्ठे ॥ गोःपुरीषम् । गोश्चपुरीषे इतिमयट् ॥ अत्यन्तजीर्णदेहाया वन्ध्यायाश्च विशेषतः । रोगार्त्तायाः प्रसूतायाः नगोर्गोमयमाहरेत् ॥

गोमयच्छत्रम् । न । गिलीन्ध्रके ॥

गोमयच्छत्रिका । स्त्री । उच्छिलीन्ध्रे । गिलीन्ध्रे । टिटीरे ॥

गोमुखः

गोमयप्रियम् । न । भूतृणे ॥

गोमयेष्टा । स्त्री । गोमयजातकीटविशेषे । गईम्याम् । गोबरीला इति भाषा ॥

गोमायुः । पुं । शृगाले ॥ गन्धर्वविशेषे ॥ गां विकृतां वाचं मिनोति । डुमिञ्० । कृवापेत्युण् ॥

गोमी । पुं । शृगाले ॥ बुद्धभिक्षुशिष्ये । श्रामणेरे ॥ त्रि । गोमति ॥ उपासके ॥

गोमीनः । पुं । मत्स्यविशेषे ॥

गोमुखः । पुं । मातङ्गिपुत्रे ॥ महादेवगणान्तरे ॥ नक्रे ॥ यन्त्रविशेषे ॥ न । कुटिलागारे ॥ वाद्यभाण्डे ॥ लेपने ॥ चौरक्रियमाणे सुरङ्गायां प्रभेदे ॥ जपमालागोपनाय पट्टवस्त्रादिनिर्म्मिते गोमुखी इति प्रसिद्धे यन्त्रविशेषे ॥ यथा । चतुर्विंशाङ्गुलमितं पट्टवस्त्रादिसम्भवम् । निर्माय ऽष्टाङ्गुलिमुखं ग्रीवां तत्षड्दशाङ्गुलम् ॥ सैषं गोमुखयन्त्रञ्च सर्वतन्त्रेषुगोपितम् । तन्मुखे स्थापयेन्मालां ग्रीवामध्यगतः करः ॥ प्रजपेदिधिनागुणांवर्णमालाधिकांप्रिये । इति मुण्डमालातन्त्रम् ॥ गोमुखादेतन्नोमालां गोपयेन्माहजाग्रत् । इति मयातन्त्रम् ॥

गोमेदः

गोमुखी । स्त्री । मन्त्रजपार्थंकर्पटादि निर्मितगुप्तिकायाम् । गोमुखे ॥ राढदेशस्थनदीविशेषे ॥

गोमूत्रम् । न । गोजले ॥ अस्यगुणाः । गोमूत्रं कटु तीक्ष्णोष्णं क्षारं तिक्तं कषायकम् । वह्निदीपनं मेध्यं पित्तकृत् कफवातहृत् ॥ शूलगुल्मोदरानाहकण्डूत्तिमुखरोगजित् । कासश्वासापहं शोथकामलापाण्डुरोगहृत् ॥ *॥ कण्डूकिलासगदशूलमुखाक्षिरोगान् गुल्मातिसारकृमिदामयमूत्ररोधान् । कासं सकुष्ठजठरकृमिपाण्डुरोगान् गोमूत्रमेकमपि पीतमपाकरोति ॥ सर्वेष्वपि पञ्चमूलेषु गोमूत्रं गुणतोऽधिकम् ।

गोमूत्रि

अतो विशेषाकथने, मूत्रं, गोमूत्रमुच्यते ॥ प्लीहोदरश्वासकासशोथवर्चोग्रहापहम् । शूलगुल्मकृमिज्ञानाहकामलापाण्डुरोगनुत् ॥ कषायं तिक्ततीक्ष्णञ्च पूरणात् कर्णशूलहृत् ॥

गोमूत्रिका । स्त्री । तृणविशेषे । क्षेपजायाम् । रक्तहरितायाम् ॥ चित्रकाव्यविशेषे । यथा । गतिरुद्भावचा य त्र मार्गे सूत्रस्य गोरिव । गोमूत्रिकेति तत् प्राहु र्दुष्करान्तरदिदोविदुरिति ॥ षोडशकोष्ठदये पङ्क्तिद्वये ऽर्द्धद्वयं क्रमेण विलिख्यैकान्तरविनिमयेन वाचने श्लोकनिष्पत्तिर्भवतीत्युद्धारः ॥

उदाहरणंयथा ॥

प्र	व्र	त्ते	वि	क	स	द्वा	नं	सा	ध	ने	प्य	वि	षा	दि	भिः ।
व	ह	पे	वि	क	स	द्वा	नं	यु	प	मा	प्य	वि	षा	णि	भिः ॥

इतिमाघे १९ सर्गे ४६ श्लोकः ॥

अस्याश्चत्वारोभेदाः । पादगोमूत्रिका अर्द्धगोमूत्रिका श्लोकगोमूत्रिका विपरीतगोमूत्रिकेतिभेदा इति रत्नावलीकण्ठाभरणम् ॥

गोमेदः । पुं । गोमेदकमणौ ॥ दीपविशेषे ॥ यथा । गोमेदे गोपतिर्नाम राजा भूदसबोधनः । याज्यो ऽभूद्वह्निकल्पाना मौतथ्यानां मनोः कुले ॥ सतोष हरियज्ञाय प्रहृष्टेषु भृगूनगुरून् । वव्रे तं गौतमः को पादशपत् सोऽगमत् पशुम् ॥ यज्ञवाटे ऽस्य तां गावो दृष्ट्वा कोपाविना मुनेः । तन्मेटसा मणीछत्वा

गोमेद

गोमेदः सतनोऽभवदिति ॥

गोमेदकः । पुं । स्वनामा प्रसिद्धे मणि विशेषे ॥ नी पीतभणौ ॥ राहुरत्ने । तमोमणौ ॥ अश्वपरीक्षा यथा । हिमाम्बुवेणा सिन्धौवा गोमेदमणिसन्निभः । स्वच्छकान्तिर्गुरुः स्निग्धो वर्णाढ्यो दीप्तिमानपि ॥ वच्चः पिङ्गरो धन्यो गोमेदस्तिक्तो मतः । चतुर्णां जातिभेदस्तु गोमेदेषु प्रकाश्यते ॥ ब्राह्मणः शुक्लवर्णःस्यात् क्षत्रियोरक्तउच्यते । आर्षो वैश्यजातिस्तु शूद्रस्तत्वानीलउच्यते ॥ छाया चतुर्विधा ज्ञेया रक्ता पीता ऽसिता तथा ॥ गुरुप्रभाढ्यः सितवर्णरूपः स्निग्धो मृदुर्वीतिमलः पुराणः ॥ स्वच्छस्तु गोमेदमणि र्धनं तोयं करोति स्वच्छो धनधान्य वृद्धिम् । लघुर्विरूपो ऽतिखरो ऽन्यमानः स्नेहोपलिप्तो मलिनः खरोपि ॥ करोति गोमेदमणि र्विनाशं सम्पत्तिभोगायुषवीर्य्यराशेः ॥ ये दोषा हीरके चोक्ता स्ते गोमेदमणावपि । परीक्षा वक्ष्यित कार्या शाणोक्ता रत्नकोविदैः ॥ स्फटिकेनैवकुर्वन्ति गोमेदप्रतिरूपिकम् । गुरुत्वगोमेदसमं गोमेदं तु मूल्यं सुवर्णतोदैगुण्यमाहुरेके । अन्येतथा विद्रुमतुल्यमूल्यं तथा

गोरक्ष

परेषामरतुल्यं माहुः ॥ चतुर्विधा नां मेपांतु धारणं परिसम्मतमिति ॥ काकोले ॥ पर्व्वते ॥

गोमेदसन्निभः । पुं । दुग्धपाषाणे ॥

गोमेधः । पुं । यज्ञविशेषे ॥ तस्य कलौनिषेधो यथा । अश्वालम्भं गवालम्भं सन्यासंपलपैतृकम् । देवराच्च सुतोत्पत्तिः कलौपञ्चविवर्जयेत् ॥

गोयुगम् । न । गोद्वये ॥ गवोर्युगम् ॥

गोरचः । पुं । नागरङ्गे । नारङ्गे ॥ कषमनाऽौषधौ ॥ त्रि । गोरचके । गोपे ॥ रचतीतिरचः । गोरचः ॥

गोरचकर्कटी । स्त्री । चिर्भिटायाम् ॥

गोरचजम्बूः । स्त्री । गोधूमे ॥ गोरचतण्डुलायाम् ॥ धोरटाफले ॥

गोरचतण्डुला । स्त्री । गोरचचाउलिया इति गौडभाषाप्रसिद्धे क्षुद्रक्षुपविशेषे । गाङ्गेरुक्यान् । नागदन्त्याम् ॥

गोरचतुम्बी । स्त्री । कुम्भतुम्ब्याम् ॥

गोरचदुग्धा । स्त्री । क्षुद्रक्षुपविशेषे । नागदुग्धायाम् । वहुपर्णायाम् । अमृतसञ्जीवन्याम् ॥

गोरची । स्त्री । क्षुद्रक्षुपविशेषे । गुन्द्रपङ्क्तायाम् । पञ्चपर्णिकायाम् ॥ गोरचदुग्धायाम् ॥ कृष्णतुम्ब्याम् ॥

गोरचम् । न । पाशुपाल्ये ॥ गोरचती

ति गोरत्वः । तस्यभावः । ष्यञ् ॥
गोरङ्गुः । पुं । पक्षिविशेषे ॥ चमके ॥ वन्दिनि ॥
गोरटः । पुं । दुष्टखदिरे ॥
गोरणम् । न । गुरणे । उद्यमे । भारोद्यमने ॥ गूर उद्यमे । चु० । ल्युट् ॥
गोरसः । पुं । दुग्धे ॥ दधि ॥ दध्यादिषु । घोले । तक्र ॥ गोरसस्य दुग्धस्य विकारत्वात् उपचारात् ॥
गोरसजम् । न । तक्रे ॥
गोरोटी । स्त्री ।
गोरोचिटका । स्त्री । } शारिकाविहगे ॥
गोरिका । स्त्री ।
गोरुतम् । न । क्रोशयुग्मे ॥ गोःशब्दे ॥
गोरोचम् । न । हरितालें ॥
गोरोचना । स्त्री । स्वनामख्यातपीतवर्णद्रव्ये । शोभनायाम् । मङ्गलायाम् । मेध्यायाम् ॥ गोरोचना हिमा तिक्ता वश्या मङ्गलकान्तिदा । विषा ऽलक्ष्मीग्रहोन्मादगर्भस्रावच्छतास्रहृत् ॥
गोर्दम् । न । मस्तिष्के । मस्तकभवसेदे ॥ गुर्यते गुरतेवा । गुरी उद्यमने । अच्दादय इतिसाधु ॥
गोलः । पुं । सर्ववर्तुले ॥ मदनवृक्षे ॥ जारात् विधवासुते ॥ भूगोले ॥ खगोले ॥ यथा । गोलं श्रोतुं यदि तव

मति र्भास्करीयं शृणु त्वमितिशिरोमणिः ॥ एकराशौपड्ग्रहयोगे ॥ यथा । ग्रहाणा मेकस्मिन् यदि भवति षण्णां निश्चति तदा गोलोयोगः प्रलयपद मिन्द्रोपि लभते । भवे लोको रङ्कः परिहरति पुत्रञ्च जननी न्नृपाणां नः स्याज्ञ खलति वसुधा शुष्यतिनदीति ॥ एकराशौसप्तग्रहयोगे ॥ यथा । सप्तग्रहा यदैकस्या गोलयोग स्तदाभवेत् । दुर्भिक्षं राष्ट्रपीडाच सस्मिन् काले न्नृपक्षय इति ॥ न । मण्डले ॥ गुडे ॥ घञ् । उभयोरभेदः ॥
गोलकः । पुं । जारेतोधिधवासुते ॥ मणिके । अक्षिकूटे । गोल इतिभाटइतिचभाषा ॥ गुडे ॥ पिण्डे ॥ यथा । तेजसां गोलकः सूर्योग्रहर्क्षाण्यम्बु गोलकाः । प्रभावन्तो हि दृश्यन्ते सूर्यरश्मिविदीपिताः ॥ इतिसूर्यसिद्धान्तः ॥ गन्धरसे । वोले ॥ न । गोलोके ॥
गुल्यते । गुडरक्षायाम् । घञ् । स्वार्थेकन् । उभयोरैक्यम् ॥
गोलक्षणम् । न । गवां प्रशस्तालक्षणस्वरूपे ॥ यथा । पराशरः प्राह वृद्धयाय गोलक्षणं तत् क्रियते तनोऽयम् । यथा समासः शुभलक्षणाः सर्वा सवा यागमतोऽभिधा

गोलक्षण

स्ये ॥ अशुभलक्षणा गावश्चाह । सा स्त्राविलरुक्षाक्ष्यो मूषिकनयनाश्च न शुभा गावः । प्रचला श्लिष्टविषाणाः करटाः खरस्तब्धवर्णाश्च ॥ दग्धसदृशचतुर्दन्त्यः प्रलम्बमुखाननाविनतपृष्ठाः । ह्रस्वस्थूलग्रीवायवमध्या दारितखुराश्च ॥ श्यावातिदीर्घजिह्वाः गुल्फौ रतितनुभिरतिदृढद्विधा । अतिकंबुदाः कृशदेहा नेष्टाङ्गीनाधिकाङ्ग्यश्च ॥ ४ ॥ अथ वृषलक्षणम् । वृषभो ध्येवंस्थूलातिस्निग्धवृषणः सिरातिततक्रोडः । स्थूलसिराचितगण्डश्लिष्टस्थूलं मेढ्रनेत्रश्च ॥ मार्जाराक्षः कपिलः करटो वा न शुभदो द्विजस्यैव । कृष्णोष्ठतालुजिह्व स्त्रसनो यूथस्य घातकरः ॥ ६ ॥ स्थूलशृङ्गमणिशृङ्गः सितोदरः कृष्णसारवर्णश्च । गृहजातोऽपित्याज्यो यूथविनाशावहो वृषभः ॥ ७ ॥ श्यामकपुष्पचिताङ्गो भस्मारुणसन्निभो विडालाक्षः । विप्राणामपि न शुभंकरोति वृषभः परिग्रहीतः ॥ ये चोद्वरन्ति पादान् पङ्गादिव योजिताः वृषभीशः । काचरनयना हीनाश्च पृष्ठतस्ते न भारसहाः ॥ ९ ॥ अथ अशुभलक्षणसहितानाह । मृदुसंहतातामोष्ठा स्तनुस्फिजस्ताम्रतालुजिह्वाश्च । ह्रस्वतनूच्चश्रवणाः सुकुचयः पृष्ठजङ्घाश्च ॥ आताम्रसंहतखुरा ढोरक्ता दृढक्रकुद्युक्ताः । स्निग्धश्लक्ष्णतनुत्वग्रोमाण स्ताम्रतनुशृङ्गाः ॥ तनुभ्रूस्मृग्वालधयो रक्तान्तविलोचना महोच्छ्वासाः । सिंहस्कन्धा स्तन्वल्पकम्बलाः पूजिताः सुगताः ॥ ११ ॥ वामावर्त्तैर्वामे दक्षिणपार्श्वे च दक्षिणावर्त्तैः । शुभदा भवन्त्यनडुहो लक्षणभिश्चैवं कनिभाभिः ॥ वैदूर्यमल्लिकाबुदुचणाः स्थूलनेत्रवर्त्मानः । पार्ष्णिभिरस्फुटिताभिः ग्रस्ताः सर्वे च भारसहाः ॥ घाणोष्ठे शे सवलिर्मार्जारमुखः सितश्च दक्षिणतः । कमलोत्पलबलाक्षाभः सुवालधिर्वाजितुल्यजवः ॥ कम्बैर्दीर्घैर्मेघोदरैश्च सङ्क्षिप्तवङ्क्षणक्रोडः । क्षेपो भाराध्वसहो जवेऽश्वतुल्यश्चशस्तफलः ॥ १५ ॥ सितवर्णः पिङ्गश्च स्ताम्रविषाणेक्षणो सहावक्त्रः । हंसो नामशुभफलो यूथस्य विवर्द्धनः प्रोक्तः ॥ १६ ॥ भूस्मृग्वालधिरक्ताम्रविषाणो रक्तदृक्कबुद्मांश्च । क्लमाय श्वस्वामिन मचिरात् कुरुते पतिं लक्ष्म्याः ॥ १७ ॥ योवालिंतैश्च चरणैर्यश्चेष्टवर्णश्च सोपि शुभफलकृत् । मिश्रफलोऽविप्राणो

यदि नैकान्तप्रश्नोऽपि ॥ १८ ॥
इतिवाराहीसंहितायां गोलक्षणंनाम अष्टपञ्चाशोऽध्यायः ॥ ५८ ॥

गोला । स्त्री । गोदात्रयोम् ॥ सख्याम् ॥ क्षुनख्याम् ॥ दुर्गायाम् ॥ पक्वान्नने ॥ मण्डले ॥ अलिञ्जरे ॥ बालखेलने । बालक्रीडनकाष्ठे ॥ गां दीप्तिं लाति । ला० । आतश्चेति कः ॥ गुड्यते वा गुडवेष्टने घञ् । डस्य रेयम् ॥

गोलाङ्गूल. । पुं । असितमुखे कपिविशेषे । कपिभाषे । दधिगोले ॥ कृष्णवानरे ॥

गोलासः । पुं । शिलीन्ध्रे ॥

गोलिङ्गः । पुं । घण्टापाटलो ॥

गोलीढः । पुं । लोधविशेषे । घण्टापाटलो ॥ गोभिर्लिह्यतेस्म । लिह० । क्त ॥

गोलोक. । पुं । न । श्रीकृष्णस्य नित्ये धामनि ॥ श्रीकृष्णस्थाने ॥ यथा । वैकुण्ठस्य तृतीयभागेगोलोकं सर्वसोपनम् । तत्रैव राधिका देवी विभुजो मुरलीधरः ॥ यद्रूपंगोलकं धाम तद्रूपं नास्ति मामके । ज्ञानेषा चक्षुषो किं वा ध्यानयोगो न विद्यते ॥ गुह्यतत्त्वमयं देवि नानारूपेण गोभितम् । भण्यतेगोगकाख्यंश्रीवि

गोवर्द्धं

ष्णो र्लोभमन्दिरम् ॥ श्रीविष्णोः सच्चिद्रूपस्य यत्स्थलं चित्तमोहनम् । तल्लक्षणस्य माहात्म्यं किंमया कथ्यतेऽधुनेत्यादि माहात्म्यादिकं तन्त्रशास्त्रे ब्रह्मवैवर्त्तपुराणेच द्रष्टव्यम् ॥

गोलोमिका । स्त्री । गोधुमा प्रतिपाचरी इतिच गौडभाषा प्रसिद्धे क्षुद्रक्षुपविशेषे । क्रोष्टुकपुच्छिकायाम् । प्रसरिण्याम् ॥

गोलोमी । स्त्री । श्वेतदूर्वायाम् ॥ गोलोमस्य जाता । तत्रजातत्वेन ॥ वचायाम् ॥ भूतकेशे ॥ गोलोम्नामियम् । तस्येदमिच्छति । संज्ञापूर्वकत्वान्नवृद्धिः ॥ वेण्यायाम् ॥ गौलोमाख्याः । गोशब्दोगोलोमसदृशेखण्डिकः । अनडुपथालोमिन इति ङीप् ॥ गोलोमिकायाम् ॥

गोवत्सादी । पुं । टकै ॥

गोवन्दनी । स्त्री । प्रियङ्गौ । फलिन्याम् ॥ गवि भूमौवन्द्यते । वदि० । कर्मणिल्युट ॥ पीतदण्डोत्पले ॥

गोवरम् । न । गोमयविशेषे ॥ गोठाना गोमुच्छुर्णं शुष्कचूर्णितगोमयम् । गोवरं तत् समाख्यातं वह्निदं रससाधने ॥

गोवर्द्धनः । पु । स्वनाम्ना प्रसिद्धे पर्वतविशेषे । गिरिराजे ॥ अन दि [illegible]

दासोऽयं भूधरो नात्र संशयः । शुक्ल प्रतिपदिप्रातःकार्त्तिके ऽर्च्यो ऽत्रवैष्णवैः ॥ पूजामन्त्रस्तु । गोवर्द्धनधराधारगोकुलत्राणकारकः । विष्णुबाहुकृतोच्छ्रायोगवां कोटिप्रदोभवेति ॥ वि । गोवर्द्धके ॥ गवां वर्द्धनः ॥

गोवर्द्धनधरः । पुं । श्रीकृष्णे । नन्दनन्दने ॥ गोवर्द्धनश्च गिरेः धरो धारकः ॥

गोवर्द्धनधारी । पुं । श्रीकृष्णे । यशोदानन्दने ॥

गोवश्या । स्त्री । वन्ध्यायाङ्गवि ॥

गोविन्दः । पुं । वासुदेवे ॥ तज्ज्ञानंयथा । फुल्लेन्दीवरकान्ति मिन्दुवदनं बर्हावतंसप्रियं श्रीवत्साङ्कमुदारकौस्तुभधरं पीताम्बरं सुन्दरम् । गोपीनां नयनोत्पलार्चितततनुं गोगोपसङ्घावृतंगोविन्दं कलवेणुवादनपरं दिव्याङ्गभूषंभजेइति ॥ गोशब्दवाच्यानि इन्द्रियाणि नित्यं प्राप्ते ॥ गांवेदलक्षणां वाणीं विन्दति इति व्युत्पत्त्या सर्ववेदोपादानत्वेन सर्वज्ञे ॥ गां भुवं धेनुं स्वर्गं वेदं वा अविदत् विन्दति वा । विद° विदृलृ° । गवादिषुविन्देःसंज्ञायामितिशः । वाराहरूपेणेदुरणात् कामधेनोरैश्वर्यप्राप्तेः । पन्द्रेणास्वर्गस्य निवेदनात् मत्स्यादिरूपेण वेदोद्धरणाद्वा ॥ गोभिर्वेदवाक्यैर्विन्दते वा । गोभिरेव यतो वेद्यो गोविन्दः समुदाहृतः इति विष्णुतिलकम् ॥ वह्निपुराणेयमानुशासनेतन्नामसाहात्म्यं यथा । येतिष्ठन्तः स्वपन्तश्च गच्छन्तश्चलिते च्युते । सङ्कीर्त्तयन्ति गोविन्दं तेवस्त्याज्याःसुदूरतइति ॥ गवाध्यक्षे ॥ बृहस्पतौ ॥

गोविन्दद्वादशी । स्त्री । फाल्गुनशुक्लद्वादश्याम् ॥

गोविट् । पुं । गोमये ॥ गोर्विट् ॥

गोविष्ठा । स्त्री । गोमये ॥ वनोपले ॥ गोर्विष्ठा ॥

गोवीथी । स्त्री । मध्यममार्गे नक्षत्रविशेषाणां संज्ञाविशेषे ॥ यथा । हस्तश्चित्रातथास्वातीगोवीथीतित्रयंविदेतेति ॥

गोवृन्दम् । न । गोसमूहे ॥

गोव्रतकृत् । न । गोमये ॥

गोशरण्यः । पुं । व्याघ्रादिनो दुर्गाच्च गोः परित्राणकारके ॥ गो गवां वा शरण्यः ॥

गोशालम् । न । गोगृहे ॥ गवांशाला । विभाषासेनेति पाक्षिकंङीवत्त्वम् ॥ वि । गोशाले नाने ॥ स्वाभान्तगोशालेतिजातार्थप्रत्ययस्यलुक् ॥

-इतिभाषा ॥ गवांशाला ॥

गोश्रीपर्णम् । न । चन्दने ॥ चन्दनविशे
षे । हरिचन्दने ॥ गोश्रीपर्णाकारेम
लये कदेशेजाते कालतास्रव्यामिश्र
वर्णे, उत्पलगन्धिनि अतिसुरभिगो
तचतया सदैव सर्पैर्वेष्टिते इति
-ख्यातारः ॥ गोः श्रीपर्णमिव गोश्री
-पर्णोगिरिसख्याकर इति स्वामी ॥ ग
-वांसक्तके ॥

गोश्रीपर्णकः । पुं । श्रोणपुष्पीवृक्षे ॥ क-
-पमादिसमुद्भवे गोरोचनासदृशवर्णे
चन्दनजातिविशेषे ॥ गोमस्तके ॥

गोशृङ्गः । पुं । वर्षुरवृक्षे ॥ न । गोवि
-षाणे ॥

गोश्रुतिः । पुं । वैयाघ्रपदे ऋषिवि-
-शेषे ॥

गोष्ठम् । न । गवांस्थाने ॥ गावस्तिष्ठ-
-न्त्यत्र । ष्ठा॰। घञर्थे इति सुपित्थ
इति वा कः । अम्बाम्बेतिपक्षम् ॥
चिदधिष्ठिताधिकारे॥ गावःस्योवादी
नीन्द्रियाणि तिष्ठन्त्यत्रेति पूर्ववत् म
क्रिया ॥ गोष्ठीत्यादौ ॥

गोष्ठपतिः । पुं गवांस्थानाधिपे ॥

गोष्ठश्वः । पुं । परनिंसके । यः स्वगृहा
-ङ्गनेस्थितः परान्वेष्टितस्मिन् ॥ गो-
-ष्ठेश्वा इति, सप्तमीतत्पुरुषे अचतुरे
-त्यादिनाऽच् । नस्तद्धितइतिटिलो-

पः ॥ षष्ठीतत्पुरुषेतु गोष्ठस्वाम्यित्येव ॥

गोष्ठाष्टमी । स्त्री । गोपाष्टम्याम् ॥

गोष्ठी । स्त्री । सभायाम् । परिषदि ॥
संलापे ॥ गोप्यवर्गे ॥ विषं गोष्ठी द
रिद्रस्य ॥ गावोऽनेकावाधस्तिष्ठन्त्य
स्याम् । घञर्थेकः । अम्बाम्बगोभूमी
तिषक्षम् । गौरादित्वात् ङीष ॥

गोष्ठीपतिः । पुं । गोप्यवर्गाभिपालके
॥ सभापतौ ॥

गोष्ठीभेदः । पुं । क्रीडादिभेदे ॥

गोष्पदम् । न । गोक्षुरक्षेत्रे ॥ वि । ग
वां गतिर्गोचरे ॥ गोपद प्रमाणे ॥
गोःपदम् । गावः पद्यन्ते यस्मिन् दे
शे स गोभिः सेवितो गोष्पदः । गो
ष्पदंसेवितासेवितप्रमाणेष्वितिसुट्
सत्वषत्वञ्चनिपात्यते । असेविते
गोष्पदान्यरण्यानि । प्रमाणे गोष्प
दमात्रंसेवम् ॥

गोसः । पुं । वोले ॥ उषःकाले । वि
भाते ॥ गां जलं स्यति । पोऽन्तकर्म
णि । आत इतिकः ॥

गोसङ्ख्यः । पुं । गोपे ॥ गावः सङ्ख्याय
। कथिक् । कथिक.ख्यञ् । सुमि
त्य इतिकः ॥

गोसदृक्षः । पुं । गवये ॥

गोसन्दायः । पुं । गोदानकर्त्तरि ॥

गोसम्भवा । स्त्री । श्वेतदूर्वायाम् । वि ।

गोच्य:

गोर्जाते ॥ [illegible] ॥

गोसर्ग: । पुं । प्रभाते ॥ [illegible]

गोसव: । पुं । गोमेधयज्ञे ॥ [illegible]

गोस्तन: । पुं । चतुर्यष्टिकहारे । गो: कुचे ॥ [illegible]

गोस्तनी । स्त्री । कपिलद्राक्षायाम् । द्राक्षायाम् । मनक्कादाख इतिभाषा । गो: स्तनोऽस्या: । गोस्तनसदृशे गाशब्दो गौण: । स्वाङ्गाच्चोपसर्जनादिति ङीष् ॥ [illegible]

गोस्थानम् । न । गोष्ठे ॥ गवांस्थानम् ॥ गास्थानकम् । न । गोष्ठे ॥ स्वार्थेक: ॥

गोस्वामी । [illegible] । गोपतौ ॥ [illegible]

गोहन्त्रम् । न । गोमये ॥ [illegible]

गोहरीतकी । स्त्री । बिल्वे ॥ [illegible]

गोहालिया । स्त्री । गोवालिया इति ख्याते व्रतविशेषे ॥ [illegible]

गोहित: । पुं । घोषलतायाम् । बिल्वे ॥ श्रीकृष्णे ॥ गवां विदह्यर्थं गोवर्द्धनगिरिं धृतवान् इतिगोभ्योहित: । चतुर्थीतदर्थेत्यादिना चतुर्थी तत्पुरुष: । गोभ्यो भूमे र्भारावतरणेच्छया शरीरं यस्मैकुर्वन् वा हित: ॥ [illegible] । गवां हितकारके । गोग्रासोहर्त्तरि ॥ [illegible]

गोहिरम् । न । [illegible] मूले ॥ [illegible]

गौच्य: । पुं । मेनासुते । मैनाके ॥ गौ

गौण:

च्या: हिमालयपत्न्या: अपत्यम् । स्त्रीभ्योढगिति ढक्किप्राप्ते छन्दसि व्यत्ययो बहुलमिति व्यत्ययेन ग गौदिभ्योयञितियञ् ॥ [illegible]

गौञ्जिक: । पुं । स्वर्णकारे । गुञ्जाद्यवहर्त्तरि ॥ [illegible]

गौड: । पुं । देशविशेषे ॥ तद्देशसीमा यथा । बङ्गदेशं समारभ्य भुवनेशान्तगं शिवे । गौडदेश: समाख्यात: सर्वविद्याविशारद: ॥ तद्देशस्थे पुंभि गौडा: ॥ तच्च पद्मोक्तं खण्डपुराणे सारस्वता: कान्यकुब्जा: गौडा मैथिलकोङ्कणा: । पञ्चगौडा इति ख्याता विन्ध्यस्योत्तरवासिन इति ॥

गौडवास्तूक: । पुं । न । वास्तूकप्रभेदे ॥ तद्देवतुहत् पत्रं रक्तं स्याद्गौडवास्तुकम् ॥ [illegible]

गौडिक: । पुं । इक्षुकुट्टके ॥ इक्षौ ॥

गौड्य: । गुडेसाधु: । गुडादिभ्यष्ठक् ॥ न । मद्यविशेषे ॥ [illegible]

गौडी । स्त्री । सुराप्रभेदे । वाल्कल्याम् ॥ रागिणीविशेषे । मेघरागस्य योषिति ॥ काव्यरीतिप्रभेदे ॥ यथा । ओज: प्रसादमाधुर्यं गुणत्रितयभेदत: । गौडवैदर्भपाञ्चालरीतय: परिकीर्त्तिता इति ॥

गौण: । त्रि । गुणयोगात्प्रवृत्ते ॥ अमु

गौतमी

खे ॥ वृत्तोपसर्गादितेर्थे ॥ गुणादंगतः ॥ अश्व ॥
गौणधातुः । पुं । उपधातौ ॥
गौणसन्यासी । स्त्री । अन्त्यागिनि । क
र्मफलत्यागित्वेपिकर्मानुष्ठायिनि ।
अत्रे ॥
गौणी । स्त्री । वृत्तिविशेषे ॥ अशीति
प्रकारलक्षणान्तर्गतलक्षणाविशेषे ॥
पिप्पल्यादः सोर्हित्यदर्थम् ॥
गौतमः । पुं । नचिकेतसः पितरिमु
निविशेषे । उद्दालके । गोत्रतो गौत
मः इति प्रसिद्धे ॥ मुनिविशेषे । अक्ष
पादानन्दे ॥ अक्षपादवचनगौतमे मु
निविशेषे । शाक्यसिंहे । बौद्धोदनौ
बुद्धे ॥ गौतमस्यायमिष्यः । तस्येद
मित्यण् । तत्रोपावतारादा ॥ गौत
मस्यापत्ये । अपत्यण् । बहुत्वे गो
तमाः ॥
गौतमसम्भवा । स्त्री । गोदावर्यां न
द्याम् ॥
गौतमी । स्त्री । उमायाम् । दुर्गायाम्
॥ गोरोचनायाम् ॥ गोदावर्याम् ॥ कौ
ण्याम् ॥ शाक्यलक्षणगौतमप्रणीतो
क्तौ विद्यायाम् ॥ षोडशपदार्थप्रति
पादिकायामक्ष्यापतिगौतमप्रोक्तो
क्तौ न्यायविद्यायाम् ॥ शार्ङ्गरवाद्यो
ङीन् ॥ राक्षसीविशेषे ॥

गौरजी

गौतमः । पुं । स्थावरविषप्रभेदे ॥
गौधारः । पुं । गौधिकासुते । अहेर्गौ
धायांजाते चन्दनगोहेतिख्याते ॥ गौ
धायो अपत्यम् । अरिष्टगुदीत्वामि
त्यारक् ॥
गौधूमः । पुं । गोधूमविकारे । गोधूम
स्यावयवो विकारो वा ॥ विल्वादित्वा
दण् ॥
गौधूमीनम् । न । गोधूमचूर्णे ॥ गो
धूमानां भवनं चेत्यम् । धान्यानांभ
वनेचेत्यण् ॥
गौधेयः । पुं । गोधिकात्मजे । गौधे
रे । गोधायाअपत्यम् । शुभ्रादित्वा
ट्ठक् ॥
गौधेरः । पुं । गौधारि ॥ गोधाया अ
पत्यम् । गोधायाढ्रक् ॥
गौरः । पुं । श्वेतसर्षपे ॥ चन्द्रे ॥ धव
वृक्षे ॥ अरुणवर्णे ॥ गौरा इतिख्या
ते पीतिवर्णे । श्वेतवर्णे ॥ चि । तप्त
वर्णवति । विशुद्धे ॥ न । पद्मकेसरे
॥ कुङ्कुमे ॥ स्वर्णे ॥ गुरतिगवते म
नोऽथवा । गुरीउद्यमने गुङ्गतौ
वा । कृज्ञेन्द्रेतिसाधुः ॥ गूर्यतेऽने
नेति वा । गुरी० । कृत्यल्युटेति घञ् ।
गौरण्य ॥ प्रज्ञादित्वाण् ॥
गौरत्वम् । न । पाशुपाल्ये ॥
गौरजीरकः । पुं । अजाजयाम् । श्वेत
जीरके ॥

गौरतित्तिरः । पुं । कपिञ्जले ॥
गौरत्वक् । पुं । इङ्गुदीवृक्षे ॥
गौरवम् । न । अभ्युत्थाने ॥ गुरुत्वे । लाघवाभावे ॥ गुरोर्भावः । इगन्ता ज्वलघुपूर्वादित्यण् ॥
गौरवितः । त्रि । आर्यमिश्रे ॥ गौरवः सञ्जातोऽस्य । तारकादित्वादितच् ॥
गौरशाकः । पुं । गिरिजमधूके । अल्पमधे ॥
गौरसर्षपः । पुं । श्वेतसर्षपे । सिद्धार्थे ॥ गौरश्चासौसर्षपश्च ॥ त्रिभीराज सर्षपैः परिमिते ॥
गौरसुवर्णम् । न । चित्रकूटप्रसिद्धे पद्मराजाकप्रभेदे । वारिजे । गन्धशाके ॥
गौरा । स्त्री । गौर्याम् । शिवायाम् ॥ कृतिदिरूपः ॥
गौराद्रिकः । पुं । स्थावरविषविशेषे ॥
गौरास्यः । पुं । कृष्णवानरे ॥
गौरिका । स्त्री । अष्टवर्षीयांकन्यायाम् ॥ गौर्येव । कः ॥
गौरिजः । पुं । सिद्धार्थे ॥ लौहचूर्णे ॥
गौरी । स्त्री । पार्वत्याम् ॥ योगाग्निदग्धदेहा या पुनर्जाता हिमालये । यङ्खेन्दुकुन्दधवला सतो गौरीतु सा स्मृता ॥ असञ्जातरजःकन्यायाम् ॥ हरिद्रायाम् ॥ दारुहरिद्रायाम् ॥

गौरुत

गोरोचनायाम् ॥ प्रियङ्गुवृक्षे ॥ वसुधायाम् ॥ नदीविशेषे ॥ ब्रह्मभार्यायाम् ॥ बुद्धशक्तिविशेषे । मायादेव्याम् ॥ मल्लिकायाम् ॥ क्षेत्रदूर्वायाम् ॥ मल्लिकायाम् ॥ तुलस्याम् ॥ सुवर्णकदल्याम् ॥ आकाशमांस्याम् ॥ रागिणी विशेषे । मालवरागभार्यायाम् ॥ गौरवर्णान्वितायाम् ॥ गुरुते । गुरुशब्दे । ऋज्वेन्द्रेति रन्तो गौरोनिपातितः । गौरोवर्णोऽस्याः । गौरादित्वान् ङीष् ॥
गौरीगुरुः । पुं । हिमवति ॥ गौर्या गुरुः ॥
गौरीजम् । न । अभ्रके ॥
गौरीतन्त्रम् । न । तन्त्रविशेषे ॥ यथा । सुवर्णं मरिचं शिखं जीरं सारं कृजन्तत्वचम् । एलाचूर्णान्वितं तक्रं घृतभृङ्गुना ॥ पार्वत्या विहितं तक्रं सर्वदोषनिषूदनम् । सुखदं पाचनं दिव्यं महेशस्य मतं प्रियमिति ॥
गौरीपुत्रः । पुं । कार्त्तिकेये ॥ गणेशे ॥
गौरीपुष्पः । पुं । प्रियङ्गुवृक्षे ॥
गौरीलक्षितम् । न । हरितालके ॥
गौरीशिखरम् । न । तीर्थविशेषे ॥
गौरीसुतः । त्रि । दशवर्षोद्वात्मजे ॥
गौरुतल्पिकः । पुं । गुरुस्त्रीगामिनि ॥ गुरुतल्पं गच्छति । गच्छतो वरदा

ग्रन्थन

गादिभ्यः इति ठक् ॥

गौल्किकः । पुं । मुक्तकट्टके ॥

गौल्यम् । न । मधुरे ॥

गौशतिकः । त्रि । गोशतस्वामिनि ॥

गौष्ठीनम् । न । भूतपूर्वगोष्ठे ॥ पूर्वंभूतं गोष्ठम् । गोष्ठात् खञ्भूतपूर्व इतिखञ् ॥ तीर्थविशेषे ॥

ग्रथितः । त्रि । गुम्फिते । दृब्धे । कृतग्रन्थने । गाँथा इतिगूंथा इतिचभाषा ॥ आक्रान्ते ॥ हते । हिंसिते ॥ ग्रथ्नातेस्त । ग्रन्थसन्दर्भे । क्तः

ग्रथितमाखः । पुं । वट्टपक्षी ॥

ग्रन्थः । पुं । गुम्फे । ग्रन्थनायाम् ॥ धने ॥ शास्त्रे ॥ अक्षरसङ्ख्यायाम् । दाक्षिणात्यवर्णनिर्मितौ । अनुष्टुप्श्लोके ॥ ग्रन्थे । विवक्षितार्थप्रतिपत्त्यनुकूलत्वे सति नियतसमानवाक्यसमुदाये । सन्दर्भे ॥ ग्रन्थनम् । ग्रन्थ° । घञ् ॥

ग्रन्थकः । पुं । दाक्षिणात्यानुष्टुपश्लोके ॥ संज्ञायांकन् ॥

ग्रन्थकर्त्ता । पुं । ग्रन्थकारे ॥

ग्रन्थकुटी । स्त्री । लेखभूमौ । लेख्यस्थाने । दफतरखाना इति ख्यातेच अपभ्रंशजनभाषा ॥

ग्रन्थनम् । न । गुम्फने । ग्रन्थने । सन्दर्भे ॥

ग्रन्थिद

ग्रन्थना । स्त्री । ग्रन्थने ॥

ग्रन्थसन्धिः । पुं । काण्डे ॥ पटले ॥ स्थाने ॥ प्रकरणे ॥ पर्वणि ॥ अध्याये ॥ आह्निके ॥ उल्लासे ॥

ग्रन्थिः । पुं । ग्रन्थिपर्णे ॥ गाँठ इति भाषा प्रसिद्धे वंशादिवन्धे ॥ वंशादिसन्धौ । पर्वणि । पोरी इति भाषा ॥ भङ्गिमुस्तायाम् ॥ क्षितायल्याम् ॥ पिण्डालौ ॥ कौटिल्ये ॥ अन्योन्याध्यासे ॥ मायास्यपाशे ॥ रुग्भेदे ॥ ॥ तस्य निदानसम्प्राप्ती यथा । वातादयो मांसमसृक्प्रदुष्टाः सन्दूष्य मेदश्च तथा शिराश्च दृष्टोन्नतं विग्रथितन्तु शोथं कुर्वन्त्यतो ग्रन्थिरितिप्रदिष्टइति ॥ ग्रन्थते । ग्रथि° । सर्वधातुभ्यइन् ॥ खनिकष्यज्यसियसिषनिसनिञ्वनिग्रन्थिवल्लिचरिभ्यश्चेति इर्वा । स्वरेभेदः ॥

ग्रन्थिकः । पुं । करीरे ॥ दैवज्ञे ॥ सदेवपाखण्डे ॥ न । पिप्पलीमूले ॥

ग्रन्थिपर्णं । पुं । न । गुग्गुलौ ॥ ग्रन्थिप्रतिकृतिः । इवेप्रतिकृतावितिकन् ॥

ग्रन्थिका । स्त्री । पिप्पलीमूले ॥

ग्रन्थितः । त्रि । ग्रथिते । गुम्फिते ॥ ॥ ग्रन्थतेरूका । ग्रथि° । क्तः ॥

ग्रन्थिदला । स्त्री । मालाकन्दे ॥

ग्रन्थिलः

ग्रन्थिदूर्वा । स्त्री । मालादूर्वायाम् ॥ ग्रन्थिपर्णः । पुं । चोरनामगन्धद्रव्ये ॥ न । बर्हिपुष्पे । कुक्कुरे । कुकुरौंदा इति ख्याते ॥ ग्रन्थिपर्णं तिक्ततीक्ष्णं कटूष्णं दीपनंलघु । कफवातविषश्वासकण्डूदौर्गन्ध्यनाशनम् ॥ अस्य लघुगुणः । रूक्षता ऽलक्ष्मीराक्षस ऽक्ष्वरनाशित्वमिति ॥ ग्रन्थौपर्णान्यस्य । ग्रन्थ्यादृवर्णान्यस्येतिवा ॥

ग्रन्थिपर्णा । स्त्री । जतुकालतायाम् ॥

ग्रन्थिपर्णी । स्त्री । गण्डदूर्वायाम् ॥

ग्रन्थिपाशः । पुं । ग्रन्थ्यात्मनिमायाख्यपाशे ॥

ग्रन्थिफलः । पुं । शाकुलण्डवृक्षे ॥ मदनवृक्षे ॥ कपित्थवृक्षे ॥

ग्रन्थिभेदः । पुं । गँठकटा इति भाषा प्रसिद्धे तस्करविशेषे । यःपटग्रन्थिस्थितं सुवर्णादिकं ग्रन्थिमोचनेन चोरयतिसदृक्षत्वात्तथात्वम् ॥

ग्रन्थिमान् । पुं । अक्षिसंहारिणि । हाउजोडा इति भाषा ॥ त्रि । ग्रन्थियुक्ते ॥ ग्रन्थिरस्त्यस्यास्मिन्वा । मतुप् ॥

ग्रन्थिमत्कलः । पुं । वल्लुके ॥

ग्रन्थिमूलम् । न । गृञ्जने । गिरिमूले ॥

ग्रन्थिमूला । स्त्री । मालादूर्वायाम् ॥

ग्रन्थिलः । पुं । करीरवृक्षे ॥ विकङ्कततरौ ॥ गण्डकोद्यमाके ॥ क्षितायुः

ग्रहः

ल्याम् ॥ पिण्डालौ ॥ चोरकनामगन्धद्रव्ये ॥ न । पिप्पलीमूले ॥ आर्द्रके ॥ त्रि । ग्रन्थियुक्ते ॥ ग्रन्थिरस्त्यास्ति सिध्मादित्वाल्लच् ॥ ग्रन्थिं लाति । ला० । क ॥

ग्रन्थिला । स्त्री । भद्रमुस्तायाम् । गण्डदूर्वायाम् ॥ मालादूर्वायाम् ॥

ग्रन्थिवर्ची । पुं । ग्रन्थिपर्णे ॥

ग्रन्थिहरः । पुं । अमात्ये । मन्त्रिणि ॥

ग्रन्थीकम् । न । पिप्पलीमूले ॥

ग्रसनम् । न । ग्रासे ॥ ग्रसु अदने । ल्युट् ॥

ग्रसितः । त्रि । कृतग्रासे । कवलिते ॥

ग्रसिष्णुः । त्रि । ग्रसनशीले । न । ग्रसयकाले ॥

ग्रस्तः । त्रि । लुप्तवर्णपदे । असम्पूर्णोच्चारिते । अपूर्णवचसि ॥ लुप्तो वर्णः पदंवा यत्रवाक्ये पदेवा ॥ ग्रस्यते । ग्रसु । क्तः । यस्यविभाषेति पाचि कडभावः ॥ भक्षिते । भुक्ते ॥

ग्रहः । पुं । अनुग्रहे ॥ निर्बन्धे । आग्रहे । अभिनिवेशे ॥ ग्रहणे ॥ रक्षोयमे ॥ पूतनादियाग्रहे ॥ सैद्धिके ये ॥ उपरागे । राहुकर्तृकचन्द्रादिकर्मकग्रहणरूपक्रियायाम् ॥ सोमादिपाषे ॥ यथा । सोमामङ्गल्य सूरायग्रहान् गृह्णाति ॥ सूर्यादिनवसु

॥ तेषयथा । सूर्यश्चन्द्रो मङ्गलश्च बुधश्चापि बृहस्पतिः । शुक्रः शनैश्चरो राहुः केतुश्चेति नव ग्रहाः ॥ एषामष्टधा गतिर्यथा । वक्रा ऽतिवक्रा कुटिला मन्दा मन्दतरा समा । शीघ्रा शीघ्रतरा चैवं ग्रहाणां गतिरष्टधा ॥ ग्रहणम् गृह्णातिवा । ग्रह उपादाने । ग्रहवृहनिश्चिगमश्चेत्यप् । विभाषाग्रहबृन्दारकेत्यण्वा ॥ बन्धने ॥ गृह्यते वध्यते चेचन्द्रो येन ग्रहस्तत्केन बन्धनेनेतिभाष्यम् ॥

ग्रहकल्लोलः । पुं । राहौ ॥

ग्रहणम् । न । स्वीकारे ॥ हस्तयोर्व्यापारे । आदाने ॥ आदरे ॥ करे । हस्ते ॥ उपलब्धौ ॥ बन्धने ॥ धीगुणे ॥ प्रत्यये ॥ इन्द्रिये ॥ बन्धने ॥ उपरागे । पर्वप्रतिपत्सन्धौ राहुणा सूर्यचन्द्रमसोर्ग्रसने ॥ अथ सूर्यचन्द्रयोर्ग्रहणकारणम् । यथा । भविष्यादन्तरे राहोः केतोर्वा संस्थितो रविः । चतुर्व्यादन्तरे चन्द्रस्तदासम्भाव्यतेग्रहः ॥ यस्मिन्नृचे रविस्तस्मात् चतुर्दशगतः शशी । पूर्णिमाप्रतिपत्सन्धौ राहुणाग्रस्यते शशी ॥ कृष्णपक्षे तृतीयायां मासस्यैं यदि जायते । तत स्वयोदशे सूर्यो राहुणा ग्रस्यते रविः ॥ ग्रहणकालिकरविचन्द्रयोर्मेघेनाच्छादनानाच्छादनकारणं यथा । रविभौमनवांशेतु निरभ्रं ग्रास मादिशेत् । बुधसौरिनवांशेतु मलिनं चन्द्रवर्णभम् ॥ गुरोरंशक मासाद्य दृश्यते सवलाङ्कः । शशिशुक्रनवांशेतु प्रावृट्काले मलज्वलम् ॥ अन्यत्राव्यक्तभूतौ तौ दृश्येते छादिताम्बरौ विति ॥ चन्द्रग्रहश्चन्द्रवारे सूर्यै सूर्यग्रहस्तथा । चूडामणिरयंयोगस्तत्रानन्तफलं स्मृतम् ॥ अन्यस्माद्ग्रहणात् कोटिगुणं ब्रह्मलं लभेत् ॥ इतिविशेषः ॥ गृह्यते ऽनेन । ग्रह० । करणेल्युट् । सामान्येनपुंसकम् ॥

ग्रहणिः । स्त्री । ग्रहणीरोगे ॥ गृह्णाति । ग्रह० । ग्रहेरनिः ॥

ग्रहणी । स्त्री । पुरीषपूर्णायामन्त्यधिष्ठाननाड्याम् ॥ रोगविशेषे । प्रवाहिकायाम् । सङ्ग्रहण्याम् ॥ तस्यनिदानसम्प्राप्ती यथा । अतीसारे निवृत्ते ऽपि मन्दाग्नेरहिताशिनः । भूयः सन्दूषितो वह्निः ग्रहणीमपि दूषयेत् ॥ एकैकशः सर्वशश्च दोषैरत्यर्थमूर्च्छितैः । सा दुष्टा बहुशो भुक्तं भुक्तं नेव विमुञ्चति ॥ पक्वंवा सरुजं पूति मुहुर्बद्धं मुहुर्द्रवम् । ग्रहणीरोगमाहुस्तमायुर्वेदविदोजञ

ना इति । अतीसारेद्रवधातुप्रवृत्तिः ग्रहण्यान्तुवद्दुष्टापिमलस्य प्रवृत्तिरितितयोर्भेदः॥ गृह्णाति जाठराग्निम् गृह्यते वा ग्रह° । कृत्यल्युटोबहुलमितिल्युट् । ङीप्॥ यद्वा । ग्रहेरनिः । कृदिकारादितिङीष्॥

ग्रहणीकक् । स्त्री । ग्रहण्याम् । प्रवाहिकायाम्॥

ग्रहणीहरम् । न । लवङ्गे॥ त्रि । ग्रहणीहारिणि॥

ग्रहदेवता । स्त्री । ग्रहाणांदेवते॥ यथा । ग्निवाधिदैवतं सूर्यं वह्निप्रत्यधिदैवतम् । १ । उमाधिदैवतंसोमं जलप्रत्यधिदैवतम् । २ । स्कन्दाधिदैवतंभौमं क्षितिप्रत्यधिदैवतम् ३ ॥ नारायणाधिदैवञ्च विष्णुप्रत्यधिदैवतम् । बुधम् । ४ । ब्रह्माधिदैवं सूर्यास्त्रमिन्द्रप्रत्यधिदैवतम् । ५ । शक्राधिदैवतं शुक्रं शचीप्रत्यधिदैवतम् ६ ॥ यमाधिदैवतं प्रजापतिप्रत्यधिदैवतम् ७ ॥ कालाधिदैवं सूर्यास्त्रं सर्पप्रत्यधिदैवतम् । ८॥ चित्रगुप्ताधिदैवञ्च ब्रह्मप्रत्यधिदैवतम् ९ ॥ चरन्यादिषुच । अग्निरापोधरा विष्णुरिन्द्रेन्द्राग्नी प्रजापतिः । सार्पराज्ञी तथाब्रह्मा ग्रहाणां देवताः स्मृताः । प्रतिबुधशनीकीमत

म् । बृहद्यौनक्यान्तु शिवादीनामेव ग्रहदेवतात्वमुक्तम् ॥

ग्रहद्रुमः । पुं । शाकवृक्षे ॥

ग्रहनायकः । पुं । सूर्ये ॥ शनैश्चरे ॥

ग्रहनाथः । पुं । क्षत्रियान्तरतिगौड भाषाप्रसिद्धे वृक्षे ॥

ग्रहनाशनः । पुं । ग्रहनाशे ॥

ग्रहनेमिः । पुं । चन्द्रे ॥

ग्रहपतिः । पुं । सूर्ये ॥ ग्रहाणांपतिः ॥ अर्कद्रुमे ॥

ग्रहपुषः । पुं । भानौ । सूर्ये ॥

ग्रहभक्तिः । स्त्री । केषां जनपदानां को ग्रहो ऽधिपतिरित्येतत् यत्र निरूप्यते तत्र ग्रन्थे ॥ ग्रहाणांभक्तिर्विभागः ॥ विशेषंपश्यसारङ्गा १६ अध्याये ॥

ग्रहभिन्नम् । न । भौमादिग्रहैर्भिन्ने ॥ ग्रहेण ग्रहैर्वाभिन्नम् ॥

ग्रहभिन्नभम् । न । भौमादिग्रहैर्भिन्ने नक्षत्रे ॥ ग्रहभिन्नञ्चतत् भञ्च ॥

ग्रहभीतिजित् । पुं । गन्धद्रव्यविशेषे । चीडायाम् । दारुगन्धायाम् ॥

ग्रहमैत्रम् । न । ग्रहाणांमित्रामित्रादि विचारे ॥ यथा । सूर्यस्य मित्राणि कुजेन्दुजीवाः समौ बुधौ ऽरौ शनिभार्गवौ च । चन्द्रस्य मित्रेतु दिवाकरौ रमाः स्मृतामन्त्रसितेक्ष्य

भौमाः ॥ कुजस्य मित्राणि रवीन्दुजीवाः समौ तथा मन्दभृगू बुधोरिः । बुधस्यमित्रे सितभास्करौ समाः कुजेज्यमन्दा रिपुरिन्दुरेव ॥ मित्राणि जीवस्य कुजेन्दुसूर्याः शनिः समः शुक्रबुधौ तु शत्रू । शुक्रस्य मित्रेशनिरौ हिगोयौ समौ कुजेज्यौ तु रिपूरवीन्दू ॥ शनेस्तु मित्रे भृगुचन्द्रपुत्रौ जीवः समोऽन्येऽरयस्तु शेषाः ॥

ग्रहयागः । पुं । ग्रहाणांयत्ते ॥ अस्यप्रयोजनन्तु । शान्तौपुष्टौ महेशानि तथा क्रूरेऽपिकर्मणि । ग्रहयागं प्रकुर्वाणो वाञ्छितार्थं लभामुयादिति महानिर्वाणतन्त्रम् । तस्यशान्तिकत्वेमलमासादावपि कर्त्तव्यत्वम् । पौष्टिकत्वेतु शुद्धकाले ॥ अपिच । गोचरे वा विलग्ने वा ये ग्रहारिष्टसूचकाः । पूजयेत्तान् प्रयत्नेन पूजिता स्युः शुभावहा ॥ श्रीकामः शान्तिकामो वा ग्रहयज्ञंसमाचरेत् । दृष्टायुःपुष्टिकामो वा तथैवाऽभिचरन्नपीति ग्रहयागतत्त्वम् ॥ अस्य प्रयोगो महानिर्वाणे द्रष्टव्य ॥

ग्रहयुद्धम् । न । ग्रहयोरायोधने ॥ विगतिं चरतां ग्रहाणां मुपर्य्युपर्य्यतिमार्गसंस्थानाम् । अतिदूराद्दृष्टविपये समतामिव समायातानाम् ॥ आ

सन्नक्रमयोगाद्भेदोल्लेखोऽशुभद्दं नासत्यैः । युद्धं चतुष्प्रकारं पराशरैर्मुनिभि रुक्तम् ॥ भेदे वृष्टिविनाशो भेदः सुहृदां महाकुलानाञ्च । उल्लेखे शस्त्रभयं मन्त्रिविरोधः प्रियान्नत्वम् ॥ अंशुविरोधे युद्धानि भूभृतां शस्त्रकृच्चुदवमर्दाः । युद्धे चाप्यपसव्ये भवन्ति युद्धानि भूपानाम् ॥ विशेषोबाराह्यां १७ अध्याये ॥

ग्रहयुद्धभम् । न । ग्रहयुद्धे । यस्मिन्नक्षत्रे ग्रहयोर्युद्धंजातं तस्मिन् ॥

ग्रहराजः । पुं । रवौ ॥ चन्द्रे ॥ ग्रहाणां राजा । टच् ॥ गुरौ ॥

ग्रहवर्षफलाध्यायः । पुं । कस्य ग्रहस्य कस्मिन्वर्षे कीदृशानि शुभफलानि भवन्ति तन्निरूपणपरे ग्रन्थसन्दर्भे ॥ यतोवराहमिहिरेण पूर्वमेवप्रतिज्ञातमासीत् । वर्षे यस्यस्फलंमासेचमुनिप्रणीतमालोक्य । तद्वृत्तैर्वक्ष्येहं होरातन्त्रोक्तविधानइति ॥ विशेषंपश्यबाराह्यां १९ अध्याये ॥

ग्रहवल्लि । पुं । ग्रहाणां होमाधिकरणे ॥ तेच नव सङ्ख्यकाः । यथा । कपिल. पिङ्गलो धूम्र. केतुश्च जठराग्निकः । शिखीच चाटकश्चैव महातेजा हुताशन. । हुताशनश्च विज्ञेयो नवैतेग्रहवल्लयइति ॥

ग्रामः

ग्रहशृङ्गाटकः । पुं । वाराह्यां २० अ । ध्याये ॥

ग्रहसमागमः । पुं । वाराह्यां २८ अध्याये निरूपितः ॥

ग्रहाधारः । पुं । ध्रुवचक्रे ॥

ग्रहामयः । पुं । भूतादिनाजाते रोगे । आवेशे ॥

ग्रहाशी । पुं । ग्रहनाशयुक्ते ॥

ग्रहाह्वयः । पुं । भूताङ्कुरद्रुमे ॥

ग्रहीता । त्रि । गृहयाञ्चौ । ग्रहणकर्त्तरि ॥ गृह्णाति । ग्रह° । तृन् ॥

ग्रामः । पुं । संवसथे । विप्रादिवर्णैर्प्राये प्राकारपरिखादिरहिते वृक्षादिशून्ये बहुजनवासस्थाने ॥ विप्राश्चत्रियभृत्याश्च यत्रचैव वसन्तिहि । स तु ग्राम इति प्रोक्तः शूद्राणां वासएव वा ॥ तथा शूद्रजनप्राया सुसमृद्धकृषीवला । चेचोपयोगभूमध्ये वसतिर्ग्रामसंज्ञिका ॥ शब्दादिपूर्वकोग्रामः समूहार्थे । यथा । शब्दग्रामः भूतग्रामः । इत्यादि. ॥ संपूर्णः संयुगेभ्मृतः ॥ स्वरविशेषे ॥ सप्त स्वरा स्त्रयो ग्रामा मूर्च्छना एकविंशतिः ॥ तेच षड्जग्रामो मध्यमग्राम. पञ्चमग्रामश्चेति त्रय. । ग्रामलक्षणं । यथा कुटुम्बिन. सर्वेप्येकी भूताभवन्तिहि । तथा स्वराणां सन्दोहो

ग्रामता

ग्रामइत्यभिधीयते ॥ षड्ज ग्रामो भवेदादौ मध्यमग्राम एवच । गान्धारग्राम इत्येतत् ग्रामत्रयमुदाहृतम् ॥ तथा । नन्द्यावर्त्तो यजीमूतः सुभद्रो ग्रामका स्त्रयः । षड्जमध्यमगान्धारास्त्रयाणांजन्महेतवः ॥ ग्रसते ग्रस्यते वा । ग्रसु अदने । ग्रसेरार्चेतिमन् आत्वञ्च ॥

ग्रामकूटः । पुं । शूद्रविशेषे । महत्तरे । महता इतिभाषा ॥

ग्रामगर्द्या । स्त्री । ग्रामवहिर्भूतसेनायाम् ॥ पदात्यैरिवाह्यार्थ्येषुचेति क्यप् ॥

ग्रामजनिघ्नावी । स्त्री । नखनिघ्नायाम् ॥

ग्रामणीः । पुं । नापिते ॥ पत्यौ ॥ त्रि । प्रधाने ॥ ग्रामाधिपतौ ॥ भोगिके ॥ स्त्री । वेश्यायाम् ॥ ग्रामेयायाम् ॥ नीलिकायाम् ॥ ग्रामंनयति । ग्री ञ्० । सत्सूद्विषद्रुत्यादिनाक्विप् । अग्रग्रामाभ्यामितिणत्वम् ॥

ग्रामतक्षः । पु । बहूनां साधारणो काष्ठतक्षिण ग्रामाधीने वर्द्धकौ ॥ ग्राम स्तक्षा । ग्रामकोटाभ्यांतक्षणइति टच् ॥

ग्रामता । स्त्री । ग्रामसमूहे ॥ ग्रामाणांसमूह. । ग्रामजनबन्धुभ्यस्तल् ॥

ग्रामीणा

ग्रामधर्म्मः । पुं । व्यवाये ॥ ग्रामेभवः । युवादित्वादण् । सचासौ धर्म्मश्च ॥
ग्रामभृतः । पुं । ग्रामप्रेष्ये ॥ विप्रश्चेत् सपञ्चमाद्ब्राह्मणः ॥
ग्राममञ्जरिका । स्त्री । ग्रामयुद्धे ॥ शृङ्खलाभेदे ॥
ग्राममुख । पुं । कुक्कुरे ॥
ग्रामसृग । पुं । कुक्कुरे ॥
ग्रामयाजकः । पुं । अब्राह्मणविशेषे । ग्रामस्थनानावर्णानां पुरोहिते ॥ ग्रामार्थे यज्ञनि ॥ इतिश्रीधरस्वामी ॥
ग्रामयाजी । पुं । बहूनांयाजके ॥
ग्रामरासकः । पु । भगिनीपतौ ॥
ग्रामाधानम् । न । सभायाम् ॥
ग्रामाधीन । त्रि । ग्रामवश्यवर्त्तिनि नापितवर्द्धक्यादौ ॥ ग्रामेऽधि । सप्तमीतिसमासः । अडपचेतिखः ॥
ग्रामान्तम् । न । उपग्रामे । ग्रामस्यनिकटे ॥ ग्रामस्यान्तम् समीपम् ॥
ग्रामिणी । स्त्री । नीलीवृक्षे ॥
ग्रामी । त्रि । ग्रामविशिष्टे । ग्रासन इति भाषा ॥ यथा । अश्वीचवाल चरीतवाल इत्यादि ॥
ग्रामीण । पु । ग्राम्यशूकरे ॥ कुक्कुरे ॥ काके ॥ त्रि । ग्रामेऽङ्गते ॥ ग्रामे भवः । ख ॥
ग्रामीणा । स्त्री । नीलिकौषधौ ॥ पा

ग्राम्यप

ङ्गाशाके ॥ ग्रामेभवा । ग्रामाद्यखञौ । आवितिखञ् । टाप् ॥
ग्रामेयकः । पुं । ग्राम्ये ॥ ग्रामेभव । कव्यादित्वात्ढकञ् ॥
ग्रामेया । स्त्री । ग्राम्यनार्याम् ॥
ग्रामेशः । पुं । ग्रामस्याधीशे । ग्रामेश्वरे ॥
ग्राम्यम् । न । स्त्रीकरणे । रतबन्धे ॥ त्रि । ग्राकृते । मूढे । ग्रामभवे । ग्रामीणे ॥ इन्द्वाहिकन्याघटतैलिचोपाग्राम्या निशायां दृषमेषकौच ॥ अस्त्री । ले । भण्डादिवचने ॥ छागादिषु ॥ छागमेषवृषास्त्वाद्याः ग्राम्याः प्रोक्ता महर्षिभिः । ग्राम्या वातहरा सर्वे दीपनाः कफपित्तलाः ॥ मधुरा रसपाकाभ्यां रूक्षणा बलवर्द्धनाः ॥ ग्रामेभव । ग्रामाद्यखञौ । वितिञैपि कोय ॥
ग्राम्यकन्द । पुं । खेलकन्दे । वनयोङ्ग इति भाषा ॥ ग्राम्यकन्दस्तुदो षघ्न ॥
ग्राम्यकर्कटी । स्त्री । कुष्माण्डे ॥
ग्राम्यकुङ्कुमम् । न । कुसुम्भे ॥
ग्राम्यधर्म्मः । पुं । ग्रामधर्म्मे । मैथुने ॥ ग्रामेभवाः ग्राम्याः ग्रालिकग्राकटिकप्रभृतयः । तेषांधर्म्मः ॥
ग्राम्यपशु । पु । ग्रामजातजन्तौ ॥ सतु सप्तविधो यथा । गौः संघो ऽजो

ग्रावस्तु

मनुष्यश्च अश्वाश्वतरगर्दभाः। इति॥

ग्राम्यमङ्गुरिका। स्त्री। शृङ्गीमत्स्ये॥

ग्राम्यमृगः। पुं। कुक्कुरे॥

ग्राम्यराशिः। पुं। मिथुनकन्यातुलावृश्चिकधनुष्कुम्भेषु॥ राशौ मेषवृषयोः॥

ग्राम्यवल्लभा। स्त्री। पालङ्क्यशाके॥

ग्राम्यशूकरः। पुं। ग्रामोत्पन्नवराहे। विड्वराहे॥

ग्राम्या। स्त्री। तुलस्याम्॥ नखनिष्पावित्रायाम्॥ नील्याम्॥ वृत्त्यनुप्रासघटकवृत्तिभेदेषु कोमलापर्यायेषु॥

ग्राम्याश्व। पुं गर्दभे॥

ग्रावा। पुं। प्रस्तरे॥ पृथ्वीधरे। पर्वते॥ गरतेः। गृसृशब्दे। अन्येभ्योपीति डः। आवनति। वनसम्भक्तौ शब्दे वा। विच्। ग्रश्वासावाघाच्च॥ गरते। अन्ये॰ वनिप्। पृ॰ वा॥ यद्वा। गिरति गृणाति वा। गृनिगरणेशब्दे वा। अन्येभ्योपीति वनिप्। पृ॰॥ यद्वा। गरति। गरसेके। मू॰ कः। अवति। अवरक्षणादौ। बाहुलकात् कनिः ग्रश्वासावाघाच्च॥ मेघ॥ इतिविश्वः॥ त्रि। दृढे॥ इति शब्दरत्नावली॥

ग्रावस्तुत्। पुं। ऋत्विग्विशेषे॥ स्तुभासेतिक्विप्॥

ग्राही

ग्रासः। पुं। कवले। पिण्डे। मुखपूरणान्नादौ॥ यथा। कुक्कुटाण्डप्रमाणग्रासयावान्वा प्रविशेन्मुखम्। एतं ग्रासं विजानीयात् शुद्ध्यर्थं कायशोधनम्॥ इति प्रायश्चित्तेपराशरः॥ ग्रस्यते। ग्रसु॰। अकर्त्तरीतिघञ्॥

ग्राहः। पुं। गाह इति भाषा प्रसिद्धे जलजन्तुविशेषे। अवहारे॥ ग्रहणे॥ गृह्णाति। ग्रह॰। विभाषाग्रहइति व्यवस्थितेविभाषया जलचरे निरन्तमेव ण प्रत्ययः। स्वार्थेण्यन्तादच्घञ्वा॥ शिशुके॥

ग्राहकः। पुं। व्याधानांघातिमच्चिणि। श्येने॥ सितावरशाके॥ विषवैद्ये॥ त्रि। गाहक इति भाषाप्रसिद्धे ग्रहीतरि॥ धान्यानांग्रहीतरि॥ गृह्णाति। ग्रहउपादाने। ण्वुल्॥

ग्राहयिता। त्रि। ग्रहणकारयितरि॥

ग्राहिणी। स्त्री। क्षुद्रदुरालभायाम्॥ क्षिरइति इतिगौडभाषाप्रसिद्धे तामसूलावृक्षे॥

ग्राहितः। त्रि। ग्रहणं प्रापिते। ग्रहणकराया इतिभाषा॥

ग्राही। पुं। कपित्थे॥ त्रि। ग्रहणकर्त्तरि। ग्राहके॥ मलवद्धके। धारके॥ गृह्णाति। ग्रह॰। ग्रहेरादित्वाद्विनिः॥

ग्रीष्मसु

ग्राहिफल: । पुं । ऋषित्यागमे ॥ ग्राह्य: । त्रि ॥ उपादेये ॥ ग्रहीतुमुचिते ॥ ग्रीवा । स्त्री । कन्धरायाम् । शिरोधरायाम् ॥ तच्छिरायाम् ॥ गिरन्त्यनया गीर्यतेऽनयावा ॥ शेवयच्छ्रिजिह्वाग्रीवेतिसाधु: ॥ ग्रीषी । पुं । स्त्री । उष्ट्रे ॥ त्रि । प्रशस्तग्रीवायुक्ते ॥ अतिशयिता प्रशस्तावा ग्रीवा अस्त्यस्य । ग्रीवादित्वादिनि. ॥ ग्रीष्म: । पुं । निदाघर्त्तौ । ज्येष्ठाषाढयो: ॥ उपागमे ॥ अचर्जातस्य फलं यथा । ग्रीष्मोद्भवो भोगभवानुरक्तो वक्ता सुगीतो जनकेलिगीत: । विद्याधनैश्वर्ययशोमनोज्ञो धन्वी सुवेश पररत्नचित्त इति ॥ त्रि । तप्तति ॥ अस्तेरसान् । अस्तु० । ग्रीष्मर्त्त्युणादिसूत्रेणनिपातित: ॥ ग्रीष्मजा । स्त्री । लवल्याम् । लोगा इति गौडप्रसिद्धे फलवृक्षे ॥ ग्रीष्मे जायते । जनी० । ड. ॥ नवमाल्याम् ॥ ग्रीष्मपुष्पी । स्त्री । कणगीपुष्पवृक्षे ॥ ग्रीष्मभवा । स्त्री । नवमल्लिकायाम् ॥ ग्रीष्मेभवोऽस्या: ॥

ग्रीष्मसुन्दर: । पु । ग्रीष्मसुन्दरक. । पु । } गीमाइति गौडप्रसि

द्धे शाकविशेषे ॥

ग्लह.

ग्रीष्मवासम् । नृ । इन्द्रतूले । बहुस्रवृक्षे ॥ बुढियाकाशूत इति भाषा ॥ ग्रीवी । स्त्री । नवमल्लिकायां ग्रीष्मोद्भवा । स्त्री । म् ॥ ग्रैवम् । न । ग्रीवाभरणे । ग्रीवायांभव । अण् ॥ त्रि । तत्रत्ये ॥ ग्रैवेयम् ॥ नं । कण्ठभूषणे ॥ ग्रीवायां भवम् । ग्रीवाभ्योढक्चेतिढक् ॥ ग्रैवेयकम् । न । कण्ठभूषायाम् ॥ ग्रीवायांभवम् । कुलकुक्षिग्रीवाभ्य ष्ठक्ठञौचेतिढकञ् ॥ ग्रैष्मिक । पुं । ग्रीष्मसहचरिते ग्रहभेदे ॥ ग्रीष्म । तमधीतेवेदवा । वसन्तादिभ्यष्ठक् ॥ ग्रैष्मी । स्त्री । नवमल्लिकायाम् ॥ ग्रीष्मजायाम् ॥ ग्रीष्मेजातादि । सन्धिवेलाद्यृतुनक्षत्रेभ्योण् ॥ ङीप् ॥ ग्लपित. । त्रि । क्लान्ते ॥ ग्लस्त: । त्रि । भक्षिते ॥ ग्लस्यतेस्म । ग्लसुग्रहणे । क्त ॥ ग्लह । पु । पणे । द्यूते जामस्थाने । द्यूतादौजय्यस्तेनस्थापिते ॥ ग्लह्यते ऽनेन वा । ग्लहआदाने । पुंसीतिघ. । हलश्चेतिघञ्वा । संज्ञापूर्वकत्वान्नवृद्धि. ॥ गृह्यते इतिवा-ग्लह. । अक्षेषुग्लहइति देवनविषये-पणहयेषुग्राह्येवस्तुनि निपातनंवा ॥

घटः

ग्लाता । त्रि । ग्लानियुक्ते ॥
ग्लानः । त्रि । रोगात्क्षीणकाये । ग्लै क्षये ॥ रोगिणि ॥ ग्लायतिस्म । ग्लैङ् पंचये । गत्यर्थेति क्तः । संयोगादे रितिनत्वम् ॥
ग्लानिः । स्त्री । अस्वाच्छन्द्ये । बलदी नतायाम् ॥ रोगे ॥ हानौ ॥ अनुत्सा हे ॥ ग्लानम् । ग्लै० । ग्लाज्यादि भ्योनिः ॥
ग्लानिच्छेदी । त्रि । खेदहारिणि ॥
ग्लावः । पुं । भैचेये । वकाख्यपौ । चै कितायने ॥
ग्लासुः । त्रि । ग्लाने । रोगक्षीणदेहे ॥ ग्लानग्लौः । ग्लाजिस्थश्नुः ॥
ग्लेपनम् । न । दैन्ये ॥ ग्लेपृदैन्ये । ल्युट् ॥
ग्लौः । पुं । मृगाङ्के । चन्द्रमसि ॥ क पूरे ॥ ग्लायति । ग्लै० । ग्लानुदि भ्योडौः ॥

घः

घः । पुं । घकारे ॥ घण्टायाम् ॥ घघै रवशब्दे ॥ इतिमेदिनिकरः ॥
घटः । पुं । समाधिभेदे । कुम्भके ॥ भ्रमिरः कूटे ॥ कुटे । पृथुवुध्नोदरा

घटयो

कारे । कम्बुग्रीवादिमदाकारादिरू पे । कलसे ॥ कुम्भराशौ ॥ द्रोणप रिमाणे ॥ घटते । घटचेष्टायाम् । पचाद्यच् ॥
घटकः । पुं । वनस्पतौ ॥ योजके । त्य चरे ॥ तल्लक्षणं यथा । घांवको भा वक श्चैव योजक श्चांशक स्तथा । दू यक स्तावक श्चैव घडेते घटकाः स्मृताः ॥ अन्यच्च । के नो विदन्ति पु रुषाः पुरुषानुपूर्वीमुर्वीतले कुलभृ तांपरिवर्त्तनं वा । अत्यन्तसूक्ष्ममपि येकुलतारतम्यं जानन्तितेहि घटका नतु योजकाद्याः ॥ इत्याद्युनिकैर्गी उदेशाङ्गवैः कल्पिता कुलदीपिका ॥ ह्रस्वघटे ॥ घटयति । ण्वुल्तृचौ घटेर्ण्वुच् ॥
घटजन्मा । पुं । अगस्त्यमुनौ ॥
घटदासी । स्त्री । कुट्टन्याम् । रतला स्याम् ॥
घटनम् । न । निर्माणे । घडना इति भाषा ॥ घटेर्ल्युट् ॥
घटना । स्त्री । हस्तिसङ्के ॥ करिणांय टना घटा ॥ मेलने । योजनायाम् ॥ यथा । अघटनघटनापटीयसी मा येति ॥ घटनम् । घटसङ्घाते । चु० । ण्यासश्रन्थोयुच् । टाप् ॥
घटयोनिः । पुं । अगस्त्यमुनौ ॥

घटराज । पुं । कुम्भे ॥

घटा । स्त्री । घटने ॥ गजसंहतौ । घटनायाम् ॥ गोष्ठ्याम् ॥ समूहे ॥

घटनम् । घट° । घटादयः षित इतिषित्त्वाद्ङीष् ॥

घटाम्बु । स्त्री । कुम्भतुल्यम् ॥

घटिकः । पुं । चक्रिके । घटिकावादके ॥ घटीकायति । कै° । आतश्चेतिकः । ष्वायेरितिह्रस्वः ॥ न । नितम्बे ॥ वि । घटेनतरणशीले ॥ घटेनतरतीति । नौद्यघटन् ॥

घटिका । स्त्री । घडी इति भाषायां सिद्धे दण्डे । नाडिकायाम् ॥ घटिकाज्ञानोपायो यथा । निमेषो मानुषो योयं मात्रामात्रप्रमाणकः । तैः पञ्चदशभिः काष्ठा त्रिंशत्काष्ठास्तथाकला ॥ नाडिकातु प्रमाणेनकलाश्चपञ्चच । उन्मानेनाढकसा तु पलान्यर्द्धत्रयोदश ॥ हेममाषैः कृतच्छिद्रा चतुर्भिश्चतुरङ्गुलैः । मागधेन प्रमाणेन जलप्रस्थसुसंभृत ॥ इतिविष्णुपुराणम् ॥ नैमित्तिकलयं प्रपञ्चयिष्यन् निमेषादिकमेण प्रथमांशोक्तमेषकल्पप्रमाण मनुस्मारयति निमेषइति सप्तभिः । मात्रैव मात्रं प्रमाणं यस्य । एकमात्रकाल्य चरोच्चारणकालसम्मितोपि निमे-

षः । निमेषकाष्ठातुल्यादि मात्रा स ब्यवहार्य्य यत इतिब्रह्माण्डोक्तेः ॥ नाडिकाज्ञानोपायमाह । उन्मानेनेति सार्द्धेन । अम्भस उन्मानेन उन्मीयते ऽनेनेत्युन्मानं पात्रम् । अर्द्धेनयोगे त्रयोदश सार्द्धद्वादशेत्यर्थः ॥ उन्मानरूपेण घटितानि सार्द्धद्वादशपलानि सानाडिका । सार्द्धद्वादशपलताम्रनिर्मितपात्रेण सानाडिकाज्ञातव्येत्यर्थः । किंप्रमाणंतत्पात्रं कार्यं तदाह । मागधेनप्रमाणेन जलप्रस्थसुसंभृत इति । सार्द्धद्वादशपलजलेनहि मागधद्रोणप्रस्थः पूर्यते । तत् प्रमाणं पात्रं कार्यमित्यर्थात् सिद्धम् । ननु तथापि पात्रेणकर्मं नाडिकाज्ञानं क्रियापरिच्छेद्यत्वात् कालस्य च्याग्रङ्क्ष्य क्रियासिद्धेः प्रस्थादि विभिन्नष्टि । हेमेति । माषः पञ्चगुञ्जः । हेम्नो माषैः चतुर्भिः श्चतुरङ्गुलेन शलाकारूपेण रचितैः कृतच्छिद्रा । एतदुक्तं भवति । सार्द्धद्वादशपलताम्रमयं मागधप्रस्थसंमितं मूर्द्धायतं पात्रं चतुर्माषचतुरङ्गुलहेमशलाकया कृतावच्छिन्नं जलेक्षापितं तेन च्छिद्रेण यावता कालेन पूर्यते तावान् कालोनाडिकेति । तथाचयुक्तं । द्वादशाढ़क

घटोत्क

लोन्मानं चतुर्भि श्चतुरङ्गुलैः ॥ स्व
र्णमाषैः कृतच्छिद्रं यावत् प्रस्थजल
प्लुतमिति ॥ इतितट्टीकायांश्रीधर
स्वामिनः ॥ गुर्वक्षराणा मुदितं च
षष्ट्या पलं पलानां घटिका किलै
केति कालिदासः ॥ मुहूर्त्ते ॥ अल्पे
घटे ॥ घट्येव । स्वार्थे कः ॥
घटितः । वि । निर्मिते ॥
घटी । स्त्री । घटिकायाम् । दण्डे ।
घडी इतिभाषा ॥ यथा । अलभ्यं
लाभदायुःपलं स्वर्णभारै र्हरो तस्य द
ण्डेन कृत्वा यातियामः । इदानी म
पि श्रीश्वरे मत्त चेतो वितन्वित्व
लं घोषयन्तीघटीयमिति ॥ स्वल्पे
कुम्भे । घडिया इतिभाषा ॥ घट
ते । घट० । ऋच् । जातित्वान्
ङीष् ॥
घटीकारः । पुं । कुलाले ॥ घटीकरो
ति । कृञः कर्मण्यण् ॥
घटीयन्त्रम् । न । अरघट्टे । कूपादे
र्जलोद्धारणयन्त्रे । उद्घाटने ॥ घटी
नामयन्त्रम् ॥ ग्रहणीरोगभेदे ॥ यथा
। प्रसुप्तिः पार्श्वयोः शूलं तथा जल
घटीध्वनिः । तमदन्ति घटीयन्त्र
मसाध्यं ग्रहणीगदमिति ॥
घटोत्कचः । पुं । शिवस्यां भीमसे
नाद्यते राक्षसविशेषे ॥

घण्टा

घटोत्कचान्वकः । पुं । कर्णे । राधेये ।
युधिष्ठिरेऽग्नौ ॥
घटोद्भवः । पुं । अगस्त्यमुनौ ॥
घट्टः । पुं । नद्यादौ स्नानार्थं जलवत
रणस्थाने । घाट इति भाषा । तीर्थ
वत्तरोः शुल्कग्रहस्थाने । जगाति
इति भाषा ॥ घट्यते ऽत्र । घट्ट चल
ने । हलश्चेतिघञ् ॥
घट्टगा । स्त्री । नदीविशेषे । यथा ।
मलापहा भीमरथी च घट्टगा यथा
च कृष्णा जलसाम्यता गुणैः । मला
पहाघट्टपयस्तयापि पथ्यं लघु स्वा
दुतरं सुकान्तिदम् ॥ इति राजनि
घण्टः ॥
घट्टजीवा । पुं । पाटुनि इतिगौडभाषा
प्रसिद्धे वैश्यायां रजकाज्जाते वर्ण
सङ्करजातिविशेषे ॥
घट्टनम् । न ॥ अभिघाते ॥
घट्टना । स्त्री । चलनायाम् ॥ धृतौ ॥
घट्टितः । वि । निर्मिते । घडागयाइति
भाषा ॥ शिवपटार्थं रज्जनार्थाच्चेन
शिसे वस्त्रादौ ॥
घण्टः । पुं । व्यञ्जनविशेषे ॥
घण्टकः । पुं । } घेंटकोणइति
घण्टकर्णः । पुं । } गौडभाषाप्र-
सिद्धे क्षुद्रविशेषे ॥
घण्टा । स्त्री । कांस्यनिर्मिते वाद्यवि-

घण्टार

शेषे । यथा । सर्ववाद्यर्थी घण्टां वा वाभावे नियोजयेदिति ॥ अतिवला यास् ॥ नागबलायाम् ॥ घण्टापाटलौ ॥ अहानि । वाहुलकादुत्वेटो घत्वञ्च । टाप् ॥

घण्टाकर्णः । पुं । शिवस्यातिवल्लभेगणविशेषे ॥

घण्टाताडः । पुं । घडियावली घण्टा पाँडे इतिचभाषाप्रसिद्धे घण्टावादिनि ॥

घण्टानादः । पुं । कुवेरमन्त्रिणि ॥

घण्टापथः । पुं । पुरमधानमार्गे । मत्तहस्तिराजमार्गे । संसरणे ॥ यथा । दश घन्वन्तरो राजमार्गोघण्टापथः स्मृतः ॥ घण्टोपलक्षितः पन्थाः । शाकपार्थिवादिः ॥ यद्वा । घण्टानांपन्थाः । घण्टाग्रहणं वादित्राणां तद्वतां हस्त्यादीनां चोपलक्षणम् । कृत्कपूरित्यः ॥

घण्टापाटलिः । पुं । गोलीढे । मुष्ककवृक्षे ॥ अहानि इति घण्टा । पटगतौ । घञ् । पाटं लाति । ला० । वाहुलकाट्टिः । घण्टाचासौ पाटलिश्च ॥

घण्टारवा । स्त्री । हस्तिविशेषे । शणपुष्पिकायाम् । वनसणइति भाषायाम् । निवा इतिच भाषा ॥ घण्टेव आरौ

घनः

ति । रुशब्दे । अच् ॥

घण्टाली । स्त्री । कोशातकीलताम् ॥

घण्टावीजम् । न । जयपाले ॥

घण्टाशब्दम् । न । कांस्ये ॥ इतिहेमचन्द्रः ॥

घण्टिकः । पुं । घरियाराख्ये यादोविशेषे ॥

घण्टिका । स्त्री । नासामूर्द्धस्थमज्जिह्वायाम् । लम्बिकायाम् ॥

घण्टिनीवीजम् । न । जयपाले ॥

घण्टुः । पुं । गजघण्टायाम् ॥ प्रतापे ॥

घण्टेश्वरः । पुं । मङ्गलपुरे ब्रह्मदातरि देवताविशेषे ॥

घतन । पुं । मारके ॥ हन्ति । हन० । हन्तेर्युन्नाद्यन्तयोर्घत्वतत्वे ॥

घनः । पुं । मुस्तायाम् ॥ अब्दे । मेघे ॥ ओघे ॥ दार्ढ्ये । काठिन्ये ॥ मूर्त्तिगुणः काठिन्यम् । असर्वगतद्रव्यपरिमाणं मूर्त्तिः । सैवगुणः ॥ विस्तारे ॥ लौहमुद्गरे ॥ हन्यते ऽनेनवा ॥ शरीरे ॥ कर्के ॥ अभ्रके ॥ सङ्गतौ याङ्चयस्यपूरणे ॥ समचिघातस्य घनः प्रदिष्टइति भास्करा चार्योक्तेः ॥ न । कांस्यतालादिवाद्ये ॥ मथमन्थत्वे ॥ त्वक्त्वदुत्पलचर्मगतवाद्ययोः ॥ त्वचे ॥ लौहे ॥ चि । निविडे । सान्द्रे ॥ निरन्तरे । पूर्णे ॥ दृढे ॥ हननम् । हन्य

घनमू

तेवायुनावा । ल्युट० ॥ मूर्त्तौ घन इति ल्युटेरप्घनादेशश्च ॥

घनकफः । पुं । वर्षोपले । करकायाम् ॥ घनस्य कफइव ॥

घनकालः । पुं । वर्षाकाले ॥ घनस्य मेघस्य कालः ॥

घनगोलकः । पुं । संश्लिष्टरजतसुवर्णे । सोनारुपामिश्रा इतिभाषा । इति हेमचन्द्रः ॥

घनच्छदः । पुं । शिग्रौ ॥

घनजम्बालः । पुं । चुलुके ॥

घनज्वाला । स्त्री । मेघदीप्तौ । घञ्यामौ ॥

घनतालः । पुं । सारङ्गविहगे ॥

घनतोलः । पुं । चातकपक्षिणि ॥

घनत्वम् । न । सान्द्रतायाम् ॥

घनत्वक् । पुं । खोप्रे ॥

घनद्रुमः । पुं । विकण्टकवृक्षे ॥

घननाभिः । पुं । धूमे ॥

घनपत्रः । पुं । पुनर्नवायाम् ॥

घनपदवी । स्त्री । आकाशे ॥

घनपल्लवः । पुं । शोभाञ्जने ॥

घनपाषण्डः । पुं । मयूरे ॥

घनप्रचयः । पुं । प्राचे । विशेष विज्ञान थिरहिणि ॥ घनीभूतप्रचायश्च ॥

घनफलः । पुं । विकण्टकवृक्षे ॥

घनमूलः । पुं । मोरटे ॥ न । मूरित सजातौ यावृक्षयस्याश्चके ॥

घनरसः । पुं । न । मेघपुष्पे । जले ॥ पुं । सान्द्रे । निर्यासे ॥ मोरटे ॥ कर्पूरे ॥ पीलुपर्ण्याम् ॥ सम्यक्सिद्ध रसे ॥

घनवर्त्म । न । आकाशे ॥

घनवल्लिका । स्त्री । विद्युति ॥

घनवल्ली । स्त्री । अमृतस्रवल्लितायाम् ॥

घनवातः । पुं । नरकविशेषे ॥

घनवासः । पुं । कुष्माण्डे ॥

घनवाहनः । पुं । शिवे ॥ मेघवाहने ॥ । इन्द्रे ॥ घनो वाहनं यस्य ॥

घनवीथिः । स्त्री । अन्तरीक्षे ॥

घनश्यामः । पुं । श्रीरामे ॥ श्रीकृष्णे ॥ त्रि । निबिडकृष्णवर्णे ॥

घनसारः । पुं । कर्पूरे ॥ दक्षिणावर्त्ते । वारिदे ॥ वृक्षविशेषे । जले । वर वारिदे ॥ घनो दृढः सारोऽस्य ॥ घनस्य सारस्तरवा श्रीतत्त्वात् ॥

घनसूची । स्त्री । सूच्याकारमेघे ॥

घनस्कन्धः । पुं । कोशाम्रवृक्षे ॥

घनस्वनः । पुं । तण्डुलीयशाके ॥ मेघध्वनौ ॥

घना । स्त्री । मांसपर्ण्याम् ॥ रुद्रजटायाम् ॥ इतिराजनिर्घण्टः ॥

घनाकरः । पुं । वर्षाकाले ॥ घनानामाकर इव ॥

घनाघनः । पुं । वर्षुकाब्दे ॥ मत्तघा

घनाघ

घर्घर

तुककुञ्जरे ॥ चक्रे ॥ वासवे । इन्द्रे ॥ अन्योन्यघट्टने ॥ त्रि । निरन्तरे ॥ घातुके ॥ हन्ति । हन° । इन्तेर्घञ्च ञ्चेति पचाद्यचिदित्त्वम् आकृचा र्म्यासस्य ॥

घनाघना । स्त्री । कारुमाच्याम् ॥

घनात्ययः । पुं । शरत्काले ॥

घनामयः । पुं । खर्जूरागमे ॥

घनामला । पुं । आकवीरे ॥ पुनर्नवा याम् ॥

घनाश्रयः । पुं । आकाशे ॥

घनोदधिः । पुं । नरकविशेषे ॥

घनोपलः । पुं । करकायाम् ॥

घरः । पुं । गृहे । गेहे ॥ हन्ति हन्यते गम्यते ऽतिथिभिर्वा । हन° । इन्ते रनुघचेतिरन् घादेशो नलोपश्चेति दशपादीवृत्तिकृत् ॥

घरट्टः । पुं । घराट इतिपर्वतीयजन प्रसिद्धायां मेषगण्याम् । जांता चक्की इतिचदेशभाषा ॥

घर्घटः । पुं । चिकणद्रव्ये । घाडरा इतिगौड भाषाप्रसिद्धे ॥

घर्घरः । पुं । चलद्वारिध्वनौ ॥ घाघरा इतिप्रसिद्धे नदविशेषे ॥ घूके ॥ खरे ॥ स्वरविशेषे ॥

घर्घरकः । पुं । घर्घरेनदे ॥ यथा । शो ण घर्घरके जलन्तु रुचिदं सलाप-

घर्म्मितः

शोषापहं पथ्यं वह्निकरं तथाचषलदं । चीणाद्वहिमदमितिराजनिर्घण्टः ॥

घर्घरा । स्त्री । क्षुद्रघण्टिकायाम् ॥ । वीणाप्रभेदे ॥ स्वरविशेषे ॥

घर्घरिका । स्त्री । क्षुद्रघण्टायाम् ॥ वा द्यिभेदखण्डे ॥ मृष्टधान्ये ॥ नदीविशेषे ॥ वाद्यप्रभेदे ॥

घर्घरी । स्त्री । क्षुद्रघण्टिकायाम् ॥

घर्घुरः । स्त्री । घुर्घुरे । घुरघुरिया इतिगौडं प्रसिद्धे कीटे ॥

घर्म्मः । पुं । निदाघे । स्वेदे । श्रमवारिणि । पसीना इति भाषा ॥ आतपे ॥ ग्रीष्मे ॥ उष्णे ॥ जिघर्त्त्यङ्गमनेन । हृचरणदीप्त्योः । घरत्यङ्गमनेनवा । एसेके । घर्मइति धातोर्म्मगुगुणश्चनिपात्क्यते ॥

घर्म्मोदारणम् । न । क्षये ॥

घर्म्मविचर्च्चिका । स्त्री । घर्मविचर्च्याम् । घमाची अबोरी घमौरी अलाई इत्यादि भाषा ॥ स्वेदवाहीनिदुष्यन्ति कोपशोकभयैस्तथा । तत. स्वेद. प्रवर्त्तेत दैर्गन्ध्यं घर्मचर्चिका ॥ राजिकाकृति रुष्णोत्था यतोघर्मविचर्च्चिका ॥

घर्म्मान्तः । पुं । वर्षाकाले ॥

घर्म्मान्तकामुकी । स्त्री । वलाकायाम् ॥

घर्म्मित । त्रि । सञ्जातघर्म्मे ॥ तारका

घाण्टिकः

दित्वादितच् ॥

घर्षः । पुं । विमर्दे । घस्नाइतिभाषा ॥

घर्षणम् । न । घर्षे । निघर्षे । घस्नाइतिभाषा ॥ घृषुसङ्घर्षे । ल्युट् ॥

घर्षणाङ्गः । पुं । मेषणाख्यनि । शिखा मुने । लोढा वट्टा रमणा इत्यादि भाषा ॥

घर्षणी । स्त्री । हरिद्रायाम् ॥

घसिः । पुं । आहारे ॥

घस्मरः । पुं । अग्नौ । भक्षके ॥ घसति तच्छीलः । घस्लृअदने । सृघस्यदःक्मरच् ॥

घस्रः । पुं । अहनि । दिवसे ॥ घसत्यन्धकारम् । घस्लृ° । स्फायितञ्चीति रक् ॥ न । कुङ्कुमे ॥ त्रि । हिंस्रे ॥

घा । स्त्री । काञ्च्याम् ॥ घाते ॥

घाटः । पुं । अवटौ । ग्रीवायामङ्गागे । घाटायाम् ॥ घाटेरच् घञ्वा ॥ घाटाअस्त्यस्या इति वा । अर्शआद्यच् ॥

घाटा । स्त्री । घाटे । कृकाटिकायाम् । शिरसः पश्चात् सन्धौ ॥ घाटयति । घाट्यते वा । घटसङ्घाते । चु° । अच् घञ्वा ॥

घाटिका । स्त्री । घाटायाम् ॥ घाटैव ॥

घाण्टिकः । पुं । चाक्रिके । मिलितानां राजस्तावकानां संज्ञेयम् । घण्टु मिर्मिलित्वास्तुतिपाठके ॥ घण्टया

घातिप्र

चरति । चरतीतिठक् ॥ अन्यत्रतु रात्रेः प्रबोधसमये घण्टाशिल्पास्तु घाण्टिकाः ॥ धुस्तूरटच्चे ॥ त्रि । घण्टावादिनि ॥

घातः । पुं । काण्डे । बाणे ॥ प्रहारे ॥ मारणे ॥ अङ्गपूरणे ॥ यथा । सन्निघातस्घनः प्रदिष्टः ॥ हननम् । हन० । घञ् । हनस्तोचिण्णलोः । ह्रोहन्तेरितिकुत्त्वम् ॥

घातकः । त्रि । वधकृति । हननकर्त्तरि ॥ बहूना मेककार्य्याणां सर्वेषां शस्त्रधारिणाम् । यद्येको घातकस्तत्र सर्वे ते घातकाः स्मृताः ॥ हन्ति । हन० । ण्वुल् । हनस्तोचिण्णलोः । ह्रोहन्तेरितिकुत्त्वम् ॥

घातनम् । न । हनने ॥ वधे ॥ यज्ञार्थपशुवधे ॥ त्रि । वधकर्त्तरि ॥

घातवारः । पुं । राशिविशेषे विशेषवारे ॥ यथा । नक्षे भौमे गोहरिस्त्री शुमन्द श्वन्द्रोदन्वेऽर्कोऽजमे भ श्वर्कर्क्षे । शुक्रः कोदण्डाखिमीने पुक्रमायूकेजीवो घातवारानशस्ता इति ॥

घातिः । स्त्री । पचिबन्धने ॥

घातिन् । त्रि । हननशीले ॥ घातयति हन्ति तच्छीलः । णिनिः ॥

घातिपची । पुं । श्येने ॥

घुटिका

घातुकः । त्रि । क्रूरे ॥ हिंस्रे ॥ क्षति । इन० । क्षपणतत्परे च्युकर्म् ॥

घात्यः । त्रि । हननयोग्ये ॥ यथा । सत्यं भावं न विशति व्यपनुदति यः कर्मनाश्ये घटादि मिथ्याभूत च कर्म क्षपयति न तथा विशिघात्यं यत स्तत् । इत्थं सिद्धे विभागे श्रुति शिखरगिरा विशिघात्यप्रतीतेर्यन्मो मिथ्ये तिसिद्धे न तदपहतये कर्म जातं समर्थं मिति ॥

घारः । पुं । सेचने ॥ इति हेमचन्द्रः ॥

घारि । न । छन्दोविशेषे ॥ रंविधाय सं निधाय । घारिनाम वृत्तभेदे ॥ यथा । रामराम रामराम रामराम । सारमे तदेव नाम ॥

घार्षिकः । पुं । घृतपूरे ॥

घासः । पुं । यवसे । स्वनामाख्याते तृणे ॥ अद्यते गवादिभि । अद° । घञ् । घसेर्भश्चेति अदेर्घस्भृ ॥

घासि. । पुं । अग्नौ ॥ भक्ष्ये ॥ घसति । घस्लृ अदने । अनिघसिभ्यामिण् ॥

घुः । पुं । ध्वनौ ॥ इतिजटाधर. ॥

घुटः । पुं ।
घुटिः । स्त्री ।
घुंटिकः । पुं । } पादग्रन्थौ । गुल्फे । टकुमा इतिभाषा ॥

घुटिका । स्त्री । गुल्फे । पादग्रन्थौ ॥ घोटतेऽनया । घुटिपरिवर्त्तने ।

घूकः

कुन् । टाप् । इत्वम् ॥

घुटी । स्त्री । गुल्फे ॥ इति हरूपः ॥

घुणः । पुं । काष्ठकृमौ । काष्ठवेधके ॥ घोणते । घुणभ्रमणे । इगुपधेतिकः ॥

घुणप्रिया । स्त्री । दन्त्याम् । उदुम्बरपर्ण्याम् ॥

घुणवल्लभा । स्त्री । अतिविषायाम् ॥ इतिभावप्रकाशः ॥

घुण्टः । पुं ।
घुण्टकः । पुं । } गुल्फे । पादग्रन्थौ ॥

घुण्ड. । पुं । भृङ्गे ॥ घोणते । घुण° । ऋादिभ्यःकिदितिण्ड. ॥

घुर्घुरः । पुं । यमकीटे । घुर्घुरिया इतिगौडभाषा ॥ शूकरशब्दे ॥

घुर्घुरी । स्त्री । जलजन्तुविशेषे । ह्रस्किरायाम् ॥

घुलञ्च. । पुं । गवेधुकायाम् ॥

घुलघुलारवः । पु । पारावतभेदे ॥

घुषित. । त्रि । शब्दिते ॥ शब्देन प्रकटीकृताभिप्राये वाक्ये ॥ घुषिरविशब्दने । क्त ॥

घुष्टः । त्रि । शब्दिते ॥ घुष्यतेस्म । घुषिर्° । क्त ॥

घुष्टान्नम् । न । कोशभोक्ष्येषु दृश्यते । घाटी दीयमानेऽन्ने ॥

घुसृणम् । न । कुङ्कुमे ॥

घूकः । पुं । कौशिके । उलूके ।

घृणिः

घूकारिः । पुं । वायसे । काके ॥
घूकावासः । पुं । श्रीखोटद्रुमे ॥
घूर्णः । पुं । ग्रीष्मसुन्दरके । गुमा इति प्रसिद्धे ॥
घूर्णनम् । न । चक्रावर्त्ते । भ्रमणे ॥
घूर्णायमानः । त्रि । भ्राम्यमाणे ॥ घूर्णा यमानेक्षणेतियथा ॥
घूर्णिः । स्त्री । घूर्णने ॥
घूर्णित. । त्रि । प्रचलायिते । भ्रमिते । यउपविष्टो निद्रयाघूर्णते तस्मिन् ॥ घूर्णतेस्म । घूर्णभ्रमणे । गत्यर्थेति क्तः ॥ घूर्णासञ्जातास्यवा । तारकादित्वादितच् ॥ कम्पिते ॥
घूर्ण्यमानः । त्रि । भ्राम्यमाणे ॥ वायुनाघूर्ण्यमानोवृक्षः ॥
घृणा । स्त्री । कृतौ यायाम् । जुगुप्सायाम् ॥ करुणायाम् ॥ कृपायाम् ॥ घृयन्तऽनया । घृसेचने । वाहुलकान्नक् । टाप् ॥ घर्णनम् । घृणुङ्नौ सौ । भिदादित्वाङ्वा ॥
घृणावासः । पुं । कुष्माण्ड ॥ त्रि । घृणायुते ॥
घृणिः । पुं । किरणे । अंशौ ॥ ज्वालायाम् ॥ तरङ्गे ॥ सूर्ये ॥ घरति । घृ० जिघर्त्तिवा । घृचरणदीप्तौ । घृणिघृश्रीतिनिप्रत्ययो गुणाभावश्चनिपातितः ॥

घृतम्

घृतम् । त्रि । प्रदीप्ते ॥ न । जले ॥ आज्ये । पक्वनवनीते । सर्पिषि ॥ अस्यगुणाः ॥ घृतं रसायनं स्वादु चक्षुष्यं वह्निदीपनम् । शीतवीर्यं विषालक्ष्मीपापपित्तानिलापहम् ॥ अत्यभिष्यन्दिकान्त्योजस्तेजोबलवर्णबुद्धिकृत् । स्वरस्मृतिकरं मेध्यमायुष्यं बलकृद्गुरु ॥ उदावर्त्तज्वरोन्माद शूलानाहव्रणान् हरेत् । स्निग्धं कफकरं रक्तपित्तवीसर्परक्षनुत् ॥ * ॥ गव्यं घृतं विशेषेण चक्षुष्यं हृद्य मग्निकृत् । स्वादुपाकरसं शीतं वात पित्तकफापहम् ॥ मेधालावण्यकान्त्योजस्तेजोवृद्धिकरं परम् । अलक्ष्मीपापरक्षोघ्नं वयसःस्थापकंगुरु ॥ बल्यं पवित्र मायुष्यं सुमङ्गल्यं रसायनम् । सुगन्धं रोचनं चारु सर्वाक्ष्येषु गुणाधिकम् ॥ * ॥ माहिषन्तु घृतं स्वादु पित्तरक्तानिलापहम् । शीतलं श्लेष्मलं वृष्यं गुरु स्वादुविपच्यते ॥ * ॥ आज माज्यं करोत्यग्निं चक्षुष्यं बलवर्द्धनम् । कासे श्वासे क्षये चापि हितं पाके भवेत् कटु ॥ * ॥ घृतं दुग्धभवं ग्राहि शीतलं नेत्ररोगहृत् । निहन्ति पित्तदाहास्रमदमूर्च्छाश्रमभ्रान्तीन् ॥ * ॥ घृ

घृतकु

नकम् । हैयङ्गवीनं चक्षुष्यं दीपनंरुचिकृत् परम् । बलकृद्बृंहणं वृष्यं विशेषाज्जवरनाशनम् ॥ * ॥ वर्षादूर्द्धंभवेदाज्यं पुराणं तत् त्रिदोषनुत् । मूर्च्छाकुष्ठविषोन्मादापस्मारतिमिरापहम् ॥ यथायथाऽखिलं सर्पिः पुराणं मधिकं भवेत् । तथा तथागुणै स्वै स्वै रधिकंतदुदाहृतम् ॥ * ॥ योजये त्सव मेवाज्यं भोजने तर्पणे श्रमे । बलक्षये पाण्डुरोगे कामलानेत्ररोगयोः ॥ * ॥ राजयक्ष्मणि वाते च दद्दे श्लेष्मकृते मदे । रोगे शस्ते विषूच्यां च विबन्धे च मदात्यये ॥ ज्वरेच दहने मन्दे नसर्पिर्बहुमन्यते ॥ * ॥ घृत मद्यात् परं पक्वं हीनवीर्यंच्च मामुयात् । तैलं पक्व मपक्वंवा चिरस्थायि गुणाधिकमिति ॥ * ॥ औषधघटित पक्वघृतस्य पूर्णवीर्यत्वं षण्मासपर्यन्तं तिष्ठति ॥ म्रियते जिघर्त्तिवा । इ० । अस्निग्धस्निग्धः क्त. ॥

घृतकरञ्ज । पुं । करञ्जभेदे । प्रकीर्य्ये । घृतपर्णके । घियाकरञ्ज इति भाषा ॥

घृतकुमारिका । स्त्री । घृतकुमार्याम् ॥

घृतकुमारी । स्त्री । कुमार्याम् । सधायाम् । तरुण्याम् ॥

घृतपू

घृतदीधिति. । पुं । अग्नौ ॥

घृतपर्णक । पुं । घृतकरञ्जे ॥

घृतपूरः । पुं । धेवरप्रतिप्रसिद्धेपक्वान्नविशेषे । घृतवरे । पिष्टपूरे ॥ यथा । मर्दितां समितीं चीरनारिकेलघृतादिभिः । अवगाह्य घृते पक्त्वा घृतपूरोऽयमुच्यते ॥ घृतपूरो गुरुर्दोष्यः कफकृद्रक्तमांसद । रक्तपित्तहरोहृद्य. स्वादुः पित्तहरोमिद. ॥ अपिच । चीरेण मर्दितं चूर्णं गोधूमानां सुशोभितम् । विस्तार्य सर्पिषा पाच्यं कंटाहेऽथ सितान्वितम् ॥ घृतपूरोऽयमुद्दिष्ट. कर्पूरमरिचान्वितः ॥ नारिकेरजलेषु । समिता मर्दिता चीरे नारिकेलसितार्द्रकैः । अवगाह्य घृते पाच्या घृतपूरोऽपरः स्मृत. ॥ दुग्धजोपि । पाकपिण्डीकृतं चीरंशर्करा चूर्णमिश्रितम् । घृत पूरविनिर्माणं कारयेत् स्वल्पसर्पिषि ॥ शालिभवोपि । सुशालिपिष्टं दुग्धन्तु क्षौद्रितं वस्त्रशोभितम् । खण्ड युक्तं घृते पक्वं घृतपूरो भवेदयम् ॥ कशेरुजोपि । कशेरुचूर्णं निक्षिप्य पाकपिण्डीकृतं पय. । निर्माणं घृतपूराणां शर्करासहितं भवेत् ॥ आम्ररसभवोपि । पक्वाम्रस्य घृते तस्मे रसस्यनकपिण्डितः । गुडशर्करया

घृष्टः
योज्यो घृतपूरो यदृच्छया ॥ क्षीर भाण्डं स्वरूपंहि खण्डं चूर्णं ततः स्मृतम् । योजिते योविशेषो ऽघृतदा खास्वर्णसंज्ञितः ॥ घृतपूरो गुरुर्दृष्यो हृद्यः पित्तानिलापहः । सद्यः प्राणप्रदो वल्यः सुरुच्यो ग्निप्रदीपनः ॥ शृङ्गाटकमुखाना मप्येवंस्याद् घृत पूरकः । विचार्य वस्तुसंयोगं तद्गुणा नभिधास्यरेदिति ॥

घृतपूपः । पुं । घृतपूर्णकः । पुं । } करञ्जवृक्षे ॥

घृतमण्डिका । स्त्री । हंसपदीवृक्षे ॥

घृतमण्डा । स्त्री । वायसुरयी इतिख्या ते वायसोलीवृक्षे ॥

घृतवरः । पुं । घृतपूरे । घेवर इति भाषा ॥

घृता । स्त्री । घृतमण्डायाम् ॥

घृताची । स्त्री । अप्सरोविशेषे ॥

घृताचीगर्भसम्भवा । स्त्री । स्थूलैलायाम् ॥

घृताह्वः । पुं । घृताह्वयः । पुं । } सरलवृक्षे ॥

घृतेली । स्त्री । पिङ्गकपिङ्गायाम् ॥

घृतोदः । पुं । घृतार्णवौ ॥ घृतमुदकंयस्य । उत्तरपदस्यचेत्युदकस्योदः ॥

घृष्टः । त्रि । घर्षिते । निघृष्टे । घसा इति भाषा । पुं । गन्धविशेषे ॥ यथा

घोटकः
। घृष्टोमलयजो गन्धः सरलश्च नमे कथा । अगुरुप्रभृतिश्चापि यस्यगंधः प्रदीयते । घृष्टासघृष्टो गन्धोऽयं द्वितीयः परिकीर्त्तितइति ॥

घृष्टिः । पुं । किरौ । वराहे ॥ स्त्री । घर्षणे ॥ स्पर्द्धायाम् ॥ विष्णुक्रान्तायाम् । अपराजितायाम् ॥ वाराह्याम् । चामर आलु इति गौड भाषा ॥ घर्षति । घृषु सङ्घर्षे । क्तिन् ॥

घृष्टिका । स्त्री । चित्रपर्णिकायाम् । पृश्निपर्ण्याम् ॥

घृष्विः । पुं । वराहे । शूकरे ॥ घर्षति । घृषु० । कृविघृष्विक्षिविखविकिकीदिविरिति किन्नन्तोनिपातसिद्धः ॥

घेच्चुलिका । स्त्री । कौञ्चादने । घेचु इतिगौडभाषा ॥

घोङ्कः । पुं । खगान्तरे ॥

घोटः । पुं । अश्वे । घोटके ॥ घोटते । घुटपरिवेष्टने । पचाद्यच् ॥

घोटकः । पुं । घोडा इतिभाषाप्रसिद्धे पशुविशेषे । अश्वे । तुरगे । पीतौ । तुरङ्गमे ॥ अथाऽश्वलक्षणम् । दीर्घग्रीवाविकूटास्थिकटिहृदयपृष्ठ स्तनाताल्वोष्ठनिम्न, सूक्ष्मत्वक्केशवाल सुभगतिमुखो ह्रस्वकर्णोष्टपुच्छः । लङ्घालानूरुवृत्त, समसितदशनश्चा

रसंस्थानरूपो वाजी सर्वाङ्गशुद्धो भवति नरपतेः शत्रुनाशाय नित्यम् ॥ * ॥ अशुभानां रोमावर्त्तानां लक्षणमाह । अस्रुपातहनुग ण्डहृल्ललाटोदरशङ्खकटिवस्तिजानुपु मुष्कनाभिककुदे तथागुदे सव्यकुक्षिचरणे तथाऽशुभाः ॥ ७ ॥ शुभावर्त्तानाह । ये प्रपानगलकर्णसंस्थिताः पृष्ठमध्यनयनोपरिस्थिताः । ओष्ठसक्थिभुजकुक्षिपार्श्वगा स्तेललाटसहिताः सुशोभनाः ॥ * ॥ भ्रुवावर्त्तानाह । तेषां प्रपान एको ललाटकेशेषु च भ्रुवावर्त्ताः । रन्ध्रोपरन्ध्रमूर्द्धनि वक्षस्तिचेतिस्मृतौ द्वौ द्वौ ॥ ॥ अश्वानांवयोज्ञानमाह । षड्भिर्दन्तैः सितामै र्भवति हयश्मिशुक्लैः कषायै र्द्विवर्षः सन्देशै र्मध्यमान्यैः पतितसमुचितैरव्यब्दपञ्चाब्दकाश्वाः ॥ सन्देशानुक्रमेण विकपरिगुणिताः काश्यिकापीतशुक्लाःकाचामक्षीकश्च ह्यावटचलन मतो दन्तपातश्चविद्वि ॥ इतिवाराङ्गांचतुष्पष्ठितमो ध्यायः ॥ ६४ ॥

घोटकारिः । पुं । अहिपे ॥

घोटकेक्षितम् । न । अश्वचेष्टायाम् ॥

सायणा । उत्सर्गो ह्यशुभदर्शनात्परस्य वामेचञ्चलन मतोऽपरं प्र

शस्तम् । सर्वाङ्गस्खलनं भवद्विद्वं ह यानांद्ववर्षे दहनकणाश्च धूपनं वा ॥ अन्तः पुरं नाशमुपैति मेढ्रे कोशः क्षयं याक्युदरे प्रदीप्ते । यायी च पुच्छेच पराजयः स्याद्वल्गोत्तमाङ्गस्खलने जयश्च ॥ स्कन्धासनांसस्खलनं जयाय बन्धाय पादस्खलनं प्रदिष्टम् । ललाटवक्षोभिमुखेच धूमः पराभवाय स्खलनंजयाय ॥ नासापुटप्रोथशिरोसृपानेत्रेच रावोस्खलनं जयाय । पलाशतासासितकर्बुराणां निस्यं शुकाभस्य सितस्य चेष्टम् ॥ प्रद्वेषो यवसो भासां प्रपतनंस्वेदोनिमित्तं विना कम्पोधावदनाच्च रक्तपतनं धूमस्यवा सम्भ्रमः । अस्यम्बु विरोधिनां निशि दिवा निद्रालसं ध्यानता सादोऽधोमुखता विचेष्टितमिदं नेष्टं स्मृतं वाजिनाम् ॥ आरोहण मन्यवाजिनां पर्यायादियुतस्य वाजिनः । उपयाद्यातुरङ्गमस्यवा कल्पस्यैव विपन्नशोभना ॥ * ॥ हेषितलक्षणमाह । क्रौञ्चवद्विपुथयाय हेषितं ग्रीवया स्वचलयाच सोन्मुखम् । स्निग्धमुच्च मनुनादि हृष्टवद्वासस दवदनैश्च वाजिभिः ॥ पूर्णपात्रदधिविप्रदेवतागन्धपुष्पफलकाञ्चनादिकम् । हस्य मिष्ट मथवाऽपरं भ

वे द्वेषतां यदि समीपतो जयः ॥ भक्ष्यधानखलिनाभिनन्दिनः पक्ष्युरौपयिकनन्दिनो ऽथवा । सव्यपार्श्वगतदृष्टयो ऽथवा वाञ्छितार्थफलदा स्तुरङ्गमाः ॥ वामै श्च पादै रभिताडयन्तो मर्द्दीं प्रवासाय भवन्ति भर्त्तुः । सन्ध्यासु दीप्ता मवलोकयन्तो हेषन्ति चेद्दन्यपराजयाय ॥ अतीव हेषन्ति किरन्ति वालान् निद्रारताश्च प्रवदन्ति याचाम् । रोमच्युजो दीन खरस्वनाश्च पांसून् ग्रसन्तश्च भया यदृष्टाः ॥ * ॥ समुन्नवद्दक्षिण पार्श्व शायिन' पादसमुत्क्षिप्यच दक्षिण स्थिताः । जयाय शेषेष्वपि वाहनेष्वि दंफलं यथा सम्भव मादिशे द्बुधः ॥ अरोहति क्षितिपतौ विनयोपपन्नो यात्रानुगो न्यतुरगं प्रतिहेषितश्च । । यत्कोण वा स्पृशति दक्षिण मात्म पार्श्वं येो ऽश्व समर्त्तु रचिरात् प्रचिनोतिलक्ष्मीम् ॥ मुहुर्मुहु र्मूत्रयकृत् करोति न ताड्यमा नेोप्य ऽनुलेा मयायी । अवार्यभीतो ऽसुविलेा चनश्च शिवं न भर्त्तु स्तुरगो ऽभिधत्ते ॥ इति वाराह्यां ९१ अध्यायः ॥

घोटिका । स्त्री । दृक्तारोगभेदे । लोनी इतिभाषा ॥ घोटिका ऽक्षरसा घोष्णा वातहृत् कफपित्तयुत् । त्वग्दोषव्रणगुल्मघ्नी श्वासकासप्रमेहनुत् ॥ शोथे लोचनरोगेच हिता तज्ज्ञै रुदाहृता ॥ दृक्त्वविशेषे । तु रङ्ग्याम् । चतुरङ्गायाम् ॥

घोणा । स्त्री । नासायाम् ॥ शोथे । अश्वनासिकायाम् ॥ घोणति अनया वा । घुण भ्रमणे । अच् टाप्च इत्यच् घञ्वा ॥

घोणी । पुं । वराहे । स्तब्धरोमणि ॥ घोणानासाऽस्त्यस्य । व्रीº इनिः ॥

घोण्टा । स्त्री । वदर्याम् । गोपघोण्टायाम् । झाडबेरी इति भाषा ॥ पूगदृक्षे ॥ घोणते । घुणº । बाहुलका त् टः ॥ वदरीफलवृक्षयोः ॥

घोत्कारः । पुं । नासिकायाःशब्दे । घुराँटा इति भाषा ॥

घोनसः । पुं । गोनसे । तिलित्सेसर्पे ॥

घोर । पु । त्रिपुरान्तके ॥ आङ्गिरस गोषोत्पन्ने ऋषिविशेषे ॥ आकाशादिषु स्थूलेषु दुःखप्रकाशकाः अनवस्थिता. रजःप्रधानतया केचिद्विशेषा स्तेच घोरसंज्ञकाः ॥ न । विशे ॥ चि । दारुणे । भयानके ॥ हिंसाद्यनेकायासबहुलेक्रूरे ॥ परस्यात्मनश्चपीडाकरे ॥ दुर्गमे ॥ घोरयति । घुरभीमार्थशब्देभ्यः । गुणादच् ॥ यदा । हन्यते । हनº । हन्तेरच्घुरजि

घोषः
क्यच् धातोर्घुरादेशः ॥
घोरदर्शनः । पुं । उलूके ॥ त्रि । भयानकरूपे ॥
घोरपुष्पम् । न । कांस्ये ॥
घोरवासनः । पुं । घोरवासी । पु । } शृगाले । भूरिमाये ॥
घोरवासितम् । न । भयानकशब्दे ॥
घोरा । स्त्री । रात्रौ ॥ देवदालीलतायाम् ॥ भयानकायाम् ॥ सङ्क्रान्तिविशेषे ॥ रवावुग्रभे सङ्क्रमे भास्करस्यवेद्घोरनाम्नी सुखी शूद्रवर्गः ॥ राजस्यां मनसोवृत्तौ ॥
घोलम् । न । मथितेदधनि । दण्डाहते ॥ सरं निर्जलं घोलं वातपित्तहरं स्मृतम् ॥ * ॥ मस्तुना रहितं गाढं दधिशुभ्रतरे पटे । जीरसैन्धवसम्मिश्रं घोलं घनतरं स्मृतम् ॥ जीरसैन्धवसंयुक्तघोलवातप्रनाशनम् । अतीसारेच मन्देग्नौ हितं कच्चं बलप्रदम् ॥
घोषिः । स्त्री । } पक्षिविशेषे । कुक्कासुकायाम् ॥
घोषिका । स्त्री । }
घोषी । स्त्री । }
घोष । पुं । आभीरपल्ल्याम् ॥ घोषन्तिगावोऽत्र । घुषिर्विशब्दने । इसञ्चेतिघञ् ॥ गोपाले ॥ ध्वनौ ॥ शब्दनादे ॥ अपामार्गे ॥ घोषके

घ्राणम्
॥ बाह्यप्रयत्नविशेषे ॥ पुं । कांस्ये ॥
घोषणम् । घुषघुष्टौ । घञ् ॥
घोषकः । पुं । महाकोशातक्याम् । शेतघोषके ॥ घोषति । घुषिर्० । पचाद्यच् । स्वार्थेकन् ॥
घोषकाकृतिः । पुं । घोषके ॥
घोषणा । स्त्री । उच्चैर्घुष्टे । लोकविज्ञापनायोच्चैः शब्दिते ॥ यथा । न कर्मणा कनीयस्त्वं ब्रह्मिष्ठा नान्तरात्मनः । इति बाहुमिवोद्धृत्य वेदान्ते घोषणा कृतेति ॥ घुषिर्० । ल्युडसम्भवो युच् ॥
घोषयित्नुः । पुं । विप्रे ॥ कोकिले ॥ घोषयति । घुषिर्० । बाहुलकात् इत्नुच् ॥ वन्दिनि ॥
घोषवती । स्त्री । वीणायाम् ॥
घोषा । स्त्री । मधुरिकायाम् ॥ शतपुष्पायाम् ॥ कर्कटशृङ्ग्याम् ॥ कोशातक्याम् । तुरयी तोरयी इति ख्यातसिद्धे फलभाके ॥
घ्नन् । त्रि । नुदति ॥
घ्राणम् । न । नासिकायाम् । घ्रायतेऽनेन । घ्राणन्द्रियोपादाने । करणेल्युट् ॥ घ्रायतेस्मया । घ्राण० । क्त । नुदविदेति वा नत्वम् ॥

घ्रातः
घ्राणतर्पणः । पुं ॥ सुगन्धौ ॥
घ्राणदुःखदा । स्त्री । छिक्कन्याम् ॥
घ्रातः । त्रि । घ्राणविषयीकृते पुष्पादौ
। आघ्रातगन्धे । आघ्राते । घ्राणे ॥ घ्रा
यते स्म । घ्रा० । क्त० । नुदविदेति
पाक्षिकोनत्वाभावः ॥

ङः
घ्राति: । स्त्री । घ्राणे । नासिकायाम् ॥
घ्राते ॥ घ्राणम् । घ्रा० । क्तिन् ॥

ङः
ङः । पुं । विषये ॥ विषयस्पृहायाम्
॥ भैरवे ॥ ङ कारे ॥ * ॥ * ॥

इत्यादिगौडकुलोत्पन्नाडीचवालप्रधानोपनामतुलारामभिश्रात्मज श्रीधनपतिभिश्रापरनाम्ना तथा श्रीसद्गुरुकुलावधूतश्रीपरमहंसपरिव्राजकाचार्यश्रीमद्धरिहरानन्दनाथभारतिशिष्येण ब्राह्मावधूतश्रीसुखानन्दनाथपरनामधेयेन विरचिते शब्दार्थचिन्तामणौ कवर्गः समाप्तिङ्गतः ॥ * ॥ * ॥

सर्वार्थसिद्ध्यै सर्वेषां सुखानन्देन निर्मितः ॥
श्रीघासीरामभिश्रैस्तु मुद्राङ्किया प्रकाशितः ॥

वैक्रमे १९२१ वर्षे । शालिवाहनीये १७८६ शके मार्गशीर्षासितैकादश्यां सुराचार्यवारे सुप्रपुरे श्रीघासीरामकनङ्खियालालयोः स्वकीयसंस्कृतयन्त्रे वर्णयोलकाध्यक्षकायस्थवंशोद्भव श्रीरामप्रसाददासदृष्ट्या मुद्राङ्कितः ॥

BHARATIYA VIDYA BHAVAN LIBRARY S. N.